श्रीः

श्रीमते श्रीरामानुजमहादेशिकाय नमः

सर्वतन्त्रस्वतन्त्र श्रीवेदान्तदेशिकगुरुविरचिता

॥ शतदूषणी ॥

(चतुर्विंशवादमारभ्य षट्षष्टितमवादपर्यन्तो द्वितीयो भागः)

[illegible] व्याख्यया अनुबन्धरूपेण वादार्थसंग्रहेण च सहिता

व्याख्याकारः [illegible]

[illegible]

[illegible]

प्रकाशकः

[illegible] विद्वान् [illegible]

[illegible]

SRIRANGAM SRIMAD ANDAVAN ASHRAMAM, CHENNAI

[illegible]

[illegible]

2005

CSUGCKL 3
R65(DDC:181.48)
39370
Acc.No: 39370

CAT. Nos. 132102
HOLD ID:
BOOK No: 2
LOCATION: 84-B-3

[illegible]

श्री:



श्रीमते श्रीरङ्गरामानुजमहादेशिकाय नम:

सर्वतन्त्रस्वतन्त्र श्रीवेदान्तदेशिकानुगृहीता

॥ शतदूषणी ॥

(चतुस्त्रिंशवादमारभ्य षट्षष्टितमवादपर्यन्तो द्वितीयो भाग:)

तात्पर्यप्रकाशिकाख्यव्याख्यया अनुबन्धरूपेण वादार्थसंग्रहेण च सहिता

व्याख्याकार: वादार्थसंग्रहकारश्च

नावल्पाक्कं, चतुर्वेदशतक्रतु-सर्वतन्त्र-वाचस्पति

शठकोपरामानुजतातयार्यदास:

Central Sanskrit University, Ministry of Education
Puranattukara P.O.
Thrissur-680551
LIBRARY
Guruvayoor Campus Library

प्रकाशक:
श्रीकार्यकर्ता विद्वान् श्रीनरसिंहराघवाचार्य:
श्रीरङ्गं श्रीमदाण्डवनाश्रम:
SRIRANGAM SRIMAD ANDAVAN ASHRAMAM, CHENNAI.

(पार्थिव वैशाख-आर्द्रायां श्रीरङ्गक्षेत्रे आण्डवन्
श्रीरङ्गरामानुजमहादेशिकानां सप्ततितममहोत्सवावसरे प्रकाशिता)

2005

1st Edition 2005
Copies - 1000
All Rights Reserved

Central Sanskrit University
Ministry of Education, Govt. of India
Guruvayoor Campus Library
Puranattukara.P.O., Thrissur-680551
Acc.No. 39370
Acc.Date 27/02/2026

Price Rs. 1000/-

Copies Can be had :
Srirangam Srimad Andavan Ashramam
#21, Desikachariya Road,
Alwarpet, Chennai - 600 018.

Prited at :
Elango Achukoodam,
#166, Royapettah High Road,
Mylapore, Chennai - 600 004.
Phone : 24991821



பெருந்தேவித்தாயார் பேரருளாளன் (தேவராஜன்) காஞ்சீபுரம்



ஸ்ரீ ஸ்வாமி தேசிகன்


॥ ஶ்ரீ: ॥
ஸ்ரீ ரங்கநாத திவ்யமணி பாதுகாப்யாம் நம:

ஸ்ரீமத் ஆண்டவன் (ஸ்ரீமுஷ்ணம்)
ஸ்ரீ ரங்கராமானுஜ மஹாதேஸிகன்

Sri

Srimathe Rangaramanuja Mahadesikaya Namaha
Srimathe Srinivasa Ramanuja Mahadesikaya Namaha
Srimathe Vedantha Ramanuja Mahadesikaya Namaha
Srimathe Ranganatha Mahadesikaya Namaha

Srimathe Srinivasa Mahadesikaya Namaha
Srimathe Nigamantha Mahadesikaya Namaha
Srimathe Baghawathe Bashyakaraya Mahadesikaya Namaha
Sri Ranganatha Divyamani Padukabyam Namaha

SRIRANGAM
SRIMADANDAVANASHRAMAM

H.Qrs. Melur Road, Srirangam,
Tiruchirppalli 620 006 Phone : 0431 - 432379

Camp : **Chennai.**

Date : **31/05/2005W"**

॥ श्रीमुखम् ॥

हेयगुणभिन्नानन्तकल्याणगुणसदनश्रीहयवदनकरुणापरिणामभूततन्नादजातरूपजातरूपवादजातरूपेण, मरीचिकानिवहमध्यमदेशमहोदध्यन्वेषणसध्रीचिरुचिरुचिरगतिमेदुरसर्वप्रमाणाप्रामण्यापादकशून्यवादसनाभिवन्ध्यासुतवादसनाथानिर्वचनीय मिथ्याशबलितनिर्गुणब्रह्मवादवावदूककथककुलकन्थासगन्धप्रबन्धाविलजडाशयमनोनैर्मल्यदायककतकभूतेन, शतदूषणीग्रन्थेन परपक्षक्षपणपूर्वकस्वपक्षपरिपालनं कृतं सत्संप्रदायानुगुणाप्रमेयमतिगतिततिभिः कवितार्किककेसरीसर्वतन्त्रस्वतन्त्रेत्यादिबहुबिरुदभाग्भिः अनितरसाधारणवाग्भिः श्रीमन्निगमान्तमहादेशिकैरस्मद्देशिकवरैः श्रीवेङ्कटनाथेत्यपरनामधेयैः श्रीमद्रामानुजसंप्रदायभागधेयभूतैः ।

यद्यपि विद्यते विपुला प्रबला च प्रचण्डविद्वत्प्रकाण्डश्रीमहाचार्यकृतास्य व्याख्या चण्डमारुताख्या तथापीयं व्याख्या झटिति ग्रन्थिलग्रन्थार्थग्रहणयोग्या भोग्या मनोज्ञा सर्वतन्त्रवाचस्पति-नावल्पाक्क-श्रीशठकोपरामानुजतातयार्यकृता मूलानुगुणा अनतिसंक्षेपविस्तारा अपेक्षितार्थप्रकाशिका च । महामहोपाध्यायकुलपतिमहनीयै-तदाचार्यकृतैद्व्याख्यावैभवस्सुविदितो भविष्यत्यध्यापकानामध्येतॄणां चाचिरादेवेत्युक्त्वा सर्वलोकहितं सर्वदैवमहितं माययामया च सहितं स्मृत्वा मया विरम्यते ।

नारायण ! नारायण !! नारायण !!!

इत्थमनुगृहीतं

श्रीरङ्गरामानुजमहादेशिकवरैः



ஸ்ரீ N.S. ராமானுஜ தாதாசாரியார்

श्रीः



श्रीमान् वेंकटनाथार्यः कवितार्किककेसरी ।
वेदान्ताचार्यवर्यो मे संनिधत्तां सदा हृदि ॥

प्रास्ताविकं किंचित्

गतवर्षे शतदूषण्याः दासकृततात्पर्यप्रकाशिकया सह आदितः त्रयस्त्रिंशवादपर्यन्तस्य प्रथमभागस्य श्रीमद्वेदमार्गप्रतिष्ठानाचार्याणां परमहंसपरिव्राजकाचार्याणां श्रीभगवद्रामानुसिद्धान्त निर्धारणसार्वभौमानां श्रीमन्नाथमुनिश्रीमद्यामुनमुनिश्रीमद्रामानुजमुनिरूपमुनित्रयसिद्धान्तस्थापनाचार्याणां सकलकलावल्लभानां पेरियाश्रम-श्रीमुष्णं श्रीमदाण्डवन् श्रीमदङ्गरामानुजमहादेशिकानां करकमलाभ्यां सुभानु-फालगुन-पुष्ये (31-3-2004) प्रकाशनमभूत् । तत्र प्रस्तावनायाम् - ''त्रयस्त्रिंशवादपर्यन्तमिदानीं प्रथमभागरूपेण प्रकाश्यते । अवशिष्टत्रयस्त्रिंशद्वादानामपि इतः परमेव व्याख्यानं लेखनीयम् । अनतिविलम्बेन कार्यस्यास्य पूरणं भगवद्भागवताचार्यानुग्रहेण श्रीमदाण्डवन् स्वामिनां परया कृपया च संपद्येतेति विश्वसिमि'' इति व्यजिज्ञपम् । स महाविश्वास इदानीं फलेग्रहिरभूत् । अतिमहदिदं कैङ्कर्यं वर्षेणैकेनैव संपन्नम् इत्युक्ते तत्र पूर्वोक्तानां महतामनुग्रह एव कारणमित्यत्र न कोऽपि संदेहः । ग्रन्थस्तर्कानुमानजटिलः । शाब्दबोधमीमांसाख्य-ग्रन्थस्य लेखनमप्यस्मिन्नेव वर्षे पूरणीयमिति निर्बन्धः । पदे पदे शरीरास्वास्थ्यम् । सत्स्वप्येतेषु श्रमेषु प्रतिदिनं यथावकाशं सर्वासां मूलपङ्क्तीनाम् अर्थावगमपूर्वकं लेखनेन व्याख्यानस्यास्य पूरणं संजातम् ।

अपि च छात्राणां जिज्ञासूनां च सौकर्याय वादार्थसंग्रहोऽपि लेखनीयः । प्रथमतः वादार्थसंग्रहं दृष्ट्वा अनन्तरं ग्रन्थपठने श्रमं विना विषयावगाहनं भवेत् तेषाम् इति श्रीमदाण्डवन् स्वामिनां नियमनमासीत् । तदपि शिरसा ऊढ्वा षट्षष्टिवादानां प्रतिपाद्यार्थाः दासेन संगृहीताः । सोऽपि वादार्थसंग्रहः अनुबन्धरूपेण इदानीं संयोज्य प्रकाश्यते । व्याख्यानेऽनुबन्धे वा यदि क्वचित् दोषाः स्युः तत्र दासस्याज्ञानमनवधानं वा कारणम् । यदि गुणाः स्युः तदा तत्र आचार्याणाम् आण्डवन् स्वामिनां चानुग्रहः कारणम् । तस्मात्

> ''गुणदोषौ बुधो गृह्णन्निन्दुक्ष्वेलाविवेश्वरः ।
> शिरसा श्लाघते पूर्वं परं कण्ठे नियच्छति ॥''

इति न्यायेन विद्वांसः अनुगृह्णीयुरिति प्रार्थये । प्रथमभागे मुद्रणे काश्चन अशुद्धयः संजाताः तासां शोधनिका अत्र भागे संयोजिता । तदनुसारं शोधयित्वा पठन्तु ।

पूर्ववत् अतिसंकुचिते काले मूलव्याख्यानयोः शोधने प्रतिपृष्ठं मूलभागस्याधस्तात् व्याख्यानमुद्रणे च डा. वीलिनाथन् महाभागैः उपकारः आचरितः । अतस्तेभ्यः कृतज्ञतां निवेदयामि । स्वल्पे काले महान्तमिमं द्वितीयभागं मुद्रापितवते इलङ्गो मुद्रणालयाधिकारिणे एम्.एस्. मणियवन् महाशयाय मङ्गलानि आशासे ।

अन्ते पुनरपि एतद्भागद्वयलेखनप्रकाशनयोः मूलकारणभूतानां श्रीमदाण्डवन् श्रीरङ्गरामानुजमहादेशिकानां चरणारविन्दयोः साष्टाङ्गप्रणतीः समर्प्य धन्यो भवामि ।

चेन्नै
24-5-2005

इति विद्वज्जनवशंवदः

एन्. एस्. रामानुजताताचार्यः

श्रीः

श्रीशतदूषणीविषयसूची

वादसंख्या विषयः पृष्ठसंख्या

34. उपदेशानुपपत्तिवादः 1
35. तिरोधानानुपपत्तिवादः 15
36. आत्माद्वैतभङ्गवादः 33
37. जीवेश्वरैक्यभङ्गवादः ...... 72.
38. अखण्डवाक्यार्थखण्डनवादः 124
39. भावरूपाज्ञानभङ्गवादः 189
40. जीवाज्ञानभङ्गवादः 222
41. अविद्यास्वरूपानुपपत्तिवादः 237
42. मायाविद्याविभागभङ्गवादः 262
43. निवर्तकानुपपत्तिवादः 274
44. निवृत्त्यनुपपत्तिवादः 298
45. शब्दावेद्यत्वनिरासवादः 315
46. निष्प्रपञ्चीकरणनियोगभङ्गवादः 336
47. विकल्पाप्रामाण्यभङ्गवादः 350
48. उपबृंहणवैघट्यवादः 363
49. ऐक्योपदेशान्यथानुपपत्तिभङ्गवादः 371

50. परमते शास्त्राधिकारिभङ्गवादः 379

51. मुक्तसंविन्निर्विषयत्वभङ्गवादः 390

52. सगुणनिर्गुणश्रुतिव्यवस्थावादः 405

53. ब्रह्मोपादानत्वान्यथानुपपत्तिभङ्गवादः 434

54. मायोपादानत्वान्यथानुपपत्तिभङ्गवादः 464

55. कार्यान्यथानुपपत्तिभङ्गवादः 476

56. आनन्त्यनिरूपणवादः 503

57. निर्विशेषब्रह्मणः आनन्दत्वभङ्गवादः 519

58. नित्यत्वभङ्गवादः 526

59. परमते अद्वितीयश्रुतिविसंवादवादः 540

60. सत्त्वासत्त्वविवेकवादः 550

61. जीवैक्यभङ्गवादः 560

62. उपशूद्राधिकरणविरोधवादः 567

63. अधिकारिविवेकवादः 577

64. यतिलिङ्गभेदभङ्गवादः 588

65. अलेपकमतभङ्गवादः 604

66. परमते सूत्रस्वारस्यभङ्गवादः 635

* * *

श्री:

वादार्थसंग्रहस्य - विषयसूची

विषय: पृष्ठसंख्या

ब्रह्मशब्दवृत्त्यनुपपत्तिवाद: ... 663

जिज्ञासानुपपत्तिवाद: ... 664

ऐकशास्त्र्यसमर्थनवाद: ... 665

अविधेयज्ञानभङ्गवाद: ... 667

बाधितानुवृत्तिभङ्गवाद: ... 669

विविदिषासाधनत्वभङ्गवाद: ... 670

शब्दजन्यप्रत्यक्षभङ्गवाद: ... 671

साधनचतुष्टयपूर्ववृत्तत्वभङ्गवाद: ... 673

कथानधिकारवाद: ... 676

निर्विशेषस्वप्रकाशभङ्गवाद: ... 678

निर्विशेषविषयकनिर्विकल्पकभङ्गवाद: ... 681

सन्मात्रग्राहिप्रत्यक्षभङ्गवाद: ... 684

भेददूषणनिस्तारवाद: ... 687

वेदप्रामाण्यपरिग्रहानुपपत्तिवाद: ... 689

दृश्यत्वानुमाननिरासवाद: ... 690

व्यावर्तमानत्वानुमानभङ्गवाद: ... 691

दृग्दृश्यसंबन्धानुपपत्तिपरिहारवादः ... 693

बाह्यप्रकाशानुपपत्तिवादः ... 694

ब्रह्माश्रयाज्ञाननिरासवादः ... 695

अवेद्यत्वभङ्गवादः ... 696

संविदनुत्पत्तिदूषणवादः ... 698

संविन्निर्विकारत्वानुमानभङ्गवादः ... 699

संविन्नानात्वनिषेधकानुमानभङ्गवादः ... 700

निर्विशेषत्वानुमानभङ्गवादः ... 701

संविदात्मत्वभङ्‌गवादः ... 703

अहमर्थात्मत्वसमर्थनवादः ... 704

ज्ञातृत्वाध्यासभङ्गवादः ... 706

साक्षित्वभङ्गवादः ... 708

शास्त्रविरोधपरिहारवादः ... 709

असत्यात् सत्यसिद्धिभङ्गवादः ... 711

जीवन्मुक्तिभङ्गवादः ... 712

बाधार्थसामानाधिकरण्यभङ्गवादः ... 714

संविदद्वैतभङ्गवादः ... 716

उपदेशानुपपत्तिवादः ... 718

तिरोधानानुपपत्तिवादः ... 720

जीवेश्वरैक्यभङ्गवादः ... 722

अखण्डवाक्यार्थखण्डनवादः ... 723

भावरूपाज्ञानभङ्गवादः ... 725

जीवाज्ञानभङ्गवादः ... 727

अविद्यास्वरूपानुपपत्तिवादः ... 728

मायाविद्याभङ्गवादः ... 729

निवर्तकानुपपत्तिवादः ... 731

निवृत्त्यनुपपत्तिवादः ... 732

शब्दाबेद्यत्वभङ्गवादः ... 733

निष्प्रपञ्चीकरणनियोगभङ्गवादः ... 734

विकल्पाप्रामाण्यभङ्गवादः ... 736

उपवृंहणवैघट्यवादः ... 738

ऐक्योपदेशान्यथानुपपत्तिवादः ... 739

शास्त्राधिकारिभङ्गवादः ... 740

मुक्तसंबिन्निर्बिषयत्वभङ्गवादः ... 742

सगुणनिर्गुणश्रुतिव्यवस्थावादः ... 743

ब्रह्मोपादानत्वान्यथानुपपविभङ्गः ... 744

मायोपादानत्वान्यथानुपपत्तिभङ्गः ... 748

कार्यानुपपत्तिभङ्गवादः ... 749

आनन्त्यनिरूपणवाद: ... 752
निर्विशेषब्रह्मण: आनन्दत्वभङ्गवाद: ... 753
निर्विशेषनित्यत्वभङ्ग: ... 755
अद्वितीयश्रुतिविसंवाद: 756
सत्त्वासत्त्वविवेकवाद: ... 758
जीवैक्यभङ्ग: ... 759
अपशूद्राधिकरणविरोधवाद: ... 761
अधिकारिविवेक: ... 762
यतिलिङ्गभेदभङ्गवाद: ... 763
उ[illegible]पकमतभङ्गवाद: ... 763
[illegible]मते सूत्रस्वारस्यभङ्गवाद: ... 764

* * *

श्रीः
श्रीलक्ष्मीहयवदनपरब्रह्मणे नमः ।
श्रीमते रामानुजाय नमः । श्रीमते निगमान्तगुरवे नमः ।

॥ शतदूषणी ॥

॥ अथ उपदेशानुपपत्तिवादः चतुस्त्रिंशः ॥ ३४ ॥

हयमुखमुखैस्तत्तद्रूपैरकर्मविनिर्मितैरुपदिशति यस्तथ्यं पथ्यं सतामवसीदताम् ।
जननपदवीयातायातश्रमापहरां धियं जनयतु स मे देवः श्रीमान् धनञ्जयसारथिः ॥

अथ उपदेशानुपपत्तिवादः चतुस्त्रिंशः ॥

हयमुखमुखैस्तत्तद्रूपैरकर्मविनिर्मितै-
रुपदिशति यस्तथ्यं पथ्यं सतामवसीदताम् ।
जननपदवीयातायातश्रमापहरां धियं
जनयतु स मे देवः श्रीमान् धनञ्जयसारथिः ॥

अवसीदतां पथ्यमित्यन्वयः । तेभ्य इति संप्रदानमध्याहार्यम् । भाष्ये पूर्वपक्षोपन्यासे ज्ञानमात्रास्तित्वपरश्रुतिस्मृत्युपन्यासः पूर्वम् । अथ देहवैलक्षण्येऽप्यात्मावैलक्षण्यपरं वचनम्। ततः क्षेत्रज्ञं चापि मां विद्धीति गीतावचनं चोपात्तम् । तत्क्रमेणात्र संविदद्वैत-आत्मैक्यजीवैक्यविचाराः क्रियन्ते । तत्राद्वैतमते उपदेशानुपपत्तिः गीताभाष्ये विस्तरेणोपपादिता । गीतायाः कृत्स्नायाः कृष्णकृतोपदेशरूपत्वात् स विषय इहाद्वैतोपदेशरूपविष्णुपुराणवाक्यप्रस्तावेऽपि भवितुमर्हतीति विभाव्य संविदैक्यरूपप्रथमविषयविमर्शसमनन्तरमेव निवेश्यते । उपदेशानुपपत्त्यापि संविदद्वैतमयुक्तमिति तद्वाद एवान्तर्भावसंभवेऽपि पृथक्करणमस्यापि प्राधान्यप्रदानाय । अथ तिरोधानात् भेदकल्पनया

अस्ति तावत् आसर्वेश्वरादस्मदादिपर्यन्तमासंसारमनुवर्तमानो दृष्टादृष्टप्रयोजनः, सर्वसैद्धान्तिकसम्मतः शिष्याचार्यक्रमः । स एष निर्विशेषैकशेमुषीमात्रपरिशेषमुषितनिरवशेषभुवनस्य न कथंचिदपि सङ्गच्छते । तथा हि – आत्माद्वैतमुपदिशन् आचार्यः किं शिष्यतया शिक्षणीयं कंचिदपि नोपलभते, उतोपलभते ?

स्यादुपदेशनिर्वाह इति मतिमपाकर्तुं तिरोधानानुपपत्तिरप्यत्र संदर्भे निवेश्यते । ततः प्रागारब्धैक्यवादेऽप्यवशिष्टविषयवाद इति क्रमः । क्षेत्रज्ञं चापीति वाक्यपर्यन्तभाष्यग्रन्थधारणेनेदमुपन्यस्यत इति ज्ञापनायेह धनञ्जयसारथिरिति अन्ते प्रयोगः इति उत्तमूरुस्वामिनः ।

अपि च पूर्ववादे ''संविदैक्ये गुरुशिष्यपण्डितजडादिभेदश्च ज्ञानभेदनिबन्धनो निर्मूलः स्यात्'' इति आचार्यैरुक्तम् तदत्र विस्तरेणोपपाद्यत इत्यपि संगतिः । **पथ्यमिति** । जननपदवीयातायातश्रमापहरधीहेतुमित्यर्थः । **अवसीदताम्** - तापत्रयातुराणाम् । ऐक्योपदेशोऽयं कस्मै क्रियते, क्रीदृशेन क्रियते किमर्थं क्रियत इति क्रमेणात्र विचार्यते ।

आसंसारमिति । आसंसारशब्देन संसारावधिरुच्यते । संसारस्यावध्यभावपक्षे कल्पावधिरुच्यते । सर्गप्रलयपर्यन्तम् इत्यर्थः । सर्गमारभ्य प्रलयपर्यन्तं आचार्यशिष्यपरंपरा तावत् दृष्टं द्रव्यसंपादनादिरूपम् अदृष्टं स्वर्गमोक्षादिरूपं वा प्रयोजनमुद्दिश्य आचार्यः शिष्याय उपदिशति,शिष्य आचार्यात् शृणोति स पुनःस्वशिष्यायोपदिशतीत्येवंरूपा परंपरा तावदनुवर्तत इति सर्वैः सैद्धान्तिकैः सिद्धान्तनिष्ठैः अङ्गीक्रियते । स एष क्रमः परंपरा निर्विशेषशेमुषीमात्रस्य परिशेषो यथा भवति तथा मुषितकृत्स्नप्रपञ्चस्य अद्वैतिनः कथमपि न घटते । स्वप्रकाशतया ब्रह्मस्वरूपस्य प्रतिपन्नत्वात् गुणविभूत्योर्मिथ्यात्वेन तत्त्वावेदकश्रुतेस्तद्विशिष्टब्रह्मप्रतिपादकत्वासंभवात् गुरुशिष्यभेदाभावाच्च उपदेशोऽनुपपन्न इति भावः । **तथाहि** इत्यादि । आत्माद्वैतमुपदिशन् हि आचार्यः शिष्यत्वेन शिक्षणीयं कंचित् न पश्यति वा पश्यति वा । न पश्यति चेत् कस्मा उपदिशेत् । न कस्मैचिदुपदिशतीति चेन्न । तर्हि नोपदिशेदेव । एतदुक्तं भवति - उपदेशस्य संप्रदानभूतःश्रोता शिष्यः कश्चित् नास्ति चेत्

आद्ये कस्मा उपदिशेत् ॥ न कस्मैचिदिति चेत्, तर्हि नोपदिशेदेव; श्रोतृप्रतिपत्तिप्रयोजनकत्वादुपदेशस्य । अन्यथा अरण्यरुदितत्वप्रसङ्गादारण्यकोपदेशस्य॥ स्वस्मा एवेति चेन्न; उपदेष्टव्यप्रतिपत्तौ नैराकाङ्क्ष्येण श्रोतृत्वासिद्धेः । तदप्रतिपत्तौ वा अज्ञत्वेनानुपदेष्टृत्वात् ॥

द्वितीये तु स्वात्मनोऽन्यमनन्यं वा ? अन्यत्वेऽपि सत्यमसत्यं वा ?

नाद्यः, अपसिद्धान्तादिप्रसङ्गात् । न द्वितीयः, मिथ्याभूतस्य शिष्यस्य मिथ्यात्वेनोपलम्भे तदर्थमुपदेशाद्यसम्भवात् । न हि प्रतिबिम्बादित्वेन प्रतीयमानेभ्यः

उपदेशं न कुर्यादाचार्यः । श्रोतुः ज्ञानोत्पादनार्थं खलु आचार्यकर्तृकः उपदेशः । अन्यथा श्रोतृप्रतिपत्तिरूपप्रयोजनाभावे वेदान्तानामुपदेशस्य अरुण्यरोदनवदप्रयोजकत्वप्रसङ्ग इति । **आरण्यकोपदेशस्येति** । उपनिषदुपदेशस्येति मुख्योऽर्थः । अथवा अरण्येवसतः अद्वैतिनः उपदेशस्येत्यर्थः । **स्वस्मा एवेति** । आत्माद्वैतमाचार्यः स्वस्मा एवोपदिशतीति न वक्तुं शक्यते । स्वस्य श्रोतृत्वे हि स्वस्मा उपदेशः संभवति । श्रोतृत्वं च श्रवणात् प्राक् श्रोतव्यमर्थं यो न जानाति तस्यैव भवति । तथा च स्वयं श्रोतव्यमर्थं पूर्वं जानाति चेत् श्रवणेच्छाविरहेण श्रोतृत्वासंभवात् न स्वस्मा उपदेशो घटते । स्वयं न जानाति चेदपि अज्ञत्वात् उपदेष्टृत्वं न संभवति । तथा च आचार्यः शिष्यं नोपलभत इति पक्षो निरस्तः । अथ आचार्यः शिक्षणीयं कंचित् पश्यतीति द्वितीयपक्षं निरस्यति-**द्वितीये तु** इत्यादिना । उपदेष्टा आचार्यः शिष्यं स्वापेक्षया अन्यं पश्यति वा अनन्यं वा । अन्यत्वेऽपि सत्यमसत्यं वा । नाद्यः । अपसिद्धान्तात् । शिष्याचार्यभेदस्य भवतानङ्गीकारात् । अपि च परमार्थतोऽन्यत्वे दृग्दृश्यसंबन्धानुपपत्तेः तदुपलम्भः भवता उपपादयितुमशक्य इति भावः। **न द्वितीय** इत्यादि। आचार्यः स्वापेक्षया अन्यं मिथ्याभूतं शिष्यं पश्यतीति पक्षे किं तं मिथ्यात्वेन पश्यति उत सत्यत्वेन । नाद्यः, मिथ्याभूतस्य शिष्यस्य मिथ्यात्वेन दर्शने तं प्रति उपदेशाद्यसंभवात् । न हि मिथ्यात्वेन प्रतीयमानेभ्यः प्रतिबिम्बादिभ्यः उन्मत्तोऽप्युपदिशेदित्यर्थः । **उपदेशाद्यसंभवात्** इत्यत्र आदिपदेन तदर्थानुष्ठापनं गृह्यते । प्रतिबिम्बादित्वेनेत्यत्र आदिपदेन अङ्गुल्यवष्टम्भादिना प्रतिभासमानः द्वितीयपुरुषो गृह्यते ।

प्रतिबिम्बादिभ्य उन्मत्तोऽप्युपदिशेत् ।। पाञ्चालिकादिभ्यो बालिकादिव्यवहारवांदेति चेन्न; मौग्ध्यमन्दीकृतकृत्याकृत्यविवेकानां बालिकादीनां क्रीडारसादिनिर्विंविक्षया तदुपपत्तेः ।। अत्रापि तथास्त्विति चेन्न; स्वपरहृदयविसंवादात् । अपसिद्धान्ताच्च । समूलभेदभ्रमनिर्मूलनाय तत्त्वमस्याद्युपदेश इति वो मठकमठसम्प्रदायः ।

मिथ्याभूतं शिष्यं सत्यत्वेनोपलभमानस्तु स्वयं भ्रान्तत्वादननुविधेयवाक्यः स्यात्, स्वस्माद्भिन्नतया सत्यत्वेनोपलभ्यमानाय शिष्याय स्वात्मैक्यमुपदिशन् आचार्यः विप्रलम्भकश्च स्यात् । कथं चासौ अद्वैतश्रवणमहिमनिश्शेषितातत्त्वप्रतिभासे मृषाभूते शिष्ये सत्यतां प्रत्येष्यति ?

ननु मिथ्यात्वेनोपलभ्यमानायैव शिष्यायोपदेशोऽस्तु । चैतन्याभावे ज्ञातेऽपि पाञ्चालिकादिभ्यः क्षीरदानादिव्यवहारदर्शनादिति शङ्कते-**पाञ्चालिकादिभ्य** इति । मौग्ध्येन मन्दीकृतः कार्याकार्यविवेकः येषां तेषां बालिकादीनां क्रीडारसानुभवेच्छया पाञ्चालिकादिभ्यः क्षीरदानव्यवहारस्योपपत्तावपि विवेकवत आचार्यस्य तदनुपपत्तेरिति भावः। विवेकवानाचार्योऽपि तथा आचरतीति कथनं स्वपरहृदयविसंवादात् अपसिद्धान्ताच्च नोचितमित्याह - **स्वपरेति** ।

मिथ्याभूतं शिष्यं सत्यत्वेनोपलभमान आचार्यः तं प्रति उपदिशतीति पक्षं निरस्यति-**मिथ्याभूतमिति** । शिष्यः स्वं प्रति उपदेशादेव स्वस्मिन् गुरोः सत्यत्वबुद्धिं जानन् तद्विपरीतमिथ्यात्वोपदेष्टरि आचार्ये भ्रान्तत्वशङ्कया तद्वाक्यं न श्रद्दधीतेत्यर्थः । अथवा मिथ्याभूतं शिष्यं सत्यत्वेनोपलभमानो गुरुः उपदिशतीति वदतस्तव त्वद्गुरुवाक्ये भ्रान्तोक्तत्वबुद्ध्या अश्रद्धा स्यात् इति भावः । अननुविधेयम् अननुसरणीयं वाक्यं यस्य सः **अननुविधेयवाक्यः** । दूषणान्तरमाह - **स्वस्माद्भिन्नतयेति** । स्वस्मात् भिन्नत्वेन सत्यत्वेन च दृश्यमानं शिष्यं प्रति स्वात्मैक्यमुपदिशन् आचार्यः वञ्चकः स्यात् “कर्मण्यन्यत् वचस्यन्यत् मनस्यन्यद्दुरात्मनाम्” इति न्यायादिति भावः । दूषणान्तरमाह-**कथं चासाविति** । असावाचार्यः अद्वैतवाक्यश्रवणमहिम्ना निःशेषनिवृत्तमिथ्याज्ञानवान्

अनन्यत्वपक्षेऽप्यनन्यत्वेनान्यत्वेन वा शिष्यस्योपलम्भः ? उभयमपि पूर्वोक्तैरेव दूषणैराचूषितम्।

किंच, अद्वैतोपदेष्टाऽऽचार्यो निवृत्ताविद्यः, उतानिवृत्ताविद्यः ? निवृत्ताविद्यत्वे शब्दार्थतत्प्रतिभासादिभेदगुच्छोच्छेदेन तुच्छहेतुरुपदेशः स्यात्। बाधितानुवृत्तिस्तु

मिथ्याभूतं शिष्यं कथं सत्यत्वेन जानीयात् । मिथ्याभूतशिष्यविशेष्यकसत्यत्वप्रकारकज्ञानस्य भ्रमरूपतया तत्सत्त्वे अतत्त्वज्ञानस्य निःशेषनिवृत्त्ययोगात्, तद्योगे च उक्तभ्रमासंभवात् इति भावः । पूर्वं सत्यत्वेन भेदप्रतिभासः स्थित इति सशेष आत्मप्रतिभासः इदानीमद्वैतवाक्यश्रवणान्निःशेषित इत्यर्थ इति **चण्डमारुते** ।

एतावता स्वात्मनोऽन्यमनन्यं वेति विकल्पे प्रथमकल्पः सत्यम् असत्यं वेति विकल्पपूर्वकं दूषितः । अथ आचार्यः शिष्यं स्वात्मनोऽनन्यं पश्यतीति द्वितीयपक्षं दूषयति- **अनन्यत्वपक्ष** इति । वस्तुतः अनन्यं शिष्यम् **अनन्यत्वेन** जानन् उपदिशति वा अन्यत्वेन जानन् वा । अन्यत्वेनोपलम्भपक्षे अननुविधेभवाक्यत्वविप्रलम्भक- वाक्यत्वान्यत्वज्ञानासंभावनाः पूर्वोक्तदोषाः । अनन्यत्वेनोपलम्भपक्षे उपदेष्टव्यविषयक-प्रतिपत्तितदप्रतिपत्त्योर्विकल्पे श्रोतृत्ववक्तृत्वासिद्धी पूर्वोक्तदोषाविति भावः ।

प्रकारान्तरेण उपदेशानुपपत्तिमाह- **किं चाद्वैतोपदेष्टेति** । अत्राद्वैतशब्देन द्वैतमिथ्यात्वं विवक्षितम् । वक्ष्यमाणशब्दार्थेत्यादि ग्रन्थानुरोधात् । द्वैतमिथ्यात्वस्य उपदेष्टा आचार्यः किं निवृत्ताविद्यः, उत अनिवृत्ताविद्यः । यदि निवृत्ताविद्यः तदा उपदेशं प्रति हेतुभूतस्य शब्दस्य अर्थस्य तत्प्रतिभासादेश्च अविद्यामूलकतया अविद्यानिवृत्त्या निवृत्ततया तुच्छहेतुकः (निर्हेतुकः) उपदेशः स्यात् इति भावः । **शब्दार्थेत्यादि** । अत्र **शब्दार्थनिवृत्ती** उपदेशस्य तुच्छहेतुकत्वे हेतुतया नोक्तौ । शब्दार्थयोरुच्चारणरूपोपदेशं प्रति हेतुत्वाभावात् । किं तु विषयतया शब्दः प्रतिपाद्यतया अर्थः उपदेशं प्रति अपेक्षितः, हेतुत्वेन तत्प्रतिभासादिकम् अपेक्षितम् । तत्र चापेक्षिते शब्दार्थतत्प्रतिभासादिभेदे उपदेशहेतुभूतप्रतिभासाद्यभावात् उच्छिन्ने सति उपदेशः तुच्छहेतुकः स्यादिति भावः । गुच्छशब्दः समुदायपरः । तुच्छहेतुरिति बहुव्रीहिः । ननु शब्दार्थतत्प्रतिभासादेर्निवृत्तावपि बाधितानुवृत्त्या उपदेशसंभव इत्याशङ्क्य बाधितानुवृत्तिपक्षः पूर्वमेव निरस्त इत्याह - **बाधितेति** ।

बाधिता । न चेश्वरकृतेषूपदेशेषु बाधितानुवृत्तिमूलत्वसम्भवः; अनादिसर्वज्ञतया करणपरतन्त्रज्ञानत्वाभावेन तस्य भ्रमतद्बाधितानुवृत्त्यादेरसम्भवात्। ''यः सर्वज्ञः सर्ववित्'', ''पराऽस्य शक्तिर्विविधैव श्रूयते स्वाभाविकी ज्ञानबलक्रिया च'' इत्यादि हि श्रूयते। अस्तु वा बाधितानुवृत्तिसम्भवस्त्वन्मते, तथाऽपि नोपदेशादिप्रवृत्तिसम्भवः । न हि पानीयाभिमाननिवृत्तावपि दोषवशात् प्रकाशमानासु मरुमरीचिकावीचिकासु कश्चित् पिपासति।

अनिवृत्ताविद्यश्चेत् भ्रान्तत्वादेव पूर्ववदनाप्तत्वप्रसङ्गः ।

किमर्थश्चायमात्माद्वैतोपदेशः ।। अविद्यानिवृत्त्यर्थ इति चेत्; किमुपदेष्टुः, उत श्रोतुः, उतोभयोः, अथोभयव्यतिरिक्तस्य ? नाद्यः, पूर्वमेव तस्य निवृत्ताविद्यत्वात्। अनिवृत्ताविद्यत्वे परोपदेशेन स्वभ्रमनिवृत्त्ययोगात्।

भगवच्छ्रीकृष्णकर्तृकोपदेशे बाधितानुवृत्तिर्न संभवतीत्याह - **न चेश्वरेति** । ईश्वरस्यानादिसर्वज्ञतया करणाधीनज्ञानत्वाभावेन करणदोषाधीनभ्रमासंभवात् भ्रममूलक उपदेश इत्यस्य वक्तुमशक्यत्वादिति भावः । ईश्वरस्यानादिसर्वज्ञत्वे श्रुतिं प्रमाणयति - **यः सर्वज्ञ** इति । न चैवंभूतस्येश्वरस्य भ्रमः संभवतीति भावः । ईश्वरातिरिक्तस्य गुरोः बाधितानुवृत्तिमङ्गीकृत्याह - **अस्तु वेति** । **न हीति** । कश्चित् ग्रीष्मकाले दूरात् मध्याह्ने निर्जलायां नद्यां मरीचिकासु जलभ्रमवान् ततः पिपासुश्च भवति । ततः समीपस्थाप्तोपदेशवशात् जलभ्रमे निवृत्ते दूरत्वादिदोषवशात् जलभ्रमेऽनुवर्तमानेऽपि स न पिपासति, न वा पानार्थं प्रवर्तते । एवं गुरोः तत्त्वज्ञानेन अविद्यायां तन्मूलकभेदभ्रमे च निवृत्ते पुनः अनुवर्तमानेऽपि तस्मिन् शिष्यादिमिथ्यात्वनिश्चयात् उपदेशे प्रवृत्तिर्न संभवतीति भावः ।

अथ आचार्यः अनिवृत्ताविद्य इति द्वितीयपक्षं दूषयति-**अनिवृत्ताविद्यश्चेत्** इति । तत्त्वज्ञाने सति अविद्यानिवृत्तेः आवश्यकत्वेन अविद्यानिवृत्तिर्नास्ति चेत् गुरोः तत्त्वज्ञानस्य अभावात् अनाप्तत्वेन उपदेष्टृत्वं न संभवतीति भावः ।

अथ प्रयोजनाभावात् उपदेशनुपपत्तिरित्याह - **किमर्थश्चायमिति** । आचार्यकर्तृकः

परोपदेशजनितपरमादृष्टप्राबल्यादिति तु सम्भवन्नप्यर्थः प्रपञ्चसत्यत्वभयात् भवता नावलम्ब्यते ॥ नापि द्वितीयः, उपदेष्टृज्ञानस्याविद्यानिवर्तकत्वमस्ति न वा ? अस्ति चेत्, तेनैव शिष्याविद्याया अपि निवृत्तावुपदेशनैष्फल्यम् । नास्ति चेत्, तर्हि तत एव शिष्यज्ञानस्याप्यविद्याया निवर्तकत्वादुपदेशनैष्फल्यम् ॥ न च तृतीयः, उक्तदोषसमुच्चयप्रसङ्गात् ॥ नापि चतुर्थः, अतिप्रसङ्गात्; न हि देवदत्ताय

शिष्यं प्रति आत्माद्वैतोपदेशः किंप्रयोजनकः? अविद्यानिवृत्तिप्रयोजनक इति चेत् कस्य? उपदेष्टुः आचार्यस्य वा श्रोतुः शिष्यस्य वा? उतोभयोर्वा? उतोभयव्यतिरिक्तस्य वा? नाद्यः । आचार्यस्य उपदेशात् पूर्वमेव तत्त्वज्ञानवत्त्वेन निवृत्ताविद्यत्वात् ॥ तस्याविद्यानिवृत्त्यभावे परं प्रत्युपदेशमात्रेण स्वस्याविद्यानिवृत्त्यसंभवात् । परं प्रति उपदेशेन हि परस्य तत्वज्ञानं भवेत् । तेन परस्यैवाविद्यानिवृत्तिर्भवेत् नोपदेष्टुः । तत्त्वज्ञानस्य स्वसमानधिकरणाविद्यातज्जन्यभ्रमनिवर्तकत्वात् । न च परं प्रति उपदेशेन उपदेष्टुः अदृष्टविशेषो जायते, तेन स्वगताविद्याभ्रमयोर्निवृत्तिरिति वाच्यम् । अदृष्टजन्यत्वे सत्यत्वं स्यात् इति भीत्या भवता तथा अनङ्गीकारादिति भावः । किं चानिवृत्ताविद्यत्वे सति स्वयं तदर्थं ज्ञानं संपादनीयम् । कुतः परं प्रत्युपदेशः ।

नापि द्वितीय इत्यादि । श्रोतुः अविद्यानिवृत्त्यर्थः आचार्यस्योपदेश इति द्वितीयः पक्षोऽपि न युक्तः । तथा हि-उपदेष्टृगततत्त्वज्ञानस्य अविद्यानिवर्तकत्वमस्ति वा न वा । अस्ति चेत् तेनैव शिष्यगताविद्यापि निवर्तत इति वक्तव्यम् । अविद्याया एकत्वात् । तथा च उपदेशस्य वैयर्थ्यम् । नास्ति चेत्-गुरुगतज्ञानस्य यथा अविद्यानिवर्तकत्वं नास्ति, तथा शिष्यगतज्ञानस्यापि तन्न स्यात्, अविशेषात् । तथा चोपदेशनैष्फल्यं तदवस्थमिति भावः ।

न च तृतीय इति । उपदेष्टुः उपदेशः शिष्याचार्ययोः उभयोः अविद्यानिवृत्त्यर्थ इति तृतीयः पक्षोऽपि न युक्तः । प्रथमद्वितीयपक्षद्वयेऽप्युक्तानां दोषाणां समुदायस्य प्रसङ्गात्।

नापि चतुर्थ इति । आचार्यकर्तृकः शिष्यं प्रत्युपदेशः शिष्याचार्याभ्यामन्यस्य अविद्यानिवृत्तिफलक इति चतुर्थः पक्षोऽपि न युक्तः । अतिप्रसङ्गात् चैत्रं प्रति देवदत्तकृतेन सर्पभावोपदेशेन यज्ञदत्तस्य सर्पभ्रमनिवृत्तिप्रसङ्गादित्यर्थः ।

सर्पाभावोपदेशेन यज्ञदत्तस्य सर्पभ्रमो निवर्तते। तथा च सति सर्वतत्त्वसाक्षात्कारिषु ईश्वरादिषु जागरूकेषु क्वचिदपि कस्यचिदपि भ्रमानुदयप्रसङ्गात्। यश्च नित्यनिवृत्ताविद्यं ब्रह्मेति भाषते, स कथं ब्रह्माविद्यानिवृत्त्यर्थ उपदेश इत्युपदिशेत्?

अस्तु तर्हि निष्प्रयोजन एवायमुपदेश इति चेन्न; 'प्रयोजनमनुद्दिश्य न मन्दोऽपि प्रवर्तते' इति न्यायात्। न च वस्तुतो न कश्चित् कस्मैचिदुपदिशतीति वाच्यम्, व्यावहारिकव्यवस्थया सर्वस्य निर्वाह्यत्वेनाभ्युपगमात्। अन्यथा स्वसिद्धान्तसमर्थनस्येव परसिद्धान्तदूषणस्याप्यसिद्धौ परेषामेव विजयित्वप्रसङ्गात्॥

दोषान्तरं चाह- **तथा च सतीति**। यः उपदेशं न शृणोति तस्यापि अन्यगतेन तत्त्वज्ञानेन भ्रमः प्रतिबध्यते चेत् ईश्वरादिगतेन तत्त्वज्ञानेन सर्वेषामपि भ्रमः प्रतिबध्येतेति लोके कस्यापि भ्रम एव नोदियादिति भावः। अविद्यानुदयप्रसङ्गादिति वा अविद्यानिवृत्तिप्रसङ्गादिति वा अनुक्त्वा भ्रमानुदयप्रसङ्गादिति वदतामयमाशयः अविद्याया अनादित्वात् तदनुदयः वक्तुं न शक्यते। अविद्यानिवृत्तिप्रसङ्गादित्युक्ते इष्टापत्तिरिति यदि ब्रूयात् तर्हि अविद्याया निवृत्तौ तत्कार्यस्य भ्रमस्यानुदयप्रसङ्ग इति वक्तव्यमिति।

किं चाविद्यैकत्वपक्षे सा ब्रह्माश्रितेति स्वीकारात् ब्रह्माश्रिताविद्यानिवृत्त्यर्थमुपदेश इति वक्तव्यम्। इदं च स्वसिद्धान्तविरुद्धम्। नित्यनिर्दोषज्ञानैकस्वरूपं ब्रह्मेति तैरेव तत्र तत्र कथनात् ब्रह्मणः अविद्याश्रयत्वासंभवात् ब्रह्मगताविद्यानिवृत्त्यर्थमुपदेश इत्यस्य वक्तुमशक्यत्वादित्याह-**यश्च नित्यनिवृत्तेति**।

अथ निष्प्रयोजन उपदेश इत्याशङ्क्य मन्दमतिरपि प्रयोजनं विना कार्यं न कुर्यादिति प्रज्ञावन्तः आचार्यादयः प्रयोजनं विना नोपदिशेयुरिति समाधत्ते-**अस्तु तर्हीति**। **व्यावहारिकेति**। व्यावहारिकः प्रयोजनोद्देशो वक्तव्य इत्यर्थः। **अन्यथेति**। मिथ्यात्वादेव स्वाङ्गीकृतस्योपदेशस्य अनिर्वाह्यत्वे (उपपत्तिमत्त्वाभावे) तद्वदेव प्रतिवादिनिर्णयस्यापि मिथ्यात्वेन तद्दूषणस्याकर्तव्यतया परेषामेव विजयित्वप्रसङ्ग इत्यर्थः।

दूषणसमर्थनप्रयोजनाभावेऽपि प्रयोजनसद्भावभ्रममूलोऽयमुपदेशभ्रम इति चेत्; हन्त पुनरपि समीचीनमेव तत्त्ववित्त्वमुपदेष्टुरुपपादितम् ॥ मा भूत् तत्त्ववेदित्वम्; तथापि स्वप्नसिद्धशिष्याचार्यवत् व्यवहार इति चेत्–हन्त! तर्हि सिद्धान्तान्तरशिष्याचार्यादिव्यवहारात् को विशेषः ? न हि जिनसुगतादि शिष्याचार्यव्यवहारात् प्रतिभासते भवतां विशेषः, येन वैषम्यं वक्ष्यसि ॥ विशेषस्तत्त्वविषयकत्वमिति चेन्न; तत्त्वविषयत्वस्याप्यतत्त्वकोटिनिवेशेन पुनरप्यविशेषात् । तत्त्वातत्त्वविषयता-

---

ननु उपदेशः अद्वैतरूपस्वमतसमर्थनं द्वैतरूपपरमतदूषणं चेत्युभयात्मकः । तादृशस्योपदेशस्य प्रयोजनाभावेऽपि प्रयोजनमस्तीति भ्रममूलकोऽयमुपदेशभ्रम इति शङ्कते **दूषणसमर्थेति** । दूषणयोग्येत्यर्थः । ईदृशभ्रमवतः उपदेष्टुः तत्त्वज्ञानाभावात् कथमुपदेष्टृत्वं संभवतीति समाधत्ते-**हन्त पुनरपीति** । ननु स्वप्ने कल्पितः आचार्यः कल्पितं शिष्यं प्रत्युपदिशतीति स्वप्नद्रष्टा पश्यति । तत्र कल्पिताचार्यस्य तत्ववित्त्वाभावेऽपि उपदेष्टृत्ववत् जाग्रद्दशायामपि तत् भवतु इति शङ्कते-**मा भूत्तत्त्ववेदित्वमिति** । समाधत्ते-**हन्त तर्हीति**। भवत्सिद्धान्तनिष्ठा आचार्या अपि तत्त्वज्ञानरहिता एव स्वशिष्येभ्य उपदिशन्ति इत्युच्यते चेत् जैनबौद्धादिसिद्धान्तनिष्ठाचार्यशिष्यव्यवहारापेक्षया भवत्सिद्धान्तनिष्ठाचार्यादिव्यवहारे को विशेषः । उभयोरपि व्यवहारयोस्तत्त्वज्ञानमूलकत्वाभावादिति भावः । अत्र **व्यवहारः** उपदेशः तच्छ्रवणं च । **न हीति** काकुगर्भम् । जिनसुगतादिशिष्याचार्यव्यवहारात् भवतां शिष्याचार्यव्यवहारे विशेषो न प्रतिभासत इत्येतन्नास्ति, किं तु विशेषोऽस्त्येव । स चोभयोरपि तत्त्ववित्त्वाभावे न घटत इति भावः । **येनेति** । विशेषप्रतिभासे हि वैषम्यं वक्तुं शक्यमिति भावः ।

ननु सिद्धान्तेऽपि उपदेशस्य तत्त्वविषयकत्वादेव हि मतान्तराद्वैषम्यम्, तत् पूर्वपक्षिणोऽद्वैतिनोऽपि भवितुमर्हतीत्याशङ्कते - **विशेषस्तत्त्वविषकत्वमिति** । उपदेशस्येति शेषः । परिहरति - **तत्वविषयत्वस्यापीति** । तत्त्वविषयत्वस्य मिथ्यात्वेन तदभावस्य उभयत्राप्यविशेषात् इत्यर्थः । ननु तत्त्वविषयकत्वतदभावाभ्यां वैषम्यं न ब्रूमः, किं तु

व्यवस्थापनस्य तस्याऽऽपातरमणीयाभिमानमात्रसारत्वाविशेषात् ।। अस्त्वविशेषः, को दोष इति चेन्न; परिग्रहबहिष्कारादिव्यवस्थाभङ्गप्रसङ्गात् ।। सापि व्यवस्था समीचीनतासमीचीनतामोहहेतुकेति चेत्; तर्हिं जितमनायासेन सर्वैस्त्वद्विरोधिभिः; त्वन्मतपरिग्रहस्य त्वयैव समीचीनताभ्रमहेतुत्वकण्ठोक्तेः । परमतस्यापि त्वयैवासमीचीनताभ्रमविषयत्वाभिधानेनार्थतस्तद्विपरीतसमीचीनत्वस्यैव समर्थितत्वात् ।। सर्वमप्यसमीचीनमिति तत्त्वस्थितावस्माकमेव जय इति चेत्; अस्यैव वाक्यार्थस्य समीचीनत्वासमीचीनत्वयोः सर्वासमीचीनत्वासिद्धेः ।।

तत्त्वविषयकत्वातत्त्वविषयकत्वाभ्यामित्यत्राह - **तत्त्वातत्त्वेति** । यत्र सिद्धान्ते मूलभूतन्यायसमीचीनता तस्य सिद्धान्तस्य तत्त्वविषयकत्वं, यत्र सिद्धान्ते मूलभूतन्यायसमीचीनता नास्ति तस्यातत्त्वविषयकत्वं तत्र तत्रास्माभिरुपपाद्यते। बौद्धादीनां भवतां च सिद्धान्तेषु वस्तुतो मूलभूतन्यायसामीचीन्यं नास्ति । सामीचीन्याभिमानमात्रं तु युष्माकमविशिष्टमिति बौद्धाद्यपेक्षया भवतां सिद्धान्ते वैषम्यं दुर्वचमिति भावः । आवयोर्विशेषो मास्तु को दोष इत्याशङ्क्य भवद्भिः स्वसिद्धान्तपरिग्रहः बौद्धादिबहिष्कारः इति क्रिममाणा व्यवस्था हेत्वभावात् भज्येतेत्याह - **अस्त्वविशेष** इति । **परिग्रहः** प्रामाणिकत्वेनाभ्युपगमः । **बहिष्कारः** अप्रामाणिकत्वबुद्धिः । आदिपदेन तन्मूलो व्यवहारो गृह्यते । ननु स्वसिद्धान्तपरिग्रहः परसिद्धान्तबहिष्कारः इति व्यवस्थापि अस्माभिः क्रियमाणा यथाक्रमं समीचीनत्वमोहासमीचीनत्वमोहहेतुकेत्याशङ्क्य, तर्हिं त्वद्विरोधिनः सर्वेऽपि त्वां विजयेरन् भवन्मतपरिग्रहः समीचीनत्वभ्रमहेतुक इति भवतैव कण्ठत उक्तत्वात्, परमतस्यापि भवतैव असमीचीनत्वभ्रमविषयत्वकथनेन अर्थात् तद्विपरीतस्य समीचीनत्वस्यैव समर्थितत्वाच्चेत्याह-**सापि व्यवस्थेत्यादिना** । ननु समीचीनमिदम् असमीचीनमिदमिति विभागो नास्त्येव । सर्वमप्यसमीचीनमेव, इदभेवास्मन्मतमिति शङ्कते - **सर्वमिति** । परिहरति - **अस्यैवेति** । सर्वमसमीचीनमिति वाक्यस्य योऽर्थः सर्वासमीचीनत्वरूपः स समीचीनो न वा । आद्ये सर्वासमीचीनत्वं न सिद्ध्यति, सर्वान्तर्गतस्य उक्तवाक्यार्थस्य समीचीनत्वात्। न द्वितीयः,

एतस्याप्यसमीचीनत्वं सर्वासमीचीनत्वान्तर्गतमिति चेन्न; दुष्परिहरस्वव्याघातनिरयनिपातस्य बहुशोऽन्यत्र स्थापनात्। तदलमनेन व्रणकिणभूषणशम्भ(म्फ)लीजनसध्रीचां व्याहतवाचां भूषणाभिमतेन दूषणाभिधानेन।

एवम् आत्मैक्यं स्वाभाविकमभ्युपगच्छतां भास्करयादवमतानुसारिणामुपाधितः स्वतो वा भेदेऽपि सार्वज्ञ्याज्ञत्वसङ्करादेरपरिहरणीयत्वात्

उक्तवाक्यार्थस्य सर्वासमीचीनत्वस्य असमीचीनत्वे सर्वसमीचीनत्वस्यैव सिद्धेः त्वदभिमतसर्वासमीचीनत्वस्यासिद्धेरिति भावः। ननु सर्वासमीचीनत्वं वाक्यार्थः। तत्र सर्वपदार्थे सर्वासमीचीनत्वमप्यन्तर्गतम्। तथा च सर्वमसमीचीनमित्युक्ते सर्वासमीचीनत्वं तदतिरिक्तं च असमीचीनमिति सिद्ध्या कथं सर्वसमीचीनत्वं सिध्येदिति शङ्कते - **एतस्यापीति**। परिहरति - **दुष्परिहरेति**। सर्वान्तर्गतस्य सर्वासमीचीनत्वस्य असमीचीनत्वे सर्वसमीचीनत्वं सिध्यतीति स्ववाग्विरोधमपि न जानासीति भावः। **व्रणकिणेत्यादि**। व्रणजन्यो यः किणः चिह्नं तदेव भूषणं येषां ते शम्फलीजनाः ते व्याहतभाषिणः तत्सदृशानां परस्परविरुद्धवाचां भूषणाभिमतेन दूषणेन न किमपि प्रयोजनमित्यर्थः। अस्माभिरुच्यमानं दूषणमेव ये भूषणं मन्यन्ते तैः सह विवादेन किं प्रयोजनमिति परिहासोक्तिरियम्। अथापि स्वजनानां परमते विश्वासो मा भूदित्यर्थं दूषणाभिधानमिति तात्पर्यम्। परनारीं पुंसा संयोजयित्री शम्फली इति अमरसुधा।

प्रसङ्गात् स्वाभाविकभेदाभेदवादिमते उपदेशानुपपत्तिमाह - **एवमित्यादिना**। जीवब्रह्मैक्यं आत्मैक्यं स्वाभाविकम्, जीवब्रह्मभेदः औपाधिकः अचिद्ब्रह्मणोस्तु भेदः अभेदश्चोभयमपि स्वाभाविकमिति भास्करमतम्। जगद्ब्रह्मणोः जीवब्रह्मणोश्च भेदः अभेद उभयमपि स्वाभाविकमिति यादवप्रकाशमतम्। एवं च तन्मतयोः जीवब्रह्मणोः भेदस्याभेदस्य चाङ्गीकारात् अभेदमादाय ब्रह्मगतसर्वज्ञत्वस्य जीवे जीवगताज्ञत्वस्य ब्रह्मणि च संकरः स्यात्। तथोभयोः सर्वज्ञत्वात् उपदेशानुपपत्तिः, वैयर्थ्यात्। उभयोरज्ञत्वादपि उपदेशानुपपत्तिः उपदेष्टुः ज्ञानस्य आवश्यकत्वात्। स्वाभाविकभेदभेदावादियादवप्रकाशमते दोषान्तरमाह -

उक्तोपदेशानुपपत्तिरपरिहार्या । स्वाभाविकैक्ये तु स्वाभाविकभेदो व्याघातादपि निरस्त एव । औपाधिकोऽपि भेदो न प्रतिसन्धानपरिपन्थी; अन्यथा सौभरिदेहेष्वीश्वरावतारभेदेष्वप्यप्रतिसन्धानप्रसङ्गात् । यथा च चक्षुरादिकरणभेदः पाणिपादाद्यवयवभेदश्च न प्रतिसन्धानं प्रतिरुणद्धि, तथाऽन्तःकरणभेदोऽपि न प्रतिसन्धानं प्रतिरोद्धुमलम् । अत एव सर्वगुणदोषसङ्करो दुर्वारः; निर्विकारनिरवद्यश्रुतिविरोधोऽपीति कृतमप्रसक्तोपालम्भेन । अतः परमार्थनिरुपाधिकात्यन्तात्मभेदमन्तरेण नोपदेशसम्भवः ।

स्वाभाविकैक्ये तु । **व्याघातादिति** एकत्र स्वाभाविकयोः भेदाभेदयोः विरोधादित्यर्थः। व्याघातादपि इत्यपिशब्देन उपदेशानुपपत्तिर्गृह्यते । औपाधिकभेदमते दोषान्तरमाह - **औपाधिकोऽपीति**। जीवब्रह्मणोः स्वाभाविकैक्याङ्गीकारे चैत्रानुभूतस्य मैत्रेण स्मरणप्रसङ्ग इति भीत्या हि औपाधिकभेदकल्पनम् । भेदे कल्पितेऽपि शरीररूपोपाधिभेदमात्रेण नान्येनानुभूतस्यान्येन प्रतिसन्धानं प्रतिबन्धुं शक्यते, सौभर्यादीनां शरीरभेदेऽपि प्रतिसन्धानदर्शनात् इति भावः ।

ननु सौभर्यादिशरीरेषु प्रतिसन्धानमन्तःकरणभेदाभावात् । अन्तःकरणभेद एव प्रतिसन्धानप्रतिबन्धकः, न शरीरभेदः इत्यत्राह-**यथा चेति** । यथा चक्षुरादिकरणभेदः पाणिपादाद्यवयवभेदश्च एकस्मिन् शरीरे न प्रतिसन्धानप्रतिबन्धकः तद्वत् अन्तःकरणभेदोऽपि न प्रतिसन्धानप्रतिबन्धक इत्यर्थः । **अत एवेति** । एतादृशस्यौपाधिकभेदस्य प्रतिसन्धानतदभावव्यवस्थापकत्वाभावादेव एकस्मिन् जीवे विद्यमानगुणानां जीवान्तरे, एकस्मिन् जीवे विद्यमानानां दोषाणां च जीवान्तरे प्रसङ्गरूपं सांकर्यमपि स्यात् औपाधिकभेदवादे इत्यर्थः । गुणदोषसांकर्ये इष्टापत्तौ श्रुतिविरोधमाह - **निर्विकारेति** । **अतः परमार्थेति** । परमार्थ इत्यनेन अपरमार्थभेदवादिमायिमतव्यावृत्तिः । निरुपाधिकेत्यनेन सोपाधिकभेदवादिभास्करमतव्यावृत्तिः । अत्यन्तपदेन यादवप्रकाशमतव्यावृत्तिः । अत्यन्तत्वं च भेदे स्वाभाविकाभेदासमानाधिकरणत्वम् ।

ननु परस्परं शिष्याचार्यादिभावेनावस्थितेषु भगवदवतारेषु परमार्थत आत्मभेदाभावेऽपि व्यवस्था सुस्था। फलं चास्त्येव किञ्चित्। तत्रेश्वरमायापुरस्कारः परिष्कारः शङ्करमतस्य; उपाधिभेदाभिधाने तु भास्करोदयप्रत्यूषः; विभागशक्तिवैभववादस्तु यादवराज्याभिषेकः। गत्यन्तरं तु प्रमाणपथिकप्रान्तरं सम्भवदपि समानमस्माकमिति प्रतिबन्दिमुखेन श्वावराहकलहावतारे कस्ते निस्तार इति ॥

अत्र ब्रूमः– अस्ति हि समस्तसमाधानहेतुरीश्वरलीला। स भगवान् पुरुषोत्तमः स्वमाहात्म्यानुगुणलीलाप्रवृत्तः स्वेच्छया स्वीयमेव रूपं विचित्राकारं परिणमय्य तत्तज्जातीयोचितमभिनीय निखिलजगदुज्जिजीवयिषया शिष्याचार्यादिभावमप्यभिनीय स्वोपदेशानुष्ठानादिभिर्धर्मसंस्थापनं लोकनिर्वाहादिकं च निर्वर्तयतीति किं नोपपद्यते ? उक्तं च न्यायाचार्यैरपि, 'मायावत् समयादयः' (न्या.कु.२.) इति।

शङ्कते - **ननु परस्परमित्यादिना**। भगवानेव कदाचित् शिष्यरूपेण आचार्यरूपेण चावतरति। यथा हंसहयग्रीवादयः आचार्यावताराः। कृष्ण एव सांदीपिनेः शिष्यः। अर्जुनस्य आचार्यश्च। श्रीरामचन्द्रः विश्वामित्रस्य शिष्यः। नरनारायणरूपावतारयोः स्वयमेवाचार्यः शिष्यश्च। तत्र स्वात्मभेदाभावेऽपि रूपभेदेन शिष्याचार्यव्यवस्था दृश्यते। तत्रोपदेशस्य फलमस्त्येव किंचित्। तत्र शंकरमते मायाधीनभेदं पुरस्कृत्य व्यवस्था। उपाधिभेदाधीनं भेदमवलम्ब्य व्यवस्था भास्करमते। एकस्यैवात्मनः विभागशक्तिवैभवान्निर्वाहो यादवप्रकाशमते। गत्यन्तरमपि प्रमाणमार्गे गन्तृभिरादरणीयं किंचित् संभवेत्। तावता नास्माकं हानिः इति शङ्का। **पथिकप्रान्तरं** = पथिकैरादरणीयम्। **श्वावराहकलहः** कदाचित् शुनां परस्परं कलहः प्रचलति। तदा वराहो यदि संनिदध्यात् तदा श्वानः परस्परकलहं परित्यज्य वराहं प्रति कलहार्थं प्रवर्तेरन् तद्वत् इत्यर्थः।

भगवल्लीलैव निस्तार इति समाधत्ते-**अस्ति हीत्यादिना**। तद्विवृणोति - **स भगवानिति**। **उक्तं चेति**। प्रलयाङ्गीकारे सर्गाद्यकाले व्यवहाराभावेन व्युत्पत्तिग्रहो नोपपद्यत इत्याशङ्कायामुक्तं न्यायाचार्येणोदयनेन "मायावत् समयादयः" इति। इदं च तेनैव

न च युष्मच्छिष्याचार्येष्वपि इयमेव रीतिरिति (रिह ?) वक्तुं शक्या; परस्यैवाभावेन परार्थत्वासिद्धेः । दुःखमयत्वेन केवलं स्वार्थत्वायोगात् । अस्माकमपीश्वरस्य तु स्वव्यतिरिक्तानन्तसंसारिचेतनसद्भावेन तदर्थे स्वलीलारसोचिततत्तत्संव्यवहारोपपत्तेः । चिन्मात्रस्य तु निर्विशेषत्वेन कथं लीला? कथं चेश्वरत्वम् ? न चार्वाचीनेषु तादृशलीलासम्भव इत्युक्तम् । अतो वास्तवं जीवभेदं जीवेश्वरभेदं चानभ्युपगच्छतां मोक्षार्थोपदेशादिप्रवृत्तिर्न सम्भवतीति ॥

॥ इति शतदूषण्याम् उपदेशानुपपत्तिवादः चतुस्त्रिंशः ॥ ३४ ॥

विवृतम्-यथा सूत्रसंचाराधिष्ठितदारुपुत्रकादिकमिदमानयेति प्रयुङ्क्ते स च दारुपुत्रकस्तं तथा करोति । तथा चेतनव्यापारादिव तद्दिशि बालोऽपि व्युत्पाद्यत एव, तथेहापि स्यादिति। अयं भावः - प्रलयस्वीकारे सर्गारम्भे समयः शब्दार्थसंबन्धः कथं गृह्येत, घटादिनिर्माणप्रकारशिक्षादिकं च कथं भवति प्रयोज्यप्रयोजकवृद्धपुरुषयोरभावात् इति शंकापरिहारः मायावत् समयादयः इत्यनेन पादेन कृतः । एतद्विवरणमपि तत्रैवम् समयोऽप्येकेनैव मायाविनेव व्युत्पाद्यव्युत्पादकभावावस्थितनानाकायाधिष्ठानात् व्यवहारत एव सुकरः । यथा मायावी सूत्रसंचाराधिष्ठितं दारुपुत्रकं इदमानयेति प्रयुङ्क्ते, स च दारुपुत्रकस्तथा करोतीत्यादि ।

अस्माकमपीति । अस्मन्मतेऽपीत्यर्थः । एवं प्रतिबन्दीं पराकृत्य इदानीमीश्वरस्यापि शिष्याचार्यव्यवहारः परमतेऽनुपपन्न इत्याह - **चिन्मात्रस्येति** ।

इति शतदूषणीव्याख्यायां तात्पर्यप्रकाशिकायां
उपदेशानुपपत्तिः चतुस्त्रिंशो वादः ॥

* * *

॥ अथ तिरोधानानुपपत्तिवादः पञ्चत्रिंशः ॥ ३५ ॥

यन्मायामोहितात्मानो यन्मायामोहितं विदुः ।
तत् प्रपद्य तदुक्तोऽयं तिरोधिरवधूयते ॥

यदाहुर्ब्रह्मघातिनो ब्रह्मविदः, ब्रह्मस्वरूपमविद्यातिरोहितमिति–तत्र किमिदं

अथ तिरोधानानुपपत्तिवादः पञ्चत्रिंशः ॥

यन्मायामोहितात्मानो यत् मायामोहितं विदुः ।
तत्प्रपद्य तदुक्तोऽयं तिरोधिरवधूयते ॥

यस्य भगवतो ब्रह्मणः मायया संकल्पेन मोहिता संजातमोहा आत्मानो येषां ते यत् ब्रह्म मायया मोहितम् तिरोहितं विदुः जानन्ति तत् ब्रह्म प्रपद्य तदुक्तः मायामोहितात्मभिः उक्तः तिरोधिः तिरोधानम् अवधूयते निरस्यत इत्यर्थः । मायामोहितमिति स्वात्मनि मायाधीनभेदमोहत्वमुच्यते । इदं च परैस्तिरोधानस्य अङ्गीकारे हेतुतयोक्तम् । पूर्ववादे एकस्य ज्ञानमात्रात् सर्वेषां प्रकाशसंभवादुपदेशानुपपत्तिरित्युक्तम् । तदयुक्तं तिरोधानेन प्रकाशाप्रकाशोपपत्तेरित्याशङ्क्य तिरोधानमेव न संभवतीत्याहास्मिन् वादे ।

पूर्वपक्षः

पूर्वपक्षमनुवदति - **यदाहुरिति** ।

यो दूषयति संमोहात् वासुदेवं जगत्पतिम् ।
सर्वलोकैककर्तारं तं विद्यात् ब्रह्मघातुकम् ॥

यः प्रवृत्तां श्रुतिं सम्यक् शास्त्रं वा मुनिभिः कृतम् ।
दूषयत्यनभिज्ञाय तं विद्यात् ब्रह्मघातुकम् ॥

इत्यादिप्रमाणानि हृदि निधायाह - **ब्रह्मघातिन** इति । यद्वा ब्रह्म घ्नन्तीति ब्रह्मघातिनः ।

प्रकाशविनाशस्यैव तिरोधानत्वात् प्रकाशरूपब्रह्मतिरोधानोक्त्या ब्रह्मनाश एवोक्तः स्यादिति भावः । अयमपि ब्रह्महत्याविशेष एषाम् ।

दैवी ह्येषा गुणमयी मम माया दुरत्यया ।
मामेव ये प्रपद्यन्ते मायामेतां तरन्ति ते ॥

इति गीतोक्तरीत्या भगवन्मायामोहिताः यत् ब्रह्म मायामोहितं मन्यन्त इति पूर्वार्धस्यार्थः । प्रपद्येत्यनेन मामेव ये प्रपद्यन्त इति भगवदुक्तमाचरतां अस्माकं तन्मोहनिवर्तनं सुकरमिति ज्ञाप्यते । ते तु तन्मायामोहितत्वात् प्रपत्तिमपि ऐक्यज्ञानरूपां कल्पयन्तः तस्याः मायाया; दुरत्ययतामेव द्रढयन्ति । ब्रह्मविद इति सोपहासोक्तिः । अब्रह्मविद इति वा पदच्छेदः । अयं भावः- आत्मा हि स्वयंप्रकाशः अशनायादिरहितः । स च नित्यमुक्त-निरतिशयानन्दं ब्रह्मैवेति सकलश्रुतीतिहासपुराणप्रसिद्धम् । तथापि अहमित्यनुभूयमानोऽपि स केनापि पूर्णानन्दब्रह्माहमस्मीति नानुभूयत इति सर्वसंमतम् । तथा च स्वप्रकाशात्मक-चैतन्याभिन्नतया प्रशस्तप्रकाशस्यापि पूर्णानन्दस्याप्रकाशः तिरोधानाधीन इति ।

सिद्धान्तः

दुर्निरूपत्वात् तिरोधानमनुपपन्नमित्युपपादयितुं तिरोधानं विकल्पयति - **तत्र किमिदं तिरोधान**मित्यादिना । अविद्यातिरोहितमिति पदार्थघटकीभूतम् अविद्यया तिरोधानं किंरूपमित्यर्थः । अत्राष्टौ कल्पाः प्रदर्शिताः । यद्यप्येते कल्पाः पूर्वपक्षिणोऽनभिमताः । नास्ति न प्रकाशत इति व्यवहारयोग्यता अस्ति प्रकाशत इति व्यवहारायोग्यता वा तिरोधानम् अथवा आवरणमिति तदीयग्रन्थेषु स्थितत्वात् । तथापि ज्ञानवैकल्यापादकतया तिरोधानत्वेन शङ्कितुं योग्यता एतेषामेव पक्षाणाम् । न तु तदभिमतपक्षस्य । व्यवहारप्रतिबन्धकस्य आमवातादेः आवरणत्वाप्रसिद्धेः । किं च तत्त्वतोऽधिष्ठाने प्रकाशमाने अध्यासासंभवात् अधिष्ठानाप्रकाशसिद्ध्यर्थम् आवरणं कल्पनीयम् । तादृशं च प्रयोजनमेष्वेव पक्षेषु संभवति, न तु पूर्वपक्ष्यभिमतपक्षे; येनाध्यासप्रतिबन्धो मा भूत् इत्यावरणं कल्प्यते प्रतिबन्धकाभावसंपादनाय, तस्य तत्कल्पनेऽप्यविकलत्वादिति महाचार्याः ।

तिरोधानम् ? (१) किमिन्द्रियसम्बन्धनिवारणम् ? (२) किमैन्द्रियकज्ञानस्य तद्विषयता-निवर्तनम् ? (३) यद्वा सर्वेषामपि ज्ञानानां तद्विषयतापाकरणम् ? (४) अथवा स्वस्य स्वकर्मताव्यपोहः ? (५) स्वप्रकाशभङ्ग एव वा ? (६) विशदस्वरूपस्याप्यवि- शदस्वरूपत्वापादनं वा ? (७) ब्रह्मप्रकाशसामग्र्यनुप्रविष्टस्वभावनिरासो वा ? (८) अनिरूपणीयस्वरूपमन्यदेव वा किंचिदिति ?

नाद्यः, अशक्यत्वात्। तथा हि–सम्बन्धशब्देन किं सामान्यतः सम्बन्धमात्रं

अविद्याधीनं ब्रह्मणस्तिरोधानम् किम् (१) इन्द्रियसंबन्धनिवारणम्, (२) किं वा इन्द्रियजन्यज्ञानस्य ब्रह्मविषयकत्वनिवर्तनम्, (३) अथवा सर्वेषामपि ज्ञानानां ब्रह्मविषयकत्वापाकरणम्, (४) यद्वा स्वस्य स्वकर्मत्वनिवर्तनम्, (५) उत स्वप्रकाशभङ्गः, (६) आहोस्वित् विशदस्वरूपस्य अविशदस्वरूपत्वापादनम्, (७) अथवा ब्रह्मप्रकाशसामग्र्यनुप्रविष्टत्वस्वभावस्य निरासः, (८) अनिरूपणीयस्वरूपमन्यदेव वा किंचिदिति अष्टौ विकल्पाः । **इन्द्रियसंबन्धेति** । इन्द्रियसंबन्धनिवारकस्य कुड्यादेः घटाद्यावारकत्वदर्शनादस्य कल्पस्य उत्थानम् । **तद्विषयतानिवर्तनमिति** । ज्ञायमाने एव घटे दैवादुत्पन्नस्य तमसः ज्ञानविषयताविच्छेदकस्य आवारकत्वदर्शनादिति भावः । **सर्वेषामपीति** । प्रत्यक्षरूपाणामपरोक्षरूपाणां च सर्वेषां ज्ञानानामित्यर्थः । **तद्विषयतापाकरणमिति** । ब्रह्मविषयकत्वनिवर्तनमित्यर्थः । **स्वकर्मताव्यपोह** इति । घटस्य ज्ञानकर्मत्वव्यपोहहेतोस्तमसः आवारकत्वदर्शनादिति भावः । **स्वप्रकाशभङ्ग** इति । घटप्रकाशभञ्जकस्य तमसः आवारकत्ववदिति भावः । **अविशदस्वरूपत्वापादनमिति** । विशदं दृश्यमानस्य घटादेः दैवादुत्पन्नेन तमसा अवैशद्यापादनादिति भावः । **प्रकाशसामग्र्यनुप्रविष्टेति** । अनुप्रविष्टपदमनुप्रविष्टत्वपरम् । तस्यैव तमसः घटादेर्विषयतया सामग्र्यनुप्रवेशनिरासकत्वात् । सामग्रीविघटने हि तदनुप्रविष्टत्वनिरासो भवतीति ।

नाद्य इति । इन्द्रियसंबन्धनिवारणं तिरोधानमिति प्रथमः कल्पो न युज्यते, अशक्यत्वादित्यर्थः । अशक्यत्वमुपपादयति - **तथा हीत्यादि** । संबन्धशब्देन

विवक्षितम्, तद्विशेषो वा ? आद्ये तु इन्द्रियाणां ब्रह्मणश्चारोपणाधिकरणत्वादिसम्बन्धोऽपि न स्यात्। तथा च सति तेषामेवासिद्धौ किं तत्सम्बन्धनिवारणापेक्षया ॥ तदसिद्धिरपि नास्माकं दोषायेति चेन्न; अवगति (शेष (विशेष?)) क्रमाधीनसिद्धिभङ्गस्य भवद्भिरनभ्युपगमात्। अन्यथा व्यावहारिकप्रत्यक्षतन्मूलानुमानादिव्यवहारव्यवस्थाऽपि न सिध्येत्। इन्द्रियोत्पत्तिवादिन्यः श्रुतयश्च प्रकुप्येयुः।

संबन्धसामान्यं विवक्ष्यते वा संबन्धविशेषो वा। आद्ये इन्द्रियाणां ब्रह्मणश्च भवदभिमत आरोपणीयत्वारोपाधिकरणत्वसंबन्धोऽपि न स्यात्। इन्द्रियाणि ब्रह्मण्यारोप्याणीति भवद्भिः स्वीकारात् इन्द्रियब्रह्मणोः आरोप्यारोपाधिकरणभावरूपः संबन्धो भवदभिमतः। अविद्यया इन्द्रियब्रह्मणोः संबन्धसामान्यनिवर्तने तयोः उक्तसंबन्धोऽपि न स्यादिति भावः। आरोप्यारोपाधिकरणभावो नाम अध्यस्यमानधिष्ठानभावः। आदिशब्देन तादात्म्यं गृह्यते। ननु मास्तु स संबन्धस्तयोरित्यत्राह - **तथा च सतीति**। इन्द्रियाणां पारमार्थिकत्वानङ्गीकारात् तेषां ब्रह्मण्यध्यासाभावे मिथ्यात्वासिद्धेश्च निरुपाख्यत्वस्यैवापत्त्या किं तत्संबन्धनिराकरणापेक्षया प्रयोजनमिति भावः। ननु ब्रह्मव्यतिरिक्तस्य सत्त्वमनङ्गीकुर्वतामस्माकं इन्द्रियाणामसिद्धिर्न दोषमावहतीति शङ्कते - **तदसिद्धिरपीति**। प्रतीत्या सिध्यतः वस्तुनः निराकृतेः भवद्भिरनङ्गीकारात् इति समाधत्ते - **अवगतीति**। ननु इन्द्रियातिरिक्तानां प्रतीत्या सिद्ध्यङ्गीकारेऽपि इन्द्रियसिद्धिर्नास्माभिरिष्यत इत्याशङ्क्य समाधत्ते - **अन्यथेति**। इन्द्रियाणां व्यावहारिकसत्त्वानङ्गीकारे प्रत्यक्षस्य तन्मूलानुमानादिप्रमाणानां प्रमेयाणां प्रमाणसाध्यप्रमेयव्यवहारव्यवस्थायाश्चासिद्धिप्रसङ्ग इत्यर्थः। व्यवहारो हि उपादेयज्ञानात् प्रवृत्तिः हेयज्ञानान्निवृत्तिरिति व्यवस्थया दृश्यते। अनुमानादि इतिच्छेदः। अपिः समुच्चये। अनुमानादिव्यवहारव्यवस्था च न सिध्येदित्यर्थः। ततश्च इन्द्रियस्यासिद्धौ ब्रह्मणः कृत्स्नस्य तदतिरिक्तस्य च निरूपाख्यता स्यादित्यर्थः। दोषान्तरमाह - **इन्द्रियेति**। इन्द्रियाणामसत्त्वे ''एतस्माज्जायते प्राणो मनः सर्वेन्द्रियाणि च'' इत्यादयः इन्द्रियोत्पत्तिवादिन्यः श्रुतयः विरुध्येरन्नित्यर्थः।

द्वितीये तु किं सर्वविशेषनिषेधः कतिपयविशेषनिषेधो वाऽभिमतः ? पूर्वं तु पूर्वेणैव दत्तोत्तरम्, 'निर्विशेषं न सामान्यम्' इति हि न्यायविदः । उत्तरत्रापि स विशेषः किं ज्ञानोत्पत्त्यनुपयुक्तः संयोगादिमात्रलक्षणः, उत तदानुगुण्यविशेषित इति । अनुपयुक्तत्वपक्षे तिरोधानशब्दानुपपत्तिः । सर्वव्यापिनि ब्रह्मणि सर्वाधिष्ठाने सोऽपि सम्बन्धो दुर्निवारश्च । पक्षान्तरे तु तदानुगुण्यं किं सर्वत्रापि निवर्तनीयम्, ब्रह्ममात्रे

इन्द्रियसंबन्धनिवारणमित्यत्र संबन्धपदेन संबन्धविशेषो विवक्षित इति पक्षं दूषयति **द्वितीये तु** इति । तत्रापि सर्वेषां संबन्धविशेषाणां निषेधो वा कतिपयानां संबन्धविशेषाणां निषेधो वा विवक्षित इति विकल्पे नाद्यः, संबन्धसामान्यनिषेधदूषणेनैव दूषितत्वात् इत्यर्थः । ननु संबन्धसामान्याभावपक्षोक्तदूषणं कथमत्र स्यात्, सामान्याभावविशेषाभावयोर्भिन्नत्वात् इत्याशङ्क्य "निर्विशेषं न सामान्यम्" इति न्यायेन विशेषाभावकूटमेव सामान्याभाव इति तत्रोक्तं दूषणमत्रापीत्यभिप्रायेण समाधत्ते-**निर्विशेषमिति** । **उत्तरत्रापीति** । कतिपयविशेषनिषेध इति पक्षेऽपि स विशेषः किं ज्ञानोत्पत्त्यनुपयुक्तः संयोगादिमात्ररूपः उत ज्ञानोत्पत्त्यनुगुणः सः । आद्ये तिरोधानशब्दानुपपत्तिः । ज्ञानोत्पत्त्यनुगुणसंबन्धनिवर्तनं हि तिरोधानं भवेत् । सर्वव्यापिनि सर्वाधिष्ठाने च ब्रह्मणि संयोगादिसंबन्धस्यानिवार्यत्वात् तन्निवर्तनानुपपत्तिश्चेत्यर्थः । **संयोगादीत्यादिपदेन** अधिष्ठानाध्यस्यमानभावरूपः संबन्धो विवक्षितः ।

पक्षान्तरे तु इति । ज्ञानोत्पत्त्यानुगुण्यविशेषित इति पक्षे इत्यर्थः । इन्द्रियसंबन्धस्य संयोगरूपस्य तद्घटितस्य वा घटादौ ज्ञानोत्पत्त्यानुगुण्यदर्शनेन ब्रह्मण्यपि इन्द्रियसंबन्धस्य ज्ञानोत्पत्त्यानुगुण्ये स्वीक्रियमाणे विद्यमानसंयोगस्यैव तदानुगुण्यस्य वक्तव्यत्वात् पूर्वोक्तरीत्या सर्वव्यापिनि ब्रह्मणि इन्द्रियसंयोगाभावस्य वक्तुमशक्तया तदानुगुण्यविशिष्टसंयोगनिषेधः स्वर्गी ध्वस्त इत्यादाविव "सविशेषणे हि विधिनिषेधौ सति विशेष्ये बाधे विशेषणमुपसंक्रामत" इति न्यायेन विशेषणनिषेधे पर्यवस्यतीति मत्वा तदानुगुण्यरूपं विशेषणमेव विकल्पयति - **तदानुगुण्यं किमिति** । इन्द्रियसंयोगे विद्यमानं

वा । सर्वत्र चेत्, प्रत्यक्षाद्यनुपपत्तिरेव । ब्रह्ममात्रे चेत्, किमिदं तिरोधानं कदाचिन्निवर्तनीयम्, उतानिवर्तनीयम् ? निवर्तनीयत्वे ब्रह्मण ऐन्द्रियकत्वप्रसङ्गेन, 'अद्रेश्यमग्राह्यम्' इत्यादिश्रुतिविरोधः, दृश्यत्वप्रयुक्तमिथ्यात्वजडत्वादिप्रसङ्गः, शास्त्रस्य च ब्रह्मविषयस्यानुवादरूपता च । अनिवर्तनीयत्वे तु नित्यतिरोधानात्

ज्ञानोत्पत्त्यानुगुण्यं किं सर्वेषु विषयेषु निवर्तनीयम् उत ब्रह्ममात्रे । सर्वेषु विषयेषु चेत् कस्यापि विषयस्य प्रत्यक्षादिकं न स्यात् ।

आदिशब्देन प्रत्यक्षमूलकमनुमित्यादिकं गृह्यते । **ब्रह्ममात्रे चेदिति** । ब्रह्ममात्रे ज्ञानोत्पत्त्यानुगुण्यं निवर्तनीयं चेत् इन्द्रियसंबन्धे ब्रह्मविषयकज्ञानोत्पत्त्यानुगुण्यनिवृत्तिः तिरोधानमिति फलति । तत्र पुनर्विकल्पः, एतादृशस्य तिरोधानस्य कदाचित् निवृत्तिर्भवति वा न वेति । भवतीति पक्षे ब्रह्मणः इन्द्रियजन्यज्ञानविषयत्वप्रसङ्गेन "यत्तदद्रेश्यमग्राह्यम्" इत्यादिश्रुतिविरोधः । तथा हि आनुगुण्यनिवृत्तिरूपमावरणं हि नानुगुण्यध्वंसः । आवरणस्यानादिसिद्धत्वेन सादिध्वंसरूपत्वायोगात् । किं तु आनुगुण्यप्रागभावः आनुगुण्यात्यन्ताभावो वा । ततश्च तादृशस्य तिरोधानस्य कदाचित् निवृत्तिस्वीकारे ब्रह्मेन्द्रियसंयोगस्य ज्ञानोत्पत्त्यानुगुण्यस्यावर्जनीयतया ब्रह्मणश्चक्षुर्ग्राह्यत्वेन उक्तश्रुतिविरोधः स्यादिति भावः । "न मांसचक्षुरभिवीक्षते तम्" इत्यादिश्रुतय आदिपदग्राह्याः । ब्रह्मणः दृश्यत्वाङ्गीकारे मिथ्यात्वजडत्वादिप्रसङ्गश्च । मिथ्यात्वादेः दृश्यत्वव्यापकत्वादिति । प्रत्यक्षसिद्धब्रह्मविषयकतया शास्त्रस्य अनुवादकत्वं च स्यादिति भावः ।

अनिवर्तनीयत्वे त्विति । ज्ञानोत्पत्त्यानुगुण्याभावरूपस्य तिरोधानस्य निवृत्त्यभावे तु तिरोधानस्य सर्वदा विद्यमानत्वेन नित्यं प्रपञ्चाध्यासः स्यात् । प्रपञ्चाध्यासस्य तिरोधानाधीनत्वाङ्गीकारादिति भावः ।

ननु तिरोधाने सत्यपि तत्त्वज्ञानादज्ञाननिवृत्तेः नाध्यास इति चेत् तर्हि अज्ञाननिवृत्तौ तिरोधानस्यापि निवृत्तिप्रसङ्गः तिरोधानस्याज्ञानाधीनत्वाङ्गीकारात् । अज्ञाननिवृत्तावपि

नित्याध्यासः; तस्य तदधीनत्वाभ्युपगमात्। एवं च सन्मात्रग्राहिप्रत्यक्षवादोऽपि प्रतिक्षिप्तस्स्यात्।

तत एव न द्वितीयोऽपि। किंच किमिदमैन्द्रियकत्वेन सम्प्रतिपन्नं ज्ञानं साधिष्ठानं जगत् गृह्णाति, उत निरधिष्ठानम्? आद्ये त्वारोपितवत् अधिष्ठानस्यापि शुक्तिरजतादिष्विदमर्थस्येव तत्प्रतीतिविषयत्वाविशेषात् कथमिव तन्निवर्तनीयम्? द्वितीये त्वपसिद्धान्तः, निरधिष्ठानभ्रमापातश्च। न च ब्रह्मव्यतिरिक्तं किमप्यधिष्ठानं ब्रूषे।

तिरोधानस्यानिवृत्तौ शरीराद्यध्यासोऽपि न निवर्तेत। अनिवृत्तौ ज्ञाननिवर्त्यत्वाभावात् सत्यत्वप्रसङ्गश्च।

नित्यतिरोधाने सति प्रयक्षं सन्मात्रग्राहीति वादोऽपि प्रतिक्षिप्तः स्यादित्याह - **एवं चेति**। ऐन्द्रियकज्ञानस्य ब्रह्मविषयकतानिवर्तनमिति द्वितीयकल्पोऽपि पूर्वोक्तावरणनिवृत्तिविकल्पदूषणैरेव निरस्त इत्याह - **तत एवेति**।

किं च ऐन्द्रियकज्ञानस्य ब्रह्मविषयकत्वनिवर्तनं तिरोधानम् इति द्वितीयविकल्पे ऐन्द्रियकज्ञानशब्देन ब्रह्ममात्रविषयकं स्वमतिकल्पितं किंचित् ज्ञानं विवक्षितम्, उत संप्रतिपन्नघटादिज्ञानम्। नाद्यः, तादृशज्ञाने मानाभावादित्यभिप्रेत्य द्वितीयं पक्षं दूषयति - **किमिदमिति**। **साधिष्ठानमिति**। अधिष्ठानमुपलक्षणम्, न विशेषणम्। क्वचिदधिष्ठाने वस्तुतोऽध्यस्तं विषयीकरोति उत वस्तुतोऽधिष्ठानशून्यमेवाध्यस्तं विषयीकरोतीति विकल्पार्थः। **आद्ये तु इति**। शुक्तिरजताद्यध्यासस्थलेषु आरोपितरजतादिवत् अधिष्ठानस्य शुक्त्यादेरपि इदमर्थतया प्रतीयमानतया अध्यस्तविषयकज्ञानस्य अधिष्ठानविषयकत्वव्याप्तेः ऐन्द्रियकघटादिज्ञाने अधिष्ठानभूतब्रह्मविषयकत्वस्यावश्यकतया तन्निवृत्तिरूपं तिरोधानं कथं भवेदिति भावः। **शुक्तिरजतादिषु** =शुक्तिरजताद्यध्यासेषु। **इदमर्थस्येवेति**। शुक्तिरजतादिप्रतीतौ यथा इदमर्थोऽवभासते तद्वदित्यर्थः। **तत्प्रतीतीति**। आरोपितविषयकप्रतीतीत्यर्थः। **तन्निवर्तनीयम्** = अधिष्ठानविषयकत्वं निवर्तयितुं शक्यम्। **द्वितीये त्विति**। ऐन्द्रियकं ज्ञानं निरधिष्ठानं जगत् विषयीकरोतीति पक्षे तज्ज्ञानं किं

अत एव न तृतीयोऽपि; उक्तेन न्यायेन सर्वेषामपि ज्ञानानां तद्विषयत्वात्। अन्यथा कथं ब्रह्मविषयाजडत्व-स्वयंप्रकाशत्व- सत्यत्वविचारसङ्कथाः प्रवर्तेरन्।

नापि चतुर्थः; भवतैव तदनभ्युपगमात्। अन्यथा ब्रह्मण एव साक्षाद्दृश्यत्वप्रसङ्गात् । अतिरोहितदशायां विषयत्वविषयित्वलक्षणस्वभाववैशिष्ट्येन भेदसत्यत्वप्रसङ्गाच्च।

प्रमारूपम्, उत भ्रमरूपम् । नाद्यः, अपसिद्धान्तात् । न द्वितीयः, निरधिष्ठानभ्रमप्रसङ्गादित्यर्थः । ननु न वयमैन्द्रियकज्ञानस्याधिष्ठानं निषेधामः, किंतु ब्रह्मणस्तत्राधिष्ठानत्वं निषेधाम इत्याशङ्क्याह- **न चेति** । ब्रह्मव्यतिरिक्तस्याधिष्ठानस्याङ्गीकारे अपसिद्धान्तः । सदधिष्ठानकत्वाभावेन जगतः सत्त्वानुपपत्तिश्च इति भावः ।

अथ सर्वेषां ज्ञानानां ब्रह्मविषयकत्वापाकरणं तिरोधानमिति तृतीयकल्पं दूषयति - **अत एव न तृतीयोऽपीति** । ब्रह्मरूपाधिष्ठानग्रहणस्यावश्यकत्वादेवेत्यर्थः । **तद्विषयत्वात्**- ब्रह्मरूपाधिष्ठानविषयकत्वात् । **अन्यथेति** । कस्यापि ज्ञानस्य ब्रह्मविषयकत्वाभावे इत्यर्थः । ब्रह्मरूपधर्मिज्ञानाभावात् अनुमित्याद्यविषयत्वाच्चेति भावः ।

नापि चतुर्थ इति । स्वस्य स्वविषयकत्वाभावः तिरोधानमिति चतुर्थपक्षोऽपि न युक्तः । भवतैव ब्रह्मणः स्वविषयत्वं नाङ्गीकृतम् । अतः तिरोधानस्य का आवश्यकता । तथाङ्गीकारे उपाधिमनपेक्ष्य ज्ञानविषयत्वप्रसङ्गेन मिथ्यात्वप्रसङ्गादिति भावः । किं च ब्रह्मणः स्वविषयकत्वाभावरूपतिरोधानाङ्गीकारे तादृशतिरोधाननिवृत्तेः कदाचित् कर्तव्यत्वात् तद्दशायां ब्रह्मणः स्वविषयकत्वेन विषयविषयिभावरूपस्वभावविशिष्टतया भेदसत्यत्वप्रसङ्ग इत्याह-**अतिरोहितदशायामिति** । ननु तिरोधाननिवृत्तावपि तदानीं न स्वविषयकत्वप्रसङ्गः। तदानीमविद्याया अपि निवृत्त्या तत्कार्यस्य विषयविषयिभावस्याप्यभावादिति चेत् न । कदापि ब्रह्मण्यविद्यमानस्य विषयत्वस्याभावः ब्रह्मस्वरूपप्रयुक्त एव स्यात न त्वविद्याप्रयुक्त इति तात्पर्यात् ।

नापि पञ्चमः, स्वप्रकाशशब्देन किं स्वगोचरं प्रकाशान्तरं विवक्षितम्, स्वरूपमेव वा ? नाद्यः, दत्तोत्तरत्वात्। द्वितीये तु, 'स्वप्रकाशभङ्गः' इति किं सिद्धस्य प्रकाशस्य विनाशो विवक्षितः, उत सेत्स्यत उत्पत्तिप्रतिबन्धः ? पूर्वत्र नश्वरत्वं ब्रह्मणः प्रसज्यते। ततश्च श्रुतिविरोधः; निरधिष्ठानभ्रमप्रसङ्गादयश्च पूर्वोक्ताः पार्ष्णिं गृह्णीयुः। उतरत्र ब्रह्मानादित्वभङ्गः। एवंच ब्रह्मस्वरूपघातिनी अविद्या स्वयमसती किमाश्रया तिष्ठेत् ? तस्यास्तदन्तरेणापि सिद्धौ सत्यत्वप्रसङ्गः।

न च षष्ठः, प्रत्यक्षैकस्वरूपे स्वात्मनि पारोक्ष्यलक्षणावैशद्यापादनायोगात्।

नापि पञ्चम इति। स्वप्रकाशभङ्गः तिरोधानमिति पञ्चमः कल्पोऽपि न युक्तः। स्वप्रकाशशब्देन स्ववियकप्रकाशान्तरं विवक्षितं वा स्वरूपमेव वा। नाद्यः। ब्रह्मणः ज्ञानान्तरविषयत्वप्रसङ्गेन मिथ्यात्वादिप्रसङ्गात्। द्वितीये स्वप्रकाशभङ्ग इति सिद्धस्य प्रकाशस्य नाशः विवक्षितश्चेत् ब्रह्मणः नश्वरत्वप्रसङ्गः। तथा सति अनश्वरत्वप्रतिपादकश्रुतिविरोधः। तथा ब्रह्मणो नाशे सति ब्रह्मनाशरूपतिरोधानाधीनो विक्षेपरूपो भ्रमः निरधिष्ठानः स्यात्। अपि च तत्त्वज्ञानात् तिरोधाननिवृत्तौ= स्वात्मकस्वप्रकाशनिवृत्तिनिवृत्तौ पुनः सविषयकत्वप्रसङ्गेन दृश्यत्वादिप्रसङ्गश्च। स्वप्रकाशभङ्ग इत्यनेन सेत्स्यतः प्रकाशस्य उत्पत्तिप्रतिबन्धो विवक्षितश्चेत् प्रकाशरूपब्रह्मणः अनादित्वभङ्गः स्यादिति भावः। पक्षद्वयेऽपि दोषमाह - **एवं चेति**। **स्वरूपघातिनी**त्यनेन स्वरूपनाशकत्वं स्वरूपोत्पत्तिप्रतिबन्धकत्वं च विवक्षितम्। **तस्या** इति। अविद्यायाः आश्रयमन्तरेणापि सिद्धौ क्वचिदधिष्ठानेऽध्यस्तत्वाभावेन सत्यत्वं स्यादिति भावः।

न च षष्ठ इति। विशदस्वरूपस्याप्यविशदस्वरूपत्वापादनं तिरोधानमिति षष्ठः कल्पोऽपि न युक्तः। तथा हि वैशद्यावैशद्ये किं प्रतीतिगते विवक्षिते उत प्रकाश्यगते इति विकल्प्य प्रथमं शिरो दूषयति-**प्रत्यक्षैकस्वरूप** इति। अवैशद्यं हि पारोक्ष्यरूपम्। "यत् साक्षादपरोक्षात् ब्रह्म" इति प्रत्यक्षस्वरूपतया श्रूयमाणे ब्रह्मणि पारोक्ष्यरूपावैशद्यापादनस्यासंभवात् इति भावः। ननु प्रत्यक्षरूपस्यापि ज्ञानस्य क्वचिद्विषये पारोक्ष्यमपि

अन्यथा स्वात्मभङ्गप्रसङ्गात् । निर्विकारे निर्विशेषे वस्तुनि विषयातिरेकलक्षणवैशद्यस्यापि दुर्निरूपत्वात् ।। वेदान्तजन्यवृत्तिविशेषविषयत्वमेव

दृश्यते यथा दण्डी अयमासीदित्यादौ । अत्र हि ज्ञाने अयमिति विशेष्यांशे प्रत्यक्षत्वम्, दण्डांशे तु परोक्षत्वम् । तत्र दण्डं साक्षात्करोमीत्यनुभवाभावात्, इमं देवदत्तं साक्षात्करोमीत्यनुभवाच्च । अतोऽपरोक्षत्वं न परोक्षत्वविरुद्धमित्यत्राह - **एकेति** । ब्रह्मस्वरूपस्य प्रत्यक्षैकस्वरूपत्वात् तत्र परोक्षत्वं न संभवतीति भावः । यद्यनुमित्यादिवृत्त्यवच्छिन्नतया ब्रह्मस्वरूपेऽपि पारोक्ष्यं ब्रूयात् तदा न स्वरूपेऽपि प्रत्यक्षैकरूपतेत्यत्राह- **स्वात्मनीति** । वृत्त्यनवच्छिन्नस्वरूप इत्यर्थः । **अन्यथेति** । अवैशद्यापादनाङ्गीकार इत्यर्थः । **स्वात्मभङ्गप्रसङ्गादिति** । पारोक्ष्यस्यापरोक्ष्यविरुद्धतया आपरोक्ष्यनिवृत्त्यभावे पारोक्ष्यापादनासंभवात् यावदाश्रयभाविनश्च आपरोक्ष्यस्य आश्रयनिवृत्तिं विना निवृत्त्ययोगेन आश्रयस्य स्वात्मनोऽपि (ब्रह्मणोऽपि) निवृत्तिप्रसङ्ग इति भावः ।

ननु विषयातिरेक एव ज्ञाने वैशद्यम् । तदभाव एव चावैशद्यमित्याशङ्क्याह - **निर्विकार** इति । वस्तुपदं प्रकाश्यपरम् । स्वात्मनीति शेषः । **निर्विकारे** निर्विशेषे च स्वात्मनि प्रकाश्ये सतीत्यर्थः । विषयातिरेकस्य वैशद्यरूपत्वे विषयातिरेकाभावस्यावैशद्यरूपत्वे च अविद्यया आत्मनः विषयातिरेका-पादनमनावरणमिति वक्तव्यम् । तत्र मुक्तिदशायां विषयातिरेकात्मकमनावरणं वक्तव्यम्। अन्यथा मुक्तेः संसारादविशेषप्रसङ्गात् । तदानीं विषयातिरेकश्च किं तदानीमेवोत्पन्नैर्धर्मैः, उत संसारकालीनैरेव संसारकालेऽभासमानैः मुक्तिकाले भासमानैर्धर्मैरिति विकल्पं मनसिकृत्य आद्यं दूषयति- **निर्विकार** इति । न च तदोत्पन्नस्यापि धर्मस्यापारमार्थ्यात् न निर्विकारत्वविरोध इति वाच्यम् । मुक्त्यन्वयिनस्तस्य पारमार्थिकत्वात् । द्वितीयं दूषयति- **निर्विशेष** इति । मिथ्याभूतविशेषस्यापि मुक्तावसंभवात् वैशद्यस्य तदानीमभानादिति भावः ।

एतावता वैशद्यावैशद्ये प्रतीतिगते इति पक्षो दूषितः । अथ ते प्रकाश्यगते इति द्वितीयपक्षं शङ्कते-**वेदान्तजन्येति** । वेदान्तजन्यवृत्तिविशेषविषयत्वरूपस्य वैशद्यस्य

वैशद्यमिति चेन्न; प्रकाश्यातिरेकाभावे धारावाहिवदनुपकारकत्वात्। प्रकाश्यातिरेके सविशेषत्वस्यावर्जनीयत्वात्।

नापि सप्तमः, स्वरूपभूतप्रकाशस्यासाध्यत्वेन सामग्रीनैरपेक्ष्यात्। तद्गतस्यातद्गतस्य वा प्रकाशान्तरस्य तद्विषयस्यानभ्युपगमात्। अभ्युपगमे वा सधर्मकत्वदृश्यत्वादेर्दुर्निवारत्वात्। तन्मिथ्यात्वे तदर्थसामग्रीनैष्फल्यं स्यात्।

प्रकाश्यब्रह्मस्वरूपापेक्षया भेदाभावे विशदव्यवहारहेतुत्वं न स्यात्। तदपेक्षया भेदे च ब्रह्मणः सविशेषत्वप्रसङ्ग इति समाधत्ते - **प्रकाश्यातिरेकाभाव** इति। वृत्तिविशेषेत्यत्र विशेषपदेन वृत्तेरवधारणत्वाप्रतिबद्धत्वादिकं विवक्षितम्। **अनुपकारकत्वादिति**। विशदव्यवहाराहेतुत्वादित्यर्थः। तश्च नेदं वैशद्यमिति भावः। किं च वेदान्तजन्यवृत्तिविषयत्वस्य संसारदशायामेव सत्त्वेन इदानीमनावरणं मोक्षे आवरणमिति वैपरीत्यापत्तिश्च द्रष्टव्या।

नापि सप्तम सति। ब्रह्मनिष्ठब्रह्मप्रकाशसामग्र्यनुप्रविष्टत्वस्वभावनिरासस्तिरोधानमिति सप्तमपक्षोऽपि न युक्तः। ब्रह्मप्रकाशशब्देन किं ब्रह्मस्वरूपभूतः प्रकाशो विवक्षितः उत स्वरूपातिरिक्तः ब्रह्मविषयकः प्रकाशः। नाद्यः, स्वरूपभूतप्रकाशस्य नित्यत्वेन सामग्रीविरहात्। न द्वितीयः, भवद्भिः अनभ्युपगमात्। अभ्युपगमे तस्य स्वातिरिक्तविषयकत्वावश्यंभावात् ब्रह्मणः सधर्मकत्वदृश्यत्वादिप्रसङ्गादिति भावः। आदिशब्देन मिथ्यात्वं गृह्यते। किं च स्वप्रकाशः सत्यो मिथ्या वेति विकल्पमभिप्रेत्य आद्ये अद्वैतहानेः स्पष्टत्वात् द्वितीयं दूषयति- **तन्मिथ्यात्व** इति। संसारदशायां ब्रह्मप्रकाशसामग्र्यननुप्रविष्टतया तदानीमप्रकाशोत्पादनायोगात् मोक्षदशायामेव तदुत्पादनं वाच्यम्। तच्च न संभवति। तदानीं मिथ्याविषयकत्वासंभवात्। ततश्च सामग्रीनैष्फल्यमित्यर्थः। ततश्च स्वरूपस्यातिरिक्तप्रकाशाजनकत्वात् अन्यत्र कृप्तप्रकाशजनकतावच्छेदकानवच्छिन्नत्वाच्च तज्जननायोग्यत्वमेव स्यादिति भावः।

किं च तस्य प्रकाशान्तरस्य स्वरूपप्रकाशात् अधिकविषयकत्वमस्ति न वा। न चेत्, तत्सामग्र्यननुप्रविष्टत्वस्वरूपापादनेऽपि ब्रह्मणः आवृतत्वं न स्यात्। चक्षुषा

भ्रान्तिज्ञानोत्पत्तिसामग्रीविच्छेदस्य च दोषत्वाप्रसिद्धेः । प्रतिबन्धकाभावस्य हेतुत्वमनभ्युपगच्छतां सप्तमस्य पक्षस्य दुर्घटत्वाच्च ।

अष्टमस्तु कष्टः पक्षो विकल्प्यते । किं तदधिष्ठानभूतं ब्रह्म प्रकाशप्रतिपक्षभूतम्, उत तदनुगुणम्, अथोदासीनमिति । आद्ये, पूर्वोक्ता एव दोषाः । द्वितीये असाध्यस्य

साक्षात्क्रियमाणे घटे साक्षात्कारान्तराभावमात्रेण आवृतत्वव्यवहाराभावात् इत्यभिप्रेत्य प्रथमे तस्याधिकस्य ब्रह्मव्यतिरिक्ततया मिथ्यात्वात् तत्प्रकाशस्य भ्रान्तित्वस्य आवश्यकत्वात् तत्सामग्रीविच्छेदकस्य तत्सामग्र्यनुप्रविष्टत्वनिरासकस्य दोषत्वमनुपपन्नम्, प्रत्युत गुणत्वमेव स्यात् इति तात्पर्येणाह - **भ्रान्तिज्ञानेति** ।

'प्रतिबन्धकाभावस्य हेतुत्वमनभ्युपगच्छतां सप्तमस्य पक्षस्य दुर्घटत्वाच्च' इति । किं च ब्रह्मप्रकाशसामग्र्यां ब्रह्मप्रकाशप्रतिबन्धकाभावोऽपि अनुप्रविष्ट: तत्स्वरूपनिरास इत्यर्थ: प्रतिबन्धकाभावस्य कारणत्वमभ्युपगच्छतां मत एव घटते, तस्य कारणत्वमनभ्युपगच्छतां मते न घटत इत्यर्थ: ।

अष्टमस्तु पक्ष इति । अनिरूपणीयस्वरूपमन्यदेव वा किंचित् इति पक्ष: अष्टम:। तस्याभिप्राय: - अस्ति प्रकाशत इति व्यवहारायोग्यत्वं, नास्ति न प्रकाशत इति व्यवहारयोग्यत्वं चेत्येतदुभयं तिरोधानमिति पूर्वपक्ष्यभिमतोऽयं पक्ष: इदानीं निरस्यते इति। मूले- ''किं तदधिष्ठानभूतं ब्रह्म प्रकाशप्रतिपक्षभूतम्'' इति पाठो दृश्यते । तत्र सामीचीन्यं नास्ति । ''किं तत् अधिष्ठानभूतब्रह्मप्रकाशप्रतिपक्षभूतम्'' इति पाठ: समीचीन:, चण्डमारुतानुसारात् । तत् इत्यस्य अस्ति प्रकाशत इति व्यवहारायोग्यत्वं नास्ति न प्रकाशत इति व्यवहारयोग्यत्वं चेत्येतदुभयमित्यर्थ: । एतदुभयम् अधिष्ठानब्रह्मप्रकाशस्य प्रतिकूलं वा अनुकूलं वा उदासीनं वेति त्रेधा विकल्प: । **आद्ये पूर्वोक्ता एव दोषा इति** । पञ्चमपक्षोक्ता दोषा इत्यर्थ: । **द्वितीय** इति । अनुकूलमिति पक्षे किं प्रकाशोऽसाध्य: उत साध्य: । आद्ये असाध्यस्य प्रकाशस्य वृत्त्यनुपकारकत्वात् तदानुगुण्याङ्गीकारो व्यर्थ इत्याह-**असाध्यस्येति** । द्वितीये आह - **साध्यत्वे चेति** । तस्य साध्यप्रकाशस्य

किं तदानुगुण्येन ? साध्यत्वे च प्रागुक्ता दोषाः । प्रकाशानुगुणे च कथं तिरोधानवाचोयुक्तिः ? प्रकाशमाने च कथमध्यासः ॥ प्रकाशमान एवाधिष्ठाने सर्वत्नाध्यास इति चेत्; तर्हि किं तिरोधानप्रयासेन ॥ यथावत् प्रकाशमानेऽध्यासायोगादिति चेन्न; निर्विशेषस्य स्वप्रकाशस्याविद्याशतेनाप्ययथास्वरूपप्रकाशत्वापादनायोगात्। तद्योगे वा निर्विशेषत्वादिभङ्गप्रसङ्गात्। तृतीयेऽप्यजागलस्तनवदनुपकारकत्वमेव।

ब्रह्मस्वरूपानतिरेके ब्रह्मणः साध्यत्वप्रसङ्गः अतिरेके सत्यत्वादिप्रसङ्ग इत्याह-**प्रागुक्ता** इति। द्वितीयपक्षे च दोषान्तरमाह - **प्रकाशानुगुणे चेति** । यथावत् प्रकाशमाने चाध्यासायोगादिति वदता अयथावत् स्वरूपप्रकाशत्वापादनाय वा यथावत्स्वरूपप्रकाशनिवृत्तये वा आवरणमित्युक्तं भवति । तत्र न द्वितीयः पक्षो युज्यते । ब्रह्मणोऽपि नाशप्रसङ्गात् । आद्ये अयथावत्स्वरूपप्रकाशापादनमपि किं विद्यमानस्यैव प्रकाशस्य तादृशधर्मापादनम्, उत तादृशधर्मविशिष्टप्रकाशोत्पादनम् । नाद्यः मिथ्याभूतस्य तस्य आपादनेऽपि परमार्थतो यथावत्स्वरूपप्रकाशस्य विद्यमानतया अध्यासानुपपत्तेः सत्यभूतस्यैव तादृशधर्मस्य आपादनं वक्तव्यम् । तस्यैव यथावत्स्वरूपप्रकाशविरोधित्वात्। तच्चानुपपन्नम् । ब्रह्मणो निर्विशेषत्वात् । न द्वितीयः, स्वरूपाभिन्नप्रकाशस्योत्पादनासंभवात् इत्याह - **न निर्विशेषेति** । यद्वा किं सत्यभूतस्य तादृशधर्मस्यापादनम् उत मिथ्याभूतस्य। नाद्यः, निर्विशेषत्वात् । न द्वितीयः, स्वप्रकाशतया यथावत् भासमाने मिथ्याभूतस्य तादृशधर्मस्यैवाध्यासानुपपत्तेः इत्याह - **न निर्विशेषेति । तद्योगे वेति** । अयथावत्स्वरूपप्रकाशत्वरूपधर्मस्य सत्यभूतस्य मिथ्याभूतस्य वा आपादने तादृशधर्मस्योत्पादने इति वा अर्थः । **निर्विशेषत्वादिभङ्गप्रसङ्गात्** इत्यत्र आदिशब्देन अधिष्ठानयाथात्म्यज्ञानस्य अध्यासविरोधित्वं ब्रह्मणोऽनादित्वं वा गृह्यते । **तृतीय इति** । उदासीनमिति तृतीयकल्प इत्यर्थः ।

एतेन तत्तत्कुमतिकल्पिताः कल्प्यमानाः कल्पयिष्यमाणाश्च आवरणप्रकारभेदाः सर्वे प्रतिक्षिप्ता वेदितव्याः । प्रातिस्विकरूपेणाष्टमविकल्पमननुवदतोऽयमपि भाव इति **महाचार्याः** ।

ननु भवत्पक्षेऽपि जीवब्रह्मणोस्स्वरूपं स्वयंप्रकाशम्; तदुभयमपि कर्मरूपयाऽविद्यया तन्मूलगुणत्रयमयपापरूपया मायया तिरोहितमिति निर्विगानमेव; अन्यथा संसारात्यन्ताभावप्रसङ्गात्। ततश्च भवतोऽपि समानं चोद्यमिति समदुःखसुखौ भवावेति चेन्न–भवत एव दुःखसम्बन्धः, अस्माकं तु सुखमेवेति पश्यतु भवान्। ब्रह्मणस्तावत् स्वरूपं स्वयंप्रकाशमपि नान्यस्मै प्रकाशते;

सिद्धान्तोपरि आक्षेपः समाधानं च

ननु भवत्पक्षेऽपीत्यादि। सिद्धान्तिपक्षेऽपि जीवात्मनः परमात्मनश्च स्वरूपं स्वयंप्रकाशम्। तदुभयमपि कर्मरूपया अविद्यया तन्मूलकगुणत्रयमयपापरूपया मायया च तिरोहितमिति निर्विवादम्। **अन्यथा** तिरोधानाभावे ब्रह्मस्वरूपनिरतिशयानन्दानुभवात् तत्तत्पुण्यपापस्वरूपकर्मानुगुणस्वर्गनरकादिफलप्रदत्वस्य च ज्ञानात् पापरूपकर्मानुष्ठानं न स्यात्। तदभावे च तन्मूलकजन्ममरणादिरूपसंसारो न स्यात्। तथा भगवच्छेषतैकरसस्वरूपस्य तदनुगुणनिरतिशयपुरुषार्थरूपतच्चरणपरिचरणयोग्यतायाश्च ज्ञाने तद्विरोधिकर्मानुष्ठानासंभवात् संसारात्यन्ताभावप्रसङ्गः। ततश्च भवतापि तिरोधानाङ्गीकारात् तिरोधाने विकल्पपूर्वकं प्रदर्शिता मयि दोषाः भवत्यपि प्रसजन्तीति चोद्यं समानम्। चोद्येन यद् दुःखं चोद्यपरिहारेण यत् सुखं तदुभयमावयोः समानमिति शङ्का।

इमां शङ्कां परिहरति **भवत एवेत्यादिना**। अपरिहार्यचोद्यवशात् भवत एव दुःखम्। चोद्यपरिहारसत्त्वात् अस्माकं सुखमेव। तथा हि ब्रह्मणः स्वरूपं स्वयंप्रकाशमपि स्वस्मा एव स्वयं प्रकाशते नान्यस्मै। अन्यधर्मभूतेन ज्ञानेन तु अन्यस्य ब्रह्मस्वरूपं प्रकाशते। एवं सर्वेषां जीवात्मनां स्वरूपमपि स्वस्मा एव स्वयं प्रकाशते। अन्यस्य तु तद्धर्मभूतज्ञानेन अन्यात्मस्वरूपं प्रकाशते इति अस्माकं मतम्। ततश्च ब्रह्मस्वरूपगोचरः यः अन्यदीयधर्मभूतज्ञानप्रसरः तदुत्पत्तिप्रतिबन्धरूपं तिरोधानं कर्मणा भवतीत्येतदुपपन्नमस्मन्मते। तत्त्वज्ञानेन तादृशप्रसरोत्पत्तिप्रतिबन्धरूपतिरोधाननिवृत्तिरप्युपपद्यते। एवं ब्रह्मस्वरूपं ब्रह्मणे

तद्धर्मेण तु तस्य प्रकाशते। सर्वेषामात्मनां स्वरूपमपि स्वस्मा एव स्वप्रकाशत्वात् अन्यस्मै तदीयज्ञानान्तरकर्मतयैवावभासते। ततश्च तद्गोचरज्ञानप्रसरोत्पत्तिप्रतिबन्धादिलक्षणं तिरोधानमुपपन्नमेव। स्वस्मै तु नित्यं प्रकाशमानत्वात् नित्यसर्वज्ञत्वाच्च ब्रह्मणो न स्वरूपहानाज्ञत्वादिदोषलेशावकाशः। जीवस्य तु स्वरूपं यद्यपि स्वस्मै स्वयं प्रकाशतेयद्यपि च तत्रैव देवाद्यध्यासः,तथाऽपि न भवत्पक्षवत् दोषः,

---

नित्यं प्रकाशमानत्वात् नित्यसर्वज्ञत्वाच्च ब्रह्मणो न स्वरूपनाशाज्ञत्वादिदोषलेशस्याप्यवकाशः। एवं जीवात्मनः स्वरूपमपि यद्यपि स्वस्मै स्वयंप्रकाशम्, यद्यपि च स्वस्मिन् देवमनुष्याद्यध्यासः, तथापि न भवन्मतवत् अस्मन्मते दोषः । प्रकाशमानस्य प्रत्यक्त्वाद्याकारस्य अधिष्ठानत्वोपयोगित्वात् इतरारोपप्रतिबन्धकत्वाभावात् । देवत्वाद्यारोपप्रतिबन्धकस्य देवत्वादिविरोधिधर्मप्रकाशस्य कर्मणा निवारणेन तिरोधानं चोपपद्यते इति **घट्टार्थः**। अथ पङ्क्तीनामर्थो लिख्यते - **तद्धर्मेण तु तस्येति**। तच्छब्दद्वयेनाप्यन्यः परामृश्यते। ब्रह्मस्वरूपम् अन्यधर्मभूतज्ञानेनान्यस्य प्रकाशत इत्यर्थः। **सर्वेषामिति**। स्वस्मा एवेत्यत्र प्रकाशत इति अनुषज्यते। स्वप्रकाशत्वप्रयुक्तभानं स्वस्मा एवेत्यर्थः। स्वकर्तृकव्यवहारप्रयोजक, स्वविषयकज्ञानान्तरानधीनप्रकाशवत्त्वं स्वस्मै स्वयं प्रकाशत्वमिति निष्कर्षः । **ततश्चेति** । **प्रतिबन्धादि**लक्षणमित्यत्र आदिशब्देन विद्यमानप्रकाशनाशो गृह्यते। तच्च ज्ञानकालोत्पन्नेऽन्धकारे संभवत्येव। ज्ञानप्रतिबन्धकत्वादिकमपि साक्षात्परंपरासाधारणं विवक्षितम्। तेन इन्द्रियसंयोगप्रतिबन्धादिहेतुकुड्यादेरपि तिरोधायकत्वलाभः । ज्ञानहेतुप्रतिबन्धकं वा आदिशब्दार्थः । यथा परमते स्वप्रकाशब्रह्मणस्तिरोधाने स्वरूपनाशः तिरोधायकाज्ञानाश्रयत्वेन अज्ञत्वं च प्रसज्यते न तथा सिद्धान्ते इत्याह - **स्वस्मै तु नित्यमिति**। **प्रकाशमानाकारस्य अधिष्ठानत्वोपाधिकत्वात्** इति मूले अधिष्ठानत्वोपयोगित्वात् इति वा अधिष्ठानत्वोपकारकत्वादिति वा पाठः साधुः । स्वयं प्रकाशमानस्याकारस्य धर्मान्तरारोपानुकूलत्वात् इति वा

प्रकाशमानाकारस्याधिष्ठानत्वोपाधिक(पकारक ?) त्वात्। तदारोपप्रतिबन्धकस्य तत्तद्विरोधिधर्मप्रकाशस्य विनिवारणेन तिरोधानोपपत्तेश्च ॥ देवादिविलक्षणस्वरूपप्रकाशे कथं तेऽध्यास इति चेन्न; वस्तुतो विलक्षणत्वेऽपि विलक्षण वित्त्य(मित्य ?) भानात्। शुक्तिरजताख्याताविदम्भानवत्। इदमर्थो हि वस्तुतो रजताद्विलक्षणोऽपि न तथा भाति; तद्वैलक्षण्यव्यवस्थापकस्य शुक्तित्वादेरप्रतीतेः। तथेहापि सावयवत्व-स्थूलत्व-अनित्यत्व-विकारित्व - जडत्वादिधर्मविशिष्टदेहाद्वैधर्म्यरूपनिरवयवत्व-अणुत्व-नित्यत्व-निर्विकारत्व-स्वप्रकाशत्वादीनां स्वरूपप्रकाशे प्रकाशाभावात् तद्विपरीताकारारोपः स्वरूपमात्ने च प्रकाशमाने युक्त एव ॥ ममाप्येवमस्त्विति चेन्न; भवत्पक्षे ततद्धर्माणामभावात् ॥

धर्मान्तरारोपाविरोधित्वादिति वा अर्थः। **तदारोपेति**। स्वात्मनि देवत्वाद्यारोपप्रतिबन्धकः यः देवत्वादिविरोधिधर्मप्रकाशः तस्य कर्मणा निवारणेन तिरोधानमप्युपपद्यत इति भावः।

ननु वस्तुतो देवादिविलक्षणस्य आत्मस्वरूपस्य स्वयं प्रकाशे विद्यमाने सति कथं तत्र देवत्वाद्यध्यासस्तव मत इति शङ्कते - **देवादिविलक्षणेति**। वस्तुतः आत्मस्वरूपस्य देवादिशरीरभिन्नत्वेऽपि तद्भिन्नत्वेन रूपेण स्वयं प्रकाशो नास्तीति देवत्वाद्यारोपः संभवतीति समाधत्ते - **वस्तुत** इति। **विलक्षणवित्त्यभानादिति**। विलक्षणमित्यभानादिति वा पाठः। विलक्षणत्वेन ज्ञानाभावादित्यर्थः। तत्र दृष्टान्तः **शुक्तिरजताख्याताविदंभानवदिति**। **शुक्तिरजताख्यातौ** शुक्तिरजतभ्रमे। **इदंभानवत्**=इदमर्थप्रकाशवत्। यथा शुक्तिरजतभ्रमस्थले इदंत्वेन शुक्तेर्भानेऽपि तत्र रजतत्वारोपः इदंत्वप्रकाशस्य तदविरोधित्वात् तद्वत् इत्यर्थः। तदेव स्पष्टमुपपादयति - **इदमर्थो हीत्यादिना**। **न तथा भाति** न रजतविलक्षणत्वेन भाति। **तद्वैलक्षण्यव्यवस्थापकस्य** - रजतत्ववैलक्षण्यनिर्णायकस्य। **इहापि**=जीवात्मस्वरूपेऽपि। **वैधर्म्यरूपेति**। विरुद्धधर्मरूपेत्यर्थः। **स्वरूपप्रकाशे** = जीवात्मस्वरूपप्रकाशे। **तद्विपरीताकारारोपः** निरवयवत्वादिविरुद्धसावयवत्वाद्याकारारोपः।

ननु भवन्मत इव मम मतेऽपि आनन्दत्वादीनां ब्रह्मस्वरूपप्रकाशविषयत्वात् आवरणेन तदप्रकाशेऽपि न स्वप्रकाशानुपपत्तिः, नाप्यध्यासानुपपत्तिरिति शङ्कते- **ममापीति**। भवन्मते

तदभावस्तदप्रकाशस्योपकारक एवेति चेत्, तथा सति नित्यतिरोधानात् नित्याध्यासप्रसङ्गः । न हि तत्तत्प्रकाशलक्षणा तिरोधाननिवृत्तिः कदाचिदप्युपपद्यते। ब्रह्मण्यसतां तेषां तत्त्वज्ञानोदयदशायां प्रकाशे तत्त्वज्ञानस्यैवातत्त्वज्ञानत्वप्रसङ्गेन पुनरप्यनिर्मोक्षप्रसङ्गात् ॥ ब्रह्मस्वरूपमेव तथा तथा भातीति न दोष इति चेत्– किं तथात्वं स्वरूपम्, उत स्वरूपातिरिक्तम् ? पूर्वत्रेदानीमपि तत्प्रकाशो दुर्वारः,

---

ब्रह्मस्वरूपातिरिक्तानामानन्दत्वादिधर्माणामभावात् अविद्यया ब्रह्मस्वरूपतिरोधानमेव वाच्यमिति ब्रह्मस्वरूपप्रकाशानुपपत्तिः अधिष्ठानाप्रकाशादध्यासानुपपत्तिश्चेत्याशयेन समाधत्ते- **भवत्पक्ष** इति ।

नन्वानन्दत्वादिधर्माणामभावः आनन्दत्वाद्यप्रकाशरूपतिरोधानस्योपकारक एवेति शङ्कते - **तदभावस्तदप्रकाशस्येति** । आनन्दत्वादिधर्माणामभावः आनन्दत्वाद्यप्रकाशस्येत्यर्थः । समाधत्ते- **तथा सतीति** । आनन्दत्वाद्यप्रकाशरूपं तिरोधानं सर्वदा भवेदिति तिरोधाननिवृत्तिः कदापि न स्यात् । तथा च नित्यमध्यासः स्यात् । तिरोधाननिवृत्त्यभावे अविद्याया अप्यनिवृत्तेरिति भावः । न हि आनन्दत्वादिप्रकाशरूपा तिरोधाननिवृत्तिः कदापि संभवतीति भावः । **ब्रह्मण्यसतामिति** । ब्रह्मणि अविद्यमानानामानन्दत्वादीनां तत्त्वज्ञानोत्पत्तिकाले प्रकाशे सति तत्त्वज्ञानस्यैवातत्त्वज्ञानत्वप्रसङ्गः असद्विषयकत्वात् । तथा च मोक्ष एव न स्यादिति भावः । ननु न तत्त्वज्ञाने स्वरूपातिरिक्तानन्दत्वादिभानं, येन तस्य भ्रमत्वं (अतत्त्वज्ञानत्वं) स्यात् । किं तु स्वरूपमेव आनन्दत्वादितत्तद्धर्मतया भासत इति शङ्कते - **ब्रह्मस्वरूपमेवेति** । परिहरति- **किं तथात्वमिति** । तथात्वम् आनन्दत्वादिकं किं ब्रह्मस्वरूपम्, उत ब्रह्मस्वरूपादतिरिक्तम् । आद्ये इदानीं संसारदशायामपि आनन्दत्वादिप्रकाशो दुर्वारः, स्वरूपस्य प्रकाशमानत्वात् । द्वितीये मोक्षदशायां स्वरूपातिरिक्तानन्दत्वादिप्रकाशात् भ्रान्तिः दुर्वारा । स्वरूपातिरिक्तस्य मिथ्यात्वेन तत्प्रकाशस्य भ्रमरूपत्वात् इति भावः ।

उत्तरत्र तु तदानींतनभ्रान्तिर्दुर्वारेति दुस्तरं व्यसनम् । ततो यदि निर्धर्मकमपि जडत्वेनाभ्युपेतम्, तदा तत्स्वरूपाप्रकाशलक्षणं तिरोधानमपि वक्तुं शक्यते; यद्वा (यदि वा ?) स्वयंप्रकाशमपि सधर्मकत्वेनाभ्युपेतम्, तदा तद्धर्माप्रकाशलक्षणं तिरोधानं सुवचमिति न कथञ्चिदपि निर्विशेषनित्यस्वयंप्रकाशे, स्वस्य परस्य वा ज्ञानान्तरागोचरे वस्तुनि तिरोधानवाचोयुक्तिर्घटत इति ॥

॥ इति शतदूषण्यां तिरोधानानुपपत्तिवादः पञ्चत्रिंशः ॥ ३५ ॥

उपसंहरति - **तत इति** । यदि निर्धर्मकं वस्तु जडत्वेनाभिमतं तदा तत्स्वरूपाप्रकाशलक्षणं तिरोधानं वा वक्तुं शक्यते, अधिष्ठानज्ञानाभावात् अध्यासस्तु न संभवति । यदि स्वयं प्रकाशमपि सधर्मकत्वेनाभिमतं, तदा तद्धर्माप्रकाशलक्षणं तिरोधानं वक्तुं शक्यम् । नित्यनिर्विशेषस्वयंप्रकाशे स्वस्य परस्य वा ज्ञानान्तरागोचरे वस्तुनि तिरोधानं कथमपि वक्तुं न शक्यत इति भावः । **तिरोधानमपीति** । अपिशब्दो वार्थकः । अध्यासस्तु तदापि नोपपद्यते, अधिष्ठानज्ञानाभावादिति भावः । तद्धर्माध्यासलक्षणं तिरोधानमपीत्यत्र तत्त्वज्ञाननिवर्त्यमिति शेषः । अतो निर्धर्मकत्वादेव तद्धर्मविशिष्टतया प्रकाशाभावरूपमावरणं संभवतीति चोद्यस्य नावकाशः ॥

इति श्रीशतदूषणीव्याख्यायां तात्पर्यप्रकाशिकायां
तिरोधानानुपपत्तिवादः पञ्चत्रिंशः ॥

* * *

॥ अथ आत्माद्वैतभङ्गवादः षट्त्रिंशः ॥ ३६ ॥

नमस्त्रेधा विभक्तानामात्मनामन्तरात्मने ।
ब्रह्मणे हयवक्त्राय बन्धमोक्षैकहेतवे ॥

यदुच्यते तावत् आत्माद्वैतवादिभिः—एक एवात्मा देहाद्युपाधिभेदेन बहुधा

अथ आत्माद्वैतभङ्गवादः षट्त्रिंशः ॥

नमस्त्रेधा विभक्तानामात्मनामन्तरात्मने ।
ब्रह्मणे हयवक्त्राय बन्धमोक्षैकहेतवे ॥

बद्धमुक्तनित्यसूरिभेदेन त्रेधा विभक्तानां जीवानामन्तरात्मने बन्धमोक्षयोः एकहेतवे अद्वितीयाय मुख्यकारणाय हयवदनाय ब्रह्मणे नम इत्यर्थः । आत्मैक्ये सति बद्धमुक्तनित्यव्यवस्था न स्यात् । तथा ब्रह्मणो जीवान्तर्यामित्वं संसारमोक्षहेतुत्वं च श्रुत्युक्तं भज्येत । अतः आत्मनामैक्यं न युक्तम् इति वादार्थसंग्रहः । पूर्ववादे संविदभेदो न भवतीति सधितस्य दृढीकरणार्थमात्मनोऽपि नानात्वं साधयत्यत्र वादे ।

आत्मत्वेनैक्येऽपि जीवात्मस्वेव वर्गत्रयमस्ति बद्धा मुक्ताः नित्याश्चेति । एकैकवर्गनिविष्टा अप्यनन्ताः । तत्र बद्धजीवापेक्षया नित्यजीवानन्त्यमतिशयितम् । ''त्रिपादस्यामृतं दिवि'' इत्येतत्स्वारस्यात् । ईश्वरतत्त्वमपि नैकम् । लक्ष्मीनारायणरूपात्मद्वयरूपतायाः प्रमाणसिद्धत्वादित्याशयः । एकहेतवे=मुख्यकारणभूताय । बन्धेत्यनेन सांसारिकसर्वसुखदुःख हेतुजन्मस्थित्यादिग्रहणात् मोक्षातिरिक्तफलहेतुत्वमपि अवगमितम् ।

पूर्वपक्षः

यदुच्यत इत्यादि । आत्मैक्यवादिनः एक एवात्मा शरीरेन्द्रियाद्युपाधिभेदेन बहुधा प्रतिभाति । तत्र जीवः ब्रह्मणः प्रतिबिम्ब इति केचित्; यथा चन्द्र एक एव जलतरङ्गेषु

प्रतिभाति, तरङ्गचन्द्रवत्, सौभर्यादिवच्च । तथा च प्रयोगाः—विगीतानि शरीराणि मयैवात्मवन्ति, शरीरत्वात्, सम्प्रतिपन्नमच्छरीरवत्; सर्वं जाग्रच्छरीरं मदविद्याकल्पितम्, शरीरत्वात्, कल्पितत्वाद्वा, स्वप्नदृष्टमच्छरीरवत्; सर्वोऽप्यात्मा अहमेव, चेतनत्वात्, अहमिव; सर्वाणि सुखदुःखानि मयैव भुज्यन्ते, सुखदुःखत्वात्, मत्सुखदुःखवत्; विगीतानि शरीराणि देवदत्तात्मना आत्मवन्ति, शरीरत्वात्, सम्प्रतिपन्नदेवदत्तशरीरवत् (इति ?) । एवं सहस्रशोऽनुमानानि विभज्य प्रयोज्यानि ।

प्रतिबिम्बमान; तरङ्गभेदात् बहुबिधतया प्रतिभाति तद्वत् इति वदन्ति । अन्ये तु एकमेव ब्रह्म उपाधिना अवच्छिन्नं जीव:, उपाधिभेदात् ब्रह्मभिन्नतया प्रतीयते । यथा एक एवाकाश: घटाद्युपाध्यवच्छिन्न: घटाकाशमठाकाशादिरूपेण भिन्नतया भाति तद्वत् । यथा च एक एव सौभरि: शरीरभेदात् भिन्न इव प्रतिभाति तद्वच्चेति वदन्तीति भाव: । उक्तमात्मैक्यमनुमानेन साधयति - **तथा च प्रयोगा** इत्यादिना । प्रयोगशब्द: परार्थानुमानपर: । यथा जीवैक्यं सिध्यति तथा अनुमानानि कथ्यन्त इत्यर्थ: । **विगीतानीति** । मच्छरीरव्यतिरक्तानि शरीराणि मदभिन्नात्मवन्ति वा मद्भिन्नात्मवन्ति वेति विवादविषयभूतानि शरीराणीत्यर्थ: । अयं पक्षनिर्देश: । मयैवात्मवन्तीति साध्यम् । तृतीयार्थोऽभेद:, आत्मन्यन्वेति । मदभिन्नात्मवन्तीत्यर्थ: । स्वशरीरे सिद्धसाधनवारणाय विगीतानीति शरीरविशेषणम् । अत्र आत्मान्तरवत्त्वेऽपि मयाप्यात्मवत्त्वमस्तीति अर्थान्तरम् इति नाशङ्कनीयम् । गौरवादेवात्मान्तरनिरासात् । तस्मात् एवकार: फलितार्थानुवाद: । **संप्रतिपन्नेति** । मयैवात्मवत्त्वेन उभयवादिसंमतमच्छरीरवदित्यर्थ: । आत्मपक्षकमात्मैक्यसाधकमनुमानमाह **सर्वोऽप्यात्मेति** । आत्मैक्यसाधकं सुखदु;खपक्षकमनुमानमाह- **सर्वाणि सुखदु:खानीति** । शरीरपक्षकमनुमानान्तरमाह-**विगीतानि शरीराणीति** । एवं **सहस्रश** इति । प्रतिपुरुषमुक्तचतुर्विधान्यनुमानानि प्रयोक्तव्यानीत्यर्थ: ।

विप्रतिपन्नः शरीरभेदोऽनेकात्मनिरपेक्षः, शरीरभेदत्वात्, सौभरिशरीरभेदवत्। एवमनुमानान्तराण्यपि करणभेदादिपक्षीकारेण भाव्यानि । एवमनभ्युपगमे कल्पनागौरवप्रसङ्ग इति ।

ननु पण्डितत्वमूर्खत्वादिविरुद्धधर्माध्यासात् भेदः सिद्धः, तथा च अक्षपादैः (कणभक्षैः ?) सूत्रितम् (वे.द. 3-2-19) ''नानाऽऽत्मानो व्यवस्थातः'' इति । उक्तं च त्वदासन्नैः साङ्ख्यैरपि– ''जननमरणकरणानां (जन्मजरामरणानां)

आत्मैक्यसाधकमनुमानमुक्त्वा आत्मभेदनिरासकमनुमानमाह - **विप्रतिपन्न** इति । अनेकात्मनिरपेक्षो वा अनेकात्मसापेक्षो वेति विवादविषय इत्यर्थः । देवदत्तादिशरीराणां परस्परभेदः एकात्ममात्राधिष्ठेयधर्मिप्रतियोगिक इत्यर्थः । घटानां परस्परभेदे व्यभिचारवारणाय **शरीरेति** । **एवमनुमानान्तराण्यपीति** । **करणम्** = इन्द्रियम् । देवदत्तकरणानाम् यज्ञदत्तकरणानां च परस्परभेदः एकात्ममात्राधिष्ठेयधर्मिप्रतियोगिकः करणभेदत्वात् इत्यनुमानं विवक्षितम् । सौभरिशरीरस्य करणानां परस्परभेदः देवदत्तचक्षुःश्रोत्रादिकरणानां वा परस्परभेदः दृष्टान्तः । **आदिशब्देन** देवदत्तादीनां बुद्ध्यादिभेदो विवक्षितः । एकात्माधिष्ठेयत्वानङ्गीकारे कल्पनागौरवप्रसङ्ग इति भावः ।

आत्मभेदवादिमतानुसारेण शङ्कते - **नन्वित्यादिना** । एक आत्मा पण्डितः अन्यश्च मूर्खः एकः सुखी अन्यः दुःखीति लोके दृश्यते । एवंरीत्या पण्डितत्वमूर्खत्व - सुखित्वदुःखित्वादिविरुद्धधर्माध्यासात् आत्मभेदः सिध्यति । देवदत्तात्मा यज्ञदत्तात्मापेक्षया भिन्नः यज्ञदत्तात्मावृत्तिसुखित्वादिधर्मवत्वात् यो यदवृत्तिधर्मवान् स तद्भिन्न इति प्रयोगः । इदमेवानुमानं मनसिकृत्य न्यायसूत्रकारः आह-**नानात्मानो व्यवस्थातः** इति । व्यवस्थातः- पण्डितत्वमूर्खत्वसुखित्वदुःखित्वादिव्यवस्थात इत्यर्थः । सुखित्वादीत्यादिपदेन दुःखित्वस्वापतदभावादिः गृह्यते । **त्वदासन्नैरिति** । अहमर्थाद्यध्यासस्य अद्वैतिभिरिव सांख्यैरपि स्वीकारादिति भावः । जन्मजरामरणानामिति सांख्यकारिका वाचस्पतिमिश्रैरित्थं व्याख्याता पुरुषबहुत्वं सिद्धम् । कस्मात्? **जन्ममरणकरणानाम् प्रतिनियमात्** । निकायविशिष्टाभिः

प्रतिनियमादयुगपत्प्रवृत्तेश्च । पुरुषबहुत्वं सिद्धं त्रैगुण्यविपर्ययाच्चैव ॥" इति । सत्यपि च विरुद्धधर्मे यद्यभेदः, तदा सत्यमिथ्यैक्यादिकमपि स्यादिति चेन्न–

अपूर्वाभिः देहेन्द्रियमनोऽहं कारबुद्धिवेदनाभिः पुरुषस्याभिसंबन्धो जन्म, न तु पुरुषस्य परिणामः । तस्यापरिणामित्वात् । तेषामेव च देहादीनामुपात्तानां परित्यागो मरणम्, न त्वात्मनो विनाशः । तस्य कूटस्थनित्यत्वात् । करणानि बुद्ध्यादीनि त्रयोदश । तेषां जन्ममरणकरणानां प्रतिनियमात् । प्रतिनियमः व्यवस्था । सा खल्वियं सर्वशरीरेषु एकस्मिन्, पुरुषे नोपपद्यते । तदा खलु एकस्मिन् पुरुषे जायमाने सर्वे जायेरन्, म्रियमाणे च म्रियेरन्। अन्धादौ चैकस्मिन् सर्व एवान्धादयः, विचित्ते चैकस्मिन् सर्व एव विचित्ताः स्युः इत्यव्यवस्था स्यात् । प्रतिक्षेत्रं तु पुरुषभेदे, भवति व्यवस्था । इतश्च प्रतिक्षेत्रं तु पुरुषभेद इत्याह - **अयुगपत्प्रवृत्तेश्च** । प्रवृत्तिश्च प्रयत्नलक्षणा यद्यप्यन्तःकरणवर्तिनी, तथापि पुरुष उपचर्यते । तथा च तस्मिन्नेकत्र शरीरे प्रयतमाने सर्वशरीरेष्वेक इति सर्वत्र प्रयतेत । ततश्च सर्वाण्येव शरीराणि युगपच्चालयेत् । नानात्वे तु नायं दोष इति । इतश्च पुरुषभेद इत्याह - **त्रैगुण्यविपर्ययाच्चेति** । एवकारो भिन्नक्रमः सिद्धमित्यस्यानन्तरं द्रष्टव्यः । सिद्धमेव नासिद्धम् त्रयो गुणास्त्रैगुण्यम्, तस्य विपर्ययः अन्यथात्वम् । केचित् खलु सत्वनिकायाः प्राणिसङ्घाः सत्त्वबहुला यथोर्ध्वरेतसः, केचित् रजोबहुलाः यथा मनुष्याः, केचित् तमोबहुलाः यथा तिर्यग्योनयः सोऽयमीदृशस्त्रैगुण्यविपर्ययः अन्यथाभावः तेषु सत्त्वनिकायेषु न भवेत् यद्येकः पुरुषः स्यात्, भेदे त्वयमदोष इति । **जन्मजरामरणानामित्यस्य** स्थाने **जन्ममरणकरणानामिति** पाठः वाचस्पत्यादृतः ।

नन्वस्तु पण्डितत्वमूर्खत्वादिविरुद्धधर्माध्यासः, तावता भेदो मास्तु इत्यत्राह - **सत्यपि चेति** । यदि विरुद्धधर्मे सत्यपि अभेदः स्यात् तदा सत्यत्वमिथ्यात्वरूपविरुद्धधर्मे सत्यपि सत्यमिथ्यावस्तुनोरैक्यं स्यात् । न चेष्टापत्तिः । सर्वमिथ्यात्वे पर्यवसानेन शून्याद्वैतवादप्रसङ्गात् । आदिशब्देन निरधिष्ठानभ्रमो विवक्षितः । सत्यमिथ्यैक्ये निरधिष्ठानभ्रमप्रसङ्गेन शून्याद्वैतं स्यादिति भावः । अपि चं सर्वसत्यत्वप्रसङ्गेन

तेषां विरुद्धत्वाभावात् । सहानवस्थानलक्षणो ह्यत्र विरोधोऽभिमतः; 'स चाधिकरणभेदे सिद्धे; तत्सिद्धिश्च विरुद्धधर्माध्यासात्' इत्यन्योन्याश्रयणात् । न चैवं घटपटादिष्वपि विरोधपरिहारे सर्वभेदविलय इति वाच्यम्; तेषु स्वरूपभेदस्यैव स्फुटतरमुपलभ्यमानत्वात् । अन्तत इष्टप्रसङ्गरूपत्वाच्च । अत एवानुमानानां प्रत्यक्षबाधोऽपि परिहृतः ॥ अत्र परस्परसुखादिप्रतिसन्धानप्रसङ्गो बाधक इति चेन्न-एकेनानुभूतानामेव क्वचिदप्रतिसन्धानदर्शनात् । न हि जन्मान्तरानुभूतेषु,

---

अपसिद्धान्तश्च । समाधत्ते - **तेषामिति** । पण्डितत्वमूर्खत्वसुखित्वदुःखित्वादीनां विरुद्धत्वाभावादित्यर्थः । कुत इत्यत्राह - **सहानवस्थानेति** । एकाधिकरणवृत्तित्वाभावरूपो हि विरोधोऽत्र आत्मभेदसाधकतया अभिमतः । स च विरोधः अधिकरणस्य आत्मनः भेदे सिद्धे भवति । भेदश्च विरुद्धधर्माध्यासादिति अन्योन्याश्रयाद्विरुद्धत्वाभाव इति भावः । आत्मन ऐक्ये सति तत्रैव पण्डितत्वमूर्खत्वादिसमावेशसंभवात् उक्तविरोधो न सिध्यति । शङ्कते - **न चैवमिति** । उक्तरीत्या घटत्वपटत्वादीनामपि विरोधाभावात् घटपटादीनामप्यैक्यप्रसङ्गात् घटपटादिभेदस्यापि विलयप्रसङ्ग इति न शङ्कनीयम् । घटपटादिस्वरूपेषु भेदस्य प्रत्यक्षसिद्धत्वेन विरुद्धधर्माध्यासवशात् भेदस्य तत्राकल्पनात् । विरुद्धधर्माध्यासात् भेदकल्पनायामुक्तदोषः स्यादेव । न च घटपटादौ तथा कल्प्यते । प्रत्यक्षेण भेदोपलम्भादिति भावः । अपि च घटपटादिभेदस्यापि मिथ्यात्वेन तद्भेदविलय इष्ट एवेत्याह - **अन्तत इति** । सर्वस्यापि भेदस्य मिथ्यात्वादिति भावः । **अत एवेति** । घटादिस्वरूपभेदवत् आत्मस्वरूपभेदस्य स्फुटतरमुपलम्भाभावेन वैषम्यात् भेदसामान्यस्य मिथ्यात्वाच्च आत्मैक्यसाधकानां पूर्वोक्तानुमानानां आत्मभेदग्राहिप्रत्यक्षेण बाध इति शङ्कापि परिहृतेत्यर्थः ।

प्रत्यक्षेण बाधाभावेऽपि तर्केण बाधोऽस्तीति शङ्कते- **अत्र परस्परेति** । आत्मनामैक्ये- सति परस्परानुभूतानामर्थानां सुखादीनां परस्परं स्मरणप्रसङ्गरूपस्तर्कः आत्मैक्यबाधक इति भावः । समाधत्ते - **एकेनेति** । अस्यात्मनः तदात्माभिन्नत्वे

एकस्मिन्नपि वा जन्मनि चिरकालदृष्टेषु, पूर्वदिवसभुक्तव्यञ्जनादिषु वा सर्वेषां पुरुषाणां तत्तत्प्रतिसन्धानमुपलभामहे ॥ संस्कारप्रमोषात्तदपटुत्वाद्वा तत्र प्रतिसन्धानाभावः; ये पुनरप्रमुषितस्फुटतरसंस्काराः, ते जातिस्मरादयो जन्मान्तरानुभूतमेतज्जन्मानुभूतं च प्रतिसन्दधत इति चेन्न–अत्राप्यविद्यावैचित्र्यादुपाधिभेदप्रतिनियततया वा प्रतिसन्धानाभावः प्राकृतानाम्, तत्त्वविदस्तु प्रह्लाद-वामदेवादयः प्रतिसन्दधतीति तुल्यम् । यथोक्तम्–

"सर्वगत्वादनन्तस्य स एवाहमवस्थितः । मत्तः सर्वमहं सर्वं मयि सर्वं सनातने॥"

तदात्मानुभूतानुसंधानप्रसङ्ग इत्यस्य तदात्मानुभूतसर्वस्मरणप्रसङ्ग इत्याशयं मत्वा व्यभिचारमाह - **एकेनेति**। एकेनात्मनानुभूतेष्वर्थेष्वेव क्वचिदर्थे प्रतिसन्धानाभावदर्शनात् तद्वत् अन्यानुभूतार्थानां तदभिन्नेन आत्मान्तरेण स्मरणाभाव उपपद्यत इति भावः । उपपादयति **न हीति**।

पुनः शङ्कते - **संस्कारप्रमोषादिति**।

तदपटुत्वात् = संस्कारस्यापटुत्वात् । तदुक्तं संवित्सिद्धौ प्रायणान्तरक्लेशात् प्रसूतिव्यसनादपि । चिरातिवृत्ताः प्राग्जन्मभेदा न स्मृतिगोचराः ॥ इति । अप्रमुष्टत्वे हेतुः **स्फुटतरेति**। **जातिस्मराः** = जन्मान्तरानुभूतार्थस्मर्तारः । आदिशब्देन एतज्जन्मनि चिरकालात् प्रागनुभूतस्यार्थस्य स्मर्तारो गृह्यन्ते । समाधत्ते - **अत्रापीति**। आत्माभेदेऽपीत्यर्थः । अस्य तुल्यमित्यनेनान्वयः । **प्राकृतानाम्** = अतत्त्वविदाम्, आत्मैक्यमजानतामिति यावत् । **अविद्यावैचित्र्यादिति**। अविद्यायाः विचित्रशक्तियोगादित्यर्थः । **उपाधिभेदेति**। एतदन्तः करणावच्छिन्नचैतन्यमेतदन्तः करणावच्छिन्नचैतन्येनैव स्मर्यत इत्यर्थः । **तत्त्वविद** इति । आत्मैक्यं जानन्त इत्यर्थः । आत्मान्तरानुभूतमपि ते स्वात्मैक्यज्ञानवशात् स्मरन्तीति भावः । तत्र प्रमाणमाह - **यथोक्तमिति**। सर्वगत्वादिति विष्णुपुराणे प्रह्लादस्योक्तिरूपः श्लोकः । अनन्तस्य विष्णोः एकस्यैवात्मनः सर्वत्र विद्यमानत्वात् अहमपि स एव । अतः विष्णोर्जायमानं सर्वं मत्त एव

इत्यादि। श्रुतिश्च– ''तद्धैतत् पश्यन् ऋषिर्वामदेवः प्रतिपेदे अहं मनुरभवं सूर्यश्चाहं कक्षीवानृषिरस्मि विप्रः'' इति। आदिभरत-ऋभु-निदाघादिवृत्तान्तेषु च व्यक्तोऽयं पन्थाः।

किञ्च, परस्परसुखादिप्रतिसन्धानमस्मदादिष्वपि प्रसज्यमानं नानिष्टम्। यो हि स्वसुखादीन् प्रतिसन्घत्ते, स एवान्योऽपीत्यस्मन्मते तत्प्रतिसन्धानमप्येतत्प्रसिसन्धानमेवेति किमत्र प्रसञ्जनीयम् ?। नाहं राजादिसुस्वमनुभवामीति

जायते।विष्णौ स्थितं सर्वं मय्येव स्थितमिति श्लोकार्थः। वामदेवोक्तिरूपां श्रुतिं प्रमाणयति- **तद्धैतत् पश्यन्निति**। आत्मैक्ये प्रतिसंधाने च वृत्तान्तानपि प्रमाणयति - **आदिभरतेति**। आदिभरतोपाख्यानं विष्णुपुराणे द्वितीयांशे त्रयोदशाध्यायमारभ्य षोडशपर्यन्तेष्वध्यायेषु विस्तरेण वर्तते।

''सोऽहं स च त्वं स च सर्वमेतदात्मस्वरूपं त्यज भेदमोहम्'' इति आदिभरतकृतात्मैक्योपदेशस्य निगमनम्।

विष्णुपुराण एव द्वितीयांशे आदिभरतोपाख्यानमध्ये ऋभुनिदाघसंवादः पञ्चदशेऽध्याये वर्तते। तत्राप्मात्माद्वैतं प्रतिपादितमस्ति।

एतावता परस्परप्रतिसन्धानप्रसङ्गरूपतर्के व्यभिचार उक्तः। अथ अयं नानिष्टप्रसङ्गः अपि तु इष्टप्रसङ्ग इत्याह- **किं चेत्यादिना**। परगतसुखदुःखादिप्रतिसन्धानं स्वस्य स्यात् उभयोरात्मनोरैक्यात् इति यदापाद्यते तदिष्टमेव। यस्तावत् स्वसुखादिकं प्रतिसन्धत्ते स एव परोऽपीति परकर्तृकं परगतसुखादिप्रतिसन्धानमप्येतत्कर्तृकं प्रतिसन्धानमेवेति किमत्रानिष्टमस्ति प्रसञ्जनीयमिति भावः।

ननु नाहं राजादिसुखमनुभवामीति राजादिपरगतसुखादिप्रतिसन्धानाभावस्य प्रत्यक्षसिद्धतया राजादिकर्तृकं प्रतिसन्धानमपि एतत्कर्तृकमेवेत्येतदनुपपन्नमिति शङ्कते- **नाहं राजादिसुखमिति**। नाहं राजादिसुखमनुभवामीति यस्य राजादिसुखप्रति सन्धानाभावप्रत्यक्षं तस्यैव आत्मनः राजशरीरावच्छेदेन अहं सुखमनुभवामीति सुखादिप्रतिसन्धानस्य

प्रतिसन्धानाभावः प्रत्यक्षसिद्ध इति चेन्न; अहं सुखमनुभवामीति राजशरीरे तदुपलम्भात्। अन्यस्यैवोपलम्भ इति चेन्न; अद्याप्यन्यत्वासिद्धेः ॥ अहमस्मादन्यः, अयं च मत्तोऽन्य इति परस्परान्यत्वं प्रत्यक्षसिद्धमिति चेन्न; परस्याप्रत्यक्षत्वेन ततोन्यत्वस्य प्रत्यक्षयितुमशक्यत्वात्। स्वस्य प्रत्यक्षत्वेऽपि स्वगतान्यत्वस्यापि प्रतियोगिभूतपरप्रतीतिमन्तरेणानुपपत्तेः। परश्च प्रतीयमानोऽन्यतया वा स्यात्,

---

प्रत्यक्षसिद्धत्वात् न तस्य प्रतिसन्धानस्य तदभावप्रत्यक्षेण बाध इत्याशयेन समाधत्ते- **अहं सुखमिति**। एवं च एकस्यैवात्मन: शरीररूपावच्छेदकभेदेन सुखादिप्रतिसन्धानतदभावयोरुपपत्तिरिति न किंचिदवहीनमिति भाव:। तस्यैव प्रतिसन्धानमित्येतत् असिद्धमिति शङ्कते - **अन्यस्यैवेति**। अद्याप्यात्मान्यत्वमसिद्धमिति समाधत्ते - **अद्यापीति**। अन्यत्वमसिद्धमित्येतदसिद्धमिति शङ्कते - **अहमस्मादिति**। अहं देवदत्त: यज्ञदत्तादन्य: स च मत्तोऽन्य इति परस्परात्मभेदस्य प्रत्यक्षसिद्धत्वादिति भाव:। परस्यात्मन: अप्रत्यक्षत्वेन तत्र स्वान्यत्वस्य स्वप्रतियोगिकभेदस्य प्रत्यक्षयितुमशक्यत्वात्; भेदप्रत्यक्षं प्रति अधिकरणयोग्यतायास्तन्त्रत्वादित्याशयेन समाधत्ते - **परस्याप्रत्यक्षत्वेनेति**। ननु स्वस्य प्रत्यक्षत्वात् स्वस्मिन् परापेक्षयान्यत्वं प्रत्यक्षयितुं शक्यते। तथाप्यात्मभेद: सिध्यत्येवेत्याशङ्क्य अभावप्रत्यक्षं प्रति प्रतियोगिज्ञानस्य हेतुतया परस्य प्रतीतिं विना तत्प्रतियोगिकभेद: स्वस्मिन् ग्रहीतुं न शक्यत इति समाधत्ते - **स्वस्य प्रत्यक्षत्वेऽपीति**। परविषयकप्रतीतिमभ्युपगम्य विकल्पयति - **परश्चेति**। परत्वेनाभिमत: आत्मा स्वापेक्षया अन्यत्वेन प्रतीयते वा अनन्यत्वेन प्रतीयते वा अन्यानन्यसाधारणरूपेण प्रतीयते वेति त्रेधा विकल्प:। तत्र नाद्य: कल्प:। प्रत्यक्षत: अन्यत्वस्याप्रतीते:। शरीरभेदस्य प्रत्यक्षत्वेऽप्यात्मभेदस्याप्रत्यक्षत्वात्। लिङ्गात् चेष्टादिरूपात् परशरीरे कश्चिदस्तीत्येतावन्मात्रं प्रतीयते न तु स मदपेक्षया अन्य इति प्रतीयते। न च स्वस्मिन्नविद्यमानं मुखविकासादिकं दृष्ट्वा सुखमनुमाय तेन स्वान्यत्वमनुमातुं शक्यते, तच्छरीरवर्ती आत्मा मत्तोऽन्य: मदवृत्तिसुखवत्त्वात् यो यदवृत्तिधर्मवान् स ततोऽन्य इति

अनन्यतया वा, सामान्यतो वा ? नाद्यः, प्रत्यक्षतस्तदप्रतीतेः । लिङ्गतोऽपि कश्चिदस्तीत्यनुमीयते; न तु मत्तोऽन्य इति ।। मुखविकासादिना स्वविरुद्धसुखाद्यनुमानेऽन्यत्वमप्यनुमितं भवतीति चेन्न; तेषां विरुद्धत्वस्य प्रागेव दूषितत्वात् । न द्वितीयः; सर्वेषां स्वप्रतियोगिकव्यतिरेकप्रसङ्गेन शून्यवादावतारात्। अत एव न तृतीयः; प्रतिसन्धानमात्रात् भेदे स्वस्मादपि (स्वस्य ?) भेदप्रसङ्गात्। तथापि कथं प्रतिसन्धानतदभावयोस्सिद्धिरिति चेन्न; तदभावस्यासिद्धेः । सिद्धावपि

व्याप्तेः तच्छरीरवर्ती आत्मा मदवृत्तिसुखवान्, मदवृत्तिविकसितमुखवत्त्वात् इत्यनुमानद्वयप्रयोग इति वाच्यम् । परगतसुखादीनां स्वावृत्तित्वरूपविरोधस्य प्रागेव दूषितत्वात् । स्वावृत्तित्वे सिद्धे स्वान्यत्वसिद्धिः स्वान्यत्वे सिद्धे स्वावृत्तित्वसिद्धिः इत्यन्योन्याश्रयदूषितत्वादिति यावत् ।

न द्वितीयः । अनन्यत्वेन प्रतीतात् परस्मात् स्वस्यान्यत्वं यदि गृह्यते तदा अन्यत्वानन्यत्वयोर्विरोधो नास्तीति वक्तव्यम् । तयोर्विरोधे अनन्यत्वेन गृहीतात् अन्यत्वग्रहासंभवात् । एवं च स्वस्यापि स्वानन्यत्वेन ग्रहात् तदन्यत्वतदनन्यत्वयोः ग्रहात् शून्यवादावतारप्रसङ्गः । अघटात् भिन्नस्य घटात् भिन्नत्वे निःस्वरूपत्वप्रसङ्गात् ।

एतदुक्तं भवति । परो ह्यन्यः । तस्यानन्यत्वेन ग्रहे अनन्यस्य सर्वस्य स्वान्यत्वमिति स्वस्यापि स्वानन्यतया स्वान्यत्वं स्यात् । स्वस्य स्वभेदे च स्वमेव नेति स्वलक्षणस्य सर्वस्याभावात् शून्यवादप्रसङ्ग इति ।

अत एव न तृतीयः । सामान्यतः प्रतीयमानात् भेदे स्वस्यापि सामान्यतः प्रतीयमानत्वात् स्वस्यापि स्वस्मादन्यत्वप्रसङ्गादिति घट्टार्थः ।

ननु एवमपि राजशरीरावच्छेदेन अहं सुखमनुभवामीति प्रतिसन्धानस्य देवदत्तनिष्ठत्वे देवदत्तनिष्ठया नाहं राजसुखमनुभवामीति प्रतीत्या प्रतिसन्धानाभावस्यापि सिद्धिः स्यात् । तथा च विरुद्धयोः प्रतिसन्धानतदभावयोरेकाधिकरणवृत्तित्वापत्तिरिति शङ्कते - **तथापीति**। समाधत्ते-**तदभावस्यासिद्धेरिति**। प्रतिसन्धानाभावस्यासिद्धेरित्यर्थः । न च कथमसिद्धिः ।

देशकालोपाध्यादिभेदेन तदुपपत्तेः । अन्यथा स्वाश्रयैकदेशवर्तिसंयोगादि (गुण) विलयप्रसङ्गात् । न चैतत् युक्तम्; ईश्वरघटादिसंयोगस्य व्यापित्वे घटादेरपि विभुत्वप्रसङ्गात् । संयोगादीनां स्वाभावसमानाधिकरणतयैव धर्मिग्राहकेणैव सिद्धेस्तथाऽभ्युपगमः; इह तु न तथेति चेन्न; अत्रापि प्रागुक्तानुमानैः, अद्वैतशास्त्रैश्च सुखादीनामपि तत्सिद्धेः । वैशेषिकादिभिस्तथाऽभ्युपगमाच्च ।

नाहं राजसुखमनुभवामीति प्रतीतेर्दर्शितत्वादिति वाच्यम् । तादृशप्रतीतेर्भ्रमत्वादिति तात्पर्यात्। अहं राजसुखमनुभवामीति विपरीतप्रमायां सत्यां नाहं राजसुखमनुभवामीति भ्रान्तिरप्यनुपपन्नेत्यरुचेराह - **सिद्धावपीति** । आत्मैक्यपक्षे शरीररूपोपाधिभेदेन सुखप्रतिसन्धानतदभावयोरुपपत्तिः । राजशरीरावच्छेदेन सुखानुभवस्य देवदत्तशरीरावच्छेदेन सुखानुभवाभावस्य च प्रतिसन्धानमुपपद्यत इति भावः । **देशकालेति** । क्वचित् अवयवभेदेन एकस्मिन्नवयवे कालभेदेन निरवयवे कालाकाशाद्युपाधिभेदेन चेत्यर्थः । आदिशब्देन सत्यत्वमिथ्यात्वभेदो गृह्यते । **तदुपपत्तेः** = प्रतिसन्धानतदभावयोरेकाधिकरणवृत्तित्वोपपत्तेरित्यर्थः । **अन्यथेति** । अवच्छेदकभेदेन भावाभावयोः सामानाधिकरण्यमित्यनङ्गीकारे संयोगादीनामव्याप्यवृत्तिगुणानां स्वाभावसामानाधिकरण्यं कथं स्यादिति भावः । **स्वाश्रयेत्यादि** । स्वं संयोगाभावः तदाश्रयः वृक्षादिः तदेकदेशः अग्रभागादिः तद्वृत्तिसंयोगादेः विलयप्रसङ्गात् इत्यर्थ; । संयोगादे; स्वात्यान्तभावेन सह एकधिकरण-वृत्तित्वं न स्यादिति भावः । **न चैतद्युक्तमिति** । संयोगादेः स्वाभावसामानाधिकरण्याभावो न युक्त इत्यर्थः । कुत इत्यत्राह - **ईश्वरेति** । ईश्वरे यो घटसंयोगः तस्य अव्याप्यवृत्तित्वानङ्गीकारे घटस्य विभुत्वं स्यादिति भावः ।

ननु संयोगादिरूपधर्मिग्राहकं प्रमाणं संयोगादिकं स्वात्यन्ताभावसमानाधिकरणतयैव अवगमयतीति युक्तं संयोगतदभावयोरवच्छेदकभेदेन अविरोधाभ्युपगमनम् । इह तु सुखादिप्रतिसन्धानतदभावविषये उपाधिभेदेनाविरोधाभ्युपगमनं न युक्तमिति शङ्कते - **संयोगादीनामिति** । समाधत्ते - अत्रापीति । आत्मरूपधर्मिग्राहकं प्रमाणमात्मानमेकत्वे-

तथा च श्रूयते—'अथातोऽहंकारादेशः' इत्यारभ्य, 'अहमेवेदं सर्वम्', 'आत्मैवेदं सर्वम्' इति। आत्मभेदश्च बहुशो निषिध्यते–'नेह नानाऽस्ति किञ्चन। मृत्योः स मृत्युमाप्नोति य इह नानेव पश्यति', 'यत्र त्वस्य सर्वमात्मैवाभूत् तत् केन कं पश्येत्; तत्केन कं विजानीयात्', 'आत्मेत्येवोपासीत', 'द्वितीयाद्वै भयं भवति' इत्यादिभिः । तथा च स्मृतिः—'तस्याऽऽत्मपरदेहेषु सतोऽप्येकमयं हि

नैवावगमयतीति तदनुसारेण सुखादिप्रतिसन्धानतदभावयो: उपाधिभेदेनाविरोधोऽङ्गीकरणीय इति भाव: । **प्रागुक्तानुमानैरिति** । विगीतानि शरीराणि मयैव आत्मवन्ति शरीरत्वात् संप्रतिपन्नमच्छरीरवत् इत्यादिभिरनुमानैरित्यर्थ: । **अद्वैतशास्त्रैश्चेति** । तत्त्वमसि, एकमेवाद्वितीयम् आत्मैवेदं सर्वम्, अयमात्मा ब्रह्म इत्यादिशास्त्रैरित्यर्थ: । **तत्सिद्धेरिति** । स्वाभावसामानाधिकरण्यसिद्धेरित्यर्थ: । **तथाभ्युपगमाच्चेति** । सुखादीनां स्वात्यन्ताभावसमानाधिकरणतया अङ्गीकारादित्यर्थ: । अद्वैतशास्त्रमेव दर्शयति - **तथा च श्रूयत इति** । ''अथातोऽहंकारादेश:'' इत्यारभ्य अनन्तरवाक्यै: ''अहमेवाधस्तात् अहमुपरिष्टात्'' इत्यादिभि: अध:स्थितोर्ध्वस्थितादिसर्ववस्तुतादात्म्यस्य प्रतीते: ''अहमेवेदं सर्वम्'' इति तत्रत्यवाक्यान्तरेणापि तत्प्रतीते: आत्मैक्यं सिद्धमित्यर्थ: । इत्यारभ्य श्रूयते, अहमेवेदं सर्वमिति च श्रूयत इत्यन्वय: । तथा चेत्यस्य अहमित्येकतयेत्यर्थ: । न केवलमात्मैक्यं श्रूयते, आत्मभेदश्च निषिध्यत इत्याह **आत्मभेदश्चेति** । **यत्र त्वस्येति** । ''यत्र हि द्वैतमिव भवति तदितर इतरं पश्यति'' इत्युपक्रमात् ''यत्र त्वस्य सर्वमात्मैवाभूत्'' इत्येवकारार्थे द्वैतनिषेधे तात्पर्यमिति भाव: । **आत्मेत्येवोपासीतेति** । ''अथ योऽन्यां देवतामुपास्तेऽन्योऽसावन्योऽहमस्मीति न स वेद'' इत्युपक्रमात् एवकारेण भेदोपासननिषेधात् भेदनिषेध: सिद्ध: । एवं सर्वजीवानां परमात्मना भेदनिषेधे परस्परभेदनिषेधोऽप्यर्थसिद्ध: । अद्वैतशास्त्रैश्च इत्यत्र शास्त्रपदेन स्मृतिग्रन्थानामपि विवक्षितत्वात् अद्वैतप्रतिपादकस्मृतिग्रन्थानुदाहरति - **तथा च स्मृतिरिति** । अत्र विष्णुपुराणगतश्लोका: भगवद्गीता चोदाहृता: । **तस्यात्मपरदेहेष्विति** । तस्य आत्मन: स्वदेहे परदेहेषु च

यत् । विज्ञानं परमार्थो हि द्वैतिनोऽतथ्यदर्शिनः ॥' 'यद्यन्योऽस्ति परः कोऽपि मत्तः पार्थिवसत्तम । तदैषोऽहमयं चान्यो वक्तुमेवमपीष्यते ॥', 'वेणुरन्ध्रविभेदेन भेदः षड्जादिसंज्ञितः । अभेदव्यापिनो वायोस्तथाऽसौ परमात्मनः ॥', 'आकाशमेकं हि यथा घटादिषु पृथग्भवेत् । तथाऽऽत्मैको ह्यनेकस्थो जलाधारेष्विवांशुमान् ॥', 'एक एव हि भूतात्मा भूते भूते व्यवस्थितः । एकधा बहुधा चैव दृश्यते जलचन्द्रवत् ॥' इति । उक्तं च भगवता, 'सर्वभूतस्थमात्मानं सर्वभूतानि चात्मनि । ईक्षते योगयुक्तात्मा सर्वत्र समदर्शनः ॥' इति । एवंविधान्यन्यान्यपि वचनान्यसङ्ख्यातत्वान्न कात्स्न्र्येनोदाहर्तुं शक्यन्ते ।

वर्तमानस्य स्वरूपमेकमयम् एकम् विज्ञानस्वरूपम् । तदेव परमार्थः । आत्मभेददर्शिनः अतत्त्वदर्शिन इत्यर्थः । आत्मपशब्दाभ्यां प्रसक्तां भेदशङ्कां परिहर्तुं **यद्यन्योऽस्तीति** श्लोकः। वेणुरन्ध्रेत्यादिना दृष्टान्तमुखेन आत्मभेदस्योपाधिकल्पितत्वमुच्यते । अभेदव्यापिन इत्यस्याभेदेन व्यापिन इत्यर्थः । **आकाशमेकं हि यथेति** स्मृत्यन्तरश्लोकौ । घटादिषु स्थानेषु स्थितमपि आकाशमेकमेव घटाद्युपाधिभेदात् पृथगिव प्रतीयते, यथा च जलरूपेष्वाधारेषु प्रतिबिम्बितः एक एव सूर्यः प्रतिबिम्बग्राहकोपाधिभेदेन भिन्न इव प्रतीयते तथा सर्वेषु भूतेषु एक एवात्मा स्थितः उपाधिभेदात् एकधा बहुधा च दृश्यत इत्यर्थः । **सर्वभूतस्थमिति** भगवद्गीताश्लोकः । **एवंविधानीति** । ''सोऽहं स च त्वं स च सर्वमेतत् आत्मस्वरूपं त्यज भेदमोहम्''

''अहमात्मा गुडाकेश सर्वभूताशयस्थितः ।''

''क्षेत्रज्ञं चापि मां विद्धि सर्वक्षेत्रेषु भारत''

''न तदस्ति विना यत् स्यान्मया भूतं चराचरम्'' इत्यादीनि वचनानीत्यर्थः ।

ननु सर्वेषु शरीरेष्वेक एवात्मेति स्वीकारे अयमात्मा बद्धः अयमात्मा मुक्त इति व्यवस्था न स्यादित्याशङ्क्य ब्रह्माज्ञानपक्षे इतः पूर्वं मुक्तानामेवाभावात् बद्धमुक्तव्यवस्थाभङ्ग इष्ट एव । एकमेव ब्रह्म आत्मरूपम् एकया अविद्या बद्धं सत् बहुतया

न च बद्धमुक्तव्यवस्थाभावप्रसङ्गः; ब्रह्माज्ञानवादे त्वितः पूर्वं मुक्तानामेवाभावात्। एकमेव हि ब्रह्म एकयाऽविद्यया बध्यमानं बहुतया बम्भ्रमीति, तदेव कदाचिन्मोक्ष्यत इति स्थितेः ॥ शुको मुक्तो वामदेवो मुक्त इत्यादि शास्त्रं कथमिति चेन्न कथञ्चित्; स्वप्नपुरुषमोक्षवत् तस्यापि मिथ्यात्वात्। जीवाज्ञानवादे तु प्रतिजीवमविद्याभेदाज्जीवानाञ्च बिम्बप्रतिबिम्बस्थानीयत्वात् प्रातिस्विकाविद्यानिवृत्त्या प्रत्येकमोक्षे जीवान्तरस्थित्युपपत्तेः। ब्रह्मणस्तु नित्यमुक्तत्वेन बद्धमुक्तावस्थयोरेवाभावात्। तस्मादविद्यापरिकल्पितोऽयं जीवानां मिथो भेद इति ॥

अत्रोच्यते—यदुक्तं, 'विगीतानि शरीराणि मयैवात्मवन्ति' इति; तत्र मयेति किमहमर्थो विवक्षितः, उत तदनुबन्धिनी संवित्, उत तदुभयोत्तीर्णः कश्चित्

भ्राम्यति। तदेव च कदाचित् मोक्ष्यत इति सिद्धान्तात् न कोऽपि दोष इति समाधत्ते - **न च बद्धमुक्तेति**। **बम्भ्रमीति**=भृशं पौनः पुन्येन वा भ्राम्यति। **स्थितेः** = सिद्धान्तात्। ननु इतः पूर्वं कस्यापि मुक्तत्वाभावे शुको मुक्तो वामदेवो मुक्त इति शास्त्रं कथं संगच्छतामिति शङ्कते - **शुको मुक्त इति**। शास्त्रप्रतिपाद्यः शुकादीनां मोक्षः स्वप्नपुरुषमोक्षवत् मिथ्येति समाधत्ते- **न कथंचित्** इति। केनापि प्रकारेण तच्छास्त्रं न प्रमाणम्। शुकादिमोक्षस्य मिथ्यात्वेन तत्प्रतिपादकशास्त्रस्य प्रामाण्यासंभवादिति भावः। जीवाज्ञानपक्षे बद्धमुक्तव्यवस्थामुपपादयति- **जीवाज्ञानवादे त्विति**। जीवानां ब्रह्म प्रतिबिम्बरूपत्वात् प्रतिजीवमविद्याभेदात् कस्यचिज्जीवस्याविद्यायाः निवृत्तौ स मुक्तः, यस्य जीवस्य अविद्या न निवृत्ता स बद्ध इति व्यवस्था संभवति इति भावः। **बिम्बप्रतिबिम्बस्थानीयत्वादिति**। ब्रह्मरूपं यत् बिम्बं तत्प्रतिबिम्बस्थानीयत्वादित्यर्थः। **प्रातिस्विकाविद्यानिवृत्त्येति**। एकजीवव्यक्तिगतायाः अविद्याया निवृत्त्या तस्य जीवस्य मुक्तत्वेऽपि अनिवृत्ताविद्यावतामन्येषां जीवानां स्थितिः बद्धतयावस्थानं संभवतीत्यर्थः। ननु ब्रह्मणो बद्धावस्थायां जीवस्य कस्यचिन्मुक्तौ बद्धब्रह्मैक्यात् जीवस्य पुनर्बन्धप्रसङ्गात् न बद्धमुक्तव्यवस्थोपपद्यत इत्यत्राह - **ब्रह्मणस्त्विति**। ब्रह्मणो नित्यमुक्तत्वेन बद्धं मुक्तम् इति अवस्थाद्वयमेव नास्तीति नोक्ताङ्काया अवकाश इति भावः। यद्वा पूर्वप्रस्तुतब्रह्माज्ञानपक्षं परित्यज्य जीवाज्ञानपक्षाश्रयणे हेतुमाह - **ब्रह्मणस्त्विति**। ब्रह्मणः

तयोरपि साक्षी ? नाद्यः एकस्मिन्नपि शरीरे भवद्भिरहमर्थस्याऽऽत्मत्वानभ्युपगमेन तद्दृष्टान्तस्य साध्यविकलत्वात् । पक्षस्य चाप्रसिद्धविशेषणत्वात् । अनात्मनाऽऽत्मवन्तीति प्रतिज्ञाविरोधापत्तेः । स्वसिद्धान्तविरुद्धाहमर्थात्मत्वतदभेदसङ्कथनेनापसिद्धान्तप्रसङ्गाच्च । न द्वितीयः; अस्माभिस्तस्याः क्वचिदप्यात्मत्वानभ्युपगमेन साध्यविकलत्वादेव । तथैवाप्रसिद्धविशेषणत्वमपि;

नित्यमुक्तत्वेन तत्पक्षे बन्धः मोक्ष इति अवस्थाद्वयमेव नास्तीति बद्धमुक्त-व्यवस्थाया अनुपपत्त्या जीवाज्ञानपक्षाश्रयणमिति भावः । पूर्वपक्षमुपसंहरति **तस्मादिति** ।

सिद्धान्तः

अत्रोच्यत इत्यादि । विगीतानि शरीराणि मयैवात्मवन्ति शरीरत्वात् मच्छरीरवदिति यदुक्तम् । तत्र मयेति तृतीयान्तास्मच्छब्देन किम् अहमर्थो विवक्षितः, उत अहमर्थानुबन्धिनी अहमर्थावच्छिन्ना संवित्, उत तदुभयातिरिक्तः तयोः साक्षी इति विकल्पः । तत्र प्रथमविकल्पं दूषयति-**नाद्य** इति । आद्यपक्षे मयैवात्मवन्तीत्यस्य अहमर्थाभिन्नात्मवन्तीत्यर्थः । भवद्भिस्तु कस्मिन्नपि शरीरे अहमर्थस्य आत्मत्वं नाङ्गीकृतमिति अहमर्थाभिन्नात्मत्त्वस्य दृष्टान्ते अभावात् साध्यवैकल्यम् । अपि च पक्षेऽपि साध्याभावात् बाध इति भावः । अप्रसिद्धविशेषणत्वात् इत्यस्य अप्रसिद्धसाध्यकत्वादित्यर्थः । तेन साध्याप्रसिद्धिः बाधो वा फलति । दोषान्तरमाह - **अनात्मनेति** । यद्यपि अनात्मना आत्मवन्तीति न प्रतिज्ञाया आकारः अपि तु अहमर्थेनात्मवन्तीत्येव । तथापि अहमर्थस्य वस्तुतोऽनात्मत्वात् प्रतिज्ञाविरोध इति भावः । दोषान्तरमाह **स्वसिद्धान्तेति** । भवद्भिः अहमर्थस्य आत्मत्वानङ्गीकारेण अहमर्थाभिन्नात्मवत्त्वसाधनेऽपसिद्धान्त इति भावः । स्वसिद्धान्तविरुद्धाभ्युपगमः अपसिद्धान्तः । **अहमर्थस्य** = आत्मत्वम् । **तदभेदः** अहमर्थात्मनोरभेदः ।

न द्वितीय इति । मयेत्यनेन अहमर्थावच्छिन्नसंविद्विवक्षायां तादृशसंविदः अस्माभिरनभ्युपगमेन अस्मान् प्रति अहमर्थानुबन्धिसंविद्रूपात्मवत्त्वसाधने दृष्टान्ते साधनवैकल्यम् अप्रसिद्धविशेषणता च । संविदाश्रय एवात्मा न तु संविदिति

सर्वत्र संविन्मात्रस्यास्माभिरात्मत्वप्रतिक्षेपात् । तथैव च विरोधः; अनहमर्थेन संविदा आत्मवन्तीति प्रतिज्ञानात् । नापि तृतीयः; भवदभिमतस्य साक्षिणोऽस्माभिरन्यत्र प्रतिक्षेपात् । अस्मदिष्टेन तु सर्वाध्यक्षेणेश्वरेणात्मवन्तीति साधने सिद्धसाधनात् । जीवाधिष्ठितान्यपि हि शरीराणि परमात्मनाऽऽत्मवन्त्येव। तस्य सर्वशरीरत्वात् । सद्वारकमिति तु विशेषः । एवमुत्तरेष्वपि प्रयोगेषु अस्मच्छब्दविकल्पेन दूषणमूह्यम् ।

अस्माभिरङ्गीकारात् । अस्मन्मते घटादिविषयकज्ञानमेव संवित्, तत्तु नात्मेति भावः । **तथैवेत्यस्य** प्रथमकल्पदूषणरीत्यैवेत्यर्थः । दोषान्तरमाह- **तथैव च विरोध** इति । प्रथमकल्पदूषणवदेव प्रतिज्ञाविरोध इत्यर्थः । संविदः अनात्मत्वे संविदा आत्मवन्तीत्यस्य अनात्मना आत्मवन्तीत्यर्थ एव पर्यवसानम् । तत्र च विरोध; स्पष्ट एवेति भावः । **अनहमर्थेन संविदेति** । अनात्मना संविदेत्यर्थः ।

नापि तृतीय इति । साक्षिशब्देन भवदभिमतसाक्षिविवक्षायां तस्यास्माभिरनङ्गीकारेण तादृशसाक्षिरूपात्मवत्त्वसाधने साधनवैकल्याप्रसिद्धविशेषणत्वादिकं प्रसजति । अस्मदभिमतस्य साक्षाद्द्रष्टरूपसाक्षिणः विवक्षायां सर्वसाक्षात्कर्त्रीश्वररूपात्मवत्त्वस्य सर्वेषु शरीरेषु सिद्धत्वेन सिद्धसाधनम् । अस्मन्मते हि सर्वाणि शरीराणि ईश्वरस्यापि शरीराणि भवन्ति । ईश्वरोऽपि तेषामात्मेति । तदाह **भवदभिमतस्येत्यादिना** । **अन्यत्रेति** । साक्षित्वभङ्गवादे इत्यर्थः । **सर्वाध्यक्षेणेति** । सर्वसाक्षाद्द्रष्ट्रेत्यर्थः । **सद्वारकमिति** । जीवाधिष्ठितानां शरीराणां जीवद्वारा परमात्मशरीरत्वमित्येकः पक्षः । साक्षाच्छरीरत्वमपीत्येकः पक्षः इति पक्षद्वयस्य ग्रन्थान्तरे आचार्यैरेवोक्तत्वात् अत्र सद्वारकमित्यस्य सद्वारकमपीत्यर्थः ।

एवमुत्तरेष्वपीति । सर्वं जाग्रच्छरीरं मदविद्याकल्पितं शरीरत्वात् कल्पितत्वाद्वा स्वप्नदृष्टमच्छरीरवत् इत्यादिष्वनुमानेष्वपि मच्छब्दार्थविकल्पेन दूषणमूह्यमित्यर्थः । अहमर्थस्य भवद्भिरविद्याश्रयत्वानङ्गीकारेण अहमर्थाश्रिताविद्याया अप्रसिद्ध्या

विशेषतोऽपि ब्रूमः,—यत्तु मदविद्याकल्पितमिति साध्यते, तत्रापि दृष्टान्तस्य साध्यविकलतैव, स्वप्नदृष्टानामपि पदार्थानामीश्वरसृष्टत्वस्य श्रुतिसिद्धत्वात्। 'न तत्र रथा न रथयोगा न पन्थानो भवन्ति, अथ रथान् रथयोगान् पथः सृजते। स हि कर्ता' इतीश्वरकर्तृत्वश्रवणात् । समर्थितं चैतत्, 'सन्ध्ये सृष्टिराह हि' इत्यस्मिन्नधिकरणे। मदविद्याकल्पितमित्यस्य साध्यस्य प्रपञ्चसत्यत्वप्रतिपादनेन बाधोऽपि द्रष्टव्यः। तेनैव कल्पितत्वादिति हेतोरसिद्धिश्च।

यत्तु सर्वोऽप्यात्मा अहमेव, चेतनत्वादिति; तत्राहमर्थत्वमात्रसाधने

तद्धटितसाध्याप्रसिद्ध्यादिकम् आपतति । अहमर्थानुबन्धिसंविद्विवक्षायां तादृशसंविद: अस्माभि: आत्मत्वानङ्गीकारेण तदाश्रिताविद्याया अप्रसिद्ध्या साध्यवैकल्यादिकम् इत्यादि दूषणं पूर्ववदावर्तनीयमिति भाव: । पूर्वानुक्तदूषणान्यप्याह **विशेषतोऽपीति** । जग्रच्छरीरं मदविद्याकल्पितं शरीरत्वात् स्वप्नदृष्टमच्छरीरवत् इत्यनुमाने दृष्टान्तस्य साध्यविकलता । अस्माभि: स्वाप्नशरीराणामीश्वरसृष्टत्वाङ्गीकारेण मदविद्याकल्पितत्वरूपसाध्यशून्यत्वात् । स्वप्नदृष्टपदार्थानामीश्वरसृष्टत्वे श्रुतिं प्रमाणयति- **न तत्र रथा** इति । तत्र स्वप्ने रथा: रथयोगा: अश्वा; पन्थानो वा न भवन्ति सर्वपुरुषदर्शनयोग्या न भवन्ति परं तु स्वप्नद्रष्टृपुरुषमात्रदर्शनयोग्यान् तत्कालमात्रस्थान् रथादीन् परमात्मा सृजति इत्यर्थ: । **समर्थितं चैतदिति** । सन्ध्याधिकरणे हि स्वाप्नपदार्थानां जीवकर्तृकत्वमाशङ्क्य परमात्मकर्तृकत्वं स्थापितम् ।

अस्मिन्ननुमाने दोषान्तरमाह - **मदविद्येति** । अस्मन्मते प्रपञ्चस्य सर्वस्य सत्यत्वात् तदन्तर्गतस्य जाग्रच्छरीरस्यापि सत्यत्वेन तत्र मदविद्याकल्पितत्वरूपसाध्याभावात् बाध इत्यर्थ: । **साध्यस्येत्यस्य** बाधोऽपीत्यनेनान्वय: । तत्र हेतु: प्रपञ्चसत्यत्वप्रतिपादनेनेति। **तेनैवेति** । प्रपञ्चसत्यत्वप्रतिपादनेनैवेत्यर्थ: । पक्षस्य जाग्रच्छरीरस्यापि सत्यत्वात् तत्र कल्पितत्वरूपहेत्वभावात् स्वरूपासिद्धिरित्यर्थ: ।

अथ तृतीयमनुमानं दूषयति - **यत्तु** इत्यादिना । सर्वोऽप्यात्मा अहमेव चेतनत्वात् अहमिव इत्यनुमाने यदि अहमर्थत्वं साध्यं तदा सिद्धसाधनम् । आत्मनोऽहमर्थत्वस्य

सिद्धसाधनता । स्वतादात्म्यसाधने वक्ष्यमाणेन विरुद्धधर्माध्यासेन बाधः । चेतनत्वादिति हेतोः स्वपक्षेणासिद्धिः । दृष्टान्तस्य साधनविकलता च । चिद्रूपत्वमात्रस्य हेतुत्वे धर्मभूतज्ञानेनानेकान्तः । त्वत्पक्षे वृत्तिज्ञानेनापि । वैशेषिकादिमतेनासिद्धिश्च । आत्मत्वादिति प्रयोगेऽपि चेतनत्वचिद्रूपत्वादिविकल्पेन दूषणमूह्यम् । आत्मत्वजातिमत्त्वादिति विवक्षायां नानात्मवादप्रसङ्गः, व्यक्तिभेदनान्तरीयकत्वाज्जातेः ।

अस्माभिरङ्गीकृतत्वात् । यदि तु स्वतादात्म्यं साध्यते सुखित्वदु:खित्वपण्डितत्वमूर्खत्वादिविरुद्धधर्मसमावेशप्रसङ्ग: इति भाव: । **बाध** इति । स्वतादात्म्यं साध्यते चेत् विरुद्धधर्माध्यास: प्रसजतीति स्वतादात्म्यं नाङ्गीकरणीयम् । तथा च पक्षे साध्याभावात् बाध इति तात्पर्यम् । अथात्रानुमाने हेतुस्वरूपं विकल्प्य दूषयति - **चेतनत्वादिति** । चेतनत्वं नाम किमत्राभिप्रेतम् । ज्ञानाश्रयत्वं वा ज्ञानस्वरूपत्वं वा आत्मत्वं वा । नाद्य:, त्वन्मते आत्मन: ज्ञानाश्रयत्वानङ्गीकारेण पक्षे आत्मनि ज्ञानाश्रयत्वरूपहेत्वभावेन स्वरूपासिद्धिप्रसङ्गात् । तथा दृष्टान्ते स्वात्मनि साधनविकलता चेति भाव: । द्वितीयं दूषयति - **चिद्रूपत्वमात्रस्येति** । अहमर्थत्वरूपसाध्याभाववति धर्मभूतज्ञाने चिद्रूपत्वरूपहेतुसत्त्वात् व्यभिचार: । त्वत्पक्षानुसारेण अन्त:करणवृत्तौ चिद्रूपत्वसत्त्वात् व्यभिचार: । न च स्वप्रकाशत्वं चिद्रूपत्वम् । तच्चान्त:करणवृत्तौ नास्तीति न व्यभिचार इति वाच्यम् । तथापि वैशेषिकादिमतेन स्वरूपासिद्धे: । तन्मते पक्षे आत्मनि चिद्रूपत्वाभावात् इति भाव: । आत्मत्वं चेतनत्वमिति तृतीयकल्पं दूषयति - **आत्मत्वादिति प्रयोगेऽपीति** । आत्मत्वं नाम किं चिद्रूपत्वं वा स्वप्रकाशत्वं वा । आद्ये पूर्वोक्तानैकान्तता । द्वितीये वैशेषिकादिमतेनासिद्धि: । ननु आत्मत्वजातिमत्त्वं हेतुरस्तु इत्याशङ्क्याह - **आत्मत्वजातीति** । आत्मत्वजाति: यद्यङ्गीक्रियते तर्हि आत्मत्वजात्याश्रया: अनेके आत्मान: अङ्गीकर्तव्या: स्यु: । नित्यमेकमनेकानुगतं जातिरिति हि जातिलक्षणम् इति भाव:। **नानात्मवाद:** अनेकात्मवाद: । **व्यक्तिभेदनान्तरीकत्वादिति** । व्यक्तिभेद-

यत्तु सर्वाणि सुखदुःखानि मयैव भुज्यन्त इति; तन्न स्वहृदयविसंवादस्तावत् । यदि च सर्वाणि दुःखानि स्वेनैव भुज्यन्ते, तर्हि कथं परहिंसादिप्रवृत्तिः । न हि स्वसुखोच्छेदाय स्वदुःखोत्पादनाय वा प्रेक्षावन्तः प्रवर्तेरन् ॥ अद्वैतदर्शिनां न तथा प्रवर्तनमिति चेन्न; सर्वतत्त्वोपदेशिना भगवता वासुदेवेनापि स्वयमेव वा धनञ्जयादिमुखेन वा परपीडादर्शनात् । नित्यमुक्तत्वेनास्पृष्टसुखदुःखस्यात्मनः

व्याप्यत्वादित्यर्थः । जातिः स्वाश्रयव्यक्तिभेदाविनाभूता । यत्र यत्र जातित्वं तत्र तत्र अनेकव्यक्तिवृत्तित्वमिति व्याप्तिः । तथा च आत्मत्वजात्यङ्गीकारे स्वाश्रयात्मनानात्वमङ्गीकार्यं स्यादिति भावः ।

अथ सर्वाणि सुखदुःखानि मयैन भुज्यन्ते सुखदुःखत्वात् मत्सुखदुःखवत् इति पूर्वपक्ष्युक्तं चतुर्थमनुमानं दूषयति- **यत्तु सर्वाणीत्यादिना** । यथाश्रुतार्थविवक्षायामाह **स्वहृदयेति** । न हि सर्वाणि सुखदुःखानि मया भुज्यन्त इति केनापि वक्तुं शक्यम् । स्वहृदयेन तथाननुभवात् । किं च यदि सर्वाणि दुःखानि स्वकीयानि परकीयानि च स्वेनैव अनुभूयन्ते तदा कस्यापि परहिंसादौ प्रवृत्तिर्न स्यात् । परस्य दुःखोत्पादनाय हि परहिंसायां प्रवृत्तिः । परदुःखं यदि स्वदुःखं स्यात् तदा स्वसुखहानिः स्वदुःखप्रसक्तिश्च स्यात् । तथा च स्वसुखोच्छेदपूर्वकं स्वदुःखोत्पादनाय परहिंसायां प्रवर्तन्त इति वक्तव्यम् । इदं तु लोकविरुद्धम् । प्रेक्षावतां स्वदुःखोत्पादनाय प्रवृत्त्यभावादिति भावः । ननु एक एवात्मेति ये न जानन्ति त एव परहिंसादौ प्रवर्तन्ते । न तु आत्माद्वैतदर्शिनः, तेषां परदुःखं स्वदुःखमिति ज्ञानसद्भावादिति शङ्कते - **अद्वैतदर्शिनामिति** । परहिंसादौ प्रवृत्तेः आत्मद्वैतभ्रम एव हेतुरिति शङ्कितुराशयः । भगवतः वासुदेवस्य तत्त्वोपदेष्टुः द्वैतभ्रमो नास्ति । तथापि स भगवान् स्वयमर्जुनमुखेन च परहिंसारूपयुद्धे प्रावर्तत । अतो द्वैतभ्रमः परहिंसायां हेतुरिति न वक्तुं शक्यत इत्याशयेन समाधत्ते - **सर्वतत्त्वोपदेशिनेति** । अपि च भवन्मते आत्मा नित्यमुक्तः अस्पृष्टसुखदुःखश्चेत्यङ्गीकृतः । अतस्तस्य सुखदुःखभोक्तृत्वमेव न संभवतीति सर्वाणि सुखदुःखानि मयैव भुज्यन्त इति साधनेऽपसिद्धान्तश्च इत्याह - **नित्यमुक्तत्वेनेति** । **अत एवेति** । आत्मनो भोक्तृत्वासंभवादेवेत्यर्थः ।

तद्भोक्तृत्वासंभवादपसिद्धान्तश्च। अत एव दृष्टान्ते साध्यवैकल्यं च। अथ परमतेन भोक्तृत्वमन्वारुह्योच्येत, तदाऽपि तन्मतेनाहमर्थस्यैवात्मत्वात् तदद्वैतसाधने भवतः कथमात्माद्वैतसिद्धिः।

श्लो. अस्मच्छब्दानुबन्धेन यान्यन्यान्यैक्यसाधने।
प्रयुक्तान्यनुमानानि तेषामेषा निराक्रिया॥

यत् पुनः—अस्मच्छब्दानुबन्धमुत्सृज्य विगीतानि शरीराणि देवदत्तात्मनाऽऽत्मवन्तीति प्रयुक्तम्, तत्राप्यहमर्थत्वसंविन्मात्र (त्वाद्या) त्मशब्दार्थविकल्पेन प्रागुक्तदोषो दुस्तर एव।

नन्वस्मन्मते आत्मनः सुखदुःखभोक्तृत्वाभावेऽपि परमते भोक्तृत्वाङ्गीकारात् तन्मतमन्वारुह्य सर्वाणि सुखदुःखानि मयैव भुज्यन्त इति साधयाम इत्याशङ्क्य परमते अहमर्थस्यैवात्मत्वात् अहमर्थस्यैव भवदनुमानेनाद्वैतं सिध्येत्। न तु भवदभिमतसंविद्रूपात्मनः अद्वैतं सिध्यते। न हि परे त्वदभिमतसंविदो भोक्तृत्वमभ्युपगच्छन्ति, किं त्वहमर्थस्यैवेति समाधत्ते - **अथ परमतेनेति।**

एतावता पूर्वपक्षिणा प्रयुक्तानि आत्मैक्यसाधकतया अस्मच्छब्दघटितानि चत्वार्यनुमानानि दूषितानि। अथ अन्यान्यपि अस्मच्छब्दानुबन्धीनि कानिचिदनुमानानि भाष्यादिष्वनूदितानि। तेषामपि उक्तप्रकारेणैव निरसनं कार्यमित्याह कारिकया

अस्मच्छब्दानुबन्धीनि यान्यन्यान्यैक्यसाधने।
प्रयुक्तान्यनुमानानि तेषामेषा निराक्रिया॥ इति।

यत् पूर्वपक्षिणा अस्मच्छब्दानुबन्धं परित्यज्य आत्मैक्यसाधकतयानुमानमुक्तं विगीतानि शरीराणि देवदत्तात्मना आत्मवन्ति शरीरत्वात् देवदत्तशरीरवत् इति तत् दूषयति- **यत् पुनरिति।** तत्रापि आत्मशब्देन किमहमर्थो विवक्षितः उत संविन्मात्रम् उत तदुभयोत्तीर्णः साक्षीति विकल्प्य नाद्यः, भवद्भिः अहमर्थस्यात्मत्वानभ्युपगमात्। न द्वितीयः, अस्माभिः संविदः आत्मत्वानभ्युपगमेन साध्यविकलत्वात्। न तृतीयः, भवदभिमतस्य साक्षिणः अस्माभिः प्रतिक्षेपात् इति रीत्या दूषणीयमिति भावः। **संविन्मात्रत्वादीति।** आदिशब्देन साक्षी विवक्षितः।

यच्च विप्रतिपन्नः शरीरभेदोऽनेकात्मनिरपेक्ष इति; तन्नैकात्माधिष्ठितत्वविवक्षायामीश्वराधिष्ठानेन सिद्धसाधनता । भिन्नात्माधिष्ठानराहित्यविवक्षायां निषेध्यसिद्धौ तथैव तत्सिद्धेर्बाधः । तदसिद्धौ किं निषेध्यम् ? क्वचित्प्रमितस्यैव निषेध्यत्वमिति स्थितमन्यत्र । एवमन्येष्वप्यात्मैक्यसाधनेषु दूषणमूह्यम् ।

यः पुनर्विपक्षे दण्डवत्प्रदर्शितः कल्पनागौरवप्रसङ्गः इति (?) ; स तदा स्यात्, यदि नोपलभ्येत, न श्रूयेत वा भेदः । वक्ष्यते तदुभयम् ।

यच्च विप्रतिपन्नः शरीरभेदः अनेकात्मनिरपेक्षः शरीरभेदत्वात् सौभरिशरीरभेदवत् इत्युक्तम्, तन्निराकरोति- **यच्च विप्रतिपन्न** इति । विप्रतिपन्नानि भिन्नानि शरीराणि अनेकात्मनिरपेक्षाणि परस्परभिन्नशरीरत्वात् सौभर्यधिष्ठितभिन्नशरीरवत् इत्यनुमानं पर्यवसितम् । तत्र अनेकात्मनिरपेक्षाणीत्यस्य कोऽर्थः । एकात्माधिष्ठितानीत्यर्थो वा अनेकात्माधिष्ठानरहितानीत्यर्थो वा । नाद्यः, भिन्नानां शरीराणामीश्वर रूपैकात्माधिष्ठितत्वस्य अस्माभिरप्यङ्गीकारेण सिद्धसाधनात् । जीवाधिष्ठितशरीराणां जीवेश्वरोभयाधिष्ठितत्वस्य सिद्धान्तेऽभ्युपगमात् । न द्वितीयः, अनेकात्माधिष्ठितत्वरूपप्रतियोगिप्रसिद्धौ पक्षे एव तत्सिद्धेः पर्यवसानात् बाधः । प्रतियोगिनोऽप्रसिद्धौ तु निषेधः कथं भवेत् । क्वचित् प्रमितस्यैव अन्यत्र निषेधसंभवात् इति भावः । तथैवेत्यस्य स्थाने तत्रैवेति पाठः साधीयान् । पक्ष एवेति तदर्थः । निषेध्यसिद्धौ पक्ष एव तत्पर्यवसानात् बाध इत्यर्थ इति चण्डमारुतग्रन्थोऽत्रावधेयः । **तदसिद्धौ** भिन्नात्माधिष्ठानरूपस्य निषेध्यस्यासिद्धौ । **स्थितमन्यत्रेति** । “न हि यत्किंचिदाश्रयप्रतीतिमन्तरेणाभावप्रतिपत्तिमनुमन्यामहे । उक्तं चाभियुक्तैः - “लब्धरूपे क्वचित् किंचित् तादृगेव निषिध्यते ।” इति एकोनचत्वारिंशे भावरूपाज्ञानभङ्गवादे वक्ष्यमाणत्वादिति भावः ।

एवमन्येष्वपीति । करणभेदादिपक्षीकारेण प्रयुक्तेष्वनुमानेष्वपीत्यर्थः । विप्रतिपन्नः करणभेदः अनेकात्मनिरपेक्षः करणभेदत्वात् सौभरिकरणभेदवदित्याद्यनुमानेष्वपीत्यर्थः । शरीरभेदपक्षकानुमाने उक्तं दूषणमत्राप्यावर्तनीयमिति भावः ।

यः पुनरिति । अनेकात्मकल्पनप्रयुक्तगौरवप्रसङ्गः विपक्षे बाधकतया पूर्वपक्षिणा

प्रतिप्रयोगाश्च–चैत्रात्मा मैत्रात्मनो भिन्नः; कदाचिदपि मैत्रानुभवजनितस्मृतिरहितत्वात्, घटवत्; व्यतिरेकेण वा, यो मैत्रान्न भिद्यते, स तदनुभवजनितस्मृतिमान्; यथा मैत्रात्मैव इत्यादयः । न चात्र हेत्वसिद्धिः, स्वात्मप्रत्यक्षसिद्धत्वात्। अन्यथाऽऽचार्यानुभूतमखिलं च स्मरन् किमर्थं शृणोषि? पराभिप्रेंतं च जानन् किमर्थं विकल्पयसि ? मयि च त्वदभिप्रेताभिज्ञे किमर्थमुत्तरं

उपन्यस्तः । स गौरवप्रसङ्गः तदा स्यात् यदि आत्मनां भेदः नोपलभ्येत न श्रूयेत वा, अपि तु कल्प्येत । आत्मनां भेदस्तु उपलभ्यते, श्रूयते च ''नित्यो नित्यानां चेतनश्चेतनानामेको बहूनां यो विदधाति कामान्'' इति । किं च आत्मैक्यसाधकानि भवत्प्रयुक्तान्यनुमानानि सत्प्रतिपक्षानीत्याह- **प्रतिप्रयोगाश्चेत्यादिना** । तत्र अन्वयव्यतिरेक्यनुमानं प्रत्यनुमानतया प्रयुङ्क्ते - चैत्रात्मा मैत्रात्मापेक्षया भिन्नः कदाचिदपि मैत्रानुभवजनितस्मृतिरहितत्वात् घटवत् यो मैत्रानुभवजनितस्मृतिरहितः स मैत्रात्मनो भिन्नः यथा घट इत्यन्वयव्याप्तिः । यो मैत्रात्मनो न भिद्यते स मैत्रानुभवजनितस्मृतिमान् यथा मैत्रात्मेति व्यतिरेकव्याप्तिः । शङ्कते- **न चात्रेति** । अस्मिन्ननुमाने पक्षे हेतोः संदिग्धतया संदिग्धासिद्धिरित्यर्थः । समाधत्ते **स्वात्मप्रत्यक्षसिद्धत्वादिति** । अहं न मैत्रगतानुभवजनितस्मृत्यभाववान् इति चैत्रस्य प्रत्यक्षमस्तीति हेतुः चैत्रात्मनः प्रत्यक्षसिद्ध इति न संदिग्धासिद्धिरिति भावः । **अन्यथेति**। साध्याभावे हेत्वभावे चेत्यर्थः । चैत्रात्मनः मैत्रात्मभेदाभावे मैत्रानुभवजनितस्मृतिरहितत्वाभावे च अन्यस्य अन्यानुभवजनितस्मृतिमत्त्वमस्तीति आयातम् । तथा च शिष्यस्त्वं त्वदाचार्यानुभूतं सर्वं स्मरसीति आगतम् । ततश्च आचार्यसकाशात् किमर्थं शृणोषि । एवं परस्य यत् अभिप्रेतं तज्जानासीति किमर्थं विकल्पयसि । पराभिप्रेतं ज्ञातुं किल विकल्पः। अपि च पराभिप्रेतं परो जानाति चेत् त्वदभिप्रेतमहं जानामीति त्वया ज्ञातत्वात् मां प्रति किमर्थमुत्तरं ददासीति समुदायार्थः; । **मयि चेति** । त्वदभिप्रेताभिज्ञत्वेन ज्ञानादिति भावः ।

ददासि ? परोक्तं च त्वदुक्तमभिमन्यमानः किमर्थं दूषयसि ॥ निर्विशेषणतया पूर्वेषां प्राबल्यमिति चेन्न; विशिष्टस्याप्युपलम्भानुरोधिनो बलीयस्त्वात्। अन्यथा मेयत्वाभिधेयत्वादीनामाभासहेतूनां निर्विशेषणतामात्रेण बलीयस्त्वे सविशेषणानां हेतूनामुपप्लवः। तेन पूर्वेषामपि बाधो निर्विशेषणानामपि जायते।

यत्तु पण्डितत्वमूर्खत्वादीनां विरुद्धत्वं नास्ति, 'अधिकरणभेदे सिद्धे सहानवस्थानलक्षणविरुद्धत्वम्, ततश्च सः इत्यन्योन्याश्रयणादिति। तत् किं क्वचिद्विरोधमभ्युपगम्य सोऽत्र नास्तीत्युच्यते ? उत क्वचिदपि विरोधाभावमभिमत्य?

साध्याभावे असाधारणं दोषमाह **परोक्तं चेति**। आत्मभेदाभावे परोक्तं त्वदुक्तमिति जानंस्त्वं किमर्थं परं दूषयसीत्यर्थ:। न हि त्वदुक्तमेव त्वं दूषयेरिति भाव;। ननु नात्र सत्प्रतिपक्षावसर:, प्रत्यनुमानस्य दुर्बलत्वात्। मदीयानुमाने हेतु; निर्विशेषण:, भवदीयानुमाने सविशेषण:। निर्विशेषणतया मदीयानुमानानां प्रबलत्वात् इति शङ्कते **निर्विशेषणतयेति**। सविशेषणत्वनिर्विशेषणत्वे न प्राबल्यदौर्बल्यप्रयोजके। सविशेषणस्यापि हेतो: व्याप्तिमत्त्वात् उपलम्भानुसारित्वात् श्रुत्यनुसारित्वाच्च प्रबलत्वात् इति भाव:। **अन्यथेति**। निर्विशेषणस्य हेतो: प्राबल्ये पर्वतो वह्निमान् मेयत्वात् अभिधेयत्वात् इति आभासानां मेयत्वादीनां निर्विशेषणतया प्राबल्यं स्यात्। तथा सविशेषणानां सद्धेतूनामुपप्लवश्च स्यादिति भाव:। उपसंहरति **तेनेति**। भवदुक्तानां पूर्वेषां निर्विशेषणानामपि हेतूनां मदीयसविशेषणप्रत्यनुमानेन बाधितत्वं स्थितमिति भाव:। **पूर्वेषामपीत्यपिना** भूयस्त्वेऽपीति विवक्षितम्।

यत्तु इत्यादि। पण्डितत्वमूर्खत्वादीनां विरोधो नास्ति। पण्डितत्वाश्रयस्य मूर्खत्वाश्रयस्य चात्मन: भेदे सिद्धे सहानवस्थानरूपो विरोध:, सहानवस्थानरूपे विरोधे सिद्धे तदाश्रयस्य आत्मनो भेद इत्यन्योन्याश्रय इति यदुक्तम् तत्र ब्रूम:। किं क्वचित् सहानवस्थानरूपं विरोधमङ्गीकृत्य प्रकृते स नास्तीत्युच्यते, अथवा क्वचिदपि विरोधो नास्तीत्यङ्गीकृत्य। नाद्य:, विरोधाङ्गीकारहेतो: धर्मिभेदस्य प्रकृते तत्र चाविशेषात्। शुक्लनीलरूपयो: सहानवस्थानरूपविरोधं प्रति तदाश्रयद्रव्यभेद: यथा हेतु:, तथा ज्ञानाज्ञानयो:

नाद्यः, अविशेषात्। न हि सितासितादिभेदात् ज्ञानाज्ञानादिभेदस्य वैषम्यं पश्यामः ।। अधिकरणस्वरूपभेदस्य स्फुटोपलम्भात् वैषम्यं सिद्धमिति चेन्न; असिद्धेः। न हि वैषम्यानुपलम्भेऽपि वस्तूनां भेदस्सिध्यति, तस्यैव तत्त्वात्। अन्यथा वैधर्म्याग्रहेऽपि स्वरूपोपलम्भमात्रेण भेदसिद्धौ संशयविपर्ययोच्छेदप्रसङ्गात् । अथ पुनर्वैधर्म्योपलम्भवेळायां स्वरूपभेदोऽप्यन्यः प्रतीयत इत्यभिमन्यसे, तर्ह्यत्रापि तथाऽनुमन्यस्व। नापि द्वितीयः, अविवादप्रसङ्गात्। न हि स्वसिद्धान्ताविरोधिनि परमते विवादसम्भवः। अन्यथा स्वसिद्धान्तवादिभिरपि (साकं) विवादप्रसङ्गात्। अनैकान्तवादस्य च साम्राज्यापातात्।

(पण्डितत्वमूर्खत्वयोः) सुखदुःखयोश्च तादृशविरोधं प्रति तदाश्रयात्मभेदः हेतुः इति स्वीकारे वैषम्याभावात् इति भावः । **अविशेषादिति** । विरोधाभ्युपगमहेतोः आश्रयभेदस्याविशेषादित्यर्थः ।

ननु शुक्लनीलादिरूपयोः आश्रयभेदः स्फुटतया उपलभ्यते । ज्ञानाज्ञानाद्योः आश्रयभेदः स्फुटतया नोपलभ्यत इति वैषम्यमिति शङ्कते - **अधिकरणेति** । समाधत्ते **असिद्धेरिति** । वैषम्यस्येति शेषः । वैषम्यं = वैधर्म्यम् । किम् अधिकरणस्वरूपो भेद इति विवक्षितम्, किं वा अधिकरणे स्वरूपानुबन्धो भेदः स्वरूपभेद इति अन्योन्याभावो विवक्षितः इति विकल्पमभिप्रेत्य प्रथमे दोषमाह– **न हीति** । **तस्यैव तत्त्वात्** = वैषम्यस्यैव भेदत्वात् । स्वरूपानुबन्धी प्रतियोगिस्वरूपानुबन्धी प्रतियोगिज्ञानाधीनज्ञानः, तेन वैधर्म्यव्यावृत्तिः । हिशब्दो भिन्नक्रमः । तस्यैव तत्त्वाद्धि वैधर्म्यानुपलम्भेऽपि वस्तूनां भेदो न सिध्यतीति । द्वितीयं शङ्कते - **अथ पुनरिति** । **तर्ह्यत्रापीति** । देवदत्तघटयोः ज्ञानाज्ञानलक्षणवैधर्म्यग्रहणवेलायां तयोः तत्स्वरूपैकनिरूप्योऽन्यो भेदः प्रतीयते । एवं च ज्ञानाज्ञानयोः विरोधसिद्धेः तद्रूपविरुद्धधर्माध्यासाद्धि आत्मभेदः सिध्यतीति भावः । एवं च मूर्खपदं ज्ञानाभावपरम् । **नापि द्वितीयः** इति । क्वापि विरोधो नास्तीति द्वितीयपक्षः न युक्त इत्यर्थः ।

श्लो. किंच-स्थिरीकृतो विरोधः स्यात् विरोंधं प्रतिरुन्धता ।
विरोधाप्रतिरोधे हि विरोधो निरुपद्रवः ॥
विरोधोद्घाटनं मुक्त्वा किं नु दूषणमुच्यते ।
सर्वत्रैवाविरोधे तु भवेत् सर्वविरोधिता ॥

यत्तु प्रलपितम्, घटपटादिष्वपि विरोधपरिहाराद्भेदविलय इत्यत्र इष्टप्रसङ्गत्वमिति–तत् स्वसिद्धान्तोच्छेदायोक्तम्; सर्वाद्वैते सत्यमिथ्यार्थविभागभङ्गप्रसङ्गात् । सर्वमिथ्यात्वस्य च भवद्भिरनभ्युपगमात् । विरोधमुत्सृज्य सत्यमिथ्याविभागस्य दुरुपपादत्वाच्च ।

एवंच विरोधसिद्धौ अनुमानादिसिद्धपरप्रतियोगिकभेदस्य स्वात्मनि प्रत्यक्षतया

स्थिरीकृत इति । किं च विरोधः प्रतिरुध्यते न वा । आद्ये विरोधतदभावयोः विरोधः स्थितः । द्वितीये सर्वोऽपि विरोधः स्थित इत्यर्थः । **विरोधोद्घाटनमिति** । सर्वत्र विरोधोद्घाटनेनैव दूषणमुच्यते । विरोधाभावे तन्न स्यात् । अपि च सर्वत्र विरोधाभावे विरोधेन सह विरोधाभावात् अविरोधिनामपि सर्वेषां विरोधिता स्यादित्यर्थः ।

यत्तु प्रलपितमिति । पूर्वपक्षिणा घपटादिष्वपि विरोधपरिहारे सर्वभेदविलयप्रसङ्ग इत्याशङ्क्य तेषु स्वरूपभेदस्यैव स्फुटतरमुपलभ्यमानत्वात्, अन्तत इष्टप्रसङ्गरूपत्वाच्चेत्युक्तं, तत् स्वसिद्धान्तभङ्गायैवोक्तम् । सर्वस्याप्यभेदे इदं सत्यम् इदं मिथ्येति विभागस्य भङ्गप्रसङ्गात् । न चेष्टापत्तिः इति वाच्यम् । सर्वमिथ्यात्वस्य वा सर्वसत्यत्वस्य वा भवद्भिरनभ्युपगमात् । न च विरोधाभावे सत्यमिथ्याविभागः कुतो न संभवतीति वाच्यम् । सत्यत्वमिथ्यात्वयोः एकाधिकरणावृत्तित्वरूपो विरोधो नास्ति चेत् मिथ्यापि सत्यं स्यात् सत्यमपि मिथ्या स्यादिति इदं सत्यमेव इदं मिथ्यैवेति विभागः कथं भवेदिति भावः ।

एवं चेति । **अनुमानादिसिद्धेति** । अनुमानादिसिद्धः यः परः आत्मा तत्प्रतियोगिकभेदस्येत्यर्थः । भेदस्फुटोपलम्भाविशेषात् सत्यमिथ्याविभागस्य सत्यत्वाच्च

प्रत्यक्षबाधोऽपि सिद्धः । अत एव परस्परप्रतिसन्धानप्रसङ्गोऽपि निरुपद्रवः । पटुप्रत्ययाभ्यासाऽऽदराऽऽहितातिशयतादात्विकसंस्कारवशेन प्रतिसन्धानप्रसङ्गे सति न जन्मान्तराद्युदाहरणावकाशः ।

यत्तु तत्रोक्तम्, अविद्यावैचित्र्यादुपाधिभेदप्रतिनियततया वा प्रतिसन्धानाभाव इति-तदपि न, अविद्यास्वरूपतत्प्रमाणादेरन्यत्र प्रतिक्षेपात् । अन्यथा चिदचिद्विभागस्यापि तद्वैचित्र्यनिबन्धनतया तदैक्यस्यापि प्रसङ्गात् । उपाधिभेदस्तु न प्रतिसन्धानप्रतिबन्धकः, सौभर्युपाधिभेदवत्, अन्यथा जातिस्मरत्वमपि कस्यचिन्न

विरोधसिद्धौ मुखविकासादिना स्वावृत्तिसुखादिमत्त्वमनुमाय तेन लिङ्गेन स्वान्यत्वं परस्य गृहीत्वा तत्प्रतियोगिकभेदवत्त्वं स्वस्य ग्रहीतुं शक्यत इति भेदप्रत्यक्षसंभवात् तेन प्रत्यक्षेण आत्मैक्यानुमानस्य बाधः सिद्ध इति भाव । अपिशब्दात् विरुद्धधर्माध्यासलक्षण-प्रतिकूलतर्कबाधश्च सिद्ध इति भावः । **अत एवेति** । उक्तरीत्या प्रतिसन्धानतदभावयोर्विरोधे सिद्धे अन्यानुभूतार्थविषयकप्रतिसन्धानाभाववत्तया निश्चिते अन्यस्मिन् आत्मैक्यवादे प्रतिसन्धानप्रसञ्जने अस्माभिः क्रियमाणे सति भवद्भिरिष्टापत्तिरिति वक्तुं न शक्यत इति भावः । **निरुपद्रवः** निर्बाधः ।

यदपि पूर्वपक्षिणा न हि जन्मान्तरानुभूतेषु एकस्मिन्नपि वा जन्मनि चिरकालदृष्टेषु सर्वेषां पुरुषाणां तत्तत्प्रतिसन्धानमुपलभामहे इत्युक्तं, तत्परिहरति - **पटुप्रत्ययेति** । पटुप्रत्ययेनाभ्यासेन आदरेण चाहितातिशयो यः संस्कारः तद्वशेन प्रतिसन्धानप्रसञ्जने क्रियमाणे जन्मान्तराद्युदाहरणस्य नावकाश इत्यर्थः । **अन्यथेति** । प्रतिसन्धानाभावस्याविद्यावैचित्र्याधीनत्वे इत्यर्थः । नन्वात्मन ऐक्येऽपि शरीरभेदात् अन्यानुभूतस्यान्येनाप्रतिसन्धानमित्यत्राह - **उपाधिभेदस्तु** इति । शरीरभेद इत्यर्थः; । सौभर्यात्मनः एकत्वात् तेनानेकेषां शरीराणामधिष्ठानात् शरीरान्तरावच्छिन्नेन स्वेनानुभूतस्य शरीरान्तरावच्छिन्नेन स्वेन स्मरणदर्शनात् शरीरभेदो न स्मरणप्रतिबन्धकः । तथा च देवदत्तानुभूतस्य यज्ञदत्तेन स्मरणप्रसङ्गः इति भावः । **अन्यथेति** । उपाधेः प्रतिबन्धकत्वे कस्यचिदपि जातिस्मरत्वं न स्यात् । अपिशब्दः सौभरिकर्तृकप्रतिसन्धानाभावप्रसङ्गसमुच्चयार्थकः ।

स्यात् । अन्तःकरणैक्यात् तदुपपत्तिरिति चेन्न; केषांचित् कल्पान्तरानुभूतस्मृतिदर्शनात् । अन्तःकरणभेदात्सुखादिव्यवस्थायां बाह्यकरणभेदादपि व्यवस्था किं न स्यात् ? न च तथाऽस्ति; दृष्टमेव स्पृशामीति प्रतिसन्धानात् । एवं पाणिपादाद्यवयवभेदादपि प्रसङ्गो दर्शयितव्यः ।

यत्तु तत्त्वविदः प्रह्लादवामदेवादयः प्रतिसन्दधत इत्युक्तम्-तदपि मन्दम्, तेषां सर्वान्तरात्मभूतपरमात्मपर्यन्तस्वात्मानुसन्धानेन तथातथा व्यपदेशात् । अत एव हि, 'सर्वगत्वादनन्तस्य' इत्युक्तम् । तदभिप्रायेण च श्रुतिः, 'तद्धैतत्पश्यन् ऋषिः' इति । तदेतत् ब्रह्मान्तर्यामिकत्वं पश्यन्नित्यर्थः । एवमेव हि, 'सर्वं समाप्नोषि

नन्वन्तःकरणरूपोपाधिभेद एव प्रतिसन्धानप्रतिबन्धकः । सौभरेः शरीरभेदेऽपि अन्तःकरणमेकमिति प्रतिसन्धानोपपत्तिः । देवदत्तयज्ञदत्तयोस्तु शरीरभेदवत् अन्तःकरणस्यापि भेदात् न परस्परानुभूतस्य परस्परं स्मरणप्रसङ्ग इत्याशङ्क्याह - **अन्तःकरणभेदादिति** । केषांचित् कल्पान्तरानुभूतस्यापि कल्पान्तरे स्मरणं भवतीति पुराणादिभ्योऽवगम्यते । कल्पान्तरीयान्तःकरणस्य कल्पान्तरावसान एव नष्टत्वात् कल्पान्तरे चान्यस्यैवान्तःकरणस्य सत्त्वात् कथं स्मरणं स्यादिति भावः । "तन्मनोऽकुरुत" इत्यादिना हि अन्तःकरणसृष्टिः श्रूयते । किं च अन्तःकरणभेदात् सुख-दुःख प्रतिसंधानतदभावादिव्यवस्थाया अङ्गीकारे बाह्यकरणभेदादपि तद्व्यवस्था स्यात्, करणत्वाविशेषात् इत्याह - **अन्तःकरणभेदादिति** । तत्र इष्टापत्तिं परिहरति - **न च तथास्तीति** । अन्येन बाह्यकरणेन दृष्टस्य अन्येन बाह्यकरणेन न प्रतिसन्धानमित्युच्यते चेत् चक्षुषा दृष्टस्य त्वचा प्रतिसन्धानं दृष्टमेव स्पृशामीत्याकारकं न स्यादिति भावः । प्रसङ्गः प्रतिसन्धानाभावप्रसङ्गः । पाणिना स्पृष्टं पादेन स्पृशामीति दर्शनात् नेष्टापत्तिः कर्तुं शक्येति भावः ।

तेषामिति । प्रह्लादवामदेवादीनामनुसन्धानं नात्मैक्यसाधकम् । ममान्तरात्मैव सूर्यस्याप्यन्तरात्मा इति रीत्या सर्वेषां जीवात्मनां परमात्मैव अन्तर्यामीत्येव तेषामनुसन्धानस्य विवरणम् । न तु सर्वेषु शरीरेष्वेक एवात्मेति । तदुपपादयति- **अत एव**

ततोऽसि सर्वः’ इत्यादिकमपि। एतेनैवाऽऽदिभरताद्यनुसन्धानप्रकारोऽपि निर्व्यूढः। अन्यथा तत्त्वविदां सर्वात्मगतसुखदुःखानुसन्धाने तु एकदर्वीकरभयपलायितस्यानन्तसर्पमध्य- निपातन्यायेन तत्त्वदर्शित्वं विपरीतफलं स्यात्। न च तेषां सर्वकर्मक्षयात् भोगो नास्तीति वाच्यम्; स्वगतसुखदुःखानुसन्धानस्यैव भोगत्वेन तदनङ्गीकारव्याघातात्। यत्तु सुखादिप्रतिसन्धानप्रसङ्गे परप्रतिसन्धानमपि

हीति । अनन्तस्यैव सर्वत्र विद्यमानत्वादिति एवकाराध्याहार: । अन्यवृत्तिनिषेधायोगात् आत्मतयेति विवक्षणीयतया आत्मतयेत्यध्याहार: । ममाप्यात्मत्वात् इत्यध्याहार: । अनन्तस्यैव आत्मतया सर्वत्र विद्यमानत्वात् ममापि स एवात्मेति हेतो: स एवाहमित्यर्थ:। अनेन अनन्त: सर्वान्तरात्मेत्येव फलितम्। न तु एक एवात्मेति आत्मैक्यम्। सर्वगत्वादिति हेतुवैफल्यादिति भाव: । **अन्यथेति** । एतदनुसन्धानस्य सर्वान्तरात्मत्वप्रयुक्तत्वमपहायाभेदप्रयुक्तत्वाङ्गीकारे इत्यर्थ: । **विपरीतफलं स्यादिति** । प्रारब्धकर्मावसाने नि:शेषाविद्यानिवृत्तौ सत्यां भेदलेशस्याप्यभावात् संसार्यात्मभिरैक्यात् परिमितस्वकीयसंसारे अतृप्त्या युगपदपरिमितसंसारप्राप्तये ब्रह्मज्ञानसंपादनं च स्यादिति भाव: । अपि च नित्यप्राप्तमप्यानन्दस्वरूपं संसारदशायां विक्षिप्तचित्ततया अप्राप्तमिव स्थितम्। मोक्षदशायां चित्तविक्षेपाभावात् प्राप्तं भवतीति हि भवद्भिरुच्यते । तत् संसारदशायां भेदाभासमहिम्ना अप्राप्त इव स्थितोऽपि अपरिच्छिन्न: संसारो ब्रह्मज्ञानेन निश्शेषाविद्याविनाशात् भेदाभासनिवृत्त्या प्राप्तो भवतीति अस्मिन्नर्थे पर्यवसितम् । ततश्च परमदु:खप्राप्तिरेव फलं स्यादिति भाव इति **महाचार्या:**।

यच्चोक्तं - आत्मैक्यपक्षे परस्परसुखदु:खादिप्रतिसन्धानप्रसञ्जनं नास्माकमनिष्टमावहति, यो हि स्वसुखादीन् प्रतिसन्धत्ते स एवान्योऽपीति तत्प्रतिसन्धानमपि एतत्प्रतिसन्धानमेवेति किमत्र प्रसञ्जनीयमिति, तत् परिहरति - **यत्तु सुखादीति** ।

स्वप्रतिसन्धानमेवेति किमत्र प्रसञ्जनीयमित्युक्तम्; तदपि विरोधोपपादनेनैव परिहृतम्।

यत्तु परस्परान्यत्वोपलम्भे जल्पितम्, परस्याप्रत्यक्षत्वे ततोन्यत्वमपि न प्रत्यक्षयितुं शक्यमिति; तस्य (तत्र?) किं प्रत्यक्षनिर्बन्धेन; अनुमानतोऽपि तत्सिद्ध्युपपत्तेः। स्वात्मनि तदन्यत्वस्य प्रत्यक्षत्वे स्वप्रतियोगिकतदन्यत्वस्यानुमातुं शक्यत्वात्। यो यदन्यत्वप्रतियोगी, स ततोऽन्यः; यथा सव्यहस्ताद्दक्षिणहस्त इति हस्तस्थत्वात् व्याप्तेः। यत् तत्रोत्तरम्-परः प्रतीयमानोऽन्यतया वा, अनन्यतया

विरोधोपपादनेनेति। प्रतिसन्धानतदभावयोः विरोधस्य उपपादितत्वात् अन्यदीयं प्रतिसन्धानं तदभाववत्तया निश्चिते न संभवतीत्यर्थः।

यदपि अहमस्मादन्यः अयं च मत्तोऽन्य इति परस्परान्यत्वं प्रत्यक्षसिद्धमिति शङ्कायां परस्याप्रत्यक्षत्वेन तद्गतस्य अन्यत्वस्य प्रत्यक्षयितुमशक्यत्वात् स्वस्य प्रत्यक्षत्वेऽपि स्वगतान्यत्वस्यापि प्रतियोगिभूतपरप्रतीतिमन्तरेण प्रत्येतुमशक्यत्वादिति समाधानमुक्तं तत् दूषयति - **यत्तु परस्परे** त्यादिना। परस्य प्रत्यक्षत्वाभावेऽपि अनुमानेन ज्ञातुं शक्यतया तत्प्रतियोगिकान्यत्वस्य स्वस्मिन् प्रत्यक्षं भवितुमर्हति। तदनन्तरं स्वप्रतियोगिकं परगतमन्यत्वमनुमातुं शक्यम्। सः मत्तोऽन्यः मद्गतान्यत्वप्रतियोगित्वात् यथा सव्यहस्तात् दक्षिणहस्तः सव्यहस्तादन्य इति दृष्टान्ते समन्वयः। **हस्तस्थत्वात् व्याप्तेरिति**। हस्त एव व्याप्तिरस्ति नान्यत्र गवेषणीयेति रसिकोक्तिरेषा।

यत्तत्रोत्तरमिति। परः प्रतीयमानः अन्यतया प्रतीयते वा अनन्यतया प्रतीयते वा इति यत् विकल्पितं, तत्र परः अन्यत्वेनैव प्रतीयत इति समाधानं ब्रूमः। न च प्रत्यक्षतः तथा न प्रतीयत इति वाच्यम्। अनुमानेन प्रत्येतुं शक्यत्वात्। परस्य मुखविकासादिना हर्षमनुमाय स्वस्मिन्नविद्यमानेन तेन हर्षेण स्वान्यत्वमनुमातुं शक्यते। यज्ञदत्तः हर्षवान् मुखविकासवत्त्वात्। यज्ञदत्तः मत्तोऽन्यःमदवृत्तिहर्षवत्त्वात् इत्यनुमानद्वयमत्र विवक्षितम्। न च आत्मैक्यपक्षे मदवृत्तिहर्षवत्त्वरूपहेत्वसिद्धिरिति वाच्यम्। हर्षदुःखादीनामेकाधिकरणावृत्तित्वरूपविरोधस्य पूर्वं प्रदर्शितत्वादिति भावः।

वा, सामान्यतो वेति; तत्रान्यतयैवेति ब्रूमः। यद्यपि तत्र न प्रत्यक्षम्, तथाऽपि मुखविकासाद्यनुमितेन हर्षादिना स्वस्मिन्ननुपलभ्यमानत्वेन(नेन) स्वस्मादन्यतयैवानुमातुं शक्यते। दर्शितं च सुखदुःखतदभावादीनां यथोपलम्भं विरुद्धत्वम्। अत एव सामान्यतः प्रथमप्रतीतावप्यनन्तरं विरुद्धधर्मोपलम्भेनापि भेदानुमितिः सिद्धा। एतेन प्रतिसन्धानतदभावयोः कथं सामानाधिकरण्यमित्यत्र तदभावासिद्धिवचनमपि प्रत्युक्तम्। तदभावसिद्धावपि उपाधिभेदेन तदुपपत्तिस्तु प्रागेव दूषिता। यत्तु प्रतिसन्धानतदभावविरोधशमनाय प्रदेशवर्तिसंयोगादिक-

---

ननु विरुद्धधर्मोपलम्भेन परस्मिन् स्वस्मात् अन्यत्वानुमानमपि स्वगतान्यत्वप्रत्यक्षवत् अन्यत्वेन प्रतियोगिज्ञानात् इत्येव वक्तव्यम्। प्रत्यक्षानुमित्योरविशेषात्। तथा च अन्योन्याश्रयः। स्वात्मनि परस्मात् अन्यत्वज्ञाने सति स्वस्मात् परस्यान्यत्वज्ञानं, परस्यान्यत्वज्ञाने सति स्वस्मिन् तत्प्रतियोगिकान्यत्वज्ञानमिति। अतोऽरुचेः सामान्यतः प्रतियोगिप्रतीत्या भेदधीसंभवात् परस्परभेदप्रतीतिरिति तृतीयपक्षमवलम्बते- **अत एवेति**। उपलम्भानुसारादित्यर्थः। एतेन प्रतिसन्धानमात्रात् भेदे स्वस्मादपि भेदप्रसङ्ग इति पूर्वपक्षोक्तदोषो निराकृतः। उपलम्भानुसारेण भेदवत्येव तदङ्गीकारात्। **प्रथमप्रतीताविति**। प्रतियोगिन इति शेषः। प्राथम्यमानन्तर्यं च स्वगतान्यत्वप्रत्यक्षापेक्षया द्रष्टव्यम्। स्वागतान्यत्वप्रत्यक्षापेक्षया प्रथमतः सामान्यतः प्रतियोगिनः प्रतीतौ स्वस्मिन्नन्यत्वप्रत्यक्षे सति तदनन्तरं परस्मिन् स्वावृत्तिधर्मोपलम्भेनापि स्वान्यत्वानुमानमिति वाक्यार्थः। **विरुद्धधर्मोपलम्भेनापीति**। स्वावृत्तिधर्मोपलम्भेनापीत्यर्थः। अपिशब्देन स्वगतान्यत्वप्रत्यक्षं समुच्चीयते।

एतेनेति। प्रतिसन्धानाभावस्य उपलम्भानुसारेणेत्यर्थः। **तदभावासिद्धिवचनं** = प्रतिसन्धानाभावासिद्धिवचनम्। **प्रागेवेति**। ''उपाधिभेदस्तु न प्रतिसन्धानप्रतिबन्धकः, सौभर्याद्युपाधिभेदवत्'' इत्यादिग्रन्थेन दूषित इत्यर्थः।

मुदाहृतम्; तद्विवक्षितमजानतैवोक्तम्। न हि वयं प्रतिसन्धानस्वरूपस्य सर्वत्र वृत्तिं प्रसञ्जयामः। आत्मवैभववादिनो हि प्रदेशवर्तिन एव ज्ञानादिगुणान् वदन्ति। यत्र क्वचित् प्रदेशेऽनुभवोत्पत्तावपि तदन्येनापि प्रदेशेन प्रतिसन्धानादिकमवर्जनीयमेव। अन्यथा दक्षिणहस्तेन स्पृष्टं सव्यहस्तेन स्पृशामीति प्रतिसन्धानं न स्यात्। सौभरिप्रतिसन्धानमपि दूरमपास्येत; तत्रापि प्रादेशिकप्रतिसन्धानोत्पत्त्या प्रतिसन्धानाभावस्य वक्तुं शक्यत्वात्। तस्मादाश्रयणविषयीकरणयोरविशेषभ्रमात् संयोगादिनिदर्शनम्। श्रुतयस्तु, 'अहमेवेदं सर्वम्', 'आत्मैवेदं सर्वम्' इत्यादिकाः

न हि वयमिति। प्रदेशविशेषोत्पन्नस्य प्रदेशान्तरेऽपि वृत्तिं न प्रसञ्जयाम इत्यर्थः। **यत्र** इत्यतः प्राक् **अपि तु** इति शेषः। **प्रतिसन्धानादिक**मित्यत्र **आदिपदेन** तत्कार्यव्यवहारपरिग्रहः। **एवे**त्यनन्तरं **इती**त्यध्याहारः। तस्य पूर्वतनेन **प्रसञ्जयाम** इत्यनेनान्वयः। **अन्यथेति**। दक्षिणहस्तेन स्पार्शनघटाद्यनुभवानन्तरं सव्यहस्तेन स्पार्शनघटादिसाक्षात्कारो जायमानः पूर्वोत्पन्नस्पार्शनानुभवजन्यसंस्कारसहकारवशात् पूर्वानुभूतत्वांशे प्रतिसन्धानरूप एव दक्षिणहस्तेन स्पृष्टं सव्यहस्तेन स्पृशामीत्याकारको जायते। स च सव्यहस्तावच्छेदेनैव जायत इति भावः। एवं चात्मैक्यवादे एकशरीरावच्छेदेनोत्पद्यमानस्यानुभवस्य शरीरान्तरावच्छेदेनापि प्रतिसन्धानं स्यात्। आत्मविभुत्ववादे एकशरीरावच्छेदेनोत्पन्नस्य ज्ञानस्य घटावच्छेदेन शरीरान्तरावच्छेदेन वा अभाव इति स्वीकारात् अव्याप्यवृत्तित्वं ज्ञानादेः युज्यते। न तथा वयं शरीरविशेषावच्छेदेनोत्पन्नं शरीरान्तरावच्छेदेन वर्ततामित्यापादयामः। येन अव्याप्यवृत्तित्वेन समाधीयेत। अपि तु एकशरीरावच्छेदेन उत्पन्नस्यानुभवस्य शरीरान्तरावच्छेदेन सौभरिवत् प्रतिसन्धानं भवतु इत्यापादयामः। तदाह- **तस्मादाश्रयण - विषयीकरणयोरविशेषभ्रमात् संयोगादिनिदर्शनमिति**।

एकशरीरावच्छेदेन जातस्यान्यशरीरावच्छेदेन वृत्त्यभावेऽपि अन्यशरीरावच्छिन्नजातप्रतिसन्धानेन विषयीकरणं भवितुमर्हतीति भावः। स्वाभावानवच्छिन्नमेव

प्रह्लादादिवाक्योक्तन्यायेन निर्व्यूढाः। ‘नेह नानास्ति किञ्चन’ इत्यादिभेदनिषेधास्तु समस्तचिदचिद्विशिष्टे ब्रह्मण्येकस्मिन् ज्ञाते विशिष्टबहिर्भूतप्रतिक्षेपपराः । यथा शरीरजातिगुणवसनभूषणादिपरिगणिते कस्मिंश्चित् पुरुषेऽवस्थिते, ‘तत्रैक एव तिष्ठति नान्यः कश्चित्’ इति व्यपदिशन्ति, तद्वदत्रापि। एवमनभ्युपगमे अहंत्वमादिलोकोपलम्भविरोधः। शास्त्रप्रत्यक्षविरोधे प्रत्यक्षपाबल्यं स्थितमन्यत्र (29)। तथा, ‘नित्यो नित्यानां चेतनश्चेतनानामेको बहूनाम्’ इत्यादिभेदश्रुतिशतकोपश्च । विषयभेदाद्विरोधे शाम्यति अन्यतरबाधोऽनुपपन्न इति सगुणनिर्गुणश्रुतिचिन्तने (५२) सुस्पष्टम्।

श्लो. मीमांसाशास्त्रसन्दर्भः सर्वो विषयभेदतः।
श्रुतीनामविरोधाय जायते न तु बाधनात्॥

प्रदेशमाश्रयतीत्यस्ति नियमः, न तु स्वाभावानवच्छिन्नमेव प्रदेशं विषयीकरोतीति । तथा चाश्रयणवत् विषयीकरणेऽपि तन्नियमभ्रमात् संयोगादिनिदर्शनमित्यर्थ इति चण्डमारुतकाराः। **सौभरीति** । स्वप्नशरीरावच्छेदेनानुभूतस्य उत्थितेन स्मरणं जातमात्रस्य स्तन्यपानप्रवृत्तिमूलभूतस्मृतिश्च न स्यादित्यपि उदाहार्यम् । **वक्तुं शक्यत्वादिति** । प्रसञ्जयितुं शक्यत्वादित्यर्थः । **निर्व्यूढा** इति । अहमेवेदं सर्वमित्यस्य मदन्तर्याम्येव सर्वान्तर्यामी इत्यर्थः । आत्मैवेदं सर्वमित्यस्य परमात्मैव एतत्सर्वशरीरक इत्यर्थः । **नेह नानेति** । चिदचिद्विशिष्टस्य वस्तुनः प्रमाणसिद्धत्वात् इह जगति चिदचिद्विशिष्टब्रह्मणो **नानाभूतं** भिन्नं विशिष्टानन्तर्गतं किमपि नास्तीत्यर्थः । **ज्ञाते** इति । प्रमाणप्रतिपन्ने सतीत्यर्थः ।

ननु विशेषणस्य विशिष्टात् विशेष्याद्वा भिन्नत्वात् निषेधानुपपत्तिः, न वा बहिर्भूतप्रतिक्षेपसिद्धिरित्यत्राह - **यथेति** । **स्थितमन्यत्रेति** । एकोनत्रिंशे प्रत्यक्षशास्त्रविरोधपरिहारवादे निर्णीतमित्यर्थः । ननु परत्वात् अद्वैतश्रुत्या द्वैतश्रुतिबाधोऽस्तु इत्यत्राह- **विषयभेदादिति** । द्विपञ्चाशे सगुणनिर्गुणश्रुतिवादे सुस्पष्टम् इत्यर्थः । **न तु बाधनात्** इत्यस्य अविरोधायेत्यनेनान्वयः । एकस्याः श्रुतेः श्रुत्यन्तरविरोधः

एतेन स्मृतिष्वपि भारोऽवरोपितः । तत्रापि ब्रह्मात्मकत्वप्रतिपादनप्रकरणे प्रागुक्तन्यायावतारः । जीवानां परस्परभेदनिषेधप्रकरणे तु ज्ञानरूपतयाऽत्यन्तसमस्वरूपाणां कर्मकृतदेहोपाधिकदेवत्वादिभेदस्य स्वरूपानुबन्धित्वप्रतिक्षेपे तात्पर्यम् । तथा चोच्यते, 'देवादिभेदेऽपध्वस्ते नास्त्येवावरणो हि सः', 'पुमान्न देवो न नरो न पशुर्न च पादपः', इत्यादिना ।

तद्विरुद्धार्थप्रमापकत्वम्, तच्च तर्कितं, तच्छमनं च मीमांसान्यायैः न प्रामाण्यनिराकरणेन क्रियते, किं तु अविरुद्धविषयान्तरसमर्पणेनेति कारिकाया अर्थः ।

एतेन स्मृतिष्वपि भारोऽवरोपित इति । ''तथा च स्मृतिः'' इत्यारभ्य पूर्वपक्षिप्रदर्शितासु स्मृतिषु निक्षिप्तः स्वपक्षरक्षणभरः अवरोपितः, तासामन्यपक्षानुकूलत्वादित्यर्थः । स्मृतीनामद्वैताननुकूलत्वं संग्रहेणोपपादयति - **तत्रापीत्यादिना** । **प्रागुक्तन्यायावतार** इति । शरीरात्मभावेन जगतो ब्रह्मात्मकत्वं निर्वाह्यमिति भावः । ''तस्यात्मपरदेहेषु सतोऽप्येकमयं हि यत्'' ''यद्यन्योऽस्ति परः कोऽपि'' इत्यादिषु जीवानां परस्परभेदप्रतिक्षेपकप्रकरणेषु सर्वेषामपि जीवानां ज्ञानस्वरूपत्वेनात्यन्तसाम्यात् ऐक्यव्यपदेशे आत्मनि देहगतदेवत्वमनुष्यात्वादिभेदस्य निषेधे च तात्पर्यम् । **देहादिभेदेऽपध्वस्त** इति ।

एकस्वरूपभेदश्च बाह्यकर्मवृतिप्रजः । देहादिभेदेऽपध्वस्ते नास्त्येवावरणो हि सः ॥

ज्ञानैकस्वरूपस्यात्मनः भेदः देवादिरूपः जाह्यकर्मावरणजातः । देवादिभेदश्चायं कर्मावरणेऽपध्वस्ते न भवतीत्यर्थः ।

पुमान्न देव इति । जीवात्मस्वरूपे पुंस्त्वं देवत्वं नरत्वं पशुत्वं पादपत्वं च नास्ति । तत्तु सर्वं जीवशरीरगतमित्यर्थः । ''यद्यन्योऽस्ति परः कोऽपि'' इत्यत्रापि अन्यादृश इति अन्यशब्दस्यार्थः । न तु अन्य इति, परशब्देन पौनरुत्तयात् । अतः मत्तोऽन्यः कोऽपि यद्यन्यादृशः मदाकारभूतज्ञानाकारापेक्षया अन्याकारःस्यात् तदाहमेषः अयमन्य इति वक्तुं शक्यते, सर्वेषां च ज्ञानाकारत्वात् अन्याकार इति वक्तुं न शक्यत इत्येवार्थः ।

‘यद्यन्योऽस्ति परः कोऽपि’ इत्यत्रान्यशब्देनान्यादृशत्वमेवोच्यते; अन्यथा परशब्दपौनरुक्त्यात् । एवं सति आत्मनां परस्परसाम्यप्रतिपादकवाक्यान्तरानुगुण्यमपि सिध्यति । अत एव भगवद्वचनमपि निर्व्यूढम्, ‘सर्वत्र समदर्शिनः’ इति तत्रैवोक्तेश्च । घटाकाशतरङ्गचन्द्राद्युदाहरणवाक्यस्य जीवविषयत्वेऽयमेव न्यायः । तत्तु यदा परमात्मविषयम्, तदा तद्गतदोषैरस्पृष्टत्वमात्रे तदुभयदृष्टान्ततात्पर्यमिति, ‘वृद्धिह्रास- भाक्त्वमन्तर्भावादुभयसामञ्जस्यादेवं दर्शनाच्च’ इति सूत्रेणैव समर्थितम् ।

साम्यप्रतिपादकेति ।

“विद्याविनयसंपन्ने ब्राह्मणे गवि हस्तिनि । शुनि चैव श्वपाके च पण्डिताः समदर्शिनः ॥” इत्यादिवाक्यानुगुण्यमित्यर्थः । **भगवद्वचनमपीति ।**

“सर्वभूतस्थमात्मानं सर्वभूतानि चात्मनि । ईक्षते योगयुक्तात्मा सर्वत्र समदर्शनः ॥” इति वचनमपीत्यर्थः ।

घटाकाशेति ।

“आकाशमेकं हि यथा घटादिषु पृथग्भवेत् ।
तथात्मैको ह्यनेकस्थो जलाधारेष्विवांशुमान् ॥
एक एव हि भूतात्मा भूते भूते व्यवस्थितः ।
एकधा बहुधा चैव दृश्यते जलचन्द्रवत् ॥”

इति श्लोकयोः जीवपरत्वे एकशब्दस्य एकाकार इत्यर्थः ।

वस्तुतस्तौ श्लोकौ परमात्मविषयतया सूत्रकारेण व्याख्यातौ ।

“वृद्धिह्रासभाक्त्वमन्तर्भावादुभयसामञ्जस्यादेवं दर्शनाच्च” इति सूत्रम् । तस्यायमर्थः पृथिव्यादिस्थानान्तर्भावात् स्थानिनः परमात्मनः स्वरूपतो गुणतश्च पृथिव्यादिस्थानगत-वृद्धिह्रासादिदोषभाक्त्वमात्रं सूर्यादिदृष्टान्तेन निवर्त्यते । कथमिदमवगम्यते । उभयसामञ्जस्यादेवम् - उभयदृष्टान्तसामञ्जस्यादेवमिति निश्चीयते । “आकाशमेकं हि यथा घटादिषु पृथग्भवेत्” “जलाधारेष्विवांशुमान्” इति दोषवत्सु अनेकेषु वस्तुषु वस्तुतोऽवस्थितस्याकाशस्य वस्तुतोऽनवस्थितस्यांशुमतश्चोभयस्य दृष्टान्तस्योपादानं हि

एवमनभ्युपगमे बद्धमुक्तव्यवस्थाभङ्गश्च ।

यत् तत्रोक्तम्–ब्रह्माज्ञानवादे तावत् पूर्वं मुक्ता एव न सन्ति; शुकादिमोक्षोऽपि स्वप्नदृष्टपुरुषमोक्षवन्मिथ्येति; तत्र तावत् अद्वैतविद्योपदेशिनां त्वदाचार्याणामपि मोक्षस्य मिथ्यात्वे स्वयं कथं मोक्षमन्विच्छसि ? कथं वा शिष्यांश्च प्रेरयसि ।। आमोक्षाज्जीववच्छरीरं किमित्यपरिज्ञानादिति चेन्न; सर्वशरीराणामेकात्माधिष्ठितत्वे मिथ्यात्वे चाविशिष्टे तत्तदधिष्ठाने च प्रतिभासमात्रसिद्धे(द्धेः) द्रष्टृदृश्यशरीरविशेषासिद्धेः । ततश्च पश्चात्तनोऽपि मोक्षो मिथ्याभूत इति कथमद्यतनाद्विशेषः ? तस्मान्न कदाचिदपि मोक्ष इति वा, न कदाचिदपि बन्ध इति वा स्यात् ।। इष्टमेवैतदुभयमपीति चेन्न; पूर्वत्र नित्यबन्ध- प्रसङ्गेन निवर्तयितुमशक्यत्वात्, उतरत्र निवर्त्याभावाच्च बन्धनिवर्तनोपायोपदेशादिपरशास्त्रनैरर्थक्यादिप्रसङ्गात् ।

परमात्मन: पृथिव्यादिगतदोषभाक्त्वनिवर्तनमात्रे प्रतिपाद्ये समञ्जसं भवति । दर्शनाच्च । दृश्यते चैवं सर्वात्मना साधर्म्याभावेऽपि विवक्षितांशसाधर्म्यात् दृष्टान्तोपादानं सिंह इव माणवक इत्यादौ ।

एवमनभ्युपगम इति । पूर्वोक्तरीत्या श्रुतिस्मृतितात्पर्यमनभ्युपगम्य जीवस्वरूपाभेदाभ्युपगमे बद्धमुक्तव्यवस्थाभङ्गश्च । चशब्देन सुखदु:खादिव्यवस्थाभङ्ग: समुच्चीयते ।

यत्तत्रोक्तमित्यादि । ब्रह्मैव स्वाज्ञानात् संसरति तदेव तत्त्वज्ञानात् मोक्ष्यति इति ब्रह्माज्ञानवादे इत:पूर्व केऽपि न मुक्ता: । शुको मुक्त: वामदेवो मुक्त इत्यादि: शुकवामदेवादीनां मोक्षोऽपि स्वप्नदृष्टपुरुषमोक्षवत् मिथ्येति यदुक्तम् । तत्रोच्यते । अद्वैतविद्योपदेशिनां भवदाचार्याणामपि मोक्षस्य मिथ्यात्वे स्वयं कथं मोक्षमन्विच्छसि? कथं वा शिष्यांश्च मोक्षाय प्रेरयसि? न च मोक्षपर्यन्तं जीववच्छरीरं किमित्यपरिज्ञानात् मोक्षार्थमन्विच्छा प्रेरणं चेति वाच्यम् । सर्वशरीराणामेकात्माधिष्ठितत्वे मिथ्यात्वे च समाने

जीवाज्ञानवादे तु ब्रह्मणो बन्धानभ्युपगमात् ब्रह्मव्यतिरिक्तस्य च मिथ्यात्वात् केवलं बाधिताबाधितव्यवस्थेत्येव स्यात्, न तु बद्धमुक्तव्यवस्था । अथ ब्रह्मप्रतिबिम्वस्थानीयानामपि जीवानां ब्रह्मत्वम्, तदा ब्रह्माज्ञानवादप्रसङ्गे प्रतिपादित एव दोष इति ।

एवं भास्करादिपक्षेऽपि परस्परं जीवानाम्, ईश्वरेण चाभेदस्य स्वाभाविकत्वात्, उपाधिभेदस्य चाकिञ्चित्करत्वस्थापनात्, सर्वसुखदुःखादिप्रतिसन्धानप्रसङ्गे बद्धमुक्तजीवेश्वरव्यवस्थाभङ्गप्रसङ्गो दुर्वारः ।

सति तत्तदधिष्ठाने च प्रतिभासमात्रसिद्धे द्रष्टदृश्यशरीरभेदस्यैवासिद्धेः । ततश्चाद्यतनमोक्षवत् पश्चात्तनमोक्षोऽपि मिथ्याभूत इति कथमद्यतनात्तस्य विशेषः । तस्मात् इतः पूर्वं मोक्षानङ्गीकारे पश्चादपि मोक्षो न स्यात् । पश्चान्मोक्षाङ्गीकारेऽविशेषात् शुकवामदेवादिमुक्तेरपि स्वीकार्यत्वात् तस्याश्च श्रुतिप्रतिपाद्यायाः प्रवाहानादित्वेन कदाचिदपि बन्धो न स्यात् । अथवा कदापि मोक्षो न स्यात् । न चैतदुभयमिष्टमेवेति वाच्यम् । पूर्वत्र निवर्त्याभावात् उत्तरत्र नित्यबन्धप्रसङ्गेन निवर्तयितुमशक्यत्वाच्च बन्धनिवर्तनोपायोपदेशपरशास्त्रनैरर्थक्यप्रसङ्गादिति घट्टार्थः ।

जीवाज्ञानवादे त्विति । जीवाज्ञानपक्षे ब्रह्मणो बन्धानङ्गीकारात् ब्रह्मातिरिक्तस्य मिथ्यात्वात् वामदेवादयो बाधिताः अन्ये इदानीं न बाधिता इत्येव स्यात् न तु बद्धमुक्तव्यवस्था । ननु प्रतिबिम्बजीवस्य मिथ्यात्वमते स्यादयं दोषः, न तु बिम्बब्रह्माभिन्नजीवपक्ष इत्यत्राह - **अथेति** । **दोष इति** । न कदापि मोक्ष इति वा न कदाचिदपि बन्ध इति वा स्यादित्युक्तो दोष इत्यर्थः । एकोपाधिविगमेऽपि उपाध्यन्तरगत प्रतिबिम्बैक्यात् तत्त्वज्ञानात् प्रागिव पश्चादपि मोक्षो न स्यात् । बिम्बब्रह्मैक्यात् मुक्तौ तु न कदाचिदपि बन्धः, तस्य प्रागपि सत्त्वात् ।

ननूपाधिविगमे सति प्रतिबिम्बस्य बिम्बैक्यमेव, न प्रतिबिम्बान्तरैक्यमिति न पश्चात् बन्धः । बिम्बैक्यं तु काल्पनिकभेदनिवृत्तिः, न स्वाभाविकाभेद इति न प्रागपि मोक्षप्रसङ्ग

यत्तु भेदवादेऽप्यतीतकल्पानन्त्यात् प्रतिकल्पमेकमुक्तावपि सर्वमुक्तिप्रसङ्गात् कथं बद्धमुक्तव्यवस्थेत्याहुः; तदपि मुग्धभाषितम्, अनन्तघटध्वंसेऽपि घटान्तरस्थितिवत्, अनन्तकल्पानां ध्वंसेऽपि कल्पान्तरवत्, अनन्तपार्थिवपृथक्कारेऽपि द्रव्यान्तरानन्त्यवत् यथोपलम्भमानन्त्यातिशयात् व्यवस्थोपपत्तेः । एकस्य वाऽऽत्मनः कथमितः पूर्वमपवर्गाभावः ।। हेत्वनागमनादिति चेत्, एवमनेकेष्वपीति भावय । तथा अनन्ता एव जीवा इत्यपि यथाप्रमाणमनुसन्धत्स्व । नन्वेवमपि कश्चिन्नित्यं मुक्तः, कश्चित्तु बध्यते मुच्यते इति चेत् न । उपाधिनिवृत्तौ तन्निबन्धनत्वाविशेषात् बिम्बाभेदवत् प्रतिबिम्बान्तरात् भेदस्यापि निवृत्त्यवश्यंभावात् ।

अनन्तघटध्वंसेऽपीति । अनन्तघटध्वंसेपि घटान्तरस्थितिवत् अनन्तकल्पानां ध्वंसेऽपि कल्पान्तरस्थितिवच्च अनन्तजीवानां मुक्तत्वेऽपि जीवान्तरबन्धोपपत्त्या बद्धमुक्तव्यवस्थोपपत्तेरित्यर्थः । तत्र हेतुः **आनन्त्यातिशयादिति** । अतीतकल्पापेक्षया जीवानामानन्त्यातिशयादित्यर्थः । आनन्त्यातिशये दृष्टान्तमाह - **अनन्त पार्थिवेति । द्रव्यान्तरानन्त्यवदिति** । द्रव्यान्तरानन्त्यस्येवेत्यर्थः । पार्थिवानन्त्यापेक्षया द्रव्यान्तरानन्त्यस्य यथातिशयः, तथा कल्पानन्त्यापेक्षया जीवानन्त्यस्यातिशयादित्यर्थः; । कल्पानन्त्येऽपि प्रतिकल्पं मुक्तिर्माभूत्, शुकादीनामेव कतिपयानां मुक्तिरस्तु । अतो वा बद्धमुक्तव्यवस्थोपपत्तिरित्याशयेन प्रतिबन्दिमाह - **एकस्य वेति** । प्रसङ्गात् बद्धमुक्तव्यवस्थावत् संसार्यसंसारिव्यवस्थापि युक्तेत्याह - **तथा अनन्ता** एवेति ।

ननु आनन्त्याजीवानां केचित् जीवाः मुक्ताः केचित् जीवाः बद्धा इति व्यवस्थायाः उपपत्तावपि कश्चित् नित्यमुक्तः कश्चित्तु बध्यते मुच्यते चेति व्यवस्था न सिध्यति । आत्मनां सर्वेषां ज्ञानाकारत्वेन समत्वात् संसारयोग्यताप्रयोजकवैजात्याभावात् । न चेश्वरसंकल्पात् व्यवस्थेति वाच्यम् । तस्य सर्वसाधारणत्वेन क्वचित्पक्षपातविरहात् इति शङ्कते- **नन्वेवमपीति** । समाधत्ते **हन्तैवमिति** । स्वत आत्मनां समत्वाङ्गीकारादिदानीं-

चेति व्यवस्था न सिध्यति, आत्मनां स्वतः समत्वादीश्वरस्य (च ?) साधारण्यादिति चेत्; हन्तैवमास्तिकपदवीमनुप्रविष्टोऽसि । ततश्च किं जीवेश्वरभेदमनभ्युपगम्य पृच्छसि, उत तदभ्युपगमेन ? न प्रथमः; श्रुतिविरोधात् । अभेदवादिनाऽपि सर्वज्ञत्वादिवैषम्याङ्गीकाराच्च । नापि द्वितीयः, आत्मत्वाविशेषेऽपि कथमीश्वरो नित्यमुक्त इतिवदपहास्यत्वात् ॥ संसारहेत्वत्यन्ताभाववत्तया धर्मिग्राहकेण तत्सिद्धेरिति चेत्; हन्तानीश्वरेष्वपि केषुचित् तथा धर्मिग्राहकसद्भावे किं कुर्मः ? अनीश्वरत्वादेव संसारयोग्यत्वमस्तीति चेत्; तत् सत्यम्; सा स्वरूपयोग्यता; न

त्वमास्तिकपदवीमनुप्रविष्टोऽसि । आस्तिकपदवीमनुप्रविष्टेन त्वया स्वतो जीवेश्वरभेदोऽप्यङ्गीकर्तव्यः । अन्यथा तद्भेदप्रतिपादकश्रुतिविरोधात् । एवं च जीवेश्वरयोरात्मत्वाविशेषेऽपि संसारित्वासंसारित्वव्यवस्थावत् जीवेष्वपि सा व्यवस्थोपपद्यत इति ''ततश्चे''त्यादि ''अपहास्यत्वात्'' इत्यन्तग्रन्थस्यार्थः । जीवेश्वरभेदेऽपि सर्वज्ञत्वकिंचिज्ज्ञत्ववैषम्यवत् आत्मनां संसार्यसंसारिव्यवस्था संभवतीति प्रसङ्गात् नास्तिकं प्रत्यपि अभेदवादिनापि सर्वज्ञत्वादिवैषम्यस्याङ्गीकाराच्चेत्यनेनोक्तम् । **नापि द्वितीय** इति । जीवश्वरभेदमभ्युपगम्य प्रश्ने आत्मत्वाविशेषेऽपि कथमीश्वरो नित्यमुक्त इतिवत् अपहास्यत्वात् इति ।

ननु ईश्वररूपधर्मिग्राहकं प्रमाणमीश्वरं संसारहेत्वत्यन्ताभाववत्तया नित्यमुक्तत्वेन बोधयतीति ईश्वरस्य नित्यमुक्तत्वमित्याशङ्क्य अनीश्वरेष्वपि केचन नित्यसूरय; धर्मिग्राहकप्रमाणेन संसारात्यन्ताभाववत्तया सिध्यन्तीति तेऽपि स्वीकार्या इति समाधत्ते - **हन्तानीश्वरेष्वपीति** । ननु तेषामनीश्वरत्वादेव संसारयोग्यतास्तीत्यशङ्क्य संसार स्वरूपयोग्यतायास्तेषु सत्त्वेऽपि सहकारियोग्यतायाः अभावात् तेषां न संसारितेति समाधत्ते **अनीश्वरत्वादे** वेत्यादिना । स्वरूपयोग्यता नाम कारणतावच्छेदकधर्मवत्त्वम् । सहकारियोग्यता नाम सहकारिकारणसंसर्गः ।

ननु यत्र स्वरूपयोग्यत्वं तत्र सहकारियोग्यत्वमिति व्याप्तेः स्वरूपयोग्यत्व सत्त्वे

तु सहकारियोग्यता ।। स्वरूपयोग्यत्वं सहकारियोग्यत्वव्याप्तमिति चेन्न; निस्तुषबीजादिष्वङ्कुरादिसहकारिसन्निपातादर्शनात् । तथाऽप्यविरुद्धयोरसंसर्गः प्रणाशाभावे कालविप्रकर्षव्याप्त इति चेन्न; मुक्तानामुत्तरकालबन्धाभाववदुपपत्तेः ।। हेतूनामत्यन्तोच्छेदात् न पुनःसहकार्यागमोऽपुनरावृत्तिश्रुतेरिति चेन्न; तुल्यत्वात् । अत्यन्ताभावादिति हि विशेषः, स तु विरुद्ध इति चेन्न; धर्मिग्राहकतस्तत्सिद्धौ विरोधसिद्धेः । ततश्च तद्विपरीतानुमानाद्युत्थानमपि प्रतिरुद्धम् । धर्मिग्राहकमेव न

सहकारियोग्यत्वमप्यावश्यकमिति शङ्कते- **स्वरूपयोग्यत्व** इति । तथा व्याप्तिर्नास्तीति समाधत्ते - **निस्तुषेति** । तुषरहितवीजे स्वरूपयोग्यत्वसत्त्वेऽपि सहकारिकारणप्रयुक्त-अंकुरादिकार्यादर्शनात् इति भावः । ननु अविरुद्धयोरसंसर्गः कालविप्रकर्षव्याप्त इति उदयनाचार्येणोक्तम् । तस्यायमर्थः कालविप्रकर्षो नाम भिन्नकालिकत्वम् । यत्र यत्र अविरुद्धयोः अनश्यतोः असंसर्गः, तत्र तत्र तयोः भिन्नकालिकत्वम् । समानकालिकयोस्तु संसर्गः कदाचिदावश्यक इति । एवं च स्वरूपयोग्यस्य आत्मस्वरूपस्य सहकारिसंसर्गाविरोधात् कदाचित् तत्संसर्ग; स्यादिति शङ्कते- **तथापीति** । मुक्तानां कालविप्रकर्षाभावेऽपि उत्तरकाले सहकारियोग्यताविरहेण बन्धाभाववत् नित्यानामपि तदुपपत्तिरिति समाधत्ते - **मुक्तानामिति** । ननु मुक्तानां बन्धहेतुकर्मात्यन्तोच्छेदात् पुनः कर्मरूपसहकारिसंसर्गो न भवतीति शङ्कते- **हेतूनामिति** । बन्धहेतुकर्मणामित्यर्थः । नित्यानामपि कर्मात्यन्ताभावात् न संसार इति समाधत्ते - **तुल्यत्वादिति** । ननु मुक्तानां कर्मनाशः, नित्यानां कर्मात्यन्ताभाव इत्येतावान् हि विशेषः । स च कर्मात्यन्ताभावः जीवात्मस्वरूपविरुद्ध इति शङ्कते-**अत्यन्ताभावादितीति** । नित्यसूरिरूपधर्मिग्राहकप्रमाणेन नित्यसूरीणां कर्मात्यन्ताभावसिद्ध्या न विरोध इति समाधत्ते-**धर्मीति** । **तद्विपरीतेति** । धर्मिग्राहकप्रमाणविपरीततया नित्यानां कर्मसंबन्धानुमानमपि निरस्तं अथवा प्रतिबद्धं भवतीत्यर्थः । विमतः जीवः (नित्यसूर्याख्यः) कदाचित् बन्धहेतुसंसर्गी आत्मत्वात् संप्रतिपन्नवत् इत्यनुमानम् । **प्रतिरुद्धमिति** शब्दः सत्प्रतिपक्षमित्यर्थे तार्किकैः प्रयुज्यते ।

पश्यामीति चेत्; तर्हि निर्विषयं चोद्यमिति तूष्णीं भव; अधीष्व वा तत्त्वमाचार्येभ्य इति । तदेतत् सर्वमादिभरतवाक्यव्याख्यानव्याजेन भाष्यकारैस्सूचितमिति द्रष्टव्यम् ॥

॥ इति शतदूषण्यां आत्माद्वैतभङ्गवादः षट्त्रिंशः ॥ ३६ ॥

एकस्यानुमानस्य प्रत्यनुमानं यत्र प्रयुज्यते तत्र सत्प्रतिपक्षपदप्रयोगः । प्रकृते तु अनुमानेन बन्धहेतुसंसर्गः श्रुत्या च तदभावः अवगम्यते । अत्र प्रतिरुद्धमिति पदप्रयोगः कथमिति नाशङ्कनीयम् । आचार्यैः न्यायपरिशुद्धौ एकत्र परस्परविरुद्धार्थकप्रमाणद्वयसमावेशे सत्प्रतिपक्षः इति निरूपितम् । प्रमाणद्वयं च सजातीयं विजातीयं च भवितुमर्हति । तथा हि-

अतुल्यं तुल्यमिति वा यं तुल्यमभिमन्यते ।
तेन यः प्रतिरुध्येत तमाहुः प्रक्रियासमम् ॥
रोधश्च हेतुनैवेति हेतोरेवेति वा पुनः ।
नियमो नाभिमन्तव्यः सर्वैः सर्वत्र संभवात् ॥

इति न्यायपरिशुद्धावाचार्यपादैरेवानुगृहीतमत्रानुसन्धेयम् ।

ननु नित्यजीवग्राहकं प्रमाणं न पश्याम इत्याशङ्क्य तर्हि नित्यजीवरूपविषयस्याभावात् तमधिकृत्य कथमयं संसारात्यन्ताभाववान् इति चोद्यं मा कुरु इति समाधत्ते- **धर्मिग्राहकमिति** । **अधीष्व** वेति । “तद्विष्णो; परमं पदं सदा पश्यन्ति सूरयः” इत्यादिश्रुतिभ्यः आचार्यसकाशादधीताभ्यः जानीहीत्यर्थः । **आदिभरतवाक्यम्** = “यद्यन्योऽस्ति परः कोऽपि” इत्यादिवाक्यम् ॥

इति श्रीशतदूषणीव्याख्यायां तात्पर्यप्रकाशिकायाम्
आत्माद्वैतभङ्गवादःषट्त्रिंशः ॥

* * *

॥ अथ जीवेश्वरैक्यभङ्गवादः सप्तत्रिंशः ॥ ३७ ॥

आत्मतत्त्वविदां पुसां यद्दास्यं लास्यकारणम् । तद् बन्दे परमानन्दमिन्दिरामन्दिरं महः ॥

यत्पुनः महासाहसिका दृढतरनिरूढदेहात्ममोहमन्दधियः प्रत्यक्षादिविरोधमपि तिरस्कृत्य स्वात्मानमेवेश्वरमभिमन्यन्ते, तदपि भेदसामान्यस्य आत्मनानात्वस्य

अथ जीवेश्वरैक्यभङ्गवादः सप्तत्रिंशः ॥

आत्मतत्त्वविदां पुंसां यद्दास्यं लास्यकारणम् ।
तद्वन्दे परमानन्दमन्दिरामन्दिरं महः ॥

जीवात्मतत्त्वज्ञानां परमात्मपारतन्त्र्यशेषत्वादिज्ञानवतां पुरुषाणां यद्दास्यं यस्य श्रीपतेः दास्यं श्रीपतिनिरूपितं दासत्वं लास्यस्य नृत्यपर्यन्तप्रेरकानन्दस्य कारणं भवति तत् परमानन्दस्वरूपं लक्ष्मीनिवासरूपं तेजः वन्दे । यद्दास्यमित्यनेन शेषशेषिणोरभेदानुपपत्त्या जीवेश्वरैक्यभङ्गरूपो वादार्थः सूचितः । तत्त्वविदामित्यनेन जीवगतस्य ईश्वरदासत्वस्य तात्त्विकत्वं लास्यकारणमित्यनेन दासत्वज्ञानस्य परमपुरुषार्थपर्यवसायित्वं परमानन्दमिन्दिरामन्दिरं मह इति भोग्यता चाविष्क्रियते ।

पूर्वं सामान्यत आत्मैक्यं निराकृतम् । इदानीं जीवैश्वरैक्यं निराक्रियते । नात्रैक्यभङ्गमात्रं, किं तु अत्यन्तसाम्यभङ्गोऽपि । स्वामिदासभावपर्यन्तो भेद इष्यत इति ज्ञापनाय यद्दास्यमित्युक्तम् । दास्यमिदमितरदास्यवत् न दुःखकरम्, प्रत्युत सुखातिशयहेतुरिति सूचनाय लास्येति । आनन्दपरीवाहभूतनृत्तहेतुरित्यर्थः । इन्दिरामन्दिरमित्यनेन शेषित्वस्योभयाधिष्ठानत्वात् उभयनिरूपितं दास्यमिति ज्ञाप्यते ।

यत्पुनरिति । दृढतरं शास्त्रेणापि दुर्निरासतया रूढमूलो यो देहात्मभ्रमः तेन मन्दा धीर्येषां ते नाहमीश्वर इति प्रत्यक्षादिविरोधमपि तिरस्कृत्य स्वात्मानमेवेश्वरं ये अभिमन्यन्ते तेषामभिमननमपि निरस्तम् । भेदसामान्यस्य आत्मनानात्वस्य च समर्थनात् ''एको बहूनां

च समर्थनात्, ‘एको बहूनाम्’ इत्याद्युक्तैकानेकतादात्म्यायोगाच्च निरस्तप्रायमेव। विशेषतोऽपि पश्यामः—

जीवस्येश्वरत्वं किं (१) प्रत्यक्षबलादभ्युपगम्यते, (२) उतोपपत्तिसामर्थ्यात्, (३) यद्वा शास्त्रवैभवात्? अन्यतः कुतश्चिन्न सम्भवत्येव।

नाद्यः, अनीश्वरतयैव स्वात्मन उपलम्भात्। अप्रतीतेश्वरस्य कथं तत्प्रतियोगिकानीश्वरत्वनिरूपणमिति चेन्न; श्रुत्यादिभिः प्रमितेश्वरतत्त्वानां

यो विदधाति कामान्'' इति श्रुतौ एकत्वेन निर्दिष्टस्येश्वरस्य अनेकत्वेन निर्दिष्टानां जीवानां चैक्यायोगाच्च निरस्तप्रायमित्यर्थः। भेदसामान्यस्यैवाभावात् जीवेश्वरभेदाभाव इत्येतत् भेदसामान्यसमर्थनान्निरस्तम्। प्रतिसन्धानतदभावव्यवस्थया आत्मनानात्वसाधनाच्च जीवेश्वराभेदोऽपि तुल्यन्यायान्निरस्त इति भाव;। **भेदसामान्यस्येति**। भेदसामान्ये आत्मनानात्वे चासिद्धे जीवेश्वरभेदसाधनासंभवादेवमुक्तिः। एवं सामान्यतो जीवेश्वराभेदं निरस्य विशेषतोऽपि निरसितुमारभते - **विशेषतोऽपि पश्याम** इति। आलोचयाम इत्यर्थः।

जीवस्येश्वरत्वं प्रत्यक्षाद्वा अनुमानाद्वा शास्त्राद्वा इति विकल्पः। तत्राद्यं दूषयति - **नाद्य** इति। तत्र निरङ्कुशैश्वर्यशालिनं कंचिदभ्युपगम्य किं तदभेदः प्रत्यक्ष इत्युच्यते उत अनभ्युपगम्येति विकल्प्य नाद्य इत्याह- **अनीश्वरतयैवेति**। नाहमीश्वर इति ईश्वरभिन्नत्वेनैव स्वात्मानं विषयीकुर्वत् प्रत्यक्षमुपलभ्यते। ननु अभावप्रत्यक्षं प्रति प्रतियोगिप्रत्यक्षं योग्यानुपलब्धिश्च हेतुः। अत्र तु ईश्वरस्यायोग्यत्वान्न प्रत्यक्षं न वा योग्यानुपलब्धिरिति कथं स्वात्मानुयोगिकेश्वरभेदप्रत्यक्षमिति शङ्कते-**अप्रतीतेति**। प्रतियोगिज्ञानमेवाभावप्रत्यक्षे कारणम्, न तु प्रतियोगिप्रत्यक्षम्। ये च प्रतियोगिभूतेश्वरतत्त्वं श्रुत्यादिभिः जानन्ति तेषामीश्वरप्रतियोगिकभेदप्रत्यक्षं स्वात्मविशेष्यकं भवितुमर्हत्येव। अपि च भेदरूपाभावप्रत्यक्षं प्रति अधिकरणस्यैव प्रत्यक्षयोग्यता अपेक्षिता। स्तम्भे अयोग्यपिशाचप्रतियोगिकभेदावगाहिप्रत्यक्षस्येष्टत्वादित्याशयेन समाधत्ते- **श्रुत्यादिभिरिति**। भेद

तत्प्रतियोगिकभेदनिरूपणोपपत्तेः, स्वात्मनि अप्रत्यक्षमेर्वादिभेदोपलम्भवत्; यदीश्वरः स्वात्मा, प्रत्यक्षमेव तथोपलभ्येतेति । अप्रतीतेश्वराणामपि स्वगतेच्छाविघातदुःखादिदर्शनात् तावत एवानीश्वरत्वोपलम्भरूपत्वात् ।। अनीश्वरोऽहमित्युपलम्भो नास्तीति चेन्न; अशक्येष्वनीश्वरोऽहमित्येवोपलम्भात् ।। सामर्थ्याभावलक्षणधर्मविषयोऽयमनीश्वरशब्द इति चेन्न; ईश्वरप्रतीतावपि तस्यैव

प्रत्यक्षे प्रतियोगियोग्यता न तन्त्रमित्यत्र उदाहरणान्तरम् **स्वात्मनि अप्रत्यक्षमेर्वादिभेदोपलम्भवदिति** । किं च न योग्यस्य अनुपलब्धिर्योग्यानुपलब्धिः, किं तु यत्र यत्संबन्धसत्त्वं तत्र तत्संबन्धवत्तया तदुपलम्भस्यावश्यकत्वम्, तत्रत्यानुपलब्धिर्योग्यानुपलब्धिः सा चात्राप्यस्तीत्याशयेन परिहरति - **यदीश्वर** इति । अनेन योग्यता उपपादिता। **इतिर्हेतौ** । ईश्वरतादात्म्यसत्त्वे तदात्मतयोपलम्भ आवश्यको यतः इत्यर्थः । **अप्रतीतेश्वराणामिति** । रूपत्वादित्यन्तस्य पूर्वेण नेत्यनेनान्वयः । जीवात्मनः स्वस्मिन् इच्छाविघातः दुःखम् इत्यादीनामुपलम्भात् तादृश उपलम्भ एवानीश्वरत्वोपलम्भः । अभावस्य अभावत्वेन प्रतीतावेव प्रतियोगिप्रतीतिः कारणं न स्वरूपप्रतीताविति भावः ।

ननु यदि भेदवाचकानीश्वरशब्दानुविद्धोपलम्भो दुःखादेः तदा तस्येश्वरभेदरूपता स्यात्। अत्र तादृशोपलम्भाभावात् कथमहं दुःखीत्युपलम्भमात्रस्यानीश्वरत्वोपलम्भरूपतेत्याशङ्क्ते **अनीश्वरोऽहमिति** । समाधत्ते-**अशक्येष्विति** । अशक्येषु विश्वसृष्ट्यादिषु अनीश्वरोऽहमिति बुद्धिः इच्छाविघातादिकमनीश्वरत्वं भेदत्वेन रूपेण भेदवाचकनञ्शब्दानुविद्धतया विषयीकरोति । अतस्तत्समानविषयः प्रतिहतेच्छोऽहमित्याद्युपलम्भोऽपि भेदोपलम्भरूप इत्यर्थः । ननु अशक्येष्वनीश्वरोऽहमिति बुद्धिः जगत्सृष्ट्यादिसामर्थ्याभावं विषयीकरोति, न तु विहतेच्छत्वादिकमनीश्वरशब्दानुविद्धतया ईश्वरभेदत्वेन, इत्याशङ्क्ते-**सामर्थ्येति** । तथा च न तत्समानविषयकत्वेन विहतेच्छत्वादिबुद्धेरीश्वरभेदोपलम्भत्वमिति भावः । समाधत्ते-**ईश्वरप्रतीताविति** । प्रतीतेश्वराणामनीश्वरप्रतीतिरीश्वरभेदं विषयीकरोति । तत्र चायमेव सामर्थ्याभावः भेदत्वेन प्रतीयते । स च विहतेच्छत्वादिरेव । भावान्तरस्यैव

धर्मस्य ईश्वरव्यतिरेकात्मनोल्लिख्यमानत्वात् । मा भूद्वा स्वात्मन्यनीश्वरशब्दः; ईश्वरव्यतिरेकरूपधर्माणां स्वरूपतस्तावत् प्रतीतिरपरिहार्या ॥ कार्यविशेषेषु ईश्वरोऽहमित्यभिमन्यन्त एव सर्वे पुरुषाः; कर्मण्यैश्वर्यबोधोऽधिकार इत्युच्यत इति चेन्न; क्षेत्रज्ञानामपि तावन्मात्रेश्वरत्वप्रतिपादने अस्माकमिष्टापातात् ॥ एतावानेवेश्वरशब्दार्थो लोके व्युत्पत्तिसिद्ध इति चेन्न; ईश्वरत्वस्यात्यन्तनिम्नोन्नततारतम्यवत्तयोपलम्भात् ॥ ततः किमिति चेत्; इयदेवेश्वरत्वमिति

अभावत्वात् । तत्समानविषयकत्वात् सामर्थ्याभावविषयकबुद्धिरपि विहतेच्छत्वात्मकेश्वरभेदविषयेत्यर्थः ।

सामर्थ्याभावविषयकबुद्धिः यतः ईश्वरज्ञानवत्पुरुषनिष्ठानीश्वरत्वविषयकबुद्धिसमानविषया तत एव प्रतिहतेच्छत्वादिबुद्धेर्भेदोपलम्भत्वसिद्धेः अस्वरसात् अशक्येषु अनीश्वरोऽहमिति बुद्धिमनभ्युपगम्य पक्षान्तरमाह - **मा भूद्वेति** । स्वस्मिन् अनीश्वरशब्दो मा भूत् । अथापि ईश्वरावृत्तिधर्माणां प्रतीतिस्तु अपरिहार्या इत्यर्थः ।

द्वेधा विकल्पिते आद्यकल्पे अलौकिकेश्वरानभ्युपगमेन प्रत्यक्षादेव जीवेश्वरैक्यसिद्धिरिति द्वितीयं कल्पं शङ्कते - **कार्यविशेषेष्विति** । केषुचित् कार्येषु अहमीश्वरः (स्वतन्त्रः) इति अभिमन्यन्त एव सर्वे पुरुषाः । तथा कर्मणि स्वातन्त्र्यबोधः अधिकार इति मीमांसकाः वदन्ति । अत ईश्वरत्वबुद्धिः सर्वेषामस्तीति शङ्का । निरतिशयैश्वर्यवद्भेद एव जीवानामस्माकं सिषाधयिषितः । सातिशयैश्वर्यवत्त्वं तु जीवानामस्मदिष्टमेवेति समाधानम् ।

ननु जीवेष्वदृष्टं सर्वविषयकमैश्वर्यमसंभावितम् । अतः सर्वविषयकैश्वर्यवद्भेदसाधनं प्रतियोग्यप्रसिद्ध्या अशक्यम् । यत्तु लोकदृष्टमैश्वर्यं तदाश्रयात् भेदस्तु बाधित इति कथमीश्वरभेदसाधनमिति शङ्कते - **एतावानिति** । लोक एव ईश्वरत्वोत्कर्षापकर्षोपलम्भात् लोकोत्तरं सर्वविषयकमैश्वर्यं संभाव्यत इति समाधत्ते - **ईश्वरत्वस्येति** । ननु सार्वभौमादि निष्ठा लोकसिद्धैश्वर्यकाष्ठैव निरतिशयैश्वर्यम् । सर्वविषयकेश्वरत्वे प्रमाणाभावात् ।

परिच्छेदासिद्धिः ॥ तथापि लोकसिद्धोत्कर्षकाष्ठामात्रे पर्यवसानमस्त्विति चेन्न; लोकायतवादप्रसङ्गात् । सर्वव्यक्तिसाधारणाकारस्यैव वाक्प्रवृतिनिमित्तत्वेन लोके प्रसिद्धेः । साधारणाकारेऽपीश्वरशब्देन प्रतिपिपादयिषिते तद्विरुद्धदुःखादिधर्मवत्तामात्रस्य प्रतिक्षेपायोगात् ॥ सर्वविषयमीश्वरत्वमनुपलब्धमिति चेत्-सत्यम्; तत एव हि शास्त्रावतारः ॥ अनुपलम्भादेव बाधे शास्त्रमपि तत्प्रतिपादनासमर्थमिति चेन्न; अनुपलम्भमात्रेण बाधेऽतिप्रसङ्गात् । योग्यानुपलम्भस्यासिद्धेः । सिध्यतश्च

तादृशैश्वर्यवदभेदश्च प्रत्यक्षसिद्ध एवेत्याशयेन शङ्कते - **तथापीति** । समाधत्ते-**लोकायतेति**। चार्वाकमतप्रवेशप्रसङ्गादित्यर्थः । ते हि लोकसिद्धमेव राजादिकमीश्वरमाचक्षते । एवं च शास्त्रात् सर्वविषयकेश्वरसिद्धेः तद्भेदः जीवेषु संभवतीति भावः । **सर्वव्यक्तीति** । लोकसिद्धिराजादिगतमीश्वरत्वं हि परिच्छिन्नं किंचिज्जनपदादिनिरूपितम् । तदेव चेश्वरत्वं सर्वजीवसंभावितं लोके ईश्वरशब्दप्रवृत्तिनिमित्ततया प्रसिद्धम् । तादृशे साधारणाकारे ईश्वरशब्देन प्रतिपादयितुमिष्टे ईश्वर इति बुद्धिमात्रात् ईश्वर इति शब्दमात्राच्च जीवेषु निरङ्कुशेश्वरभेदः निरङ्कुशेश्वरत्वविरुद्धदुःखादिधर्मवत्त्वरूपः न प्रतिक्षेप्तुं शक्य इति भावः । दुःखादिकं हि सर्वेश्वरत्वविरुद्धो धर्मः, स च प्रत्यक्षसिद्धः न प्रतिक्षेप्य इति यावत् । एवं च शास्त्रसिद्धसर्वेश्वरभेदः जीवे सिद्ध इति तादृशेश्वरैक्यं जीवस्य न संभवति । सातिशयेश्वरत्वावच्छिन्नभेदस्तु बाधित इति सिद्धम् ।

गूढाभिसन्धिः शङ्कते- **सर्वविषयमिति** । सर्वव्यक्तिनिरूपितमीश्वरत्वं नैव दृश्यते । अतोऽनुपलम्भात् सर्वेश्वरत्वमेव नास्तीति तदवच्छिन्नभेदः जीवे कथं स्यात् इति भावः । अनुपलम्भेन बाधान्न शास्त्रेणेश्वरसिद्धिः इत्यभिसन्धिः । गूढाभिसन्धिरेवोत्तरमाह - **सत्यमिति** । प्रमाणान्तरेणानुपलब्धस्यावबोधनार्थं हि शास्त्रावतारः । तथा च शास्त्रेण सर्वेश्वरत्ववानवगम्यत इति नास्त्यनुपलम्भ इति भावः । शङ्किता स्वाभिसन्धिमुद्घाटयति - **अनुपलम्भादेवेति** । अनुपलब्ध्या असत्तयावगतमर्थं कथं शास्त्रं बोधयेदिति भावः । समाधाता स्वाभिसन्धिमुद्घाटयति - **अनुपलम्भमात्रेणेति** । न केवलमनुपलब्धिः अभावे

तस्य स्वस्मिन्नीश्वरत्वमात्रप्रतिक्षेपसामर्थ्यात् । ततश्च नाहमीश्वर इत्यनुपलम्भात् सिध्यति । न पुनरीश्वरो नास्तीति । तदेवं कर्मवश्यानां प्रतिहतिभूयिष्ठसङ्कल्पानाम् आध्यात्मिकादिदुःखसन्ततिसन्तप्तानां स्वदुःखमूलोन्मूलनाय लौकिकमलौकिकं वा हेतुमन्विच्छतामस्मदादीनामनीश्वरत्वे प्रत्येकं प्रत्यक्षतः परस्परमनुमानतश्च सिद्धे, न काचिदप्युपपत्तिः जीवेश्वरत्वं (जीवे ईश्वरत्वं ?) साधयितुमीष्टे ।

प्रमाणम्; अपि तु योग्यानुपलब्धिः । सर्वेश्वरस्य सतोपि प्रत्यक्षादियोग्यताविरहात् अनुपलब्धिः, न त्वसत्त्वात् । अनुपलम्भमात्रं यदि अभावग्राहकं स्यात् दूरस्थितस्यानुपलम्भात् अभावः स्यात् । ततश्च योग्यानुपलब्धिरूपबाधकविरहात् शास्त्रं सर्वविषयकेश्वरत्ववन्तं बोधयितुं शक्नोति । ननु तथापि नाहमीश्वर इति प्रत्यक्षं कथं भवेत्। अभावप्रत्यक्षे प्रतियोगियोग्यतायास्तन्त्रत्वादित्यत्राह- **सिध्यतश्चेति** । अत्यन्ताभावप्रत्यक्ष एव प्रतियोगियोग्यता कारणम्, अन्योन्याभावप्रत्यक्षे तु अधिकरणयोग्यतैव तन्त्रम् । ततश्च योग्येऽधिकरणे स्वस्मिन् जीवे नाहमीश्वर इति ईश्वरभेदप्रत्यक्षं भवितुमर्हति । तस्य च प्रत्यक्षस्य स्वस्मिन्नीश्वरत्वप्रतिक्षेपे सामर्थ्यमस्तीति न जीवेश्वरैक्यमिति भावः । तदाह **ततश्चेति** । नाहमीश्वर इति अन्योन्याभावप्रत्यक्षं सिध्यति । ईश्वरो नास्तीति अत्यन्ताभावप्रत्यक्षं तु न सिध्यतीत्यर्थः ।

द्वितीयकल्पनिरासः

एतावता जीवस्यानीश्वरत्वं प्रत्यक्षादुपलभ्यते इत्युपपादनेन प्रथमकल्पं निरस्य अथ उपपत्तिसामर्थ्यात् जीवस्यानीश्वरत्वमुपलभ्यत इत्युपपादनपूर्वकं द्वितीयकल्पं निरस्यति **तदेवमित्यादिना निरस्त** इत्यन्तेन । **कर्मवश्यानामित्यादिना** ईश्वरभेदरूपा अपहतपाप्मत्वादि-प्रतिपक्षा धर्मा विवक्षिताः । **प्रतिहतीत्यादिना** सत्यसंकल्पत्वप्रतिपक्षधर्मः दुःखेत्यादिना अविजिघत्सादिप्रतिपक्षधर्माः । **आध्यात्मिकादीत्यत्रैव** जरामृत्यू अन्तर्गतौ । **लौकिकम्**=औषधान्नपानादिकम् । **अलौकिकम्**=यज्ञादिकम् । **अनुमानतः**=अहं नेश्वरः ईश्वरत्वविरुद्धधर्मवत्त्वात् इत्यनुमानात् । **उपपत्तिः** अनुमानं तर्को वा । **स्वशरीरवत्** इति ।

एतेन द्वितीयोऽपि विकल्पो निरस्तः, स्वशरीरवत् परशरीरेऽपि जीवानामीश्वरव्यतिरेकस्य दुःखादिसम्भेदसिद्धत्वात्। तस्य च तेषां प्रत्यक्षत्वात्। तथा च सति जीवः ईश्वराद्भिन्नः (दभिन्नः ?) चेतनत्वादित्यादौ बाधप्रतिज्ञाविरोधादयो द्रष्टव्याः ॥ अथ विरुद्धधर्ममिथ्यात्वेन जीवेश्वरयोः स्वरूपैक्यमविरुद्धमित्युच्यते–तथापि जीवेश्वरयोः कार्यकारणोपाधिरूपेणाध्यस्तत्वाभ्युपगमात् रज्ज्वारोपितसर्पभूदलनादेः, ब्रह्माध्यस्ततेजस्तिमिरादिविरुद्धवर्गस्य च तादात्म्यविरोधो न स्यात् । न चैतत् युक्तमभ्युपेतुम् ।

स्वशरीरे विद्यमानस्य स्वस्य यथा दुःखादिसंबन्धात् ईश्वरभेदः सिध्यति, तथा परशरीरे विद्यमानानां जीवानामपि ईश्वरभेदः अनुमानात् सिध्यति । परशरीरस्था जीवाः ईश्वरात् भिन्नाः ईश्वरावृत्तिधर्मवत्त्वात् अहमिवेत्यनुमानमत्र विवक्षितम् । **दुःखादिसंभेदः** = दुःखादिसंबन्धः। **तेषां** = परेषाम् । अनेन अनुमानेन फलितं दूषणं दर्शयति - **तथा च सतीति** । प्रत्यक्षेण अनुमानेन च जीवस्येश्वरभिन्नत्वे सति, जीवाः ईश्वरादभिन्ना चेतनत्वादीश्वरवदित्यनुमाने बाधः प्रतिज्ञाविरोध इत्यादयो दोषाः द्रष्टव्या इत्यर्थः । प्रतिज्ञाविरोधः कथमिति चेत् - श्रूयताम् । जीवेश्वरयोः विरुद्धधर्मवत्त्वस्य पूर्वमुपपादितत्वात् विरुद्धधर्मवतोरैक्यासंभवात् जीवः ईश्वराभिन्न इति प्रतिज्ञायां पक्षसाध्यवाचकपदयोः परस्परमनन्वितार्थकत्वरूपो विरोध इति । मिथ्याभूतभेदविषयकत्वात् प्रत्यक्षानुमाने न बाधके इत्याशयेन शङ्कते - **अथेति** । विरुद्धधर्मयोर्मिथ्यात्वात् तत्प्रयुक्तभेदस्यापि मिथ्यात्वमित्याशयः । समाधत्ते - **जीवेश्वरयोरिति** ।

"कार्योपाधिरयं जीवः कारणोपाधिरीश्वरः" इति भवद्भिरुक्ततया जीवेश्वरयोरुभयोरपि अन्तःकरणोपाधिकतया अविद्योपाधिकतया चाध्यस्तत्वाभ्युपगमात् अध्यस्तयोः रज्जावारोपितयोः सर्पभूदलनयोः ब्रह्माध्यस्ततेजस्तिमिराद्योश्च विरुद्धयोः यथा तादात्म्यं न संभवति, तथा तादात्म्यं न संभवतीति भावः । **तादात्म्यविरोधो न स्यात्**, इति । भवद्भिरङ्गीकृतः तादात्म्यासंभवो न स्यात्, अपि तु तादात्म्यं स्यादिति भावः । धर्मिणः

व्यावहारिकत्वेऽपि यथालोकं व्यवस्थाप्यत्वात् । आरोपितोभयबाधदशायामप्यधिष्ठानमात्रपरिशेष एव; न पुनरारोपितयोस्तादात्म्यम्, नाप्यधिष्ठानारोपितयोः । अन्यथा सर्वशून्यत्वे सर्वसत्यत्वे वा पर्यवसानात् ॥ तैमिरिकस्य चन्द्रे चन्द्रान्तरवत् स्वस्मिन्नेव स्वाध्यासादविरोध इति चेन्न ।

सत्यत्व एव विरुद्धधर्ममिथ्यात्वात् धर्म्यैक्यसिद्धिः, न तु धर्मिणो मिथ्यात्वेऽपि । अन्यथा रज्ज्वारोपितसर्पभूदलनयोः ब्रह्माध्यस्ततेजस्तिमिरयोश्च सर्पत्वभूदलनत्वतेजस्त्वतिमिरत्वादिधर्माणां मिथ्यात्वात् ऐक्यप्रसङ्ग इत्याशयः । न **चैतदिति** । ऐक्यमित्यर्थः ।

ननु जीवेश्वरयोः पारमार्थिकत्वाभावात् उपपत्तिनिरपेक्षत्वात् विरुद्धधर्मवत्त्वेऽप्यैक्यसिद्धौ को दोष इत्यत आह - **व्यावहारिकत्वेऽपीति** । व्यावहारिकत्वेऽपि यथालोकं व्यवस्था अङ्गीकरणीया । तथा च भेदस्य व्यावहारिकत्वात् न व्यावहारिकैक्यसंभवः । धर्मिमिथ्यात्वात् न तात्त्विकैक्यसंभवः । तथैव रज्ज्वारोपितसर्पभूदलनादिषु व्यवस्थादर्शनादिति भावः । ननु व्यवहारदशायां यथालोकं व्यवस्था अस्तु । तथापि भेदनिवृत्त्यनन्तरमैक्यं भविष्यतीत्यत्राह **आरोपितेति** । रज्जावारोपितयोः सर्पभूदलनयोरुभयोः बाधदशायामपि अधिष्ठानमात्रं परिशिष्यते, न पुनरारोपितयोः तादात्म्यम्, नापि अधिष्ठानारोपितयोस्तादात्म्यम् । **अन्यथा** = आरोपितयोः अधिष्ठानारोपितयोर्वा तादात्म्याङ्गीकारे सर्वशून्यत्वे सर्वसत्यत्वे वा पर्यवसानं स्यादिति भावः । ननु सर्पभूदलनवन्नात्र जीवेश्वरौ द्वावप्यध्यस्तौ, किं तु ईश्वरे जीवोऽध्यस्त इत्यत्राह - **नापीति** । तथापि अधिष्ठानरज्जुतदध्यस्तसर्पयोरिव अधिष्ठानेश्वरतदध्यस्तजीवयोः तादात्म्यं न संभवतीत्यर्थः । **सर्वशून्यत्व** इति । आरोपितवत् अधिष्ठानस्य मिथ्यात्वेन सर्वशून्यत्वं अधिष्ठानवत् आरोपितस्य सत्यत्वेन सर्वसत्यत्वं वा पर्यवस्येत् इति भावः । ननु यथा तिमिरदोषयुक्तस्य पुंसः द्विचन्द्रभ्रमे चन्द्रान्तराध्यास; तथा स्वस्मिन् ईश्वरे स्वस्याध्यासात् न सर्वशून्यत्वे न वा सर्वसत्यत्वे पर्यवसानमिति शङ्कते - **चन्द्र** इति । दृष्टान्ते न चन्द्रे चन्द्रान्तराध्यासः, उपरिदेशे एव चन्द्रान्तराध्यासः, अथवा चन्द्रे द्वित्वाध्यासः । अतः

उपरिदेशस्य तत्र चन्द्रान्तराध्यासाधिष्ठानत्वम्, चन्द्रस्य वा द्वित्वाध्यासाधिष्ठानत्वमिति न क्वचिदपि स्वस्मिन्नेव स्वाध्यासः । स्वमहिमप्रतिष्ठितत्वाद्युक्तेरपि निराधारत्वादिमात्रे तात्पर्यम् ॥ तथाऽपि चन्द्रद्वित्ववत् स्वरूपभेदाध्यासः; तन्निवृत्तौ स्वरूपैक्यमविरुद्धमिति चेत्; हन्तैवमचेतनवर्गेऽपि किं न कल्प्यते ॥ तन्मिथ्यात्वप्रतिपादनबलादिति चेन्न; 'नेह नानास्ति' इत्यादिना ज्ञातृज्ञेयज्ञानरूपसमस्तनिषेधाभ्युपगमात्, 'यत्र त्वस्य सर्वमात्मैवाभूत्' इति वाक्यशेषेण त्वदनभिमतस्यापि सर्वस्वरूपैक्यस्य स्वरसप्रतीतेः ॥

क्वचिदपि न स्वस्मिन् स्वाध्यास इति समाधत्ते - **उपरिदेशस्येति** । ननु ''स्वे महिम्नि प्रतिष्ठित:'' ''पतिं विश्वस्यात्मेश्वरम्'' इति श्रुतिवशात् यथा ईश्वरस्य स्वाश्रयत्वं स्वेश्वरत्वं च तथा स्वाधिष्ठानत्वमपि न विरुध्यत इत्याशङ्क्य दृष्टान्तासिद्ध्या दूषयति - **स्वमहिमेति**। स्वमहिमप्रतिष्ठितत्वं स्वाश्रयकत्वम् । आदिशब्देन स्वेश्वरत्वपरिग्रह: । तथा च स्वाधारत्वस्वेश्वरत्ववचनस्यापि आधारान्तरराहित्येश्वरान्तरराहित्यमात्रे तात्पर्यम्, न तु स्वाश्रयत्वस्वेश्वरत्वयोरिति भाव; । ननु चन्द्रे द्वित्वाध्यासवत् आत्मस्वरूपे जीवेश्वरभेदाध्यास:, तन्निवृत्तौ स्वरूपैक्यं न विरुद्धमित्याशङ्क्य हन्तैवमचेतनवर्गेऽपि भेदाध्यास:, तन्निवृत्तौ स्वरूपैक्यमिति कुतो न कल्प्यत इति प्रतिपृच्छति - **तथापीति** । **तन्निवृत्ति:** = तस्य नित्यनिवृत्ति:, तेन मिथ्यात्वं विवक्षितम् ।

तन्मिथ्यात्वप्रतिपादनादित्यादि । अचेतनवर्गस्य मिथ्यात्वप्रतिपादनात् तत्र ईश्वरस्वरूपैक्यं न संभवतीति चेत् ''नेह नानास्ति किंचन'' इत्यादिना चेतनवर्गस्यापि मिथ्यात्व प्रतिपादनात् तत्रापि ईश्वरस्वरूपैक्यं न भवति इति भाव: । ननु अचेतनवर्गे ईश्वरत्वविरुद्धधर्माध्यासेऽपि ईश्वरैक्ये प्रमाणाभावान्नेश्वरैक्यमचेतनवर्गस्येति शङ्कायामाह - **यत्र त्वस्येति** । ''नेह नानास्ति किंचन'' इत्यनन्तरं ''यत्र त्वस्य सर्वमात्मैवाभूत्'' इति वाक्यशेषे त्वदनभिमतस्यापि सर्वस्वरूपैक्यस्य स्वरसत: प्रतीयमानत्वात् अचेतनवर्गस्यापीश्वरैक्यं प्रसजतीति भाव: । ननु अचेतनवर्गे प्रत्यक्षत: ईश्वरत्वविरोधो दृश्यत

प्रत्यक्षादिसिद्धविरोधानुसारेण तत्र तादात्म्यं परित्यजाम इति चेत्; तर्हि सैव दृष्टिर्जीवेश्वरयोरपि किं न निक्षिप्यते ? अन्यथा कालात्ययापदेशस्य विरोधस्य च निर्मूलत्वे प्रतिवाद्यपि यत्किमपि जल्पन्न निगृह्येत।

नापि तृतीयः। शास्त्रमपि हि सहस्रशो जीवेश्वरयोर्भेदमेव कण्ठोक्त्या क्वचित् प्रतिपादयति; क्वचिद्विरोधिधर्मम्; क्वचित्तु भेदाक्षेपकं सम्बन्धविशेषम्। यथा– 'क्रियागुणैरात्मगुणैश्च तेषां संयोगहेतुरपरोऽपि दृष्टः। 'जुष्टं यदा पश्यत्यन्यमीशम्', 'पृथगात्मानं प्रेरितारं च मत्वा', 'द्वा सुपर्णा सयुजा सखाया समानं वृक्षं

इति अचेतनवर्गे ईश्वरतादात्म्यं परित्यजाम इति चेत् तर्हि चेतनवर्गेऽपि ईश्वरत्वविरोधो दृश्यत इति तत्रापि ईश्वरतादात्म्यं त्यज्यतामित्याह- **प्रत्यक्षादिसिद्धेति**। **अन्यथेति**। बाधविरोधयोः दोषत्वाभावे बाधितं विरुद्धं च यत्किंचित् जल्पन् प्रतिवादी कथं निगृह्येतेति भावः।

तृतीयकल्पनिरासः

अथ जीवस्येश्वरत्वं शास्त्रवैभवादङ्गीक्रियत इति तृतीयकल्पं निराकरोति - **नापि तृतीय** इति। श्रुतिस्मृत्यादिरूपं शास्त्रं सहस्रशः जीवेश्वरयोर्भेदमेव स्पष्टं बोधयतीति शास्त्रवैभवादभेदस्तयोर्न सिध्यतीत्यर्थः। **सहस्रशः** = बहुभिः प्रकारैः। तान् प्रकारान् प्रदर्शयन् जीवेश्वरभेदप्रतिपादकश्रुतिस्मृतिवचनानि निदर्शयति-**क्वचिदित्यादिना**। विरोधिधर्मं = परस्परविरुद्धधर्मम्। **भेदाक्षेपकं** - भेदव्याप्यम्। **क्रियागुणैरिति**। स्थूलानि सूक्ष्माणि बहूनि चैव रूपाणि देही स्वगुणैर्वृणोति। क्रियागुणैरात्मगुणैश्च तेषां संयोगहेतुरपरोऽपि दृष्टः॥ इति पूर्णःश्लोकः। मशकमातङ्गादिस्थूलसूक्ष्मशरीराणि बहुविधान्यपि तत्तत्फलाभिसन्ध्यादिलक्षणरागादिरूपात्मगुणप्रयुक्तयागादिरूपक्रियालक्षणैर्गुणैर्हेतुभिर्भजते। तादृशात्मगुणयोगे च पूर्व पूर्वं कर्मैव हेतुर्दृष्ट इति उपनिषद्भाष्यम्। **जुष्टं यदेति**। यदा अयं जीवः शरीरे निमग्नात् स्वस्मात् धारकत्वनियन्तृत्वशोषित्वादिना विलक्षणं स्वकर्मभिः प्रीतं परमात्मानं अखिलजगन्नियमनरूपमस्य महिमानं च पश्यति तदा वीतशोको भवतीत्यर्थः। **पृथगात्मानमिति** प्रेरितारं परमात्मानं तेन भ्राम्यमाणं तच्छरीरभूतं स्वात्मानं च पृथक्त्वेन

परिषस्वजाते। तयोरन्यः पिप्पलं स्वाद्वत्ति अनश्नन्नन्यो अभिचाकशीति', 'तस्माद्वा एतस्माद्विज्ञानमयात् अन्योऽन्तर आत्माऽऽनन्दमयः', अस्मान्मायी सृजते विश्वमेतत् तस्मिंश्चान्यो मायया सन्निरुद्धः', 'उत्तमः पुरुषस्त्वन्यः परमात्मेत्युदाहृतः', 'अन्यश्च राजन् स परस्तथान्यः पञ्चविंशकः', इत्यादिभिर्जीवपरयोर्भेदः स्वशब्देनोच्यते । तथा, 'यस्सर्वज्ञस्सर्ववित्', 'पराऽस्य शक्तिर्विविधैव श्रूयते स्वाभाविकी ज्ञानबलक्रिया च', 'स कारणं करणाधिपाधिपः', 'तमीश्वराणां परमं महेश्वरं तं दैवतानां परमं च दैवतम् । पतिं पतीनां परमम्', 'दासभूताः स्वतः सर्वे ह्यात्मानः परमात्मनः', 'आत्मदास्यं हरेः स्वाम्यं स्वभावं च सदा स्मर' इत्यादिभिर्विरोधिनो धर्माः । 'एष त आत्माऽन्तर्हृदये', 'एवमयमन्तरात्मन्', 'पुरुषो मनोमयः, 'य आत्मनि तिष्ठन्...यस्यात्मा शरीरम्' इत्यादिभिः, 'पतिं पतीनाम्' इत्यादिभिश्च पूर्वोक्तैर्भेदाऽऽ क्षेपकः सम्बन्धः । मुक्तिदशायामपि विशेषतो भेदः श्रूयते-'सोऽश्नुते सर्वान् कामान् सह ब्रह्मणा विपश्चिता', 'तदा विद्वान्

ज्ञात्वा तज्ज्ञानप्रीतेन परमात्मना प्रीत्यानिषयीकृत: सन् मुक्तिं प्राप्नोतीत्यर्थ: । **द्वा सुपर्णेति** । परस्पराविनाभूतौ गमनसाधनत्वेन पर्णशब्दितपक्षसदृश-ज्ञानादिगुणवन्तौ एकं वृक्षवत् छेदनार्हं शरीरं समाश्रितौ । तयार्मध्ये एको जीव: परिपक्वं अश्वत्थफलसदृशं कर्मफलमनुभवति । इतरस्तु परमात्मा अनश्नन्नेव कर्मफलमननुभवन्नेव प्रकाशते । **तस्माद्वेति** । विज्ञानमयात् जीवात् अन्य: अन्तर आत्मा आनन्दमय: । **अस्मान्मायीति** । प्रकृतिशरीरक: परमात्मा प्रकृते: विश्वमेतत् सृजतीत्यर्थ: । अन्यो जीव: तदाश्रितमायामोहित: । **पञ्चविंशक:**=जीव: । **करणाधिपाधिप:** = इन्द्रियप्रेरकजीवस्य प्रेरक: । **विरोधिनो धर्मा:** = दासत्वस्वामित्वादय: । **भेदाक्षेपक: संबन्ध:** भेदाविनाभूत: शरीरात्मभावादिरूपसबन्ध: ।

ननु भेदश्रुति: सर्वापि व्यावहारिकभेदपरा । मुक्तिदशायां जीवेश्वरैक्यमेव शास्त्रतात्पर्यविषय इति शङ्कां वारयितुं मुक्तिदशायामपि जीवेश्वरभेदप्रतिपादकवचनानि प्रदर्शयति - **मुक्तिदशायामपीति** । **सोऽश्नुत इति** । स मुक्त: ब्रह्मणा सह ब्रह्मगुणान्

पुण्यपापे विधूय निरञ्जनः परमं साम्यमुपैति', 'इदं ज्ञानमु(म)पाश्रित्य मम साधर्म्यमागताः' इत्यादिभिः। एवञ्च प्रत्यक्षाद्यविरुद्धतत्त्वस्थितौ श्रुतिशतसिद्धायां सर्वस्य जीवेश्वरसामानाधिकरण्यमैक्यनिर्देशश्च स्वस्वामिभावसंबन्धादिभिरुपचारतोऽपि निर्वोढव्यम्। तथा च श्रुतिशैली, 'स राष्ट्रं नाभवत्', 'स राष्ट्रमभवत्' 'स इदं भविष्यति' इत्यादि। श्रुतवेदान्तस्य तु शब्दशक्तिनिष्कर्षे सति अपर्यवसानात्

सर्वाननुभवति इति भोक्तृसाहित्यपरत्वेन व्याख्यानम्। स मुक्तः ब्रह्म गुणांश्चानुभवति इति भोग्यसाहित्यपरत्वेन व्याख्यानम्। आद्ये पुत्रेण सह ओदनं भुङ्क्ते इत्युदाहरणम्। द्वितीये पयसा सह ओदनं भुङ्क्ते इत्युदाहरणम्। आद्ये जीवब्रह्मणोः द्वयोरनुभवितृत्वम्। तत्र भोक्तृसहित्यपरत्वे साहित्यस्य भेदव्याप्यत्वात् जीवब्रह्मणो; भेदः सिद्धः। भोग्यसाहित्यपरत्वे भोग्यभोक्तृभावेन तयोः भेदः सिद्धः। **तदा विद्वानिति**। तदा मुक्तिकाले विद्वान् नामरूपे विहाय निरञ्जनः लेपरहितः सन् परमात्मना परमसाम्यमुपैतीत्यर्थः।

इदं ज्ञानमुपाश्रित्येति। इदं गीतावचनम्।

इदं ज्ञानमुपाश्रित्य मम साधर्म्यमागताः।
सर्गेऽपि नोपजायन्ते प्रलये न व्यथन्ति च॥

ननु जीवश्वरैक्यश्रुतीनां का गतिरित्यत्राह- **एवं चेति**। तत्त्वमसीति सामानधिकरण्यम्। एकमेवाद्वितीयमिति ऐक्यनिर्देशः। स्वस्वामिभावादिसंबन्धं पुरस्कृत्य गौण्या वृत्त्या सामानाधिकरण्यं श्रुतिशैलीसिद्धमित्याह - **स राष्ट्रमिति**। स राष्ट्रस्वामी इति वा राष्ट्रं तत्स्वामिकमिति वा अर्थः। **उपचारवृत्तेः** = गौणीवृत्तेरस्वरसत्वेऽपि श्रुतिशैल्यनुसारित्वादियमेव स्वरसेति भावः। **अपर्यवसानादिति**। ब्रह्मपर्यन्तबोधकत्वाभावे शब्दशक्तेः पर्यवसानाभावात् सामानाधिकरण्यस्य ब्रह्मपर्यन्तबोधकत्वम्, समस्तचिदचिद्विशिष्टैक्यविवक्षया ऐक्यनिर्देश इत्यर्थः। एवमनङ्गीकारे चेतनवत् अचेतनेऽपि "सर्वं खल्विदं ब्रह्म" इदं सर्वं यदयमात्मा" इत्यादौ ब्रह्मैक्यव्यपदेशात् चेतनतादात्म्यवद-

विशिष्टैक्यादिविवक्षया च तयोरुपपत्तिः । एवमनभ्युपगमे चेतनवत् अचेतनेऽप्यैक्यव्यपदेशबाहुल्यात् अचेतनतादात्म्यमपीश्वरस्य दुर्वारम्; विरुद्धधर्माध्यासादेरनादरमात्रेण वाङ्मात्रेण वा परिहर्तुमशक्यत्वात् ॥

अचेतनस्यापरमार्थत्वात् बाधार्थं तत्र सामानाधिकरण्यमिति चेन्न; जीवेऽपि प्रसङ्गात् ॥

उपास्तिप्राप्तिदशयोरप्यैक्यव्यपदेशाज्जीवैक्यं परमार्थभूतमिति चेन्न; आरोपेणाप्युपासनस्य सगुणब्रह्मोपासनादिषु भवद्भिरेव स्वीकारात् । न

चेतनतादात्म्यमपीश्वरस्य स्यात् । तथा सति एकत्रैव विरुद्धधर्माध्यासः स्यात् । अनादरमात्रेण वाङ्मात्रेण स परिहर्तुमशक्यः । **अनादरः** सत्यत्वानङ्गीकारः । **वाङ्मात्रं** = विरोध एव धर्माणां नास्तीति प्रत्यक्षविरुद्धा उक्तिः । ननु अचेतनस्य अपरमार्थत्वात् तस्य परमार्थचेतनेश्वरतादात्म्यं न संभवतीति अचेतनांशे बाधार्थं सामानाधिकरण्यमित्याशङ्क्य जीवस्यापि कल्पितस्य अपरमार्थत्वात् तस्यापि परमार्थेश्वरतादात्म्यासंभवात् तदंशेऽपि बाधायामेव सामानाधिकरण्यं स्यादिति समाधत्ते-**अचेतनस्येति** । शङ्कते - **उपास्तीति** । जडस्योपास्यत्वेन वा प्राप्यत्वेन वा निर्देशो नास्ति । जीवस्य तु निर्देशोऽस्ति । अतो जीवस्येश्वरैक्यमिति भावः । समाधत्ते- **आरोपेणापीति** । सगुणब्रह्मोपासनादौ ब्रह्मणः सगुणत्वमारोप्योपासनमिति भवद्भिरेवोक्तम् । तथा चोपास्यतया निर्देशमात्रेण पारमार्थिकत्वस्वीकारे सगुणत्वस्यापि पारमार्थिकत्वं स्यात् इति भावः ।

किं च अहंग्रहोपासनेन जीवेश्वरैक्यपारमार्थ्यं न कस्यापि मते वक्तुं शक्यम् । भवत्पक्षेऽन्तःकरणैक्यस्य ब्रह्मणि प्रसङ्गात् । मीमांसकमते केवलामहमर्थस्यैव तदुपासनविषयत्वात् ईश्वरप्रसक्त्यभावात् । सांख्यवैशेषिकादिपक्षे दृष्टिविधित्वात् । अस्मत्पक्षेऽहमर्थभूतचेतनशरीरकपरमात्मोपासने तुल्यवित्तिवेद्यतया परमात्मशरीरत्वविशिष्टाहमर्थचेतनोपासनेऽपि विशेषणविशेष्यभावेन भेदस्यैव सिद्धेरित्याह - **न चाहंग्रहेत्यादिना** । मीमांसकपक्षे आह - **केवलेति तदीश्वरत्वेति** । अहमर्थस्येश्वरत्व-

चाहंग्रहोपासनमात्राज्जीवेश्वरैक्यसिद्धिः भवत्पक्षेऽहमर्थभूतान्तःकरणेन ब्रह्मण ऐक्यप्रसङ्गात्। केवलाहमर्थोपासनदशायां तदीश्वरत्वप्रसङ्गस्याभावात्। ईश्वरदृष्टिविधौ तु जीवेश्वरभेदस्यैव पारमार्थिकत्वम्। यथाऽऽत्मनि गरुडदृष्टौ गरुडात्मनोर्भेदस्य। अन्यथा दृष्टिविधेः सत्योपासनविधेश्च वैषम्यासिद्धिप्रसङ्गात्। वामदेवेन्द्रादिवत् अहमर्थविशिष्टतदन्तर्यामिनिर्देशोऽपि विशेषणविशेष्यभावादिना भेदस्सिद्धः। एवमेव परमात्मशरीरत्वविशेषितप्रत्यगात्मोपासनेऽपि।

तदेवमचेतनेऽपि चेतनभ्रमवत् अनीश्वरेष्वपि जीवेष्वीश्वरभ्रमं परित्यज्य तद्वशीकरणहेतुभिस्तत्पारतन्त्र्यानुसन्धानादिभिरात्मानं बन्धान्मोचय, न पुनस्समस्तनिग्रहानुग्रहक्षमसत्यसङ्कल्पेश्वरतादात्म्यमोहमहापराधेन सर्वनिग्रहपात्रमात्मानमन्धे तमसि पातय। प्राप्तावैक्यव्यपदेशोऽपि भवत्पक्षे प्रपञ्चैक्यव्यपदेशवत् बाधेनापि किं नोपपद्यते॥ आत्मबाधे कथं मोक्षस्य

प्रसक्त्यभावादित्यर्थः। सांख्यादिपक्षे आह - **ईश्वरदृष्टिविधाविति**। अहमर्थे ईश्वरदृष्टावित्यर्थः। तद्भिन्ने तद्दृष्टिः दृष्टिविधिः। यथा आत्मनि गरुडदृष्टौ गरुडात्मनोः भेदः, तथाहमर्थे ईश्वरदृष्टिविधौ जीवेश्वरभेद एव सिध्यति इति भावः। स्वमतेनाह - **वामदेवेन्द्रादिवदिति**। “तद्धैतत् पश्यन् ऋषिर्वामदेवः प्रतिपेदे “अहं मनुरभवं सूर्यश्च” इति श्रुत्युक्तं वामदेवकर्तृकं अहंग्रहेण ब्रह्मोपासनम्। “मामुपास्स्व” इति श्रुत्युक्तमिन्द्रशरीरकब्रह्मोपासनम्। जीवेश्वरैक्योपासने महत्पापमित्याह - **तदेवमिति**।

इत्थम् उपास्यतया व्यपदेशमात्रेण जीवेश्वरैक्यं पारमार्थिकं न भवतीत्युपपादितम्। अथ प्राप्यतया निर्देशेनापि तत् पारमार्थिकं न भवतीत्याह-**प्राप्तावैक्यव्यपदेशोऽपीति**। जडप्रपञ्चेश्वरैक्यव्यपदेशस्य प्रपञ्चबाधार्थत्वं स्वीक्रियते तथा जीवश्वरैक्यव्यपदेशस्यापि जीवबाधार्थत्वमस्तु इत्यर्थः। जीवो ब्रह्मैव भवतीत्यस्य जीवो बाध्यते ब्रह्म शिष्यते इत्येवार्थोऽस्तु, तथा च नैक्यमिति भावः। ननु आत्मनः बाधे सति मोक्षस्य कथं पुरुषार्थत्वम्। पुरुषस्येष्यमाणं प्रयोजनं हि पुरुषार्थः। पुरुषस्याभावे मोक्षः कथं पुरुषार्थो भवेदिति शङ्कते - **आत्मबाध** इति। समाधत्ते - **धिङ्मूर्खेति**। पुरुषार्थप्रतिसंबन्धि-

पुरुषार्थत्वमिति चेत् - धिङ्मूर्ख ! अहमर्थबाधे मोक्षस्य पुरुषार्थतां वदन् किमीदृशोक्तौ जिह्रेषि ? । तत्त्वावेदकवाक्यप्रतिपन्नं जीवैक्यमिति चेत् - अचिदैक्यमपि हि तेनैव प्रतीयते। अन्यथा तत्र बाधार्थसामानाधिकरण्यस्वीकारोऽपि दुश्शकः; आरोपितैक्यमात्रेण समन्वयोपपत्तेः। औपचारिकोक्तेरपर्यनुयोज्यत्वात्। नदीसमुद्रघटाकाशमहाकाशादिदृष्टान्तेन मुक्तौ भेदनिवृत्तिवचनं च

भूताहमर्थबाधेऽपि पुरुषार्थतां वदतः तव तदप्रतिसंबन्धिभूतात्मबाधे पुरुषार्थतोक्तौ कुतो लज्जेत्यर्थः।

अयं भावः - इष्यमाणप्रतिसंबन्धितया निरुपाधिकेच्छाविषयत्वं पुरुषार्थ-प्रतिसंबन्धित्वम्। जातेष्टौ पित्रा क्रियमाणायां पुत्रस्य तेजस्वित्वादिफलं भवतीति श्रुतम्। तत्र पुत्रस्येष्यमाणतेजस्वित्वादिप्रतिसंबन्धितया इच्छाविषयत्वेऽपि न तन्निरुपाधिकम्। स्वसंबन्धोपधिकत्वादिति नासौ पुत्रः पुरुषार्थप्रतिसंबन्धी किं तु स्वयमेव। एतादृशं पुरुषार्थप्रतिसंबन्धित्वमहमर्थस्यैव। मम सुखं भूयात् मम पशुर्भूयात् इत्यादिरूपेणैव निरुपाधिकेच्छादर्शनात्। एवं च पुरुषार्थप्रतिसंबन्धिनः अहमर्थस्य मोक्षे नाशं वदतः भवतः तन्नाशे सत्यपि मोक्षस्य पुरुषार्थत्ववत् आत्मबाधेऽपि मोक्षस्य पुरुषार्थत्वं कुतो नेति।

हेत्वन्तरेण जीवेश्वरैक्यस्य पारमार्थिकत्वं शङ्कते- **तत्त्वावेदकेति**। समाधत्ते - **अचिदैक्यमपीति**। अचेतनब्रह्मैक्यमपि ''सर्वं खल्विदं ब्रह्म'' इत्यादितत्त्वावेदक-वाक्यप्रतिपन्नमिति तदपि परमार्थं भवतु इत्यर्थः। **अन्यथा**=वास्तवैक्यास्वीकारे आरोपितैक्यमात्रेण वाक्यार्थबोधोपपत्तेः बाधार्थसामानाधिकरण्यस्वीकारोऽप्यशक्यः। औपचारिकवचनस्य प्रश्नानर्हत्वात् इत्यर्थः।

ननु 'यथा नद्यः स्यन्दमानाः समुद्रे अस्तं गच्छन्ति नामरूपे विहाय। तथा विद्वान्नामरूपाद्विमुक्तः परात् परं पुरुषमुपैति दिव्यम्॥'' ''घटध्वंसे घटाकाशो न भिन्नो नभसो यथा'' इत्यादिवचनैः दृष्टान्तपूर्वकं मुक्तौ जीवैक्यान्वयस्य प्रतिपादनात् जीवेश्वरैक्यस्य पारमार्थ्यं सिध्यतीत्याशङ्कायामाह- **नदीसमुद्रेति**। उक्तवचनेषु भेदनिवृत्तिप्रतिपादनस्य जीवात्मस्वरूपभेदनिवृत्तौ न तात्पर्यम्। अपि तु

साम्यसहश्रुत्याद्यनुरोधेन कर्मोपाधिकनामरूपादिवैधर्म्यरूपभेदतन्निवृत्तिभ्यामपि चरितार्थम् । जीवेश्वरैक्यश्रुतीनां च निर्वाहक्रमम्, 'अवस्थितेरिति काशकृत्स्नः' इत्यसूत्रयत् । आह च मोक्षधर्मे, 'अन्यश्च राजन् स परस्तथाऽन्यः पञ्चविंशकः । तत्स्थत्वादनुपश्यन्ति ह्येक एवेति साधवः' इति । इममेवार्थमभिप्रेत्य, 'आत्मेति तूपगच्छन्ति ग्राहयन्ति च' इत्यहंग्रहोपासनमपि सूत्रितम् । न च

पुण्यपापरूपकर्महेतुकनामरूपादिविरुद्धधर्मरूपभेदनिवृत्तौ तात्पर्यम् । संसारदशायां जीवेषु देवमनुष्यादिभिन्नभिन्ननामतदनुगुणशरीरादिवैषम्यं भवति । मुक्तौ तु तादृशवैषम्यं न भवति। किं तु सर्वेषां साम्यम् इत्यर्थ: । अन्यथा ''परमं साम्यमुपैति'' ''सोऽश्नुते सर्वान् कामान् सह'' ''मम साधर्म्यमागता:'' इति भेदगर्भसाम्यसाहित्यप्रतिपादकश्रुत्यादिविरोध इति भाव: ।

अथ जीवेश्वरैक्यश्रुतीनां ''तत्त्वमसि'' इत्यादीनां निर्वाहप्रकारमाह - **जीवेश्वरेति** । जीववाचकशब्देन परमात्मनो व्यपदेश: जीवात्मनि अन्तर्यामितया स्थिते: इति सूत्रकारेण निर्वाह: कृत: ''अवस्थितेरिति काशकृत्स्न:'' इति सूत्रे । तथा च तत् ब्रह्म त्वं त्वदन्तर्यामि इत्यर्थ: । **अन्यश्च राजनिति** । परमात्मा अन्य:, पञ्चविंशको जीवश्चान्य: । एवमुभयो: स्वरूपभेदे सत्यपि जीवस्थत्वात् परमात्मन: जीव: परश्च एक एवेति वदन्ति साधव इत्यर्थ:। **अहंग्रहोपासनम्** = अहमिति बुद्ध्या ब्रह्मविषयकमुपासनमपि अहमर्थान्तर्यामि ब्रह्मेत्यभिप्रायकम् इत्यर्थ: । **"आत्मेति तूपगच्छन्ति'** इति सूत्रस्यायमर्थ: - तुशब्दोऽवधारणे। उपास्यं ब्रह्म उपासितुरात्मेत्येवोपास्यम् । उपासिता प्रत्यगात्मा स्वशरीरस्य स्वयं यथा आत्मा तथा स्वात्मनोऽपि परं ब्रह्म आत्मेति आत्मेत्येवोपासीतेत्यर्थ:। कुत:? एवं हि **उपगच्छन्ति** पूर्वे उपासितार: ''त्वं वा अहमस्मि भगवो देवते अहं वै त्वमसि'' इति । उपासितुरर्थान्तरभूतं ब्रह्म उपासितार: अहमिति कथमभ्युपच्छन्तीत्यत्राह - **ग्राहयन्ति चेति** । इममर्थमविरुद्धमुपासितॄन् ग्राहयन्ति शास्त्राणि'' य आत्मनि तिष्ठन् आत्मनोऽन्तरो ममात्मा न वेद यस्यात्मा शरीरम्'' इति । उक्तरीत्या ऐक्यश्रुतिनिर्वाहानङ्गीकारे

भेदविषयस्फुटानेकश्रुतिबाधो न्याय्यः । एकवाक्यप्रतिपाद्ये च क्वचित् चिदचितोरीश्वरतादात्म्ये वैरूप्यकल्पनप्रयासश्च ते निरर्थकः । भिन्नवाक्यप्रतिपन्नेऽपि सम्भवदैकरूप्यमपरित्याज्यम् । अस्मत्पक्षे तु भेदश्रुतिघटकश्रुतिप्रत्यक्षाद्यविरुद्धं सर्वत्र विभूतितद्वद्भावेनैकरूपमेव चिदचितोरीश्वरसामानाधिकरण्यम् ।

ननु भवतोऽपि क्वचिद्वैरूप्यमङ्गीकार्यम्; 'ब्रह्म वेद ब्रह्मैव भवति' इत्यादिना

जीवेश्वरभेदविषयकस्पष्टतरानेकश्रुतिबाधः स्यात् । स च न युक्त इत्याह - **न च भेदविषयेति ।**

किं च "ऐतदात्म्यमिदं सर्वम्" "सर्वं खल्विदं ब्रह्म" "इदं सर्वं यदयमात्मा" "यत्र त्वस्य सर्वमात्मैवाभूत्" इत्यादिवाक्येषु जीवांशे अभेदार्थकतया अचिदंशे बाधार्थतया च सामानाधिकरण्यस्य त्वया वाच्यत्वात् वैरूप्यापत्तिरित्याह - **एकवाक्येति ।** एकस्मिन्नेव वाक्ये द्वयोरपि चिदचितोः ईश्वरैक्ये प्रतिपद्यमाने सति चिदंशे तादात्म्येन अचिदंशे बाधेन च सामानाधिकरण्यस्य निर्वहणं वैरूप्यमावहतीत्यर्थः । एवं रीत्या वैरूप्यकल्पनप्रयासः संभवत्यैकरूप्ये निरर्थक इति भावः । चिदंशे मुख्यार्थविशेष्यस्वरूपतादात्म्यं अचिदंशे विरोधिस्वरूपतादात्म्यमिति तादात्म्यवैरूप्यमिति चण्डमारुते । **भिन्नवाक्येति ।** चिदचितोरीश्वरतादात्म्ये भिन्नवाक्याभ्यां प्रतिपन्नेऽपि एकरूपेणैव तयोरीश्वरतादात्म्यं निर्वाह्यमित्यर्थः । **अस्मत्पक्षे त्विति । विभूतितद्वद्भावेनेति ।** विभूतिविभूतिमद्भावेनेत्यर्थ; । नियाम्यनियामकभावेनेति यावत् ।

पूर्वपक्षः

अथ सिद्धान्तेऽपि सामानाधिकरण्यविषये वैरूप्यमङ्गीकार्यमिति विस्तरेणाक्षिपति पूर्वपक्षी - **ननु भवतोऽपीत्यारभ्य मुक्तेश्वरयोः सामानाधिकरण्यमनुपपन्नमिति** इत्यन्तेन ग्रन्थेन । "ब्रह्म वेद ब्रह्मैव भवति" इति ब्रह्मविदः मुक्तस्य ब्रह्मभावः सामानाधिकरण्यनिर्देशेन अवगम्यते । अयं ब्रह्मभावः ब्रह्मविभूतित्वरूप इति न कक्तुं शक्यते । यतस्तत्र प्राप्याकारो निर्दिश्यते । मुक्तस्य तु न ब्रह्मविभूतित्वं प्राप्यम् । ब्रह्मविभूतित्वस्य

मुक्तस्य ब्रह्मसामानाधिकरण्ये विभूतितद्भावविवक्षानुपपत्तेः । प्राप्याकारो हि तत्र निर्दिश्यते । न च विभूतिभावः प्राप्यः, तस्य नित्यसिद्धत्वाभ्युपगमात् । तदाविर्भावविवक्षायां तस्य तत्राशाब्दत्वात् ।। यदि चेश्वरविभूतित्वं मुक्तस्याङ्गीक्रियते, तदा मुक्तस्य तत्पारतन्त्र्यशेषत्वे अपि स्याताम् । न चायमिष्टप्रसङ्ग इति वाच्यम्; स्वरूपाविर्भावलक्षणस्य मोक्षस्यापि संसारवद्दुःखात्मकत्वप्रसङ्गात्; चेतननिष्ठयोः शेषत्वपारतन्त्र्ययोः दुःखानुषङ्गव्याप्तेः । तथा च स्मरन्ति, 'सर्वं परवशं दुःखं सर्वमात्मवशं सुखम्' इति । निषेधन्ति च पारतन्त्र्यम्, 'सेवा श्ववृत्तिर्व्याख्याता तस्मात् तां परिवर्जयेत्' इति । श्रुतिश्च मुक्तस्य स्वातन्त्र्यमेव दर्शयति, 'स स्वराड्भवति' इति । सूत्रं च मुक्तविषयम्, 'अत एव चानन्याधिपतिः' इति । 'सङ्कल्पादेवास्य पितरः समुतिष्ठन्ते,

---

नित्यसिद्धत्वाङ्गीकारात् । न च नित्यसिद्धस्यापि तस्य प्रादुर्भावविवक्षया ब्रह्म भवतीति निर्दिश्यत इति वाच्यम् । प्रादुर्भाववाचकशब्दस्य तस्मिन् वाक्येऽभावात् । अपि च मुक्तस्य यदि ईश्वरविभूतित्वमङ्गीक्रियते तर्हि तस्येश्वरपरतन्त्रत्वशेषत्वे स्याताम् । न चेष्टापत्तिरिति वाच्यम् । स्वरूपाविर्भावरूपमोक्षस्यापि संसारवत् दुःखात्मकत्वप्रसङ्गात् । चेतननिष्ठथोः शेषत्वपरतन्त्रत्वयोः दुःखसंबन्धव्याप्तत्वात् । यत्र यत्र चेतनत्वसमानाधिकरणं शेषत्वं परतन्त्रत्वं च तत्र तत्र दुःखवत्त्वं यथा संसार्यात्मनीति व्याप्तिः । पारतन्त्र्यस्य दुःखवत्त्वव्याप्तत्वं स्मृतिरप्याह -

"सर्वं परवशं दुःखं सर्वमात्मवशं सुखम्" इति । परवशं परतन्त्रं सर्वं दुःखि, आत्मवशं स्वतन्त्रं सर्वं सुखि इति तदर्थः । निषेधन्ति च पारतन्त्र्यम् -

"सेवा श्ववृत्तिर्व्याख्याता तस्मात्तां परिवर्जयेत्" इति । ततश्च हेयत्वात् न पारतन्त्र्यं मुक्तप्राप्यम् । श्रुतिश्च मुक्तस्य स्वातन्त्र्यमेव दर्शयति - "स स्वराट् भवति" इति । स मुक्तः स्वराट् स्वतन्त्र इत्यर्थः । "स्वराट् स्वतन्त्रो विज्ञेयः" इति कोशात् । सूत्रकारोऽपि मुक्तस्य स्वातन्त्र्यमाह -

‘सत्यकामस्सत्यसङ्कल्पः’, ‘सर्वेषु लोकेषु कामचारो भवति’, ‘कामान्नी कामरूप्यनुसञ्चरन्’ इत्येवमादयश्च मुक्तस्य पारतन्त्र्यगन्धं प्रतिरुन्धते । ‘सङ्कल्पादेव तच्छ्रुतेः’ इति च मुक्तस्य विचित्रसृष्टौ हेत्वन्तरनैरपेक्ष्यमसूत्रयत् । न च, ‘जगद्व्यापारवर्जम्’ इति जगद्व्यापारनिषेधात् पारतन्त्र्यमपि सूत्रकारसम्मतमिति वाच्यम्; प्रतिसर्गदशायामीश्वरस्येव, स्वतन्त्रस्याप्यनिच्छतो जगद्व्यापारनिवृत्त्युपपत्तेः। अस्तु वा जगद्व्यापारोचितस्वातन्त्र्यविरहः; तथाऽपि स्वप्रवृत्त्यादिषु न

“अत एव चानन्याधिपतिः”

इति । अत एव = सत्यसंकल्पत्वादेन मुक्तः अनन्याधिपतिः = विधिनिषेधानर्हः ‘अन्यः अधिपतिर्यस्य नास्ति सोऽनन्याधिपतिः स्वतन्त्र इति तदर्थः । एतावता मुक्तस्य स्वातन्त्र्यं प्रतिपादितम् ।

अथ मुक्तस्य पारतन्त्र्यं निषेधन्ति श्रुतय इत्याह- **संकल्पादेवेत्यादिना** ।

संकल्पादेवेति सूत्रस्यायमर्थः - मुक्तस्य ज्ञात्यादिप्राप्तिः संकल्पादेव ।

तच्छ्रुतेः - संकल्पादेव ज्ञात्यादि प्राप्तिश्रुतेः ।

बद्धेषु सर्वव्यापारनिमित्तस्यापीश्वरस्य क्वचित्मुक्तव्यापारे अकर्तृत्वं तस्य मुक्तता प्रयुक्तमेव वाच्यमिति तस्य स्वातन्त्र्यं सिध्यतीति भावः ।

सत्यकाम इत्यादि । मुक्तस्य सत्यकामत्वमुच्यते । तच्च तस्य स्वातन्त्र्ये सति स्यात् । पारतन्त्र्ये तु परप्रयुक्तस्य स्वेच्छाविघातस्य संभवात् सत्यकामत्वसत्यसंकल्पत्वकामचारादिकं न स्यादिति भावः ।

न चेति । सूत्रकारेण जगत्सृष्ट्यादिव्यापारवर्जं मुक्तस्यैश्वर्यमिति कथनात् मुक्तस्य क्वचिद्विषये स्वातन्त्र्याभावस्यापि कथनात् नास्ति स्वातन्त्र्यमिति न शङ्कनीयम् । स्वतन्त्रस्यापीश्वरस्य प्रलयदशायामिच्छाविरहात् यथा न जगत्सृष्ट्यादिव्यापारः तथा स्वतन्त्रस्यापि मुक्तस्य इच्छाविरहात् जगत्सृष्ट्यादिव्यापाराभावोपपत्तिरिति भावः ।

अस्तु वेति । **स्वातन्त्र्यविरहः** = शक्तिविरहः । मुक्तस्य जगत्सृष्ट्यादि-

पराधीनत्वसिद्धिः ॥ अल्पशक्तिरधिकशक्त्यपेक्षया परतन्त्र एवेति चेन्न; भिन्नविषयत्वे तत्प्रसङ्गाभावात्। एकविषयत्वेऽप्यविरोधे परस्परसहकारित्वमात्रेण परस्परं पारतन्त्र्यस्य परस्परं स्वातन्त्र्यस्य वा(चा?) प्रसङ्गात्। स्वव्यापारांशे नैरपेक्ष्यस्य च द्वयोरपि वक्तुं शक्यत्वात्। न च मुक्तकर्तृकप्रवृत्तिनिष्पत्तावीश्वरो मुक्तनिरपेक्ष इति युक्तम्, स्ववचनविरोधात्। न च मुक्तसङ्कल्पाधीनभोगनिर्माणे मुक्तेश्वरयोः प्रयोज्यप्रयोजकभावः; प्रमाणाभावात्। पूर्वोक्तश्रुत्यादिविरोधाच्च।

व्यापारानुगुणं स्वातन्त्र्यं माभूत्। तथापि स्वप्रवृत्त्यादौ न पराधीनता सिध्यति। न च यः अल्पशक्तिमान् सः अधिकशक्तिमत्पुरुषापेक्षया परतन्त्र एवेति वाच्यम्। भिन्नविषयकत्वेन पारतन्त्र्यप्रसक्त्यभावात्। एतदुक्तं भवति - ईश्वरशक्तेः जगत्सृष्ट्यादौ व्यापारात् मुक्तात्मशक्तेः पित्रादिसृष्टौ व्यापारात् विषयभेदात् न पारतन्त्र्यं मुक्तस्येति। मुक्तकर्तृकपित्रादिसृष्टौ ईश्वरस्य कर्तृत्वमभ्युपेत्याप्याह - **एकेति**। मुक्तस्य पारतन्त्र्यं ये वदन्ति, तैरपि ईश्वराभिप्रेताविरुद्धकारित्वमवश्यं वक्तव्यम्। एवं च परस्परसहकारित्वमात्रं भवति। तावता च यथा ईश्वरसहकारिकत्वेन मुक्तस्य ईश्वरं प्रति स्वातन्त्र्यं न भवति तथा पारतन्त्र्यमपि न प्रसज्यते। अन्यथा तत एव ईश्वरस्यापि मुक्तपारतन्त्र्यप्रसङ्गादिति भावः। **स्वातन्त्र्यस्य** वेति। वाशब्द इवार्थकः। "समुद्रो वा महासत्त्वः" "मणी वोष्ट्रस्य" इतिवत्। **अप्रसङ्गादिति** च्छेदः। परस्परसहकारित्वेऽपीश्वरः स्वव्यापारांशे मुक्तनिरपेक्षत्वात् न परतन्त्र इत्यत्राह - **स्वव्यापारेति**। स्वव्यापारे परस्परनिरपेक्षत्वं मुक्तेश्वरयोर्द्वयोरपि तुल्यमिति भावः। नन्वीश्वरः मुक्तव्यापारेऽपि तन्निरपेक्षः न स्वव्यापार एवेत्याशङ्क्य निराकरोति- **न चेति**। **स्ववचनविरोधादिति**। मुक्तकर्तृकत्वोक्त्यैव मुक्तस्य कारणत्वसिद्धेरिति भावः। ननु न केवलं मुक्तस्येश्वरसहकारिकत्वम्, किं तु तत्प्रयोज्यत्वमपि; अतः पारतन्त्र्यमित्याशङ्क्य निराकरोति - **न च मुक्तेति**। **पूर्वोक्तेति**। सत्यकामत्वश्रुत्यादिविरोधादित्यर्थः। ननु ईश्वरः कारयितेति श्रुते; मुक्तव्यापारस्येश्वराधीनत्वमित्याशङ्क्य सा श्रुतिः कर्मवश्यसंसारिविषया, न मुक्तविषयेत्याह-

कारयितृत्वश्रुतेरप्युन्निनीषाऽधोनिनीषागर्भत्वेन कर्मवश्यमधिकृत्यैव प्रवृत्तेः । आनन्दयितृत्वश्रुतेश्च मोक्षप्रदानादिना चरितार्थत्वात् । न च निवारणसमर्थेश्वरस्यानिवारणमुपजीव्य मुक्तः प्रवर्तत इति वाच्यम्, विपरिवर्तेऽपि निवर्तकाभावात् । न च प्रागशक्त्या परापेक्षया च पश्चादपि तयोर्नियमः, प्राङ्मुक्तत्वाभावेनापवर्गस्यात्यन्तोच्छेदप्रसङ्गात् । प्रागशक्त्यादेश्च कर्मोपाधिकत्वात्। संसारदशायामीश्वरपारतन्त्र्यमपि सांसारिकसुखदुःखैकभोगहेतुतया राजादिपारतन्त्र्यवत् कर्मानुरूपमेव । अतः कर्मनिवृतौ तदपि निवर्तिष्यत एवेति

कारयितृत्वश्रुतेरिति । ननु ''एष ह्येवानन्दयाति'' इति श्रुतिः आनन्दहेतुपित्रादिसृष्टिप्रभृतिद्वारा आनन्दहेतुत्वपरेति मुक्तस्य पित्रादिसृष्टावीश्वरप्रयोज्यत्वे प्रमाणमित्यत्राह - **आनन्दयितृत्वश्रुतेरिति** । आदिशब्दो भोग्यत्वपरः । ननु मुक्तस्येश्वरप्रेर्यत्वाभावेऽपि निवारणसमर्थोऽपीश्वरो न निवारयतीति तदीयमनिवारणमुपजीव्य अल्पशक्तिः मुक्तः प्रवर्तते। अत ईश्वरपारतन्त्र्यं मुक्तस्य स्यात् इत्याशङ्क्याह - **न चेति** । **विपरिवर्तेति** । परमसाम्यश्रुत्या द्वयोस्तुल्यशक्तिकत्वात् उक्तेनैव न्यायेन मुक्तपारतन्त्र्यमीश्वरस्य स्यादिति भावः । यद्वा अनुपजीव्य प्रवर्तत इति पक्षे निवारकाभावादित्यर्थः । **न च प्रागशक्त्येति** । न च मुक्तः पूर्वं अशक्तः परापेक्षश्चासीदिति पश्चादपि अशक्तः परापेक्षश्च स्यादिति शङ्कनीयम् । प्रागमुक्ततया पश्चादपि अमुक्तः स्यादिति । न चेष्टापत्तिः । अपवर्गस्यात्यन्तोच्छेदप्रसङ्गात् । प्रागशक्तत्वममुक्तत्वं च कर्मोपाधिकमिति कर्मैव तत्र प्रयोजकं न जीवत्वमिति भावः । ननु ईश्वरेतरनिरूपितपारतन्त्र्यस्य कर्मोपाधिकत्वेऽपि संसारदशायामीश्वरपारतन्त्र्यं स्वाभाविकमिति न तस्य मुक्तौ निवृत्तिरित्यत आह - **संसारेति** । यथा राजादिपारतन्त्र्यं सुखदुःखोपभोगहेतुतया पुण्यपापरूपकर्मोपाधिकं तथा ईश्वरपारन्त्र्यमपि कर्महेतुकमित्यर्थः । ईश्वरपारतन्त्र्यं कर्मोपाधिकं सुखदुःखहेतुपारतन्त्र्यत्वात् राजादिपारतन्त्र्यवत् इत्यनुमानम् । पक्षे जीवगतत्वविशेषणं देयम् । तेनाचेतनगते पारतन्त्र्ये कर्मोपाधिकत्वाभावान्नांशतो बाधः । तथैव कर्मोपाधिकत्वाभभाववति अचेतनगतपारतन्त्र्ये

स्वतन्त्रो मुक्तः । अतः, 'स स्वराड्भवति' इत्यत्राकर्मवश्य इति व्याख्यानेऽपि कर्मवश्यत्वाविनाभूतमीश्वरपारतन्त्र्यमपि फलतो निवर्तितं भवति । न च मुक्तस्वातन्त्र्यविषयाणां श्रुतीनाम्, 'पतिं विश्वस्य' इत्यादिश्रुतिबलादनीश्वर-विषयतया सङ्कोचः, पतित्वश्रुतीनामेवामुक्तविषयतया सङ्कोचोपपत्तेः । न च द्वयोरपि पृथग्विषयलाभे नियामकाभावात् कस्य सङ्कोच इति नित्यसन्देह इति वाच्यम्; 'स स्वराड् भवति' इत्येवंरूपस्य व्यपदेशस्य स्वेतरसमस्तवश्यत्वनिवृत्तावेव

पारतन्त्र्यत्वरूपहेतुसत्त्वात् व्यभिचारवारणाय हेतौ सुखदुःखहेत्विति पारतन्त्र्यविशेषणम् । अत इति । पुण्यपापरूपकर्मनिवृत्तौ जीवस्य ईश्वरपारतन्त्र्यमपि तद्धेतुकं निवर्तिष्यत इति मुक्त: स्वतन्त्र इति भाव: । **अत: स स्वराडिति** । "स स्वराट्" श्रुतौ स्वराट् इत्यस्य अकर्मवश्य इति व्याख्याने कृतेऽपि कर्मवश्यत्वाविनाभूतमीश्वरपारतन्त्र्यमपि फलतो निवर्तते । श्रुतौ स्वराट् इत्यस्य स्वतन्त्र इत्यर्थ: । स्वं तन्त्रं प्रयोजकं यस्य स स्वतन्त्र: । न च स्वस्य स्वं प्रयोजकम् इति एतादृशव्यपदेशात् असंकोचेन स्वेतरसमस्तवश्यत्व-निवृत्तिरवगम्यत इत्यर्थ: । अत्र मुक्त: परतन्त्रत्वाभाववान् चेतनत्वे सति कर्मवश्यत्वाभावात् य: कर्मवश्यत्वाभाववान् स न परतन्त्र: यथेश्वर इत्यनुमानं विवक्षितम् ।

न च मुक्तस्वातन्त्र्येति । "स स्वराट् भवति" इत्यादीनां मुक्तस्य स्वातन्त्र्यप्रतिपादिकानां श्रुतीनां ईश्वरान्यं प्रति पारतन्त्र्याभावे तात्पर्यम् । अन्यथा "पतिं विश्वस्य" इत्यादीनां श्रुतीनां ईश्वरस्य विश्वपतित्वप्रतिपादकत्वेन तद्विरोधापत्तेरिति शङ्का । "स स्वराट् भवति" इति मुक्तविषयकश्रुत्यविरोधाय" पतिं विश्वस्य "इत्यादिश्रुते: अमुक्तं सर्वं प्रति ईश्वरस्य पतित्वप्रतिपादने तात्पर्यं भवतु इति समाधानम् । तथा च मुक्तेश्वरयो: द्वयोरपि स्वातन्त्र्यमिति भाव: । **न च द्वयोरपीति** । मुक्तेश्वरयो: द्वयोरपि अनीश्वरं प्रति स्वातन्त्र्यरूपस्य अमुक्तं प्रति स्वातन्त्र्यरूपस्य च विषयस्य श्रुतिभ्यां लाभे सति कस्य स्वातन्त्र्यं संकोचनीयमित्यत्र नियामकाभावात् नित्यं संदेह; स्यादिति न च वाच्यम् । स्वेतरसमस्तवश्यत्वाभावरूपस्य स्वातन्त्र्यस्य द्वयोरपि श्रुतिसिद्धत्वेन द्वावपि स्वतन्त्राविति

तात्पर्योपलम्भात् । (?) यदि तु न कस्यचिद्वश्यो मुक्त इत्येवमादिव्यपदेशः स्यात्, तदा स्यादेव सन्देहः । न च तथाऽस्ति । अत एव सूत्रकारोऽपि ‘अनन्याधिपतिः’ इति शब्दं प्रायुङ्क्त; न त्वधिपतिरहित इति(?) अत्र, ‘ब्रह्म वेद ब्रह्मैव भवति’ इत्येवमादयश्च मुख्यार्थत्यागमसहमानाः भवत्पक्षेण परमसाम्यश्रुतयो वा निस्संकोचत्वमभिलषन्त्यः सहकारिण्यो भवेयुः । आदिभरतमृगत्वप्राप्तिवत् कृशोदरीनीडनिहितस्य कीटस्य कृशोदरीत्ववच्च ब्रह्मोपासकस्य ब्रह्मतापत्तिश्च युक्ता। न चास्य मुख्यब्रह्मत्वे, ‘यतो वा इमानि’ इत्यादिलक्षणस्याव्याप्तिः; तस्य जगद्व्यापारजागरूकजिज्ञास्यव्यक्तिविशेषविषयतया विरोधाभावात् ।

स्वीकारे संदेहस्यानवकाशादिति भावः । **यदि तु इति** । **कस्याचिदिति** । सामान्यशब्दस्यानीश्वरे विशेषे संकोचसंभवादिति भावः । **अत एवेति** । अनधिपतिरिति वक्तव्ये अनन्याधिपतिरिति प्रयोगः अन्यत्वप्रयुक्ततामधिपतित्वाभावस्य द्योतयितुमिति भाव इति चण्डमारुतकाराः ।

अत एवेत्यादेरर्थस्तु अनधिपतिरित्यप्रयुज्य अनन्याधिपतिरितिप्रयोगोऽपि **अत एव**= स्वतन्त्रशब्दार्थघटकस्वापेक्षया अन्यसर्वव्यक्तिनिषेधाभिप्रायत एव स्यात् इति टिप्पणीकाराः । **अत्रेति** । मुक्तब्रह्मणोरैक्ये “ब्रह्म वेद ब्रह्मैव भवति” इत्येवमादयः श्रुतयः सहकारिण्यो भवेयुः इत्यन्वयः । तथा भवत्पक्षेण (सिद्धान्तिपक्षेण) परमसाम्यश्रुतयो वा मुख्यार्थस्यैक्यस्य त्यागमसहमानाः संकोचाभावं विवक्षन्त्यः सहकारिण्यो भवेयुः । ननु ब्रह्मभिन्नस्य ब्रह्मोपासकस्य जीवस्य कथं ब्रह्मतापत्तिर्भवितुमर्हतीत्यत्राह - **आदिभरतेति**। मृगभिन्नस्य आदिभरतस्य अन्त्यकाले मृगमेव स्मृत्वा मृतस्य मृगत्वप्राप्तिवत्, कृशोदरी नीडनिक्षिप्तस्य कीटस्य कृशोदरीत्ववच्च ब्रह्मोपासकस्य ब्रह्मत्वं भवितुमर्हतीत्यर्थः । **कृशोदरी** = भ्रमरी?

ननु भवता मुक्तस्य जगद्व्यापारो नाङ्गीकृतः । अथापि ब्रह्मत्वापत्तिरुच्यते । ब्रह्मत्वमापन्नस्य जगद्व्यापाराभावे जगत्कारणत्वलक्षणस्याव्याप्तिरित्यत्राह -**न चास्येति** । **तस्येति** । ननु मुक्तस्य ब्रह्मत्वे “ब्रह्म वा इदमेक एवाग्र आसीत्” इत्यादि

कारणब्रह्मविषयैकाद्वितीयादिशब्दोऽपि विभक्तनामरूपकार्यबहुत्वाभाव-अधिष्ठात्रन्तरनैरपेक्ष्यादिकमेव दर्शयतीति भवद्भिरेव व्याख्यातम् । अन्यथा नित्यसूरिपरिग्रहाद्ययोगात् । न च समनिषेधश्रुतिबलात् परमसाम्यश्रुतेस्संकोचः, पारम्यविशेषणविरोधप्रसङ्गात् । न च भोगमात्रसाम्यपारम्याच्चरितार्थता; स्वतन्त्रयोर्भोगसाम्यासम्भवेन स्वातन्त्र्यसाम्यस्यापि नान्तरीयकत्वात् । अनिच्छया जगद्व्यापारविरहरूपवैषम्यं तु न भोगवैषम्यहेतुः, इच्छाविघातादिप्रसङ्गाभावात् । अतस्सिद्धं मुक्तानामीश्वराद्भेदे सत्यपि तदपेक्षया पारतन्त्र्यासम्भवात् ऐक्ये साम्ये

श्रुतब्रह्मैकत्वविरोध इत्यत्राह - **कारणेति** । **भवद्भिरेवेति** । सिद्धान्तिभिरेवेत्यर्थः । एकशब्दः विभक्तनामरूपकार्यबहुत्वाभावाभिप्रायः, अद्वितीयशब्दः अधिष्ठात्रन्तरनैरपेक्ष्याभिप्रायः इति व्याख्यातं भवद्भिरित्यर्थः । **नित्यसूरीति** । नित्यमुक्तानां ब्रह्मधर्मभूतानन्दस्य तद्विग्रहादेश्चायोगादित्यर्थः । ननु "न तत्समश्चाभ्यधिकश्च दृश्यते" इति श्रुतिः ईश्वरस्य सदृशो नास्तीति प्रतिपादयति । न तु अन्यनिषेधम् । ततश्च "परमं साम्यमुपेति" इति श्रुतेः न मुक्तेश्वरैक्यपरत्वम् अपि तु सादृश्यपरत्वमित्याशङ्क्याह- **न च समनिषेधेति** । यदि कतिपयाकारसादृश्यमात्रपरत्वं परमसाम्यश्रुतेः तदा साम्ये परममिति विशेषणस्य बाधः स्यात् । अतस्तद्विशेषणबलात् परमसाम्यमित्यनेनैक्यमेव विवक्षितमिति भावः । "न तत्समश्च" इत्यत्र समशब्दस्य संसारिविषयतया संकोचमात्रम् । ततश्च ईश्वरस्य समः संसारी नास्तीत्यर्थः । किं च समो न दृश्यत इति समदर्शननिषेधात् दर्शनयोग्येषु संसारिषु समाभावः सिध्यतीति भावः ।

ननु परमं साम्यमित्यत्र साम्यशब्दस्य भोगसाम्यविषयतया संकोचः । पारम्यं च तस्य विशेषणम् । तच्चाङ्गीकृतमेवेति न कस्यापि बाध इत्याशङ्क्य निराकरोति- **न च भोगमात्रेति** । स्वतन्त्रपरतन्त्रयो; भोगसाम्यासंभवेन स्वतन्त्रत्वसाम्यस्यापि अवर्जनीयत्वात् इत्यर्थः । ननु मुक्तस्य स्वातन्त्र्याङ्गीकारेऽपि जगद्व्यापारविरहात् भोगवैषम्यं स्यादित्यत्राह- **अनिच्छयेति** । सामानाधिकरण्यस्य ऐकरूप्यासंभवमुपसंहरति - **अतः सिद्धमिति** । विभूतितद्वद्भावेन सामानाधिकरण्यं न भेदमात्रात् संभवति । किं तु पारतन्त्र्यात् । तच्चात्र

वा पारम्यविशेषिते विभूतितद्वद्भावेन मुक्तेश्वरयोस्सामानाधिकरण्यमनुपपन्नमिति ॥

अत्रोच्यते—न वयं सर्वत्रैकरूप्यमन्विच्छामः, यावद्बाधं तदभ्युपगमात् । अचेतनेश्वरयोः क्षेत्रज्ञेश्वरयोश्च सामानाधिकरण्ये विभूतितद्वद्भावेनैकरूप्यस्य बाधकाभावात् तदभ्युपगच्छामः । 'ब्रह्मैव भवति' इत्यत्र तु फलनिर्देशरूपतया, पूर्वसिद्धस्य प्राप्यत्वाभावाच्च विभूतित्वातिरिक्तः कश्चिदर्थः

नास्तीति विभूतितद्वद्भावेन सामानाधिकरण्यनिर्वाहानुपपत्तेः ऐक्यमङ्गीकृत्य वा भेदाङ्गीकारेऽपि परमसाम्येन ब्रह्मत्वप्राप्त्या वा “स यो ह वैतत् परं ब्रह्म वेद ब्रह्मैव भवति” इति सामानाधिकरण्यं निर्वाह्यम् । अतः सर्वत्र विभूतितद्वद्भावेन जीवेश्वरयोरैकरूप्येणैव सामानाधिकरण्यमनुपपन्नमिति सिद्धमित्यर्थः । **पारम्यविशेषिते** इति । सामानाधिकरण्यनिबन्धने वक्तव्ये इति शेषः ।

अथ सिद्धान्तः

पूर्वपक्षिणा जीवेश्वरैक्ये या युक्तयः प्रदर्शिताः तासां क्रमशः समाधानमाह - **अत्रोच्यत इत्यादिना** । **न वयमित्यादि** । बाधकाभावेऽपि भवता सामानाधिकरण्ये ऐकरूप्यं त्यज्यते, अस्माभिस्तु बाधकबलात् त्यज्यत इति वैषम्यमिति भाव; । यत्र अचेतनेश्वरयोः जीवेश्वरयोश्च समानाधिकरणतया निर्देशः तत्र विभूतितद्वद्भावेन एकरूपतयैव सामानाधिकरण्यस्याङ्गीकारे बाधकाभावात् तथा अभ्युपगच्छामः । “ब्रह्मैव भवति” इत्यत्र तु फलनिर्देशरूपतया पूर्वमेव सिद्धस्य ब्रह्मविभूतित्वस्य प्राप्यत्वासंभवात् विभूतित्वातिरिक्तः कश्चिदर्थः समानाधिकरणतया निर्देशे हेतुः इत्यवश्यमङ्गीकरणीयम् । स चार्थः “परमं साम्यमुपैति” इति श्रुत्यन्तरानुसारेण परमसाम्यापत्तिरूप इति निश्चीयते । परमसाम्यं च “भोगमात्रसाम्यलिङ्गाच्च” ति सूत्रानुसारेण भोगसाम्यरूपम् । ततश्च ब्रह्मैव भवतीत्यस्य ब्रह्मसमानभोगो भवतीत्यर्थपर्यवसानात् गौणोऽयं प्रयोगः । एवशब्दस्य इवेत्यर्थः । इवार्थे एवकारप्रयोगः श्रुतावेव दृश्यते, यथा “वैष्णवं वामनमालभेत स्पर्धमानो विष्णुरेव भूत्वेमान् लोकानभिजयति” इति । विष्णुदेवताकः स्पर्धमानकर्तृकः वामनपशुकरणको यागोऽत्र विहितः । तस्य फलनिर्देशः विष्णुरेव भूत्वेत्यादिः । तत्र विष्णुसदृशो भूत्वेत्यर्थः । यागमात्रात्

सामानाधिकरण्यहेतुरित्यास्थेयम्। स च, 'परमं साम्यमुपैति' इति श्रुत्यन्तरानुसारेण परमसाम्यापत्तिरूप इति निश्चीयते। अतो गौणोऽयं प्रयोगः, 'वैष्णवं वामनमालभेत स्पर्धमानो विष्णुरेव भूत्वेमान् लोकानभिजयति' इतिवत्। न हि तत्र पश्वालम्भनमात्रात् विष्णुतादात्म्यमुपपद्यते। एवम्, 'विष्णुक्रमान् क्रमते विष्णुरेव भूत्वेमान् लोकानभिजयति' इत्यादि भाव्यम्। एवकारश्चोपमाद्योतक इत्यपि कैश्चित्पूर्वैर्व्याख्यातम्। ''इववद्वैवमेव'', इति नैघण्टुकाश्च पठन्ति। अतो गौणतया मुख्यतया वा ब्रह्मसाम्यमेबात्र प्रयोगे विवक्षितम्। अस्तु वा ब्रह्मविभूतित्वमेवात्रापि सामानाधिकरण्यहेतुः, तथापि तदाविर्भावविवक्षया प्राप्यत्वोपपत्तिः। यत् तत्रोक्तं

कर्तुः विष्णुतादात्म्यासंभवात्। एवकारश्चोपमाद्योतक इत्यपि निघण्ट्वादिभिरवगम्यते। ततः ''विष्णुरेव भूत्वा'' इति प्रयोगः गौणतया मुख्यतया वा (गौणीवृत्त्या मुख्यवृत्त्या वा) ब्रह्मसाम्यमेवाभिप्रैतीति घट्टार्थः।

एतावता विभूतित्वातिरिक्तः परमसाम्यापत्तिरूपः अर्थः क्षेत्रज्ञेश्वरयोः सामानाधिकरण्ये हेतुरित्युपपादितम्। अथ ब्रह्मविभूतित्वेनापि सामानाधिकरण्यं निर्वोढुं शक्यत इत्याह - **अस्तुवेत्यादिना**। अत्रापि क्षेत्रज्ञेश्वरयोरपि समानाधिकरणतया निर्देशे ब्रह्मविभूतित्वमेव हेतुः। न च पूर्वसिद्धस्य ब्रह्मविभूतित्वस्य प्राप्यत्वं न संभवतीति वाच्यम्। पूर्वसिद्धस्यापि विभूतित्वस्य प्रादुर्भावविवक्षया प्राप्यत्वोपपत्तेरित्यर्थः। भवतिशब्दे आविर्भावो विवक्षितः। ब्रह्मविभूतिः सन् आविर्भवतीत्यर्थः। ननु प्रादुर्भाववाचकशब्दभाव इति शङ्कायाः किं समाधानमित्यत्राह - **यत्तत्रोक्तमिति**। भवन्मतमनालोच्य शङ्केयं क्रियते। भवन्मतेऽपि हि नित्यसिद्धस्य ब्रह्मभावस्य कथं प्राप्यत्वमिति शङ्का समाना। न च आरोपिताकारनिवृत्तिर्वा ब्रह्मभावप्रकाशो वा प्राप्य इति वाच्यम्। तयोः ब्रह्म भवतीति शब्दगम्यत्वाभावात्। शब्दागम्योऽपि कश्चिदर्थो विवक्षित इति कल्प्यत इति चेत् - तर्हि अस्माभिरपि तथोक्ते सति कुतस्ते प्रद्वेषः। नूनं प्रमाणशतेन उपपत्तिशतेन च विरोधमपि अनादृत्य नित्यनिर्दोषस्य ब्रह्मणः अज्ञत्वसंसारित्वादिकमङ्गीक्रियत इत्ययमेव भवतोलाभः।

शाब्दत्वाभावादिति-तत् स्वपक्षमपरामृश्योच्यते। भवत्पक्षेऽपि हि नित्यं ब्रह्मभूतस्य को नामापूर्वब्रह्मभावः।। आरोपिताकारनिवृत्तिर्वा ब्रह्मस्वरूपत्वप्रकाशो वेति चेत्–न तर्हि तत्रैव शाब्दत्वम्, साक्षाद्ब्रह्मभावस्य नित्यसिद्धत्वेन साध्यत्वा-योगात्।। अशाब्दोऽपि साध्यः कश्चिदर्थो विवक्षित इति कल्प्यत इति चेत्–हन्त तर्ह्यस्मदुक्ते कः प्रद्वेषः ? नूनं प्रमाणोपपत्तिशतविरोधमप्यनादृत्य नित्यनिर्दोषस्य ब्रह्मण एवाज्ञत्वसंसारित्वादिकमङ्गीक्रियत इत्ययमेव भवतो लाभः। अस्मदुक्तार्थे तु, 'पतिं विश्वस्य', 'करणाधिपाधिपः, 'यस्याऽऽत्मा शरीरम्', 'दासभूताः स्वतः सर्वे ह्यात्मानः परमात्मनः' इति श्रुतिस्मृत्यादिकमप्यनुग्राहकं भवति।

यदुक्तं पारतन्त्र्यशेषत्वयोरपुरुषार्थान्वितत्वमिति-तत्र किं ताभ्यां तदपि साध्यते, उत तदभ्युपगमे तत्प्रसङ्गमुखेन तद्विपर्ययेण तद्विपर्यय इति? तत्र न तावत् तत्साध्यम्; कालात्ययापदिष्टत्वात्। तथाहि-मुक्तोऽपि कदाचिद्दुःखी, चेतनत्वे सति परतन्त्रत्वात्, शेषत्वाद्वा, सम्प्रतिपन्नवत्; मुक्तगतं पारतन्त्र्यं शेषत्वं वा स्वाश्रयस्य कदाचिद्दुःखावहम्, चेतनगतपारतन्त्र्यादिरूपत्वात्, सम्प्रतिपन्नवत्; ईश्वरो मुक्तानामपि इच्छाविघातानिष्टापादनादिभिः कदाचिद्दुःखहेतुः, तदपेक्षया तदानीमपि स्वातन्त्र्यादियोगित्वात्, यो यच्चेतनापेक्षया उक्तसाधनः स तद्दुःखहेतुः,

---

अस्मदुक्तार्थे तु विभूतितद्वद्भावे "पतिं विश्वस्य" "करणधिपाधिपः" "यस्यात्मा शरीरम्" "दासभूताः स्वतः सर्वे ह्यात्मानः परमात्मनः" इत्यादिश्रुतिस्मृत्यादिकमनुग्राहकं भवतीति विशेष इति।

यदुक्तमुपरि पूर्वपक्षिणा ईश्वरपारतन्त्र्यशेषत्वयोः दु;खानुषङ्गव्याप्तेरपुरुषार्थान्वितत्वमिति। तत् दूषयति - **यदुक्तमित्यादिना**। किं ताभ्यां पारतन्त्र्यशेषत्वाभ्यां अपुरुषार्थान्वितत्वमपि साध्यते उत पारतन्त्र्यशेषत्वयोरङ्गीकारे अपुरुषार्थान्वयप्रसङ्गमुखेन **तद्विपर्ययेण** = अपुरुषार्थान्वयाभावेन **तद्विपर्ययः** = पारतन्त्र्यः शेषत्वयोरभावः साध्यत इति विकल्पः। तत्र न प्रथमः कल्पः। बाधात्। तथा हि १) मुक्तोऽपि कदाचित् दुःखी चेतनत्वे सति परतन्त्रत्वात् शेषत्वाद्वा दुःखवत्त्वेन संप्रतिपन्नबद्धचेतनवत्, २) मुक्तगतं

यथा सम्प्रतिपन्नः इत्यादिर्हि तत्र प्रयोगः स्यात् । तत्र तावत् सर्वत्र मुक्तस्य दुःखरहितनिरतिशयानन्दविधायकैः, 'अशरीरं वा व सन्तं न प्रियाप्रिये स्पृशतः, 'रसँ ह्येवायं लब्ध्वाऽऽनन्दी भवति' इत्यादिभिः श्रुतिशतैर्बाधः सुगमः । उपाधिश्च, कर्मवश्यत्वं दुष्कर्ममूलत्वं दुष्कर्मजनिताप्रीत्यादिदुःखकारणयोगित्वमित्यादि रूह्यः ।

किंच मुक्तः कदाचिद्दुःखीत्यत्न प्राच्यदुःखित्वेन सिद्धसाधनम् । मुक्तिदशायां दुःखवानिति साध्ये दृष्टान्तस्य साध्यविकलता । एवं पारतन्त्र्यपक्षीकारेण प्रयोगेऽपि

परतन्त्रत्वं शेषत्वं वा स्वाश्रयस्य कदाचित् दुःखजनकं चेतनगतपारतन्त्र्यशेषत्वरूपत्वात् संप्रतिपन्नपारतन्त्र्यशेषत्ववत्, ३) ईश्वरः मुक्तानामपि इच्छाविघटनानिष्टापादनादिभिः कदाचित् दुःखहेतुः तदपेक्षया (मुक्तापेक्षया) तदानीमपि स्वातन्त्र्यादियुक्तत्वात्, यो यच्चेतनापेक्षया स्वातन्त्र्यादियुक्तः स तच्चेतनदुःखहेतुः यथा संप्रतिपन्नो राजादिः इति हि अनुमानप्रयोगः प्रथमपक्षे संभाव्यते । तत्र च प्रयोगे श्रुतिशतैर्बाधः । "अशरीरं वाव सन्तं न प्रियाप्रिये स्पृशतः" "रसँ ह्येवायं लब्ध्वानन्दी भवति" इत्यादिश्रुतयो हि मुक्तस्य दुःखलेशरहितं निरतिशयमानन्दं प्रतिपादयन्ति । किं चोक्तेष्वनुमानेषु कर्मवश्यत्वं पापमूलकत्वं पापजनिताप्रीत्यादिदुःखकारणवत्त्वं चोपाधिः । साध्यव्यापकत्वे सति साधनाव्यापकत्वादिति भावः ।

एतदुक्तं भवति - शेषत्वपारतन्त्र्यपक्षकानुमाने पारतन्त्र्यत्वशेषत्वत्वरूपपक्षधर्मावच्छिन्नसाध्यव्यापकं दुष्कर्ममूलकत्वमुपाधिः । ईश्वरपक्षकानुमाने दुष्कर्मजनिताप्रीत्यादिकमुपाधिः । न च दुःखहेतुत्वरूपसाध्यवति कालादौ दुष्कर्मजनिताप्रीत्यादिमत्त्वस्याभावात् उपाधेः साध्यव्यापकत्वं नास्तीति वाच्यम् । साध्ये दुःखहेतुत्वमित्यनेन दुःखप्रयोजककर्तृत्वस्य विवक्षितत्वात् । मुक्तपक्षकानुमाने दुःखकारणयोगित्वमुपाधिः । दुःखकारणं च दुष्कर्म । आदिशब्देन अस्वाभाविकत्वादिकं गृह्यते इति चण्डमारुतकाराः ।

उक्तानुमानेषु दूषणान्तरमाह - **किं च मुक्त** इत्यादिना । मुक्तः कदाचितदुःखी इति साधने प्राच्यदुःखित्वेन मुक्तिपूर्वकालीनदुःखवत्त्वमादाय सिद्धसाधनम् । मुक्तिदशायां

तस्य यावदात्मभाविन एकत्वात् प्राचीनदुःखहेतुत्वेन सिद्धसाधनता । मुक्तिदशायां दुःखावहमिति साध्ये पूर्ववत् साध्यवैकल्यम् । एवमीश्वरो मुक्तानां दुःखहेतुरिति साध्येऽपि प्राचीनदुःखहेतुत्वेन सिद्धसाधनत्वम्, मुक्तिदशायां दुःखहेतुरिति साध्यवैकल्यं च सिद्धम् ।

ननु यत्काले पारतन्त्र्यं तत्काले दुःखहेतुत्वं व्याप्तमिति मुक्तिकालवर्तिनोऽपि पारतन्त्र्यस्य सामान्यव्याप्तिबलादेव पक्षधर्मतासहकृतात् तत्कालवर्तिदुःखहेतुत्वं सिध्यति । अतो न वैकल्यं सिद्धसाधनत्वं चेति ।। तदपि मन्दम् किं यत्काले पारतन्त्र्यं तत्काले सर्वत्र दुःखहेतुत्वं व्याप्तिसिद्धम्, उतात्यन्तायोगव्यवच्छेदमात्रम्, उत दुःखसम्भावनामात्रमिति ।

दु:खवानिति साधने दृष्टान्ते बद्धचेतने साध्यवैकल्यम् । एवं पारतन्त्र्यपक्षके पारतन्त्र्यं दु:खहेतु: इत्यनुमाने तस्य पारतन्त्र्यस्य यावदात्मभाविन: एकत्वात् पूर्वकालीनदु:खहेतुत्वमादाय सिद्धसाधनम् । मुक्तिदशायां दु:खहेतुरिति साध्यं चेत् दृष्टान्ते साध्यवैकल्यम् । एवम् ईश्वरपक्षकेऽनुमाने ईश्वरो मुक्तानां दु:खहेतुरिति साध्येऽपि प्राक्कालीनदु:खहेतुत्वमादाय सिद्धसाधनम् । मुक्तिदशायां दु:खहेतु: इति साध्ये दृष्टान्ते साध्यवैकल्यमित्यर्थ: ।

ननु पारतन्त्र्यं मुक्तिकाले दु:खावहम् तत्कालीनपारतन्त्र्यत्वात्, यत्कालीनपारतन्त्र्यं यत्, तत् तत्कालीनदु:खहेतुरिति सामान्यव्याप्तिबलात् पक्षधर्मतासहकृतात् मुक्तिकाले दु:खहेतुत्वं सिध्यतीति शङ्कते - **ननु यत्काल** इति । **न वैकल्यमिति** । दृष्टान्ते साध्याभावो नेत्यर्थ:। समाधत्ते-**तदपि मन्दमिति** । संभावनामात्रमित्यनेन स्वरूपयोग्यता च विवक्षिता । यस्मिन् स्थूलकाले पारतन्त्र्यमस्ति तदन्तर्गतसर्वक्षणेषु दु:खहेतुत्वमिति व्याप्तिसिद्धमित्युच्यते वा, उत अत्यन्तायोगव्यवच्छेदमात्रम् = स्थूलोपाध्यवच्छिन्नकालान्तर्गतसूक्ष्मकाले कदाचित् दु:खहेतुता, अथवा दु:खसंभावनामात्रमुच्यत इति त्रेधा विकल्प: । तत्र **नाद्य:** कल्प:; व्यभिचारात् । पतिप्रभृतीनां परतन्त्रा भार्यापुत्रादय: यावत्कालं परतन्त्रा: तावत्कालं दु:खिन इति न हि दृश्यन्ते । प्रत्युत पतिपारतन्त्र्येमेव परमं भूषणमिति मन्यमाना:

Ministry of Education, Govt. of India
Guruvay...r Campus Library
Puranattukara.P.O., Thrissur-680551
Acc.No. 39370
Acc.Date 27/02/2026

न प्रथमः, व्यभिचारात्; न हि पतिप्रभृतीना परतन्त्रा भार्यापुत्रदासादयः सर्वे सर्वदा ततो दुःखिनो दृश्यन्तेः, प्रत्युत पारतन्त्र्यमेव परमं भूषणमभिमन्यमानाः केचित् सद्भृत्यपुत्रादयः स्वातन्त्र्यनिर्देशेऽपि रोषलोहितचक्षुषः परिवादा(रा)भिमानिनो विमन्यन्ते। अतस्तेषु स्वातन्त्र्यमेवानिष्टतमम्, पारतन्त्र्यं त्विष्टतममेव दृश्यते। यदाऽपि च तस्य किंचिद्दुःखहेतुत्वम्, तदाऽपि तदनुबन्धित्वादेव तद्दुःखं सहन्ते॥ भ्रान्तिमूलं तदिष्टत्वमिति चेत्; हन्त स्वातन्त्र्यस्य वाऽन्यस्य वा कस्यचित् शब्दादेः इष्टत्वमपि भ्रान्तिमूलमेव। सांसारिकं हि सर्वं भोगजातमन्ततो भ्रान्तिमेव कूटस्थयति ॥ स्वयं दुःखस्वरूपत्वेऽपि इष्टान्तरप्रतिलम्भकत्वात्

केचित् सत्पुत्रपत्नीभृत्यादयः त्वं स्वतन्त्रो भवेति पत्या निर्दिश्यमाना अपि रोषलोहितचक्षुषः अयं परिभव इति अभिमन्यमानाः विमतिं सूचयन्ति। अतश्च दुःखित्वरूपसाध्याभाववत्सु भार्यापुत्रादिषु पारतन्त्र्यसत्त्वात् व्यभिचार इति भावः। दुःखविरोधिसुखोपलम्भात् तत्काले न दुःखमित्याह - **प्रत्युतेति** । **स्वातन्त्र्यनिर्देशेऽपीति** । इदं पारतन्त्र्यस्य सुखहेतुत्वसाधनार्थम् । सुखहेतुपारतन्त्र्यविरोधितया स्वातन्त्र्यस्यानिष्टत्वात् तन्निर्देशोऽप्यनिष्ट इति भावः। **यदापि चेति**। पतिपरतन्त्राणां भार्यापुत्रादीनां पारतन्त्र्यस्य कादाचित्कक्लेशकरत्वं यदि भवति तदापि सुखानुबन्धित्वादेव तद्दुःखं सहन्ते। ततश्चातिशयितसुखहेतुत्वात् तदनुबन्धिदुःखहेतुत्वमपि पारतन्त्र्यस्य सहन्ते इति भावः। ननु भार्यापुत्रभृत्यादीनां पतिपारतन्त्र्यस्य सुखहेतुत्वं भ्रान्तिमूलकमिति शङ्कते **भ्रान्तिमूलमिति**। **तदिष्टत्वम्** = पारतन्त्र्यस्येष्टत्वम् । किं सुखहेतुत्वभ्रमो भ्रान्तिपदेन विवक्षितः उत देहात्मभ्रमः । नाद्यः, सुखहेतुत्वस्य अबाधादित्यभिप्रेत्य द्वितीये आह - **हन्तेति** । स्वातन्त्र्यस्य वा अन्यस्य वा शब्दादिविषयस्य इष्टत्वमपि देहात्मभ्रममूलकमेव। तथा हि सांसारिकं हि सर्वं भोगजातमन्ततो देहात्मभ्रममेव हेतूकरोति इति भावः। शङ्कते - **स्वयं दुःखरूपत्वेऽपीति** । पतिपारतन्त्र्यादिः स्वयं दुःखरूपोऽपि अदृष्टद्वारा पारतन्त्र्यनिवृत्त्यनन्तरभाविस्वर्गादिसुखान्तरप्रापकत्वात् इष्टतमो भवति, यथा

पतिपारतन्त्र्यादेरिष्टतमत्वम्, यथा कृषिचिकित्सादेरिति चेत्; तर्हि स्वातन्त्र्यस्यापि स्वयं सुखत्वाभावेऽपीष्टान्तर प्रतिलम्भकत्वादेवेष्टतमत्वमपि स्यात्॥ नियमनमात्रमपि केभ्यश्चित् स्वदत एवेति स्वातन्त्र्यस्य स्वतस्सुखत्वमिति चेन्न; तृणाद्युत्क्षेपणादिस्वातन्त्र्यस्य तथाविधसुखत्वादर्शनात्। यत्र तु स्वातन्त्र्यं स्वरूपेण सुखवत् दृश्यते, तत्रापि ख्यात्यादिकमन्तर्भाव्यैव तत् तथा। तच्च क्वचित् पारतन्त्र्येऽपि समानमिति तस्यापि स्वतस्सुखत्वसिद्धिः स्यात्। अतो यत्रेष्टसाधनत्वबुद्धिर्गुणताभिमानो वा, तत् स्वातन्त्र्यं पारतन्त्र्यं वेष्टतमम्। यत्र त्वनिष्टसाधनत्वबुद्धिर्दोषत्वाभिमानो वा, तत्र तु तद्वा तदन्यद्वाऽनिष्टतममविशेषात् दृश्यते। अतः पारतन्त्र्यस्य स्वसत्ताकाले सर्वत्र दुःखहेतुत्वव्याप्तिर्न सिध्यति।

कृषिचिकित्सादिः तत्काले दुःखरूपोऽपि कालान्तरे सुखजनकत्वादिष्टतमो भवतीति शङ्का। समाधत्ते - **तर्हीति**। स्वातन्त्र्यस्यापि स्वयं सुखत्वाभावेऽपि सुखान्तरप्रापकत्वादेवेष्टतमत्वमपि स्यात्। ततश्च स्वातन्त्र्यस्यापि दुःखहेतुत्वात् मोक्षदशायां स्वातन्त्र्यसत्त्वे दुःखं स्यादिति भावः। शङ्कते - **नियमनमात्रमपीति**। अन्यनियन्तृत्वं केभ्यश्चित् रोचत इति स्वातन्त्र्यस्य स्वतः सुखत्वम्। अतः सुखहेतुत्वं स्वातन्त्र्यस्य स्वाभाविकम्। पारतन्त्र्यस्य च दुःखहेतुत्वं स्वाभाविकमिति शङ्कितुराशयः। समाधत्ते - **तृणादीति**। कस्यचित् तृणाद्युत्क्षेपणादौ स्वातन्त्र्यमस्ति। तथापि सुखहेतुत्वं न दृश्यते। अतः स्वातन्त्र्यस्यापि सुखहेतुत्वं न स्वाभाविकमिति समाधानम्।

यत्र तु इत्यादि। यस्मिन् स्वातन्त्र्यं स्वरूपेण सुखसाधनमिव दृश्यते तत्रापि ख्यात्यादिद्वारैव तत् सुखसाधनम्। एवं च स्वत इष्टत्वाभावात् न स्वातन्त्र्यस्य स्वभावतः सुखसाधनत्वम्। स्वतोऽनिष्टत्वाभावाच्च न पारतन्त्र्यस्य स्वभावतो दुःखसाधनत्वमिति भावः। **अत** इति। इष्टपदेन सुखसाधनं भर्त्सनताडनादि गृह्यते। एवं च यत्र इष्टसाधनसाधनत्वबुद्धिः इदं स्वातन्त्र्यं पारतन्त्र्यं वा सुखसाधनख्यात्यादिसाधनमित्याकारिका अथवा गुणत्वाभिमानः इदं गुण इत्याकारकः तत् स्वातन्त्र्यं पारतन्त्र्यं वा इष्टतमं भवति। यत्र तु अनिष्टसाधनसाधनत्वबुद्धिः इदं स्वातन्त्र्यं पारतन्त्र्यं वा अनिष्टसाधनभर्त्सनताडनादिसाधनमित्याकारिका, अथवा दोषत्वाभिमानः तत् स्वातन्त्र्यं पारतन्त्र्यं वा अनिष्टतममिति अविशेषात् दृश्यते। अतः **पारतन्त्र्यस्येति**। पारतन्त्र्यं यदा यदा वर्तते तदा तदा दुःखहेतुत्वं इति नास्ति व्याप्तिः। पूर्वोक्तरीत्या व्यभिचारादिति भावः।

नापि द्वितीयः, निर्दोषभृत्यस्य गुणवत्पारतन्त्र्यादिभिर्व्यभिचारात् ॥ तत्र पारतन्त्र्यस्य स्वाभाविकं दुःखहेतुत्वं गुणवत्प्रतिसम्बन्धिकत्वादिवशादपोद्यत इति चेत्; तर्हि पारतन्त्र्यस्य दुःखहेतुत्वमपि दुष्टप्रतिसम्बन्धिकत्वादिनैवेति किं न स्यात् ॥ गुणवत्प्रतिसम्बन्धिकत्वेऽपि तस्य क्वचिद्दुःखहेतुत्वदर्शनादिति चेत्; तर्हि

द्वितीयविकल्पनिरासः

एतावता यत्काले पारतन्त्र्यं तत्काले सर्वत्र दुःखहेतुत्वमिति प्रथमकल्पो दूषितः । अथ अत्यन्तायोगव्यवच्छेदमात्रमिति द्वितीयकल्पं दूषयति - **नापि द्वितीय** इति । रागादिदोषरहितस्य भृत्यस्य गुणवत्पतिपारतन्त्र्ये कदाचिदपि दुःखहेतुत्वाभावेन व्यभिचारादित्यर्थः । ननु पारतन्त्र्यं यद्यपि स्वभावतो दुःखहेतुः तथापि गुणवत्पुरुषं प्रति पारतन्त्र्यं न दुःखहेतुः । पारतन्त्र्यनिष्ठमौत्सर्गिकं दुःखहेतुत्वं गुणवत्पुरुषनिरूपितत्वेनापोद्यते इति यावत् । तथा च गुणवन्निरूपितत्वरहितं पारतन्त्र्यं कदाचित् दुःखहेतुरिति व्याप्तेर्न व्यभिचार इति शङ्कते - **तत्र पारतन्त्र्यस्येति** । गुणवत्प्रतिसंबन्धिकत्वं गुणवत्प्रतियोगिकत्वम् । तथा च मुक्तगतपारतन्त्र्यं दुःखहेतुः गुणवत्प्रतियोगिकत्वाभावविशिष्टपारतन्त्र्यत्वात् इत्यनुमानं फलितम् । यद्यपि अस्मिन्ननुमाने पक्षे हेत्वभावात् स्वरूपसिद्धिः । मुक्तगतपारतन्त्र्ये गुणवदीश्वरप्रतियोगिकत्वविशिष्टस्वातन्त्र्यत्वसत्त्वेन तदभावविशिष्टस्वातन्त्र्यत्वाभावात् तथापि स्पष्टत्वात् तामुपेक्ष्य दूषणान्तरमाह - **तर्हीति** । पारतन्त्र्यस्य दुःखहेतुत्वं दुष्टप्रतिसंबन्धिकत्वप्रयुक्तमित्येव युक्तम् । ततश्च मुक्तगतपारतन्त्र्ये दुःखहेतुत्वव्यभिचारवारणाय दुष्टप्रतिसंबन्धिकत्वविशिष्टं पारतन्त्र्यं दुःखहेतुरिति वाच्यम् । मुक्तपारतन्त्र्ये विशेषणाभावान्न दुःखहेतुत्वमित्येव युक्तम् । न तु अपवादकल्पनं युक्तमिति भावः । एवं च पारतन्त्र्यं दुःखहेतुरित्यनुमाने दुष्टप्रतियोगिकत्वमुपाधिरित्युक्तं भवति । ननु गुणवन्तं प्रति परतन्त्रस्यापि कस्यचित् दुःखदर्शनात् दुष्टप्रतियोगिकत्वं पारतन्त्र्यस्य दुःखहेतुत्वे न प्रयोजकमिति शङ्कते - **गुणवत्प्रतीति** । समाधत्ते - **तर्हि तस्येति** । **तस्य** गुणवत्प्रतिसबन्धिकत्वस्य दुःखहेतुत्वापवादकत्वं न स्यादित्यर्थः । गुणवत्प्रतिसंबन्धिकत्वस्यापि क्वचिदुःखहेतुत्वदर्शनादिति भावः । ननु निर्दोषभृत्यस्य गुणवत्पारतन्त्र्यं

तस्यापवादकत्वमपि न स्यात् ।। निर्दोषभृत्यस्य तदपवादकमेवेति चेन्न; तथाऽपि पारतन्त्र्यस्य सुखहेतुत्वं दुष्टप्रतिसम्बन्धिकत्वादिनाऽपोद्यत इति विपरिवर्तस्य दुष्परिहरत्वात् । एतदुक्तं भवति स्वातन्त्र्यमिति न कश्चित् विशेषः सुखदुःखसम्भवे, अपितु भोगादृष्टादिकमेव नियामकमिति । किंच तत्तद्देहात्माभिमानानुगुण्येन देवतिर्यङ्मनुष्यस्त्रीपुंसादिषु पुरुषार्थव्यवस्थादर्शनादत्रापि स्वतन्त्रात्माभिमानिनां पारतन्त्र्यं दुःखाय, परतन्त्रयथावस्थितात्मदर्शिनां पारतन्त्र्यमेव सुखकारणमिति

दुःखहेतुत्वापवादकमेवेति शङ्कते - **निर्दोषेति** । समाधत्ते- **तथापीति** । दुष्टप्रतियोगिकत्वस्यापि सुखहेतुत्वापवादकत्वं तुल्यन्यायेन स्यादित्यर्थः । **तथापीति** । आदिशब्देन दुष्टगतत्वं गृह्यते ।

ननु प्रतिबन्दिमात्रेण नेष्टसिद्धिरित्याशङ्क्य तात्पर्यमाह- **एतदुक्तमिति** । स्वातन्त्र्यमात्रेण सुखमिति वा पारतन्त्र्यमात्रेण दुःखमिति वा न वक्तुं शक्यते । पूर्वोक्तरीत्या स्वतन्त्रस्यापि दुःखदर्शनात् परतन्त्रस्यापि सुखदर्शनाच्च । अपि तु सुखदुःखयोः भोगादृष्टादिकमेव नियामकम् । तथा च मुक्तौ दुःखहेतुकर्माभावान्न दुःखमिति निर्णय इति भावः ।

एवं कर्मण एव हेतुत्वात् स्वातन्त्र्यपारतन्त्र्ययोः सुखदुःखहेतुत्वं नास्तीत्युक्तम् । इदानीं पारतन्त्र्यस्य सुखं प्रति हेतुत्वमपि संभाव्यत इत्याह - **किं चेति** । आत्मानं यदि देवं मन्यते तदा तदनुगुणो भोगः यदि मनुष्यं मन्यते तदा तदनुगुणो भोग इत्येवं तत्तद्देहात्माभिमानानुगुणतया देवतिर्यङ्मनुष्यस्त्रीपुरुषादिषु सुखदुःखव्यवस्थाया दर्शनात् आत्मानं स्वतन्त्रं मन्यमानानां पारतन्त्र्यं दुःखकारणम्, शास्त्रोक्तेश्वरपरतन्त्रतया आत्मानं मन्यमानानां पारतन्त्र्यमेव सुखसाधनम् भार्यापुत्रादिवत् इति यथालोकमनुसन्धेयमित्यर्थः । तथा च तत्तदात्माभिमानविशेषानुगुण्येन भोगसाधनव्यवस्थादर्शनात् स्वतन्त्रत्वभ्रमदशायां परानुवर्तनस्य सुखहेतुत्वाभावेऽपि भ्रमनिवृत्त्यनन्तरं परतन्त्रतया आत्माभिमानदशायां तदनुरूपस्य परानुवर्तनस्य सुखहेतुत्वं संभवतीति भावः । **अत इति** । दुःखात्यन्तायोग-

यथालोकमनुसन्धेयम् । अतः पारतन्त्र्यस्य दुःखात्यन्तायोगव्यवच्छेदः उपाधिमूलत्वादुपाधिनिवृत्तौ निवर्तेतैवेति न मुक्ते तत्साधनम् ।

न च तृतीयः, स्वरूपयोग्यत्वमात्रसाधने सिद्धसाधनात् । सहकारियोग्यत्वस्य संशयस्य वा साधने कालात्ययापदेशात् । नापि प्रसङ्गतद्विपर्ययाभ्यां मुक्तस्य पारतन्त्र्याभावसाधनम्; तत्रापि व्याप्तेरवश्यम्भावात्; तस्याश्च दूषितत्वादिति । अतः, 'सर्वं परवशं दुःखम्' इत्यादिकमपि संसारिविषयम् । 'सेवा श्ववृतिरा(व्यी)-ख्याता' इत्येतदप्यसेव्यसेवाविषयम् ।

व्यवच्छेदस्य = कदाचिदु:खसंबन्धस्य । **उपाधिमूलत्वात्** = कर्महेतुकत्वात् । **उपाधिनिवृत्तौ** = कर्मनिवृत्तौ, मुक्तिदशायामिति यावत् । **निवर्तेतेति** । दु:खसंबन्ध इति शेष: । **तत्साधनम्** = दुखसंबन्धसाधनम् ।

तृतीयकल्पदूषणम्

पारतन्त्र्ये सति दु:खं संभाव्यत इति तृतीयकल्पं दूषयति- **न च तृतीय** इति । दु:खसंभावनामात्रमित्यनेन किं दु:खस्वरूपयोग्यता विवक्ष्यते, उत सहकारियोग्यता अथवा संशय: इति विकल्प्य नाद्य इत्याह - **स्वरूपेति** । पारतन्त्र्यं दु:खस्वरूपयोग्यं पारतन्त्र्यत्वात् इति साधने सिद्धसाधनम् । न द्वितीयतृतीयावित्याह **सहकारीति** । सहकारियोग्यता नाम सहकारिकारणसमवधानम् सहकारिकारणं च कर्मैव । ततश्च मुक्तस्य पांरतन्त्र्ये सत्यपि कर्मनिवृत्तिश्रुत्या सहकारिकारणवत्त्वरूपसहकारियोग्यताविरहात् बाध: । तथैव तदानीं सहकारियोग्यत्वसंशयोऽपि नास्तीति तत्साधने बाध इति भाव: । **नापीति** । **प्रसङ्ग:** यदि पारतन्त्र्यं स्यात् तर्हि दु:खं स्यादित्याकारक: । **तद्विपर्यय:** = यतो दु:खं नास्ति तत: पारतन्त्र्यमपि नास्तीत्येवंरूप: । तथा च उक्तविधप्रसङ्गतद्विपर्ययाभ्यां मुक्तस्य पारतन्त्र्यं नास्तीति साधनमपि न शक्यम् । तत्रापि यत्र पारतन्त्र्यं तत्र दु:खमिति व्याप्तेरपेक्षितत्वात् तादृशव्याप्तेश्च व्यभिचारादिना पूर्वं दूषितत्वादिति भाव: । उक्तानर्थान् कारिकाभि: संगृह्णाति **स्वातन्त्र्यमपीत्यादिना** ।

श्लो. (१) स्वातन्त्र्यमपि दुःखाय स्वाङ्गुलिच्छेदनादिषु ।
पारतन्त्र्यं सुखायैव पत्नीनां तु स्वभर्तृषु ॥

(२) स्वातन्त्र्यं सुखहेतुः स्यादिति चेत् भवतोच्यते ।
न कथं सुखशाली स्यात् कीलोत्पाटी स वानरः ॥

(३) अयोग्यपारतन्त्र्यं हि दुःखायेति निषिध्यते ।
भगवद्दास्यमेवाऽऽहुर्लास्यहेतुं मनीषिणः ॥

(४) ''ईश्वरोऽहमहं भोगी सिद्धोऽहं बलवान् सुखी ।''
इत्यादिकानुसन्धानमासुरं भावमाह हि ॥

(५) हिरण्यासुरसिद्धान्तसिद्धामीश्वरभावनाम् ।
भावयन्तोऽवलम्बन्ते हरिदास्य(स?) विडम्बनम् ॥

(६) हरिदासस्य राजर्षेरिति तन्मुनिभाषितम् ।
दासोऽहं कोसलेन्द्रस्येत्यादिसंवादमृच्छति ॥

(७) परतन्त्रान्वयाभावे स्वातन्त्र्यं ब्रह्मणः कथम् ।
अस्वातन्त्र्ये कथं सौख्यमात्मनो निर्गुणस्य ते ॥

(८) स्वातन्त्र्यपारतन्त्र्याभ्यां सुखं वा दुःखमेव वा ।
न व्याप्तं हि यत(तत?) स्तत्तत्प्रमाणानुगुणं द्वयम् ॥

परतन्त्रान्वयाभाव इति । ब्रह्मव्यतिरिक्तं सर्वं मिथ्येति जीवब्रह्मणोरैक्यमिति च वदतां भवतां मते ब्रह्मण: स्वतन्त्रत्वं दुर्भणम् । परतन्त्रस्यान्यस्य सत्त्वे हि तदपेक्षया स्वातन्त्र्यं ब्रह्मण: स्यात् । स्वातन्त्र्यं हि सप्रतिसंबन्धिकमिति भाव: । ननु ''स स्वराट् भवति'' इति श्रुति: ''अत एव चानन्याधिपति:'' इति सूत्रं च मुक्तस्य स्वातन्त्र्यं वदत:। तस्येश्वरपारतन्त्र्यस्वीकारे ताभ्यां विरोध इत्याशङ्क्य तयो: दु:खहेतुभूतं यत् कर्माधीनं पारतन्त्र्यं तत्प्रतिक्षेपपरत्वं न तु ईश्वरपारतन्त्र्यप्रतिक्षेपपरत्वमित्याह - **स स्वराडिति** ।

‘स स्वराड्भवति’, ‘अत एव चानन्याधिपतिः’ इति श्रुतिसूत्रे अपि दुःखहेतुकर्माधीनपारतन्त्र्यप्रतिक्षेपपरे एव; आत्मतत्त्वस्य शरीरत्वविधायकश्रुतिबलात् स्वतोदासत्वस्मृतेश्च तत्सङ्कोचोपपत्तेः प्रपञ्चयिष्यमाणत्वात्। ‘‘सङ्कल्पादेवास्य पितरः समुत्तिष्ठन्ते’’ इत्यत्रावधारणेनापि तत्तत्कार्यहेतुतया तथा प्रसिद्धकारकव्यापारादिनैरपेक्ष्यमेवोच्यते; न पुनरीश्वरव्यापारनैरपेक्ष्यम्। तथा सति च ‘अस्यैव सङ्कल्पात्’ इति निर्देशेन भवितव्यम्। व्युत्क्रमेणान्वये स एव दोषः। न चेश्वरसङ्कल्पसापे-

---

नन्वेवं सति स्वातन्त्र्यस्य संकोचः स्यादित्यत्राह - **आत्मतत्त्वस्येति**। ‘‘यस्यात्मा शरीरम्’’ इति श्रुतिबलात् जीवात्मतत्त्वस्य ईश्वरशरीरत्वमवगम्यते। ‘‘दासभूताः स्वतः सर्वे ह्यात्मानः परमात्मनः’’ इति स्मृतिबलात् ईश्वरदासत्वमवगम्यते। तेनेश्वरपरतन्त्रतया अवगतस्य आत्मनः स्वतन्त्रत्वासंभवात् ईश्वरातिरिक्तपारतन्त्र्यभावाभिप्रायेण उक्तसूत्रश्रुत्योः संकोच आवश्यक इति उपरि प्रपञ्चयिष्यमाणत्वादिति भावः।

ननु मुक्तात्मविषयके ‘‘संकल्पादेवास्य पितरः समुतिष्ठन्ते’’ इति श्रुतिवाक्ये एवकारेण स्वसंकल्पव्यतिरिक्तनिरपेक्षत्वोक्त्या ईश्वरपारतन्त्र्यं व्यवच्छिद्यते। तत्पारतन्त्र्ये हि तत्संकल्पाधीनव्यापारवत्त्वात् एवकारानुपपत्तिरित्याशङ्क्य लोके संकल्पातिरिक्तानां कारकाणां तत्तत्कार्यहेतुत्वप्रसिद्धेः मुक्तस्यापि स्वकार्ये संकल्पातिरिक्तकारकापेक्षा स्यादिति शङ्कानिवृत्तये संकल्पादेवेत्येवकारः। तेन संकल्पातिरिक्तकारकापेक्षैव मुक्तस्य व्यवच्छिद्यते न तु ईश्वरसंकल्पापेक्षापि। तथा सति ‘‘अस्यैव संकल्पात्’’ इति श्रूयेत, न तु ‘‘अस्य संकल्पादेवे’’ति इति समाधत्ते-**संकल्पादेवेति**। मूले तथा प्रसिद्धेत्यत्र ‘‘तथा’’ इति शब्दः अपनेय इति भाति। ननु संकल्पादित्यस्मादनन्तरं श्रूयमाणः एवकारः अस्य इत्यस्मादनन्तरं योजनीयः तेनेश्वरपारतन्त्र्यव्यवच्छेदो लभ्यत इत्याशङ्क्य यथाश्रुतान्वये बाधकाभावे सति व्युत्क्रमेणान्वये स्वीक्रियमाणे **स एव दोषः** व्युत्क्रमेणान्वय एव दोष इति समाधत्ते - **व्युत्क्रमेणेति**। **न चेति**। मुक्तस्य स्वकार्ये ईश्वरसंकल्पसापेक्षतामात्रेण सत्यसंकल्पत्वं श्रूयमाणं नोपपद्येतेति शङ्का न कार्या। मुक्तः सत्यसंकल्पो भवतु इति ईश्वरः संकल्पयति। तथा चेश्वरसंकल्पाधीनं मुक्तस्य सत्यसंकल्पत्वमित्युक्ते बाधकाभावात्। सत्यसंकल्पत्वं हि अवितथसंकल्पत्वम्। तच्चेश्वरसंकल्पाधीनत्वेऽपि न भज्यत इति भावः।

क्षतामात्रेण सत्यसङ्कल्पत्वश्रुतिविरोधः। ईश्वरस्य तत्सङ्कल्पानुगुणसङ्कल्पयोगित्वात्। एतेन कामचारश्रुतिः, 'सङ्कल्पादेव' इति सूत्रञ्च निर्व्यूढम्।

यत्तु—स्वतन्त्रस्याप्यनिच्छतो जगद्व्यापारनिवृत्त्युपपत्तिरिति—तदसत्; मुक्तस्य

एतेनेति। अयं मुक्तः कामचारो भवतु इति ईश्वरः संकल्पयति। अतः कामचारो भवति। तावता कामचारत्वस्य न भङ्ग इति भावः।

यदुक्तं पूर्वपक्षिणा मुक्तः स्वतन्त्र एवेश्वरवत्। तथापि कुतो जगत्सृष्ट्यादिकं न करोतीति न शङ्कनीयम्। तद्विषयकेच्छाविरहादिति तद्दूषयति - **यत्तु** इत्यादिना। मुक्तस्य सर्वव्यापारानुगुणशक्तिमत्त्वरूपस्वातन्त्र्यसद्भावे प्रमाणाभावः। न च "संकल्पादेवास्य पितरः समुत्तिष्ठन्ते" इत्यादिश्रुत्या संकल्पमात्रेण मातापित्रादिसर्वविषयकसृष्टिवचनात् सर्वविषयकशक्तिमत्त्वं मुक्तस्य सिध्यतीति वाच्यम्। तत्र श्रुतौ येषां सृष्टिरुक्ता तावन्मात्रसृष्ट्यनुगुणशक्तेरेव सिद्धेः। न च "यं कामं कामयते सोऽस्य संकल्पादेव समुत्तिष्ठति" इति श्रुतिवशात् सामान्येन निर्देशरूपात् सर्वविषयकशक्तिमत्त्वसिद्धिरिति वाच्यम्। यं कामं कामयते इत्यस्यानुवादरूपत्वात् काम्यमानवस्तुसृष्टिमात्रविषयकत्वात्। मुक्तस्य सर्वविषयककामनावत्त्वे प्रमाणाभावात्। विश्वामित्रादिसंकल्पवत् कतिपयविषयकत्वेनापि मुक्तकामनायाः सिद्धेः। यदि मुक्तस्य सर्वविषयककामना स्यात् तर्हि जगद्व्यापारविषयेऽपि सत्यां कामनायां जगद्व्यापारस्यावश्यकत्वेन जगद्व्यापारवर्जनोक्तेरयुक्तत्वात्। शक्तस्य किंचिद्व्यापारविषयकेच्छा हि अवितथा व्यापाराविनाभूता। अशक्तस्य तु कामना वितथा सती दुःखहेतुरेव। तस्मात् मुक्तस्य सर्वव्यापारकामनास्तीत्यत्र न प्रमाणम्। ईश्वरस्य तु "सोऽकामयत बहु स्यां प्रजायेय" इति श्रुतिबलात् सर्वविषयककामना सिध्यति। न च मुक्तस्यापि "स एकधा भवति" इत्यारभ्य "अपरिमितधा भवति" इति व्यपदेशात् जगद्व्यापारोऽपि संभवतीति वाच्यम्। तस्याः श्रुतेः परमात्मभोगशेषभूतस्वभोगोपयोगितया अनन्तशरीरपरिग्रहमात्रशक्तिप्रतिपादनतात्पर्यात् इति समुदायार्थः।

सर्वगोचरशक्तिसद्भावे प्रमाणाभावात् । न च मातापितृप्रभृतिसृष्टिवचनात् सर्वविषयशक्तिक्लृप्तिः, तन्मात्रसृष्टिशक्तेरेव सिद्धेः । न च, 'यं कामं कामयते, सोऽस्य सङ्कल्पादेव समुतिष्ठति' इति सामान्यवचनात् सर्वशक्तित्वसिद्धिः, 'यं कामं कामयते' इत्यस्यानुवादकत्वात् । तस्य च काम्यमानमात्रविषयत्वात् । मुक्तस्य कामनायाः सर्वविषयत्वे प्रमाणाभावात् । विश्वामित्रादिसङ्कल्पवत् सङ्कुचितविषयत्वेनापि तत्सिद्धेः । ईश्वरस्य तु, 'सोऽकामयत, बहु स्याम्' इत्यादिभिस्तत्सिद्धेः । मुक्तस्य तु कामनायां सत्यां जगद्व्यापारविरहायोगात् । शक्तस्य चिकीर्षा हि व्यापाराविनाभूता । अशक्तस्य कामना दुःखहेतुरेव । न च, 'स एकधा भवति' इत्यारभ्य, 'अपरिमितधा भवति' इति श्रुतेर्मुक्तस्य जगद्व्यापारोऽपि संभवतीति वाच्यम्; तस्याः श्रुतेः परमात्मभोगशेषभूतस्वभोगार्थानन्त शरीरपरिग्रहमात्रविषयत्वात् । यत्तु मुक्तकर्तृकभोगनिर्माणे मुक्तेश्वरयोः प्रयोज्यप्रयोजकभावे प्रमाणाभावः, पूर्वोक्तश्रुत्यादिविरोधश्चेति– तत्र विरोधः परिहृतप्रायः । प्रमाणमपि समर्थयिष्यमाणनियन्तृत्वादिश्रुत्यसङ्कोचः। अत एवेश्वरानिवारणान्मुक्तप्रवृत्तौ विपरिवर्तप्रसङ्गोऽपि प्रत्युक्तः ।

यत्तु कर्मनिवृत्तौ पारतन्त्र्यमपि निवर्तत इति–तन्न किं कर्माधीनस्य पारतन्त्र्यस्य निवृत्तिर्विवक्षिता, उत पारतन्त्र्यमात्रस्य ? पूर्वत्रेष्टापादनम् ।। तदतिरिक्तं

यत्तु मुक्तकर्तृकित्यादि । मुक्तकर्तृकभोगनिर्माणे मुक्तः ईश्वरप्रेर्यः । ईश्वरश्च प्रेरकः इत्यत्र प्रमाणं नास्ति । सत्यकामत्वादिश्रुतिविरोधश्चेति यदुक्तं, तदपि न । श्रुतिविरोधस्य "ईश्वरस्य तत्संकल्पानुगुणसंकल्पयोगित्वात्" इति ग्रन्थेन परिहृतत्वात् । प्रमाणमपि नियन्तृत्वादिश्रुत्यसंकोचः । असंकुचितनियन्तृत्वश्रुतिः प्रमाणमिति यावत् । **अत एवेति** । असंकुचितनियन्तृत्वश्रुतेरित्यर्थः ।

यत्तु कर्मनिवृत्ताविति । पुण्यपापरूपकर्मनिवृत्त्या पारतन्त्र्यमपि मुक्तस्य निवर्तत इति यदुक्तम्; तत्र पृच्छामः किं कर्माधीनं पारतन्त्र्यं निवर्तत इति विवक्षितम्, उत

पारतन्त्र्यं जीवेषु न दृष्टमिति चेन्न; समर्थयिष्यमाणत्वात् ।। संसारिणामीश्वरपारतन्त्र्यं कर्महेतुकम्, कर्मफलभोगहेतुत्वात्, राजादिपारतन्त्र्यवदिति चेन्न; नित्यैरेव तद्धेतुभूतैर्जीवपरस्वरूपादिभिरनैकान्त्यात् । न च तेषां तादर्थ्यनियमाभावान्नानैकान्त्यमिति वाच्यम्, ईश्वरपारतन्त्र्यस्यापि तादर्थ्यनियमानिश्चयेनासिद्धिप्रसङ्गात् । कार्यत्वे सतीति विशेषणे विशेषणासिद्धेः ।

पारतन्त्र्यसामान्यमिति । आद्ये इष्टापत्तिः । अस्माभिरपि मुक्तौ कर्माधीनस्य पारतन्त्र्यस्यानङ्गीकारात् । न द्वितीयः । कर्माधीनपारतन्त्र्यातिरिक्तस्य ईश्वरपारतन्त्र्यस्य मुक्ते समर्थयिष्यमाणत्वादित्यर्थः । शङ्कते - **संसारिणामिति** । संसारिणामीश्वरपारतन्त्र्यं कर्महेतुकम् कर्मफलभोगहेतुत्वात् राजादिपारतन्त्र्यवत् इत्यनुमानं न समीचीनम् । **नित्येषु**= उत्पत्तिनाशरहितेषु जीवात्मपरमात्मस्वरूपेषु आश्रयविधया साधारणकारणतया च कर्मफलभोगहेतुत्वरूपो हेतुर्वर्तते । कर्महेतुकत्वरूपं साध्यं नास्तीति व्यभिचार इति भावः । **तद्धेतुभूतैः** कर्मफलहेतुभूतैः । अनेन हेतुसत्त्वमुक्तम् । नित्यैरित्यनेन कर्महेतुकत्वरूपसाध्याभावोऽभिप्रेत; । तथा च साध्याभाववति हेतुसत्त्वात् व्यभिचार इति फलितम् । ननु कर्मफलभोगैकहेतुत्वं हेतुः । तच्च कर्मफलभोगहेतुत्वे सति तदतिरिक्ताहेतुत्वम् । जीवस्वरूपादीनां मुक्तिं प्रत्यपि हेतुत्वात् न व्यभिचार इत्याशङ्क्य निराकरोति - **न च तेषामिति । तादर्थ्यनियमाभावात्** = कर्मफलभोगैकहेतुत्वाभावात् । मुक्तौ जीवानां पारतन्त्र्यसद्भावे तस्यं कर्मफलभोगातिरिक्ततदातनेश्वरानुवर्तनादिहेतुत्वात् तादर्थ्यनियमानिश्चयात् संदिग्धासिद्धिप्रसङ्गादित्यर्थः । ननु हेतौ कार्यत्वे सतीति विशेषणं दातव्यम् । अतो नित्येषु जीवपरस्वरूपादिषु न व्यभिचार इत्यत्राह - **कार्यत्वे सतीति** । व्यभिचारवारणेऽपि ईश्वरपारतन्त्र्यरूपे पक्षे कार्यत्वरूपविशेषणाभावात् विशेषणासिद्धिः । जीवगतस्य ईश्वरपारतन्त्र्यस्य नित्यत्वादिति भावः । ननु नित्यमीश्वरपारतन्त्र्यं न पक्षः । अपि तु कार्यत्वविशिष्टं राजादिपारतन्त्र्यं पक्षः । अतो न विशेषणासिद्धिः इत्याशङ्क्य तथा सति सिद्धसाधनम् । राजादिपारतन्त्र्ये कर्महेतुकत्वस्यास्माभिरङ्गीकारादिति समाधत्ते - **कार्येति** ।

कार्यपारतन्त्र्यपक्षीकरणे सिद्धसाधनात्। उत्तरत्र अचेतनेष्वनैकान्त्यम्॥ चेतनगतं पारतन्त्र्यं कर्मव्याप्तमिति तन्निवृत्त्या तन्निवृत्तिरिति चेन्न; तथाऽप्यप्रयोजकत्वात्। मुक्तो न परतन्त्रः, चेतनत्वे सति कर्मवश्यत्वादीश्वरवदिति हि तदा प्रयोगः। तत्रेश्वरत्वमेवोपाधिः। न चेदं पक्षेतरत्वम्; अचेतनानां संसारिचेतनानां च पक्षव्यतिरिक्तानां व्यवच्छेद्यानां सिद्धेः। न च पक्षेतरत्वमित्येतावता परित्यागः;

कर्मनिवृत्तौ पारतन्त्र्यमपि निवर्तत इति पूर्वपक्षिणं प्रति किं कर्माधीनस्य पारतन्त्र्यस्य निवृत्तिर्विवक्षिता उत पारतन्त्र्यमात्रस्येति विकल्प्य आद्यकल्प एतावता निरस्त:। अथ द्वितीयकल्पं निरस्यति - **उत्तरत्रेति**। कर्मनिवृत्तौ पारतन्त्र्यसामान्यं निवर्तत इति वादिना यत् पारतन्त्र्यं तत् कर्मनिवृत्तिनिवर्त्यमिति व्याप्तिरभिप्रेता। तत्राचेतनेषु व्यभिचार:।

अचेतनगतपारतन्त्र्यस्य कर्माधीनत्वाभावेन तन्निवृत्तिनिवर्त्यत्वाभावात् ननु चेतनगतत्वं हेतुविशेषणं दीयते। तथा च चेतनगतं पारतन्त्र्यं कर्मनिवृत्त्या निवर्तत इति व्याप्ति:। चेतनगतस्य पारतन्त्र्यस्य कर्मव्याप्तत्वात् व्यापकस्य कर्मणो निवृत्तौ व्याप्यस्य पारतन्त्र्यस्यापि निवृत्तेरावश्यकत्वादित्याशयेन शङ्कते - **चेतनगतमिति**। समाधत्ते - **तथापीति**। उक्तरीत्या अचेतनगते पारतन्त्र्ये व्यभिचारवारणेऽपि अप्रयोजकत्वात् एतन्नियमाधीनस्य अनेन चेतनगतं पारतन्त्र्यं कर्मनिवृत्तिनिवर्त्यमिति नियमेन फलितस्य यत्र चेतनत्वे सति कर्मवश्यत्वाभाव: तत्र परतन्त्रत्वाभाव: इति नियमस्याप्रयोजक-त्वादित्यर्थ:। अप्रयोजकत्वमेवोपपादयति- **मुक्तो न परतन्त्र** इत्यादिना। पूर्वोक्तफलितनियमबलात् **मुक्तो न परतन्त्र:** चेतनत्वे सति कर्मवश्यत्वाभावात् ईश्वरवत् इत्यनुमानं प्रयोक्तव्यम्। तत्र चेश्वरत्वमुपाधि:। परतन्त्रत्वाभावरूपसाध्यव्यापकत्वात् पक्षावृत्तित्वाच्चेति भाव:। ननु मुक्तस्य पक्षत्वात् तदितरेश्वरवृत्ति ईश्वरत्वं पक्षेतरत्वरूपमिति कथं तदुपाधि: स्यात्। पक्षेतरत्वस्यानुपाधितायास्तार्किकैर्निरूपितत्वादित्याशयेन शङ्कते **न चेदं पक्षेतरत्वमिति**। समाधत्ते - **अचेतनानामिति**। ईश्वरत्वं हि ईश्वरमात्रवृत्ति। पक्षेतरत्वं मुक्तेतरत्वं तु अचेतनेषु संसारिचेतनेषु च वर्तत इति ईश्वरत्वं न पक्षेतरत्वरूपमिति भाव:। अपि च

बाधे सति तस्याप्युपाधित्वस्य क्वचित् स्वीकारात्। अग्नेरनुष्णत्वसाधने पदार्थत्वे अनग्नित्व (र्थत्वेन ह्यनग्नित्व) मेवोपाधिमाहुः। मुक्त ईश्वरपरतन्त्रः, अनीश्वरत्वात्, सम्प्रतिपन्नवदिति प्रत्यनुमानं च । न चात्र मुक्तेश्वरत्वमुपाधिः; ईश्वरे तस्य व्यभिचारात्। नापि मुक्तेश्वरव्यतिरिक्तत्वमुपाधिः, मुक्ते पारतन्त्र्यस्य बाधकाभावेन

पक्षेतरत्वमित्येतावता अनुपाधिरिति न मन्तव्यम् । वह्निरनुष्णः कृतकत्वात् इत्यत्र वह्नीतरत्वस्योपाधितायाः तार्किकैः स्वीकारात् । यत्र पक्षे साध्याभावरूपबाधनिश्चयः तत्र पक्षेतरत्वमुपाधिरिति रहस्यम् । वह्निरूपपक्षे अनुष्णत्वरूपसाध्याभावनिश्चयात् वह्नीतरत्वमुपाधिः । प्रकृतानुमानेऽपि पक्षे मुक्ते पारतन्त्र्याभावरूपं यत् साध्यं तदभावनिश्चयात् (पारतन्त्र्यनिश्चयात्) ईश्वरत्वस्य पक्षेतरत्वरूपत्वेऽपि उपाधित्वमनिवार्यमिति भावः । **अग्नेरिति** । पदार्थत्वेन हेतुना अग्नेरनुष्णत्वसाधने अग्निरनुष्णः पदार्थत्वात् घटवत् इत्यनुमानप्रयोगे अनग्नित्वम् अग्नीतरत्वमुपाधिरित्याहुः तार्किका इति भावः ।

उपाधेः सत्प्रतिपक्षोन्नायकत्वं मनसिकृत्य प्रयुङ्क्ते- **मुक्त ईश्वरपरतन्त्र** इति । पूर्वस्मिन्ननुमाने ईश्वरत्वमुपाधिरित्युक्तम् । उपाधेः साध्यव्यापकत्वात् व्यापकस्य ईश्वरत्वस्य पक्षेऽभावेन व्याप्यस्य साध्यस्याप्यभावः अनुमीयते । तदेवानुमानमत्र सत्प्रतिपक्षविधया प्रदर्शितम् । अयमेव च सत्प्रतिपक्षोन्नयनप्रकारः । अस्तु । **न चात्रेति**। मुक्तः ईश्वरपरतन्त्रः अनीश्वरत्वात् इत्यनुमाने मुक्तेतरत्वमुपाधिः । ईश्वरपरतन्त्रत्वं यत्र बद्धजीवे तत्र मुक्तेतरत्वमिति साध्यव्यापकता । साधनवति पक्षे मुक्तेतरत्वाभावात् साधनाव्यापकतेति मुक्तेतरत्वमुपाधिरिति भावः । **ईश्वरे तस्य व्यभिचारादिति** । साध्यसमव्याप्तत्वमेवोपाधेर्लक्षणम् । मुक्तेतरत्वे यद्यपि साध्यव्यापकता वर्तते, तथापि साध्यव्याप्यता नास्ति । साध्यशून्ये ईश्वरे मुक्तेतरत्वसत्त्वेन व्यभिचारादिति न मुक्तेतरत्वमुपाधिरिति समाधानम् ।

नापीत्यादि । मुक्त ईश्वरपरतन्त्रः अनीश्वरत्वात् इत्यनुमाने मुक्तेश्वरव्यतिरिक्तत्वं

तद्व्यतिरेकस्याप्युपाधिकुक्षिनिक्षेपायोगात्। अन्यथा पक्षविपक्षव्यतिरिक्तत्वमुपाधिरिति सर्वानुमानभङ्गप्रसङ्गात् निर्विशेषणत्वाच्च प्रत्यनुमानबलीयस्त्वं वा । अतः कर्मनिवृत्तावपि मुक्तस्य पारतन्त्र्यनिवृत्त्ययोगात्, 'स स्वराड् भवति' इत्यत्राकर्मवश्यत्वविवक्षायां न स्वरूपप्रयुक्तपारतन्त्र्यनिवृत्तिः फलति।

यत्तु 'स स्वराड् भवति' इत्येवम्भूतव्यपदेशसामर्थ्यात् 'पतिं विश्वस्य'

मुक्तभिन्नत्वे सति ईश्वरभिन्नत्वमुपाधिः । तस्य साध्यसमव्याप्तत्वात् इति न शङ्कनीयम् । ईश्वरव्यतिरिक्तत्वस्यैव लाघवात् परतन्त्रत्वप्रयोजकत्वेन उपाधिकुक्षौ मुक्तेतरत्वस्यापि प्रवेशस्यायुक्तत्वादिति भावः । न च मुक्तस्य परतन्त्रत्वाभावादेव तत् प्रवेशनीयमिति वाच्यम् । तस्य परतन्त्रत्वे बाधकाभावादिति । **अन्यथेति** । लाघवानादरे तु पर्वतो वह्निमान् धूमात् इत्यादिसद्धेतावपि पक्षविपक्षव्यतिरिक्तत्वमुपाधिः इति वक्तुं शक्येत । तस्य साध्यव्यापकत्वात् साधनाव्यापकत्वाच्च । तथा च सर्वेषामनुमानानामुच्छेदः स्यादिति भावः । **निर्विशेषणत्वाच्चेति** । पूर्वपक्षहेतौ चेतनत्वे सतीति विशेषणम् । अत्र तु न किंचिद्विशेषणम् ।

अपिं च लाघवात् अनीश्वरत्वमेव परतन्त्रत्वव्याप्यम्, न तु चेतनत्वे सति अकर्मवश्यत्वम् अपारतन्त्र्यव्याप्यम् गुरुत्वादिति भावः । चकारेण परतन्त्रत्वेऽनीश्वरत्वं प्रयोजकम् चेतनाचेतनसाधारणत्वेन लघुत्वात्; न तु कर्मवश्यचेतनत्वम् । अचेतनाननुगमात् गुरुत्वाच्च । नाप्यचेतनत्वमपि प्रयोजकम् । गौरवात् । अतश्चेतनत्वे सत्यकर्मवश्यत्वमपारतन्त्र्ये न प्रयोजकमपि तु अनीश्वरत्वमिति भावः ।

यत्तु इत्यादि । "स स्वराट् भवति" इत्यादिश्रुत्या मुक्तस्य स्वतन्त्रत्वव्यपदेशसामर्थ्यात् "पतिं विश्वस्य" इत्यादीनां श्रुतीनां मुक्तातिरिक्तविश्वपतिमिति अर्थवर्णनेन संकोचः कार्य इति यदुक्तम् । तत्रोच्यते । किं नामेदं व्यपदेशसामर्थ्यम् स्वाधीनत्वप्रतिपादनं पराधीनत्वनिवृत्तिपर्यवसानं वा । नाद्यः । स्वाधीनत्वे सत्यपि ईश्वराधीनत्वे विरोधाभावत् । स्वाधीनत्वेश्वराधीनत्वयोः विरोधाभावादिति यावत् । एकस्यैव पुरुषस्यानेकाधीनत्वं हि

इत्यादिश्रुतीनां सङ्कोच इति—किमस्य सामर्थ्यम् ? स्वाधीनत्वप्रतिपादनं वा, पराधीनत्वनिवृत्तिपर्यवसितत्वं वा ? नाद्यः; स्वाधीनत्वमात्रस्येश्वराधीनत्वेन सह विरोधाभावात् । एकस्यैवानेकाधीनत्वं हि लोकवेदयोर्दृष्टम् । जीवेश्वराधीनं हि क्षेत्रज्ञशरीरम् । स्वाधीनत्वं चात्र स्वसङ्कल्पाधीनप्रवृत्त्यादियोगित्वम् । तच्चेश्वरानुमत्या सिध्यत्येव । न द्वितीयः; कर्माधीनत्वनिवृत्तिमात्रादपि तदुपपत्तेः ॥ स्वेतरसमस्ताधीनत्वनिवृत्तिस्तात्पर्यतो लभ्यत इति चेन्न; स्वेतरसमस्तापेक्षया ईश्वरत्वस्य परमात्मन्यपि 'सर्वस्येशानः' इत्यादिभिः शब्दत एव सिद्धेः ॥ एवमपि सन्देहे मुक्तस्य पारतन्त्र्यं न सिध्यतीति चेन्न; शाब्दत्वेनाविलम्बितप्रतीतसर्वेश्वरत्ववशादेवार्थत्वेन विलम्बितप्रतीतानन्येश्वरत्वस्यैव सङ्कोचोपपत्तेः ।

लोके वेदे च दृश्यते । जीवशरीरं हि जीवेश्वरोभयाधीनम् । स्वाधीनत्वं नाम स्वेच्छाधीनप्रवृत्तिनिवृत्तिमत्त्वम् । स्वेच्छावशात् प्रवृत्ति:निवृत्तिर्वा यस्य भवति स स्वाधीन इत्युच्यते । ईदृशं स्वाधीनत्वं क्षेत्रज्ञस्य ईश्वरानुमत्या भवति । अत ईश्वराधीन: चेतन: इति भाव: । **अस्य** = व्यपदेशस्य । प्रतिपादनं = **प्रतिपादकत्वम्** । **पर्यवसितमिति** । स्वस्यैवाधीन: स्वाधीन इति अवधारणविवक्षया परानधीनत्वे सति स्वाधीनत्वं वेत्यर्थ: । **न द्वितीय** इति । कर्माधीनत्वाभावमात्रेण परानधीनत्वोपपत्तेरित्यर्थ: । ननु स्वेतरसमस्ताधीनत्वाभाव: स्वाधीनत्वम् । ततश्च स्वेतरेश्वराधीनत्वमपि मुक्तस्य नास्तीति शङ्कते - **स्वेतरेति** । समाधत्ते - **स्वेतरेति** । "सर्वस्येशान:" इति श्रुति: ईश्वरस्य स्वेतरसमस्तवस्त्वपेक्षया ईश्वरत्वं प्रतिपादयति । तदविरोधाय मुक्तस्य स्वाधीनत्वश्रुति: स्वेतरकर्माधीनत्वाभावपरा, न तु ईश्वराधीनत्वाभावपरेति भाव: । ननु मुक्तेश्वरयोरुभयोरपि श्रुतौ स्वातन्त्र्यव्यपदेशात् मुक्तस्य स्वातन्त्र्यमीश्वरव्यतिरिक्तापेक्षयेति संकोचनीयं वा, ईश्वरस्य स्वातन्त्र्यं मुक्तातिरिक्तापेक्षयेति संकोचनीयं वेति संदेहात् मुक्तस्य ईश्वरपारतन्त्र्यं न निर्णेतुं शक्यत इति शङ्कते- **एवमपीति** । ईश्वरस्य स्वेतरसर्वापेक्षया स्वातन्त्र्यं "सर्वस्येशान:" इति शब्दत एव लभ्यते । मुक्तस्य तु "स स्वराट्" इति

भूयसांन्यायाच्च । भूयांसि वाक्यानि परमात्मनः सर्वेश्वरत्वं विदधति । 'स स्वराड् भवति' इत्येकमेव मुक्तस्यानन्येश्वरत्वं विवक्षतीति ततोऽप्यस्यैव सङ्कोचो युक्तः ।

श्लो. श्रुतिस्मृतीतिहासेषु पुराणेषु च सर्वतः ।
सर्वोत्तरागमेष्वेवं विष्णोः स्वातन्त्र्यमुच्यते ॥

'सङ्कल्पादेव' इत्यादिकं तु नान्याधीनत्वं प्रतिक्षेप्तुमलमिति प्रागेवोक्तम् । 'यस्यात्मा शरीरम्' इति श्रुत्यात्मतत्त्वस्य शरीरत्वविधानात् शरीरत्वस्य च आधेयत्वविधेयत्वशेषत्वस्वभावरूपत्वादपि तत्सङ्कोचो न्याय्यः । उपबृंहणानुसाराच्च ।

स्वप्रयोज्यत्वमात्रमुक्तम् । पराप्रयोज्यत्वं न शब्दलभ्यम् । परप्रयोज्यत्वे स्वप्रयोज्यत्वानुपपत्तिरूपया अर्थापत्त्या वा तन्मूलकलक्षणया वा सर्वापेक्षया स्वातन्त्र्यं वक्तव्यम् । तथा च मुक्तस्य स्वेतरसमस्ताधीनत्वनिवृत्तिः विलम्बितप्रतीतिका । ईश्वरस्य तु सा शाब्दत्वात् अविलम्बितप्रतीतिका । अत ईश्वरस्य अविलम्बितप्रतीतिकसर्वोश्वरत्ववशात् मुक्तस्य विलम्बितप्रतीतिकसर्वस्वातन्त्र्यं स्वेतरकर्मानधीनत्वविषयकतया संकोचनीयमिति भावः । युक्त्यन्तरमाह - **भूयसां न्यायाच्चेति** । **भूयांसीति**। "एष सर्वेश्वरः" "सर्वमिदं प्रशास्ति" "सर्वस्य वशी सर्वस्येशानः" इत्यादीनि वाक्यानि। **विदधति विवक्षति** इत्येताभ्यां पूर्वोक्ते शाब्दत्वार्थत्वे विवक्षिते । **अस्यैव** "स स्वराट् भवति" इति श्रुतेरेव । न केवलं श्रुतिषु परमात्मनः सर्वेश्वरत्वमुच्यते, अपि तु स्मृतिपुराणादिष्वपीत्याह कारिकया- **श्रुतिस्मृतीति** । **सर्वोत्तरागमेषु** = पाञ्चरात्रागमेषु । **प्रागेवोक्त**मिति । अस्मिन्नेव वादे - "संकल्पादेवास्य पितरः समुत्तिष्ठन्ते" इत्यत्रावधारणेनापि तत्तत्कार्यहेतुतया प्रसिद्धकारकव्यापारादिनैरपेक्ष्यमेबोच्यते, न पुनरीश्वरव्यापारनैरपेक्ष्यम् । तथा सति अस्यैव संकल्पादिति निर्देशेन भवितव्यम्" इति ग्रन्थेन उक्तमित्यर्थः । **आत्मतत्त्वस्येति** । सर्वावस्थात्मस्वरूपस्येत्यर्थः । तेन संसारिविषयता श्रुतेर्निवर्त्यते । तत्रोपपत्तिः **स्वभावरूपत्वादि**त्यनेन विवक्षिता । नियाम्यतैकस्वभावत्वं शेषतैकस्वभावत्वं च शरीरत्वम् । तच्च कादाचित्कत्वे न स्यात् । अतो विधेयपर्यालोचनया

‘आत्मदास्यं हरेः स्वाम्यं स्वभावं च सदा स्मर।’, ‘दासभूताः स्वतस्सर्वे ह्यात्मानः परमात्मनः।’ इत्यादिभिः स्वाभाविकं भगवद्दास्यमभिधीयते; स्वभावं, स्वत इति च कण्ठोक्तितः। दासभूता इति च्विप्रत्ययमन्तरेण प्रयोगाच्च। तत्रैवाऽऽदरातिशयाद्धि स्वत इत्यप्यनूद्यते; दासभूता इति निरुपाधिकनिर्देशेनैव स्वतस्त्वसिद्धेः। सर्वशब्दश्चात्र न मुक्तबहिष्कारं क्षमते। प्रतिनिर्देशसामर्थ्याच्च। ‘अन्यराजानस्ते क्षय्यलोका भवन्ति’ इत्यविदुषां क्षय्यलोकत्वकारणमन्यराजत्वमुच्यते। तच्च निष्कर्षे

सर्वावस्थाविषयत्वमवगम्यते। तेन मुक्त्यवस्थायामपीश्वरपारतन्त्र्यं प्रतिष्ठितम्। यस्यात्मा शरीरमिति यच्छब्दयोगेऽपि मानान्तराप्राप्तवात् शरीरत्वस्य विधेयत्वमभिप्रेतमिति महाचार्याः।

स्वभावमिति। आत्मदास्यं हरेः स्वाम्यं च स्वभावं सदा स्मरेत्यन्वयः। तेन आत्मगतदासत्वस्य हरिगतस्वामित्वस्य च स्वभावरूपत्वमवगम्यते। तेन तयोः कादाचित्कत्वव्यवच्छेदः। **च्विप्रत्ययमिति**। दासत्वस्य कर्मोपाधिकृतत्वे अभूततद्भाववाची च्विप्रत्ययः प्रयुज्येत। अतोऽभूततद्भावो नास्तीत्यवगमात् दासत्वस्य स्वाभाविकत्वसिद्धिः। ननु दासभूता इत्यनेनैव स्वाभाविकत्वसिद्धौ किं स्वत इत्यनेन, तत्राह - **तत्रैवेति**। दासत्व एवेत्यर्थः। **सर्वशब्द** इति। आत्मान इत्यनेनैव सर्वात्मपरिग्रहसिद्धौ सर्वपदं सर्वावस्थपरिग्रहार्थमिति भावः। तेन मुक्तावस्थस्यापि दासत्वं सिध्यति। **मुक्तबहिष्कारम्** = आत्मशब्दस्य मुक्तातिरिक्तविषयकत्वम्। **प्रतिनिर्देशसामर्थ्याच्चेति**। ‘‘नान्यथा लक्षणं तेषां बन्धे मोक्षे तथैव च’’ इति उत्तरार्धे दास्याभावप्रतिषेधरूपः यः प्रतिनिर्देशः तद्बलादित्यर्थः।

ननु ‘‘अन्यराजानस्ते क्षय्यलोका भवन्ति’ इति श्रुतिः अविदुषां ब्रह्मज्ञानरहितानां नश्वरलोकसाधनतया अन्यराजत्वं वदति। अन्यो राजा यस्य तत्त्वमन्यराजत्वमन्याधीनत्वम्। तच्च निष्कर्षे पारतन्त्र्यमेव। तन्निवृत्तिश्च ‘‘स स्वराट् भवति’’ इत्यनेन मुक्तस्य उच्यमाना स्वातन्त्र्ये अन्यानधीनत्वरूपे पर्यवस्यतीति शङ्कायामाह - **अन्यराजान** इति। ‘‘परीक्ष्य लोकान् कर्मचितात् ब्राह्मणो निर्वेदमायात्’’ इति श्रुत्यन्तरे कर्मणः क्षयिष्णुफलहेतुत्वं श्रुतम्।

कर्माधीनत्वमेव। तन्निवृत्तिश्च विदुषः, 'स स्वराड्भवति' इति विवक्षिता। अतोऽपि कर्मवश्यत्वमात्रमेवात्र निषिध्यत इति न स्वाभाविकभगवद्दास्यनिषेधः। अन्यथा, 'पतिं विश्वस्य' इत्यादिप्रमाणेन विरोधः। एतेन अनन्याधिपतिरिति सूत्रमपि निर्व्यूढम्। एवं बद्धमुक्ताविशेषेण शेषशेषिभावादिभेदे जीवेश्वरयोः स्वाभाविके स्थिते, तदविरोधेन 'ब्रह्मैव भवति' इत्यादीनाम्, 'अविभागेन दृष्टत्वात्' इति मुक्तविषयसूत्रस्य च विभूतित्वाविर्भावादिमुखेन निर्वहणं प्रागुक्तन्यायेन भाव्यम्; ऐक्यापत्तिब्रह्मद्वित्वयोर्भेदश्रुत्या समाधिकराहित्यश्रुत्या च प्रतिक्षेपात्। समनिषेधो

अतस्तदैकार्थ्यात् अत्र अविदुषां क्षय्यलेकत्वे कारणतयोच्यमानमन्यराजत्वं कर्मवश्यत्वमेवेति स स्वराडित्यत्र विदुषां कर्मवश्यत्वनिवृत्तिरेवोच्यते न तु स्वाभाविकस्य भगवद्दास्यस्य निषेध: इति भाव:। **अतोऽपीति**। अपिना पूर्वोक्तप्रमाणयुक्ती समुच्चीयेते। **अन्यथेति**। सर्वापेक्षया स्वातन्त्र्यस्वीकारे "पतिं विश्वस्य" इति ईश्वरस्य मुक्तापेक्षयापि स्वातन्त्र्यमुच्यमानं विरुध्येतेति भाव:।

एतेनेति। अन्यराजान इत्यस्य कर्मवश्या: इत्यर्थात् "अत एव चानन्याधिपति:" इति सूत्रोक्तं मुक्तानामनन्याधिपतित्वमपि कर्मवश्यत्वाभावापरम्, न तु ईश्वरपारतन्त्र्यनिषेधकमिति भाव:।

एवमिति। **बद्धमुक्ताविशेषेण** = बद्धमुक्तजीवसाधारण्येन। जीवेश्वरयो: शेषत्वशेषित्वादिरूपे भेदे स्वाभाविकतया निर्णीते सति तादृशभेदाविरोधेन "ब्रह्मवित् ब्रह्मैव भवति" इत्यादिश्रुतीनां निर्वाह: कार्य:। स च ब्रह्मैव भवति ब्रह्मविभूति: सन्नाविर्भवति आविर्भवद्ब्रह्मविभूतित्ववान् इत्येवंरूप:। **प्रागुक्तन्यायेनेति**। "स्वपक्षमपरामृश्योच्यते" इति प्रागुक्तप्रतिबन्दिन्यायेनेत्यर्थ:। **ऐक्यापत्तीति**। यथाश्रुते ब्रह्मवित् ब्रह्म भवति इत्यस्य ब्रह्मणा ऐक्यं यद्यर्थ: तर्हि जीवब्रह्मणोर्भेदप्रतिपादकश्रुतिविरोध:। ब्रह्मविदपि ब्रह्म भवतीत्यर्थस्वीकारे ब्रह्मद्वित्वं स्यात्। तथा सति ब्रह्मण: समाधिकराहित्यश्रुत्या विरोध इति भाव:। **समनिषेधो हीति**। यदि ब्रह्मद्वित्वं स्यात् तर्हि साम्यं स्यात्। तथा सति

हि केनचित् आकारेण सर्वातिशायित्वं प्रथयति । तथाच लक्षणवाक्यस्वारस्यम्; स्वेतरसमस्तवस्तुव्यावर्तकत्वाल्लक्षणस्य । न च परमसाम्यश्रुत्यसङ्कोचाय मुक्तस्यापीश्वरत्वमङ्गीकार्यमिति द्वयोः सर्वप्रकाराविशेषादैक्यमभिलषितुं शक्यम्; 'भोगमात्रसाम्यलिङ्गाच्च' इति भगवता सूत्रकारेणैव तत्परिहारात् । आह च वृत्तिकारः– 'जगद्व्यापारवर्जं समानो ज्योतिषा' इति । द्रमिडभाष्यकारश्च, 'देवतासायुज्यादशरीरस्यापि देवतावत् सर्वार्थसिद्धिः स्यादिति । ज्ञानानन्दयोरत्यन्तसाम्यादपि हि परमसाम्यशब्दश्चरितार्थः । सर्वज्ञत्वनिरतिशयानन्दत्वे हि तत्र तत्र मुक्तस्यापि वाक्यान्तरैः प्रतिपाद्येते इति सर्वगुणसाधारणरूपपरमसा-

---

ब्रह्मसदृशमन्यन्नास्तीति श्रुतिविरोधः । सममन्यन्नास्तीत्यनेन हि ब्रह्मणः केनचिदाकारेण सर्वोत्कृष्टत्वं प्रकाश्यते । स चाकारो जगत्कारणत्वादिः । **तथाचेति** । ब्रह्मद्वित्वाभावे सत्येव "यतो वा इमानि भूतानि जायन्ते" इत्यादिलक्षणवाक्यं स्वरसं भवति । स्वेतरसमस्तवस्तुव्यावर्तकधर्मो हि लक्षणम् । मुक्तस्य जगद्व्यापारशक्तिरस्ति । अथाप्यनिच्छया न जगत्सृष्ट्यादिव्यापारकर्तृत्वमिति भवत्पक्षे तु जगद्व्यापारस्य इतरव्यावर्तकत्वाभावात् न ब्रह्मलक्षणत्वं स्यादिति भावः । "स्वेतरे"त्यत्र स्वशब्दः लक्ष्यपरः । लक्ष्येतरसमस्तवस्तुव्यावर्तकं हि लक्षणम् । जगद्व्यापारजागरूकं ब्रह्म च त्वया लक्ष्यत्वाभिमतम् । एवं च लक्षणवाक्यस्थब्रह्मशब्दस्यासंकोचे ब्रह्मान्तरव्यावृत्त्यप्रतीतेः तद्व्यावर्तनार्थं ब्रह्मपदस्य संकोचः कार्यः । तथा चास्वारस्यमित्यर्थः" इति **चण्डमारुतकाराः** । **भोगमात्रेति** । ऐक्ये साम्यपदं चानुपपन्नमिति भावः । **जगद्व्यापारेति** । मुक्तः **ज्योतिषा** = ब्रह्मणा, जगद्व्यापारवर्ज जगद्व्यापारं वर्जयित्वा समानो भवतीत्यर्थः । **देवतासायुज्यादिति** । मुक्तस्य ब्रह्मसमानगुणवत्त्वात् ब्रह्मण इव अभीष्टसर्वसिद्धिरित्यर्थः । **सर्वज्ञत्वेति** । वाक्यान्तरेण यो गुणः मुक्तस्य प्रसिद्धः तस्मिन् गुणे ब्रह्मणा परमसाम्यमित्यर्थः ।

म्यशब्दस्तत्रैव [पर्यवसातु]मर्हति । पारम्यविशेषणं च तत्रत्याल्पसादृश्यव्यवच्छेदेन सप्रयोजनम् । यथा दशवर्णषोडशवर्णस्वर्णनिष्कयोः काञ्चनकलधौतनिष्कयोर्वा परमसाम्योक्तौ परिमाणवैषम्यमात्रं निषिध्यते, न तु वर्णवैषम्यम् ।

यत्तु स्वतन्त्रपरतन्त्रयोर्भोगसाम्यासम्भवेन मुक्तस्यापि स्वतन्त्रत्वमिति– तदसत्; स्वातन्त्र्यपारतन्त्र्ययोर्भोगाप्रयोजकत्वस्य प्रागेव स्थापनात् । यथावस्थितात्मानुसन्धानानुगुण्येन स्वतन्त्रस्य स्वातन्त्र्यम्, परतन्त्रस्य च पारतन्त्र्यमनुकूलं भवतीति द्वयोरपि यथावस्थितात्मानुसन्धानानुबन्धिभोगस्याविशेषात् । पुत्रस्य पितृपारतन्त्र्यमेव स्वस्वातन्त्र्यादपि प्रीतिं जनयति ॥

पर्यवसितुमर्हतीति । **पर्यवसातुमिति** पाठः साधीयान् । "षिञ् बन्धने" इति धातोर्वा तुमुन्? **पारम्यविशेषणं** चेति । साम्ये परममिति विशेषणं मुक्तगुणेषु ब्रह्मगुणापेक्षया अल्पसादृश्यव्यवच्छेदार्थमित्यर्थः । **यथेति** । दशवर्णस्वर्णनिष्कषोडशवर्णस्वर्णनिष्कयोः स्वर्णनिष्करजतनिष्कयोर्वा परमं साम्यमित्युक्तौ मानान्तरसिद्धं यत् परिमाणसाम्यं तत्रैव परमसाम्यशब्दः पर्यवस्यति न वर्णेऽपि तथेत्यर्थः ।

यत्तु इत्यादि । लोके स्वतन्त्रः कश्चित् परतन्त्रः कश्चित् । तयोः भोगे साम्यं नास्तीति दृष्टम्, तद्वत् मुक्तः यदि परतन्त्रः स्यात् तर्हि स्वतन्त्रेण ईश्वरेण साकं भोगसाम्यं कथं स्यात् । अतः सूत्रकारोक्तं भोगसाम्यमपि मुक्तस्य स्वातन्त्र्यमेव सूचयतीति यदुक्तं पूर्वपक्षिणा तन्न । स्वातन्त्र्यं पारतन्त्र्यं वा भोगप्रयोजकं न भवतीति भोगादृष्टादिकमेव प्रयोजकमिति स्वातन्त्र्यमपि दुःखाय कदाचित् भवति पारतन्त्र्यमपि कुत्रचित् सुखाय भवतीति च पूर्वमेव विस्तरेण निरूपितम् इति भावः । अत्रापि पुनरुपपादयति - **यथावस्थितेति** । क्षेत्रज्ञः आत्मानं यथा अभिमन्यते तदनुसारेण स्वतन्त्रस्य स्वातन्त्र्यं परतन्त्रस्य च पारतन्त्र्यमनुकूलं भवति । यथा पुत्रस्य पितृपारतन्त्र्यमेव स्वस्वातन्त्र्यापेक्षया प्रीतिजनकं भवतीति ।

विभूतिमत्त्वजगद्व्यापारादिभिरीश्वरानन्दो मुक्तानन्दातिशयितस्स्यादिति चेन्न; स्वाभाविकदास्यानुसन्धायिनः सद्भृत्यस्यस्वाम्यैश्वर्येणेव मुक्तस्यापि परमात्मविभूतिभिरेव निरतिशयानन्दोदयात्। एतदुक्तं भवति-यद्यत् प्रामाणिकम्, तत्तत् सर्वं मुक्तेश्वरयोर्यथावस्थिताकारेणाऽऽनुकूल्येन भातीति भोगमात्रसमानता, यथा राजराजान्तरङ्गयोः सर्वमपि राजैश्वर्यमानुकूल्येन साधारणमेवेति।

तदेवं चेतनाचेतनयोरिव जीवेश्वरयोरपि यावदात्मभाविनि भेदे सिद्धे, तद्भेदस्य मिथ्यात्वम्, औपाधिकत्वम्, स्वाभाविकत्वेऽपि अभेदसहत्वं वा वदतां कलिब्रह्ममीमांसकानां वेदान्तेषु न कश्चिदवकाशो दृश्यत इति स्थिते, तार्किकरञ्जनार्थं ब्रूमः–ब्रह्म सत्येनात्मना सद्वितीयम्, पदार्थत्वात्, घटवदित्यादिभिर्भास्करतिरस्कारः।

शङ्कते - **विभूतिमत्त्वेति**। ईश्वरः विभूतिमान् जगत्सृष्ट्यादिव्यापारवांश्च। तत्प्रयुक्तः ईश्वरस्य आनन्दः तद्रहितमुक्तानन्दापेक्षया अतिशयित एव स्यात्। तथा च कथं द्वयोः भोगे साम्यं स्यादिति शङ्का। यथा स्वाभाविकं दासत्वमनुसंदधानस्य सद्भृत्यस्य स्वामिनः ऐश्वर्येणैव आनन्दातिशयो भवति तथा मुक्तस्य परमात्मविभूतिभिरेव अतिशयितानन्दो जायते। अत आनन्दसाम्यं द्वयोरुपपन्नमेवेति भावः। अभिप्रायं स्पष्टीकरोति - **एतदुक्तं भवतीति**। प्रमाणसिद्धस्य सर्वस्यापि वस्तुनः अनुकूलत्वमेव स्वाभाविकम्। कर्मवशात् तत् न ज्ञायते बद्धस्य। कर्मविनिर्मुक्तस्य तु सर्वमपि स्वाभाविकानुकूलतयैव ईश्वरस्येव भासत इति भोगसाम्यमुपपन्नम्।

उक्तार्थनिगमनपूर्वकं वादप्रधानविषयं जीवेश्वरभेदमनुमानेन साधयन् तदैक्यवादान् निरस्यति - **तदेवमित्यादिना**। जीवेश्वरभेदस्य मिथ्यात्वं शंकरमतम्। औपाधिकत्वं भास्करमतम्। स्वाभाविकत्वेऽपि अभेदसहत्वं यादवप्रकाशाभिमतम्। पूर्वं जीवेश्वरभेदस्य ऐक्यनिरसनपूर्वकं स्थापितत्वात् पूर्वोक्तानां कलियुगब्रह्ममीमांसकानां वेदान्तेषु ईषदपि नास्त्यवकाश इति निर्णयः संपन्न एव तथापि तार्किकरञ्जनार्थं ब्रूमः - ब्रह्म सत्येनात्मना सद्वितीयम् पदार्थत्वात्। यत्र यत्र पदार्थत्वं तत्र सत्यद्वितीयसहितत्वम्, यथा पटे पदार्थे

ईश्वराहम्भावोऽपि विच्छेदरहितनित्याहम्भावान्तरसद्वितीयः, अहम्भावत्वात्, सम्प्रतिपन्नजीवाहम्भाववदिति यादवप्रकाशपिशाचवित्रासनम्।। ईश्वराहम्भावस्य

सत्यघटादिद्वितीयसहितत्वमित्यनुमानेन मायावादिनः निरसनम्। अत्रानुमाने, जीवस्य प्रतिबिम्बत्वं प्रतिबिम्बस्य च मिथ्यात्वं ये वदन्ति तन्मतानुसारेण सिद्धसाधनवारणाय सत्येनेति।

जीवः ईश्वरात् अनौपाधिकभेदवान् सर्वज्ञत्वरहितत्वात् घटवत् इत्यनुमानेन अचेतनस्य ईश्वरात् अनौपाधिकभेदं चेतनस्य ईश्वरात् औपाधिकभेदं च वदतः भास्करस्य निरासः। अनेनानुमानेन जीवे ईश्वरेऽनौपाधिकभेदस्य साधनात्।

यादवप्रकाशमतं दूषयति - **ईश्वराहंभावोऽपीति**। यादवप्रकाशमतं भाष्ये इत्थमनूदितम् - ये पुनः निरस्तनिखिलभोक्तृत्वादिविकल्पविप्लवं सर्वशक्तियुक्तं सन्मात्रद्रव्यमेव कारणं ब्रह्म। तच्च प्रलयवेलायां शान्ताशेषसुखदुःखानुभवविशेषं स्वप्रकाशमपि सुषुप्तावात्मवदचिदविलक्षणमवस्थितम्। सृष्टिवेलायां मृत्तिकाद्रव्यमिव घटशरावादिरूपं समुद्र इव च फेनतरङ्गबुद्बुदादिरूपः भोक्तृभोग्यनियन्तृ-रूपांशत्रयावस्थमवतिष्ठते। अतो भोक्तृभोग्यतियन्तृत्वानि तत्प्रयुक्ताश्च गुणदोषाः शरावत्वघटत्वमणिकत्ववत् तद्गतकार्यभेदवच्च व्यवतिष्ठन्ते। भोक्तृभोग्यनियन्तॄणां सदात्मना एकत्वं च घटशरावमणिकादीनां मृदात्मना एकत्ववदुपपद्यते। अतः सन्मात्रद्रव्यमेव सर्वावस्थावस्थितमिति ब्रह्मणोऽनन्यत् जगदातिष्ठन्ते - इति। अपि च ईश्वरस्य योऽहंभावः अहमिति बुद्धिः स नित्यः। जीवस्य अहम्भावः अनित्यः सुषुप्तावहमिति बुद्ध्यभावादिति तन्मतम्। तन्निरासकमिदमनुमानम्। विच्छेदरहितः नित्यः अहम्भावो यस्य जीवस्य तेन सद्वितीय इत्यर्थः। अनेन जीवस्यापि सुषुप्तावहमिति बुद्धिरस्तीति सिध्यति। दृष्टान्तस्तु संप्रतिपन्नजीवाहंभाववत् इति। जाग्रद्दशायां जीवस्याहंबुद्धिरस्ति इति उभयसंमतम्। एवं च जीवाहंभावः यथा विच्छेदरहितनित्याहंभाववता ईश्वरेण सद्वितीयः एवमीश्वरोऽपीति साधने अर्थात् ईश्वरातिरिक्तः नित्याहंभाववान् जीव इति सिध्यतीति तात्पर्यम्। अत्र शङ्कते **ईश्वराहंभावस्येति**। ईश्वरगताहंबुद्धेरपि प्रलयकालेऽभावात् विच्छेदराहित्यं नास्तीति

नित्यत्वाभावात् दृष्टान्तस्य साध्यविकलतेति चेन्न; तथा सतीश्वरस्य कदाचित् अचित्कल्पत्वादिप्रसङ्गात् । न चायमिष्टप्रसङ्ग इति वाच्यम्, सर्वज्ञत्वादिश्रुतीनां कालावच्छेदाभावात् । न च सर्वज्ञ इत्यादिशब्दाः शक्तिविषयाः, अनुशासनस्य, 'शक्तौ हस्ति...' इत्यादिना नियतविषयत्वात् । 'पराऽस्य शक्तिर्विविधैव श्रूयते स्वाभाविकी ज्ञानबलक्रिया च' इति ज्ञानशक्त्योः पृथक्स्वाभाविकत्ववचनाच्च । न च प्रलयादिषु निद्रानिर्देशात् कदाचिदज्ञता, तस्य निर्व्यापारदशामात्रविषयत्वात् ।

ईश्वरमादाय सद्वितीयत्वं दृष्टान्ते जीवाहंभावे नास्तीति साध्यविकलतेति शङ्का । समाधानं तु ईश्वरस्य कदाचित् बुद्ध्यभावेऽचित्कल्पत्वं स्यात् । न च तदिष्टमेवेति वाच्यम् । ईश्वरस्य कालावच्छेदं बिना सर्वज्ञत्वश्रुतेः इति । तत्र शङ्कते - **न च सर्वज्ञ** इति । सर्वज्ञशब्दस्य सर्वविषयकज्ञानानुकूलशक्तिमानित्यर्थः । अतः कदाचित् ज्ञानाभावेऽपि तच्छक्तिमात्रपरतया सर्वज्ञत्वश्रुतिरुपपादनीयेति शङ्कितुराशयः । समाधत्ते - **अनुशासनस्येत्यादिना** । "इगुपधज्ञाप्रीकिरः क" (पा. सू. ३-१-१३५) इति सूत्रेण सर्वं जानातीत्यर्थे ज्ञाधातोः कप्रत्यये सर्वज्ञपदं निष्पद्यते । एतदुक्तं भवति - जानातीति ज्ञः । ज्ञाधातोः कप्रत्यये आकारस्य लोपे ज्ञ इति रूपं भवति । सर्वस्य ज्ञः सर्वज्ञ इति विग्रहः । अत्र न शक्त्यर्थे कप्रत्ययानुशासनमस्तीति समाधानम् । **"शक्तौ हस्तीत्यादि"** शक्तौ हस्तिकवाटयोः" (पा.सू. ३-२-५४) इति पाणिनिसूत्रम् । हस्तिकवाटयोरुपपदयोः शक्तौ गम्यमानायां हनधातोष्टक् इति तदर्थः । हस्तिघ्नो भटः । हस्तिनं हन्तुं शक्त इत्यर्थः । एवं कवाटघ्नश्चोरः। एवं च केषांचिदेव कृत्प्रत्ययानां शक्त्यर्थकतत्वस्मरणात् ज्ञाधातोः विहितस्य कप्रत्ययस्य शक्त्यर्थकत्वास्मरणात् न शक्त्यर्थकत्वमिति भावः । **नियतविषयत्वादिति** । प्रत्ययविशेषमात्रविषयकत्वात् व्याकरणस्येत्यर्थः । **परास्येति** । शक्तिश्च स्वाभाविकी

‘व्यपगतनिद्राभयक्रोधतन्द्रिः’ इत्यादिश्रुत्यनुसारात्। न चावतारेष्वज्ञानादि दृष्टमिति वाच्यम्, तस्याभिनयरूपत्वात्। उक्तं हि महाभारते, ‘‘कालस्य हि च मृत्योश्च जङ्गमस्थावरस्य च। ईशते भगवानेकः सत्यमेतत् ब्रवीमि ते।। ईशन्नपि महायोगी सर्वस्य जगतः प्रभुः। कर्माण्यारभते कर्तुं कीनाश इव दुर्बलः।। तेन वञ्चयते लोकान् मायायोगेन केशवः। ये तमेव प्रपद्यन्ते न ते मुह्यन्ति मानवाः।।’’ इति। न च ‘सदेव’ इत्यादिवशात् प्रलयदशायां गुणादेरपि विलयः; चिदचिदीश्वरशक्तित्रयस्यापि विलयप्रसङ्गेन पुनस्सृष्ट्याद्यभावप्रसङ्गात्। सद्विद्यानिरूपणेनैव, ‘सदेव’ इत्यादेर्निर्विशेषपरत्वप्रतिक्षेपात्। अतः स्वाज्ञानमेव कुमतीनामविद्योपाध्यवस्थाविशेषाद्विप्रयुक्तमीश्वराज्ञान- कल्पन(क?)म् तदेवमभेदगन्धासहवैधर्म्यशतप्रतिष्ठितो यावदात्मभावी जीवेश्वरभेदः।

श्लो. स्वदुःखं यदि जानाति, नारभेत परः पुमान्।
यदि नैव विजानाति, नारभेत पुनः पुमान्।।

तदेतत् सर्वं, ‘विभेदजनकेऽज्ञाने इति श्लोकमुपक्षिप्य भाष्ये प्रपञ्चितम्।

।। इति शतदूषण्याम् जीवेश्वरैक्यभङ्गवादः सप्तत्रिंशः ।। ३७ ।।

ज्ञानबलक्रिया च स्वाभाविकीति शक्तेः ज्ञानस्य पृथक् स्वाभाविकत्वश्रुतेश्चेत्यर्थः। **अविद्येति**। अविद्याप्रयुक्तम् ईश्वरस्याज्ञानमिति शंकरमतम्। उपाधिप्रयुक्तमिति भास्करमतम् प्रलयावस्थाप्रयुक्तमिति यादवमतम्।

इति श्रीशतदूषणीव्याख्यायां तात्पर्यप्रकाशिकायां
जीवेश्वरैक्यभङ्गो नाम सप्तत्रिंशो वादः।।

॥ अथ अखण्डवाक्यार्थखण्डनवादः अष्टत्रिंशः ॥ ३८ ॥

(ज्ञानानन्दगुणोपेतं ज्ञानानन्दमयं महः ।
पायादपायात् भवतो भवबन्धविधायकात् ॥) (?)
सत्यज्ञानादिभिर्वाक्यैरखण्डं बोध्यमिच्छताम् ।
अहं करोमि मूर्खाणामहङ्करणखण्डनम् ॥

यत्तु जल्पन्ति, विगीतं वाक्यमखण्डार्थपरम्, समानाधिकरणवाक्यत्वात्, सोऽयं देवदत्त इत्यादिवाक्यवदिति–अत्र किमिदमखण्डार्थपरत्वम् ? (१)

अथ अखण्डवाक्यार्थखण्डनवादः अष्टत्रिंशः ॥

ज्ञानानन्दगुणोपेतं ज्ञानानन्दमयं महः ।
पायादपायात् भवतः भवबन्धविधायकात् ॥

पूर्वस्मिन् वादे जीवेश्वरैक्यं निरस्तम् । तत्प्रसङ्गात् तत्त्वमस्यादिवाक्यानां जीवेश्वरैक्यविवक्षया अखण्डार्थपरत्वं निरस्यतेऽस्मिन् वादे । **ज्ञानानन्देति** । यथा ''यः सर्वज्ञः'' इत्यादिवाक्यैः ज्ञानादिवैशिष्ट्यं प्रतिपाद्यते तथा सत्यादिवाक्यैः सत्यत्वादिवैशिष्ट्यं प्रतिपाद्यत इति तेषां नाखण्डार्थत्वमिति भावः । अखण्डत्वं वाक्यार्थत्वं च व्याहतम् । पदसमुदायो हि वाक्यम् । तद्घटकपदार्थानां परस्परमन्वय एव वाक्यार्थः । तस्य कथमखण्डत्वमिति सूच्यते । **अपायादिति** । संसारहेतुभूतात् पुण्यपापरूपादपायात् पायात् रक्षेदित्यर्थः ।

एवं भगवता कर्तव्यं प्रार्थ्य स्वकर्तव्यं प्रतिजानीते- **सत्यज्ञानादिभिरिति** । **विगीतमिति** । **सत्यज्ञानादिवाक्यमित्यर्थः** । **विगीतपदस्य** पक्षतावच्छेदकोपलक्षणार्थत्वात् सत्यज्ञानादिवाक्यत्वसामानाधिकरण्येन अखण्डार्थत्वस्य सिषाधयिषितत्वात् पक्षतावच्छेदकसामानाधिकरण्येन साध्यसिद्धेः; अनुमानफलतया तस्यैव पक्षतावच्छेदकत्वात् । **अखण्डार्थपरम्** = अखण्डार्थतात्पर्यकम् । अखण्डपदस्य संभावितानर्थान् मनसिकृत्य विकल्पयति - **किमिदमखण्डार्थपरत्त्वमिति** । **निरवयवेति**।

निरवयवार्थपरत्वं (२) अच्छेद्यार्थपरत्वं वा (३) निर्विशेषणपरत्वं वा (४) विशेष्यमात्रपरत्वं वा (५) निर्भेदार्थपरत्वं वा (६) भावरूपविशेषणरहितपरत्वं वा (७) एकविशेष्यपरत्वं वा (८) अन्यद्वा किंचित् इति।

न प्रथमद्वितीयौ; सिद्धसाधनात्; दृष्टान्तस्य साध्यविकलत्वाच्च । न हि देवदत्तपिण्डस्य निरवयत्वमच्छेद्यत्वं वा भवताऽभ्युपेतम् । नापि सोऽयं देवदत इति वाक्यादपि तथा प्रतीतिः । दृष्टान्तान्तरोपादानेऽपीह दुस्तरो व्यभिचारः ।

खण्डशब्दस्यावयवपरत्वेनायं विकल्पः । **अच्छेद्येति** । खण्डशब्दस्य च्छेद्यपरत्वेनायम् । **निर्विशेषणपरत्वं वा विशेष्यमात्रपरत्वं** वेति । निर्विशेषणपरत्वमित्यस्य विशेषणाभावविशिष्टविषयकत्व-वस्तुतोविशेषणाभावाश्रयत्वान्यतरपरत्वात्, विशेष्यमात्रपरत्वमित्यस्य विशेष्यविषयकत्वे सति विशेषणाविषयकत्वपरत्वात् अनयोर्विकल्पयोर्भेदः ।

न प्रथमद्वितीयाविति । किं वस्तुतो यत् निरवयवम् अच्छेद्यं वा तत्परत्वं (तद्बोधकत्वं) विवक्षितम्, किं वा निरवयवत्वाच्छेद्यत्वरूपेण तद्बोधकत्वम् । आद्ये आह **सिद्धसाधनादिति** । अस्माभिरपि निरवयवम् अच्छेद्यं च यद्ब्रह्म तद्बोधकतायाः सत्यज्ञानादिवाक्येषु स्वीकृतत्वात् सिद्धसाधनम् इत्यर्थः । **दृष्टान्तस्येति** । साध्यविकलत्वमुपपादयति - **न हीति** । सोऽयं देवदत्त इति वाक्यं हि देवदत्तशरीरविषयम्। देवदत्तशरीरस्य सावयवत्वेन छेदनयोग्यत्वेनं च निरवयवार्थबोधकत्वं वा अच्छेद्यार्थबोधकत्वं वा तस्य वाक्यस्य नास्तीति साध्यवैकल्यमित्यर्थः । द्वितीयं दूषयति- **नापीति** । सोऽयं देवदत्त इति दृष्टान्तवाक्यं निरवयवत्वेन वा अच्छेद्यत्वेन वा न देवदत्तं बोधयतीति साध्यवैकल्यमित्यर्थः । तस्य तद्देशकालवृत्तित्वेन एतद्देशकालवृत्तित्वेन च देवदत्तशरीरबोधकत्वादिति तात्पर्यम् । ननु जातिगुणादिविषयकं "सेयं जातिः" "सोऽयं गुण" इत्यादि वाक्यं दृष्टान्तः । तस्य निरवयवाच्छेद्यजातिगुणादिप्रतिपादकत्वान्न साध्यवैकल्यमित्याशङ्क्य तथापि सोऽयं देवदत्त इत्यादिवाक्ये उक्तसाध्याभाववति समानाधिकरणवाक्यत्वरूपहेतुसत्त्वात् व्यभिचारो दुर्वार इत्याह - **दृष्टान्तान्तरेति** ।

न तृतीयः । तन्न निर्विशेषणत्वमपि किं शब्दबोध्यत्वेनाभिमतम्, उत वस्तुगत्या ? आद्ये निर्विशेषणत्त्वलक्षणविशेषणविशिष्टार्थबोधनात् अविशिष्टार्थबोधकत्वाभिमानभङ्गः ॥ निर्विशेषणत्वं न विशेषणम्, अपि तु स्वरूपमेवेति चेत्; न; स्वरूपस्य सम्प्रतिपन्नत्वेनासाध्यत्वात् । तदा ह्यर्थपरमित्येतावदेवोक्तं स्यात् । तथाच सिद्धसाधनता ॥ तत्परिहारार्थं तर्ह्यखण्डविशेषणमिति चेत्–किं पर्यायपदोपादाने सिद्धसाधनताऽपैति? ॥ अखण्डपरमित्येतावत् प्रयुञ्जनो न चोद्येतेति

निर्विशेषणपरत्वम् अखण्डार्थत्वमिति तृतीयकल्पं दूषयति - **न तृतीय** इति । निर्विशेषणपरत्वमित्यनेन विशेषणाभावविशिष्टबोधकत्वं विवक्षितं वा, वस्तुगत्या विशेषणाभावाश्रयो यः तद्बोधकत्वं विवक्षितं वेति विकल्पः । किं निर्विशेषणत्वं विशेषणम् उत उपलक्षणमिति विकल्पाशयः । तत्राद्यं दूषयति- **आद्ये** इति । निर्विशेषणत्वलक्षणं विशेषणाभावरूपं यत् विशेषणं तद्विशिष्टार्थबोधकत्वस्य साध्यत्वे सत्यादिवाक्यानामविशिष्टार्थबोधकत्वमिति भवदभिमानस्य भङ्गः । स्वरूपातिरिक्ताबोधकत्वाभिमानभङ्ग इति यावत् । ननु निर्विशेषणत्वं विशेषणाभावः । तच्च न स्वरूपातिरिक्तं विशेषणम् अपि तु स्वरूपमेव । तथा च स्वरूपातिरिक्ताबोधकत्वमस्त्येवेति शङ्कते- **निर्विशेषणत्वमिति। न विशेषणमिति** । न स्वरूपातिरिक्तप्रकार इत्यर्थः । यदि निर्विशेषणत्वं स्वरूपमेच तर्हि स्वरूपपरत्वं साध्यं भवति । शब्दस्य स्वरूपपरत्वं संप्रतिपन्नमिति सिद्धसाधनप्रसङ्गान्न तस्य साध्यत्वमिति भावः । न च स्वरूपे विशेषणाभावात्मकत्वस्यासंप्रतिपन्नत्वेन-असिद्ध्या न सिद्धसाधनमिति वाच्यम् । एवमपि विशेषणाविषयकत्वस्यासिद्ध्या सगुणवाक्याविशेष इति भावः ।

सिद्धसाधनभयात् अखण्डेति विशेषणं ददतः तवापि स्वरूपपरत्वसाधने सिद्धसाधनता संमतैवेति वक्तुं साध्यैकदेशभूतार्थपरत्वे पर्यवसानमाह- **तदा हीति** । ननु अर्थपरत्वमात्रे साध्ये सिद्धसाधनता यतो भवति अत एवारवण्डेति अर्थविशेषणं दत्तमिति आपाततः शङ्कते- **तत्परिहारार्थमिति** । किम् अखण्डपदस्य स्वरूपमात्रमर्थः उत यत्किंचिदित्यर्थः अथवा विशेषणाभाव विशिष्टमिति विकल्प्य नाद्य इत्याह - **किं पर्यायपदेत्यादिना** । अखण्डपदस्य

चेत्–तदपि दत्तोत्तरम्; यत्किंचिदर्थपरमिति विवक्षिते सिद्धसाधनात्; विशेषणाभावविशिष्टपरमिति पूर्वोक्तविरोधात् । द्वितीये तु सगुणब्रह्मप्रतिपादकस्य वाक्यस्य (अस्य च?) न कश्चिद्विशेषः । तदपि हि वस्तुगत्या निर्विशेषणमेव वक्ति भवतः ॥ विशेषणप्रतिपादनाप्रतिपादनाभ्यां वैषम्यमिति चेत्; न, प्रातीतिकप्रतिपादनस्य परमार्थतोऽप्रतिपादनस्य चोभयत्रापि समानत्वात्; अस्मन्मते

स्वरूपपरत्वेऽर्थपदपर्यायता । ततश्च सिद्धसाधनम् । न च अर्थपदं परित्यज्य अखण्डपरमिति साध्यत इति वाच्यम् । तथापि सिद्धसाधनात् । स्वरूपपरत्वस्य संप्रतिपन्नत्वात् । तदाह- **तदपि दत्तोत्तर**मिति । द्वितीयं दूषयति - **यत्किंचिदिति** । तदाहि यत्किंचिदर्थपरमिति साध्यं स्यात् । तदपि सिद्धमिति सिद्धसाधनमिति भावः । तृतीयं दूषयति - **विशेषणाभावेति** । विशेषणाभावविशिष्टार्थपरत्वे साध्ये अविशिष्टार्थबोधकत्वाभिमानभङ्गादिति भावः ।

न तृतीय इत्यारभ्य कृतेषु त्रिषु विकल्पेषु उत वस्तुगत्येति द्वितीयकल्पं दूषयति - **द्वितीये तु** इति । सत्यज्ञानादिवाक्यमखण्डार्थम्, यः सर्वज्ञ इत्यादिवाक्यं सखण्डार्थमिति विशेषो न स्यात् । सगुणवाक्यानामपि भवन्मतरीत्या वस्तुगत्या निर्विशेषणवस्तुप्रतिपादकत्वात् इति भावः । ननु वस्तुगत्या निर्विशेषणविषयकत्वे सति विशेषणाप्रतिपादकत्वमखण्डार्थत्वम् । अतो न सत्यादिवाक्यसगुणवाक्ययोरविशेषः । सगुणवाक्यस्य विशेषणप्रतिपादकत्वादिति शङ्कते-**विशेषणप्रतिपादनेति** । समाधत्ते-**प्रातीतिकेति** । भवन्मते सगुणवाक्यानां न वस्तुतो विशेषणप्रतिपादकत्वम्, अपि तु प्रातीतिकम्, भ्रान्तिसिद्धम् । तथा च विशेषणप्रतिपादकत्वभ्रमः वस्तुतस्तदप्रतिपादकत्वमित्यायातम् । ततश्च सगुणनिर्गुणवाक्ययोर्नास्ति विशेष इति भावः । सगुणवाक्यानां विशिष्टप्रतिपादकत्वं व्यावहारिकम् । सत्यादिवाक्यानां तु विशिष्टप्रतिपादकत्वं प्रातीतिकमिति वैषम्यमसिद्धम् । त्वदुक्ततर्कप्रतिसन्धानशून्यानां निर्गुणवाक्यानामपि सगुणवाक्यानामिव गुणविशिष्टार्थबोधकत्वस्य दर्शनात्, तस्य ब्रह्मज्ञानेतराबाध्यत्वाच्च वस्तुतो निर्विशेषणविषयत्वे

वस्तुतस्सविशेषणेऽपि, देवदत्तः श्यामो युवेत्यादिवाक्यानां प्रवृत्तिदर्शनात् दृष्टान्तस्य साध्यविकलत्वाच्च । त्वन्मते तु व्यधिकरणवाक्यानामपि परमार्थविशेषणशून्यार्थविषयत्वेन हेतुविशेषणवैयर्थ्यम् ।

नापि चतुर्थः; विशेष्यस्वरूपस्यैव मात्रशब्देनोपादाने सिद्धसाधनत्वात्; अतिरिक्तोपादाने विवक्षितासिद्धेः ॥ पदप्रतिपन्नविशेषणत्यागस्तेन विवक्षित इति चेत्— स (१) किं वाच्यत्वेन विवक्षितः, (२) उत तत्राविद्यमानतामात्रेण, (३) उत

सतीति विशेषणवैयर्थ्यं चात्रानुसन्धेयम् ।

किं च विगीतं वाक्यमखण्डार्थपरम् समानाधिकरणवाक्यत्वादित्यनुमाने समानाधिकरणवाक्यान्तरं दृष्टान्तः । तत्र देवदत्तः श्यामो युवेत्यादिसमानाधिकरणवाक्येषु श्यामत्वयुवत्वादिविशेषणविशिष्टार्थपरेषु निर्विशेषणार्थपरत्वरूपसाध्याभावात् साध्यवैकल्यमित्याह-**अस्मन्मत** इति । **त्वन्मते** तु इति । भवन्मते व्यधिकरणवाक्यानामपि वस्तुतो विशेषणशून्यार्थविषयकत्वेन तद्व्यावर्तकतया अभिमतं निर्विशेषणविषयकत्वे सतीति विशेषणवैयर्थ्यमित्यर्थः ।

विशेष्यमात्रपरत्वमखण्डार्थत्वमिति चतुर्थकल्पं दूषयति- **नापि चतुर्थ** इति । मात्रशब्देन विशेष्यस्वरूपविवक्षायां विशेष्यस्वरूपपरत्वमखण्डार्थत्वमिति फलति । तच्च सत्यादिवाक्यानामस्माभिरप्यङ्गीकृतमिति सिद्धसाधनम् । मात्रशब्देन स्वरूपातिरिक्तोपादाने स्वरूपातिरिक्तपरत्वमखण्डार्थत्वमित्यायाति । तच्च न भवदभिमतमिति भवद्विवक्षितार्थासिद्ध्या अर्थान्तरमिति भावः । **विशेष्यस्वरूपस्यैवेति** । स्वार्थिकप्रययान्तेषु स्वरूपमात्रपरत्वस्य दर्शनात् अत्रापि तत्संभावनया विकल्पोऽयम् । **अतिरिक्तोपादान** इति । स्वरूपातिरिक्तार्थकेषु विभक्त्यादिषु विशेषणपरत्वस्य दर्शनादत्रापि तत्संभावनया विशेषणपरत्वे अखण्डार्थत्वासिद्धिरित्यर्थः । ननु विशेष्यमात्रपरत्वमित्यनेन पदप्रतिपन्नस्य विशेषणस्य त्यागो विवक्षितः इति शङ्कते - **पदप्रतिपन्नेति** । प्रसक्तस्यैव त्याग इति प्रसङ्गसम्पादनार्थं पदप्रतिपन्नेत्युक्तम्, न तु पदाप्रतिपन्नविशेषणस्यात्याज्यताभिप्रायेण । समाधानार्थं त्यागशब्दार्थं विकल्पयति - **स किमिति** । विशेषणानां त्यागः किं

विशेषणानां बोधनव्यापारागोचरत्वेन ? आद्ये बोध्यवैशिष्ट्यप्रसङ्गः, सत्यपदस्यासत्ये तात्पर्यमिति व्याहतवर्णनप्रसङ्गश्च । साध्यवैकल्यञ्च; तदिदंशब्दयोस्तत्तेदन्ताभावप्रतिपादकत्वाभावात् । द्वितीयेऽपि, पूर्ववत् सगुणब्रह्मवाक्यसमानतया तेषामप्यस्वण्डपरत्वप्रसङ्गः । साध्यवैकल्यं च; देवदत्तस्य कालद्वयसम्बन्धाभावे

पदवाच्यत्वेन विवक्षितः, उत विशेषणानां पदवाच्येऽविद्यमानतामात्रेण, अथवा विशेषणानां बोधनव्यापाराविषयत्वेनेति त्रेधा विकल्पः । अंखण्डार्थत्वविकल्पवाक्ये विशेष्यमात्रपदस्य विशेषणाभाववद्विशेष्यपरत्वं विशेषणाभावस्य विशेषणत्वं च विवक्षित्वा अत्र प्रथमविकल्पः। विशेषणाभावस्योपलक्षणत्वं विवक्षित्वा द्वितीयविकल्पः । विशेषणत्याग इत्यत्र त्यागशब्दस्याभावपरत्वाभिप्रायेणैतद्विकल्पद्वयम् । विशेष्यमात्रशब्दस्य विशेषणत्यागशब्दस्य च स्वारसिकार्थाभिप्रायेण तृतीयविकल्पः । तथा च विशेषणाभावविशिष्टविशेष्यबोधकत्वं वा विशेषणाभावोपलक्षितविशेष्यबोधकत्वं वा विशेषणाबोधकत्वं वेति त्रेधा विकल्पः पर्ययसन्नः । तत्र प्रथमकल्पे दोषमाह - **आद्ये** इति । सत्यज्ञानादिवाक्यानां विशेषणाभावविशिष्टविशेष्यबोधकत्वस्वीकारे बोध्यस्य विशिष्टात्मकत्वप्रसङ्ग; विशिष्टबोधनप्रसङ्ग इति यावत् । तथा च पूर्वोक्ताविशिष्टार्थबोधकत्वाभिमानभङ्ग इति भावः। **द्वितीयेऽपीति** । विशेषणाभावोपलक्षितार्थबोधकत्वमिति द्वितीयपक्षे सगुणब्रह्मवाक्यानामपि पूर्ववत् वस्तुतो विशेषणाभावाश्रयार्थबोधकतया तेषामप्यखण्डार्थपरत्वप्रसङ्ग इति भावः । अत्र पक्षे दोषान्तरमप्याह - **साध्यवैकल्यं चेति** । तदुपपादयति-**देवदत्तस्येति** । सोऽयं देवदत्त इति दृष्टान्तवाक्येन देवदत्तस्य कालद्वयसंबन्धरूपविशेषणाभावाश्रयस्य बोधने देवदत्तस्य क्षणिकत्वप्रसङ्गात् विशेषणाभावाश्रयबोधकत्वं तस्य वाक्यस्य नास्तीति वक्तव्यम् । तथा च दृष्टान्ते साध्यवैकल्यमिति भावः । **तृतीयेऽपीति** । तृतीयकल्पे द्वेधा विकल्पः किं सर्वेषां पुरुषाणां सत्यज्ञानादिवाक्यानि विशेषणाबोधकानि, उत निरूपकाणां पुरुषाणामिति विकल्पः । तत्र नाद्यः, भवदभिमततर्कानभिज्ञानां तदभिज्ञत्वेऽपि तत्र विश्वासरहितानां च पुरुषाणां विशेषणविशिष्टस्यैवार्थस्य तद्वाक्येभ्यो बोधात् । न द्वितीयः ।

क्षणिकत्वप्रसङ्गात्। तृतीयेऽपि, किं सर्वेषां तथाविधबोधनव्यापारत्वमभिमतम्, उत निरूपकाणाम् ? नाद्यः, भवदभिमततर्कानभिज्ञानाम्, तदभिज्ञत्वेऽपि तदविश्वासिनां च तद्विशेषणविशिष्टप्रतीतेः। न द्वितीयः; असिद्धेः। अनुपपत्त्यभावस्य वक्ष्यमाणत्वात्।

नापि पञ्चमः, व्यावृत्तिपरत्ववर्णनस्यापि निर्मूलत्वप्रसङ्गात्। अनृत-जड-परिच्छिन्नव्यावृत्तिपरतया हि पदत्रयव्यावृतिरभिमता ।। सजातीयभेदराहित्यं विवक्षितमिति चेत्-न; तस्यैतच्छब्दप्रतिपाद्यत्वाभावात् विशेषणविशिष्टत्वेऽपि तत्सिद्ध्यविरोधाच्च। पूर्ववच्च साध्यवैकल्यं स्यात्। जडादिभेदस्य मिथ्यात्वाभ्युपगमे अन्यत्रोत्तरमुक्तम्।

परीक्षकाणां विशेषणाबोधस्यासिद्धेः। विशेषणविशिष्टबोधकत्वे अनुपपत्त्यभावस्य वक्ष्यमाणत्वादिति भावः। **सर्वेषामिति**। पुरुषाणामिति शेषः। **निरूपकाणामिति**। परीक्षकाणामित्यर्थः। **अविश्वासिनामिति**। असमीचीनत्वज्ञानवतामित्यर्थः।

अथ निर्भेदार्थपरत्वमखण्डार्थत्वमिति पञ्चमकल्पं दूषयति - **नापि पञ्चम** इति। सत्यपदमसत्यव्यावृत्तब्रह्मपरम्, ज्ञानपदं जडव्यावृत्तब्रह्मपरम्। अनन्तपदं परिच्छिन्नव्यावृत्तब्रह्मपरमिति भवद्भिः वर्णनात् व्यावृत्तेश्च भेदरूपतया असत्यादिप्रतियोगिकभेदाश्रयब्रह्मपरत्वात् सत्यज्ञानादिवाक्यस्य निर्भेदार्थपरत्वं नास्तीति बाध इत्यर्थः। **पदत्रयव्यावृत्तिरिति**। सत्यादिपदानां परस्परं भिन्नार्थत्वम्, अपर्यायत्वमिति यावत्।

ननु निर्भेदार्थत्वं नाम सजातीयभेदरहितार्थपरत्वम्। तथा च न बाध इति शङ्कते - **सजातीयेति**। **एतच्छब्देति**। **तस्य** = सजातीयभेदराहित्यस्य **एतच्छब्दप्रतिपाद्यत्वाभावात्** = अखण्डशब्दप्रतिपाद्यत्वाभावात्। तत्सिद्ध्यविरोधात् = सजातीयभेदराहित्यसिद्धेः अनुपपत्त्यभावात्। **पूर्ववच्चेति**। अयं सर्वकल्पसाधारणो दोषः। सोऽयं देवदत्त इति दृष्टान्तवाक्ये सजातीयभेदरहितार्थबोधकत्वरूपसाध्याभावात् साध्यवैकल्यं दोष इति भावः।

न च षष्ठः, भावरूपविशेषणदूषकाणां तर्काणाम् अभावरूपविशेषणैस्सह का पैतृष्वस्रीयता ? तैरपि सम्बन्धाभावात्। तथाच–

श्लो भावो यथा तथाऽभावो निर्विशेषत्वबाधकः ।
अबाधकत्वे, भावेऽपि बाधकत्वकथा मुधा ।।
वाक्यार्थस्य सस्वण्डत्वं भावेन यदि जायते ।
अभावेनापि जायेत सखण्डत्वमखण्डितम् ।।

भावरूपविशेषणरहितपरत्वमखण्डार्यत्वमिति षष्ठपक्षं दूषयति - **न च षष्ठ** इति । ब्रह्मण; भावरूपाणि विशेषणानि न सन्तीति यैस्तर्कैः साध्यते, तैरेव तर्कैरभावरूपाणि विशेषणान्यपि न सन्तीति साधयितुं शक्यते । अन्यथा भावरूपविशेषणदूषकाः तर्का अभावरूपाणि विशेषणान्यनुमन्यन्ते चेत् तर्हि तेषां तर्काणामभावरूपविशेषणैः सह स्नेहोऽस्तीति वक्तव्यम् । तादृशं स्नेहं तु न पश्याम इति परिहासोक्तिरियम् । इत्थं च सत्यज्ञानादिवाक्यानि भावरूपविशेषणरहितब्रह्मबोधकानीति वदद्भिः अभावरूप-विशेषणवत्त्वमङ्गीकृतं भवतीति निर्विशेषार्थबोधकत्वाभिमानभङ्ग इति तात्पर्यम् । **पैतृष्वस्रीयता** इत्यस्य मैत्री, इत्यर्थः । **तैरपीति** । भावरूपविशेषणैरपीत्यर्थः । अद्वैत-श्रुतिबलात् ब्रह्मणो भावरूपविशेषणेनेव अभावरूपविशेषणेनापि संबन्धाभावादित्यर्थः ।

भावो यथेति । भावरूपं विशेषणं यथा निर्विशेषत्वबाधकम्, तथा अभावरूपं विशेषणमपि तद्बाधकम् । अभावरूपं विशेषणं निर्विशेषत्वबाधकं न भवति चेत् भावरूपं विशेषणमपि न तद्बाधकं भवेत्, उभयोः विशेषणत्वाविशेषादित्यर्थः । अत्र भावः निर्विशेष-त्वाबाधकः विशेषणत्वात् अभाववत् इति, अभावः निर्विशेषत्वबाधकः विशेषणत्वात् भाववत् इति चानुमाने विवक्षिते । अथवा ब्रह्मणः भावरूपविशेषणवत्त्वेऽपि निर्विशेषत्वभङ्गप्रसङ्ग इति, अथवा ब्रह्मणः अभावरूपविशेषणवत्त्वे निर्विशेषत्वाविरोधवत् भावरूपविशेषणवत्त्वेऽपि तदविरोध इति च तर्कौ विवक्षितौ ।

वाक्यार्थस्येति । वाक्यप्रतिपाद्योऽर्थः यदि भावरूपविशेषणवान् स्यात् तदा सखण्डः अभावरूपविशेषणवत्त्वेऽपि सखण्डत्वं स्यात् ।
स्यात् इति यद्युच्यते तदा वाक्यार्थस्य

भावान्तरमभावो वा यद्वा भावान्तराधिकः ।
न खण्ड्यते सखण्डत्वं द्वयोरपि च पक्षयोः ।।

देवदत्तः श्यामो युवेत्यादिभिरनैकान्त्याच्च ।। प्रत्यक्षबलात् तत्र वैशिष्ट्यम्; अत्र तु शब्दैकसमधिगम्यत्वात् यथाशब्दं व्यवस्थेति चेत्—तर्हि शब्दैकसमधिगम्यार्थविषयत्वे सति समानाधिकरणवाक्यत्वादिति हेतुः स्यात् ।

विशेषणवत्त्वाविशेषादित्यर्थ; । तथा च भावरूपविशेषणविशिष्टार्थबोधकं वाक्यं सखण्डार्थम्, अभावरूपविशेषणविशिष्टार्थबोधकं वाक्यमखण्डार्थमिति विभागो न स्यादिति भावः ।

भावान्तरमिति । अभावः भावान्तरस्वरूप इति केचित् भावादतिरिक्त इति केचित्। पक्षद्वयेऽपि भावरूपविशेषणवत्त्वं वा अभावरूपविशेषणवत्त्वं वा न खण्डयितुं शक्यत इत्यर्थः ।

किं च सत्यज्ञानादिवाक्यं भावरूपविशेषणरहितार्थबोधकं समानाधिकरणवाक्यत्वात् सोऽयं देवदत्त इत्यादिवाक्यवत् इत्यनुमानं हि भवदभिमतम् । तत्रानुमाने देवदत्तः श्यामो युवा लोहिताक्ष इत्यादिवाक्ये व्यभिचारः । तद्वाक्ये श्यामत्वयुवत्वादिभावरूपविशेषणविशिष्टार्थबोधकत्वेन तद्रहितार्थबोधकत्वरूपसाध्याभावात् समानाधिकरणवाक्यत्वरूपहेतुसत्त्वाच्चेत्याह - **देवदत्त** इति ।

शङ्कते - **प्रत्यक्षवलादिति** । प्रत्यक्षेण देवदत्ते श्यामत्वादिभावरूपविशेषणस्य प्रतीतत्वात् समानाधिकरणवाक्यत्वेऽपि न तत्र भावरूपविशेषणरहितपरत्वम् । ब्रह्मणस्तु प्रमाणान्तरागोचरत्वात् प्रमाणान्तरेण विशेषणवैशिष्ट्याप्रतीतेः श्रुतेः तद्रहितपरत्वमुपपद्यत इति शङ्का । समाधत्ते-**तर्हीति** । पूर्वोक्तव्यभिचारपरिहारार्थं शब्दैकसमधिगम्यार्थविषयकत्वे सति समानाधिकरणवाक्यत्वात् इति हेतुः प्रयोक्तव्यः । देवदत्तः श्यामो युवेत्यादिवाक्यस्य शब्दैकसमधिगम्यार्थविषयकत्वाभावान्न व्यभिचारः । तथापि दृष्टान्ते सोऽयं देवदत्त इत्यादिवाक्ये शब्दैकसमधिगम्यार्थविषयकत्वरूपविशेषणाभावेन तद्विशिष्टहेत्वभावात् साधनवैकल्यं दुर्वारमिति भावः । अपि च सोऽयं देवदत्त इत्यादिवाक्यस्य कालद्वय

तथा सति दृष्टान्तस्य साधनविकलत्वप्रसङ्गः स्यात्। न हि, सोऽयं देवदत्तः इत्येतद्वाक्यमतीन्द्रियार्थविषयम्। पूर्ववत् साध्यवैकल्यं च।

सप्तमस्त्वस्मत्पक्ष एवेति सिद्धसाधनमेव। अष्टममपि विकल्पं (अष्टममपि कल्पं ?) विकल्पयामः, तत् किं निर्विवादयत्किंचिद्बोधनमात्रादधिकम्, उतानधिकम् ? आद्ये विशिष्टपरत्वमकामेनापि स्वीकार्यम् । द्वितीये तु सिद्धसाधनत्वमेव।

विगीतं वाक्यमिति किं तत्त्वमसिसत्यज्ञानादिमात्रं विवक्षितम्, उत सोऽयं देवदत्त इति वाक्यव्यतिरिक्तं सर्वमपि समानाधिकरणवाक्यम् ? नाद्यः, देवदत्तः श्यामो युवा लोहिताक्ष इत्यादिभिरनैकान्त्यात्। न द्वितीयः, तैरेव कालात्ययापदेशात्।

संबन्धरूपभावरूपविशेषणविशिष्टार्थपरतया तद्रहितार्थपरत्वरूपसाध्याभावात् साध्यवैकल्यमपि दोष इत्याह - **पूर्ववदिति**। ''देवत्तस्य कालद्वयसंबन्धाभावे क्षणिकत्वप्रसङ्गादिति पूर्वोक्तरीत्येत्यर्थः।

अथ एकविशेष्यपरत्वमण्डार्थत्वमिति सप्तमकल्पं दूषयति - **सप्तमस्त्विति**। सत्यज्ञानादिवाक्यानामनेकविशेषणविशिष्टैकविशेष्यपरतायाः अस्माभिरङ्गीकृतत्वेन अस्मान् प्रति सत्यज्ञानादिवाक्यम् एकविशेष्यपरमिति प्रयोगे सिद्धसाधनं दोष इति भावः।

अथ अन्यद्वा किंचिदिति अष्टमविकल्पं दूषयति **अष्टममपीति**। **तत्किमिति**। किं यत्किंचिद्रूपमखण्डार्थत्वं संप्रतिपन्नयत्किंचिद्बोधनादधिकबोधने पर्यवसन्नम् उत नेत्यर्थः। आद्ये अधिकबोधनस्य अधिकविशेषबोधनरूपतया विशिष्टार्थबोधकत्वमकामेनापि स्वीकार्यमिति अविशिष्टार्थबोधकत्वाभिमानभङ्गः। द्वितीये तु सिद्धसाधनमिति।

एतावता साध्यांशः खण्डितः। अथ पक्षांशं खण्डयति- **विगीतमित्यादिना**। विगीतं वाक्यमित्यनेन किं तत्त्वमसि, सत्यं ज्ञानमित्यादिवाक्यमात्रं विवक्षितम्, उत सोऽयं देवदत्त इत्यादिवाक्यव्यतिरिक्तं सर्वमपि समानाधिकरणवाक्यं विवक्षितम् । नाद्य;, अखण्डार्थत्वरूपसाध्याभाववत्सु देवदत्तः श्यामो युवा लोहिताक्ष इत्यादिवाक्येषु

न हि, सोऽयं देवदत्त इत्यादिवाक्यस्येव देवदत्तः श्याम इत्यादिवाक्यस्य विरोधाभासोऽप्यस्ति।

आहुश्च, "सर्वस्यापि च पक्षत्वे बाध एव प्रसज्यते। अनैकान्तिकता तु स्यात् पक्षीकारे च कस्यचित्॥ वाक्यत्वादिति हेतुश्च स्वरूपासिद्धतां व्रजेत्। आकांक्षादित्रयाभावे; तद्भावे क्वाविशिष्टधीः॥" (इति)।

समानाधिकरणवाक्यत्वरूपहेतुसत्त्वेन व्यभिचारात्। न द्वितीयः तेष्वेव देवदत्तः श्यामो युवेत्यादिवाक्येषु अखण्डार्थत्वरूपसाध्याभावेन बाधात् इत्यर्थः।

बाधमेवोपपादयति - **न हीति**। सोऽयं देवदत्त इत्यत्र तत्कालावच्छिन्नस्य एतत्कालवैशिष्ट्ये एतत्कालावच्छिन्नस्य तत्कालवैशिष्ट्ये च युगपत्कालद्वयसंबन्धापत्तिः, अवच्छेदकस्य अवच्छेद्यसमानकालत्वात्। युगत्कालद्वयसंबन्धश्च विरुद्ध इति अखण्डार्थत्वं भवद्भिः उपपादितम्। देवदत्तः श्यामो युवेत्यादिषु तु तादृशो विरोधो नास्ति। युगपत् श्यामत्वाद्यनेकविशेषणवत्त्वदर्शनात्। तथा च तत्राखण्डार्थत्वाभावात् बाध इति भावः।

सर्वस्यापीति। सोऽयमिति वाक्यातिरिक्तस्य सर्वस्य समानाधिकरणवाक्यस्य पक्षत्वे पक्षान्तर्गते देवदत्तः श्यामो युवेत्यादिवाक्ये अखण्डार्थत्वरूपसाध्याभावेन बाधः प्रसज्यते। **कस्यचित्** तत्त्वमसिसत्यज्ञानादिवाक्यमात्रस्य पक्षत्वे देवदत्तः श्यामो युवेत्यादिवाक्येऽनैकान्तिकत्वं प्रसज्यत इत्यर्थः। **वाक्यत्वादितीति**। पक्षभूते सत्यज्ञानादिवाक्ये आकाङ्क्षायोग्यतासत्तित्रयमस्ति वा न वा? अस्ति चेत् विशिष्टार्थबोधकत्वमेव स्यात्। तेषां त्रयाणामनेकपदार्थसंसृष्टैकप्रधानार्थबोधकत्वव्युत्पत्तेः। तथा च अविशिष्टार्थबोधकत्वरूपसाध्याभावात् बाधः। नास्ति चेत् वाक्यत्वरूपहेत्वभावात् स्वरूपासिद्धिः इति भावः। आकाङ्क्षादित्रयविशिष्टपदकदम्बकस्यैव वाक्यत्वादिति तात्पर्यम्। आकाङ्क्षादित्रयाभावे इत्यस्य स्वरूपासिद्धतां व्रजेदिति पूर्वेणान्वयः। **तद्भावे** = आकाङ्क्षादित्रितयसद्भावे।

यच्च–अस्मिन्नेव साध्ये लक्षणवाक्यत्वात् प्रकृष्टप्रकाशश्चन्द्र इति वाक्यवदिति प्रयोगः–सोऽप्येतैरेव दूषणैर्निरस्तप्रायः । प्रतिज्ञाहेत्वोर्विरोधश्च, लक्षणस्यासाधारणधर्मत्वात् । किं च प्रकृष्टप्रकाशश्चन्द्रः इत्यत्र प्रकृष्टप्रकाशत्वं किं

अयोग्यार्थस्य वाक्यत्वमेव नास्तीति मतानुसारेण त्रयाभाव इत्युक्तम् । यद्वा अखण्डार्थप्रमापकत्वं साध्यम् । प्रमाणवाक्यत्वादिति हेतुरित्यभिप्रायः । वस्तुतस्तु साध्ये न प्रमाप्रवेशः । अप्रमाणवाक्ये अखण्डार्थत्वस्यैवाभावात् । प्रमाणभूते समानाधिकरणवाक्ये एकस्यैव पदार्थद्वयाभेदरूपत्वात् तस्मिन् पर्यवसानं युक्तम् । अप्रमाणवाक्ये तु कस्यापि तथात्वाभावात् विनिगमकाभावान्नैकस्मिन् पर्यवसानम् । विनिगमकाभावादेव स्वस्वाभेदरूपे उभयत्र पर्यवसानेऽपि एकप्रातिपदिकार्थनिष्ठत्वमखण्डार्थत्वं न सिध्यति । किं च एकैकपदार्थस्य स्वस्वाभेदरूपत्वे इतरपदार्थभेदरूपत्वाभावात् तत्रेतरपदार्थभेदसंशयादिनिवृत्तिः इतरपदार्थतादात्म्यबोधनादिनैव वाच्येति संसर्गप्रमापकत्वमपि तत्रावश्यकम्। तथा च वाक्यत्वमात्रस्य तत्राखण्डार्थत्वव्यभिचारित्वात् प्रमाणत्वमपि तत्रान्तर्भाव्यम् । तच्चाकाङ्क्षादित्रयाभावे न भवतीत्यर्थः । **तद्भाव** इति । आकाङ्क्षायाः अजनितान्वयबोधत्वरूपत्वात् योग्यताया अन्वयाबाधरूपत्वात् संनिधानस्य अन्वयप्रतियोग्युपस्थितिरूपत्वाच्चेत्यर्थः - इति **चण्डमारुतकाराः** ।

अखण्डार्थत्वसाधकतया चित्सुखाचार्याद्युक्तं हेतुमनुवदति - **यच्चास्मिन्नेव साध्ये** इति । अखण्डार्थत्वरूपे साध्ये इत्यर्थः । तथा च सत्यज्ञानादिवाक्यम् अखण्डार्थम् लक्षणवाक्यत्वात् प्रकृष्टप्रकाशश्चन्द्र इति वाक्यवत् इत्यनुमानप्रयोगः । **निरस्तप्राय** इति । पक्षसाध्यविकल्पपूर्वकमुक्ता दोषा अत्राप्यावर्तनीयाः । साक्षात् तत्प्रयोगोपादानेन पूर्वं दूषणाकथनात् **प्राय** इत्युक्तम् । पूर्वमनुक्तं दूषणमाह **प्रतिज्ञाहेत्वोरिति** । लक्षणवाक्यत्वमसाधारणधर्मप्रतिपादकवाक्यत्वम् । अखण्डार्थत्वं निर्धर्मकार्थप्रतिपादकत्वम् । तयोः एकत्रावृत्तितया विरोध इत्यर्थः । अथ दृष्टान्तशोधनपूर्वकं दूषयति- **किं चेति** । प्रकृष्टप्रकाशत्वं किं चन्द्रशब्दप्रवृत्तिनिमित्ततया विवक्षितम्, उत

चन्द्रशब्दप्रवृतिनिमिततया विवक्षितम्, उत तदुपलक्षणतया ? आद्ये चन्द्रशब्दस्य स्ववाच्यतापरत्वात् प्रवृत्तिनिमित्तभेदेन वैशिष्ट्यं स्यात् । अन्यथा चन्द्रशब्दस्य तत्रापि निष्प्रयोजनत्वप्रसङ्गात् । सामानाधिकरण्यस्यासिद्धिप्रसङ्गाच्च । न हि पर्यायेणापि सामानाधिकरण्यम् । 'भिन्नप्रवृत्तिनिमित्तानां शब्दानामेकस्मिन्नर्थे वृत्तिः सामानाधिकरण्यम्' इति हि तल्लक्षणम् । द्वितीयेऽप्युपलक्षणीयोपलक्षणाकारद्वयप्रतिपादनात् वैशिष्ट्यं सुस्थितमेव । प्रतिपन्नाकारोऽप्यधिक इति प्रागेवोक्तम् । प्रकृष्टप्रकाशश्चन्द्र इतिवदित्यत्र प्रकाशमात्रविवक्षायां सर्वप्रकाशानामपि

चन्द्रशब्दप्रवृत्तिनिमित्तोपलक्षणतया विवक्षितम्, यथा गोसदृशो गवय इत्यत्र गोसादृश्यं गोशब्दप्रवृत्तिनिमित्तगोत्वोपलक्षणं तद्वत् । **तदुपलक्षणतयेत्यस्य** चन्द्रशब्दप्रवृत्तिनिमित्तोपलक्षणतयेत्यर्थः । **आद्य** इति । प्रकृष्टप्रकाशश्चन्द्र इत्यत्र चन्द्रशब्दस्य चन्द्रशब्दवाच्य इत्यर्थः । तथा च चन्द्रपदवाच्यत्वप्रकृष्टप्रकाशत्वरूपप्रवृत्तिनिमित्तभेदात् प्रकृष्टप्रकाशचन्द्रपदयोः, तदुभयवैशिष्ट्यं वाक्यार्थः स्यात् इत्यर्थः । **अन्यथेति** । चन्द्रपदस्य चन्द्रपदवाच्यत्वपरत्वाभावे प्रकृष्टप्रकाशपदानतिरिक्तार्थकत्वात् वैयर्थ्यं स्यादित्यर्थः । (तत्रापीति मूले अपिशब्दो मा भूत् । तत्सत्त्वे चन्द्रश्चन्द्र इत्यत्रेव प्रकृष्टप्रकाशपदसमभिव्याहारस्थलेऽपीत्यर्थः । इति उत्तमूरुस्वामिनः ।) **न हीति** । पर्यायशब्दयोः सामानाधिकरण्यं न भवति । घटः कलश इति प्रयोगाभावात् । भिन्नप्रवृत्तिनिमित्तकयोः पदयोरेकार्थवृत्तित्वस्यैव सामानाधिकरण्यरूपत्वादित्यर्थः । **द्वितीयेऽपीति** । चन्द्रपदप्रवृत्तिनिमित्तस्य प्रकृष्टप्रकाशत्वमुपलक्षणमिति द्वितीयपक्षे चन्द्रपदप्रवृत्तिनिमित्तमन्यत् प्रकृष्टप्रकाशत्वमन्यदित्यायाति । तथा सति उपलक्षणीयाकारोपलक्षणाकारद्वयविशिष्टार्थबोधकत्वं प्रकृष्टप्रकाशश्चन्द्र इति वाक्यस्यायातमिति अविशिष्टार्थबोधकत्वविरहात् दृष्टान्ते साध्यवैकल्पं प्रसजतीति भावः । अपि चोपलक्षणस्थले उपलक्षणाकारः उपलक्षणीयाकारः पूर्वप्रतिपन्नाकारः इति आकारत्रयस्यापेक्षितत्वात् आकारत्रयविशिष्टार्थबोधकत्वमेव स्यादित्याह - **प्रतिपन्नेति** । दोषान्तरमाह **प्रकृष्टेति** ।

चन्द्रत्वप्रसङ्गः; तस्य तन्मात्रलक्षणत्वात्। प्रकाशविशेषविवक्षायां प्रकृष्टप्रकाशश्चन्द्र इत्यस्य विशिष्टार्थविषयत्वात् दृष्टान्तस्य साध्यविकलत्वं स्यात् । अन्यथा प्रकृष्टपदवैयर्थ्यं च। तथा गन्धवती पृथिवीत्यादिषु लक्षणवाक्येष्वनैकान्त्यम्।

अथ मन्यसे–सर्वलक्षणवाक्येषु लक्ष्यपदेन स्वरूपं निर्दिष्टम्। लक्षणांशेन तु

प्रकृष्टश्चासौ प्रकाशश्च प्रकृष्टप्रकाश इति कर्मधारयसमासेन प्रकाशसामान्यविवक्षायां सर्वेषामपि प्रकाशानां चन्द्रत्वप्रसङ्गः । कथमित्यत्राह - **तस्येति** । चन्द्रस्य प्रकाशत्वमात्रलक्षणकत्वात्, प्रकाशत्वस्य चन्द्रातिरिक्तेषु प्रकाशेष्वपि सद्भावात् इत्यर्थः । अत्र पक्षे प्रकृष्टपदवैयर्थ्यं च बोध्यम् । प्रकर्षरूपविशेषविशिष्टप्रकाशविवक्षायां प्रकृष्टप्रकाशश्चन्द्र इति वाक्यस्य विशिष्टार्थपरत्वमेवायातमिति साध्यवैकल्यमित्यर्थः । **अन्यथेति** । अविशिष्टार्थविषयकत्वे प्रकृष्टपदवैयर्थ्यं चेत्यर्थः । प्रकृष्टः प्रकाश; यस्य स प्रकृष्टप्रकाश इति बहुव्रीहिसमासे तु प्रकाशवैशिष्ट्यबोधकत्वं स्पष्टमिति मूले तन्नोक्तम् । सत्यज्ञानादिवाक्यमखण्डार्थं लक्षणवाक्यत्वात् इत्यनुमानेऽनैकान्त्यमपि दोष इत्याह - **तथा गन्धवतीति** । गन्धवती पृथिवीति वाक्ये लक्षणवाक्यत्वरूपहेतुरस्ति, अखण्डार्थत्वरूपसाध्यं नास्तीति व्यभिचार इति भावः ।

पूर्वपक्षः

अथ मन्यस इति । पूर्वपक्षः सर्वेष्वपि लक्षणवाक्येषु लक्ष्यवाचकपदेन स्वरूपमात्रं निर्दिष्टम् । लक्षणपदेन तु लक्ष्येतरसंकलव्यावृत्तिर्विवक्षिता, अथवा तेन आकारेण स्वरूपमेव वा विवक्षितम् । व्यावृत्तिर्विवक्षितेत्युक्त्या लक्षणवैशिष्ट्यस्य अविवक्षिततत्वात् नाखण्डार्थत्वहानिरित्यभिमन्यते । तथापि व्यावृत्तिवैशिष्ट्यबोधनात् सखण्डार्थत्वमित्यरुचेः तेनाकारेणेत्युक्तम् । व्यावृत्तित्वाकारेणेत्यर्थः । व्यावृत्तित्वं च स्वरूपसदेव तात्पर्यविषयतावच्छेदकतया विवक्षितम्, न तु बोध्यतया । ततश्च न व्यावृवित्ववैशिष्ट्यबोधनेन सखण्डार्थता । एवं च स्वरूपात्मकव्यावृत्तिपरमिति पर्यवसितार्थः । तथा च लक्षणवाक्यजन्यस्वरूपात्मकव्यावृत्तिधीरेव इतराभेदसंशयादिनिवृत्तिहेतुरिति भावः ।

स्वेतरसमस्तव्यावृत्तिर्विवक्षिता, तेनाऽऽकारेण स्वरूपमेव वा । 'अस्मिन् ज्योतिर्मण्डले कश्चन्द्रः'; 'एषु द्रव्येषु का पृथिवी', इत्यादि वदतां तत्तत्स्वरूपविषयो हि प्रश्नः । तत्र यदि प्रतिवचनं प्रकारविषयं स्यात्, तदा अन्यप्रश्ने तदन्योक्तिरित्यसङ्गतिः स्यात् । तस्मात् स्वरूपमेव वाक्यार्थः, तत्र लक्षणस्वरूपविशेषणवैशिष्ट्यमविवक्षितम् । एवं विशेषणलक्षणत्यागात् विशेष्यापरित्यागाच्च जहदजहल्लक्षणया ब्रह्मैवात्र प्रतिपाद्यम् ॥ श्लो–यद्वा कल्पितसत्तादिसामान्यस्यैव वाचकाः । जहल्लक्षणयैवैते प्रागुक्तब्रह्मबोधकाः ॥ इति–

तन्न, अविवक्षितमिति किमबोध्यत्वं विवक्षितम्, उतान्यार्थबोध्यत्वम् ?

लक्षणांशेन लक्षणस्य प्रतीयमानत्वात् कथं तात्पर्याभाव इत्याशङ्क्य स्वरूपस्यैव प्रश्नविषयत्वात् उत्तरमपि तत्परमेव युक्तम् । व्यावृत्तिश्च स्वरूपमेवेति न तत्परत्वेऽपि स्वरूपपरत्वहानिरित्याशयेनाह - **अस्मिन् ज्योतिर्मण्डल** इति । ननु लक्ष्यपदेनापि विशेषणस्य प्रतीतेः कथं वाक्यस्य स्वरूपमात्रपरता । स्वरूपस्य शब्दवाच्यत्वात् कथं तत्र लक्षणेत्यत्राह - **एवं विशेषणेति** । लक्ष्यलक्षणपदाभ्यां विशेषणलक्षणयोस्त्यागात् विशेष्यस्य स्वरूपस्य अत्यागाच्च जहदजहल्लक्षणया सत्यज्ञानादिवाक्ये ब्रह्मैव प्रतिपाद्यमित्यर्थः ।

यद्वा कल्पितेति कारिकाया अयमर्थः - विशिष्टब्रह्मणि विशेषणमात्रत्यागे जहदजहल्लक्षणा । शब्दस्य धर्ममात्रवाचित्वपक्षे तत्त्यागेन शुद्धब्रह्मलक्षणेति जहल्लक्षणैव । विशिष्टवाचित्वेऽपि तस्य मिथ्यात्वेनान्यत्वात् लक्ष्यस्य च तदन्यत्वात् जहल्लक्षणैव । अस्मिन्नर्थे सत्तादिसामान्यस्येति पदे बहुव्रीहिः । कल्पितेत्यनेन कर्मधारय इति ।

समाधानम्

तन्नेति । लक्षणवैशिष्ट्यं (विशेषणवैशिष्ट्यं) चाविवक्षितमित्यस्य कोऽर्थः । लक्षणविशेषणयोरबोध्यत्वमिति वा, उत व्यावृत्तिरूपस्य अन्यस्य अर्थस्य बोध्यत्वमिति। नाद्यः । लक्षणवैशिष्ट्यस्याप्रतीतौ इतरव्यावृत्तेरप्यप्रतीतेः । न हि गन्धवत्त्वप्रतीतिमन्तरेण

नाद्यः, लक्षणवैशिष्ट्याप्रतिपत्तौ व्यावृत्तेरप्यसिद्धेः । न हि गन्धवत्त्वमन्तरेण पृथिव्यां व्यावृत्तिप्रतीतिरस्ति । न द्वितीयः; तदानीमपि तद्विशिष्टत्वस्यानपायात् । अतः सर्वत्र लक्षणवाक्येषु लक्षणान्वयस्तद्विरोधिव्यावृत्तिश्चाभिमते इति तदुभयवैशिष्ट्यं वाक्यान्तरेभ्योऽधिकमेव । अतः सर्वेष्वपि वाक्येषु वैशिष्ट्यं दुस्त्यजमेव ।

प्रतिप्रयोगश्च–विगीतं वाक्यं विशिष्टपरं वाक्यत्वात् व्यधिकरणवाक्यवदिति । इदं चानुमानं सर्वलोकप्रतीत्यनुगुणत्वात् विशेषणक्लेशरहितत्वाच्चाधिकबलमेवेति

पृथिव्यामितरव्यावृत्तिप्रतीतिरस्ति । न द्वितीयः । व्यावृत्तेर्बोध्यत्वेऽपि व्यावृत्तिविशिष्टबोधकत्वस्यानपायादिति भावः । **लक्षणवैशिष्ट्येति** । स्वरूपस्य व्यावृत्तित्वेऽपि अभेदसंशयनिवृत्तिहेतुभूतं तज्ज्ञानं लक्षणवाक्येनैवेति नियमः लक्षणवाक्येन लक्षणवैशिष्ट्यप्रतिपादनप्रयुक्त एवेति भावः । **तद्विशिष्टत्वस्य** = तद्विशिष्टबोधकत्वस्य । प्रकृतं निगमयति- **अतः सर्वत्रेति** । यद्यपि स्वमते व्यावृत्तिः प्रयोजनमेव न तु शब्दार्थः, तथापि तेन व्यावृत्तेः शब्दार्थतयाभिधानात् लक्षणवैशिष्ट्यं विना व्यावृत्त्यसिद्धेः तदर्थत्वस्याप्यावश्यकत्वात् तदुभयवैशिष्ट्यं विशिष्टविषयेभ्यो वाक्यान्तरेभ्योऽधिकमेव, तेषां व्यावृत्तिपरत्वाभावादिति भावः । यद्यपि व्यावृत्तिः स्वरूपमेवेति परेणोक्तम्; तथापि स्वरूपपरत्वस्य सर्ववाक्यसाधारणत्वात् स्वरूपात्मकव्यावृत्तिपरत्वाविशेषेण लक्षणवाक्यजन्यमेव ज्ञानमभेदसंशयादिनिवर्तकमिति विशेषस्यापि वक्तुमशक्यत्वात् लक्षणं व्यावृत्तिपरमिति प्रसिद्धिः स्वरूपातिरिक्तव्यावृत्तिपरत्वेनैव वाच्येति व्यावृत्तिवैशिष्ट्यं वाक्यान्तरेभ्योऽधिकमित्युक्तम् ।

अथ पूर्वपक्ष्युक्ताखण्डार्थत्वानुमानयोः सत्प्रतिपक्षतामाह-**प्रतिप्रयोगश्चेत्यादिना** । विगीतं सत्यज्ञानादिवाक्यं विशिष्टपरं वाक्यत्वात् व्यधिकरणवाक्यवत् इति प्रत्यनुमानम् । विभिन्नविभक्तिकपदसमुदायरूपं वाक्यं व्यधिकरणवाक्यम् । यथा देवदत्तो ग्रामं गच्छति, देवदत्तस्य कुण्डलमित्यादिवाक्यम् । प्रत्यनुमानस्यास्याधिकबलत्वमाह- **इदं चानुमानमिति** । लोके हि लक्षणवाक्यजन्या प्रतीतिर्विशिष्टविषयेत्येव प्रतीयते । भवद्रीत्या सा

अनेन पूर्वयोर्बाधः प्रतिरोधो वा । न च जरद्गवादिवाक्यैरनैकान्त्यम्; आकाङ्क्षादित्रयवत एव वाक्यत्वेन विवक्षितत्वात् । यद्वा प्रमाणत्वे सतीति विशेषणमिह

प्रतीतिः भ्रान्तिरिति भवता कल्पनीयम् । अस्मन्मते तु तत्प्रतीतेर्भ्रान्तित्वाकल्पनात् तदानुगुण्यमेतदनुमानस्य । किं च निर्विशेषणस्य वाक्यत्वस्य विशिष्टपरत्वव्याप्यत्वे लाघवम् । समानाधिकरणवाक्यत्वस्य अखण्डार्थत्वव्याप्यत्वे गौरवम् । समानाधिकरणेति विशेषणस्याधिक्यादिति भावः । **पूर्वयोरिति** । समानाधिकरणवाक्यत्वलक्षण वाक्यत्वयोरित्यर्थः । **जरद्गवादिवाक्यैरिति** ।

“जरद्गवः कम्बलपादुकाभ्यां द्वारि स्थितो गायति भद्रकाणि ।
तं पृच्छति ब्राह्मणी पुत्रकामा राजन् रुमायां लशुनस्य कोऽर्धः”

इत्येवंरूपं परस्परानन्वितार्थकपदसमूहरूपं वाक्यं जरद्गवादिवाक्यम् । विशिष्टपरत्वरूपसाध्याभाववति जरद्गवादिवाक्ये वाक्यत्वरूपहेतुसत्त्वात् अनैकान्त्यमिति शङ्का । आकाङ्क्षादित्रितयविशिष्टपदसमूहरूपवाक्यत्वस्य हेतुत्वात् तस्य च जरद्गवादिवाक्येऽभावान्नानैकान्त्यमिति समाधानम् । समाधानान्तरमाह - **यद्वेति** । प्रमाणत्वे सतीति हेतौ विशेषणमुभाभ्यामवश्यं देयम् । तच्च जरद्गवादिवाक्ये नास्तीति न व्यभिचार इत्यर्थः । न च प्रमाणत्वमेव हेतुरस्तु, तावतैव जरद्गवादिवाक्येऽनैकान्त्यपरिहारात् । तथा च वाक्यत्वादिति विशेष्यस्य वैयर्थ्यमिति वाच्यम् । विशिष्टार्थतात्पर्यकत्वरूपं यत् विशिष्टपरत्वं (साध्यं) तदभाववति चक्षुरादौ प्रमाणत्वसत्त्वेन व्यभिचारवारणाय वाक्यत्वादिति विशेष्यस्य आवश्यकत्वात् पूर्वमविशेषितस्य पश्चाद्विशेषणे हेत्वन्तराख्यं निग्रहस्थानं स्यादिति **प्रथममेवेत्युक्तम्** । ननु तर्हि हेतौ विशेषणप्रक्षेपस्य तवापि समानत्वात् । कथं तद्रहितत्वेन पूर्वोक्ताधिकबलतेत्याशङ्क्य, परेणाप्यखण्डार्थ-प्रमापकत्वस्यैव साधनात् तस्य चायोग्यार्थकसमानाधिकरणवाक्यलक्षणवाक्ययोरभावेन व्यभिचारात् तद्वारणाय तेनापीदं विशेषणं देयमेवेत्यभिप्रेत्याह - **तथापीति** ।

ननु तथापि घटः कर्मत्वमानयनं कृतिरित्यादौ स्वरूपयोग्यतारहिते व्यभिचारवारणाय

प्रथममेव प्रक्षेप्यम्; तथाऽप्यनेन पूर्वयोर्बाधः प्रतिरोधो वा दुर्वारः । न च व्यधिकरणवाक्यत्वमत्रोपाधिः, लोके वेदे च विशिष्टपरसमानाधिकरणवाक्यदृष्टेस्तस्य साध्यसमव्याप्त्यभावात् ।

किञ्चानयोरनुमानयोर्विपक्षे बाधकाभावात् अप्रयोजकत्वं च ।। नन्वस्ति विपक्षे बाधकम्; तथा हि—यदि विगीतं वाक्यं विशिष्टपरं स्यात्, तदा निर्गुणवाक्यविरोधप्रसङ्ग इति चेन्न; निर्गुणवाक्यानां दोषनिषेधपरत्वस्थापनात् ।।

प्रमापकत्वे सतीति विशेषणं देयमेव । न च तदर्थं साकाङ्क्षत्वमेव विशेषणम् । तथापि द्वयोस्तुल्यत्वेन सिद्धान्तहेतोः उक्ताधिकबलत्वाभावात् इति चेत् - न । एवमपि सर्वलोकप्रतीत्यानुगुण्यस्य पूर्वोक्तस्यानपायात् । वस्तुतस्तु प्रागुक्तरीत्या सोऽयमित्यादिप्रमाणवाक्यस्याखण्डार्थबोधकत्वासंभवात् प्रमाणत्वे सतीति विशेषणं तवाप्यावश्यकम् । समानाधिकरणत्वं लक्षणप्रतिपादकत्वं चाधिकमिति तद्विशेषणराहित्यमेवाधिकबलत्वम् । तदेतत्सर्वमभिप्रेत्याह - **तथाप्यनेन पूर्वयोर्बाध** इति ।

ननु विगीतं वाक्यं विशिष्टपरं वाक्यत्वादिति भवदीयानुमाने व्यधिकरणवाक्यत्वमुपाधिरित्याशङ्क्य विशिष्टार्थपरतया लोके वेदे च दृश्यमानेषु समानाधिकरणवाक्येषु व्यधिकरणवाक्यत्वाभावेन साध्यव्यापकत्वाभावेन न तस्योपाधित्वमिति समाधत्ते- **न चेति** । **साध्यसमव्याप्त्यभावात्** इत्यस्य साध्यव्यापकत्वाभावप्रयुक्तात् साध्यव्यापकत्व-विशिष्टसाध्यव्याप्यत्वाभावादित्यर्थः ।

परकीयानुमानयोरप्रयोजकत्वाख्यं दोषान्तरमाह- **किं चानयोरिति** । विगीतं वाक्यमखण्डार्थं समानाधिकरणवाक्यत्वात् लक्षणवाक्यत्वाच्चेत्यनुमानयोरित्यर्थः । हेतुरस्तु साध्यं मास्तु इति शङ्कायां साध्याभाववत्त्वे बाधकस्य कस्याप्यभावात् अप्रयोजकत्वं चेत्यर्थः । विपक्षे बाधकमस्तीति शङ्कते - **नन्वस्तीति** । **निर्गुणेति** । गुणरूपविशेषणस्य तत्त्वावेदकवेद्यत्वे सत्यत्वावश्यंभावात् निर्गुणवाक्यस्य गुणाभावबोधकत्वासंभव इत्यर्थः । समाधत्ते- **निर्गुणवाक्यानामिति** । तेषां हेयगुणनिषेधपरत्वस्य स्थापयिष्यमाणत्वात् सत्यत्वादिविशिष्टत्वेन न विरोध इत्यर्थः । विपक्षे बाधकान्तरं शङ्कते-

विशेषणविशेष्ययोर्विशेषणानां च मिथो भेदादेकार्थपरताभङ्ग इति चेत्; (१) किं प्रधानभूतैकार्थपरता भज्येत, (२) उत विशेषणविशेष्यतादात्म्यलक्षणैकार्थपरता, (३) उत निर्विशेषैकार्थपरता ? न प्रथमः प्रसञ्जकप्रसञ्जनीययोर्व्याप्त्यभावात् । न

विशेषणविशेष्ययोरिति । यदि विगीतं वाक्यं विशिष्टपरं स्यात् तदेत्यनुषङ्गः । तथा च यदि सत्यज्ञानादिवाक्यं विशिष्टार्थपरं स्यात् तदा विशेषणविशेष्ययोः विशेषणानां च परस्परं भेदात् एकार्थपरत्वभङ्गप्रसङ्ग इत्यर्थः । समाधत्ते-**किं प्रधानभूतेति** । **प्रधानभूतैकार्थपरता**= एकविशेष्यकत्वम् । **विशेषणेति** । विशेषणविशेष्यभेदस्य विशेषणविशेष्यतादात्म्यं प्रत्येव भञ्जकत्वात् एतत्कोट्युत्थितिः । **निर्विशेषेति** । विशेषणविशेष्यभेदस्य विशेषणानां मिथो भेदस्य च तत्त्वावेदकवेद्यत्वे सत्यत्वापातेन अद्वितीयत्वभञ्जकत्वात् एतत्कोट्युत्थितिः । **व्याप्त्यभावादिति** । देवदत्तः श्यामो युवेत्यादौ व्यभिचारात् अप्रयोजकत्वाच्चेत्यर्थः । **एतदुक्तं भवति** - यदि सत्यज्ञानादिवाक्यं विशिष्टपरं स्यात् तदा विशेषणविशेष्ययोः विशेषणानां च मिथो भेदात् एकार्थपरताभङ्ग इत्यस्य कोऽर्थः? किम् एकविशेष्यकत्वभङ्ग इत्यर्थः, अथवा विशेषणविशेष्यतादात्म्यरूपैकार्थपरताभङ्ग इत्यर्थः, यद्वा निर्विशेषैकार्थपरताभङ्ग इत्यर्थ इति त्रेधा विकल्पः; । तत्र न प्रथमः । देवदत्तः श्यामो युवेत्यादौ विशिष्टार्थपरे विशेषणविशेष्ययोः विशेषणानां च मियो भेदे सत्यपि एकविशेष्यकत्वदर्शनेन एकविशेष्यकत्वभङ्गाभावात् व्यभिचारेण प्रसञ्जके विशिष्टार्थपरत्वे प्रसञ्जनीयैकार्थपरत्वभङ्गनिरूपितव्याप्त्यभावात् । अप्रयोजकत्वाच्च । न द्वितीयतृतीयौ । विशेषणविशेष्यतादात्म्यभङ्गस्य निर्विशेषैकार्थपरताभङ्गस्य चेष्टत्वेन तत्प्रसङ्गयोः इष्टप्रसङ्गरूपत्वेन दुष्टत्वात् । विपर्यये बाधकस्थले प्रसञ्जनीयस्यानिष्टतायाः आवश्यकत्वात् इति । द्वितीयतृतीयकल्पयोः यथाक्रममङ्गान्तरवैकल्यमप्याह- **विशेषणविशेष्येत्यादिना** । तर्कस्थले प्रसञ्जनीयविपर्ययेण प्रसञ्जकविपर्ययपर्यवसानमप्यङ्गम् । यथा यदि वह्निर्न स्यात् तर्हि धूमोऽपि न स्यादिति प्रसङ्गे प्रसञ्जनीयस्य धूमाभावस्य विपर्ययेण धूमेन प्रसञ्जकस्य

द्वितीयतृतीयौ, इष्टप्रसङ्गत्वेन दुष्टत्वात्। विशेषणविशेष्यतादात्म्यनिर्विशेषत्वयोरसिद्धत्वेन विपर्यये पर्यवसानासिद्धेश्च । द्वितीयस्य विपर्यये पर्यवसानं तु क्षपणकगन्धिमतमुत्थापयत् भवतोऽपसिद्धान्ततामावहेत्।

ननु विशेषणभेदेन विशिष्टताभेदाद्विशेष्यभेद इति प्रसङ्गार्थ इति चेत्, कोऽयं विष्टिताभेदो नाम (१) किं विशेषषणभेद एव, (२) उत तत्सम्बन्धभेदः, (३) उत व्यावृत्तिभेदः, (४) यद्वा तदधीनबुद्धिभेदः, (५) अथवा विशेष्यभेद एव ?

नाद्यः, व्याप्त्यभावस्योक्तत्वात् । विशेषणभेदेन विशिष्टताभेदादित्यनयोरैकार्थ्यप्रसङ्गे हेतुफलभावासिद्धेश्च।

वह्न्यभावस्य विपर्यये वह्नौ पर्यवसानं भवति । तत्र प्रसञ्जनीयविपर्ययः सिद्धः । प्रकृते तु प्रसञ्जनीयस्य विशेषणविशेष्यतादात्म्यभङ्गस्य निर्विशेषैकार्थपरताभङ्गस्य च विपर्ययः विशेषणविशेष्यतादात्म्यं निर्विशेषपरत्वं च । सोऽसिद्ध इति प्रसञ्जकस्य विशिष्टपरत्वस्य विपर्यये पर्यवसानं न सिध्यतीति भावः । द्वितीयविकल्पे दोषान्तरमाह - **द्वितीयस्येति।** विशेषणविशेष्यतादात्म्यभङ्गस्य विपर्यये पर्यवसानं विशेषणविशेष्यतादात्म्ये पर्यवसानं क्षपणकगन्धिवेदान्तिमतं जैनवासनायुक्तभेदाभेदवादिमतमुत्थापयत् भवतामपसिद्धान्ततामावहेदित्यर्थः । भवद्भिर्विशेषणविशेष्यतादात्म्यानङ्गीकारादित्यर्थः ।

प्रथमपक्षमेवोपोद्बलयन् पुनः शङ्कते - **ननु विशेषणभेदेनेत्यादिना** । ननु यदि सत्यज्ञानादिवाक्यं विशिष्टार्थपरं स्यात् तदा विशेषणभेदेन विशिष्टताभेदात् विशेष्यभेदः स्यादिति प्रसङ्गस्य भावः इति चेत् न । कोऽयं विशिष्टताभेदो नाम? किं विशेषणभेद एव? उत तत्संबन्धभेदः? उत व्यावृत्तिभेदः? यद्वा तदधीन (विशेषणभेदाधीन) बुद्धिभेदः? किं वा विशेष्यभेद एव इति पञ्चधा विकल्पः । तत्र प्रथमकल्पं दूषयति - **नाद्य** इति । विशेषणभेदे विशेष्यभेद इति व्याप्तिर्नास्ति । देवदत्तः श्यामो युवेत्यादौ विशेषणभेदेऽपि विशेष्यस्यैकत्वादित्युक्तत्वादित्यर्थः । किं च विशिष्टताभेद इत्यस्य यदि विशेषणभेद इत्यर्थः तदा विशेषणभेदविशिष्टताभेदयोरेकत्वेन विशिष्टताभेदे विशेषणभेदस्य हेतुत्वोक्तिर्न घटते । एकस्यैव हेतुहेतुमद्भावायोगादित्याह - **विशेषणभेदेनेति** । विशिष्टताभेदो नाम

न द्वितीयः; अव्याप्तेरेव। एकस्य विशेष्यस्यानेकविशेषणसम्बन्धभेदादनेकत्वमिति स्ववचनविरोधाच्च ।। प्रसञ्जनीयविपर्ययेण प्रसञ्जकविपर्यये तात्पर्यादविरोध इति चेत्–'एकश्चायम् अतोऽ नेकविशेषणसम्बन्धोऽस्य नास्ति' इति स स्यात्; तत्र च श्यामत्वाद्यनेकविशेषणविशिष्टतयोपलभ्यमाने देवदत्तादौ व्यभिचार एव। एकत्वमनेकविशेषणसम्बन्धाभावश्चेत्युभयमेकत्रोपसंह्रियमाणम्, एकस्यानेकसम्बन्धो नोपपद्यत इति वदतः स्ववचनविरोधमावहति।

विशेषणसंबन्धभेद इति द्वितीयकल्पं निरस्यति - **न द्वितीय** इति। **अव्याप्तेरेवेति**। विशेषणसंबन्धभेदे विशेष्यभेद इति व्याप्तिर्नास्ति। देवदत्तः श्यामो युवेत्यादौ व्यभिचारादेवेत्यर्थः। अपि च एकस्य विशेष्यस्यानेकविशेषणसंबन्धभेदादनेकत्वं स्यादिति भवदीयवचन एव एकत्वावच्छिन्नमनूद्य अनेकत्वप्रतिपादनेन स्ववचनविरोध इत्याह **एकस्येति**। ननु न वयमेकस्मिन्ननेकत्वं साधयामः, किं तु आपादयामः। तथा च एकत्वानुवादस्य प्रसञ्जनीयानेकत्वविपर्ययेण एकत्वेन प्रसञ्जकस्यानेक विशेषणसंबन्धस्य यः विपर्ययः तत्साधने तात्पर्यान्न स्ववचनविरोध इति शङ्कते - **प्रसञ्जनीयेति**। एकश्चायम्, अतोऽनेकविशेषणसंबन्धोऽस्य नास्तीति हि प्रसञ्जनीयविपर्ययेण प्रसञ्जकविपर्ययस्य आकारः। तत्र च एकस्मिन् देवदत्तेऽनेकविशेषणसंबन्धस्योपलभ्यमानतया व्यभिचार इति भावः। अत्र प्रकारान्तरेण स्ववचनविरोधोऽपीत्याह - **एकत्वमिति**। एकस्यानेकविशेषणसंबन्धो नास्तीति वदन्नेव एकश्चायम् अतोऽनेकविशेषणसंबन्धोऽस्य नास्तीति बदसि। अत्र द्वितीयवाक्येन एकत्वमनेकविशेषणसंबन्धाभावश्चेतिविशेषणद्वयसंबन्धः प्रतिपाद्यः। स च प्रथमवाक्यप्रतिपाद्येन एकत्रानेकविशेषणसंबन्धाभावेन विरुध्यत इति स्ववचनविरोध इति भावः। अत्र ''प्रसज्यप्रसञ्जकविपर्ययात्मकैकत्वानेकविशेषण संबन्धाभावरूपविशेषणद्वयेन एकस्यैव योगात् इदं वचनं स्वेनैव व्याहतमित्यर्थः''

इति **चण्डमारुतम्**। एकस्य अनेकविशेषणसंबन्धे अनेकत्वं स्यात् इति तर्कः। अत्र

न तृतीयः; ततद्विशेषणसम्बन्धभेदैर्यथास्वं विरोधिव्यावृत्तिभेदे विवक्षिते अनेकव्यावृत्तीनामेकत्र सम्भवात्। अविरोधि व्यावृत्तिभेदस्य तु असिद्धत्वात्। न हि नैल्यमुत्पलादपि व्यावर्तयेत् । तथा सति घटः पट इत्यादिवत्

प्रसञ्जनीयस्यानेकत्वस्य विपर्ययः एकत्वम्। प्रसञ्जकस्य अनेकविशेषणसंबन्धस्य विपर्ययः अनेकविशेषणसंबन्धाभावः । एतदुभयप्रतिपादकं विपर्यये पर्यवसानवाक्यम् "एकश्चायमतोनेकविशेषणसंबन्धाभाव" इत्येवंरूपम् । अनेन एकत्वानेकविशेषण । संबन्धाभावरूपविशेषणद्वययोग उक्तो भवति। अस्मिन्नेव वचने विरोधोऽस्तीति तस्य भावः।

तृतीयविकल्पनिरासः

विशिष्टताभेदो नाम व्यावृत्तिभेदः इति तृतीयं कल्पं दूषयति - **न तृतीय** इति । व्यावृत्तिभेद इत्यनेन तत्तद्विशेषणैः तत्तद्विशेषणानाश्रयप्रतियोगिकव्यावृत्तिभेदमात्रं विवक्ष्यते वा, तत्तद्विशेषणाविरोधिविशेषणाश्रयप्रतियोगिकव्यावृत्तिभेदोऽपि विवक्ष्यते वा इति विकल्पमभिप्रेत्य आद्ये दोषमाह- **तत्तद्विशेषणेति** । तत्तद्विशेषणानाश्रयवस्तुप्रतियोगिकभेदानामेकत्र संभवात् तद्बलात् न विशेष्यभेदस्यापत्तिरित्यर्थः । **विरोधिव्यावृत्तिभेदे** = तत्तद्विशेषणानाश्रयवस्तुप्रतियोगिकव्यावृत्तीनां भेदे । द्वितीये दोषमाह - **अविरोधीति** । तत्तद्विशेषणाविरोधिविशेषणाश्रयप्रतियोगिकव्यावृत्तेः तत्तद्विशेषणासाध्यतया तादृशव्यावृत्तिभेदासिद्धेरित्यर्थः । एतदुपपादयति **न हीति** । नीलोत्पले नीलत्वमुत्पलत्वमिति धर्मद्वयमस्ति। नीलत्वाविरोधी धर्मः उत्पलत्वं तदाश्रयप्रतियोगिकभेदः न नीलत्वप्रयुक्तः । नीलत्ववतः उत्पलत्वात् तत्र उत्पलभेदा-संभवात् । तथा च विशेषणभेदाधीनत्वं व्यावृत्तेर्नास्तीति तद्भेदासिद्ध्या न विशेष्यभेद इति भावः । यदि नीलत्वमुत्पलव्यावर्तकं भवेत् तदा नीलं नोत्पलमित्येव व्यवह्रियेत, नीलमुत्पलमिति समानाधिकरणतया न व्यवह्रियेतेत्याह- **तथा सतीति** । **घटः पट** इत्यादिवदिति । यथा घटत्वस्य पटव्यावर्तकत्वात् घटः पट इति व्यवहारो न भवति, तद्वत् नीलत्वस्य उत्पलव्यावर्तकत्वे नीलमुत्पलमिति प्रयोगो न स्यादित्यर्थः ।

नीलमुत्पलमित्यादिसमानाधिकरणवाक्यानामनन्वयप्रसङ्गाच्च ।। भेदकं विशेषणम्, भेद्यं विशेष्यमिति स्थिते संकोचकप्रत्यक्षाद्यसंभवे स्वेतरसमस्तविशेषणाश्रयात् भेदः सिध्येदिति चेत् तर्हि तत एव विशेषणान्तरप्रयोग इव तदप्रयोगेऽपि स्वाश्रयाद्भेदः किं न सिध्येत् ? ।। विरोधादिति चेत्–किमत्र मानम् ? उपलम्भ इति चेत्; किं प्रत्यक्षादिजन्योऽयमुपलम्भः, उतैतद्वाक्यस्थसत्यादिपदजन्यः ? न प्रथमः;

शङ्कते - **भेदकमिति** । विशेषणानां विशेष्यभेदकत्वस्यौत्सर्गिकत्वात् देवदत्तः श्यामो युवेत्यादौ विशेष्यैक्यस्य प्रत्यक्षसिद्धत्वेन तत्र विशेषणानां विशेष्यभेदकत्वाभावेऽपि सत्यत्वादिविशेषणानां विशेष्यभेदकत्वमावश्यकम् । तत्र विशेष्यस्य ब्रह्मणः प्रत्यक्षाद्यगोचरत्वेन तदैक्यस्यापि प्रत्यक्षाद्यगोचरत्वात् । तथा चौत्सर्गिकनियमसंकोचकप्रत्यक्षाद्यभावात् सत्यत्वाश्रयः अन्यः ज्ञानत्वाश्रयः अन्य इत्येव सिध्येत् । अतः सत्यत्वाश्रयस्य ज्ञानस्वरूपत्वं अनन्तस्वरूपत्वं च न सिध्येत् इति शङ्कितुराशयः । **स्वेतरेति** । एकविशेषणविशिष्टतया प्रतीतौ तदितरसकलविशेषणाश्रयात् भेदः सिध्येदित्यर्थः । समाधत्ते-तर्हि **तत एवेति** । भेदकं विशेषणमित्यस्य संकोचे प्रमाणाभावादित्यर्थः। **विशेषणान्तरेति** । यथा विशेषणान्तरप्रयोगे तदाश्रये एतद्विशेषणाश्रयात् भेदः सिध्यति, तथा एतद्विशेषणप्रयोगेऽपि एतद्विशेषणाश्रये एतद्विशेषणाश्रयात् भेदः कुतो न सिध्येदित्यर्थः । **विरोधादिति** । सत्यत्वाश्रये सत्यत्वाश्रयात् भेदस्य वृत्त्यसंभवात् न सिध्यतीति चेदित्यर्थः । **किमत्र मानमिति** । सत्यत्वाश्रये सत्यत्वाश्रयभेदस्यावृत्तौ किं मानमित्यर्थः । **उपलम्भ इति चेदिति** । सत्यत्वादेरेव स्वाश्रयभेदाभावरूपतया सत्यत्वाद्युपलम्भ एव सत्यत्वाश्रये सत्यत्वाश्रयभेदासंभवे प्रमाणमित्यर्थः । किं **प्रत्यक्षादिजन्य** इति । योऽयं ब्रह्मणः सत्यत्वाद्युपलम्भः स **किं प्रत्यक्षादिप्रमाणजन्यः** उत सत्यज्ञानादिवाक्यस्थसत्यादिपदजन्यः । न प्रथमः, शास्त्रैकसमधिगम्ये वस्तुनि प्रत्यक्षादिप्रमाणासंभवात् । न द्वितीयः, अविशेषात् अविरोधिविशेषणान्तराश्रयादपि भेदाभावेन तद्वाक्योदिताविरोधिसर्वविशेषणाश्रयत्वस्यैव सिद्धेरित्यर्थः । एतदुक्तं भवति - यथा सत्यज्ञानादिवाक्ये

शास्त्रैकसमधिगम्ये तदसम्भवात्। न द्वितीयः; अविशेषादविरोधिविशेषणान्तराश्रयादपि व्यावृत्त्यभावेन तत्तद्वाक्योदिताविरोधिसर्वविशेषणान्वयसिद्धेः । यदि चैकमेव विशेषणं स्वेतरसमस्ताश्रयाद्व्यावर्तयेत्, तदा विशेषणान्तरप्रयोगः सर्वत्र निरर्थकः। तस्यापि चैकस्य निरसनीयत्वेन तत्प्रयोगोऽपि प्रतिकूलः; 'प्रक्षालनाद्धि

सत्यत्वविशेषणावगमात् तदाश्रये तदाश्रयभेदो न संभवति, तथा तत्रैव ज्ञानत्वादिविशेषणान्तरस्याप्यवगमात् तदाश्रयभेदश्च न संभवति । अन्यथा ब्रह्म सत्यज्ञानानन्दाद्यात्मकं न स्यात् । तथा च विशेषणं स्वाश्रयं विरोधिविशेषणान्तराश्रयात् व्यावर्तयति, न तु अविरोधिविशेषणान्तराश्रयादपीति एकस्मिन्नेव ब्रह्मणि तद्वाक्योदितानेकविशेषणान्वयः संभवतीति । **यदि चेति** । यदि च एकमेव विशेषणं स्वेतरसकलविशेषणाश्रयात् स्वाश्रयं व्यावर्तयेत् तदा विशेषणान्तरप्रयोगः निरर्थकः । तथा च सत्यत्वाश्रयस्य ब्रह्मणः ज्ञानादिपदव्यावर्त्यजडादितोऽपि सत्यपदेनैव व्यावृत्तिसिद्धेः ज्ञानादिपदप्रयोगः व्यर्थ इति भावः ।

न च विशेषणं स्वविरोधिविशेषणान्तराश्रयात् स्वाश्रयभेदकमिति पक्षेऽपि सत्यपदेन यत् व्यावृत्तं तदेव ज्ञानपदेनापि जडात् व्यावर्त्यत इति ज्ञानपदवैयर्थ्यमिति वाच्यम् । सत्यपदेन जडव्यावृत्तिसिद्धावपि जडव्यावृत्तित्वेन रूपेण जडव्यावृत्तेरसिद्ध्या ब्रह्म जडमजडं वेति संदेहस्यानिवृत्त्या संदेहनिवर्तकेन अजडत्वेन रूपेण जडव्यावृत्तत्वबोधनाय ज्ञानपदस्य सार्थकत्वात् । विशेषणस्य स्वेतरसकलविशेषणाश्रयात् स्वविशेष्यव्यावर्तकत्वमिति पक्षे तु तद्विशेषणानाश्रयात् तेनैव रूपेण यथा व्यावर्तयति तथा विशेषणान्तराश्रयादपि तेनैव रूपेण व्यावर्तयेत् । त्वदुक्तात् संकोचकादेव । तथा च विशेषणान्तरवैयर्थ्यं दुर्वारमिति भावः । किं च विशेषणान्तरप्रयोगस्य न वैयर्थ्यमात्रम्, प्रत्युत एतद्विशेषणस्यापि वैयर्थ्यापादकत्वात् स प्रतिकूलश्चेत्याह-**तस्यापीति** । एतद्विशेषणस्यापि विशेषणान्तरेण निरसनात् विशेषणान्तरप्रयोगः "प्रक्षालनाद्धि पङ्कस्य दूरादस्पर्शनं वरम्" इति न्यायेन एतद्विशेषणस्य वैयर्थ्यापादकतया प्रतिकूल इत्यर्थः ।

पङ्कस्य दूरादस्पर्शनं वरम्' इति न्यायात् ।। परस्पर- प्रवृत्तिनिमित्तप्रतिक्षेपोऽनेकपदप्रयोजनमिति चेन्न; अनृत-जड-परिच्छिन्नभिन्नतया गूढसौगतकूटस्थैर्व्याख्यातत्वात् । पदद्वयप्रयोगेणापि चरितार्थत्वाच्च तेनैव निश्शेषप्रतिक्षेपसिद्धेः । यद्वा

ननु विशेषणान्तरेण निरसनीयस्य प्रथमविशेषणस्योपादानं यदि सप्रयोजनं न स्यात् तदा प्रक्षलनादिति न्यायोऽवतरति । अत्र तु प्रथमविशेषणं विशेषणान्तरप्रतिक्षेपार्थमेवेति तस्यापि न वैयर्थ्यमिति शङ्कते-**परस्परेति** । **परस्परस्य** प्रवृत्तिनिमित्तप्रतिक्षेप इत्यर्थः । **परस्परव्यावृत्तप्रवृत्तिनिमित्तेति** पाठे तु परस्परं व्यावृत्ते ये प्रवृत्तिनिमित्ते इत्यर्थः । प्रतिक्षेप्यत्वसिद्धये **परस्परव्यावृत्तेति** । विशेषणद्वयस्यापि स्वेतराश्रयव्यावर्तकत्वे परस्परप्रवृत्तिनिमित्तप्रतिक्षेपसिद्धिरिति भावः । तथा च निर्विशेषपरत्वमर्थात् सिध्यतीत्याशयः। समाधत्ते-**अनृतेति** । अनृतजडपरिच्छिन्नभिन्नपरतया सत्यादिवाक्यं भवन्मूलपुरुषैर्व्याख्यातम्, न तु सत्यज्ञानानन्तव्यावृत्तिपरतया । तथा व्याख्याने ब्रह्मणोऽप्यसत्यत्वप्रसङ्गेन गूढसौगतत्वहानिप्रसङ्गादित्यर्थः । **पदद्वयेति** । ततश्च सत्यं ज्ञानमनन्तमिति पदत्रये एकं पदं व्यर्थमिति भावः । **यद्वेति** । निर्विशेषबोधकत्वं यदि विवक्षितं स्यात् तदा विशेष्यवाचकमेकं **पदमेव** प्रयोक्तव्यम् । पदान्तरप्रयोगे तदर्थविशेषणत्यागे च प्रक्षालनादितिन्यायावतारात् इत्यर्थः ।

ननु विशेष्यपदमिति किं ब्रह्मस्वरूपमात्रबोधकं विवक्षितम् उत उद्देश्यसमर्पकं ब्रह्मपदं वा । नाद्यः, सत्यज्ञानादिवाक्ये तथाविधपदाभावात् । न द्वितीयः, ब्रह्मपदप्रतिपन्नब्रह्मत्वनिरासार्थतयैव विशेषणान्तरसार्थक्यादिति चेत् न । परमते ब्रह्मपदस्य लक्षणया विशेष्यमात्रबोधकत्वात् ।

केनचिच्छब्देन किंचित् विशेषणं प्रसज्य पदान्तरेण तद्व्यावृत्त्यर्थं विशेषणान्तरबोधने प्रक्षालनादिति न्यायात् किमपि विशेषणं नोपादेयमित्यर्थः ।

यद्वा मात्रशब्देन विशेषणपदद्वयप्रयोगपक्षो व्यावर्तते । विशेष्यसमर्पकमिति च लक्ष्यसमर्पकं ब्रह्मपदं विवक्षितम् । एकविशेषणपदसहितब्रह्मपदमेव सर्वं व्यावर्तयिष्यति, किम् इतरविशेषणैरित्यर्थ इति **चण्डमारुते** ।

विशेष्यपदमात्रमेव प्रयोक्तव्यम्, प्रक्षालनादिति न्यायात् ।। एकं पदमबोधकमिति चेन्न; उपलम्भविरोधात् ।। स्मृतिमात्रं स्मृत्यविशिष्टबोधमात्रं वा तेन जन्येतेति चेत्, किमतः ? तावतैव विशेष्यस्वरूपप्रकाशसिद्धेः । तदतिरिक्तस्य च पदान्तरप्रयोगेऽपि भवता प्रतिक्षेपात् ।। विशेष्यपदमात्रप्रतिपन्नं स्वरूपं विशेषणविधिनिषेधसाधारणं प्रतीयेत; ततश्च संशयः स्यादिति स्वयं विशेषणाभावनिर्णयाय विशेषणपदपयोग इति चेत्; हन्त! अभावनिर्णयाय भावप्रतिपादनमिति

शङ्कते - **एकं पदमिति** । पदसमूहरूपं वाक्यमेव बोधजनकम्, एकं पदं तु न बोधकम् । पदं तावत् अर्थस्मृतिजनकम्, न तु अनुभवात्मकबोधजनकमिति शङ्कितुराशयः । एकस्य पदस्य श्रवणादपि तदर्थबोधस्यानुभविकत्वात् एकं पदं न बोधकमिति न युक्तमित्याशयेन समाधत्ते - **उपलम्भविरोधात्** इति । ननु ''पदमभ्यधिकाभावात् स्मारकान्न विशिष्यते'' इति वार्तिककारेणोक्तत्वात् पदार्थस्मृतिरूपमेव ज्ञानं पदात् जायते, अथ वा स्मृत्यविशिष्टं ज्ञानं जायते, न तु बोधरूपं ज्ञानमिति पुनःशङ्कते-**स्मृतिमात्रमिति**। **स्मृत्यविशिष्टमिति** । पदादप्यनुभवमभ्युपगम्योक्तम् । यद्वा विभक्तिसमभिव्याहारादनुभावकत्वसंभवादुक्तम् । एकत्वं तु अविवक्षितमिति भाव इति **चण्डमारुते** । एकस्मात् पदात् स्मृत्या वा स्मृतितुल्यानुभवेन वा विशेष्यस्वरूपप्रकाशसिद्धेः पदान्तरप्रयोगेऽपि विशेष्यस्वरूपातिरिक्तप्रकाशस्य भवता निरासाच्च पदान्तरं व्यर्थमिति भावः । न च स्मृतेः अज्ञानानिवर्तकत्वात् अपरोक्षज्ञानार्थं पदान्तरमिति वाच्यम् । विषयस्यापरोक्षत्वे तद्विषयकज्ञानस्याप्यपरोक्षत्वमिति वदतां भवतां मते ब्रह्मस्वरूपविषयकस्मृतेरप्यपरोक्षत्वसंभवात् ततोऽज्ञाननिवृत्तेः संभवादिति भावः । ननु विशेषणप्रकाशार्थं पदान्तरमित्यत्राह **तदतिरिक्तस्येति** । विशेषणाभावनिर्णयायैव विशेषणपदप्रयोग इति शङ्कते- **विशेष्यपदेति** । **तदभावनिर्णयायेति** । विशेष्यपदेन स्वरूपं प्रतिपन्नम् । तथापि स्वरूपं विशेषणतदभावसाधारणमिति, विशेषणवद्वा तदभाववद्वेति संशयो जायते । तन्निवृत्त्यर्थं विशेषणाभावनिर्णय आवश्यकः । तदर्थं विशेषणपदप्रयोग इति शङ्का । समाधत्ते-**हन्तेति** ।

महदिदमुपपादनमाहात्म्यमिति विपरीतनिर्णय एव ततः स्यात् ।। विषं भुङ्क्ष्वेत्यादिवत् तात्पर्यपरीक्षया तदभावनिर्णय इति चेत्—एवं विशेष्यपदमात्रप्रयोगेऽपि तात्पर्यपरीक्षया सर्वविशेषणशून्यत्वमुन्नीयताम् ।। तात्पर्यनिश्चायकं तत्र नास्तीति चेत्, अहो विशेषणपदप्रयोगे विशेषणाभावतात्पर्यं निश्चीयते, तदप्रयोगे तु नेति सम्यक् परीक्षकत्वम् ।। देवदतोऽ यमित्यादौ विशेषणपदाप्रयोगेऽपि तद्विशिष्टत्वं प्रतीयत इति सन्देहानपाय इति चेत्—श्यामो

विशेषणप्रतिपादनेन कथं विशेषणाभावोऽवगम्येतेत्यर्थः । एतदुक्तं भवति किं भावप्रतिपादनमुखेन अभावनिर्णयो विवक्षितः उत साक्षादेव । आद्ये दोषमाह - **हन्तेति** । तदभावप्रतिपादनाय तत्प्रतिपादनमित्यसंगतम् । विरोधात् विशिष्टपरत्वापाताच्चेति भावः । किं च भावप्रतिपादकशब्देनाभावप्रतिपादनासंभवात् तद्विपरीतसत्यत्वादिनिर्णय एव स्यादित्याह- **विपरीतनिर्णय एवेति** । साक्षादेवेति द्वितीयमाशङ्कते - **विषं भुङ्क्षेति**। यथा तात्पर्यवशात् विषभोजनप्रतिपाकवाक्यात् विषभोजनाभावः लक्षणया प्रतिपाद्यते तद्वत् प्रकृतेऽपि इति भावः । समाधत्ते- **एवमिति** । विशेष्यपदमात्रप्रयोगेऽपि तात्पर्यपर्यालोचनया लक्षणया सर्वविशेषणशून्यत्वप्रतिपादकत्वमुन्नीयताम्, किं विशेषणपदप्रयोगेणेत्यर्थः । ननु विशेष्यपदमात्रप्रयोगे विशेषणाभावतात्पर्यनिश्चयो न भवति, हेत्वभावादित्याशङ्क्य विशेषणपदप्रयोगे विशेषणाभावतात्पर्यं निश्चीयते, तदप्रयोगे न तत् निश्चीयते इति महत् परीक्षकत्वं भवताम् । प्रत्युत विशेषणपदप्रयोगाभावे एव विशेषणाभावतात्पर्यं निश्चीयेत । यदि विशेषणे तात्पर्यं स्यात् तदा विशेषणं प्रयुज्येत । यतो न प्रयुक्तं ततो विशेषणाभावे तात्पर्यमितीति समाधत्ते-**तात्पर्यनिश्चायकं तत्रेति** । **तत्र**=विशेषणमप्रयुज्य विशेष्य-मात्रप्रयोगे ।

ननु विशेषणपदाप्रयोगो न तदभावतात्पर्यनिश्चायकः । अतः प्रकृते विशेष्यपदमात्रप्रयोगे विशेषणतदभावसंदेह एव स्यादिति शङ्कते-**देवदत्त** इत्यादिना । **तद्विशिष्टत्वमिति** । विशेष्यस्य विशेषणतदभावसाधारणत्वादिति पूर्वमुक्तरीत्या विशेषणतदभावसंदेहात्

युवेत्यादिविशेषणपदप्रयोगेऽपि तद्विशिष्टत्वं प्रतीयत इति सन्देहानपाय एव ॥ प्रतीतमपि युक्त्या निरस्यत इति चेत्; अप्रतीतं किं निरसिंतु युक्त्या न शक्यते ? नूनमुपकारकमेवापकारकं मन्यसे ॥ प्रतियोगिस्मृत्यभावे तत्प्रतिक्षेपो न शक्यत इति चेन्न; साधारणधर्ममात्रप्रतीत्यैव धर्मिणां बुद्ध्यधिरोहात् । अन्यथा संशयस्याप्यनुत्थाने सिद्धमेकपदेनैव निर्विशेषम्, किमनेकैरजागलस्तनायमानैः सत्यादिपदैः ।

नापि चतुर्थः । स हि बुद्धिस्वरूपभेदमात्रं वा, ग्राहकविशेषाधीनप्रत्यक्षादिभेदो

विशेषणवत्त्वं न निर्णीयेत विशेषणतदभाव-संदेहानपायात् विशेषणाभावतात्पर्मनिश्चयो न भवति । तन्निश्चयार्थं विशेषणपदप्रयोग इति शङ्का । समाधानमाह- **श्यामो युवेति** । श्यामो युवेत्यादौ विशेषणपदप्रयोगेऽपि विशेषणवत्त्वं प्रतीयत इति संदेहो नापैत्येवेति भावः ।

विपरीतनिर्णय एव स्यादिति यत् पूर्वमुक्तं तत्र शङ्कते- **प्रतीतमपीति** । समाधत्ते **अप्रतीतमिति** । प्रतीतमपि विशेषणं युक्त्या निरस्यते चेत् अप्रतीतं तत् कुतो युक्त्या न निरस्यत इत्यर्थः । **नूनमिति** । प्रतीतस्य विशेषणस्य निषेधायोगात् तस्य अप्रतीतत्वमेव अभावसाधकं स्यादिति भावः । शङ्कते- **प्रतियोगीति** । प्रतियोविषयकस्मृत्यभावे प्रतियोगिनः प्रतिषेधः न शक्यते । प्रतियोगिविषयकस्मृतिश्च तदनुभवाधीना । तदनुभवसंपादनार्थं विशेषणपदप्रयोगः इति शङ्का । समाधानं तु विशेषणतदभावसहसाधारणधर्मज्ञानमात्रेण विशेषणरूपविशेषधर्माश्रयस्य ज्ञानसंभवात् असाधारणविशेषणप्रतिपादनं तत्प्रतिबेधाय नावश्यकमिति भावः । **अन्यथा** = असाधारणविशेषणप्रतिपादनस्य प्रतियोगिज्ञानसंपादनद्वारा तन्निषेधं प्रति आवश्यकत्वे एकेनासाधारणधर्मज्ञानेनैव **जडादि** तादात्म्यसंदेहस्य निवृत्तिसंभवात् अनेकविशेषणकथनं व्यर्थमिति भावः ।

चतुर्थकल्पनिरासः

विशेषणभेदाधीनो बुद्धिभेदः विशिष्टताभेद इति चतुर्थकल्पं निरस्यति - **नापि चतुर्थ** इति, बुद्धिभेद इत्यनेन बुद्धिस्वरूपभेदमात्रं वा, करुणविशेषाधीन-प्रत्यक्षादिभेदो वा

वा, ग्राह्याकारभेदो वा ? आद्ये धारावाहिकबुद्धौ वस्तुनः क्षणिकत्वप्रसङ्गः। अभिज्ञाप्रत्यभिज्ञयोर्भिन्नविषयत्वेन क्षणिकत्ववादिसम्मतसर्वप्रत्यभिज्ञाप्रामाण्यभङ्गप्रसङ्गश्च। (?) अतिरिक्तस्त्वयं विशेषः। स्मृत्यनुभवयोर्भिन्नविषयत्वप्रसङ्गश्च। एवं वादिप्रतिवादिशिष्याचार्यबुद्धीनामेकविषयत्वाभावात् परस्परव्यवहारानभिज्ञतया कथाप्रवृत्त्यादिभङ्गप्रसङ्गश्च । एतेनात्मख्यातिवादः, तदनुविधायिविषयान्तः

ग्राह्याकारभेदो वा विवक्षित इति विकल्पः । तत्राद्यं दूषयति - **आद्ये** इति । बुद्धिभेदविवक्षायां बुद्धिभेदाधीनो विशेष्यभेद इत्यायाति । तथा सति एकघटविषयिण्यां धारावाहिकबुद्धौ बुद्धिभेदसत्त्वात् घटस्य भेदः प्रसज्येत । ततश्च प्रथमक्षणोत्पन्नबुद्धिविषयः घटः अन्यः द्वितीयक्षणोत्पन्नबुद्धिविषयो घटः अन्य इति फलति । एवं च भिन्नबुद्धिविषयघटस्य क्षणिकत्वप्रसङ्गः। दोषान्तरमाह **अभिज्ञेति**। क्षणिकत्ववादिसंमतो यः सर्वप्रत्यभिज्ञा-प्रामाण्यभङ्गः स स्यादित्यर्थः। एतदुक्तं भवति - अयं घट इति ज्ञानम् अभिज्ञा। सोऽयं घट इति ज्ञानं प्रत्यभिज्ञा। अनयोः अभिज्ञाप्रत्यभिज्ञारूपयोः बुद्ध्योर्भेदात् तद्विषयस्य घटस्य भेद इति अङ्गीकारे घटस्य क्षणिकत्वप्रसक्त्या यः स्थिरत्वग्राहक-प्रत्यभिज्ञायाः प्रामाण्यभङ्गः प्रामाण्याभावः बौद्धसंमतः स भवन्मतेऽपि स्यादिति । प्रकटसौगतात् प्रच्छन्नसौगते अधिकं दोषमाह - **अतिरिक्तस्त्विति**। कश्चित् यं घटमनुभवति तमेव स्मरति। ज्ञानभेदात् विषयभेदाङ्गीकारे स्मृत्यनुभवरूपयोः ज्ञानयोः भेदात् तद्विषयस्य घटस्यापि भेदेन तयोः भिन्नविषयकत्वप्रसङ्ग इति भावः। **अयं** = वक्ष्यमाणः भिन्न- विषयत्वप्रसङ्गरूपः। "एवमेव पाठेऽयमर्थः = अभिज्ञापेक्षया प्रत्यभिज्ञायां विशेषः सिद्धान्तेऽपीष्टः। न स विशेषोऽयम्, किं तु विशेष्यस्यैव भेदोक्त्या अतिरिक्त इति" इति उत्तमूरुस्वामिनः। दोषान्तरमाह - **एवमिति**। एकमेव विषयमधिकृत्य वादिप्रतिवादिनोः शिष्याचार्ययोः अन्येषां च व्यवहारः प्रवर्तते। व्यवहारः तद्विषयकबुद्धिपूर्वकः। वादि-प्रतिवाद्यादिबुद्धीनां भेदात् विषयभेदे सति पूर्वोत्तरपक्षरूपो व्यवहारः कथं भवेत् इत्यर्थः। **व्यवहारानभिज्ञतये**त्यस्य व्यवहारविषयार्थानभिज्ञतयेत्यर्थः। **एतेनेति**। आत्मख्यातिवादो योगाचाराणाम्। विषयान्तःकरणवृत्त्यध्यासोऽद्वैतिनाम्? ।

करणवृत्त्यध्यासवादश्च निर्मूलः । अत एव न द्वितीयः । स्वराद्यनुमितपुत्रादेः पूर्वानुभूतान्यत्वप्रसङ्गश्च । तथाच श्रवणमनननिदिध्यासनादीनां भिन्नविषयता स्यात् । तृतीयेऽपि ग्राह्याकारमात्रं विवक्षितम्, विरुद्धग्राह्याकारभेदो वा ? पूर्वत्र उक्तनयेन विशेष्यभेदासिद्धिः; एकस्यैवानेकविशेषणविशिष्टताग्रहणात् । अन्यथा

अत एवेति । अभिज्ञाप्रत्यभिज्ञास्मृत्यनुभवादिविषयाणां भेदप्रसङ्गादेवेत्यर्थः । न **द्वितीय** इति । ग्राहकविशेषाधीनप्रत्यक्षादिभेद इति द्वितीयकल्पोऽपि न युक्तः । एकस्मिन्नेव विषये प्रत्यक्षानुमित्यादिज्ञानानि भवितुमर्हन्ति । ज्ञानभेदात् विषयभेदाङ्गीकारे वस्तुनः भेदप्रसङ्ग इत्यर्थः । अत्र कल्पे दोषान्तरमाह- **स्वरादीति** । पूर्वं दृष्ट एव पुत्रः पश्चात् स्वरादिना यत्रानुमीयते तत्र प्रत्यक्षानुमितिरूपज्ञानभेदात् विषयस्य पुत्रस्य भेदप्रसङ्ग इत्यर्थः। दोषान्तरमाह-**तथा चेति** । ज्ञानभेदात् विषयभेदाङ्गीकारे "आत्मा वा अरे द्रष्टव्य श्रोतव्यो मन्तव्यो निदिध्यासितव्य" इति श्रुतिबलात् श्रवणमनननिदिध्यासनविषयीकृतस्य आत्मनः भेदप्रसङ्गः । श्रवणादिज्ञानानां भेदात् ।

ननु तदधीनबुद्धिभेद इति चतुर्थकल्पे तदधीनेत्यस्य विशेषणभेदाधीनेति खलु अर्थः। ततश्च बुद्धिभेदस्य प्रत्यक्षादिभेदस्य च विशेषणभेदाधीनत्वाभावात् कथमनयोः कल्पयोरुत्थानम् । कथं च धारावाहिकबुद्ध्यभिज्ञादिषु दोषोद्भावनम् । तत्र विशेषणभेदाधीनत्वाभावादिति चेत् - इत्थम् । बुद्धिभेदमात्रं तत्र विशेष्यभेदप्रयोजकतया विवक्षितम् । विशेषणभेदाधीनत्वं तु प्रकृताभिप्रायेण तदुपपादकतया विवक्षितम् । अतो न दोष इति महाचार्याः ।

ग्राह्याकारभेद इति तृतीयपक्षे दोषमाह - **तृतीयेऽपीति** । **ग्राह्याकारमात्रमिति** । आकारः - विशेषणम् । सामान्यतः ग्राह्याकारमात्रमित्यर्थः । **उक्तनयेनेति** । अनेकव्यावृत्तीनामेकत्र संभवादित्युक्तन्यायेन एकत्र अनेकविशेषणविशिष्टताग्रहसंभवात् न ग्राह्याकारभेदेन विशेष्यभेदप्रसङ्ग इत्यर्थः । भवद्भिरपि केचन धर्माः विरुद्धाः केचनाविरुद्धा इति व्यवस्था व्यवहारदशायामङ्गीकृता । अविरुद्धाकारभेदेन विशेष्यभेदाङ्गीकारे सा व्यवस्था

व्यावहारिकस्यापि विरुद्धाविरुद्धधर्मव्यवस्थापनस्यासिद्धिप्रसङ्गात् । उत्तरोऽपि प्रागुक्तनयेनासिद्ध एव । 'तत्त्वमसि' इत्यत्र तत्त्वमाकारयोरविरोधस्तु सामानाधिकरण्यवादे(32) द्रष्टव्यः । नापि पञ्चमः, विशिष्टताभेदात् विशेष्यभेद इति हेतुसाध्यभावासिद्धिप्रसङ्गात् ॥ पर्यायद्वारा पर्वक्रमेण बुद्ध्यारोहणमात्रार्थमिदमिति चेत्; तर्हि विशेषणभेदाद्विशेष्यभेद इत्येतावदेवोक्तं भवति । तच्च व्याप्त्यभावादिना प्रथममेव दत्तोत्तरम् ॥

भज्येतेत्यर्थः । **उत्तरोऽपीति** विरुद्धग्राह्याकारभेद इत्युत्तरकल्पोऽपि । **प्रागुक्तनयेनेति** । प्रागुक्ताविरोधिव्यावृत्तिभेदवदित्यर्थः । **असिद्ध** इति । सत्यत्वाद्याकाराणां विरोधोऽसिद्ध इत्यर्थः । ननु सत्यत्वज्ञानत्वादीनामविरोधेऽपि तत्त्वमसीत्यत्र तत्त्वमाकारयोर्विरोधात् विशेष्यभेदः स्यादित्यत्राह - **तत्त्वमसीत्यत्रेति** ।

पञ्चमकल्पनिरासः

विशिष्टताभेदो नाम विशेष्यभेद इति पञ्चमं कल्पं दूषयति - **नापि पञ्चम** इति । विशेषणभेदेन विशिष्टताभेदात् विशेष्यभेद इति प्रसङ्गे विशिष्टताभेद इत्यस्य पञ्चधा विकल्पः कृतः । तत्र विशिष्टताभेद इत्यस्य विशेष्यभेद इत्यर्थ इति पञ्चमः कल्पः । अत्रानौचित्यं तावदित्थम् विशेष्यभेदात् विशेष्यभेद इति किलार्थः । तत्र हेतुसाध्ययोः ऐक्यात् हेतुसाध्यभावो न संभवतीति । ननु विशेषणभेदात् विशेष्यभेद इत्येव वस्तुतो वक्तव्यम् । तत्तु विमतस्य = विशेषणभेदात् विशेष्यभेदमनङ्गीकुर्वाणस्य बुद्धौ सहसा नारोहति । अतो विशेषणभेदप्रयोज्यत्वेन संमतं विशिष्टताभेदमापाद्य विशेष्यस्वरूपातिरिक्तायाः विशिष्टतायाः अभावात् विशिष्टताभेदात् विशेष्यभेदः स्यादेवेत्यनेन तात्पर्येण विशेष्यभेदापादने बुद्धावधिरोहो भवतीत्याशयेन शङ्कते- **पर्यायद्वारेति** । विशिष्टताभेदविशेष्यस्वरूपभेदयोरैक्यात् विशेषणभेदात् विशिष्टताभेदः, विशिष्टताभेदाद्विशेष्यभेद इति पर्वक्रमेणोक्तावपि विशेषणभेदात् विशेष्यभेदप्रसङ्ग इत्येव पर्यवसानम् । तत्र प्रसञ्जकप्रसञ्जनीययोः व्याप्तिर्नास्ति । देवदत्तः श्यामो युवेत्यादौ विशेषणभेदेऽपि विशेष्यभेदाभावेन व्यभिचारादिति पूर्वमेवोत्तरं दत्तमित्याशयेन समाधत्ते-**तर्हीति** ।

अस्तु तर्हि परस्परसमवायप्रसङ्गो विपक्षे दण्डः । तथा हि–सर्वं हि वाक्यमुद्देश्योपादेयविभागवत् । ततश्च क्रमावश्यंभावः । यौगपद्येन विशेषणानामन्वये सति उद्देश्योपादेयविभागासिद्धेः । 'यद्वृत्तयोगः प्राथम्यमित्याद्युद्देश्यलक्षणम्' इत्याहुः । ततश्च यदि विशेषणविशिष्टमुद्दिश्य विशेषणान्तरं विधीयते, तदोद्देश्यानुप्रविष्टविशेषणांशस्यापि विशेष्यांशस्येव विशेषणान्तरेण विशेष्यत्वप्रसङ्गः । एवं विशेषणान्तरविशिष्टोद्देशेऽपीति ॥

तन्न, सर्वेषां वाक्यानामुद्देश्योपादेयनियमाभावात् । सर्वस्याप्राप्तत्वे विशिष्टमेव

विपक्षे बाधकराङ्का

ननु विशेषणभेदात् विशेष्यभेदः अवश्यमङ्गीकार्यः । अन्यथा विशेष्ये विशेषणान्वयवत् विशेषणेऽपि विशेषणान्तरान्वयप्रसङ्ग इति विपक्षे बाधकस्तर्क इति शङ्कते - **अस्तु तर्हीत्यादिना** । विशेषणानां परस्परान्वयप्रसङ्गमुपपादयति- **तथाहीत्यादिना** । सर्वस्य वाक्यस्योद्देश्यविधेयविभागवत्त्वनियमात् उद्धेश्यतायाश्च प्रथमाभिधानप्रयुक्तत्वात् प्राथम्यस्य च विशिष्टगतस्य तदन्तर्गतविशेषणेऽप्यविशेषेण तस्याप्युद्देश्यत्वात् उद्देश्यान्वयिनो विधेयस्य उद्देश्ये विशेष्ये इव तद्विशेषणेऽप्यन्वयप्रसङ्ग इति समुदायार्थः । **क्रमावश्यंभावादिति** । उद्देश्यवचनं पूर्वं जिधेयस्य ततः परम्'' इत्यभियुक्तवचनादिति भावः । न केवलमभियुक्तवचनात्, अपि तूपपत्तेरित्याह-**यौगपद्येनेति** । **यद्वृत्तयोगः** यच्छब्दप्रयोगः। **प्राथम्यं**= प्रथमोच्चरितत्वम् । नन्वेवं उद्देश्यविशेषणान्वयेऽपि विधेये उद्देश्य-विशेषणानन्वयात् कथं परस्परसमवाय इत्यत्राह- **एवं विशेषणान्तरेति** । प्राप्तस्यापि विशेषणस्येत्यादिवक्ष्यमाणाभिप्रायोऽत्र बोद्धव्यः । इत्थं च सत्यज्ञानादिवाक्ये सत्यत्वविशिष्टे ज्ञानत्वान्वये सत्यत्वेऽपि ज्ञानत्वापत्तिरिति भावः ।

तत्समाधानम्

उक्तशङ्कायाः समाधानमाह - **तन्नेत्यादिना** । सर्वेषां वाक्यानामुद्देश्यविधेयभाव इति नियमों नास्ति । यत्र किंचित् प्राप्तमन्यच्च अप्राप्तं तत्रैव वाक्ये किंचिद्विशेषणविशिष्टमुद्दिश्य विशेषणान्तरं विधेयम् । यत्र तु विशेषणान्यप्राप्तानि तत्र युगपदनेकविशेषणविशिष्ट-

विधेयं निरणैषुः, 'यदाग्नेयोऽष्टाकपाल' इत्यादिषु ।। गत्यभावविषयो विशिष्टविधिरिति चेत्, किमतः ? उद्देश्योपादेयविभागः स्वरस इति चेत्–तथाऽपि कृत्स्नस्याप्राप्तत्वे स एव गत्यभाव इति विशिष्टविधिर्भवति । अन्यथा न क्वचिदपि विशिष्टविधिस्वीकारः (स्यात् ?) । अतो विशिष्टविधिस्थलेषु युगपदनेकविशेषणविशिष्टैक-प्रतीतिरनिवार्या। यत्र किंचिदुद्दिश्य किमपि विधीयते, न तत्रापि परस्परसमवायसिद्धिः, प्रथमं तावत् परस्परमुद्देशासम्भवात् । प्राप्तो ह्यंश उद्देश्य एव, अप्राप्तोंऽशो विधेय एवेति

विशेष्यबोधनमिति न तत्रोद्देश्यविधेयभावः । प्रकृते सत्यत्वज्ञानत्वादीनामप्राप्तत्वादनेकविशेषणविशिष्टैकविशेष्यबोधनं युगपद्भवतीति न परस्परान्वयप्रसङ्ग इति भावः । अत्र वैदिकमुदाहरणमाह - **सर्वस्याप्राप्तत्व** इति । "यदाग्नेयोऽष्टाकपालोऽमावास्यायां च पौर्णमास्यां चाच्युतो भवति" इति वाक्ये अग्निरूपदेवता अष्टाकपालसंस्कृतपुरोडाशरूपद्रव्यामावास्यादिकालानां यागस्य च प्रमाणान्तरेणप्राप्ततया द्रव्यदेवतादिविशिष्टयागविधानमङ्गीकृतम् । तद्वत् प्रकृतेऽपीति भावः । **निरणैषुरिति** । मीमांसका इति शेषः । **किमत** इति। विशिष्टविधेः गत्यभावस्थलीयत्वेऽपि उद्देश्योपादेयविभागनियमो न सिध्यतीत्यर्थः । **उद्देश्येति** ।

ततश्च बाधकाभावे तादृशनियमत्यागो नोचित इति भावः । प्रकृते बाधकसत्त्वात् तन्नियमस्त्यज्यत इति समाधत्ते - **तथापीति** । सत्यज्ञानादिवाक्येऽपि कृत्स्ना-प्राप्तिरूपस्योद्देश्योपादेयविभागबाधकस्य सत्त्वाद्विशिष्टविधिरेवेत्याह - **तथापीति** । **अन्यथेति** । कृत्स्नस्याप्राप्तावपि उद्देश्योपादेयनियमाङ्गीकारे विशिष्टविधिसामान्योच्छेदप्रसङ्ग इति भावः । किं च अस्तूद्देश्योपादेयनियमः, तथापि न स्वरूपपरत्वसिद्धिः । तथा सति भेदाभावेन भेदनियतोद्देश्योपादेयनियमासिद्धेरित्यर्थः । तथा च विशिष्टविधिस्थलेषु युगपदनेकविशेषणविशिष्टैकवस्तुविषयकप्रतीतिरनिवार्येति ।

अथ उद्देश्यविधेयनियमाङ्गीकारेऽपि विशेषणानां परस्परसमवायो न प्रसजतीत्याह- **यत्रेति** । **प्रथमं तावदिति** । यदुक्तं पूर्ववादिना - परस्परमुद्देश्योपादेयभावः पदार्थानां

व्यवस्थापनात्।। प्राप्तस्यापि विशेषणस्य विशेष्यान्वयप्रतिपत्त्यर्थमितरांशानुवादेन तदंशविधिः स्वीकार्य इति चेन्न; तद्विशिष्टतानुवादेनैव तदन्वयप्रतीतिसिद्धेः । अत उद्देश्योपादेयभावस्य प्राप्तत्वाप्राप्तत्वनिबन्धनत्वात् नाभिधानदशायां क्रमापेक्षा । स्मृतिविमर्शयोस्तदपेक्षायामपि प्रत्येकं स्मरणात् यथायोग्यं विमर्शाच्च न परस्परसमवायप्रसङ्गावकाशः । 'यद्वृत्तयोगः प्राथम्यमित्याद्युद्देश्यलक्षणम्' इति

वक्तव्य: । ततश्च परस्परमभिधानक्रमो वक्तव्य: । ततश्च क्रमाविशेषात् विशेषणानामपि परस्परमुद्देश्योपादेयभावात् परस्परसमवायप्रसङ्ग इति । तत्र प्रथमं परस्परमुद्देश्योपादानत्वं न संभवति । प्राप्तो ह्यंश: उद्देश्य एव, अप्राप्तो ह्यंश: विधेय एवेति व्यवस्थासद्भावात् उद्देश्यस्य विधेयत्वं विधेयस्योद्देश्यत्वं च कथं संभवेदिति भाव: ।

ननु प्राप्तस्यापि विशेषणस्य विशेष्येऽन्वयबोधार्थं विशेषणान्तरविशिष्टतया विशेष्यमनूद्य एतद्विशेषणस्यान्वय: प्रतिपत्तव्य इति स्वीकर्तव्यत्वात् अप्राप्तमेव विधेयमिति नियमो नास्ति । ततश्च विशिष्टे विशेषणान्वये विशेषणयोरपि परस्परान्वयप्रसङ्गो दुर्वार इति शङ्कते- **प्राप्तस्यापीति** । किंचिद्विशेषणविशिष्टमनूद्य विशेषणान्तरविधाने विशिष्टान्तर्गतविशेषणान्वयस्य विशेष्ये प्रतीततया तदर्थमनुवादान्तरं नापेक्षितमित्याशयेन समाधत्ते - **तद्विशिष्टतेति** । ततश्च विशेष्ये विशेषणान्वये विशेषणस्य विहितत्वं न प्रयोजकमिति भाव: ।

ततश्च क्रमावश्यंभाव इति पूर्वोक्त: अभिधानक्रमोऽपि नास्तीत्याह - **अत** इति । **अत** इत्यस्य विवरणम् उद्देश्योपादेयभावस्य प्राप्तत्वाप्राप्तत्वनिबन्धनत्वादिति । **अभिधानदशायां** = वाक्यार्थज्ञानदशायाम् । **स्मृति:** = पदार्थस्मरणम् । **विमर्श:** = योग्यतादिपरामर्श: । पदार्थस्मृतीनां क्रमोऽस्ति । एवं विमर्शस्यापि ज्ञाते उद्देश्यरूपे धर्मिणि विधेयान्वयविचाररूपत्वात् तत्रापि क्रमोऽस्ति । वाक्यार्थज्ञानं तु युगपदनेकविशेषणविशिष्टैकार्थविषयकमिति तद्दशायां क्रमो नास्तीत्यर्थ: । तथा च स्मृतिविमर्शयो: क्रमापेक्षायामपि प्रत्येकं स्मरणात् विशेषणान्तरविशिष्टे विशेषणान्तरान्वयप्रतीति: वर्तते । विमर्शे क्रमे सत्यपि विशेषणे विशेषणान्तरान्वयस्या-योग्यत्वात् विशेष्य एव विशेषणान्तरान्वयप्रतीतिरिति भाव: ।

तु उच्चारणक्रमविषयम्; नाभिधानविषयम् । अतः उद्देश्यांशगतविशेषणस्य तूपादेयविशेषणाधारत्वप्रसङ्ग इति च प्रत्युक्तम् । उद्देश्यपदवत् उपादेयपदस्यापि विशेष्यसमवेतविशेषणबोधनव्युत्पत्तेर्यथाव्युत्पत्ति विवक्षितत्वात् । प्रयोगाच्च । न हि 'दण्डी देवदत्तः कुण्डली' इत्यत्र दण्डस्यापि कुण्डलित्वमनुन्मत्तोऽभिमन्येत ।

ननूद्देश्यस्य व्याप्यत्वम्, उपादेयस्य व्यापकत्वं सर्वत्राभिमतम्; यथा यो यो धूमवान् सोऽग्निमानित्यादिषु । अतो विशिष्टस्योद्देश्यत्वे तस्यांशस्याशेष-

---

अत इति । यत् उद्देश्यं तद्विधेयं न भवति यद्विधेयं तदुद्देश्यं न भवतीति उद्देश्यविधेयभावस्य व्यवस्थिततत्वेन परस्परमुद्देश्यत्वाभावेऽपि एकस्या उद्देश्यतायाः सत्त्वात् तत्प्रयोजकस्य च क्रमस्य उद्देश्य इव उद्देश्यविशेषणेऽपि अविशेषात् उद्देश्यविशेषणे विधेयविशेषणाधारताप्रसङ्ग इति शङ्कापि उद्देश्योपादेययोः क्रमाभावेनैव निरस्तेत्याह- **अत** इति । ननूद्देश्योपादेययोः क्रमाभावेऽपि विशिष्टस्यैव उद्देश्यत्वात् तदन्तर्गते विशेषणे विशेष्ये इव विधेयान्वयोऽवर्जनीय इत्यत्राह - **उद्देश्यपदवदिति** । यथा उद्देश्यपदं विशेष्यसमवेतं विशेषणं बोधयति तथा विधेयपदमपि विशेष्यसमवेतमेव विशेषणं बोधयति न उद्देश्यविशेषणसमवेतं विशेषणं बोधयति इति व्युत्पत्तिसद्भावात् उद्देश्यविशेषणे न विधेयविशेषणान्वयप्रसङ्ग इति भावः । विशेषणे विशेषणान्वयः वक्तृतात्पर्यविरुद्धश्चेत्याह- **यथाव्युत्पत्तीति** । तात्पर्याभावमेव विवृणोति - **न हीति** । यदि उद्देश्यविशेषणेऽपि विधेयविशेषणान्वयः स्यात् तदा दण्डी देवदत्तः कुण्डली इत्यत्र विशेषणे दण्डेऽपि कुण्डलवत्त्वान्वयः स्यात् । यदि योग्यताविरहान्नान्वयः, तदा प्रकृतेऽपि सत्यत्वे ज्ञानत्वयोग्यताविरहान्नान्वय इति विभावयन्तु ।

पुनरप्याक्षेपः समाधानं च

शङ्कते - **ननूद्देश्यस्येति** । अत्र व्याप्यत्वं व्यापकत्वं च तादात्म्येन विवक्षितम् । यद्वा व्याप्यत्वं तादात्म्येन व्यापकत्वं यथायोगं संयोगादिना । यो यो धूमवान् सोऽग्निमानित्यादौ । तत्र धूमवन्तमुद्दिश्य अग्निमत्त्वं विधीयते । धूमवान् सर्वोऽपि अग्निमान्

स्याप्युपादेयांशेन व्याप्तिर्वक्तव्येति चेत्— अस्त्वेवम्; तथाऽपि न समवायेन व्याप्तिर्वक्तव्या; यथाप्रमाणं सम्बन्धनियमस्यैव व्याप्तिरूपत्वात्। न हि धूमोग्निव्याप्त इति धूमसमवेतोऽग्निः। ततोऽत्र विशेष्यस्याधारतया तत्सम्बन्धनियमः; विशेषणस्य तु न स्वरूपेणैव; विशेषणान्तरेणैकार्थसमवायतः सम्बन्धनियम इति

भवति इति तादात्म्येन धूमवान् व्याप्यः। अग्निमान् तादात्म्येन व्यापकः, अग्निमत्त्वं वा संयोगेन व्यापकम्। तत्र धूमविशिष्टस्य उद्देश्यस्य योंऽशः विशेषणविशेष्यात्मकः तस्य सर्वस्य उपादेयविशेषणेन व्याप्तिर्वक्तव्या। तथा च उद्देश्यांशे विशेषणेऽपि विधेयविशेषणान्वय आवश्यक इति शङ्कितुरभिमानः। तमभिमानं निरस्यति - **अस्त्वेवं, तथापीति**। उद्देश्यस्य विधेयव्याप्यत्वमस्तु नाम। तावता सर्वत्रोद्देश्योपादेयभाव इति नियमो नास्ति। न चैतावता व्याप्यत्वाभावः। साहचर्यनियममात्रस्य व्याप्तित्वात्। यत्र यत्र व्याप्यत्वं तत्रोद्देश्यविधेयभावनियमस्वीकारे धूमस्य वह्निव्याप्तिर्न स्यात्। धूमस्य वह्निं प्रति उद्देश्यत्वाभावात्। न च तादात्म्यसंबन्धेन वह्निव्याप्यस्य धूमवतः विधेयं वह्निं प्रति उद्देश्यत्वमस्तीति वाच्यम्। तथापि उद्देश्ये विशेष्ये आधारतासंबन्धेन विधेयस्य विशेषणस्यान्वयनियमः, उद्देश्यविशेषणे तु विधेयस्य विशेषणस्य एकाधिकरणवृत्तित्वरूपेण सामानाधिकरण्यसंबन्धेनान्वयनियमः इति यथाप्रमाणं स्वीकरणीयम्। यथा "दण्डी देवदत्तः कुण्डली" इत्यत्र उद्देश्ये देवदत्ते विधेयस्य कुण्डलस्य आधारतासंबन्धेनान्वयः, उद्देश्यविशेषणे दण्डे विधेयस्य कुण्डलस्य सामानाधिकरण्यसंबन्धेनान्वय इतीति भावः। **न समवायेनेति**। व्याप्यस्य साक्षात्संबन्धेन व्यापकाधारत्वं न वक्तव्यमित्यर्थः। **संबन्धनियम** इति। व्याप्यव्यापकयोः नियमेन संबन्धः। स च क्वचित् साक्षात्, क्वचित् परंपरया। तदाह-**ततोऽत्रेति**। तत्संबन्धनियमः विधेयसंबन्धनियमः। **विशेषणस्य तु** = उद्देश्यविशेषणस्य तु। **न स्वरूपेण** = आधारतारूपेण स्वरूपसंबन्धेन, **तत्संबन्धनियम** इत्यनुषङ्गः। विशेषणान्तरेणेत्यतः प्राक् किं तु इति शेषः। **एकार्थसमवायतः** = एकाधिकरणवृत्तित्वेन। **तत्संबन्धनियमः** = विधेयसंबन्धनियमः।

यथाप्रमाणमास्थीयताम् ॥ एवं तर्ह्युद्देश्यांशगतविशेषणस्य शाखासारसादिवत् उपलक्षणत्वमात्रं स्यादिति चेत्; किं तेन? न हि तथात्वेऽपिनिर्विशेषत्वं सिध्यति ॥ (उप?) लक्षणस्य बहिर्विषयत्वात् तत्सिद्धिरिति चेत्, न; तस्य बहिःष्ठत्वेऽप्युपादेयस्य तन्निष्ठतया निर्विशेषत्वासिद्धेः । न चोपलक्षणं सर्वं बहिःष्ठमिति नियमः, गोत्वपृथिवीत्वाद्युपलक्षणसास्नादिमत्त्व- गन्धवत्त्वादेर्बहिःष्ठत्वाभावात् । न च

ननु उद्देश्यविशेषणस्य विधेयविशेषणानाश्रयत्वे उपलक्षणत्वमेव स्यात् न तु विशेषणत्वम् । तथा हि - शाखायां चन्द्र इत्यत्र चन्द्रस्य शाखा उपलक्षणम् । यत्रासौ सारसः स देवदत्तकेदार इत्यत्र सारसः केदारस्य उपलक्षणम् । तत्र विधेयविशेषणं चन्द्रत्वं केदारत्वं च । तदनाश्रययोः शाखासारसयोः उपलक्षणत्वं दृश्यते । न तु घटं पश्येत्यादाविव उद्देश्यविशेषणस्य घटत्वादेः विधेयान्वयितया विशेषणत्वम् । तथा प्रकृते सत्यत्वे ज्ञानत्वानन्वये उपलक्षणत्वं स्यात् ततश्च निर्विशेषत्वं स्यादिति शङ्कते - **एवं तर्हीति** । भवतु नामोपलक्षणत्वम् । तथापि ब्रह्मणो निर्विशेषत्वं न सिध्यति उपलक्षणसत्यत्वाश्रयत्वादिति समाधत्ते-**किं तेनेति** । पुनः शङ्कते - **लक्षणस्येति** । शाखावत् उपलक्षणस्योपलक्ष्यावृत्तित्वात् उपलक्ष्यस्य निर्विशेषत्वं सिध्यतीति भावः । **बहिर्विषयत्वादिति** । विषयात् बहिः बहिर्विषयमित्यव्ययीभावः । ततो भावे त्वप्रत्ययः । विशेष्यावृत्तित्वादिति तदर्थः । **तत्सिद्धिः** = लक्ष्यस्य निर्विशेषत्वसिद्धिः । समाधत्ते - **तस्येति** । उपलक्षणतयाभिमतस्य उद्देश्यविशेषणस्य बहिःष्ठत्वेऽपि=लक्ष्यावृत्तित्वेऽपि उपादेयस्य लक्ष्यवृत्तितया लक्ष्यस्य निर्विशेषत्वं न सिध्यतीति भावः । उद्देश्यविशेषणेन उपलक्षणतयाभिमतेनापि सविशेषत्वमाह- न **चोपलक्षणमिति** । शाखादीनां केषांचित् उपलक्षणानां लक्ष्यावृत्तित्वेऽपि सर्वेषामुपलक्षणानां लक्ष्यावृत्तित्वमिति नास्ति नियमः । सास्नादिमती गौः गन्धवती पृथिवीत्यादौ गोत्वपृथिवीत्वाद्युपलक्षणानां सास्नादिमत्त्वगन्धवत्त्वादीनां लक्ष्यवृत्तित्वादिति भावः । तथा च उपलक्षणं लक्ष्यावृत्ति उपलक्षणत्वात् शाखादिवादित्यनुमाने सास्नादिमत्वादौ व्यभिचार इति भावः ।

सारसादिकमपि बहिःष्ठम्, संयोगादिमत्त्वात् । अन्यथा सम्बन्धाभावेन देवदत्तक्षेत्राद्युपलक्षण- त्वासम्भवात्; असम्बन्ध(द्ध?) मुपलक्षयत् न कस्यचिदेवोपलक्षणं स्यात्; अपि त्वसम्बन्धाविशेषात् सर्वस्यापि स्याद्वा, न वा कस्यचित् । उपलक्षणस्य सम्बन्धाभावे वाक्यस्यानन्वयप्रसङ्गश्च । एतेन चन्द्राद्युपलक्षणशाखादिकमपि निर्व्यूढम् । न हि साऽप्यसम्बन्धिनि(नी?) तमुपलक्षयति; तस्याः सर्वोपलक्षकत्वप्रसङ्गात् निर्णयासिद्धेः । सर्वस्य तदुपलक्षणत्वं

एवं क्वचिदुपलक्षणस्य लक्ष्यावृत्तित्वमङ्गीकृत्योक्तम् । इदानीं क्वाप्युपलक्षणस्य लक्ष्यावृत्तित्वं नेत्याह - **न च सारसादिकमपीति** । **बहिष्ठम्** = लक्ष्यावृत्ति । **संयोगादिमत्त्वादिति** । केदारसंयोगवत्त्वात् **संयोगसंबन्धेन** केदारवृत्तित्वादित्यर्थः । **अन्यथेति**। यदि सारसस्य केदारसंयोगो न स्यात् तदा देवदत्तकेदारस्यैव उपलक्षणमिति कुतः? असंबन्धाविशेषात् अन्यमपि केदारं कुतो नोपलक्षयेत् । तथा च असंबन्धाविशेषात् सर्वमपि उपलक्षयेत् न वा कमप्युपलक्षयेत् इति भावः । **असंबन्धमिति** बहुब्रीहिः । **कस्यचिदिति** । किं च कस्यचिदुपलक्षणस्य लक्ष्यसंबन्धाभावे स देवदत्तकेदारो यत्र सारस इत्यादिवाक्यस्य अनन्वयप्रसङ्गः । यत्रेत्यनेन सारसस्य केदारवृत्तित्वबोधनात् इति भावः ।

एतेनेति । चन्द्राद्युपलक्षणशाखाया अपि चन्द्रसंबद्धाया एव चन्द्रोपलक्षणत्वम् । अन्यथा शाखायाः सर्वोपलक्षकत्वं स्यात्, असंबन्धाविशेषात् इत्यर्थः । कुतः सर्वोपलक्षकत्वप्रसङ्गः इति जिज्ञासां व्युदस्यन् न हीत्यादिना उक्तमेवार्थं विवृणोति **निर्णयासिद्धेरित्यादिना** । नक्षत्रादीनामप्युपलक्ष्यत्वसंभवेन चन्द्रनिर्णयासिद्धेरित्यर्थः । असंबन्धाविशेषेण लक्ष्यविशेषनिर्णयासंभवात् युगपदेव सर्वस्य तदुपलक्ष्यत्वं स्यात् इत्येवंरूपेणातिप्रसङ्गेन असंबन्धिन्याः शाखायाः चन्द्रोपलक्षणत्वासंभवादिति भावः । **तदुपलक्षणत्वमिति** बहुब्रीहिः । शाखोपलक्षणकत्वमित्यर्थः । शाखोपलक्ष्यत्वमिति यावत्।

तदानीमेव स्यादित्यतिप्रसङ्गेन तत्त्वासम्भवात् । कस्तर्हि तत्सम्बन्धः ॥ यस्तन्निर्देशविवक्षितः ॥ स एव किमिति सौहृदेन पृच्छाम इति चेत्–शाखाग्रे चन्द्र इति वदन्तो द्विविधाः, प्रतीतिमात्रतन्त्राः निरूपकाश्च । तत्र पूर्वे व्याप्ति (भ्रान्ति?) सिद्धं संयोगादिकमुपजीव्य प्रयुञ्जते । इतरे तु तदार्जवदेशलक्षणविवक्षयेति। अतः पारम्पर्येण सम्बन्धः शाखायामपि सिद्धः । तादृशार्जवादिसम्बन्धः साक्षात्सम्बन्धभ्रमेऽपि भ्रमकारणतयाऽ पेक्षितत्वात् नापैतीति भ्राम्यत्प्रयोगेऽपि सम्बन्धमात्रसत्यत्वसिद्धिः ।

अस्तु तर्हि विशेष्यं न विशेषणान्तराधिकरणम्, उद्देश्यपदप्रतिपन्नत्वात् तत्पदोपात्तविशेषणवदिति चेन्न–प्रागुक्तोपलम्भविरोधादिदूषणानामनिवार्यत्वात्

तत्त्वासंभवात् = उपलक्षणत्वासंभवात् । पृच्छति - **कस्तर्हीति** । शाखायाः चन्द्रस्य च कः संबन्ध इति प्रश्नः । समाधत्ते **यस्तन्निर्देशविवक्षित** इति । शाखग्रे चन्द्र इति निर्दिशतः वक्तुः यः संबन्धो विवक्षितः स एव शाखाग्रचन्द्रयोः संबन्ध इत्यर्थः । अस्पष्टत्वात् पुनः पृच्छति - **स एव किमिति** । समाधत्ते-**शाखाग्र** इति । **व्याप्तिसिद्धमिति** । द्रव्ययोः संयोग इति व्याप्त्या कल्पितं संयोगमेवोपजीव्य प्रतीतिमात्रशरणाः शाखायां चन्द्र इति प्रयुञ्जते । व्याप्तिसिद्धमित्यस्य स्थाने भ्रान्तिसिद्धमिति पाठ इति केचित् । भ्रान्तिकल्पितमिति तदर्थः । **इतरे तु** इति । निरूपकास्तु शाखया साकं चन्द्रस्य ऋजुदेशबत्त्वं संबन्धः । ऋजुतया संयुक्तसंयोगपरंपरासंबन्ध इति । अयं च परंपरासंबन्धः साक्षात्संबन्धभ्रमेऽपि भ्रमकारणतया अपेक्षितत्वात् भ्राम्यत्प्रयोगेऽपि संबन्धसत्यत्वं सिध्यतीति भावः । एतद्ग्रन्थशैलीपरिशीलनेन पूर्वं भ्रान्तिसिद्धमिति पाठः स्यादिति प्रतीयते । तालकोशा निरीक्षणीयाः ।

आक्षेपान्तरम्

अस्तु तर्हीति । एकविशेषणविशिष्टे विशेष्येऽपरविशेषणाधिकरणत्वं न संभवति । उद्देश्यपदप्रतिपन्नत्वात् । सत्यं ज्ञानमित्यत्र सत्यपदप्रतिपन्नमुद्दिश्य ज्ञानत्वं विधीयते ।

तथाविधवाक्यानां सर्वेषां प्रामाण्यप्रसङ्गात्। त्वदुक्तेनैव हेतुना त्वदुक्तदृष्टान्तवदेव विशेष्यं न पदान्तरबोध्यमित्यतिप्रसङ्गाच्च । एतेन युगपद्बोधने विशेष्यांशवत् प्रातिपदिकार्थैक्यपरसमानविभक्तिसामर्थ्यादेव विशेषणानां मिथो विशेषणान्तरैर्विशेष्येण च तादात्म्यप्रसङ्गोऽपि प्रत्युक्तः । न हि पदद्वयप्रतिपन्न-

---

सत्यपदप्रतिपन्नं च सत्यत्वविशिष्टम् । तत्र सत्यत्वं तदाश्रयश्च अर्थः । उद्देश्यपदप्रतिपन्ने सत्यत्वे ज्ञानत्वरूपं विशेषणान्तरं यथा नान्वेति, तथा सत्यत्वाश्रयेऽपि ज्ञानत्वं नान्वेति इति शङ्का । समाधानं तु देवदत्तः श्यामो युवेत्यादौ उद्देश्यपदोपात्ते विशेषणे विशेषणान्तरानन्वयेऽपि तत्पदोपात्ते विशेष्ये श्यामत्वादिरूपविशेषणान्तरान्वयदर्शनेन व्यभिचारः उपलम्भबिरोधश्चेति । आदिपदेन पदान्तरवैयर्थ्यं गृह्यते । विशेषणान्तरान्वयार्थं हि पदान्तरं प्रयुज्यते । **तथाविधवाक्यानामिति** । विशिष्टार्थपराणां देवदत्तः श्याम इत्यादिवाक्यानामप्रामाण्यप्रसङ्गात् इत्यर्थः । मूले **प्रामाण्यप्रसङ्गात्** इति पाठो दृश्यते । **अप्रामाण्यप्रसङ्गात्** इति पाठः साधुरिति प्रतीयते । उक्तानुमानस्याभाससमानयोगक्षेमत्वमाह - **त्वदुक्तेनैवेति** । विशेष्यं न पदान्तरबोध्यम् उद्देश्यपदप्रतिपन्नत्वात् तत्पदोपात्तविशेषणवत् इत्यनुमानं यथा आभासः तथा विशेष्यं न विशेषणान्तराधिकरणम् उद्देश्यपदप्रतिपन्नत्वात् तत्पदोपात्तविशेषणवत् इत्यनुमानमप्याभास इत्यर्थः ।

एतेनेत्यादि । समानाधिकरणवाक्यस्थैः सर्वैः पदैः मिलित्वा युगपत् अनेकविशेषणविशिष्टैकविशेष्यबोधनमित्यङ्गीकारे प्रतिपादकार्थैक्यतात्पर्यकसमानविभक्तिबलात् विशेष्यांशैक्यवत् विशेषणानामप्यैक्यं स्यात्; तेषामपि प्रातिपदिकार्थत्वाविशेषात्। तथा च विशेषणानां परस्परमैक्यं तेषां विशेष्यस्य च तादात्म्यं स्यादित्यर्थः । अत्र मूले विशेषणानां मिथो विशेष्येण च तादात्म्यप्रसङ्ग इत्येतावन्मात्रस्य पर्याप्तत्वेऽपि **विशेषणान्तरैः** इति अधिकतयां कथनस्य तात्पर्यमेवं वर्णितं **चण्डमारुते** - "एतद्वाक्यप्रतिपन्नस्य विशेषणस्य समानाधिकरणवाक्यान्तरेऽपि प्रतिपादने तद्वाक्यप्रतिपन्नविशेषणान्तैररपि एतद्वाक्यप्रतिपन्नविशेषणानामैक्यं स्यादित्यर्थः" इति । एतेनेत्यनेन विवक्षितं प्रत्युक्तत्वहेतुमाह - **न हीत्यादिना** । किमत्र

विशेष्यैक्यमात्रात्तत्सिद्धिः; भवत्पक्षे सगुणब्रह्मवाक्यपर्यालोचनेन व्याप्तिविरोधात् (निरोधात् ?) । न च सगुणसमानधिकरणवाक्यस्य प्रातिपदिकार्थैक्ये तात्पर्यमिति स्यात् । तद्वदेव निर्गुणवाक्येष्वपि विशेष्यमात्रैक्यपरत्वनिर्णयात् । तथाच,

श्लो. सगुणे निर्गुणे वापि सामानाधिकरण्यधीः ।
विशेषणानां भेदेऽपि विशेष्यैक्ये नियम्यते ॥

अन्यथा व्युत्पत्तिप्रतिपत्त्योर्विरोधात् । अत एव, 'भिन्नप्रवृत्तिनिमित्तानां शब्दानामेकस्मिन्नर्थे वृतिः सामानाधिकरण्यम्' इति तल्लक्षणविदः ।

ननु भिन्नप्रवृत्तिनिमित्तत्वं हि भिन्नार्थत्वम्; प्रवृत्तिनिमित्तस्य शब्दवाच्यत्वात् ।

समानविभक्तिकपदबोध्यत्वमात्रेण विशेष्यवत् विशेषणानामैक्यं स्यादिति विवक्षितम्? किं वा समानविभक्तेः प्रातिपदिकार्थैक्ये तात्पर्यात् विशेषणानामपि प्रातिपदिकार्थतया अविशेषात् विशेष्यस्येव विशेषणानामप्यैक्यं स्यादिति विवक्षितम्? तत्र आद्ये दोषमाह - **न हि पदद्वयेति** । विशेषणानि अभिन्नानि समानविभक्तिकसगुणब्रह्मपरसत्यकामसत्यसंकल्पादिवाक्यप्रतिपन्नविशेषणेषु ऐक्यस्य भवताप्यनङ्गीकारेण व्यभिचारादिति भावः । द्वितीये दोषमाह - **न च सगुणेति** । सगुणब्रह्मपरसमानाधिकरणवाक्यस्य प्रातिपदिकार्थानां सर्वेषामेक्ये तात्पर्यमिति न संभवति । देवदत्तः श्यामो युवा लोहिताक्ष इत्यत्रेव विशेष्यैक्यमात्रपरत्वनिर्णयात् । ततश्च समानविभक्तिकत्वेऽपि विशेष्यैक्ये तात्पर्यमित्यर्थः । यद्वा तद्वदेवेत्यतः प्राक्तनग्रन्थ एव द्वितीयविकल्पदूषणार्थः । तदा एवं सगुणवाक्यस्य यावत्प्रातिपदिकार्थैक्यपरत्वाभावेन विशेष्यैक्यमात्रपरत्वात् अन्यत्रापि तत्परत्वमेव युक्तमित्याह - तद्वदिति । उक्तमर्थं कारिकया संगृह्णाति - **सगुण** इति । गुणविशिष्टतयाबोध्ये । **निर्गुणे** गुणं विना बोध्ये स्वरूपे च । **व्युत्पत्तिः** = समानाधिकरणवाक्यानां भिन्नविशेषणद्वारेण एकविशेष्यपरत्वावधारणम् । **प्रतिपत्तिः** = तदनुरूपोऽनुभवः । **अत एवेति** । समानाधिकरणवाक्यानां विशिष्टार्थपरत्वादेवेत्यर्थः ।

शङ्कते - **ननु भिन्नेत्यादिना** । प्रकृष्टा वृत्तिः प्रवृत्तिः अभिधानम्, निमित्तशब्दो

अतो भिन्नार्थानां शब्दानामेकार्थपरत्वमिति व्याघात इति चेत्–किमिदं लक्षणवाक्यस्य दूषणाभिप्रायेणोक्तम् ? उतान्यपरत्वाभिमानेन? नाद्यः, अनभ्युपगमात्; न द्वितीयः; अर्थान्तरानुपलम्भात्॥ भिन्नप्रवृतिनिमितानां शब्दानां प्रवृतिनिमित्तपरित्यागेनैकार्थपरत्वमिति शेषपूरणेन व्याख्येयमिति चेत; कुत एतत्? एकैकस्मिन्नर्थे प्रवृत्तिरिति शेषपूरणेन विपरीतं वा किं न स्यात् ॥ एकार्थत्वस्य तात्पर्यसिद्धत्वात् भिन्नार्थत्वस्य तद्विरुद्धत्वाच्चेति चेत्; तर्हि व्यधिकरणवाक्येष्वपि

विषयपरः । भिन्नाः अभिधानविषयाः अभिधेयाः येषां तेषां शब्दानां, भिन्नार्थकानां शब्दानामिति यावत् एकस्मिन्नर्थे वृत्तिः सामानाधिकरण्यमित्याशयेनेयं शङ्का । अस्मिन्नर्थे व्याघातः स्पष्टः । भिन्नार्थकानां शब्दानामेकस्मिन्नर्थे अभिधानमिति हि लक्षणार्थः । समाधत्ते - **किमिदमिति** । **लक्षणवाक्यस्येति** । भिन्नप्रवृत्तिनिमित्तानामित्यादिसमानाधिकरणलक्षणवाक्यस्येत्यर्थः । **अन्यपरत्वेति** । यथाश्रुते पूर्वोक्तव्याघातात् भिन्नप्रवृत्तिनिमित्तानामित्यादिवाक्यस्यान्यपरत्वमित्यभिप्रायेणेत्यर्थः । **अनभ्युपगमात्** इति । अस्य लक्षणवाक्यस्य त्वयाप्यङ्गीकारेण दूषणाभिप्रायस्तवापि नास्तीत्यर्थः । न द्वितीयः, **अर्थान्तरानुपलम्भादि**ति । पूर्वोक्तार्था-पेक्षया अन्यस्यार्थस्यानवगमादित्यर्थः । अन्योऽर्थोऽस्तीति शङ्कते-**भिन्नेति** । **एकैकस्मिन्नर्थ** इति। भिन्नप्रवृत्तिनिमित्तानामिति वाक्यस्य त्वदुक्तव्याघातपरिहाराय भिन्नप्रवृत्तिनिमित्तत्यागेनेति पूरयित्वा व्याख्यानवत् एकैकस्मिन्नर्थे प्रवृत्तिरिति शेषपूरणेन भिन्नविशेष्यकत्वस्वीकारेण एकार्थत्वमेव कुतो न त्यज्यत इति भावः । एकैकस्मिन् प्रवृत्तिनिमित्तलक्षणेऽर्थे वृत्तिरिति वा किं न स्यादित्यर्थः।

ननु समानाधिकरणवाक्यस्यैकार्थकत्वं तात्पर्यसिद्धमिति भिन्नार्थकत्वं तात्पर्यविरुद्धत्वात्त्यज्यत इति शङ्कते - **एकार्थत्वस्येति** । देवदत्तः स्थाल्यामोदनं पचतीत्यादिव्यधिकरणवाक्येष्वपि ''अर्थैकत्वादेकं वाक्यं साकाङ्क्षं चेद्विभागे स्यात्'' इति न्यायेन एकार्थकत्वस्य तात्पर्यसिद्धत्वात् तद्विरुद्धं नानाकारकादिवैशिष्ट्यं न स्यादिति समाधत्ते - **तर्हीति** । ननु बौद्धवासनायुक्तवेदान्तिनः भर्तृहरिप्रभृतयः एकं वाक्यम् एको

नानाकारकादिवैशिष्ट्यं न स्यात्; तत्राप्येकार्थत्वस्य तात्पर्यसिद्धत्वात् । ''अर्थैकत्वादेकं वाक्यं साकाङ्क्षञ्चेद्विभागे स्यात्' (पू.मी.सू) इति हि वाक्यविदः। न च बौद्धगन्धिवैयाकरणादिवत् तत्रापि वैशिष्ट्यं मा भूतिति वाच्यम्; अपसिद्धान्तात्। वस्तुतस्तत्रापि वैशिष्ट्यं न सिद्धान्ते इति चेत्; तर्हि तद्वदेव समानाधिकरणवाक्यस्यापि विशिष्टपरत्वमभ्युपगम्य तैस्सह बाध उपपाद्यताम् । एवंच समानाधिकरणवाक्यत्वादिति हेतुविशेषणोपादानवैयर्थ्यं च प्रागेवोक्तम् ॥

वाक्यार्थ इति वाक्यस्य वाक्यार्थस्य चैक्यानुभवात् शब्दानां च भिन्नतया बाह्यार्थानां च घटतदानयनादीनां भिन्नतया अवभासमानत्वात् तन्निर्वाहाय प्रतिभैव वाक्यवाक्यार्थभावेन दृश्यत इति प्राहुः । तद्रीत्या व्यधिकरणवाक्येष्वपि वैशिष्ट्यं माभूदिति शङ्कते- **न च बौद्धेति** । भवद्भिस्तथा अनङ्गीकारेण अपसिद्धान्त इति समाधत्ते - **अपसिद्धान्तादिति** । वास्तवं वैशिष्ट्यं नास्मत्सिद्धान्त इति शङ्कते - **वस्तुत** इति । अयं च प्रतिभावाक्यार्थपक्षः **तत्त्वमुक्ताकलापे** बुद्धिसरे नवतितमेन श्लोकेनानूद्य दूषितः । समाधत्ते - **तर्हि तद्वदेवेति**। व्यधिकरणवाक्यस्येव समानाधिकरणवाक्यस्यापि वैशिष्ट्ये तात्पर्यमभ्युपगम्य व्यधिकरणवाक्यार्थस्य समानाधिकरणवाक्यार्थस्य च वैशिष्ट्यस्य अपारमार्थिकत्वमुपगम्यताम् । एवमपि व्यधिकरणवाक्यव्यावृत्तमखण्डार्थत्वं समानाधिकरणवाक्यस्य न सिध्यतीति भावः । **बाध** इति । विशिष्टत्वपरत्वस्येति शेषः । **एवं चेति** । विगीतं वाक्यम् अखण्डार्थपरं समानाधिकरणवाक्यत्वात् इति भवदुक्तेऽनुमाने हेतौ समानाधिकरणेति विशेषणोपादानं व्यर्थम् । एवं चेत्यस्य व्यधिकरणसमानाधिकरणवाक्ययोरुभयोरपि तात्त्विकवैशिष्ट्यपरत्वाभावे सतीत्यर्थः । भवता तात्त्विकवैशिष्ट्यपरत्वाभावस्यैव साधनीयत्वात् तस्य च व्यधिकरणवाक्येऽपि सत्त्वेन निर्विशेषणपरत्वमखण्डार्थत्वमिति तृतीयविकल्प-दूषणावसरे "त्वन्मतेन तु व्यधिकरणवाक्यानामपि परमार्थतो विशेषणशून्यार्थविषयत्वेन हेतुविशेषणवैयर्थ्यम्" इति पूर्वं यत् दूषणमुक्तं तदत्रापि प्रसज्यत इत्यर्थः ।

ननु व्यधिकरणवाक्यानां प्रधानभूतार्थैक्यात् एकार्थत्वमित्याशङ्क्य तत्

अनेककारकविशिष्टैकार्थपरत्वं व्यधिकरणवाक्येषु व्युत्पत्तिसिद्धमिति चेत्; तर्हि अनेकविशेषणविशिष्टैकविशेष्यपरत्वं समानाधिकरणवाक्येषु व्युत्पत्तिसिद्धमिति समस्समाधिः । एवंच विषयव्यवस्थया विरोधे शमयितव्ये बाधाध्याहार-लक्षणादिपरिग्रहो देवानांप्रियेभ्य एव रोचते। प्रवृत्तिनिमित्तशब्दवाच्यविशेषणनिष्ठो हि भेदः तदाश्रयभूतविशेष्यगतश्चैकत्वमिति कोऽत्र विरोधमनुसन्दधीत ? अतः सामानाधिकरण्यलक्षणानुपपत्तिर्न ते विपक्षे बाधिका, अपि तु स्वपक्ष एवेति तूष्णीमास्स्व।

पदद्वयप्रतिपन्नविशिष्टद्वयैक्ये विशेष्यैक्यवद्विशेषणैक्यमपि दुस्त्यजम्, तद्वदेव वा विशेष्यभेदोऽपि किं न स्यादिति चेत्; किमिदम् ? अधश्शायितोऽपि केशान्न

समानाधिकरणवाक्येष्वपि तुल्यमित्याह - **अनेकेति** । **एवं चेति** । भेदः विशेषण-रूपाभिधेयगतः, अभेदस्तु विशेष्यरूपाभिधेयगत इति विषयव्यवस्थया भेदाभेदयोर्विरोधे शमयितव्ये सति, भिन्नार्थानामेकार्थत्वमिति यथाश्रुतार्थत्यागरूपो **बाधः**, प्रवृत्तिनिमित्त-त्यागेनेति शेषपूरणरूपो**ऽध्याहारः**, शेषपूरणार्थानुगुणा लक्षणवाक्यस्थपदैः स्वरूपमात्रे **लक्षणा** च नोचितेति भावः । आदिशब्देन लोकविरुद्धव्युत्पत्तिग्रहः परामृश्यते ।

एतावता प्रवृत्तिनिमित्तशब्दस्याभिधेयपरत्वानुसारेण व्यवस्था उक्ता । अथ तस्य विशेषणवाचित्वपक्षमनुसृत्य विरोधशङ्कैव नेत्याह - **प्रवृत्तिनिमित्तशब्देति** । प्रवृत्तौ अभिधाने निमित्तं कारणभूतो धर्मः प्रवृत्तिनिमित्तम्, वाच्यविशेषणमिति यावत् । एवं च प्रवृत्तिनिमित्तशब्दस्य विशेषणमित्यर्थः । तन्निष्ठः भेदः, विशेषणाश्रयविशेष्यनिष्ठमैक्यमिति भेदाभेदयोः एकनिष्ठत्वाभावात् नास्ति विरोध इत्यर्थः । विपक्षे = विरुद्धपक्षस्वीकारे **स्वपक्ष एवेति** । बाधिकेत्यनुषज्यते ।

शङ्कते - **पदद्वयेति** । सत्यज्ञानादिवाक्ये द्वाभ्यां सत्यज्ञानपदाभ्यां ज्ञातं यत् विशिष्टद्वयं सत्यत्वविशिष्टज्ञानत्वविशिष्टद्वयं तयोरैक्ये प्रतिपाद्यमाने विशेष्ययोरैक्यवत् विशेषणयोरप्यैक्यमवर्जनीयम् । अन्यथा तद्वदेव विशेषणयोः भेदवदेव विशेष्ययोर्भेदोऽपि

मुञ्चसि ! विशिष्टद्वयैक्यशब्देन विशेषणाद्यैक्यविवक्षायामात्माश्रयासिद्ध्यादिदोषः; विशेष्यैक्यविवक्षायां तस्य विशेषणैक्यं प्रति असाधकत्वस्योदीरितत्वात्, यथा जात्यादिरूपविशेषणैक्येऽपि विशेष्यभेदः प्रत्यक्षादिसिद्धत्वात् दुरपह्नवः, तथा विशेष्यैक्येऽपि विशेषणभेदस्तत एव दुरपह्नवः । अन्यथाऽनेकगुणविशिष्टैकवस्तुप्रतिपादकतयाऽभिमतानां सगुणवाक्यानामनुत्थानप्रसङ्गात् । यथा वा अनेकप्रतियोगिभेदेऽपि तत्तद्व्यावृत्तवस्त्वैक्यम्, तथा अनेकविशेषणभेदेऽपि

कुतो न स्यादिति शङ्का । **तद्वदेव** इत्यतः पूर्वम् **अन्यथेति** शेषः । **किमिदमिति** । द्वयोः द्वन्द्वयुद्धे यथा अन्यतरेण बलीयसा अधः शायितोऽप्यन्यतरो बलवान् बलीयसः केशान्न मुञ्चति तथा बहुधा दूषणैः पराजितोऽपि भवान् बल्बजैः प्रश्नैः पीडयसीति वदन् समाधत्ते। **विशिष्टद्वयेत्यादिना** । किं विशेषणस्य विशेषणेन विशेष्यस्य विशेष्येण संबन्धस्य च संबन्धेनैक्यम् इत्येतत् त्रयं समुदितं विशिष्टैक्यं विवक्षितम् उत विशेष्यैक्यमिति विकल्प्य आद्ये दोषमाह-**विशिष्टद्वयेति** । विशेषणैक्यस्य विशेषणैक्यापादकत्वे आत्माश्रयः । आपादकासिद्धिश्च । आपादकस्य विशेषणानामैक्यस्य असिद्धत्वात् । आदिशब्दात् विशेषणैक्यमात्रस्य आपाद्यनिरूपितव्याप्तिमत्त्वेन विशेषणाद्यैक्यत्रयसमुदायस्य आपाद्यव्याप्यत्वाभावात् व्याप्यत्वासिद्धिश्च । द्वितीये दोषमाह - **विशेष्यैक्येति** । पदद्वयप्रतिपन्नविशेष्यैक्यस्य विशेषणैक्यं प्रति साधनत्वं न संभवतीति पूर्वमेवोक्तत्वात् इत्यर्थः । देवदत्तः श्यामो युवेत्यादौ विशेष्यैक्येऽपि विशेषणैक्यादर्शनात् इति भावः । तदेव प्रकारान्तरेणोपपादयति- **यथेत्यादिना** । यथा घटत्वादिजातिरूपविशेषणैक्येऽपि विशेष्यघटादीनां भेदः प्रत्यक्षसिद्धत्वात् नापह्नोतुं शक्यते तथा विशेष्यैक्येऽपि विशेषणभेदः देवदत्तः श्यामो युवेत्यादौ प्रत्यक्षसिद्धत्वान्नापह्नोतुं शक्य इत्यर्थः । **अन्यथेति** । **सगुणवाक्यानाम्** = "सत्यकामः सत्यसंकल्प" इत्यादिवाक्यानाम् । **यथा वेति** । सत्यपदेन अनृतस्य ज्ञानपदेन जडस्य अनन्तपदेन परिछिन्नस्य च व्यावृत्तिः प्रतिपाद्यते । वाक्येन तत्त्रितयव्यावृत्तं ब्रह्मोच्यत इति भवन्मते अनृतजडपरिच्छिन्नरूपप्रतियोगिभेदेन

तत्तदन्वितवस्त्वैक्यं न व्याहतमेव । एवं च विशेषणैक्यप्रसङ्गे प्रतियोग्यैक्यप्रतिबन्देरपि दुस्तरत्वं स्यात् । किंच, यथा क्रमेण युगपद्वा प्रत्यक्षादिभिरनेकविशेषणविशिष्टैकवस्तुप्रतिपत्तौ विशेष्यभेदो वा विशेषणानां मिथस्तादात्म्य (म्यं?) समवायो वा न प्रसज्येते, तथा शब्देनापि; प्रत्यक्षाद्यनुसारिव्युत्पतिवशंवदत्वात् तत्सामर्थ्यस्यापि प्रायशस्तत्समानत्वात्। एवमन्यदपि द्रष्टव्यम्।

प्रतिकूलतर्काश्च भवन्ति । तथा हि-यदि एकपदप्रतिपन्नादन्यूनानधिकमेव

व्यावृत्तीनां भेदेऽपि तदाश्रयवस्त्वैक्यम्, (व्यावृत्तीनां ब्रह्मस्वरूपत्वेऽपि प्रतिभोगिमेदः अनिवार्यः ।) तथा अनेकविशेषणानां भेदेऽपि तदन्वितवस्त्वैक्यं न विरुध्यत इत्यर्थः । **एवं चेति** । विशिष्टैक्यस्वीकारे विशिष्टान्तर्गतविशेष्यैक्यवत् तदन्तर्गतविशेषणानामप्यैक्यं स्यादिति प्रसञ्जने भिन्नभिन्नप्रतियोगिघटितवस्त्वैक्याङ्गीकारे तद्घटकप्रतियोगिनामप्यैक्यप्रसङ्गो दुर्वार इति भावः ।

दृष्टान्तान्तरेण विशेषणैक्यप्रसङ्गं परिहरति- **किं चेति** । प्रत्यक्षे अनुमितौ वा एककाले वा क्रमेण वा अनेकविशेषणविशिष्टैकवस्तुभाने सति विशेष्यभेदो वा विशेषणानां मिथः तादात्म्यं वा न प्रसज्येते, तथा शाब्दप्रतीतावपि । प्रत्यक्षाद्यनुसारिव्युत्पत्तिग्रहाधीनत्वात् तस्याः इत्यर्थः ।

ननु सोऽयं देवदत्तः, तत्त्वमसि इत्यादावभेदस्य जिज्ञासितत्वात् तस्यैव साक्षात् प्रतिपादने लाघवम् । भेदसिद्ध्यर्थं धर्मान्तरोपलक्षिते धर्मान्तरप्रतिपादने तु गौरवमित्यादिकुतर्कानाशङ्क्याह - **एवमन्यदपीति** । अयं भावः - न हि सामान्यतः अभेदस्वरूपमेव जिज्ञासितम् । किं तु तत्कालीनस्य एतत्कालीनाभेदः । स च तत्कालैतत्कालप्रतिपादनपुरस्सरं साक्षादेव वाक्येन प्रतिपाद्यते । अन्यथा जिज्ञासायाः भेदभ्रमस्य चानिवृत्तेः । न हि तत्कालैतत्कालादिविशेषणविशेषोपरक्तवस्तुभेदजिज्ञासा तदनुपरक्तस्वरूपमात्रविषयकज्ञानान्निवर्तते । तादृशज्ञानजनकोत्तरस्य प्रश्नाननुरूपत्वादिति **महाचार्याः** ।

अखण्डार्थत्वानुमानस्य प्रतिकूलतर्कानाह - **प्रतिकूलेति** । समानाधिकरणवाक्ये

पदान्तरेणापि बोध्येत; तदा पर्यायत्वप्रसङ्गः; पदान्तरवैयर्थ्यं च ॥ निमित्तभेदादपर्यायत्वमिति चेत्, तर्हि वैशिष्ट्यप्रसङ्गः, तथाच स्वेष्टभङ्गः ॥ निमित्तभेदे सत्यपि तदन्वयाभावात् वैशिष्ट्याभाव इति चेत्—किमत्र घटः पट इतिवत् प्रमाणविरोधादनन्वयः, उत तदविरोधेऽपि श्रद्धासंगृहीततर्कावस्करबलात्? नाद्यः, असिद्धेः; न द्वितीयः, प्रागेव निरस्तत्वात्। यदि च सन्तमपि निमित्तभेदम-

तद्घटकैकपदप्रतिपन्नात् अन्यूनानधिकमेव यदि तद्घटकपदान्तरेण बोध्येत, तदा घटः कलश इतिवत् पर्यायत्वप्रसङ्गः; पदान्तरवैयर्थ्यं च । यदि प्रवृत्तिनिमित्तभेदात् अपर्यायत्वम्, तदा भिन्नप्रवृत्तिविशिष्टैकार्थबोधकत्वेन सखण्डार्थत्वप्रसङ्गः । तथा च स्वेष्टस्याखण्डार्थत्वस्य भङ्गप्रसङ्गः । न च प्रवृत्तिनिमित्तभेदे सत्यपि शाब्दबोधस्य तद्विषयकत्वाभावात् निर्विशेषणकार्थबोधकत्वरूपमखण्डार्थत्वं न भज्यत इति वाच्यम् । विकल्पासहत्वात् । किमत्र घटः पट इतिवत् प्रवृत्तिनिमित्तयोः विरोधात् तयो; शाब्दबोधाविषयत्वम्? उत तदविरोधेऽपि श्रद्धागृहीततर्कमलात्? नाद्यः । तयोः विरोधस्यासिद्धेः । न द्वितीयः । तर्काभासस्य पूर्वमेव निरस्तत्वादिति घट्टार्थः । **वैशिष्ट्यप्रसङ्ग** इति । सखण्डार्थत्वप्रसङ्ग इत्यर्थः । **तदन्वयाभावादिति** । प्रवृत्तिनिमिंत्ताप्रतिपादकत्वादित्यर्थः । **तर्कावस्कर** इति। **अवस्करः** = मलम् । "वर्चस्केऽवस्करः" (पा.सू. ६-१-१४८) इति निपातनात् ।

यदि चेत्यादि । प्रवृत्तिनिमित्तभेदे सत्यपि तमनादृत्य सर्वैः पदैः स्वरूपमात्रं प्रतिपाद्यत इति यद्युच्यते, तर्हि एकेतरपदप्रयोगे सति (अनेकपदप्रयोगे सति) एकस्मात् इतरस्य पदस्य वैयर्थ्यं स्यात् । एकेन पदेनैव स्वरूपस्य ज्ञातत्वात् । न च ज्ञातेऽपि स्वरूपे अनृतजडादिरूपतत्तत्प्रतियोगिव्यावृत्तिसिद्ध्यर्थं पदान्तप्रयोग इति वाच्यम् । विकल्पासहत्वात् । किं तत्प्रवृत्तिनिमित्तान्वयबोधसामर्थ्यात् तत्प्रतियोगिव्यावृत्तिसिद्धिः, उत तत्तत्पदजन्यस्वरूपमात्रबोधादेव तत्सिद्धिः । नाद्यः, विशेषणवैशिष्ट्यस्य दुर्वारत्वात् । न द्वितीयः । पदान्तरजन्यप्रतीतेः प्रथमपदजन्यप्रतीतेश्चाविशेषात् । प्रतीतेर्विशेषत एव शब्दो व्यावर्तकः । प्रवृत्तिनिमित्तभेदात् व्यावर्तकत्वे अगृहीतशक्तिकस्यापि शब्दस्य व्यावर्तकत्वप्रसङ्गात् । किं

नाहृत्य सर्वैः पदैः स्वरूपमात्रमेव बोध्येत; तर्ह्येकेतरपदप्रयोगे नैरर्थक्यं स्यात्। प्रतिपन्नेऽपि स्वरूपे तत्तत्प्रतियोगिव्यावृत्तिसिद्ध्यर्थं पदान्तरप्रयोग इति चेत्–किं तत्प्रवृत्तिनिमित्तान्वयसामर्थ्यात् तत्प्रतियोगिब्यावृत्तिसिद्धिः, उत तत्तत्पदजन्यस्वरूपमात्रबोधादेव ? नाद्यः; वैशिष्ट्यस्य दुर्वारत्वात्; न द्वितीयः; अविशेषात् प्रथमपदेनैव स्वरूपप्रतिपत्तौ सर्वव्यावृत्तिसिद्धिप्रसङ्गात्। तेन तदसिद्धौ पदशतेनापि तदसिद्धिप्रसङ्गात्ः यथा पर्यायाणां शतमपि पठ्यमानं न व्यावृत्तिभेदमापादयति, तथाऽत्रापि । अतः एकेतरपदानां नैरर्थक्यमेव ॥ सामानाधिकरण्येन निर्विशेषपरत्वसिद्ध्यर्थमनेकपदप्रयोग इति चेन्न; तथाऽपि पदद्वयमात्रेणापि तत्सिद्धेः बहुपदप्रयोगे(ग?) नैरर्थक्यप्रसङ्गात्। तथाच न विशेषणपदद्वयमपि प्रयोक्तव्यम्; एकविशेषणपदसहित विशेष्यपदमात्रेण सामानाधिकरण्य सिद्धेः ।

च प्रथमपदेनैव स्वरूपप्रतिपत्तौ तद्बलात् सर्वव्यावृत्तिसिद्धेः पदान्तरवैयर्थ्यात् । प्रथमपदेन तदसिद्धौ च पदशतेनापि तदसिद्धिप्रसङ्गात्। यथा शतस्य पर्यायपदानां पठनेऽपि व्यावृत्तिभेदो न सिध्यति तथा अत्रापि । तस्मात् सर्वैः पदैः स्वरूपमात्रं प्रतिपाद्यते चेत् एकेतरपदानां वैयर्थ्यं सुस्थितमिति घट्टार्थः ।

एकेतरपदप्रयोगे नैरर्थक्यं स्यादिति । अनेकपदप्रयोगे एकस्मात् पदात् इतरपदप्रयोगस्य नैरर्थक्यं स्यादित्यर्थः । पदान्तरस्येति शेषः । क्वचित् एकतरपदप्रयोगनैरर्थक्यमिति भावः । **अन्वयसामर्थ्यादिति** । अन्वयबोधसामर्थ्यादित्यर्थः । तेनेति । एकपदेनेत्यर्थः । तदसिद्धौ = व्यावृत्त्यसिद्धौ । **नैरर्थक्यमेवेति** । पृथगभिधेयशून्यत्वादित्यर्थः ।

शङ्कते - **सामानाधिकरण्येनेति** । समानाधिकरणवाक्यस्य निर्विशेषतात्पर्यकत्वात् तद्घटकपदानां निर्विशेषे लक्षणा स्वीक्रियते । तथा च लक्षणाप्रयोजकतात्पर्यग्रहार्थमनेकपदप्रयोगः । अन्यथा तात्पर्यग्राहकाभावात् स्वरूपलक्षणैव न स्यात् । अत एकेतरपदानां न वैयर्थ्यमिति शङ्का । समाधत्ते - **तथापीति** । विशेषणवाचकपदद्वयमात्रेणापि निर्विशेषे तात्पर्यनिर्णयसंभवात् बहुपदप्रयोगस्थले तृतीयादिपदानां व्यर्थत्वादित्यर्थः । वस्तुतस्तु विशेषणपदद्वयमपि मास्तु इत्याह - **तथाचेति** । नैरर्थक्यप्रसङ्गादेवेत्यर्थः । तमेवोपपादयति-

सामानाधिकरण्यस्य निर्विशेषपरत्वे सिद्धे तदर्थतया अनेकपदप्रयोगसाफल्यम्, तत्साफल्ये च सति सामानाधिकरण्यस्य निर्विशेषपरत्वसिद्धिरित्यन्योन्याश्रयता । ननु तत्तत्प्रवृत्तिनिमित्तविशिष्टं वस्तु शब्दबोध्यम् । प्रवृत्तिनिमित्तानि च स्वविरोधिव्यावृतिसहवर्तीनि अत्र तु विशिष्टबोधनानुपपत्त्या विशेष्यमात्रं बोधयन्त्यपि पदानि नैरर्थक्यादिपरिहाराय स्वप्रवृत्तिनिमित्तसहिततत्तद्विरोधिव्यावृत्तिमपि लक्षयन्ति । ततः तत्तद्व्यावृत्तमेकं वाक्यार्थ इति किं नोपपद्यते ।। श्रूयताम् । तत्तद्व्यावृत्तिः किमत्र धर्मिस्वरूपम्, उत ततोऽन्या ?

तत्र न तावत् स्वरूपम्, स्वरूपस्यैव तत्प्रकाशत्वात्; प्रकाशाप्रकाशयोरध्यासानुपपत्त्यादेरन्यत्र प्रतिपादनात् । किंच तत्तद्विरोधिव्यावृत्तिः किं

एकविशेषणेति । अन्योन्याश्रयोऽपीत्याह - **सामानाधिकरण्यस्येति** । सामानाधिकरण्यस्य यत्र क्वचित् स्वरूपमात्रतात्पर्यकत्वव्याप्तिग्रहे सति स्वरूपमात्रतात्पर्यकसामानाधिकरण्यार्थतया पदान्तरसार्थक्यम्, पदान्तरसार्थक्यसिद्धौ च नैरर्थक्यप्रसङ्गरूपबाधकाभावात् समानाधिकरणवाक्यस्य स्वरूपमात्रपरत्वसिद्धिः इत्यन्योन्याश्रय इत्यर्थः ।

ननु इत्यादि । सर्वेऽपि शब्दाः तत्तत्प्रवृत्तिनिमित्तविशिष्टवस्तुप्रतिपादकाः । यथा घटादयः शब्दाः स्वप्रवृत्तिनिमित्तभूतघटत्वादिविशिष्टवाचकाः । समानाधिकरणवाक्ये तु एकार्थतात्पर्यानुसारेण विशिष्टबोधनानुपपत्त्या पदानि विशेष्यमात्रं बोधयन्ति । तथापि पदान्तरवैयर्थ्यपरिहाराय स्वप्रवृत्तिनिमित्तसहितां तत्तद्विरोधिव्यावृत्तिमपि लक्षणया बोधयन्ति। यथा सत्यपदं सत्यत्वविरोध्यनृतव्यावृत्तिं, ज्ञानपदं ज्ञानत्वविरोधिजडव्यावृत्तिमित्येवम् । एवं तादृशव्यावृत्त्याश्रयभूतमेकमेव वाक्यार्थ इति प्रश्नः । समाधत्ते- **श्रूयतामित्यादिना** । व्यावृत्तिः किमाश्रयस्वरूपम् उत ततोऽन्या । आद्ये एकेनैव पदेन स्वरूपस्यावगतत्वात् पदान्तरवैयर्थ्यम् । **तत्प्रकाशत्वात्** = व्यावृत्तिप्रकाशरूपत्वात् । दूषणान्तरमाह- **प्रकाशेति**। स्वरूपात्मकव्यावृत्तेः प्रकाशे तत्तद्विरोधिजडाद्यध्यासो न स्यात् । अप्रकाशे तु धर्मिप्रकाशाभावात् अध्यासो न स्यादिति भावः । अत्रैव पक्षे दोषान्तरमाह **किं चेति** ।

परस्परभिन्ना, उतैका ? भिन्नत्वे तदात्मकत्वात् ब्रह्मणोऽपि भेदप्रंसङ्गात्(ङ्गः?)। न च व्यावृत्तिभेदो मिथ्येति वाच्यम्; मिथ्याभूता(त?) भेदप्रतिपादनायानेकपदनैष्फल्यात्; अतत्त्वावेदकत्वप्रसङ्गाच्च। एकत्वे प्रथमपदेनैव सर्वव्यावृत्तिसिद्धौ पदान्तरप्रयोगनैष्फल्यमनतिक्रान्तम्॥ एकनिष्ठानेकप्रतियोगिकान्योन्याभावनिरूपणं तर्हिं कथमिति चेत्–इत्थम् । प्रतियोगिभेदादन्योन्याभावभेदाभ्युपगमे

किं स्वरूपभूता सत्यादिपदलक्ष्या व्यावृत्तिः परस्परं भिन्ना उतैका । भिन्नेति पक्षे किं भेदः परमार्थः, उत अपरमार्थः इति विकल्पं हृदि निधाय प्रथमे दोषमाह - **भिन्नत्व** इति । व्यावृत्तिः परस्परं भिन्नेति पक्षे व्यावृत्त्यात्मकत्वात् ब्रह्मणोऽपि भेदप्रसङ्गः (अनेकत्व प्रसङ्गः) न च व्यावृत्तिभेदस्य मिथ्यात्वात् तद्भेदात् न ब्रह्मभेदप्रसङ्ग इति वाच्यम् । किं मिथ्याभूतभेदवत् यत् व्यावृत्तिस्वरूपं तत्प्रतिपादनार्थमनेकपदम्, उत मिथ्याभूतभेदवत्तया प्रतिपादनार्थम् । नाद्यः । मिथ्याभूतभेदप्रतिपादनायानेकपदानामनावश्यकत्वात् । एकेनैव तत्प्रतिपादनसंभवात् । न द्वितीयः, अतत्त्वावेदकत्वप्रसङ्गादिति भावः । भेदस्य मिथ्याभूतत्वमनेकत्वविशिष्टरूपेण विवक्षितम् । व्यावृत्तेर्भिन्नत्वपक्षं विकल्पपूर्वकं दूषयित्वा अथ एकत्वपक्षं दूषयति - **एकत्व** इति । व्यावृत्तीनामेकत्वे प्रथमपदेन प्रतिपन्ना या अनृतव्यावृत्तिः तदभिन्नयोः जडपरिच्छिन्नव्यावृत्त्योरपि तेनैव प्रतिपत्तेः पदान्तरप्रयोगनैष्फल्यं दुर्वारमित्यर्थः ।

शङ्कते - **एकनिष्ठेति** । सिद्धान्ते - एकस्मिन्नेवाधिकरणे घटादौ अनेकस्तम्भपटादिप्रतियोगिकोऽन्योन्याभावः एक एव स्तम्भात् पटात् भेदः इत्येवम् अनेकपदैः व्यवह्रियत इति स्वीक्रियते । तथा एकस्मिन् ब्रह्मणि विद्यमानः अनृतजडपरिच्छिन्नरूपानेकप्रतियोगिक एक एव भेदः सत्यज्ञानादिभिरनेकैः पदैः व्यवह्रियत इत्युक्ते पदान्तरवैयर्थ्यप्रसङ्गस्य नावकाश इति शङ्कितुराशयः । इमां शङ्कां प्रौढवादेन परिहरति **प्रतियोगिभेदादिति** । घटे विद्यमानः स्तम्भाद्यन्योन्याभावोऽपि प्रतियोगिभेदात् भिन्न एव । तद्वत् व्यावृत्तिभेदस्वीकारे व्यावृत्त्यात्मकब्रह्मणोऽपि भेदप्रसङ्गरूपो दोषो दुर्वार इति भावः।

दोषाभावात् । अभेदेऽपि तत्तत्प्रतिसम्बन्धित्वलक्षणविशेषणविशिष्टैकान्योन्याभावपरत्वादनेक (पदप्रयोग?) प्रयोजनसिद्धिः । एवं स्वरूपानतिरिक्तान्योन्याभावे समाधिरनुसन्धेयः । न चात्रापि तत्तत्प्रतिसम्बन्धित्वलक्षणविशेषणवैशिष्ट्यमात्रमभ्युपगतमिति वाच्यम्; प्रागेव तत्तद्धर्मवैशिष्ट्यस्य यथाप्रतीत्यभ्युपगन्तुमुचितत्वात् ।

नाप्यन्या । सा हि तत्तत्प्रवृत्तिनिमित्ताकारा वा स्यात्, उत ततोऽन्या तदविनाभूतेति । न प्रथमः; दूरं गत्वा (ऽपि?) घट्टकुटीप्रभातप्रसङ्गात् । नापि द्वितीयः;

वास्तवं परिहारमाह - **अभेदेऽपीति** । घटे विद्यमानानां स्तम्भपटादिप्रतियोगिकभेदानामेकत्वेऽपि स्तम्भप्रतियोगिकत्वविशिष्टवेषेण पटप्रतियोगिकत्वविशिष्टवेषेण च भेदप्रतिपादनार्थं स्तम्भात् भेदः पटात् भेद इत्यादिव्यपदेशानां सार्थक्यमस्माभिः संपाद्यते । भवद्भिस्तु तथा सार्थक्यं संपादयितुं न शक्यते, सत्यपदेन असत्यप्रतियोगिकत्वविशिष्टवेषेण ज्ञानपदेन जडप्रतियोगिकत्वविशिष्टवेषेणेति रीत्या भेदप्रतिपादने निर्विशेषार्थप्रतिपादकत्वभङ्गप्रसङ्गादिति भावः ।

स्वरूपातिरिक्तः अन्योन्याभावः प्रतियोगिभेदेऽप्येक इति स्वीकृत्य प्रतियोगिविशिष्टरूपेण तत्प्रतिपादकतया पदानां सार्थक्यम् उपपादितम् । अथ भेदः स्वरूपानतिरिक्त इति पक्षे समाधानमाह-**एवं स्वरूपानतिरिक्तेति** । स्वरूपानतिरिक्तान्योन्याभावसाम्यशङ्कापि उक्तप्रकारेण परिहृतेत्यनुसन्धातव्येत्यर्थः । **वैशिष्ट्यमात्रमिति** । वैशिष्ट्यमात्रबोधनमित्यर्थः । **प्रागेवेति** । व्यावृत्तिमुपगम्य तत्र प्रतियोगिवैशिष्ट्यबोधनात् वरं लक्षणामनङ्गीकृत्य यथाप्रतीति सत्यत्वादिविशिष्टबोधनमित्यर्थः ।

एतावता व्यावृत्तिः स्वरूपमिति पक्षेऽनेकविकल्पपूर्वकं दूषणमुक्तम् । अथ व्यावृत्तिः स्वरूपादन्या इति पक्षे दूषणमाह- **नाप्यन्येति** । सत्यादिपदलक्ष्या या अनृतादिव्यावृत्तिः सा ब्रह्मस्वरूपात् अन्येति स्वीकारे पृच्छामः सा किं तत्तत्प्रवृत्तिनिमित्तभूतसत्यत्वादिस्वरूपा उत ततोऽन्या तदविनाभूतेति । तत्र प्रथमं कल्पं दूषयति - **न प्रथम** इति । **दूरं**

तत्तत्समानयोगक्षेमतया तदभावे तदसिद्धिप्रसङ्गात् । न हि घटत्वाभावेऽप्यघटव्यावृत्तिसिद्धिः । तत्सिद्धौ तद्वैशिष्ट्यस्यापरित्याज्यत्वात् पुनरपि परपक्षकुक्षिप्रवेशेन भस्मीभावः । अभावरूपविशेषणमात्रवैशिष्ट्यमनुमन्यामह इति तु अपक्षपातिनस्ते न युक्तम् । न च व्यावृत्तीनां मिथ्यात्वेन समाधिः; जडाद्यैक्यप्रसङ्गस्यान्यत्रोक्तत्वात्; पूर्ववदतत्त्वावेदकत्वप्रसङ्गाच्च । भवत्पक्षे तत्तत्प्रवृत्तिनिमित्तानामपि

गत्वापीति । व्यावृत्तौ लक्षणामङ्गीकृत्यापीत्यर्थः । प्रवृत्तिनिमित्तवैशिष्ट्याङ्गीकारे इति शेषः। तेन क्त्वाप्रत्ययबोध्यं समानकर्तृकत्वं निर्वहति । तथा च व्यावृत्तौ लक्षणामङ्गीकृत्यापि व्यावृत्तेः प्रवृत्तिनिमित्तसत्यत्वादिरूपत्वाङ्गीकारे प्रवृत्तिनिमित्तविशिष्टबोधकत्वमेवायातमिति घट्टकुटीप्रभातप्रसङ्ग इत्यर्थः । द्वितीयं दूषयति **नापि द्वितीयः, तत्तत्समानेति** । तत्तद्विरोधिव्यावृत्तेरिति शेषः । **तत्तसमानेत्यत्र** तत्पदं प्रवृत्तिनिमित्तपरम् । एवं **तदभाव** इत्यत्रापि तत्पदं प्रवृत्तिनिमित्तपरम् । **तदसिद्धीत्यत्र** तत्पदं तत्तद्विरोधिव्यावृत्तिपरम् । तथा च स्वरूपादन्या विरोधिव्यावृत्तिः तत्तत्प्रवृत्तिनिमित्ताविनाभूतेति स्वीकारे व्यावृत्तेरपि सत्यत्वादिवत् धर्मतया तदविनाभूततया च सत्यत्वादिधर्माभावे अनृतादिव्यावृत्तेरप्यसिद्ध्या तद्बोधकतया सार्थक्यं न संभवतीति भावः । **न हीति** । न हि घटत्वस्याभावे घटत्वाविनाभूतायाः अघटव्यावृत्तेः सिद्धिरित्यर्थः । किं च तत्तद्विरोधिव्यावृत्तिः सिद्धा चेत् तत्तद्व्यावृत्तिवैशिष्ट्यबोधकतयासखण्डार्थत्वं दुर्बारमित्याह-**तत्सिद्धाविति** । **परपक्षेति** । अद्वैत्यपेक्षया परेषामस्माकं पक्षस्य कुक्षौ प्रवेशेनेत्यर्थः । ननु वयं ब्रह्मणः भावरूपविशेषणवैशिष्ट्यमेव नाङ्गीकुर्मः । अभावरूपविशेषणवैशिष्ट्यं तु अङ्गीकुर्मः इत्याशङ्क्य तर्हि भवतः एकत्र पक्षपातः स्यादित्याह - **अभावरूपेति** । **अपक्षपातिन इति** । स्वरूपमात्रपरत्वभङ्गस्य समानत्वेऽप्यभाववैशिष्ट्यबोधनमात्राङ्गीकारे निर्हेतुकः पक्षपातः स्यादिति भावः । शङ्कते - **न च व्यावृत्तीनामिति** । सत्यभूतधर्मवैशिष्ट्याप्रतिपादनान्न सखण्डार्थत्वप्रसङ्ग इति शङ्कितुर्भावः । समाधत्ते- **जडादीति** । सत्ये अनृतव्यावृत्तेः मिथ्यात्वे सत्यानृतयोरैक्यं स्यात् । तथा ज्ञानेऽजडे जडव्यावृत्तेः मिथ्यात्वे

मिथ्यात्वात् तत्तद्वैशिष्ट्येऽप्येवं न भेतव्यम्। अतो भवता प्रथममेव तदभ्युपगम उचितः।

एतेन शौक्ल्यं कार्ष्ण्यव्यावृत्तं पीतिमव्यावृत्तमित्यादिप्रतिबन्दिनिस्तारसिद्धिः। तत्र प्रतिपदं प्रतिपाद्यभेदाभ्युपगमात्। यदि पुनस्तत्रापि कार्ष्ण्यव्यावृत्तिरेव पीतिमव्यावृत्तिः स्यात्, तदा पीतिम्नः कार्ष्ण्यव्यावृत्तिसद्भावेन पीतिमव्यावृत्तिप्रसङ्गः। एवं विपरिवर्तेन कार्ष्ण्यव्यावृत्तिप्रसङ्गः। अतः कार्ष्ण्यव्यावृत्त्यभावे पीतिमव्यावृत्तेः

जडाजडतादात्म्यं स्यादिति भावः। **एवं न भेतव्यमिति**। यथा व्यावृत्तेर्मिथ्यात्वेऽपि बोधनं, तथा तत्तत्प्रवृत्तिनिमित्तानां सत्यत्वादीनां मिथ्यात्वेऽपि तद्वैशिष्ट्यबोधनेन भवितव्यमित्यर्थः।

यदि सर्वैः पदैः स्वरूपमेव प्रतिपाद्यते, तदा एकेतरपदनैरर्थक्यं स्यादिति यत् पूर्वमुक्तम्, तत्रैवं प्रतिवन्दिः भवति-शौक्ल्यं तावत् कार्ष्ण्यव्यावृत्तं पीतिमव्यावृत्तमित्यादिः व्यवहारो दृश्यते। शौक्ल्यं कार्ष्ण्यव्यावृत्तिरूपं पीतिमव्यावृत्तिरूपं च। तत्र शौक्ल्यमित्यनेनैव तदात्मककार्ष्ण्यादिव्यावृत्तीनां प्रतिपन्नत्वात् तदितरेषां कार्ष्ण्यव्यावृत्तादिपदानां वैयर्थ्यं स्यात्। तत्र तेषां सार्थक्यस्वीकारे ब्रह्मण्यपि तत्तद्व्यावृत्तिरूपे न पदान्तरवैयर्थ्यप्रसङ्ग इति। अस्याः प्रतिबन्देः निस्तार इत्थम् - तत्र प्रतियोगिनां कार्ष्ण्यादीनां भिन्नत्वात् तत्तत्प्रतियोगिकत्वविशिष्टवेषेण व्यावृत्तिबोधनाय एकेतरपदसार्थक्यम्। भवता तु तथा वक्तुं न शक्यते। विशिष्टार्थबोधकत्वप्रसङ्गादिति पूर्वोक्तमत्र स्मर्तव्यमिति। तदाह - **एतेनेत्यादिना**। किं च प्रतियोगिभेदेन व्यावृत्तीनां भेदाभ्युपगमात् कार्ष्ण्यव्यावृत्ति-पीतिमव्यावृत्त्योर्भेदात् शौक्ल्ये तदुभयसद्भावात् तद्बोधकतया कार्ष्ण्यव्यावृत्त पीतिमव्यावृत्तपदयोः सार्थक्यम्' यदि कार्ष्ण्यव्यावृत्तिपीतिमव्यावृत्त्योर्भेदो नाङ्गीक्रियते तदा कार्ष्ण्यव्यावृत्तिरेव पीतिमव्यावृत्तिरिति वक्तव्यम्। तथा सति पीतिम्नि कार्ष्ण्यव्यावृत्तिसद्भावेन पीतिमव्यावृत्तिप्रसङ्ग इत्याह - **तत्र प्रतिपदमिति**। **एवं विपरिवर्तेनेति**। कार्ष्ण्ये पीतिमव्यावृत्तिसद्भावेन कार्ष्ण्यव्यावृत्तिप्रसङ्ग इत्यर्थः। **अत इति**। अत इत्यस्यैव विवरणं दर्शनादित्यन्तम्। कार्ष्ण्ये कार्ष्ण्यव्यावृत्त्यभावेऽपि पीतिमव्यावृत्तेः, पीतिम्नि

काष्ण्र्ये दर्शनात् तयोर्मिथो भेदः सिद्धः; व्यावृत्त्यनुवृत्त्योरेकत्र विरोधात् । व्यावृत्त्यनुवृत्तिभ्यामेब हि व्यक्तिजातिभेदं सर्वेऽप्याहुः । ताभ्यामेव हि घटादेः सतश्च मिथ्यात्वामिथ्यात्वविवेको भवद्भिरपि स्वीकृतः । अतः काष्ण्र्यव्यावृत्तमित्यादौ प्रतिपदं प्रतिपाद्यभेदस्याभ्युपगन्तव्यत्वान्न निष्प्रयोजनत्वप्रसङ्गावकाशः । यद्यपि भावान्तरं व्यावृत्तिरिति पक्षः, तथाऽपि तस्य व्यावृत्तित्वं तत्तत्प्रतिसम्बन्धित्वसमुच्चितोपाधिभेदगर्भमिति तेनाकारेण प्रतिपाद्यभेदसिद्धिः । अन्यथा शौक्ल्यस्वरूपस्यैव पीतिमव्यावृत्तिरूपत्वे काष्ण्र्ये

पीतिमव्यावृत्त्यभावेऽपि काष्ण्र्यव्यावृत्तेः दर्शनाच्च काष्ण्र्यव्यावृत्तिपीतिमव्यावृत्त्योर्भेदः सिद्ध इति अनेकपदसार्थक्यं सिद्धान्ते इति भावः । **व्यावृत्त्यनुवृत्त्योरिति** । काष्ण्र्ये काष्ण्र्यव्यावृत्तिकाष्ण्र्यस्वरूपत्वयोर्विरोधादित्यर्थः । **व्यावृत्त्यनुवृत्तिभ्यामिति** । व्यक्तिर्व्यावर्तते जातिरनुवर्तत इति व्यावृत्त्यनुवृत्तिभ्यां व्यक्तिजात्योर्भेदः । **ताभ्यामेव हीति**। व्यावृत्त्यनुवृत्तिभ्यामित्यर्थः । घटादयोऽपरमार्थाः व्यावर्तमानत्वात्, सत् परमार्थः अनुवर्तमानत्वादिति हि भवद्भिरुक्तमिति भावः । प्रकृतमुपसंहरति - **अत** इति । शौक्ल्यं काष्ण्र्यव्यावृत्तं पीतिमव्यावृत्तमित्यादौ प्रतिपदं व्यावृत्तिभेदेन वा व्यावृत्त्यैक्येऽपि प्रतियोगिभेदेन वा अर्थभेदसद्भावात् पदान्तरं निष्प्रयोजनमिति प्रसङ्गस्य नास्मन्मतेऽवकाशः इति भावः । एतावता अन्योन्याभावभेदमुपगम्य विस्तृतम् । अथ अन्योन्याभावानामेकनिष्ठानामैक्येऽपि तत्तत्प्रतियोगिकत्वविशिष्टवेषेणान्योन्याभावप्रतिपादकत्वात् पदानां सार्थक्यमित्याह - **यद्यपि** इत्यादिना ।

अत्र महाचार्याः - ननु भावान्तराभाववादे शौक्ल्यादेरेव स्वेतरसमस्तव्यावृत्तिरूपत्वात् पूर्वोत्तरपदनैरर्थक्यमेवेत्यत आह- **यद्यपीति** । तत्तत्प्रतियोगिकत्वप्रयोजकतदध्यासविरोधित्वादिरूपोपाधिविशेषनिरूपणनियतनिरूपणत्वात् तादृशोपाधिभेदप्रतिपादनात् प्रतिपाद्यभेद इत्यर्थः । **अन्यथेति** अनुगतोपाध्यभाव इत्यर्थः । ननु

पीतिमव्यावृत्तिशब्दो न प्रयुज्येत। न च तावता भावान्तराभाववादपरित्यागप्रसङ्गः; अभावाभ्युपगमेऽपि अभावाभावेष्विवात्रापि निर्वाहस्य तन्त्राचार्यैः समर्थितत्वात्। सम्भवति च शौक्ल्यादेः सकलेतरव्यावृत्तिरूपत्वम्, तत्प्रकाशेऽन्याध्यासस्यादृष्टेः। ब्रह्मस्वरूपे निर्विशेषे प्रकाशमान एव सर्वेतराध्यासात् सर्वेतरव्यावृत्तिरूपत्वं दुरुपपादमेव।

किञ्च निर्विशेषबोधने वाक्यस्य सामानाधिकरण्यासिद्धिप्रसङ्गश्च । समानाधिकरणानेकार्थबोधकतयैव ह्यन्ततः शब्दानां सामानाधिकरण्यम् । अत

अननुगतानामभावत्वमङ्गीकृत्य तत्रानुगतोपाधिकल्पनापेक्षया वरमतिरिक्ताभाव एवाङ्गीक्रियतामित्यत्राह - **न चेति** । **अभावाभ्युपगमेऽपीति** । अतिरिक्ताभावपक्षे अभावाभावः प्रथमाभावप्रतियोगिस्वरूप इत्यङ्गीकारात् घटसामान्याभावाभावत्वं यथा घटत्वेनानुगतीकृतानां घटानामेवाङ्गीक्रियते, घटघटत्वयोः क्लृप्तत्वात्; न तु अतिरिक्ताभावः; तद्वदिहापि भावस्य तद्गतानुगतधर्मस्य च क्लृप्तत्वात् तत एवाभावव्यवहारोपपत्तौ नातिरिक्ताभावकल्पनाप्रसङ्ग इति व्याचक्षते ।

ननु यदि शौक्ल्यं पीतमव्यावृत्तिरूपं, तदा शौक्ल्ये कार्ष्ण्यव्यावृत्तिः किंरूपेत्याशङ्क्य सापि शौक्ल्यरूपैव । शौक्ल्यस्य स्वेतरसकलव्यावृत्तिस्वरूपत्वादित्याह-**संभवति चेति** । **तत्प्रकाश** इति । शौक्ल्यप्रतीतौ सत्यां तदन्यकार्ष्ण्याद्यध्यासस्यादर्शनादित्यर्थः । ब्रह्मणस्तु स्वेतरसमस्तव्यावृत्तिरूपत्वं न संभवति । ब्रह्मणि प्रकाशमाने एव तदितराध्यासादित्याह - **ब्रह्मस्वरूप** इति । एवं च तस्मिन् तदितरव्यावृत्तिरूपत्वं नाम तदितराध्यासनिवर्तकतावच्छेदकविषयताश्रयत्वमित्युक्तं भवति ।

किं चेत्यादि । व्यधिकरणवाक्यव्यावृत्तं शब्दानां सामानाधिकरण्यं समानाधिकरणार्थकत्वमेव वाच्यम् । समानाधिकरणार्थकत्वं नाम एकाधिकरणवृत्त्यर्थकत्वम् ।

एव हि, 'भिन्नप्रवृत्तिनिमित्तानाम्' इत्यादिलक्षणमुक्तम्। न चैतदुदाहरणविशेषविषयमिति वक्तुं युक्तम्; एकप्रवृत्तिनिमित्तानां वा परित्यक्तमुख्यामुख्यसर्वप्रवृत्तिनिमित्तानां वा सामानाधिकरण्यादर्शनात्॥ सत्यज्ञानादिवाक्ये दृश्यत इति चेत्– न; आशामोदकतुल्यत्वात्॥ तर्हि पर्यायपाठेष्विति चेत्–किं पुनरुक्तोदाहरणेषु,

---

तत्रार्थशब्देन प्रवृत्तिनिमित्तभूता धर्मा विवक्षिताः। तथा च एकाधिकरणवृत्त्यनेकधर्मबोधकत्वेनैव सामानाधिकरण्यं निर्वहति। अत एव भिन्नप्रवृत्तिनिमित्तानामिति सामानाधिकरण्यलक्षणे प्रवेशः इति भावः।

ननु भिन्नप्रवृत्तिनिमित्तानां शब्दानामेकस्मिन्नर्थे वृत्तिः सामानाधिकरण्यम् इत्येतत् ''देवदत्तः श्यामो युवा'' इत्याद्युदाहरणविशेषविषयम् इत्याशङ्क्य सर्वेषां समानाधिकरणवाक्यानां साधारणमेवेदं लक्षणम्। एकप्रवृत्तिनिमित्तकानां घटकलशादिपदानां वा परित्यक्तप्रवृत्तिनिमित्तकानां वा पदानां सामानाधिकरण्यस्य लोकेऽदर्शनात्। प्रवृत्तिनिमित्तं क्वचित् मुख्यम्, नीलो घट इत्यादौ। क्वचिदमुख्यम्, अग्निर्माणवक इत्यादाविति समाधत्ते - **न चैतदिति**। ननु एकप्रवृत्तिनिमित्तकानां वा परित्यक्तप्रवृत्तिनिमित्तकानां वा पदानां सामानाधिकरण्यं न दृश्यत इत्येतदयुक्तम्, प्रवृत्तिनिमित्तशून्यत्वे तद्दर्शनादिति शङ्कते- **सत्यज्ञानादी**ति। सत्यज्ञानादिवाक्ये प्रवृत्तिनिमित्तशून्यार्थे सामानाधिकरण्यदर्शनात् उभयत्र सामानाधिकरण्यादर्शनमयुक्तमिति भावः। समाधत्ते - **आशामोदकेति**। आशावशात् बुद्धिपरिकल्पितमोदकवत् आशामात्रेणेदं परिकल्पितम्, न तु प्रसिद्धम्; तत्रैव विप्रतिपत्तेरिति भावः।

नन्वेवमपि एकप्रवृत्तिनिमित्तकत्वनिष्प्रवृत्तिनिमित्तकत्वयोः सतोः सामानाधिकरण्यादर्शनमसिद्धम्। एकप्रवृत्तिनिमित्तकत्वे तद्दर्शनादिति शङ्कते - **तर्हीति**। पर्यायपाठेषु

यथा घटं कुम्भमानयेत्यादिषु, किं वा निघण्टुवत् पर्यायव्युत्पादनार्थपाठेषु, यथा कः पिक इत्युक्ते कोकिलः पिक इत्यादिषु? तत्राद्ये अनन्वयादेव सामानाधिकरण्यासिद्धिः। अनन्वयश्चाकाङ्क्षादिविरहात्। आकाङ्क्षादित्रयसमाहारे सत्येव ह्यन्वयः। अन्यथा नैराकाङ्क्ष्येण क्वचिदपि वाक्यभेदो न स्यात्। द्वितीये तु निमित्तभेदोऽस्त्येव, कोकिलशब्दस्य कोकिलत्वजात्यैव प्रवृत्तत्वात्; पिकशब्दस्य पिकशब्दवाच्यत्वलक्षण (धर्म?) विवक्षया प्रयोगात्। कथमिदमवगतमिति चेत् इत्थम्—कः पिक इति पृच्छतो हि पिकशब्दवाच्यः क इत्यभिप्रायः। तदुत्तरार्थस्तु तदनुरूप एव भवितुमर्हति। ततश्च कोकिलः पिकशब्दवाच्य इत्येवोत्तरवाक्यार्थः। एतदनभ्युपगमे तत्रापि पौनरुक्त्यादिदोषो दुष्परिहर इति।

सामानाधिकरण्यं दृश्यत इति चेदित्यर्थः। **अनन्वयादेवेति**। पुनरुक्तोदाहरणेषु घटं कुम्भमानयेत्यादौ घटकुम्भयोरन्वयप्रतीत्यभावेन वाक्यत्वस्यैवासिद्धत्वात् तद्विशेषसमानाधिकरणवाक्यत्वं सुतरामसिद्धमित्यर्थः। कुतस्तत्रान्वयप्रतीत्यभाव इत्याशङ्कायामाह - **अनन्वयश्चेति**। अन्वयप्रतीत्यभावश्चेत्यर्थः। **आकाङ्क्षादीति**। आकाङ्क्षायोग्यतातात्पर्यत्रयसंमेलन एव अन्वयः = अन्वयबोध इत्यर्थः। **अन्यथेति**। आकाङ्क्षाविरहेण यो वाक्यभेदः, निमलं जलं नद्याः, कच्छे महिषश्चरतीत्यादौ स न स्यात् इत्यर्थः। **द्वितीये त्विति**। निघण्टुवत् पर्यायत्वज्ञापनार्थेषु पाठेषु "कोकिलः पिकः" इत्यादिषु कोकिलशब्दस्य कोकिलत्वविशिष्ट इत्यर्थः। पिकशब्दस्य पिकशब्दवाच्य इत्यर्थः। **लक्षणेत्यनन्तरं धर्मेति योजनीयम्**। लक्षणशब्दः स्वरूपपरः। पिकशब्दवाच्यत्वरूपधर्मविवक्षयेत्यर्थः। तथा च तत्रापि अनेकप्रवृत्तिनिमित्तविशिष्टैकार्थबोधकत्वमेव, न तु निष्प्रवृत्तिनिमित्तकार्थबोधकत्वमिति भावः। तदेव प्रश्नोत्तरमुखेनोपपादयति - **कथमिदमित्यादिना**।

एवंच न समानाधिकरणवाक्यस्य मुख्येऽपि विशिष्टैक्ये संभवति, 'लक्षणा, तत्रापि सर्वपदलक्षणा, तत्र च निर्विशेषविशेष्यमात्रलक्षणा, तदुपरि व्यावृत्तिलक्षणा' इत्यादिपरिक्लेशो भवति ॥ इदं च तात्पर्यनिर्णयवशात् स्वीक्रियत इति वदन् कथं न जिह्रेति ? स्वप्रतिपत्तिर्भवतीति कथमेनं न निर्भर्त्सयति ? अथवा लक्षणयापि ब्रह्मणः शब्दबोध्यत्वं वदता, 'यतो वाचो निवर्तन्ते' इत्यादेः स्ववचनविरुद्धोऽप्यसङ्कोचोपपादनप्रयासो विस्मृतः ॥ मुख्यतया बोध्यत्वं तत्र

एवं चेत्यादि । एतावत्पर्यन्तं बहुभिः प्रकारैः समानाधिकरणवाक्यस्य अनेकविशेषणविशिष्टार्थकत्वबोधनं मुख्यवृत्त्यैव संभवतीति स्थिते लक्षणा, तत्रापि सर्वेषां पदानां लक्षणा, तत्रापि निर्विशेषविशेष्यमात्रे लक्षणा, तदुपरि इतरव्यावृत्तौ लक्षणा इत्यादिः क्लेशः न भवति । **मुख्येऽपीति** । मुख्यार्थे विवक्षिते एवेत्यर्थः ।

एवं च न इति नकारस्य क्लेशो भवतीत्युत्तरेणान्वयः । मुख्येऽपीत्यस्य मुख्यार्थविवक्षण एवेत्यर्थः । विशिष्टैक्यरूपमुख्यार्थविवक्षण एव लक्षणादिक्लेशो न भवतीति तात्पर्यम् । **इदं चेति** । निर्विशेषलक्षणादिकं निर्विशेषतात्पर्यनिर्णयात् स्वीक्रियत इति वदन् परः कथं न लज्जते । क्लेशात् निर्णायकाभावाच्चेति भावः । एतदपेक्षया स्वस्य अखण्डार्थप्रतीतिरनुभवसिद्धेति हठोक्तिस्तस्य युक्तेत्याह- **स्वप्रतिपत्तिरिति** । यद्वा प्रतिवादिनं प्रति, तवाप्यखण्डार्थप्रतीतिरेव हि भवति; कथमपलपसीति भर्त्सनमपि कुर्यादित्यर्थ इति **उत्तमूरुस्वामिनः** ।

अथवेति । अपि चेत्यर्थः । लक्षणया सत्यज्ञानादिशब्दबोध्यं ब्रह्मेति यदि भवतोच्यते तदा ''यतो वाचो निवर्तन्ते'' इति श्रुतिविरोधः इति पृष्टे सा श्रुतिः सत्यज्ञानाद्यतिरिक्तशब्दबोध्यत्वाभावं वदतीति समाधीयते । एवं सति शब्दबोध्यत्वसामान्याभावं वदन्त्यास्तस्याः श्रुतेः शब्दविशेषबोध्यत्वाभावार्थकतया संकोचः करणीयः। ननु सा श्रुतिः ब्रह्मणः मुख्यवृत्त्या शब्दबोध्यत्वाभावं वदतीत्याशङ्क्य लक्षणया शब्दबोध्यत्वाभावं वदतीत्येव कुतो न स्यादिति समाधत्ते - **मुख्यतयेति** । **उभयथापीति**।

निषिध्यत इति चेत्–विपरीतं किं न स्यात् । उभयथाऽपि वाग्वृत्त्या बोध्यत्वस्याविशेषात्, बोध्यत्वे मिथ्यात्वप्रसङ्गभयं लक्षणया बोध्यत्वेऽपि समानमेव, विशेषाभावात् ॥ अत एव परमार्थतो वा लक्षणया वा बोधनं नेच्छाम इति चेत्; तर्ह्यखण्डवाक्यार्थासिद्धिरेव भवेत् । परमार्थतः तत्प्रतिपादनाभावेऽपि तत्सिद्धौ तत्रैव सखण्डवाक्यार्थसिद्धिरपि किं न स्यात् ?

यत्तु वाक्यतात्पर्याविरोधायैकपदलक्षणेव सर्वपदलक्षणापि न दोष इत्याहुः– तदपि तात्पर्यस्यान्यथा निर्णयादेव निरस्तम् । यत्पुनः-विषं भुंक्ष्वेत्यादिषु सर्वपदलक्षणा दृष्टेति, तदपि न; भुंक्ष्वेत्यस्य निषेधप्रतियोगिविशेषसमर्पकस्य तत्रापि मुख्यत्वात् । विषशब्देनैव ह्यनर्थकरभक्ष्यरूढेन भुज्यमाने तस्मिन्ननर्थहेतुतया

वाग्वृत्तिनिषेधस्यैव वाचो निवर्तन्त इत्यनेन प्रतीतिरिति भावः । वाग्वृत्तिः शक्तिर्लक्षणा च । **अत एवेति** । ब्रह्मणो मिथ्यात्वभयादेवेत्यर्थः । वाचोनिवृत्तिश्रुतिः परमार्थतो वाग्वृत्तिं निषेधति । परमार्थतः शब्दबोध्यत्वं ब्रह्मणो नास्तीति लक्षणया वा शब्दबोध्यत्वं नास्तीति पर्यवसितम् । एवं तर्हि अखण्डवाक्यार्थः कथं सिध्येत् इति भावः । ननु अपरमार्थतः तद्बोधनादेव तत्सिद्धिः इत्यत्राह- **परमार्थत** इति । परमार्थतः अखण्डार्थप्रतिपादनाभावेऽपि अखण्डार्थसिद्धौ **तत्रैव** सत्यज्ञानादिवाक्ये एव सखण्डवाक्यर्थसिद्धिः कुतो न स्यादित्यर्थः। ननु बोधनादर्थसिद्धिः, तच्चाखण्डे अपरमार्थतः । सखण्डे तु तादृशमपि नास्तीति कथं सखण्डसिद्धिरिति चेत् - न । तथा सगुणवाक्ये सखण्डबोधनात् तत्रैव तत्सिद्धिप्रसङ्ग इति भावः । **अन्यथा निर्णयादिति** । सविशेषार्थकतया तात्पर्यनिर्णयादित्यर्थः ।

यत्पुनरिति । विषं भुङ्क्ष्वेत्यत्र विषपदस्यानर्थावहतया निषिद्धे लक्षणा । भुङ्क्ष्वेत्यस्य भोजननिबेधे लक्षणा । तथा च निषिद्धं न भुङ्क्ष्वेत्यर्थात् सर्वपदलक्षणेति शङ्कितुराशयः । समाधत्ते - **तदपि नेति** । भुङ्क्ष्वेत्यस्य निषेधप्रतियोगिभोजनसमर्पकत्वात् न लक्षणा । यदि भुङ्क्ष्वेत्यस्य मुख्यतैव, तर्हि भोजननिषेधावगमः केन पदेनेत्यत्राह-**शब्देनैव हीति** । विषशब्दो हि अनर्थकरभक्ष्ये रूढः । तेन भुज्यमाने तस्मिन् अनर्थहेतुत्वमभिप्रयता शब्देन

निषिद्धतामभिप्रयता भोजननिषेधोऽप्यभिप्रेतः। यद्वा भुंक्ष्वेत्यत्र प्रकृत्या निषिद्धभोजनं विवक्षितम्, विषशब्देन तन्निषेघ एव विवक्षितः। तथापि (तदाऽपि?) प्रत्ययांशस्य मुख्यत्वं सिद्धम् ॥ अस्तु तर्हीहापि प्रत्ययांशस्य मुख्यत्वम्, विशेष्यैक्यस्य तदर्थस्यापरित्यागादिति चेत्–न; विशेष्यमात्रस्यैव प्रतिपत्तुमशक्यत्वोपपादनेन विशेष्यैक्यस्यापि दुष्प्रतिपादत्वात्।

यत्तु विशेष्यस्यापि मुख्यार्थैकदेशत्वात् तत्र वृत्तिर्न लक्षणेति केचिदाहुःतदपि मन्दम्; विशिष्टविषयायाः शक्तेर्विशेषणाभावे विशिष्टाभावेन निर्विषयत्वात्।

किंच, श्लो– विशेष्यविषया शक्तिर्यदि नैवोपपद्यते।
अभिधेयत्वयोगेन तन्मिथ्यात्वं प्रसज्यते ॥

पुरुषेण वा भोजननिषेधोऽप्यभिप्रेत:। तथा च भोजननिषेध: निषिद्धपरतया त्वदभिमतेन विषशब्देनैव लक्ष्यत इत्यर्थ:। भोजनकर्मण: उपस्थितिस्तु अध्याहारादिति भाव:। यद्वा विषशब्देन निषिद्धत्वमुद्भावयता तद्भोजनविधानस्य व्याहतत्वात् नास्य तद्विधाने तात्पर्यम्, किं तु निषेध एवेति निषिद्धत्वबोधनादेवोन्नीयत इत्यर्थ:। तथा च विषं भुङ्क्ष्वेत्यत्र न सर्वपदलक्षणेति भाव;। **यद्वेति**। भुङ्क्ष्वेत्यत्र प्रकृति भूतेनभुजधातुना निषिद्धभोजनं लक्ष्यम्। विषशब्देन तन्निषेधो विवक्षित:। धातूत्तरप्रत्ययस्तु कर्त्राद्यर्थक: मुख्य एव। निषिद्धभोजना-भावानुकूलकृतिमांस्त्वमिति बोध:। भोजनकर्मोपस्थित्यर्थमुक्तं **विषशब्देनेति**। विषमित्यत्र प्रथमाविभक्ति:। सा चाविवक्षितार्था शब्दसाधुत्वाय प्रयुज्यत इति भाव:। अन्ये तु तत्र विषशब्देन द्विषदन्नं लक्ष्यते। विधिप्रत्ययेन च निषेधो लक्ष्यते। भुजिधातुर्मुख्य एवेति न सर्वपदलक्षणेत्याहुरिति **महाचार्या:**।

अस्तु तर्हीति। सत्यज्ञानादिवाक्येऽपि ऐक्यार्थक: प्रत्ययांश: मुख्य एव। प्रकृतीनां विशेष्यस्वरूपे लक्षणा। तदैक्यं प्रत्ययार्थ:। अतो न सर्वपदलक्षणेति शङ्का। विशेष्यैक्यं पदान्तरवैयर्थ्यादिना प्रतिपादयितुमशक्यम्। विशिष्टैक्यमेव प्रतिपादयितुं शक्यमिति पूर्वमेवोपपादितत्वात् विशेष्यैक्यं दुष्प्रतिपादमिति समाधानम्। शिष्टं स्पष्टम्। कारिकायां नैवोपपद्यत इति पाठोऽसाधु:। **नैवोपहन्यत** इति पाठ: साधु:। विशिष्टविषया शक्ति:

शक्यैकदेशविशेषणत्यागेऽपि शक्यैकदेशस्य विशेष्यस्यात्यागात् शक्तेः अनुपहतत्वात् शक्त्यैव विशेष्यप्रतिपादनात् न लक्षणेति कथनेऽपि विशेष्यस्य शब्दाभिधेयत्वात् मिथ्यात्वं प्रसज्यते । अभिधेयत्वं हि अभिधाधीनज्ञानविषयत्वम् । ज्ञानविषयत्वस्य मिथ्यात्वव्याप्यत्वात् ब्रह्मणो मिथ्यात्वं प्रसज्यत इत्यर्थः । यद्वा शब्दवाच्यं सर्वं मिथ्येति भवत्सिद्धान्तात् अभिधेयत्वस्य मिथ्यात्वव्याप्तत्वात् ब्रह्मणोऽभिधेयत्वस्वीकारे मिथ्यात्वं प्रसज्यत इति कारिकार्थः ।

विषं भुङ्क्ष्ववाक्यार्थविषये महाचार्यैः अन्यदपि विचारितम् । अत्यन्तोपयुक्तत्वात् तत् तथैवात्र लिख्यते ।

अत्र नवीनः - शत्रुगृहे जलमपि न पेयमित्यभिप्रायेण हि विषं भुङ्क्ष्वेति प्रयुज्यते । तत्र कथं धातुर्मुख्यार्थः । भक्षणपानयोर्भेदात् इति । उच्यते । न हि शत्रुगृहे यन्न कर्तव्यं तत्सर्वमनेनैव निषेध्यमिति नियमः । शत्रुगृहे किमपि मा भुङ्क्ष्व किमपि न पिबेत्येवं वाक्यान्तरेणापि निषेधसंभवात् । पानानुपस्थितिदशायां तस्य निषेध्यत्वासिद्धेश्च । यदि च कदाचित् भोजनपानोभयनिषेधपरतया प्रयुज्यते, यदि च पिपासुं प्रत्येव प्रयुज्यते तदानीमपि द्वितीया मुख्यैव ।

यदप्याह नवीनः ''वायुर्वै क्षेपिष्ठा'' इत्यादिवाक्ये प्राशस्त्यलक्षणा दृष्टेति । तन्न । तत्र प्राशस्त्यलक्षणायामपि अर्थवादस्य विधेयगतप्राशस्त्यार्थकत्वेन विध्येकवाक्यत्वात् विधेयसमर्पकस्य च मुख्यत्वात् ।

ननु तथापि विधेयान्वयप्रतीतेः पूर्वं प्राशस्त्यस्यैव सर्वैः पदैर्लक्ष्यत्वात् अवान्तरवाक्ये सर्वपदलक्षणास्तीति चेत् न । पदार्थसंसर्गनुभावकत्वाभावेन तदादाय वाक्यत्वाभावात् प्राशस्त्यस्य चानुभवे प्रमाणाभावेन लक्षणया गङ्गापदलक्ष्यस्येव स्मरणविषयत्वात् । ततोऽपि न वाक्यं विशेष्यमात्रस्यैवेति । यद्वा **अस्तु तर्हीत्यादि** ।

यदि विशेष्यैक्यवाची प्रत्ययो मुख्यार्थः, तदा तदर्थेनैव सखण्डार्थत्वप्रसङ्गः । ततश्च विशेष्यमात्रस्यैव प्रतिपत्तव्यत्वं च त्वयाभिमतम् । तदशक्यमेव

अतो विशेष्यबोधने विशेषणद्वारायाः शक्तेस्तदभावे कुण्ठितत्वमेव; अन्यथा विशेष्यपरित्यागेनापि बोधनमात्रेण सर्वत्र सुख्यत्वप्रसङ्गात् । अतोऽत्र निर्निमित्तलक्षणादिदोषो दुष्परिहरः । यद्यपि विशेष्यमात्रे तदैक्ये च मुख्यत्वं संभवति; विशेष्यं हि वाक्ये प्रधानोंऽशः, तथाऽपि तत्र स्वारस्यहांनिरवर्जनीयैव ।

किंच वाक्यार्थस्य निश्शेषभेदरहितत्वे तत्प्रतिपादकस्य वाक्यत्वाभावप्रसङ्गः। परस्परसंसृष्टपदार्थपरतया वा तत्संसर्गपरतया वा खलु अन्विताभिधानाभिहितान्वययोः सम्भवः । निर्विशेषे तु तदुभयमपि न संभवति । बौद्धमतगन्धिवैयाकरणाद्यभिमतबुद्धिविशेषादिवाक्यार्थत्वं मीमांसाचार्यादिभिर्विस्तरेण प्रतिक्षिप्तमिति न तत्रास्माभिरिह प्रयस्यते ।

विशेष्यैक्यरूपमुख्यार्थपरत्वेनोपपादितं स्यात् । अत: सखण्डार्थत्वापादकत्वात् विशेष्यैक्यं दुरुपपादमित्यर्थ: । यथा प्रवृत्तिनिमित्तवैशिष्ट्यं दुष्प्रतिपादम् तथा विशेष्यैक्यमपीत्यपिशब्दस्य भाव: । **तदभावे** = विशेषणाभावे- **कुण्ठितत्वम्** अबोधकत्वम् । **अन्यथेति** । मुख्यार्थैकदेशविशेषणत्यागे कुण्ठितत्वाभावे अंशान्तरपरित्यागेऽपि कुण्ठितत्वं न स्यात् । तथा च गङ्गादिपदानामपि तीरादौ मुख्यत्वं स्यात् । यदि च मुख्यार्थैकदेशस्यापि मुख्यार्थत्वान्न लक्षणा, तदा भावप्रधानेष्वपि सा न स्यादिति भाव: । **अतोऽत्रेति** । मुख्यार्थत्वे बाधाभावेऽपि वाक्ये हेतुमन्तरेण लक्षणाकल्पनम्, तत्रापि सर्वपद-लक्षणेत्यादिकमयुक्तमित्यर्थ: ।

ननु प्रधानांशस्यापरित्यागात् प्रकृते न लक्षणा । भावप्रधाने तु अप्रधानस्य प्राधान्येन बोधनाल्लक्षणा । तथा च न लक्षणादिर्दोष इत्याशङ्क्य तथापि सर्वपदलक्षणावत् अस्वारस्यमेव दोष इत्याह-**यद्यपीति** ।

किं चेति । अखण्डस्य वाक्यार्थत्वे तत्प्रतिपादकस्य वाक्यत्वमेव न स्यात् । तथाहि परस्परसंसृष्टपदार्थपरत्वं वाक्यत्वमित्यन्विताभिधानवादिन: । पदाभिहितपदार्थसंसर्गपरत्वं वाक्यत्वमित्यभिहितान्वयवादिन: । निर्विशेषपरत्वे उभयविधमपि वाक्यत्वं न संभवतीति भाव: ।

नन्वस्तु तत्त्वमसि-सत्यज्ञानादिवाक्यानामखण्डपरत्वं निष्प्रमाणकम्, तथापि भवता वादजल्पयोः सखण्डपरत्वे प्रमाणं वाच्यमिति चेत्–उच्यते । विप्रतिपन्नं वाक्यं विशिष्टपरम्, बोधकत्वात्; सम्प्रतिपन्नवत् । न च पदमात्रैर्भ्रमहेतुभिर्वाऽनैकान्त्यम्; तेषामपि यत्किञ्चिद्विशिष्टबोधकत्वमात्रस्य सिद्धत्वेन तत्रापि साध्यसामान्यस्य विद्यमानत्वात् । स्मारकत्वे हि पदानां विशिष्टमेव स्मार्यम्, एकस्यापि पदार्थस्य प्रकृत्याद्यंशभेदेन विशिष्टत्वात् । पदार्थानामपि निपुणनिरूपणे

नन्वस्त्वित्यादि । अस्तु नाम भवदुक्तरीत्या''तत्त्वमसि ''सत्यं ज्ञानमनन्तं ब्रह्म'' इत्यादिवाक्यानामखण्डपरत्वं निष्प्रमाणकम् । तथापि उभाभ्यां वादिप्रतिवादिभ्यां वादकथायां जल्पकथायां वा क्रियमाणायामनुमानं हि प्रमाणतया उपन्यसनीयम् । वितण्डायां तु स्वपक्षस्थापनाहीनत्वान्न प्रमाणोपन्यासस्य आवश्यकतेति शङ्का । समाधानमाह-**विप्रतिपन्नमिति** । विगीतं वाक्यं विशिष्टपरं वाक्यत्वात् व्यधिकरणवाक्यवत् इति पूर्वग्रन्थ: अखण्डार्थत्वानुमाने सत्प्रतिपक्षरूपदोषप्रदर्शनपर:; अयं तु ग्रन्थ: सखण्डार्थत्वसाधनपर इति न पौनरुक्त्यम् । **संप्रतिपन्नवदिति** । देवदत्त: श्यामो युवेत्यादि वाक्यवदित्यर्थ: । **न चेति** । पदमात्रस्य वाक्यवत् संसर्गनुभावकत्वाभावात् विशिष्टपरत्वाभाववति केवलपदे बोधकत्वसद्भावात् व्यभिचार इत्याशयेन **पदमात्रै**रित्युक्तम्। अख्यातिपक्षानुसारेण ज्ञानद्वयेऽपि संसर्गभानाभावात् भ्रमहेतुषु विशिष्टपरत्वाभाववत्सु बोधकत्वसत्त्वात् व्यभिचार इत्याशयेन भ्रमहेतुभिरित्युक्तम् । **तेषामपीति** । स्वपदार्थसंसर्गज्ञानजनकत्वमात्रं न साध्यम्; किं तु सामान्यतो विशिष्टबुद्धि जनकत्वम् । तस्य च पदमात्रेषु भ्रमहेतुषु च सत्त्वेन न व्यभिचार इति भाव: । **स्मारकत्वे** हीति । पदानि हि पदार्थान् स्मारयन्ति । पदार्थाश्च प्रवृत्तिनिमित्तविशिष्टा: । तथा च पदेषु प्रवृत्तिनिमित्तविशिष्टविषयकस्मृतिरूपज्ञानजनकत्वात् साध्यसत्त्वम् । अतो न व्यभिचार इति भाव: । शक्तं पदमित्यभिप्रायेणेदम् । सुप्तिङन्तं पदमित्यभिप्रायेणाह-**एकस्यापीति** । सुबन्तस्य तिङन्तस्य वा पदस्य प्रकृतिप्रत्ययात्मकांशद्वययुक्तस्य प्रत्ययार्थ-विशिष्टप्रकृत्यर्थपरत्वात् विशिष्टपरत्वम् । अत:

प्रायशो विशिष्टत्वादेव अख्यातिगर्भमयथार्थगोचरं वा भ्रान्तिज्ञानमपि विशिष्टविषयमेव। संसर्गमात्राख्यातिरेव ह्यख्यातिः; न पुनः सर्वाख्यातिः। एतेनाखण्डवाक्यार्थ इति भवद्वाक्येनाप्यनैकान्त्यं परिहृतम्। न च निर्विशेषगोचरप्रत्यक्षादिभिरनैकान्त्यम्, तेषामन्यत्र (११) प्रतिक्षिप्तत्वात्। पराभिमतनिर्विकल्पकस्य निश्शेषोन्मूलनात्।

एवं वाक्यत्वादिति प्रागुक्तश्च हेतुरनुसन्धेयः। यद्वा किमनुमानक्लेशेन ? सत्यज्ञानादिवाक्यश्रवणसमनन्तरं निपुणनिरूपितनीतिपरिशुद्धबुद्धीनामपि

साध्याभावविरहान्न सुप्तिङन्तपदे व्यभिचार इति भावः। स्वार्थिकानां प्रत्ययानां प्रकृत्यर्थातिरिक्तार्थशून्यत्वेन तदन्तपदे प्रत्ययार्थविशिष्टार्थपरत्वाभावात् **प्रायश** इत्युक्तम्। तत्रापि प्रवृत्तिनिमित्तविशिष्टार्थबोधकत्वं द्रष्टव्यम्। **अख्यातिगर्भमिति**। प्राभाकरमतेनाख्यातिगर्भं ज्ञानद्वयम्, नैयायिकादिमतेन अन्याथाख्यातिरूपं वा यत् भ्रमपदवाच्यं ज्ञानं तदपि विशिष्टविषयमेवेति न भ्रमहेतुषु व्यभिचार इति भावः।

ननु "अखण्डं वाक्यार्थः" इति वाक्यस्य अखण्डरूपैकार्थवृत्तित्वेन सामानाधिकरण्यं वाच्यम्; यथा नीलमुत्पलमिति वाक्यस्य उत्पलरूपैकार्थवृत्तित्वेन सामानाधिकरण्यम्। अतस्तत्रानैकान्त्यमिति शङ्कां निरस्यति **एतेनेति**। **परिहृतमिति**। प्रवृत्तिनिमित्तप्रत्ययार्थाभ्यां विशिष्टत्वादित्यर्थः। प्रत्ययार्थः एकत्वम्। प्रवृत्तिनिमित्तं अखण्डत्वं वाक्यार्थत्वं च। **अन्यत्रेति**। एकादशे निर्विशेषविषयनिर्विकल्पकभङ्गवादे प्रत्यक्षस्य निर्विशेषविषयकत्वनिरासादित्यर्थः। **एवमिति**। विगीतं वाक्यं विशिष्टपरं वाक्यत्वात् व्यधिकरणवाक्यवत् इति प्रागुक्तहेतुरित्यर्थः।

यद्वेति। सर्वानुभवसिद्धविषयेऽनुमानक्लेशेन न प्रयोजनम्। तथा हि ये तावत् निपुणं निरूपितैः न्यायैः परिशुद्धबुद्धिमन्तः तेषां सत्यज्ञानादिवाक्यश्रवणानन्तरं सत्यत्वज्ञानत्वादिविशिष्टार्थविषयकबोध एव जायते, यथा सगुणब्रह्मपरतया भवदभिमतनां सत्यकामः सत्यसंकल्प इत्यादिवाक्यानां श्रवणे। न चैतद्विशिष्टवाक्यार्थज्ञानजननमपह्नोतुं

विशिष्टवाक्यार्थबोध एव जायते; यथा सगुणब्रह्मादिपरतया भवदभिमतवाक्यश्रवणे। न चैतदपह्नवमर्हति; सर्वेष्वपि वाक्येषु विशिष्टवाक्यार्थबोधापह्नवप्रसङ्गात्। न च तत् साहसिकानां पश्यतोहराणां भवतामपीष्टम्। अतोऽनन्यथासिद्धानन्तर्यनियमाधिगमादन्यत्रेवात्रापि स्वानन्तरभाविविशिष्टवाक्यार्थबोधं प्रति करणत्वं प्रत्यक्षत एव सिद्धम्। बाधशङ्का तु प्रागेव निरस्तेति। अतः सिद्धं सखण्डपरम्, 'तत्त्वमसि', 'सत्यम्' इत्यादिवाक्यमिति ॥

॥ इति शतदूषण्याम् अखण्डवाक्यार्थखण्डनवादः अष्टत्रिंशः ॥ ३८ ॥

शक्यते । सर्वेष्वपि वाक्येषु तादृशबोधापह्नवप्रसङ्गात् इत्यर्थः । परिशुद्धबुद्धीनामपीत्यपिना सामान्यबुद्धीनां तादृशबोधे नास्ति विवाद इति सूच्यते ।

अत इत्यादि । अनन्यथासिद्धत्वे सति यत्कार्याव्यवहितपूर्वं नियमेन यद्वर्तते तत् तस्य कारणमिति निश्चिनुमः । अनन्यथासिद्धं कार्याव्यवहितनियतपूर्ववृत्ति कारणमिति यावत् । यथा दण्डचक्रादिकं तादृशमिति घटकारणमिति निश्चिनुमः । तथा सत्यज्ञानादिवाक्यश्रवणानन्तरं नियमेन विशिष्टार्थबोधस्य जायमानतया तादृशबोधं प्रति सत्यज्ञानादिवाक्यस्य करणत्वं सिद्धम् इति भावः । **प्रत्यक्षत एव सिद्धमिति** । स्वानुभवसिद्धमित्यर्थः । यद्वा यत्सत्त्वे यत्सत्त्वं यदभावे यदभाव इति नियतान्वयव्यतिरेकसहचारप्रत्यक्षसिद्धमित्यर्थः । **बाधशङ्का तु** इति । सत्यज्ञानादिवाक्यस्य विशिष्टार्थबोधकत्वबाधशङ्का तु पूर्वमेव परिहृतेत्यर्थः । वादार्थमुपसंहरति - **अतः सिद्धमिति।**

यत्तु नवीनैः संसर्गगोचरप्रमाजनकत्वं वा अपर्यायशब्दानामेकप्रातिपदिकार्थपरत्वं वा अखण्डार्थत्वमित्युक्तम् । यानि च तत्त्वमस्यादिवाक्यम् अखण्डार्थम् आत्ममात्रनिष्ठं वा समानाधिकरणवाक्यत्वात् तन्मात्रप्रश्नोत्तरत्वाद्वा सोऽयं देवदत्त इतिवत् इत्यादीन्यनुमानानि प्रदर्शितानि तेषामपि दूषणमुक्तैरेव न्यायैः प्रमाणैश्च ऊह्यम् । विस्तृतं च चण्डमारुतादाविति तत एवावगन्तव्यं जिज्ञासुभिरिति शम् ।

इति श्रीशतदूषणीव्याख्यायां तात्पर्यप्रकाशिकायां
अखण्डवाक्यार्थखण्डनवादः अष्टात्रिंशः ॥

अथ भावरूपाज्ञानभङ्गवादः एकोनचत्वारिंशः ॥ ३९ ॥

श्रुतिकिरीटनिरूपणनिर्भरप्रसरयैव धिया पगिशोधिताम् ।
सुविमलां पदवीमदवीयसीं भजत माधवभक्तिमयीमिमाम् ॥
भावरूपं यदज्ञानं ये जनाः परिचक्षते ।
तच्चिते तत् तथाभूतं निश्चिन्वन्ति विपश्चितः ॥

अथ भावरूपाज्ञानभङ्गवादः एकोनचत्वारिंशः

श्रुतिकिरीटनिरूपणनिर्भरप्रसरयैव धिया परिशोधिताम् ।
सुविमलां पदवीमदवीयसीं भजत माधवभक्तिमयीमिमाम् ॥

वेदान्तार्थनिरूपणे अनायासेन प्रसरन्त्या धिया परिशोधितां अत एव निर्मलां भगवत्प्राप्तौ अदूरां नेदीयसीं माधवभक्तिमयीमिमां पदवीं भजत । अन्येषामिव अज्ञानमुषिततत्त्वज्ञानता माभूत्, अविद्यायाः अप्रामाणिक्याः कल्पने उद्यमश्च मा भूत् इति अपेक्षितगुणविशेषः माधवभक्तिरूपो भवतु इत्याशास्ते । एतादृशमाधवभक्तिविरहादेव परैर्यत् कल्पितं तदाह-

भावरूपं यदज्ञानं ये जनाः परिचक्षते ।
तच्चित्ते तत्तथाभूतं निश्चिन्वन्ति विपश्चितः ॥

यदज्ञानम् = यं ज्ञानाभावम्, अहमज्ञ इत्यत्र प्रतीयमानम् । यद्वा यदज्ञानमित्यत्र अज्ञानशब्देन अहमज्ञ इत्यत्र प्रतीयमानमित्यर्थो विवक्षितः । कुतर्कपिहितदृष्टित्वात् अज्ञानस्याभावत्वम् अजानन्तः भ्रान्त्या भावरूपमित्याचक्षते । **तत्** ज्ञानाभावरूपमज्ञानमित्यर्थः । **तथाभूतमिति** तथाशब्देन भावरूपपरामर्शिना वृत्तिविषये भावप्रधानेन भावरूपत्वमुच्यते । भवतिश्च प्राप्तिवाची । ''भू प्राप्तौ' इति धातुपाठात् । यथोक्तं ''प्रमाणभूत आचार्यः'' इति महाभाष्यव्याख्याने कैयटेन - ''वृत्तिविषये प्रमाणशब्दः प्रमाणत्वे वर्तते'' इति । प्रमाणत्वं प्राप्त इति प्रमाणभूत इत्यस्यार्थः । तद्वत् सद्भावः रूपं धर्मो यस्य तत् भावरूपं स्थिरतया विद्यमानमित्यर्थः । अज्ञानं भावरूपमिति

एवं ह्यज्ञानमुषिततत्त्वज्ञानैर्विज्ञातम्–प्रत्यक्षानुमानागमैर्भावरूपमज्ञानं प्रतीयते । तत्र प्रत्यक्षं तावत्, (१) अहमज्ञो मामन्यं च न जानामीत्यादिरूपं सर्वसम्मतम् । तत् किं भावरूपमज्ञानं विषयीकरोति, उताभावरूपमिति विवेचनीयम् । न तावत्

वदतां चित्ते अज्ञानं सुस्थिरमिति विपश्चितो निश्चिन्वन्तीति भावः ।

यद्यपि भावरूपं यदज्ञानमित्यत्र भावशब्देनाभावव्यावृत्तभावो गृह्यते; तथापि भावशब्दस्य सत्तामात्रपरत्वमप्यस्तीति तथाशब्देन विद्यमानत्वपरामर्शो युज्यते । यद्यपि नायमर्थः प्रकृतः । प्रकृतपरामर्शी च तच्छब्दः; तथापि प्रयुक्तशब्दोपस्थितियोग्यतामात्रात् तथाभूतमित्यनेन तत्परामर्शः । तथा च अज्ञानस्य भावरूपत्वकल्पनायामज्ञानमेव हेतुरित्युक्तं भवति । अज्ञानमूलत्वात्तदुक्तेरनुपादेयतेति हृदयम् ।

पूर्वपक्षः

एवं हीति । वक्ष्यमाणप्रकारेणेत्यर्थः । **अज्ञानेति** । **अज्ञानशब्देन** अनादिपापवासना गृह्यते । तस्य तत्त्वज्ञानविरोधित्वस्य "अनादिपापवासनादूषित" इत्यादिना भगवता भाष्यकारेण अभिधानात् । श्लोके भ्रान्तिहेतुतयोक्तस्य तत्त्वज्ञानाभावस्य दुष्कर्मैव हेतुरिति अनेनोक्तं भवति । **प्रत्यक्षेत्यादि** अर्थापत्तेरप्युपलक्षणम् । तथा च प्रत्यक्षेणानुमानेनागमेनार्थापत्त्या च भावरूपमज्ञानं सिध्यति । **प्रत्यक्षं तावदिति** । निरूप्यत इति शेषः । तदेव निरूपयति - **अहमज्ञ** इति । रूपमित्यनन्तरं प्रत्यक्षमित्यनुषज्यते । अथवा अहमज्ञो मामन्यं च न जानामीत्यादिरूपं प्रत्यक्षं तावत् सर्वसंमतमित्यन्वयः । भावविषयकत्वाभावविषयकत्वविप्रतिपत्तावपि स्वरूपे न विप्रतिपत्तिरित्याशयेन तावदित्युक्तम् । अहमज्ञ इत्यादिकं त्वदुक्तमर्थं न जानामि, शास्त्रार्थं न जानामीत्यादेरप्युपलक्षणम् । मामन्यं च न जानामीत्येतत् अहमज्ञ इत्येतद्विवरणरूपं वा ।

ननु अहमज्ञ इति सामान्येन ज्ञानमसिद्धमित्यत आह-**सर्वसंमतमिति** । अनुभवमपलपतः कथानर्हत्वात् सर्वत्र ममायमनुभवो नास्तीति वक्तुं सुशकत्वाच्च नात्र विवदितव्यमिति भावः । **भावरूपमिति** । ज्ञानाभावातिरिक्तमित्यर्थः; । अभावत्वमपि

अभावरूपम् । अभावो हि प्रतियोगिनिरूपणाधीननिरूपणः । ततश्च ज्ञाना-

भावरूपाज्ञानस्यावस्थैवेति पक्षे ज्ञानावस्थाविशेषातिरिक्तमित्यर्थ: । **न तावदभावरूपमिति**। अहमज्ञ इति प्रत्यक्षं ज्ञानाभावरूपमज्ञानं विषयीकरोतीति वक्तुं न शक्यते । अभावविषयकज्ञानं प्रति प्रतियोगिविषकज्ञानस्य कारणत्वात् ज्ञानरूपप्रतियोगिविषयकज्ञानं बिना ज्ञानाभावविषयकप्रत्यक्षं नोदेतुमलम् । अपि च "अर्थेनैव विशेषो हि निराकारतया धियाम्" इति न्यायेन विषयविशिष्टमेव ज्ञानं ज्ञानविषयो भवेत् । तथा च ज्ञानरूपप्रतियोगिविषयकज्ञानं विना ज्ञानाभावस्य प्रत्यक्षं न भवति । ज्ञानज्ञानं च विषयेण सहैव ज्ञानं विषयीकरोति । इत्थं च यद्विषयकज्ञानस्याभाव: प्रत्यक्षविषयतया अभिमत: तद्विषयकं ज्ञानं पूर्वमस्तीति तदभावरूपविषयाभावात् कथं ज्ञानाभावविषयकं प्रत्यक्षं भवितुमर्हति । य: घटज्ञानमिति प्रतियोगिभूतज्ञानावच्छेदकतया घटं व्यवहरति तदा घटज्ञानमस्त्येव व्यवहारं प्रति व्यवहर्तव्यज्ञानस्य हेतुत्वात् । तथा च घटं जानन्नेव घटं न जानामीति वदन् स्ववाग्विरोधमपि न जानातीति समुदायार्थ: ।

अथ पङ्क्त्यर्थ: - अभावज्ञानं प्रति प्रतियोगिज्ञानस्य कारणत्वात् ज्ञानं स्वप्रकाशमिति मते प्रतियोगिभूतज्ञानस्यापि ज्ञानावश्यकत्वात्, अनुव्यवसायवादेऽपि सामग्र्या: सत्त्वेन अनुव्यवसायस्यावर्जनीयत्वात् बाधाभावेन भ्रान्तिकल्पनायोगाच्च ज्ञानसामान्याभावग्रहरूपत्वमहमज्ञ इति प्रतीतेर्नोपपद्यत इत्याह- **अभावो हीति** । **प्रतियोगिनिरूपणाधीननिरूपण:** प्रतियोगिविषयकज्ञानजन्यज्ञानविषय: । भावान्तरमभाव इति मतेऽपि अभावत्वेन प्रतीतिदशायां प्रतियोगिनिरूपणाधीननिरूपणत्वमस्त्येवेति भाव: । न केवलं प्रतियोगिभूतज्ञानविषयकज्ञानसत्त्वात् ज्ञानसामान्याभावग्रहरूपत्वमहमज्ञ इति प्रतीतेर्नोपपद्यत इत्याह- **अभावो हीति** । प्रतियोगिनिरूपणाधीननिरूपण; = प्रतियोगिविषयकज्ञानजन्यज्ञानविषय: । भावान्तरमभाव इति मतेऽपि अभावत्वेन प्रतीतिदशायां प्रतियोगिनिरूपणाधीननिरूपणत्वमस्त्येवेति भाव: । न केवलं प्रतियोगिभूतज्ञानविषयकज्ञानसत्त्वात् ज्ञानसामान्याभावग्रहासंभव:, किं तु प्रतियोगिभूतज्ञानविषयीभूतार्थ-

भावप्रतीतिर्ज्ञानग्रहणमन्तरेण नोपपद्यते। ज्ञानं विषयनिरूपणाधीननिरूपणमिति विषयेण सहैव गृह्यते। ततश्च यद्विषयस्य ज्ञानस्याभावो व्यवजिहीर्षितः, तद्विषयं ज्ञानं तदानीमेव संजातमिति कथं तदभावः प्रतीयेत ? यः प्रतियोगिभूतज्ञानावच्छेदकत्वेन विषयः यदा व्यवह्रियते, तदैव तद्विषयज्ञानाभावं वदन्

विषयकज्ञानसत्त्वाच्चेत्याह - **ज्ञानमिति** । यद्वा अस्तु प्रतियोगिभूतज्ञानविषयकं ज्ञानम्, अथापि न दोष: । अहमज्ञ इति हि ज्ञाने ज्ञानातिरिक्तघटाद्यर्थविषयकज्ञानाभावो गृह्यते, न तु ज्ञानसामान्याभाव इत्याशङ्क्य, घटाद्यर्थविषयकज्ञानमप्यवर्जनीयमेवेत्याह - **ज्ञानमिति** । **विषयनिरूपणाधीननिरूपण**मित्यस्य विषयविषयकज्ञानजन्यज्ञानविषय इत्यर्थ: । द्वित्रक्षणमात्रानुवृत्तोपाध्यवच्छिन्नकाले साहित्यविवक्षया विषयेण सह गृह्यत इत्युक्तम् । विषयज्ञानस्य ज्ञानज्ञानकारणत्वात् अभावप्रतियोगिभूतज्ञानज्ञानाव्यवहितपूर्वसमये विषयज्ञानमस्त्येवेत्यर्थ: । यद्वा सहैव गृह्यत इत्यनेन ज्ञानज्ञानस्यैवार्थविषयकत्वं विवक्षितम् । ज्ञानज्ञानस्यैवार्थविषयकत्वे हेतु: **ज्ञानं विषयनिरूपणेति** । अत्र पक्षे विषयनिरूपणाधीननिरूपणमित्यस्य विषयविषयकत्वसहितविषयितानिरूपकमित्यर्थ: । सहितत्वं च समानाधिकरणत्वम् । ज्ञानज्ञाने ज्ञाननिरूपितविषयिता घटादिविषयनिरूपितविषयिता चास्तीति यावत् । यतो ज्ञानं विषयीकुर्वत् ज्ञानं ज्ञानावच्छेदकतया अर्थमपि विषयीकरोति, अत एव हि ज्ञानस्य विषयनिरूपणाधीननिरूपणत्वं युज्यते, नान्यथेति भाव:। ज्ञानज्ञानात् प्राक् अर्थज्ञानसत्त्वेऽपि तस्य प्रतियोगिभूतज्ञानविषयकज्ञानव्यवहिततया अभावज्ञानकाले अभावेन अभावग्रहणं भवितुमर्हतीति शङ्कामपकर्तुं प्रतियोगिज्ञानज्ञानस्यैवार्थविषयकत्वमुक्तम् । **यद्विषयस्येति** । अर्थविषयकज्ञानाभावो हि अहमज्ञ इति प्रतीतेर्विषय इत्युक्तम् । तस्य च अर्थस्य ज्ञाने कथं तदभावग्रह: इत्यर्थ: । एवं ज्ञानाज्ञानयोर्विरोधमजानान: स्ववचनविरोधमपि कथं जानीयादित्युपालभते - **य: प्रतियोगीति** ।

स्ववचनविरोधमपि न जानाति । ननु ज्ञानव्यक्तिभेदाददोषः, निषिध्यमानं ज्ञानमन्यत्; तस्य निषेधप्रतियोगिनो निरूपणौपयिकं ज्ञानं चान्यदिति ॥ नैवम्; संसर्गाभावस्य तज्जातीयसमस्तप्रतियोगिनिरूप्यत्वात्; इह भूतले घटो नास्तीतिवत् । ततश्च सर्वज्ञानप्रतियोगिको निषेधः एकयापि ज्ञानव्यक्त्या विरुद्ध एव । न ह्येकस्मिन् घटे विद्यमानेऽपि, अघटं भूतलमिति व्यवहरन्ति ।

(२) एतावन्तं कालं न किञ्चिदहमज्ञासिषमिति च (च। इयं ?) प्रतीतिरपि

शङ्कते - **ननु ज्ञानव्यक्तीति** । अभावबुद्धिं प्रति प्रतियोगिज्ञानं कारणमस्तु, भवतु च तन्निरूपकार्थविषयकज्ञानम् तथापि तदानीं विद्यमानज्ञानातिरिक्तज्ञानाभाव एव अहमज्ञ इति प्रत्यक्षेण गृह्यते इति शङ्कितुर्भावः । संसर्गाभावप्रत्यक्षस्य प्रतियोगिनि भासमानधर्मावच्छिन्नयावत्प्रतियोगिकाभावविषयकत्वमिति नियमः । यथा भूतले घटो नास्तीति अत्यन्ताभावविषयकं प्रत्यक्षं प्रतियोगिनि भासमानं यत् घटत्वं तद्वच्छिन्नयावद्घटप्रतियोगिकात्यन्ताभावं विषयीकरोतीति । तथा अहमज्ञ इत्यस्य प्रत्यक्षस्यापि ज्ञानाभावविषयकस्य प्रतियोगिनि ज्ञाने भासमानो यो ज्ञानत्वरूपो धर्मः तद्दवच्छिन्नयावज्ज्ञानाभावविषयकत्वमेष्टव्यम् । एवं सति प्रतियोगिभूतज्ञानज्ञानस्य तन्निरूपकार्थज्ञानस्य च सत्त्वे कथं यावज्ज्ञानप्रतियोगिकाभावः भवितुमर्हति । एकयापि ज्ञानव्यक्त्या सह यावज्ज्ञानाभावस्य विरुद्धत्वात् । न ह्येकस्मिन् घटे विद्यमाने यावद्घटाभावविषयकम् अघटं भूतलमिति प्रत्यक्षं भवितुमर्हतीत्याशयेन समाधत्ते - **संसर्गाभावस्येत्यादिना** । **तज्जातीयेति** । प्रतियोगिनि भासमानधर्मावच्छिन्नेत्यर्थः । **प्रतियोगिनिरूप्यत्वात्** इति । प्रतियोगिविशिष्टतया भासमानत्वात् इत्यर्थः । यद्यपि अन्योन्याभावस्यापि प्रतियोगिनि भासमानधर्मावच्छिन्नयावत्प्रतियोगिकतया भासमानत्वमिष्यते, तथापि प्रकृतत्वात् संसर्गाभावस्येत्युक्तम् । अहमज्ञ इति प्रतीतेरिव विशेषाभावविषयकत्वशङ्कापि संभवति । नात्र तच्छङ्कासंभवोऽपीत्याशयेनाह - **एतावन्तमिति** । न चायमनुभवोऽसिद्ध इति वाच्यम् । सुप्तोत्थितस्य एतादृशपरामर्शस्य

न काञ्चिदपि तदानीं ज्ञानव्यक्तिं क्षमते । ननु कालभेदेन ज्ञानाज्ञानयोरविरोधः । न हि ज्ञानाभावप्रतिपत्तिकाल एव ज्ञानाभावेन भवितव्यमिति नियमः ।। मैवम्, प्रत्यक्षज्ञानस्य वर्तमानग्राहित्वनियमात् । तथा च सूत्रितं भगवता जैमिनिना– ‘सत्संप्रयोगे पुरुषस्येन्द्रियाणां बुद्धिजन्म तत्प्रत्यक्षमनिमित्तं विद्यमानोपलम्भनत्वात्’

अनुभवसिद्धत्वात् । अयं च परामर्शः पूर्वानुभवं बिना न संभवति । स चानुभवः कांचिदपि ज्ञानव्यक्तिं न सहते इत्यर्थः । न क्षमत इत्यतः प्राक् स्वमूलभूतानुभवकाल इति शेषः । न चैवं भावरूपाज्ञानमपि कथमनुभूयते, तस्यापि विषयनिरूप्यत्वात्, विषयभाने च तस्यासंभवादिति वाच्यम् । विषयस्याज्ञाततया नित्यसाक्ष्यनुभववेद्यत्वेन अज्ञानस्य सुषुप्तावपि तेनैव विषयव्यावृत्ततयैवानुभवात् इत्याहुः ।

ननु अहमज्ञ इति प्रतीतेः प्राक्कालीनज्ञानसामान्याभावविषयकत्वमस्तीति शङ्कते – **ननु कालभेदेनेति** । प्रत्यक्षे विषयस्य पूर्वकालवृत्तितयैव कारणत्वम्, न तु कार्यकालवृत्तितयेत्याशयेनेयं शङ्का । यद्वा अभावज्ञाने प्रतियोगिज्ञानस्य पूर्वकालवृत्तितमैव हेतुत्वम्, न तु अभावज्ञानकालवृत्तितयेत्याशयेनेयं शङ्का । **न हीति** । ततश्चाभावप्रत्यक्षकाले प्रतियोगितन्निरूपकार्थज्ञानासत्त्वेऽपि न दोष इति भावः । समाधत्ते-**मैवमिति** । पूर्वकालवृत्तित्वमात्रेण कारणत्वपक्षेऽपि प्रतियोगितन्निरूपकार्थविषयकज्ञानाभ्यां व्यवधानान्न पूर्वकालीनस्य ज्ञानाभावस्य प्रत्यक्षसंभवः इति भावः । **सत्संप्रयोग** इति । ''चोदनालक्षणोऽर्थो धर्मः'' इत्यत्र धर्मे चोदनैव प्रमाणमित्युक्तम् । तदनुपपन्नम् । प्रत्यक्षस्यापि तत्र प्रमाणत्वसंभवात् इत्याशङ्क्योच्यते **सत्संप्रयोग** इति । इन्द्रियाणां सता अर्थेन संप्रयोगे सति इन्द्रियैः पुरुषस्य बुद्धिर्जायते । अतो विषयसंनिकर्षे सत्येव इन्द्रियाणां बुद्धिजनकतया संनिकर्षस्य च विषयाभावेऽसिद्धेः, विद्यमानविषयकज्ञानजनकतया तदानीमविद्यमानश्रेयोविषयकज्ञानजननासामर्थ्यात् तत्साधनत्वमपि प्रत्यक्षं न ग्रहीतुं शक्नोतीति सूत्रार्थः ।

ननु प्रत्यक्षस्य वर्तमानविषयग्राहकत्वमिति नास्ति नियमः; योगिनामीश्वरस्य च यत्

इति । यद्यपि योगीश्वराणां प्रत्यक्षमतीतानागते अपि गृह्णातीति शास्त्रबलादभ्युपगन्तव्यम्, तथाप्यस्मदादिप्रत्यक्षं वर्तमानग्राहीत्येव नियमः ॥ अस्तु तर्हि प्रत्यक्षेतरेण प्रमाणेनावर्तमानज्ञानेन ज्ञानाभाव (प्रत्यक्षेतरेण प्रमाणेन ज्ञानेनावर्तमानज्ञानाभाव?) प्रतीतिः, अस्वाप्सम् एतावन्तं कालं न किञ्चिदहमज्ञासिषमित्यादिषु कालविशेषस्येव ज्ञानाभावस्याप्यतीतस्यानुमेयत्वोपपत्तेरिति चेत्–तन्न; अहमज्ञः मामन्यं च न जानामीत्यत्र वर्तमानतयैवाज्ञानप्रतीतेः । किमिदं जानासीति पृष्टश्च कश्चित्, न जानामीत्युतरं दिशति । अत एवात्र

प्रत्यक्षं तस्यातीतानागतविषयग्राहकत्वादित्याशङ्क्य तेषां प्रत्यक्षमतीतानागतग्राहीति शास्त्रबलादङ्गीक्रियते । तस्मादस्मदादिप्रत्यक्षस्यानुभवानुसारात् वर्तमानमात्रग्राहकत्वनियम इति समाधत्ते- **यद्यपीत्यादिना** । योगीश्वराणां प्रत्यक्षस्य इन्द्रियसंयोगानपेक्षत्वान्न विद्यमानोपलम्भनत्वमिति भावः । ननु अहमज्ञ इति प्रतीतिः परोक्षरूपास्तु, ततश्च कालान्तरीयं ज्ञानाभावं सा विषयीकर्तुं शक्नोतीति नानुपपत्तिरिति शङ्कते- **अस्तु तर्हीति**। अवर्तमानज्ञानेन=अवर्तमानविषयकत्वयोग्येन ज्ञानेन । **ज्ञानाभावप्रतीतिरिति** । ज्ञानाभावविषयीकरणमित्यर्थः । अहं स्वापकालसंबन्धवान् स्वापपूर्वकालानुभूतार्थस्मर्तृत्वात् इति कालानुमानप्रकारः । अहं ज्ञानाभाववान् ज्ञानवत्तया उपलब्ध्यभावादिति । ज्ञानाभावानुमानप्रकारः । ज्ञानाभावस्य वर्तमानतया प्रतीतेः न पूर्वकालिकज्ञानाभावविषयकत्वमिति समाधत्ते- **तन्नेत्यादिना** । अहमज्ञः, न जानामीति प्रतीतेः ज्ञानाभावनिष्ठं यत् वर्तमानत्वं तद्विषयकत्वे विप्रतिपन्नं प्रत्याह-**किमिदमिति** । वर्तमानविषयकप्रश्नोत्तराभ्यां तादृशमेवाज्ञानं विषय इत्यनुमीयत इति भावः। अहमज्ञः, मां न जानामीति ज्ञानं वर्तमानविषयकं वर्तमानविषयकप्रश्नोत्तरविषयत्वादित्यनु-मानाकारः ।

पूर्वं प्रतियोगिभूतज्ञाननिरूपकार्थविषयकस्मरणेन विरोध उक्तः । इदानीं तादृशार्थविषयकानुभवेनापि विरोधात् न ज्ञानाभावविषयकत्वमित्याह - **अत एवेति** । अत्र प्रमाणान्तरपदेन प्रश्नवाक्यं विवक्षितम् । एतेनानुभवाभावः प्रमाणज्ञानाभावो वा विषय इति प्रत्युक्तम् ।

प्रमाणान्तरजन्यज्ञानेनापि विरोधः स्थित एव । एतेन ज्ञानाभावगोचरज्ञानेनापि विरोधः सिद्धः । न हि ज्ञानमुदयमानं तदानीमेव सर्वज्ञानाभावं प्रकाशयितुमलम्; स्वस्यापि ज्ञानत्वाविशेषात्; विद्यमानत्वाच्च । एवमाश्रयज्ञानेनापि विरोधः । न हि यत्किञ्चिदाश्रयप्रतीतिमन्तरेणाभावप्रतिपत्तिमनुमन्यामहे । उक्तं चाभियुक्तैः,

---

एतेनेति । अहमज्ञः मामन्यं च न जानामीत्याकारकं यत् ज्ञानं तत्काले ज्ञानसामान्याभावः भवितुं नार्हति । तादृशज्ञानस्यापि ज्ञानसामान्यान्तर्गतत्वात् । एवं च तादृशज्ञानस्य ज्ञानाभावविषयकत्वं न संभवतीत्यर्थः । तदेवाह - **न हि ज्ञानमित्यादिना** । एतच्च स्वमानकालवर्तिविषयग्राहकत्वं ज्ञानस्येति मतेनोक्तम् । एतावता प्रतियोगिज्ञानेन सह विरोध उक्तः । अथाश्रयज्ञानेनापि विरोधमाह - **एवमिति** । अभावप्रत्यक्षं प्रति प्रतियोगिविषयकं ज्ञानमनुयोगिविषयकं च ज्ञानं कारणम् । 'सद्भ्यामभावो निरूप्यत'' इत्युदयनाचार्योक्तेः । एवं च अहमज्ञ इति ज्ञानाभावप्रत्यक्षं प्रति आश्रयविषयकज्ञानस्यापि कारणत्वात् तस्मिन् सति ज्ञानाभावरूपस्य विषयस्यासंभवात् तद्विषयकं प्रत्यक्षं न भवितुमर्हतीति भावः । तदाह- **न हि यत्किंचिदिति** । **लब्धरूप** इति । ज्ञातस्वरूपे कस्मिंश्चिदाश्रये तादृशं ज्ञातस्वरूपमेव किंचिन्निषिध्यत इत्यर्थः । अनेन निषिध्यमानप्रतियोगिस्वरूपविषयकं ज्ञानं निषेधाश्रयवस्तुविषयकज्ञानं च निषेधबुद्धौ कारणमित्युक्तं भवति । सद्भ्यामभावो निरूप्यत इत्याचार्यग्रन्थस्याप्ययमेवार्थः । सद्भ्याम् आश्रयप्रतियोगिभ्यां ज्ञाताभ्यामभावो ज्ञायत इति तदर्थः ।

ननु अहमज्ञः, शास्त्रार्थं न जानामि, त्वदुक्तमर्थं न जानामि इत्यादिप्रतीतीनां ज्ञानत्व-शास्त्रार्थ विषयकत्वत्वदुक्तार्थविषयकत्वाद्यवच्छिन्नप्रतियोगिताकाभावविषयकत्वं सिद्धमेव । एवम् अभावप्रत्यक्षं प्रतियोगिनि यद्धर्मप्रकारकं भवति, तद्धर्मानच्छिन्नयावत्प्रतियोगिकत्वं अभावांशे विषयीकरोतीति यदुक्तं, तदपि तथैव । परं तु इदम् अभावज्ञानं विशेषाकारेणैव प्रतियोग्यादिकं विषयीकरोति । तज्जनकीभूतं प्रतियोगिज्ञानं तु ज्ञानत्व-

''लब्धरूपे क्वचित् किंचित् तादृगेव निषिध्यते'' इति ।। ननु सामान्यतः आश्रयप्रतियोग्यादिज्ञानमुपजीव्य विशेषतः तत्तद्विषयं ज्ञानं निषिध्यत इति न कश्चिद्विरोध इति ।। तदपि मन्दम्, निषिद्ध्यमानस्य विशेषज्ञानस्य विषयविशेषाधीनविशेषत्वेन तत्प्रकाशमन्तरेण प्रकाशायोगात् । तत्प्रकाशे वा विशेषज्ञानस्यापि सिद्धेस्तन्निषेधायोगेन व्याघातस्य स्थितत्वादिति ।

शास्त्रार्थविषयकत्व-त्वदुक्तार्थ विषयकत्वादिसामान्यप्रकारेणैव प्रतियोगिविषयकम् । तदेव चान्वयव्यतिरेकाभ्यां विशेषाभावहेतु: इति शङ्कते-**ननु सामान्यत** इति । अहमज्ञ इत्यत्र आश्रये सामान्यधर्म: अहंत्वम्, विशेष: देहातिरिक्तत्वादि: । आश्रये सामान्यविशेषज्ञानतदभावयो: प्रतिपादनम् अहमज्ञ इति ज्ञानमपेक्ष्य । इतरत्र शास्त्रार्थं न जानामीत्यादौ आश्रयाप्रतीते: । तत्र प्रतियोगिभूतज्ञाने सामान्यधर्म: ज्ञानत्व-शास्त्रार्थ विषयकत्व-त्वदुक्तार्थ विषयकत्वादि: । विशेषधर्मश्च धर्मत्व-घटत्वादि: । प्रतियोग्यादीति आदिशब्देवावच्छेदकीभूतविषयो गृह्यते । तत्र च सामान्यं वस्तुत्व-शास्त्रार्थत्व त्वदुक्तार्थत्वादि: । विशेषश्च धर्मत्वघटत्वादि: ।

समाधत्ते-**तदपि मन्दमिति** । अभावज्ञानस्य विशेषविषयकत्वे धर्मं न जानामि, घटं न जानामीत्याकारैव धी: स्यात्, न तु शास्त्रार्थं न जानामि, त्वदुक्तमर्थं न जानामीत्याकारेति भाव: । तदेवोपपादयति-**निषिध्यमानस्येत्यादिना** । शास्त्रार्थं न जानामीति ज्ञानस्य यदि धर्मविषयकज्ञानाभावो विषय:, तदा धर्मप्रकाशमन्तरेण तद्विषयकज्ञानप्रकाशायोगात् ज्ञानप्रकाशाभावे च ज्ञानाभावप्रतीत्यसंभवात् पूर्वं धर्मज्ञानं वर्तत इति तेन विरोधात् धर्मज्ञानाभावो न संभवतीति धर्मज्ञानाभावज्ञानं कथं भवेदिति भाव: । **विषयविशेषाधीनविशेषत्वेनेति** । अर्थेनैव विशेषो हि निराकारतया धियामिति भाव: ।

यदुक्तं सामान्येन प्रतियोगिज्ञानमेव विशेषेणाभावज्ञाने कारणमिति । तन्न । प्रमेयत्वेन घटज्ञाने सति घटो नास्तीति प्रतीत्यापत्ते: । न चेष्टापत्ति: । अनुभवविरोधादिति ।

ननु भावरूपमज्ञानमपि प्रतियोगिनिरूपणाधीननिरूपणमेव । तस्यापि ज्ञानविरोधित्वेन

न च भावरूपेऽप्यज्ञाने विरोधप्रसङ्गः; भावरूपत्वादेव स्वरूपेण निरूपयितुं शक्यत्वात्। अस्ति च स्वरूपेणैव प्रतीतिः, मुग्धोऽस्मि, मूढोऽस्मीत्यादिका। तस्मादहमज्ञ इत्यत्रापि तदेव भावरूपमज्ञानं प्रतीयते । न च वाच्यं नित्यसर्वगतसाक्षिसन्निधाने कथं ज्ञाताज्ञातविभाग इति; ज्ञाततया अज्ञाततया वा सर्वस्य (वस्तुनः ?) साक्षिचैतन्यविषयत्वात् । इदमहं जानामीत्यत्र ज्ञानावच्छेदकतया, इदं न जानामीत्यत्र त्वज्ञानावच्छेदकतयेति विशेषः । न च तत्प्रकाशमात्रेणाज्ञाननिवृत्तिप्रसङ्गः; साक्षिप्रकाशस्याज्ञानगोचरभ्रान्तित्वेन तन्निवर्तकत्वायोगात्। यथा इंद रजतमिति भ्रान्तेरिंदप्रकाशो न निवर्तकः, तद्वदत्रापि

प्रतीतेर्वक्तव्यत्वात् । अन्यथा तस्य ज्ञानविरोधोऽप्रामाणिकः स्यात् । अज्ञानज्ञाने सत्यपि ज्ञानज्ञानप्रसङ्गश्च । ततश्च प्रतियोग्यादिज्ञानेन व्याघातस्तुल्य एवेत्याशङ्क्याह - **न चेति** । समाधत्ते- **भावरूपत्वादेवेति** । अभावस्य हि प्रतियोगिनिरूपणाधीन प्रत्यक्षविषयत्वनियमः । भावस्य तु क्वचित् विरोधित्वेन ज्ञानस्थले प्रतियोगिज्ञानापेक्षायामपि न प्रत्यक्षसामान्ये तदपेक्षा । विरोधित्वं विना स्वरूपेणापि तत्प्रत्यक्षसंभवादिति भावः । यद्यपि भावस्य स्वरूपेणापि ज्ञानं संभवति । तथाप्यज्ञानस्य ज्ञानविरोधित्वेनैव भासमानत्वात् प्रतियोगिज्ञानापेक्षा स्यादेवेत्यत्राह - **अस्ति चेति** । चकारो भिन्नक्रमः । स्वरूपेणैव प्रतीतिश्चास्तीति योजना । विरुद्धत्वेन प्रतीतिश्चकारेण समुच्चीयते । एवं च मुग्धोऽस्मि, मूढोऽस्मि इत्यादिप्रतीतिः भावरूपमज्ञानं विषयीकरोतीति स्थिते अहमज्ञ इति ज्ञानेऽपि भावरूपमेवाज्ञानं प्रतीयत इत्यास्थेयमित्याह - **तस्मादिति** ।

ननु सर्वस्य नित्यसर्वगतसाक्षिवेद्यत्वात् अज्ञानासंभवात् कथमज्ञानविषयत्वमित्याशङ्क्याह - **न चेति** । साक्षिप्रकाशमात्रस्याज्ञानाविरोधित्वान्न दोष इत्याह - **ज्ञाततयेत्यादिना** । तदेवोपपादयति - **ज्ञाततयेत्यादिना** । लाघवेन प्रकाशमात्रस्यैवाज्ञाननिवर्तकतया साक्षिप्रकाशेनाप्यज्ञानं विरुध्यत एवेत्यत्राह - **न चेति** । साक्षिप्रकाशस्याज्ञाननिवर्तकत्वाभावे हेतुमाह - **साक्षिप्रकाशस्येति** । इदं पक्षपरम् ।

अज्ञानावच्छेदकविषयप्रकाशः । प्रमाणभूतज्ञानोदये ह्यज्ञाननिवृत्तिः । न च ब्रह्मस्वरूपप्रकाशस्य ब्रह्माज्ञानविरोधित्वम्, तस्य साक्षित्वावस्थायां तद्विषयत्वेन तदविरोधित्वात् । स्वरूपमात्रप्रकाशदशायामप्यज्ञानाभावादेव तन्निवर्तनस्यान-

---

अज्ञानविषयविषयकापरोक्षवृत्त्यनभिव्यक्तान्तःकरणावच्छिन्नचैतन्यस्येत्यर्थः । साक्षिमात्रपरत्वेऽपरोक्षवृत्त्यवच्छिन्नचैतन्यस्यापि साक्षिरूपतया तस्यापि पक्षत्वेंऽशतो बाधापत्तेः । **अन्तःकरणगोचरभ्रान्तित्वेनेति** हेतुनिर्देशः । अत्र च हेतुद्वयं विवक्षितम् । अज्ञानगोचरत्वादित्येको हेतुः । भ्रान्तित्वादित्यपरः । तथा च अज्ञानविषयविषयकापरोक्षवृत्त्यनभिव्यक्तान्तःकरणावच्छिन्नचैतन्यम् अज्ञानानिवर्तकम् । अज्ञानगोचरत्वात् भ्रान्तित्वाद्वा इत्यनुमानं फलितम् । भ्रान्तित्वं चात्र प्रमाणज्ञानभिन्नत्वम् । तेन शुक्तिज्ञाने शुक्त्यज्ञाननिवर्तके व्यावहारिकविषयकतया भ्रान्तिरूपे न व्यभिचारः । यद्वा कल्पिताज्ञानविषयकत्वमत्र भ्रान्तित्वम् । भ्रान्तिपदप्रयोगस्तु अज्ञानविषयकं वा भवतु अन्यविषयकं वा भवतु भ्रान्तित्वमेवानिवर्तकत्वे प्रयोजकमिति ज्ञापनाय । यथा भ्रान्तिसमानविषयकत्वेऽपि इदंप्रकाशः भ्रान्तिं न निवर्तयति, तथा अज्ञानसमानविषयोऽपि साक्षिप्रकाशः अज्ञानं न निवर्तयति । भ्रान्त्यज्ञानयोः तत्त्वज्ञानविरोधित्वस्याविशेषेण एकस्य समानप्रकाश-मात्रनिवर्त्यता इतरस्य नेति वैषम्यायोगादिति भावः । अज्ञानसमानविषयकज्ञानस्य अज्ञाननिवर्तकत्वं नास्तीति त्वयोच्यते । भिन्नविषयकस्य निवर्तकत्वेऽतिप्रसङ्गः । ततश्चाज्ञाननिवर्तकमेव दुर्लभमित्यत्राह - **प्रमाणभूतेति** । अन्तःकरणवृत्तिरूपं यत् ज्ञानं तदेवाज्ञाननिवर्तकमित्यर्थः । अज्ञानविषयविषयकापरोक्ष-वृत्त्यवच्छिन्नचैतन्यमेव अज्ञाननिवर्तकमिति यावत् ।

ननु भवतु अज्ञानभासकत्वात् साक्षी अज्ञानानिवर्तकः, शुद्धचैतन्यं तु स्वरूपमात्रप्रकाशत्वात् ब्रह्माज्ञानं निवर्तयेदेवेत्याशङ्क्याह - **न चेति** । किं ब्रह्मप्रकाशस्य अज्ञानसाक्षित्वरूपसंसारावस्थायामज्ञाननिवर्तकत्वम्, उत तदुत्तीर्णवस्थायामिति विकल्प्य आद्यं दूषयति- **तस्य साक्षित्वावस्थायामिति** । अज्ञानसाक्षित्वावस्थायां ब्रह्मप्रकाशस्याज्ञानविषयकत्वेनाज्ञाननिवर्तकत्वासंभवादित्यर्थः । द्वितीयं दूषयति-**स्वरूपेति** ।

पेक्षितत्वात् । न च–ब्रह्मविषयज्ञाने सति तदज्ञानाभावः, तद्विषयज्ञानाभावे तु तदवच्छिन्नाज्ञानप्रकाशानुपपत्तिरिति वाच्यम्, स्वप्रकाशतया स्वविषयज्ञानान्तरमन्तरेणापि तदवच्छेदकत्वोपपत्तेः । तदवच्छेदकप्रकाशस्य तद्विरोधित्वे भवत्पक्षेऽप्यज्ञानग्रहणानुपपत्तिप्रसङ्गात् । एवं बाह्यविषयेऽपि प्रमाणोदयात्प्राक् अज्ञानावच्छेदकतया साक्षिणैव तत्तद्विषयप्रकाशो न विरुद्धः । अतः सिद्धं भावरूपमज्ञानं प्रत्यक्षसिद्धमिति ॥

स्वरूपमात्रप्रकाशदशायां = मुक्तिदशायाम् अज्ञानाभावादेव अज्ञाननिवर्तनस्यानपेक्षितत्वादित्यर्थः ।

नन्वस्तु अन्तःकरणवृत्तिरूपप्रमाणज्ञानस्यैव अज्ञाननिवर्तकत्वम्, माभूत् स्वरूपप्रकाशस्य निवर्तकत्वम् । तथापि तत् प्रमाणज्ञानमिह यद्यस्ति तदा निवर्तेतैवाज्ञानम् न चेत् ब्रह्मावच्छिन्नाज्ञानप्रकाशानुपपत्तिरित्यत्राह- **न च ब्रह्मेति** । **तद्विषयज्ञानाभावे तु** = ब्रह्मविषयकप्रमाणज्ञानाभावे तु । **तदवच्छिन्नेति** । विषयतया ब्रह्मावच्छिन्नं यत् अज्ञानं तत्प्रकाशानुपपत्तिः । ब्रह्मप्रकाशस्य अज्ञानप्रकाशरूपत्वेऽपि ब्रह्मावच्छेदांशप्रकाशरूपत्वं नास्तीत्याशयः । समाधाने तु ब्रह्मविषयकप्रमाणज्ञानं विनापि स्वप्रकाशरूपो ब्रह्मप्रकाश एव अज्ञानावच्छेदस्यापि प्रकाशक इति । **तदवच्छेदकत्वोपपत्तेरिति** । अज्ञानविषयस्वरूपप्रकाशेऽप्यज्ञानव्यावर्तकतया स्वरूपस्य स्फुरणोपपत्तेरित्यर्थः । ब्रह्मणोऽज्ञानावच्छेदकतया प्रतीतेर्नाज्ञानविरोधित्वम् । अन्यथा तवाप्यगतेरित्याह- **तदवच्छेदकेति** । सर्वस्याप्यज्ञाततया साक्षिचैतन्यविषयत्वमितीदं ब्रह्मविषये उपपादितम् । अथ अन्यविषये तदाह- **एवमिति** । **प्रमाणोदयात् प्रागिति** । अन्तःकरणवृत्तिरूपप्रमोत्पत्तेः प्रागित्यर्थः ।

अस्मिन् घट्टे-

"ननु चेदं भावरूपमप्यज्ञानं विषयविशेषव्यावृत्तमेव साक्षिचैतन्यस्य विषयो भवति। स विषयः प्रमाणा(न)धीनसिद्धिरिति कथमिव साक्षिचैतन्येनास्मदर्थव्यावृत्तमज्ञानं विषयीक्रियते । नैष दोषः । सर्वमेव वस्तुजातं ज्ञाततया अज्ञाततया वा साक्षिचैतन्यस्य

...y of Education, Govt. of India
Guruvayoor Campus Library
Puranattukara.P.O., Thrissur-680551
Acc.No. 39370
Acc.Date 27/02/2026

विषयभूतम् । तत्र जडत्वेन ज्ञाततया सिध्यत एव प्रमाणव्यवधानापेक्षा । अजडस्य तु प्रत्यग्वस्तुनः स्वयं सिध्यतः न प्रमाणव्यवधानापेक्षेति सदैव अज्ञानस्य व्यावर्तकत्वेनावभासो युज्यते । तस्मात् न्यायोपवृंहितेन प्रत्यक्षेण भावरूपमेवाज्ञानं प्रतीयते ।''

इति श्रीभाष्यग्रन्थः आचार्याभिप्रेतः । अस्य विवरणमेवम् उत्तमूरस्वामिभिः कृतम्-

ननु अहमज्ञः, अहं न जानामीत्यस्य ज्ञानाभावविषयकत्वे भावरूपाज्ञानविषयकत्वे वा किंविषयकमज्ञानमिति विषयापेक्षायाः सत्त्वात् विषयावच्छिन्तमेवाज्ञानं साक्षिभास्यं वाच्यम् । वस्तुयाथात्म्यमेवाज्ञानविषयः । याथात्म्यं च वृत्तिज्ञानविषय इष्यते । वृत्तेश्च प्रमाणजन्यतया स विषयः प्रमाणाधीनसिद्धिकः । यावच्च प्रमाणं तत्र न प्रवर्तते, तावत् तद्विषयवृत्त्यभावात् तस्य विषयस्य अभाने तदवच्छिनमज्ञानं न साक्षिभास्यम्; विशेषणज्ञानाभावात् । अतःकथम् अहं मां न जानामीति प्रत्यक्षमिति शङ्कते- **ननु चेदमिति** । **विषयविशेषव्यावृत्तम्** = वस्तुयाथात्म्यरूपविषयावच्छिन्नम् । **प्रमाणाधीनसिद्धिः**= प्रमाणजन्यवृत्तिविषयः । **अस्मदर्थव्यावृत्तम्**=आत्मयाथात्म्यावच्छिन्नतया वस्तुयाथात्म्यविषयकवृत्त्यभावेऽपि स्वयं प्रकाशं वस्तु स्वरूपत एवाज्ञानविशेषणं भविष्यतीत्याशयेन परिहरति - **नैष दोष** इति । साक्षिविषयस्य विशेषणं वृत्तिज्ञानाभावेऽपि भासते चेत् घटादिकमपि भासतामिति शङ्कां परिहरन् उपपादयति-**सर्वमिति** । साक्षिभास्यमेव सर्वम् । परं तु तत्र प्रत्यग्वस्तु अज्ञानविशेषणतया (अज्ञाततया) साक्षिभास्यम् । घटादिकं तु अहं घटज्ञानवान् इत्येवं ज्ञाने साक्षिभास्ये **ज्ञाततया** ज्ञानविशेषणतया तद्भास्यम् । तत्र घटादिजडविषये प्रमाणापेक्षायामपि अज्ञानविशेषणतया स्वयंप्रकाशात्मभाने न प्रमाणापेक्षेति ।

इत्थं भाष्ययोजना च घटादेरज्ञानविषयत्वाभावपक्षेण । पञ्चपादिकाकृता प्रत्यग्वस्तुविषयकमेवाज्ञानं स्वीकृतम् । न तु घटादिजडविषयकम् । जडस्यापरमार्थतया तद्विषयाज्ञानस्य दोषत्वायोगात् । जडस्य प्रमाणप्रसरणसमय एव ज्ञेयतया तदभावकाले कारणाभावादेव तज्ज्ञानाभावसमर्थनसंभवात् जडावारकस्याज्ञानस्यानावश्यकत्वाच्च ।

अनुमानं च–विप्रतिपन्नं मानज्ञानं स्वप्रागभावव्यतिरिक्त-स्वविषयावरण-स्वनिवर्त्य-स्वदेशगतवस्त्वन्तरपूर्वकम्, अप्रकाशितार्थप्रकाशकत्वात्, अन्धकारे

आत्मा तु स्वप्रकाश इति तत्र विपरीतभ्रमप्रसक्त्यभावे जगदसिद्ध्या तदाच्छादकमज्ञानमावश्यकमिति। अतो वस्तुजातमित्यस्य विभज्य जडप्रत्यग्वस्तुविषयकतया यथाक्रमं ज्ञाततया अज्ञाततया वेत्यत्र संगमनमिति।

अन्योऽपि पक्षः। "जडेषु वस्तुषु तत्स्वरूपावभासं न प्रतिबध्नाति" इत्येतत्पूर्वोत्तरग्रन्थः पञ्चपादिकायामपि जडस्याज्ञानसंबन्धं दर्शयत्येव। अज्ञानस्यानात्मविषये आच्छादकत्वाभावेऽपि तद्विषयकत्वमिष्यत एव। जडं प्रति अज्ञानस्य आच्छादकत्वाभावेऽपि घटाणवच्छिन्नचैतन्यं प्रति आच्छादकत्वस्वीकारात् घटादेरप्याच्छाद्यकोटिनिविष्टत्वादपि अज्ञानविषयत्वमक्षतम्। एवं विवरणव्याख्यानतत्त्वदीपनमतम्। एतदनुरोधेन **ननुचेत्यादि**-प्रकृतभाष्ययोजना चैवम्-

ननु भावरूपमप्यज्ञानं घटपटादिविषयं वा आत्मयाथात्म्यविषयं वा तत्तद्विषयावच्छिन्नमेव साक्षिभास्यम्। विषयानुपरक्ताज्ञानभानस्यानानुभविकत्वात्। स सर्वोऽपि विषयः प्रमाणाधीनवृत्तिग्राह्यः। आत्मयाथात्म्यस्यापि तथात्वस्योक्तत्वात्। एवं च तत्तद्विषयवृत्तिसत्त्वे तदज्ञानं विरोधान्न भवति। वृत्त्यसत्त्वे च विषयाभानात् तत्तदवच्छिन्नाज्ञानं न साक्षिणा भास्येतेति चेत्-न। घटं जानामि, आत्मानं जानामीत्येवं सर्वं वस्तु ज्ञाततया साक्षिभास्यम्। एवं घटं न जानामि, मां न जानामीत्येवं अज्ञाततयापि। साक्षिभास्यवृत्तिज्ञानविशेषणत्वं तद्भास्याज्ञानविशेषणत्वं च सर्वस्याप्यस्त्येव। तत्र वृत्तिज्ञानविशेषणतया भाने प्रमाणापेक्षा। यथा परमाण्वादेरप्रत्यक्षत्वेऽपि परमाणुज्ञानं मेऽस्तीति मानसप्रत्यक्षविषयज्ञानद्वारा परमाणोरपि प्रत्यक्षत्वं तार्किकेष्टं, तथा साक्ष्यभास्यस्यापि घटादेर्वृत्तिविशेषणतया तद्भास्यत्वमिति तत्र प्रमाणापेक्षा। अज्ञानविशेषणतया कस्यचित् भाने च नैव प्रमाणापेक्षेति।

एतावता पूर्वपक्षिणा भावरूपाज्ञानं प्रत्यक्षेण सिध्यतीत्युपपादितम्। अथानुमानेनापि भावरूपाज्ञानं सिध्यतीत्याह - **अनुमानं चेत्यादिना**। **विप्रतिपन्नमिति**। प्रकृतसाध्यव-

प्रथमोत्पन्नप्रदीपप्रभावदिति। धारावाहिकद्वितीयादि- व्यवच्छेदार्थं विप्रतिपन्नशब्दः। स्वरूपभूतज्ञानव्यावृत्त्यर्थ भ्रान्तिभूतज्ञानव्यावृत्त्यर्थं च मानशब्दः। करण प्रतीतिव्युदासाय ज्ञानशब्दः। स्वप्रागभाव-स्वोत्पादकादृष्ट- स्ववेद्यगतवृत्त्यभिव्यक्ति प्रागभावाः साध्यविशेषणैर्व्यवच्छेद्याः। वस्त्वन्तरशब्दो वैशद्यार्थः। एवं स्वशब्दोऽपि। प्रागभावव्यतिरिक्तेत्येतावता प्रथमचतुर्थविशेषणफलसिद्धौ पृथग्वि-

---

त्त्वविप्रतिपत्तिविषयभूतमित्यर्थः। सर्वं प्रमाणज्ञानं न पक्षः, किंतु तत्र तत्र प्रथमज्ञानमात्रमिति ज्ञापनायेदं विशेषणम्। द्वितीयादिज्ञानग्रहणे तु तत्र साध्याभावात् बाधः, हेत्वभावात् भागासिद्धिश्च स्यात्। तदाह-**धारावाहिकेति**। ब्रह्मस्वरूपभूतज्ञानव्यावृत्त्यर्थं भ्रमात्मकज्ञानव्यावृत्त्यर्थं च ज्ञाने **मानेति** विशेषणम्। प्रमाणेति तदर्थः ब्रह्मस्वरूपभूतज्ञानस्य नित्यत्वेन तत्र साध्याभावात् बाधः। शुक्तिरजतज्ञानादिरूपभ्रमस्याज्ञाननिवर्तकत्वानङ्गीकारात् बाधः। तदुभयवारणाय मानेति विशेषणमिति भावः। **करणेति**। मानेत्येतावन्मात्रोक्तौ करणेल्युडन्तत्वभ्रमः स्यात्। तथा सति प्रमाकरणे साध्याभावात् बाधः। तद्वारणाय ज्ञानशब्दप्रयोगः। तेन प्रमारूपं ज्ञानं लभ्यत इत्यर्थः। अत्र दृष्टान्ते अन्धकारे प्रथमोत्पन्नदीपप्रभायां अप्रकाशितघटादिप्रकाशकत्वात् हेतुसत्त्वम्, स्वप्रागभावातिरिक्तं स्वविषययावरणं स्वनिबर्त्यं **स्वदेशगतं**=स्वसमानाधिकरणं च वस्त्वन्तरं तमः तत्पूर्वकत्वात् साध्यसत्त्वम्। तद्वत् ब्रह्मस्वरूपविषयकवृत्तिज्ञाने स्वप्रागभावव्यतिरिक्तेत्यादिविशेषणा-क्रान्ताज्ञानपूर्वकत्वं अप्रकाशितब्रह्मस्वरूपप्रकाशकत्वेन हेतुना साध्यते। स्वप्रागभावव्यतिरिक्तेत्युक्त्या अज्ञानस्य भावरूपत्वं सिध्यति। साध्यघटकदलानां प्रयोजनमाह- **स्वप्रागभावेत्यादिना**। ज्ञानप्रागभावमादाय सिद्धसाधनवारणाय **स्वप्रागभावव्यतिरिक्तेति**। स्वोत्पादकादृष्टमादाय सिद्धसाधन-वारणाय **स्वविषयावरणेति**। स्वोत्पत्तिप्रतिबन्धकादृष्टमादाय तद्दोषवारणाय **स्वनिवर्त्येति**। स्ववेद्यगतवित्त्यभिव्यक्तिप्रागभावमादाय सिद्धसाधनवारणाय **स्वदेशगतेति**। वित्त्यभिव्यक्तिर्नाम ज्ञातता। तत्प्रागभावःअज्ञातता। अयं भावः - घटप्रमया

शेषणनिर्देशो व्यवच्छेद्यविशेषव्यञ्जनाय । धारावाहिकद्वितीयादिष्वनैकान्त्यपरिहारायाप्रकाशितार्थशब्दः । आलोकमध्यारोपितदीपव्यवच्छेदायान्धकारोक्तिः । तत्रापि द्वितीयादिप्रभाव्यवच्छेदाय प्रथमोत्पन्नशब्दः । इन्द्रनीलादिप्रभाव्यवच्छेदाय प्रदीपशब्दः ।

पुरुषनिष्ठाज्ञानस्येव घटगताया अज्ञातताया अपि निवर्तनात् सिद्धसाधनमिति तद्वारणाय स्वदेशगतेति विशेषणमिति । प्रागभावव्यतिरिक्तत्वेऽपि अज्ञानमभावान्तरं स्यादिति भ्रमवारणाय **वस्तुशब्दः** । प्रतियोगिज्ञाननिरपेक्षत्वादिरूपवैलक्षण्यज्ञापनाय **अन्तरेति** ।

वस्त्वन्तरशब्द इति । अत्र महाचार्याः-

निवर्त्यपूर्वकमित्यस्य निवर्त्यकालीनप्रागभावप्रतियोगित्वार्थकतया तेनैव स्वविषयावरणपदेन च स्वेनार्थान्तरताव्यावृत्तेरिति भावः । **एवं स्वशब्द** इति । आद्य इति शेषः । स्वोत्पादकादृष्टस्य क्वचित् प्रतिबन्धकत्वसंभवात् विषयस्यापि घटादेरर्थान्तरावरणत्वसंभवात् चिकीर्षाद्वारा स्वनिवर्त्यत्वाच्च स्वजनकादृष्टस्वविषयाभ्यामर्थान्तरतावारणाय द्वितीयस्वपदस्य, स्वप्रतिबन्धकादृष्टस्य येन केनचिन्निवर्त्यतया तेनार्थान्तरतावारणाय तृतीयस्वपदस्य चावश्यकत्वात् - इति व्याचक्षते ।

ननु प्रागभावव्यतिरिक्तेत्येवास्तु । तेनैव स्वप्रागभावस्य वेद्यगतवित्त्यभिव्यक्ति-प्रागभावस्य च व्यावृत्तिसंभवात् इत्याशङ्क्य व्यवच्छेद्यविशेषव्यञ्जनाय विशेषणद्वयमित्याह-**प्रागभावेति** । यद्वा स्वशब्दस्य वैशद्यार्थत्वमेवोपपादयति-**प्रागभावेति** । स्वपदे सति हि प्रथमचरमविशेषणयोरप्यावश्यकतया ताभ्यां व्यवच्छेद्यविशेषप्रतीतिर्भवतीति भावः । एतदुक्तं भवति-प्रथमस्वपदे सति स्वप्रागभावातिरिक्तत्वं वेद्यगतवित्त्यभिव्यक्ति-प्रागभावेऽस्तीति तमादायार्थान्तरतावारणाय चरमविशेषणं सार्थकं भवति । चरमस्वपदे सति स्वदेशगतत्वं स्वप्रागभावेऽस्तीति तमादाय सिद्धसाधनवारणाय. प्रथमविशेषणं सार्थकं भवतीति ।

अथ हेतुघटकदलप्रयोजनमाह-**धारावाहिकेति** । धारावाहिकद्वितीयादिज्ञानेषु प्रकाशकत्वरूपहेतुसत्त्वाद्व्यभिचारवारणायाप्रकाशितेति । तत्र प्रथमज्ञानप्रकाशितार्थ

आगमश्च–'अनृतेन हि प्रत्यूढाः, तेषां सत्यानां सतामनृतमपिधानम्', 'नासदासीन्नो सदासीत् तदानीं तम आसीत् तमसा गूढमग्रे प्रकेतम्', 'इन्द्रो मायाभिः पुरुरूप ईयते' इत्यादिरिति ॥

तदेतदतीव स्थवीयः । तथा हि–यदुक्तं भावरूपमज्ञानं प्रत्यक्षेण प्रतीयत इति, तन्न किं ज्ञानविरोधित्वेनैव भाति, उत अविरोधित्वेन ?

नाद्यः; पूर्वोक्तसमस्तप्रसङ्गाविशेषात्; विरोधितयाऽपि हि भासमानं

प्रकाशकत्वमेवास्तीति न व्यभिचारः । **आलोकेति** । हेतौ अन्धकारे इति विशेषणाभावे सूर्यालोकमध्ये आरोपितो यो दीपः तत्प्रभायां स्वविषयावरणतमोनिवर्तकत्वाभावात् साध्याभाववत्यां अप्रकाशितार्थप्रकाशकत्वरूपहेतुसत्त्वात् व्यभिचारः । तद्वारणाय **अन्धकारे** इति । भावरूपाज्ञाने आगमप्रमाणं प्रदर्शयति - आगमश्चेति । **अनृतेनेति** । मिथ्याभूतया अविद्यया तिरोहिताः अपहतपाप्मत्वादयः स्वरूपात्मकधर्माः । तेषामपहतपाप्मत्वादीनां सताम् अनृतं मिथ्याभूतमज्ञानम् **अपिधानम्**=तिरोधायकम् । **नासदासीदिति** । सदसदनिर्वचनीयमासीदित्यर्थः । तमः अज्ञानं तेन प्रकेतं निकेतनरूपं ब्रह्म **गूढं**=तिरोहितम्। **इन्द्रः** परमात्मा मायाभिः अविद्याभिः पुरु बहुतया ईयते प्रकाशते ।

सिद्धान्तः

अतिस्थवीयः=अतिस्थूलतरम् । **तथा हीत्यादि** । अहमज्ञः इत्यादिप्रत्यक्षे भावरूपमज्ञानं किं ज्ञानविरोधित्वेन प्रतीयते, उत अविरोधित्वेनेति विकल्पः । तत्र विरोधित्वादन्यत् अविरोधित्वम् पर्युदासे नञ् । अविरोधित्वेन=विरोधित्वादन्यरूपेण स्वरूपेणेत्यर्थः । अथवा तदभाव एव नञ् । अविरोधित्वं विरोधित्वाभावः । तच्च स्वरूपेणैव भानविशेषणम् ततश्च विरोधित्वं भानविषयो नेति पर्यवसानात् विरोधित्वं भासते न वेति विकल्पार्थः । **नाद्यः, पूर्वोक्तेति** । प्रतियोगितदवच्छेदकविषयकज्ञानाभ्यां प्रमाणान्तरजन्यज्ञानेन अज्ञानज्ञानेन च विरोधो विवक्षितः । अविशेषादित्यनेन लेशतोऽपि वैषम्यशङ्का निरस्यते । **विरोधितयेति** । विरोधस्यापि प्रतियोगिनिरूप्यत्वादिति भावः । इदं

प्रतियोगिप्रकाशमन्तरेण न प्रकाशेतैव । ततश्च तद्विषयप्रकाशे सति तद्विरुद्धस्याज्ञानस्य दूरापक्रमणात् कुतस्तद्ग्रहणम् ? ननु गृह्यमाणमिदमज्ञानं सामान्यतः स्वप्रतियोगिनिरूपणं न विरुणद्धि, अपि तु विशेषत इति चेत्–अभावरूपाज्ञाने तर्हि कः प्रद्वेषः; सामान्यविशेषरूपेण परिहारस्य समत्वात् ? यच्च निषिध्यमानविशेषज्ञानेऽपि प्रतियोगिविषयापेक्षया विरुद्धत्वमुक्तम्–तदपि

चाश्रयज्ञान-अवच्छेदकविषयज्ञानयोरप्युपलक्षणम् । यद्विरोधित्वेन यत् भासते तज्ज्ञानं विना तज्ज्ञानं न भवति । यथा घटत्वविरुद्धं पटत्वमिति ज्ञानं प्रति घटत्वज्ञानं कारणम्, तथा विरोधाश्रयस्य पटत्वस्य ज्ञानमपि कारणम् । घटत्वज्ञानं पटत्वज्ञानं च विना घटत्वविरुद्धत्वेन पटत्वज्ञानानुत्पत्तेः । तथा ज्ञानविरुद्धत्वेनाज्ञानं भासते चेत् विरोधप्रतियोगिनः ज्ञानस्य ज्ञानमावश्यकम् । विषयनिरूप्यत्वात् ज्ञानस्य विषयज्ञानमप्यावश्यकम् । तथा विरोधाश्रयज्ञानं चापेक्षितम् । एतेषु ज्ञानेषु सत्सु एतद्विरुद्धमज्ञानं कथं स्थातुमर्हति । अज्ञानेऽसति तद्विषयकं प्रत्यक्षं च कथं भवेदिति भावः।

ननु सामान्यतः प्रतियोग्यादिज्ञानमेव कारणम् । तेन च न विरोधः । किं तु विशेषज्ञानेनैवेति शङ्कते–**ननु गृह्यमाणमिति** । प्रत्यक्षविषयीभूतं भावरूपमज्ञानं स्वविरोधिनः ज्ञानस्य ज्ञानत्वेन सामान्याकारेण ज्ञानमपेक्षते । तादृशं च नाज्ञानविरोधि । तथा च तादृशसामान्याकारकज्ञाने सति अज्ञानस्य संभवात् तत्प्रत्यक्षं भवितुमर्हतीति शङ्का । एवं चेत् अभावरूपमज्ञानं अहमज्ञ इत्यादिप्रत्यक्षे विषय इति पक्षेऽपि प्रतियोगिनः ज्ञानस्य सामान्याकारेण ज्ञानमपेक्षितम् । विशेषरूपावच्छिन्नज्ञानाभाव एव विषयः । तं सामान्यतो ज्ञानं न विरुणद्धीति सामाधानस्य तुल्यत्वात् भावरूपाज्ञानस्वीकारो मुधेति समाधत्ते-**अभावरूपेति** ।

ननु विशेषज्ञानमस्ति वा न वा । अस्ति चेत् विशेषज्ञानसत्त्वादेव तद्विरुद्धः विशेषज्ञानाभावो न भवितुमर्हति । नास्ति चेत् विषयविशेषावच्छिन्नतया ज्ञानाभावप्रतीतिर्न स्यादित्याशङ्क्य, इदमप्याशङ्कनं भावरूपाज्ञानपक्षेऽपि तुल्यमित्याह - **यच्च निषिध्यमानेति**।

भावरूपेऽपि तुल्यम् । अन्यथा तदविरुद्धत्वप्रसङ्गात् । तत्र सामान्यतः प्रतियोगिविशेषज्ञानमस्तीति चेत्, तदपि तुल्यम् । गौरवं पुनरधिको दोषः । न हि भावरूपाज्ञानस्य ज्ञानविरुद्धत्वं ज्ञानाभावनिरूपणमन्तरेण घटते । यत्तूक्तमज्ञानावच्छेदकतया प्रतियोगिविषयप्रकाशस्याज्ञानविरोधित्वाभावात् ब्रह्मणोऽन्यस्य वा अज्ञानावच्छेदकत्वेन प्रकाशो न विरुद्ध इति; तत् अभावपक्षेऽपि

अभावप्रतियोगिभूतं यत् विशेषज्ञानं तस्मिन् प्रतियोग्यपेक्षया निरूपकविषयविशेषापेक्षया विरुद्धत्वमित्यर्थः । **प्रतियोगी** निरूपकः, विषय इत्यर्थः । **विषयापेक्षया** विषयसापेक्षतया विषयज्ञानाधीनज्ञानतयेत्यर्थः । यथा सामान्यतोऽर्थज्ञाननिषेधे निषेधप्रतियोगिभूतार्थसामान्यावच्छिन्नज्ञानज्ञाने सति तदपेक्षितार्थस्यापि ज्ञानात् तद्विरोधः, एवं विशेषज्ञाननिषेधेऽपि निषेधप्रतियोगिभूतार्थविशेषावच्छिन्नज्ञानज्ञाने सति तदपेक्षितार्थविशेषस्यापि ज्ञानात्तद्विरोध इत्यर्थः । **अन्यथेति** । विशेषस्याभाने विशेषज्ञानविरोधित्वमप्रामाणिकं स्यादिति भावः । वस्तुतस्तु अभावे इव विरोधेऽपि प्रतियोगिनः सामान्याकारेण प्रतीतौ तदवच्छिन्नविरोध एव प्रतीयेत, अविशेषादिति भावः । ननु विरोधतत्परिहारयोः पक्षद्वयेऽपि साम्ये सति भवतां भावरूपाज्ञानविद्वेषे किं कारणमित्यत्राह-**गौरवमिति** । **गौरवम्**=भावरूपाप्रसिद्धवस्तुकल्पनम् । किं च ज्ञानविरोधित्वं हि ज्ञानाभावव्याप्यत्वम् । तच्च ज्ञानाभावग्रहणमन्तरेण न घटते । अभावग्रहे च प्रतियोगिज्ञानादिविरोधस्य त्वयैव दर्शितत्वेन अभावग्रहणाभावे तद्व्याप्यभावरूपाज्ञानग्रहो दूरोत्सारित इत्याह - **न हीति** । अनेन लाघवान्तरं चोक्तं भवति - अभावस्यावश्यं ज्ञातव्यत्वेन इतरस्यापि ज्ञानकल्पनायां गौरवमिति ।

पूर्वं साक्षिप्रकाशस्याज्ञानगोचरत्वात् अज्ञानं तेन न विरुध्यत इति यदुक्तं, तदनूद्य दूषयति - **यत्तु** इति । **प्रतियोगिविषयप्रकाशस्य**=प्रतियोगिभूतज्ञानतद्विषययोः ज्ञानस्य । आश्रयप्रकाशस्याप्युपलक्षणमेतत् । **अज्ञानविरोधित्वाभावादिति** । **अज्ञानविषयत्वादविरोधित्वमिति** भावः । **तदभावपक्षेऽपीति** । तदिति पृथक्पदम् यच्छब्दप्रतिसंबन्धि ।

किं तथा नाङ्गीक्रियते, अभावप्रतियोगिभूतज्ञानावच्छेदकतया तत्तद्विषयप्रकाशो न विरुद्ध इति । तद्विषयज्ञानस्य तद्विषयज्ञानाभावेन विरूद्धत्वादिति चेन्न । भावरूपाज्ञानेनापि तत्तद्विषयत्वहेतुकाविरोधाविशेषात् । अन्यथा तद्गोचरप्रमाणज्ञानोदयेऽपि तदज्ञानानिवृत्तिप्रसङ्गात् ॥ प्रमाणत्वादेव तस्य तन्निवर्तकत्वमिति चेन्न; स्वरूपप्रकाशांशेन प्रमाणत्वस्य साक्षिप्रकाशेऽप्यविशिष्टत्वात्। अन्यथोत्तरस्यापि तदभावप्रसङ्गात्। वस्तुतः प्रामाण्यस्य च उभयत्रापि

तद्विवरणम् अभावेत्यादि । तथेत्यस्य तद्वदित्यर्थः । अभावप्रतियोगिभूतज्ञानावच्छेदकतया तत्तद्विषयप्रकाशस्यापि ज्ञानाभावविषयत्वान्न विरोध इति कुतो नाङ्गीक्रियत इत्यर्थः । **अन्यथेति** । साक्षिचैतन्यस्याज्ञानविरोधित्वाभावे इत्यर्थः। **तद्गोचरप्रमाणेति** । त्वदभिमतवृत्तिज्ञानरूपप्रमाया उदयेऽपीत्यर्थः । साक्षिवत् तद्गोचरप्रमाणज्ञानस्यापि अविरोधित्वात् अज्ञानस्य अनिवृत्तिप्रसङ्गः । विरोधनिबन्धनो हि निवर्त्यनिवर्तकभावः तमःप्रकाशयोरिवेति भावः । शङ्कते-**प्रमाणत्वादेवेति** । **तस्य**=वृत्तिज्ञानस्य, **तन्निवर्तकत्वम्**=अज्ञाननिवर्तकत्वम् । किमत्र प्रमाणात्वं विवक्षितम्? किं तत्त्वावेदकत्वम्? उत तद्वति तत्प्रकारकत्वम्: आद्येऽपि किं स्वरूपप्रकाशांशेन तत्त्वावेदकत्वम्, उत विषयप्रकाशांशेन । नाद्यः । ब्रह्मस्वरूपप्रकाशेन तव्वावेदकत्वस्य साक्षिप्रकाशेऽप्यविशिष्टत्वादित्याह - **स्वरूपप्रकाशांशेनेति** । **अन्यथेति** । स्वरूपांशप्रकाशेन तत्त्वावेदकत्वाभावे **तदभावप्रसङ्गात्**=विरोधित्वाभावप्रसङ्गात् । द्वितीयं दूषयति - **वस्तुत इति** । वस्तुशब्दो विषयपरः । **वस्तुतः प्रामाण्यस्य**= विषयनिबन्धन-प्रामाण्यस्य, विषयप्रकाशांशेन प्रामाण्यस्येति यावत् । ब्रह्मव्यतिरिक्तस्य कृत्स्नस्य मिथ्यात्वादिति भावः । नान्त्यः निष्प्रकारकचरमसाक्षात्कारस्यानिवर्तकत्वापत्तेरिति भावः ।

यद्वा-ननु वृत्तिज्ञानमेव विरोधि । तच्च न प्रमाणत्वेन विरोधि, किं तु रूपान्तरेणैवेत्याशङ्क्य, किं वृत्तेः विरोधित्वं विवक्षितम्, उत तदवच्छिन्नज्ञानस्य । नाद्यः जडत्वेनानिवर्तकत्वात् । द्वितीयेऽपि किं प्रतियोगि-विषयप्रकाशत्वेन निवर्तकता, उत

त्वयाऽनभ्युपगमात् । प्रतियोगिविषयप्रकाशतामात्रेण तद्विरोधित्वे तु अज्ञानसाक्षिप्रकाशस्यापि प्रतियोगिप्रकाशत्वावश्यंभावेन विरोधाविशेषात् । इदंप्रकाशस्तु शुक्तिरजतसाधारणाकारगोचरत्वेन विरोधाभावान्न रजतभ्रमं निवर्तयति । न च अत्रापि तथेति त्वया वक्तुं शक्यम्; निराकारे तदयोगात् । साकारे तु बाह्ये

वृत्त्यवच्छिन्नज्ञानत्वेन । नाद्य इत्याह - **प्रतियोगिविषयेति** । नान्त्यः; अज्ञानावच्छेदकप्रतियोग्यादिप्रकाशरूपसाक्षिणोऽपि वृत्त्यवच्छेदावश्यंभावस्य पूर्वमेवोपपादितत्वात् ।

यच्चानुमानम्-अज्ञानविषयविषयकापरोक्षवृत्त्यनभिव्यक्तमन्तःकरणावच्छिन्नचैतन्यं नाज्ञाननिवर्तकम्, अज्ञानगोचरत्वात् अथ वा अज्ञानसाधकत्वात् यत् यत्साधकं न तन्मात्रं तन्निवर्तकम्, यथा घटादिसाधकं ज्ञानमिति । तदप्यसंगतम् । चैतन्यस्याज्ञानसाधकत्वेऽपि तन्मात्रस्यैवाज्ञाननिवर्तकत्वेन उक्तव्याप्तेरसिद्धेः । न च तत्राविद्यावरणरूपप्रतिबन्धकाभावापेक्षत्वान्न तन्मात्रमविद्यानिवर्तकमिति वाच्यम् । प्रतिबन्धकाभावस्य त्वया हेतुत्वानभ्युपगमात् इति महाचार्याः ।

एवम् अज्ञानसाक्षिप्रकाशस्यापि अज्ञानप्रतियोगिप्रकाशत्वावश्यंभावेन विरोधावश्यम्भावात् अज्ञानगोचरभ्रान्तित्वादित्यत्र भ्रान्तित्वादित्यनेन विवक्षितः प्रमाणान्यत्वरूपः अज्ञानानिवर्तकत्वहेतुश्च निरस्तो वेदितव्यः ।

एतावता ज्ञानेऽज्ञाने च समानविषयभावे सति अज्ञाननिवृत्तिः स्यादेवेति स्थितम् । तर्हि समानविषयकज्ञानस्याज्ञाननिवर्तकत्वे इदंप्रकाशस्यापि भ्रमनिवर्तकत्वं स्यात्, इदमंशस्य प्रमायां भ्रमेच भनादिति शङ्कां परिहरति - **इदंप्रकाशस्त्विति** । इदंत्वस्य शुक्तिरजतोभयसाधारणत्वेन तदाकारेण भानस्य रजतभानविरोधित्वाभावात् इदमंशप्रकाशो न रजतभ्रमविवर्तकः । रजतावृत्तिधर्मप्रकारकज्ञानस्यैव रजतभ्रमनिवर्तकत्वात् । ननु साक्षिप्रकाशस्यापि साधारणाकारगोचरतया नाज्ञानविरोधित्वमिति शङ्कते-**न चात्रापीति** । ब्रह्मणः निराकारत्वात् साक्षिणः साधारणाकारेण ब्रह्मविषयकतया न ब्रह्माज्ञाननिवर्तकत्वमिति भवता न वक्तुं शक्यमित्याशयेन परिहरति - **निराकार** इति ।

समाधानाविशेषात्। ततश्च वरं यथोपलम्भमुभयस्वीकारः। स्वप्रागभावव्यतिरिक्तेति वदता त्वयापि ह्यभावरूपमज्ञानं व्यवच्छेद्यतया स्वीकृतम्।

नापि द्वितीयः, अनुपलम्भात्।। मुग्धोऽस्मीत्यादिरूप उपलम्भ उक्त इति

यदि तु ब्रह्मण: कल्पिताकारवत्त्वमङ्गीक्रियते तर्हि तत् बाह्यं मिथ्या स्यात्। न चेष्टापत्ति:, समाधानाविशेषात् इत्याह- **साकारे तु बाह्ये** इति। ब्रह्मव्यतिरिक्त-शास्त्रार्थादिविषयकाज्ञानसाक्षिण: यदि साधारणाकारगोचरतया न भावरूपाज्ञानविरोधित्वं, तर्ह्यभावपक्षेऽपि प्रतियोगिज्ञानस्य साधारणाकारगोचरत्वादेव न विशेषज्ञानाभावविरोध इति भाव:।

ननु भावरुपाज्ञानपक्षे अभावरूपाज्ञानपक्षे च प्रतियोग्यादिविषयकज्ञानेन सह विरोध इति शङ्काया: तत्परिहारस्य च साम्ये सति कुतो ज्ञानाभाव एव अहमज्ञ इत्यादिप्रतीते: विषय इत्यागृह्यते भवतेत्याशङ्क्याह-**ततश्च वरमिति**। उक्तप्रकारेण भावरूपाज्ञानाङ्गीकारे तद्विषयादिप्रकाशकसाक्ष्यङ्गीकारे च अभावपक्षोक्तदूषणानां तुल्यतया तत्कल्पनापेक्षया अज्ञानस्याभावत्वेनैवोपलम्भात् ज्ञानानां च विनाशितया करणाधीनतयोपलम्भात् विशेषणज्ञानाभावादिलक्षणस्याज्ञानस्य करणाधीनसामान्यज्ञानस्य च अङ्गीकार: श्रेयानिति भाव:। नञ्समभिव्याहृतस्य ज्ञानशब्दस्य भावरूपवस्तुवाचकत्वं कथमपि न संभवतीति बहुप्रयोगप्रदर्शनपूर्वकं चण्डमारुते विस्तरेण प्रतिपादितम्।

एतावता विरोधपरिहारयोस्तुल्यत्वेऽपि अभावत्वेनानुभवबलादभावरूपमेवाज्ञानमित्युक्तम्। इदानीं क्लृप्तत्वाच्चाभाव एवाज्ञानमित्याह - **स्वप्रागभावेति**। ज्ञानप्रागभावरूपं क्लृप्तमज्ञानं व्यावर्तयितुं हि साध्ये त्वया स्वप्रागभावव्यतिरिक्तेति विशेषणं दत्तम्।

सिद्धान्तारम्भे किमिदं भावरूपतया भवदभिमतमज्ञानं ज्ञानविरोधित्वेनैव भाति, उताविरोधित्वेनेति यत् द्वेधा विकल्पितं, तत्र प्रथमविकल्पनिरसनमभूत्। अथ द्वितीयविकल्पं निरस्यति - **न द्वितीय** इति। **अनुपलम्भादिति**। ज्ञानविरोधित्वं विहाय अज्ञानस्वरूपमात्रानुभवाभावादित्यर्थ:। ननु मुग्धोऽस्मि, मूढोऽस्मि इत्यादिरूप: अज्ञानस्वरूपानुभवोऽस्तीत्युक्तमिति शङ्कते-**मुग्धोऽस्मीति**। परिहरति - **तस्यापीति**।

चेन्न; तस्यापि ज्ञानविरोधमन्तर्भाव्यैव प्रतीतेः। इतरथा ज्ञानविरोधित्वे प्रमाणाभावात्। अतः प्रध्वंस-प्रलयविनाशअवसानादिशब्दवत् नञर्थगर्भवाक्यार्थव्युत्पन्ना एव मोहादिशब्दाः। नञनुपलम्भमात्रेण तु स्वरूपतो निरूप्यत्वभ्रमो बालकानाम्।

यच्च सर्वैः प्रमाणैर्ज्ञानाभावप्रतीतिर्न स्यादिति–तदप्यसत्; तथा सति ज्ञानाभावाभावेन मानज्ञानानां नित्यत्वप्रसङ्गात्। स्वप्रागभावेत्यादि च व्यर्थम्। अज्ञानं च न कदाचिदपि स्यात्। अतः सिद्धं भावरूपमज्ञानं न प्रत्यक्षसिद्धमिति।

यदि मुग्धोऽस्मीत्यनुभवे अज्ञानं ज्ञानविरोधित्वेन न भासते तर्हि अस्य अज्ञानानुभवस्य जानामि अथ वा ज्ञोऽस्मि इत्याकारेण ज्ञानानुभवेन विरोधो न स्यादिति भावः। यद्वा भावरूपमज्ञानस्वरूपं यदि मुग्धोऽस्मीत्यनुभवविषयः, न तु तस्मिन्ननुभवे ज्ञानविरोधित्वं भासत इत्युच्यते तर्हि भावरूपस्याज्ञानस्य ज्ञानविरोधित्वे प्रमाणाभावप्रसङ्गात् इत्यर्थः। अनुमानादिप्रमाणं तु व्याप्त्याद्यभावान्न संभवतीति महाचार्यैरुपपादितम्। नञगर्भस्य मुग्धशब्दस्य ज्ञानविरोधित्वेनाज्ञानबोधकत्वं कथमित्याशङ्क्याह-**प्रध्वंसे**त्यादिना। शिष्टं स्पष्टम्।

अनुमानदूषणम्

एतावता प्रत्यक्षं भावरूपाज्ञाने न प्रमाणमित्युपपादितम्। अथ भावरूपाज्ञानसाधकतया पूर्वपक्ष्युक्तमनुमानं दूषयति- **या चेयमित्यादिना**।

भवत्प्रदर्शितानुमाने किं वृत्तिः पक्षः, उत चैतन्यम्, अथवा वृत्त्यवच्छिन्नचैतन्यम्। नाद्यः, वृत्तेर्जडत्वेनाज्ञानानिवर्तकतया बाधात्। नापि चैतन्यम्। तस्य नित्यत्वेन तत्प्रागभावाप्रसिद्ध्या बाधादेव। अत एव न तृतीयः। तथा हि वृत्तेरुपलक्षणत्वे चैतन्यस्य प्रागभावासिद्ध्या तद्घटितसाध्याभावात् बाधः। विशेषणत्वे जडभूतायाः वृत्तेः निवर्तकत्वापत्तिः। साध्ये स्वविषयावरणत्वस्य स्वविषयकज्ञानप्रतिबन्धकत्वरूपतया अज्ञानस्य तदङ्गीकारे ज्ञानानुत्पत्तिप्रसङ्गेनाज्ञाने आवरणत्वासंभवात् बाध इति

या चेयमनुमानजीर्णकन्था—तत्र किमिदमप्रकाशितार्थप्रकाशकत्वादित्यत्र प्रकाशकत्वं नाम ? (१) किं ज्ञानत्वम् ? (२) किं वा ज्ञानकरणत्वम् ? (३) अथवा करणानुग्राहकत्वम् ? (४) यद्वा ज्ञानहेतुत्वमात्रम् ? (५) किं वा प्राकट्यहेतुत्वम् ? (६) यद्वा सामान्यतः साक्षाद्वा परम्परया वा विषयव्यवहारानुगुण्यहेतुत्वमिति ? नाद्यः; दृष्टान्तस्य साधनविकलत्वात् । न द्वितीयः; पक्षे तदभावेन स्वरूपा-सिद्धिप्रसङ्गात् । दीपस्य च करणभूतेन्द्रियानुग्राहकत्वेन साक्षात्करणत्वासिद्धेः । न तृतीयः; पक्षे तदभावात् स्वरूपासिद्धेरेव । नापि चतुर्थः; इन्द्रियादिष्वनैकान्त्यात्; स्वरूपासिद्धेश्च । न पञ्चमः; प्राकट्यमनभ्युपगच्छतां स्वरूपासिद्ध्यादेरेव । अभ्युपगच्छतामपि दीपप्रभायास्तद्धेतुत्वाभावेन साधनविकलत्वात् । नापि षष्ठः; इन्द्रियादिभिरनैकान्त्यात् ।

पक्षसाध्ययोर्दूषणं स्फुटत्वादुपेक्ष्य हेतुं दूषयति- **तत्र किमिदमित्यादिना** । सामान्यत इत्यस्य विवरणं साक्षाद्वा इत्यादि । **नाद्य** इति । प्रकाशकत्वं यदि ज्ञानत्वरूपं तदा दृष्टान्ते प्रदीपप्रभायां ज्ञानत्वविरहात् साधनवैकल्यम् । **न द्वितीयः** इति । प्रकाशकत्वं यदि ज्ञानकरणत्वरूपं तदा पक्षे प्रमाभूतज्ञाने ज्ञानकरणत्वविरहात् स्वरूपासिद्धिप्रसङ्ग इत्यर्थः । **दीपस्य चेति** । अपि च दृष्टान्ते दीपे ज्ञानकरणभूतेन्द्रियानुग्राहकत्वेन ज्ञानकरणत्वविरहात् साधनवैकल्यप्रसङ्ग इत्यर्थः । **न तृतीय** इति । प्रकाशकत्वं ज्ञानकरणानुग्राहकत्वमिति तृतीयकल्पे दृष्टान्ते साधनवैकल्यवारणेऽपि पक्षे तदभावात् स्वरूपासिद्धिरित्यर्थः । **नापि चतुर्थ** इति । ज्ञानहेतुत्वं प्रकाशकत्वमिति चतुर्थकल्पे इन्द्रियादिषु ज्ञानहेतुत्वसत्त्वात् व्यभिचारः इत्यर्थः । **स्वरूपासिद्धेश्चेति** । प्रमाणज्ञानरूपपक्षे ज्ञानहेतुत्वविरहात् स्वरूपासिद्धेः इत्यर्थः । **न पञ्चम** इति । प्राकट्यहेतुत्वं प्रकाशकत्वमिति पञ्चमकल्पो न युक्तः प्राकट्यमनभ्युपगच्छतां मते प्राकट्यहेतुत्वस्य पक्षे दृष्टान्ते चाभावात् स्वरूपासिद्धिः साधनवैकल्यं चेत्यर्थः । **अभ्युपगच्छतामपीति** । प्राकट्यमङ्गीकुर्वतां मतेऽपि ज्ञानस्यैव प्राकट्यहेतुत्वस्वीकारेण दृष्टान्ते दीपे प्राकट्यहेतुत्वविरहात् साधनवैकल्पमित्यर्थः । **नापि**

किंच इदमनुमानमप्रकाशितार्थप्रकाशकं न वा ? आद्ये, स्वगोचरावरणाज्ञाननिवर्तकम्, अनिवर्तकं वा ? निवर्तकत्वे स्वगोचराज्ञानविषयाज्ञानान्तरावश्यंभावात् तत्प्रकाशेऽपि तथेत्येवंक्रमेणानवस्था । यदि पुनस्तदेव ज्ञानं स्वात्मानमपि तिरस्करोतीति मतम्, तदा तेनैवानुमानेनाज्ञाननिवृत्तिप्रसङ्गः । यत्प्रकाशकं यज्ज्ञानं तदेव तदज्ञानस्य निवर्तकमिति च व्याहतमेव । अनिवर्तकत्वे तु

षष्ठ इति । सामान्यतः विषयव्यवहारानुगुण्यहेतुत्वमिति षष्ठे कल्पे इन्द्रियादिषु ज्ञानद्वारा विषयव्यवहारानुगुण्यहेतुत्वसत्त्वात् व्यभिचार इत्यर्थः ।

अस्मिन्ननुमाने दूषणान्तरमाह - **किं चेति** । भवदीयानुमितिरूपं प्रमाणज्ञानं स्वविषयावरणभूताज्ञाननिवर्तकं न वा? आद्ये अनुमितिविषयभूतं यत् अज्ञानं तदावरणभूतमज्ञानान्तरं स्वीकृत्य स्वविषयावरणाज्ञाननिवर्तकत्वमुपपादनीयम् । तथा चाज्ञानविषयकमज्ञानान्तरं स्वीकरणीयम् । तादृशाज्ञानान्तरप्रकाशस्यापि प्रमाणज्ञानतया तद्विषयभूताज्ञानान्तरावरणभूताज्ञानान्तरं स्वीकरणीयमित्यनवस्था । यदि तु प्रकृतानुमितिविषयभूतमज्ञानं स्वविषयमिव स्वमपि आवृणोतीति स्वविषयकमज्ञानान्तरं न कल्प्यत इति नानवस्थेत्युच्यते, तदापि अनुमितिविषयभूतस्याज्ञानस्य स्वनिवर्त्यत्वमपि वक्तव्यमिति अज्ञानस्य प्रकाशिकेयमनुमितिः अज्ञानस्य निवर्तिकेति फलति । इदं च भवदभ्युपगतविरुद्धम् । तथा हि - पूर्वं भवद्भिः साक्षिचैतन्यमज्ञानप्रकाशकत्वात् अज्ञाननिवर्तकं न भवतीत्युक्तम् । तेन यत्प्रकाशकं यत् ज्ञानं तत् तन्निवर्तकं न भवतीति व्याप्तिः सिद्धा । अज्ञानप्रकाशकानुमितेः अज्ञाननिवर्तकत्वस्वीकारे तादृशव्याप्तिविरोधः प्रसजतीत्याशयः । **यत्प्रकाशकमिति** । त्वयैव तत्प्रकाशस्य तन्निवर्तकत्वासंभवात् साक्षिप्रकाशस्य नाज्ञाननिवर्तकत्वमित्युक्तत्वादिति भावः । **अनिवर्तकत्व** इति । यदीयमनुमितिः स्वविषयावरणभूतमज्ञानं न निर्वतयति तदा एतदनुमानवैयर्थ्यम् । अज्ञानावरणमज्ञानं निवर्त्य अज्ञानप्रकाशनार्थं हीदमनुमानम् । अपि चास्या अनुमितेः स्वविषयीभूताज्ञानावरणाज्ञानानिवर्तकत्वे स्वनिवर्त्यत्वघटितसाध्याभाववत्यां

निष्प्रयोजनत्वमनुमानकुसृतिनिर्माणमहाप्रयासस्य । तेनानैकान्तिकत्वप्रसङ्गश्च । तस्यापि पक्षीकारे तस्मिन्नंशे बाधः । द्वितीयेऽपि, प्रकाशितप्रकाशकत्वं वा विवक्षितम्, अप्रकाशकत्वमेव वा ? पूर्वत्र निष्प्रयोजनत्वम्, येनैवादौ प्रकाशितं तेनैव कृतत्वात् । उत्तरत्राप्रमाणत्वमेवानुत्पत्तिलक्षणमिति ।

यच्च–आगमैस्तत्सिद्धिरित्युक्तम्–तदपि न; तत्रानिर्वचनीयत्वाभिमताज्ञानप्रसङ्गाभावात् । सदसद्वैलक्षण्यादेर्व्याधातग्रस्तत्वाच्च । अनृतशब्दस्यात्र ज्ञानसङ्कोचहेतुभूतकर्मविषयत्वात् । तद्धि ज्ञानविरोधित्वेन बहुश्रुतिस्मृतिसिद्धम् ।

स्वस्यामप्रकाशितार्थ-प्रकाशकत्वरूपहेतुसत्त्वात् व्यभिचारः । न चास्या अनुमितेः पक्षान्तर्गतत्वात् न व्यभिचार इति वाच्यम् । तथापि पक्षैकदेशे तत्र साध्याभावात् पक्षतावच्छेदकसामानाधिकरण्येन साध्याभावरूपः आंशिको वाधो दुर्वार इति भावः ।

द्वितीयेऽपीति । इदमनुमानमप्रकाशितार्थप्रकाशकं नेति द्वितीयपक्षे प्रकाशितप्रकाशकं वा अप्रकाशकमेव वेति वक्तव्यम् । आद्ये अस्यानुमानस्य निष्प्रयोजनत्वम् । यैनैव प्रकाशितं तेनैव कृतकरत्वात् । उत्तरत्र इदमनुमानं न कंचिदर्थं ज्ञापयतीत्यायातम् । तथा च ज्ञानानुत्पादकत्वरूपमप्रामाण्यमस्यानुमानस्य स्यादिति भावः ।

अथ आगमैरपि भावरूपमज्ञानं न सिध्यतीत्याह - **यच्चागमैरित्यादिना** । कथमयुक्तता, अज्ञानेनावृतं ज्ञानमित्यादिना तदवगमादित्यत्राह - **तत्रेति** । अनृतेन हि प्रत्यूढा'' इति श्रुत्यर्थमाह - **अनृतशब्दस्येति** । **तद्धीति** । अत्र भाष्यम् - पापस्य च ज्ञानविरोधित्वम् ''एष एवासाधुकर्म कारयति तं यमधो निनीषति'' इत्यादिश्रुत्या अवगम्यत इति । अत्र **श्रुतप्रकाशिका-**

''नन्वियं श्रुतिः निरयनिवीषाविषया किं न स्यात्, उन्नयनप्रत्यनीकत्वादधोनिनयनस्येति । ब्रूमः - अत्र विवक्षितमुन्नयनं ह्युपासननिष्पादनरूपम् । न चोन्नयनमपि नाकादिनयनमिति वाच्यम् । ''यमेभ्यो लोकेभ्य उन्निनीषति'' इति श्रुत्यवगतस्य समस्तलोकेभ्य उन्नयनस्यापवर्गप्रापणरूपत्वात् । तर्हि गर्भजरामरणादि संसारप्रापणमधोनयनं

स्यात्, न तूपासननिरोध इति चेन्न । उन्नयनस्य ज्ञानोत्पादनद्वारकत्वावगमात् । "यं त्वं मनुष्याय हिततमं मन्यसे" इत्युपक्रमवाक्येन "मामुपास्स्व" इति विधित्सितस्योपासनस्याव्यवहितोपायत्वमवगतम् । "नान्यः पन्थाः" इत्यादीनि च श्रुत्यन्तराणि तथा अवगमयन्ति। तच्च कर्मणाम् अपवर्गं प्रत्यव्यवहितोपायत्वे विरुध्येत । अत उपक्रमाद्यविरोधात् साधुकर्मणामपवर्गं प्रत्युपायत्वमुपासनद्वारकमवसीयते । अतः कर्मणामुन्नयनहेतुत्वमुपासननिष्पादनरूपमिति तद्विपरीतमधोनयनमुपासनप्रतिबन्धरूपमिति स्फुटतरमवगम्यते ।

किं च यद्यप्युन्नयनाधोनयने स्वर्गनरकप्रापणरूपे, तथाप्यसाधुकर्मणां ज्ञानविरोधित्वं सिध्यति । तथा हि- उन्निनीषाधोनिनीषयोर्निर्हेतुकत्वे परमात्मनो वैषम्यनैर्घृण्यप्रसङ्गात् नेतव्यचेतनगोचरं यद्वृत्तद्वयं गतिद्वयनिनीषानिमित्तभूतातिप्रभूतपुण्यपापकर्तृविषयं विज्ञायते । तत्र च गतिद्वयपर्याप्तोत्तरोत्तरसाध्वसाधुकर्मकारयितृत्वमीश्वरस्य न भूतावेशादिवत् जीवबुद्ध्यनपेक्षं भवति; तथा सति ज्ञानचिकीर्षाद्यभावात् वायूदकादिनुन्नतृणादेरिव संसारिणां शास्त्रवश्यत्वाभावेन कर्मफलभोगानुपपत्तेः । एवं संसारिणां कर्मफलभोक्तृत्वान्यथानुपपत्तिरूपन्यायानुगृहीतम् "एष एव" इत्यादिकं वाक्यद्वयं ज्ञानप्रदानद्वारककर्तृत्वविषयकमवगम्यते । तथा सति स्मृत्यनुग्रहश्च भवति-

"न देवा यष्टिमादाय रक्षन्ति पशुपालवत् ।
यं हि रक्षितुमिच्छन्ति बुद्ध्या संयोजयन्ति तम् ॥"
यस्मै देवाः प्रयच्छन्ति पुरुषाय पराभवम् ।
बुद्धिं तस्यापकर्षन्ति सोऽपनीतो विनश्यति ॥" इति ह्युच्यते ।

तथा-

"पुण्यं प्रज्ञां वर्धयति क्रियमाणं पुनः पुनः ।
वृद्धप्रज्ञः पुण्यमेव नित्यमारभते नरः ॥
पापं प्रज्ञां नाशयति क्रियमाणं पुनः पुनः ।
नष्टप्रज्ञः पापमेव नित्यमारभते नरः ॥" इति च ।

ऋतशब्दश्चानुकूले कर्मणि प्रयुक्तः, 'ऋतं पिबन्तौ' इत्यादिषु; ततो नञस्तदन्यत्वेन

तत्र ''बुद्धिमपकर्षन्ति'' ''प्रज्ञां नाशयति'' इति च सम्यक्ज्ञानहानिपूर्वकतद्विपरीतज्ञाननिष्पत्तिर्विवक्षिता । अन्यथा कर्मान्तरप्रारम्भानुपपत्तेः । यद्यपीदं वचनजातं सर्वकर्मदेवतासामान्यविषयम्; तथापि भगवज्ज्ञानस्य सम्यग्ज्ञानसामान्याबहिर्भावात् असाधुकर्मणस्तद्विरोधित्वसिद्धिः । तथा विशेषतश्चोच्यते-

''ददामि बुद्धियोगं तं येन मामुपयान्ति ते''
''आसुरीं योनिमापन्ना मूढा जन्मनि जन्मनि ।
मामप्राप्यैव कौन्तेय ततो यान्त्यधमां गतिम् ॥''

इति च । एवं न्यायश्रुत्युपबृंहितया अनया श्रुत्या सामान्येन ज्ञानविरोधित्वमसाधु-कर्मणां सिद्धम् । अस्मादपि निर्वाहात् पूर्वोक्त उपपन्नतरः, प्रकरणानुगुण्यात् - इति ।

ऋतशब्दश्चेति । ननु ''गुहां प्रविष्टौ'' इति सूत्रभाष्यविरोधः । तत्र हि ''ऋतं पिवन्तौ'' इति वाक्यमधिकृत्यानुगृहीतं- ''ऋतपानं हि कर्मफलभोग एव'' इति । तत्र च श्रुतप्रकाशिका- ''कर्मफलेत्यनेन ऋतशब्दार्थ उक्तः'' इति । अतः कथम् ऋतशब्दश्चानुकूले कर्मणि प्रयुक्त इत्युक्तमिति चेत्- उच्यते । ''ऋतं सत्यं तथा धर्म'' इत्यादिवचनात् ऋतशब्दस्य कर्मवाचित्वमेव । ''ऋतं पिबन्तौ'' इत्यत्र तु पिबन्ताविति भोगप्रतीतेः ऋतशब्दस्य कर्मवाचिनः तत्फले लक्षणया प्रवृत्तिरिति भाष्याभिप्रायः । अत एवान्यत्र भाष्यम्- ''ऋतमिति कर्मवाचि'' इति । अत्र च मुख्यार्थप्रतीतिपूर्वकत्वाल्लाक्षणिकार्थप्रतीतेः अनुकूले कर्मणि प्रयुक्त इत्युक्तम् । एतदभिप्रायेणैव - ''ऋतमिति कर्मवाचि, ऋतं पिबन्ताविति दर्शनादिति भाष्यम् । एवमृतशब्दस्य अनुकूले कर्मणि प्रयोगात्, ''यथा वृक्षस्य संपुष्पितस्य दूरात् गन्धो वात्येवं पुण्यस्य कर्मणो दूरात् गन्धो वाति'' इत्युक्त्वा, ''एवमनृतादात्मानं जुगुप्सेत्'' इति पुण्यप्रतियोगिन्यनृतशब्दप्रयोगात् ''वृजिनमनृतं दुश्चरितम्'' इति वाक्ये दुश्चरितमनृतमित्युक्तत्वाच्च अनृतशब्दो दुष्कर्मपर इत्यभिप्रेत्याह - **ततो नञ** इति ।

तद्विरोधित्वेन वाऽनृतशब्दः । अत्र सांसारिकं पुण्यमपि मुमुक्षोः प्रतिकूलतया पापमिति तदप्यनृतशब्देन संगृहीतम् । 'न सुकृतं न दुष्कृतं सर्वे पाप्मानोऽतो निवर्तन्ते' इति श्रुतेः । तमश्शब्दोऽप्येवं मूलप्रकृतिविषय इति, 'तम एकीभवति', 'यस्य तमश्शरीरम्', 'आसीदिदं तमोभूतमप्रज्ञातम्' इत्यादिभिस्सिद्धम् । सदसदभावोक्तिश्च व्यष्टिचेतनाचेतनविलयपरा । न ह्यत्र सदसदन्यत्वमुक्तम् ।

ननु पुण्यमपि हि मोक्षविरोधि, तत् कथमनृतशब्दोक्तपापमात्रप्रत्यूढत्वमिति शङ्कायां तदप्यत्रानृतशब्देनोच्यत इत्याह - **अत्रेति** । **सांसारिकं पुण्यमपीति** । फलाभिसन्धिना कृतं पुण्यमित्यर्थः । अनभिसंहितफलकर्मण एव मुमुक्षुं प्रत्यनुकूलत्वात् तद्विरोधित्वात् पुण्यस्यापि अनृतशब्देनाभिधानं युज्यत इति भावः । **न सुकृतमिति** । "नैनं सेतुमहोरात्रे तरतो न जरामृत्यू न शोको न सुकृतं न दुष्कृतं सर्वे पाप्मानोऽतो निवर्तन्ते" इति श्रुतौ सर्वशब्देन दुष्कृतपर्यन्तान् पूर्वोक्तदोषान् परामृश्य पाप्मशब्देनतदभिधानात् । शोकादिषु पाप्मशब्दस्यामुख्यत्वेऽपि सुकृतदुष्कृतयोः प्रवृत्तिनिमित्तसंभवान्न मुख्यत्वं त्याज्यम् । क्वचिदमुख्यस्य सर्वत्रामुख्यत्वनियमाभावात् । अलौकिकत्वे सति अनिष्टफलासाधारणकारणत्वस्य पाप्मशब्दप्रवृत्तिनिमित्तत्वात् तस्य पुण्येऽपि सत्त्वात् । ततश्चानृतशब्दो न भावरूपाज्ञानवचन इति सिद्धम् ।

"नासदासीन्नो सदासीत् तदानीं, तम आसीत् तमसा गूढमग्रे प्रकेतम्" इति श्रुतिरपि न भावरूपाज्ञाने प्रमाणम् । तत्रत्यतमश्शब्दस्य प्रकृतिवाचित्वादित्याह - **तमश्शब्दोऽपीति** । "तम एकीभवति" "यस्य तमः शरीरम्" "आसीदिदं तमोभूतम्" इत्यादि-वाक्यान्तरेषु तमश्शब्दस्य मूलप्रकृतौ प्रयोगात् नासदासीत् इत्यादिवाक्यस्थतमश्शब्दोऽपि मूलप्रकृतिपर इत्येव युक्तम् । न चान्धकारपरत्वमस्तु इति वाच्यम् । तस्यार्थस्य प्रकृतवाक्येऽनन्वयादिति भावः । प्रकृतेश्च "गौरनाद्यन्तवती सा" इत्यादिना नित्यत्वेन सिद्धत्वान्न त्वदभिमतज्ञाननिवर्त्याज्ञानरूपत्वमित्याशयः । ननु नासदासीन्नो सदासीत् इति सतोऽपि निषेधात् प्रकृतेरपि निषेधः स्यादित्याशङ्क्याह - **सदसदभावोक्तिरिति** । ननु तत्र श्रुतौ

विलयोऽप्यवस्थान्तरमेव; न बाधः । एवं मायाशब्दोऽपि प्रकृतिविषय एव श्रुत्या समर्थितः; 'अस्मान्मायी सृजते विश्वमेतत् तस्मिंश्चान्यो मायया सन्निरुद्धः', मायां तु प्रकृतिं विद्यान्मायिनं तु महेश्वरम्' इति । प्रकृतिशब्दस्य रूढ्या पदार्थविशेषे वृत्तेः उपादानार्थत्वादपि तस्य प्रथमं बुद्ध्युपारोहः । अत्र हि मायाशब्देनाभिहितं

सदसती निषिध्य तमसो विधानेन तमसः सदसदनिर्वचनीयत्वप्रतिपादनपरत्वमित्यत्राह - **न ह्यत्रेति** । अयं भावः - किं सदसच्छब्दौ पारमार्थिक- निरुपाख्यपरौ, उत व्यावहारिकप्रातिभासिकपरौ । नाद्यः, तदानीमिति कालविशेषे निषेधे कालान्तरे तयोः सत्त्वप्रसङ्गात् । तदानीं पारमार्थिकस्य ब्रह्मणः सत्त्वेन पारमार्थिकनिरुपाख्ययोर्निषेधासंभवाच्च । न द्वितीयः, तमसः पारमार्थिकत्वनिरुपाख्यत्वयोरन्यतरस्य प्रसङ्गात् । किं तु सदसच्छब्दाभ्यां व्यष्टिचेतनोचेतने तयोर्निलयः तत्र प्रतिपाद्यते । तमः शब्देन सजीवं समष्ट्यचेतनमुच्यते । विलयोऽपि तयोः नामरूपरहितसूक्ष्मावस्थाविशेषः, न तु बाधः इति भावः ।

"इन्द्रो मायाभिः" इति श्रुत्यर्थमाह - **एवं मायाशब्दोऽपीति** । लोके मायापदस्य मिथ्यापरत्वसंभवेऽपि "इन्द्रो मायाभिः" इत्यत्र मायाशब्दो न मिथ्यापरः । किं तु प्रकृतिपर एव । "अस्मान्मायी" इति श्रुतौ विद्यमानस्य मायाशब्दस्य "मायां तु प्रकृतिं विद्यात्" इति प्रकृतिपरत्वेन व्याख्यातत्वात् सृष्टिकर्तृसंबन्धिवाचकस्य मायाशब्दस्य प्रकृतिपरत्वौचित्याच्चेति भावः । प्रकृतेश्च नित्यत्वात् न त्वदभिमतानिर्वाच्याविद्यारूपत्वमिति ।

ननु प्रकरोतीति प्रकृतिरिति योगशक्त्या प्रकृतिशब्दस्य भावरूपाज्ञानपरत्वं संभवति । तस्मिन्नुपादानत्वरूपयोगार्थस्य सद्भावादित्यत्राह - **प्रकृतिशब्दस्येति** । रूढिर्योगमपहरतीति न्यायात् प्रकृतिशब्दः प्रधानाख्यपदार्थपरः इति भावः । ननु प्रकृतिमुद्दिश्य मायात्वविधानात् विधेयान्वययोग्यतानुरोधेन प्रकृतिशब्दस्य योगार्थ एव ग्राह्य इत्यत्राह - **अत्र हीति** । "अस्मान्यायी" इति पूर्ववाक्ये मायामायिनोः प्रकृतत्वात् तयोरेवोद्देश्यत्वमुचितम्, न तु प्रकृतेः । अतो मायामायिशब्दाभ्यां कावभिहितौ इत्याकाङ्क्षायां प्रकृतिमहेश्वरशब्दाभ्यां

किमित्यपेक्षायां प्रकृतिरित्युच्यते, न पुनः प्रकृतेर्मिथ्यात्वं प्रतिपाद्यते। न हि संभवति मिथ्याभूतस्योपादानत्वम्। मायाशब्दश्च विचित्रसृष्टिकरार्थवाची; असुरराक्षसास्त्रादिषु प्रयोगात् । 'देवमायेव निर्मिता' इत्यादिषु प्रयोगदर्शनाच्च । अत एवैन्द्र-

---

तद्व्याख्यानमेवोचितमिति न प्रकृतेर्मिथ्यात्वसिद्धिरिति भावः । प्रकृतिशब्दस्य योगार्थकत्वेऽपि न मिथ्यात्वसिद्धिरित्याह - **न हीति** । सत एवोपादानत्वदर्शनात् ''गौरनाद्यन्तवती सा'' इत्यादिश्रुतिभिर्नित्यस्यैवोपादानत्वप्रतिपादनाच्चेति भावः ।

एवं मायापदस्य क्वचिन्मिथ्यार्थपरत्वमङ्गीकृत्य अत्र मायाशब्दस्य त्रिगुणात्मकनित्यद्रव्यपरत्वमिति स्थापितम्। इदानीं मायाशब्दस्य मिथ्यावाचित्वमेव कुत्रापि नास्तीत्याह - **मायाशब्दश्चेति । विचित्रार्थसृष्टिकरार्थवाचीति** । आश्चर्यत्वमेव मायाशब्दप्रवृत्तिनिमित्तमिति भावः । ''अनुयायिन एव प्रवृत्तिनिमित्तत्वात् मायाशब्दप्रयोगविषयेषु सर्वेष्वप्यनुगतमाश्चर्यत्वमेव मायाशब्दप्रवृत्तिनिमित्तम्'' इति हि **श्रुतप्रकाशिका** ।

ननु न मिथ्यात्वं मायाशब्दप्रवृत्तिनिमित्तम्, किं तु आश्चर्यत्वमेवेत्यत्र किं विनिगमकमित्यत्राह - **असुरेति** । तथा च भाष्यम्-''न हि सर्वत्र मायाशब्दो मिथ्याविषयः । असुरराक्षसास्त्रादिषु सत्येष्वेव मायाशब्दप्रयोगात् ।

यथोक्तम्-

तेन मायासहस्रं तच्छम्वरस्याशुगामिना ।
बालस्य रक्षता देहमैकेकश्येन सूदितम् ॥'' (वि.पु. १-१९-२०) इति ।

बालस्य प्रह्लादस्य शरीरं रक्षता भगवतश्चक्रायुधेन हिरण्यकशिपुप्रेरितशम्बरासुरप्रहितानि मायामयानि आश्चर्यकराणि सहस्रमस्त्राणि प्रत्येकं छिन्नानीति श्लोकार्थः ।

ननु ऐन्द्रजालिकादिमिथ्यार्थस्रष्टरि मायाविशब्दप्रयोगो दृश्यते । तत्र च मायाशब्दस्य मिथ्यार्थपरत्वमेवेत्याशङ्क्य, अनुगतप्रवृत्तिनिमित्ते संभवति नानाप्रवृत्तिनिमित्तकल्यने गौरवात्, तत्रत्यमायाशब्दस्य मन्त्रौषधादिरूपो यो मायाविगतः विचित्रसृष्टिकरोऽर्थः तत्परत्वात् न मिथ्यार्थविषयकत्वमित्याह - **अत एवेति** । मायाशब्दस्य विचित्रसृष्टिकरार्थ-

जालिकादिष्वपि मायाशब्दो मन्त्रौषधादिविचित्रसृष्टिकरार्थत्वादेव; एकरूपप्रवृत्तिनिमिते संभवति विरुद्धार्थकल्पनायोगात्। तत्र मुख्यामुख्यविभागहेत्वभावाच्च। मायामूलभ्रान्तिविषयेषु क्वचिन्मायाशब्दो लक्षणया; न पुनर्मिथ्यार्थत्वात्।

श्लो. मायामृगोऽपि मारीचसृष्टिरेव हि तात्त्विकी।
न चेत् रामशरेणास्य निधनं नोपपद्यते।।

शुक्तिरजतादिषु मायाशब्दप्रयोगादर्शनाच्च।

वाचकत्वादेवेत्यर्थः। ऐन्द्रजालिकशब्दः करणपरः, न तु पुरुषपरः। मायाशब्दश्च मायाविशब्दान्तर्गतो विवक्षितः। मन्त्रौषधादिरेव विचित्रार्थसृष्टिकरोऽर्थः। तत्र मायाशब्दो न मिथ्यावचनः। किं तु मन्त्रौषधादिपर एव। तत्र च विचित्रार्थसर्गकरत्वं विचित्रार्थप्रतीतिजनकत्वं वा वर्तत इति तत्राश्चार्यत्वरूपप्रवृत्तिनिमित्तसद्भावादेव मायाशब्दप्रयोग इत्युक्तं भवतीति **महाचार्याः**। **मन्त्रेति**। मन्त्रौषधादिरूपो यो विचित्रार्थसृष्टिकरणरूपोऽर्थः तत्परत्वादेवेत्यर्थः। **विरुद्धार्थकल्पनायोगादिति**। विविधार्थकल्पनस्यायुक्तत्वादित्यर्थः।

ननु मायाविशब्दे मायाशब्दः मिथ्यार्थपर एव किं न स्यात्। न च नानार्थकल्पनापत्तिः। असुरराक्षसास्त्रादिषु मायाशब्दस्यामुख्यत्वसंभवादित्यत्राह-**मुख्यामुख्येति**। अन्यथा वैपरीत्यस्यापि सुवचत्वादिति भावः। ननु ऐन्द्रजालिकप्रासादनिगिरणादिष्वपि मिथ्याभूतेषु त्वदुक्तप्रवृत्तिनिमित्तशून्येषु मायाशब्दप्रयोगदर्शनात् मिथ्यात्वं प्रवृत्तिनिमित्तं स्यादित्याशङ्क्याह-**मायामूलेति**। ननु सर्वत्रासुरास्त्रादिष्वपि मायाशब्दप्रयोगो मिथ्यात्वादेवेत्यत्राह-**मायामृग** इति। मारीचसृष्टो मायामृगोऽपि सत्य एव। अन्यथा रामबाणेन तस्य मरणं न स्यादित्यर्थः, इदं चोपलक्षणम्। असुरास्त्रादिभिर्वधादिकं च तन्मिथ्यात्वे न स्यादिति भावः। अन्वयव्यभिचारमाह-**शुक्तिरजतादिष्विति**। शुक्तिरजतादीनां मिथ्यात्वेऽपि तत्र मायाशब्दप्रयोगविरहात् न मायाशब्दो मिथ्यार्थवाचक इति भावः।

ननु भावान्तरमभाव इति भवतां सिद्धान्तः । ततश्च भावरूपमेवाज्ञानं भवद्भिरभ्युपगन्तव्यम् । तत्र तत् किमर्थं निषिध्यत इति ॥ अत्र ब्रूमः—यदर्थं भवता प्रसाध्यते, तदर्थमस्माभिः प्रतिषिध्यते । यदि भवता ज्ञानाभावात्मकमज्ञानं भावरूपमिति प्रसाध्यते, तदा न वयं प्रतिक्षिपामः । अस्ति हि नित्यस्य प्रमाणशब्दाभिलपनीयविषयाभिमुख्यांवस्थाविशेषाद्विलक्षणः तत्प्रागभावादिशब्दाभिलप्योऽवस्थाविशेषः । न ह्येतावदेव भवता साध्यते, अपि तु ज्ञानप्रागभावातिरिक्तः कश्चित् सदसदनिर्वचनीयो जगत्कारणत्वब्रह्मतिरोधायकत्वादिविशिष्टः प्रसाध्यते । स च निष्प्रमाणकत्वादस्माभिः प्रतिक्षिप्यते ॥

॥ इति शतदूषण्यां भावरूपाज्ञानभङ्गवादः एकोनचत्वारिंशः ॥ ३९ ॥

ननु भावान्तरमित्यादि निगदव्याख्यातम् । अस्मिन् संदर्भे श्रुतप्रकाशिकाग्रन्थोऽपि अनुसन्धेय:-

ननु भावान्तरमभावमिच्छता त्वया ज्ञानप्रागभावशब्देन भावरूपाज्ञानमङ्गीकृतं स्यात् । नैवम् । सिद्धान्तद्वयानभिज्ञानकृतं हीदं चोद्यम् । स्वयंप्रकाशस्यैव ज्ञानस्य संकोचरूपमवस्थान्तरं प्रागभावशब्दवाच्यतया अस्मदभिमतम् । स्वप्रकाशज्ञानव्यतिरेकेण भावरूपमज्ञानं पराभिमतम् । अतस्तयो: कथमैक्यम् । तर्हि ज्ञानसंकोचरूपमवस्थान्तरं परित्यज्य अज्ञानशब्दवाच्यत्वेन परोक्तं भावरूपमज्ञानं स्वीक्रियताम्, भावरूपत्वाविशेषादिति चेत्, प्रामाणिकं परित्यज्य अप्रामाणिकं स्वीक्रियतामितीदमनुपपन्नम् । “न विज्ञातुर्विज्ञातेर्बिपरिलोपो विद्यते” “सर्वं हि पश्य: पश्यति” “तया तिरोहितत्वाच्च शक्ति: क्षेत्रज्ञसंज्ञिता । सर्वभूतेषु भूपाल तारतम्येन वर्तते” अप्राणिमत्सु स्वल्पा सा” इत्यारभ्य- “हिरण्यगर्भोऽतितरां पुंस: शक्त्युपलक्षित:” इति श्रुतिस्मृतिसिद्धत्वात् ज्ञाननित्यत्वं तत्संकोचादिकं च प्रामाणिकं कथं त्यज्येत । भावरूपाज्ञानं तु कल्प्यम् । कल्पकं चान्यथासिद्धमिति तदप्रामाणिकं कथं स्वीक्रियते । कल्पनायां हि लाघवन्यायश्च प्रवर्तते, न तु प्रमाणप्रतिपन्नेऽर्थे” इति ।

इति श्रीशतदूषणीव्याख्यायां तात्पर्यप्रकाशिकायां भावरूपाज्ञानभङ्गवाद:एकोनचत्वारिंश: ।

।। अथ जीवाज्ञानभङ्गवादः चत्वारिंशः ।। ४० ।।

श्लो. अखिलचिदचिदन्तर्यामितां प्राप्य तिष्ठन्
स्वयमखिलगुणाढ्यः सूरिभिर्नित्यसेव्यः ।
निजचरणनिषेवावैभवेनापराधान्
व्यपनयति नराणां व्यक्तमेनं(यस्तमेतं?) भजामः ।।

अथ जीवाज्ञानभङ्गवादश्चत्वारिंशः ।।

अखिलचिदचिदन्तर्यामितां प्राप्य तिष्ठन्
स्वयमखिलगुणाढ्यः सूरिभिर्नित्यसेव्यः ।
निजचरणनिषेवावैभवेनापराधान्
व्यपनयति नराणां व्यक्तमेनं भजामः ।।

वादार्थं सूचयन् मङ्गलमारचयति - **अखिलेति** । मृषावादिनो हि तत्त्वमस्यादिसमानाधिकरणश्रुतिबलात् जीवब्रह्मणोरभेदमिच्छन्तः अज्ञानस्य निराश्रयत्वासंभवात् ब्रह्माश्रयत्वे वाच्ये ब्रह्मणो निरवद्यत्वश्रुतिविरोधात् जीवभावापन्नस्यैव तदाश्रयत्वमिति वदन्ति। तदनुपपन्नम्, सामानाधिकरण्यस्यान्तर्यामित्वनिबन्धनत्वादित्यभिप्रायेणाह-**चिदिति**। जीवब्रह्मणोः बिम्ब-प्रतिबिम्बभावे सिद्धे हि तयोः बिभक्ततया निरवद्यत्वसावद्यत्व-व्यवस्थासिद्धिः, स एव न संभवति । अज्ञाने विद्यमानस्य तत्र प्रतिविम्बासंभवात् इत्यभिप्रायेणाह-**अचिदिति** । सर्वज्ञत्वनिरतिशयानन्दाद्यात्मकत्वात् ब्रह्मणः तदभिन्नस्य जीवस्य किंचिज्ज्ञत्वदुःखित्वाद्यावहाज्ञानाश्रयत्वासंभव इत्याह - **स्वयमखिलगुणाढ्य** इति। स्वयमित्यनेन "स्वाभाविकी ज्ञानबलक्रिया च" इत्यादिना प्रतिपादितं गुणानां स्वाभाविकत्वं विवक्षितम् । तेन च न कालभेदेन सार्वज्ञ्यकिंचिज्ज्ञत्वादेर्विरोधपरिहारसंभवः। ब्रह्मणो निरवद्यसूरिसेन्यत्वात् तदभिन्नस्य जीवस्य कथं सावद्यत्वमित्यभिप्रायेणाह-**सूरिभिरिति** । यद्वा सूरिभिरित्यनेनाज्ञान-प्रसक्तिरहिता अपि जीवाः सन्तीति ज्ञापयति । स्वाश्रितगतदोषासहिष्णोः स्वाभिन्नगतदोषसहत्वस्य सुतरामसंभवात् कथं तदभिन्नस्य जीवस्य

ये पुनः प्रसक्तं ब्रह्मणोऽविद्यादिरूपमसाध्यदोषं भिषज्यन्त इवाहुः– न ब्रह्मणि साक्षादज्ञानसंसारादिगन्धः, अविद्यान्तःकरणप्रतिबिम्बितस्य तस्य जीवत्वात्; जीवाश्रयत्वाच्चाज्ञानसंसारादेः । यद्यपि मूलबिम्बस्वरूपेण प्रतिबिम्बेनापि भवितव्यम्, तथापि यथा मणिकृपाणदर्पणादिप्रयुक्ताल्पत्वमलिनत्वतरलत्वादयो धर्माः प्रतिबिम्बैकवर्तिनो वस्तुतस्तदभिन्नेऽपि मुखे न सम्बध्यन्ते, नापि परस्परं संकीर्यन्ते–तथाऽत्रापि ब्रह्मप्रतिबिम्बभूतजीवगता दोषा ब्रह्मणि न सम्बध्यन्ते,

---

अज्ञानरूपदोषवत्त्वमित्याशयेनाह **निजेति** । स्वाश्रितजनापराधव्यपनयनस्य बहुप्रमाणसिद्धत्वाभिप्रायेण **व्यक्तमित्युक्तम्** । **अपराधान्** इत्यनेन केषुचित् विद्यमानमप्यज्ञानं ज्ञानादन्यत् कर्मैव, न तु भावरूपमन्यदिति ज्ञाप्यते ।

पूर्वपक्षः

ये **पुनरित्यादि** । संसारस्य जीवगतत्वात् तन्मूलभूतम् अज्ञानमपि तद्गतमेवेति तदभिन्नस्य ब्रह्मणोऽपि अज्ञानसंसारादिः प्रसज्यते । प्रसज्यमानं चाज्ञानसंसारादिकं निर्दोषत्वश्रुतिविरुद्धमिति दोषस्य परिहारार्थमाहुरित्यर्थः । **असाध्यदोषं**=परिहर्तुमशक्यं दोषं भिषज्यन्त इव परिहरन्त इव । ब्रह्मणि साक्षात् अज्ञानसंसारादिगन्धो नास्ति । अविद्यायां वा अन्तःकरणे वा प्रतिबिम्बितं ब्रह्मैव जीवः । प्रतिबिम्बभूतजीवाश्रितमज्ञानं तत्प्रयुक्तसंसारश्चेत्याहुः इत्यर्थः । बिम्बस्य प्रतिबिम्बाभिन्नत्वात् प्रतिबिम्बधर्मः बिम्बेऽपि स्यादिति शङ्कायामुक्तं **साक्षादिति** । वस्तुतो ब्रह्माभिन्नजीवगतत्वेन परंपरया ब्रह्मसंबन्धित्वेऽपि न साक्षात् ब्रह्मण्यज्ञानादिकमित्यर्थः । संसारः=जन्म। आदिपदेन तत्कार्यपरिग्रहः । अद्वैतिष्वेव मतभेदाभिप्रायेण अविद्यान्तःकरणप्रतिबिम्बितस्येत्युक्तम् ।

मूलबिम्बस्वरूपेणेति (सरूपेणेति) अत्र छायावत् प्रतिबिम्बं बिम्बादन्यदिति मतनिरासोऽभिप्रेतः । तथा च बिम्बप्रतिबिम्बयोरैक्यात् प्रतिबिम्बजीवगताविद्यादिकं ब्रह्मणोऽपि स्यादिति शङ्का । समाधानं तु - मुखप्रतिबिम्बग्राहकेषु मणिकृपाणदर्पणादिषु विद्यमानाः अल्पत्वमलिनत्वतरलत्वादयो धर्माः तद्ग्राह्यप्रतिबिम्बेष्वेन भवन्ति, न तु वस्तुतः

प्रतिजीवं नियताश्च भवन्ति ॥ वस्तुतो ब्रह्माव्यतिरिक्तानां जीवानां कथमशुद्धिरिति चेन्न; मुखाव्यतिरिक्तानां प्रतिबिम्बानां कृपाणाद्युपाधिकश्यामत्वादिवत् औपाधिकाशुद्धिसंभवात्। अत एव जीवेश्वर-बद्धमुक्त-शिष्याचार्यादिव्यवस्थाश्च सिध्यन्ति। नन्वविद्यास्वरूपलाभे तत्र जीवाख्यप्रतिबिम्बप्रकाशः, तत्प्रकाशे तदाश्रयाविद्याक्लृप्तिरित्यन्योन्याश्रयणं प्रकटमिति चेन्न; उभयोर्बीजाङ्कुरन्यायेनानादितया परिहारात् । न च प्रासादनिगरणादिवत् अवस्तुरूपत्वेनानुपपन्नतैकवेषायामविद्यायामितरेतराश्रयत्वादयो वस्तुदोषाः क्षतिमावहन्ति । यद्वा

तदभिन्नेऽपि मुखे संबध्यन्ते नापि परस्परं संकीर्यन्ते तथात्रापि अविद्यायामन्तःकरणे वा ब्रह्मप्रतिबिम्बरूपेषु जीवेषु विद्यमाना दोषाः न ब्रह्मणि संबध्यन्ते; तथा प्रतिजीवं व्यवस्थिताः भवन्ति। एवं च बिम्बप्रतिबिम्बयोरभेदात् जीवगता धर्मा ब्रह्मणि स्युः, तत्तज्जीवगतधर्माणामपि परस्परसांकर्यप्रसङ्ग इति शङ्का परिहृता। अथ ब्रह्मगतशुद्धिः जीवे स्यादिति शङ्कां परिहरति - **वस्तुत** इति। मुखाभिन्नानां प्रतिबिम्बानां कृपाणाद्युपाधिकश्यामत्वादिवत् ब्रह्माभिन्नानां प्रतिबिम्बजीवानां अविद्याद्युपाधिकाशुद्धिः संभवतीति परिहारः।

अत एवेति। बिम्बधर्माणां प्रतिबिम्बगतत्वाभावात् प्रतिबिम्बधर्माणां बिम्बगतत्वाभावात् तत्तत्प्रतिबिम्बधर्माणां परस्परमसांकर्याच्चेत्यर्थः।

ननु अविद्यास्वरूपे सिद्धे तस्मिन्नुपाधौ प्रतिबिम्बप्रकाशः, तत्प्रकाशे च सति तत्समकालीनप्रतिबिम्बलाभात् प्रतिबिम्बस्वरूपजीवाश्रयाविद्यासिद्धिः इत्यन्योन्याश्रय इत्याशङ्क्य, प्रतिबिम्बान्तराश्रिताविद्योपाधिना प्रतिबिम्बान्तरप्रकाशे तदाश्रयाविद्यान्तरं तदविद्यया च प्रतिबिम्बान्तरमिति बीजाङ्कुरन्यायाद्वा, अविद्यायाः मिथ्यात्वेन इतरेतराश्रयत्वरूपानुपपत्तेः भूषणत्वाद्वा, अविद्याजीवतत्संबन्धानां स्वरूपत एवानादित्वाद्वा न दोष इत्याह- **नन्वित्यादिना**। उभयोरित्यादिना प्रथमः परिहारः। न च प्रासादेत्यादिना द्वितीयः परिहारः। यद्वा स्वरूपत इत्यादिना तृतीयः परिहार इति विभागः।

स्वरूपत एवाविद्यानाम्, तत्कल्पितानां च जीवानामनादित्वमस्तु; एकजीववाद इवानेकजीववादेऽपि तदविरोधात् । मुखप्रतिबिम्बश्यामत्वादेरिव जीवाशुद्धेरपि मिथ्यात्वात् ज्ञाननिवर्त्यत्वमप्युपपद्यते । प्रतिबिम्बस्थानीयानामपि जीवानां परमार्थब्रह्माव्यतिरेकात्, 'अनेन जीवेनात्मनाऽनुप्रविश्य' इत्यपि परब्रह्मणो जीवतादात्म्यानुसन्धानमप्युपपद्यते । अत एव, 'क्षेत्रज्ञं चापि मां विद्धि' इत्यादिकमपि निर्व्यूढम् । एवं परमार्थतो ब्रह्माव्यतिरेकेऽपि काल्पनिकभेदाश्रयणेन व्यवस्थेत्युक्तमिति ॥

नन्वेकजीववादिनैव स्वरूपानादित्वस्योक्तत्वात् अनेकजीववादिना तदनुक्तेः कथमेतत्पक्षे तत्परिहार उच्यत इत्याशङ्क्य, तैरनुक्तत्वेऽपि एकजीववाद इव अनेकजीववादे तदङ्गीकारे विरोधाभावात् जीवानादित्वश्रुत्यनुग्रहार्थमेव परिहारः समञ्जस एवेत्याह - **एकजीववाद इवेति** । ननूपाधिप्रयुक्तधर्माणां भेदादीनां घटाकाशादिगतानां सत्यत्वदर्शनात् न जीवगताशुद्धेः औपाधिकत्वेन हेतुना मिथ्यात्वमुपपद्यते । मिथ्यात्वाभावे च ज्ञाननिवर्त्यत्वं न स्यात् । तदभावे च मोक्षस्य तत्त्वज्ञानसाध्यता न स्यात् । जीवगताशुद्धिनिवृत्तेरेव मोक्षत्वात् इत्याशङ्क्य, घटाद्युपाधिप्रयुक्तधर्मस्य मिथ्यात्वाभावेऽपि प्रतिबिम्बोपाधिप्रयुक्तधर्मस्य मिथ्यात्वदर्शनात् इहाप्यशुद्धेः मिथ्यात्वं ज्ञाननिवर्त्यत्वं चोपपद्यत इत्याह - **मुखप्रतिबिम्बेति** ।

नन्वेवं जीवस्य ब्रह्मप्रतिबिम्बरूपत्वे ततो भिन्नत्वेन ब्रह्मणो जीवतादात्म्यानुसन्धानं न स्यादित्याशङ्क्य, समानसत्ताकयोरेव भेदाभेदयोः विरुद्धत्वात् पारमार्थिकाभेदे सत्येव उपाधिवशात् अनिर्वचनीयो भेद उपपद्यत इति जीवतादात्म्यानुसन्धानमुपपद्यत एवेत्याह - **प्रतिबिम्बेति** । तर्हि जीवब्रह्मणोः पारमार्थिकाभेदसत्त्वे जीवब्रह्मधर्माणां व्यवस्था न स्यादित्याशङ्क्य काल्पनिकभेदाश्रयणेन व्यवस्थोपपत्तिरिति पूर्वमेवोक्तं परिहारं स्मारयति- **एवं परमार्थत** इति ।

अत्र ब्रूमः–तत्र तावत् अन्तःकरणप्रतिबिम्बाद्यसंभवस्यान्यत्र प्रतिपादनात् तन्निबन्धनजीवभेदादिक्लृप्तिरपि निर्मूलैव । अथाऽपि वदामः । किं जीवानामकल्पितेन स्वाभाविकेन रूपेणाविद्याश्रयत्वम्, उत तदतिरिक्तेन तस्मिन् कल्पितेन, अथ कल्पिताकारविशिष्टस्वरूपेण ? न प्रथमः, ब्रह्माज्ञानवादप्रसङ्गात् । न द्वितीयः; जडाज्ञानवादावतारात्; जडस्य नित्याज्ञत्वेन तन्निवृत्तेरशक्यत्वप्रसङ्गाच्च । जडस्य

सिद्धान्त :

अथ सिद्धान्तमारभते - **अत्र ब्रूम** इत्यादिना । **अन्यत्र**=वादान्तरे? ग्रन्थान्तरे वा । प्राय: इत: परं विद्यमाना: दूषणप्रकारा: आरम्भणाधिकरणश्रीभाष्यस्था एव । **किं जीवानामिति** । जीवानामकल्पितं यत् स्वाभाविकं स्वरूपम् ब्रह्म तस्य अविद्याश्रयत्वं वा, उत स्वाभाविकरूपातिरिक्ताकारेण अविद्याश्रयत्वं वा, कल्पिताकारविशिष्टरूपेणाविद्याश्रयत्वं वा इति विकल्प: । विशेष्यमात्रस्य भोजनेऽन्वयेऽपि दण्डी भुङ्क्त इति व्यवहारात् स्वरूपेणाश्रयत्वेऽपि जीवस्य अज्ञानाश्रयत्वोक्तिर्न विरुध्यत इत्याशयेन प्रथमकल्प: । विशेषणमात्रान्वयेऽपि स्वर्गी ध्वस्त इत्यादिव्यवहारात् द्वितीयकल्प: । कल्पिताकारविशिष्टस्य अज्ञानाश्रयत्वमिति तृतीयकल्प: । **नाद्य** इति । जीवस्याकल्पितं स्वरूपं ब्रह्मैवेति तस्यैवाज्ञानाश्रयत्वमुक्तं स्यात् न जीवस्येत्यर्थ: । **न द्वितीय:** इति । अत्र भाष्यम् - ''तदतिरिक्तेन तस्मिन् कल्पितेन आकारेणाविद्याश्रयत्वे जडस्याविद्याश्रयत्वमुक्तं स्यात् । न खल्वद्वैतवादिन: तदुभयव्यतिरिक्तमाकारमभ्युपगच्छन्ति'' इति । तत्र श्रुतप्रकाशिका - ''कथं जडस्याविद्याश्रयत्वमुक्तं स्यात्, जीवो ह्यविद्याश्रय इत्यत्राह - **न खल्विति** । ब्रह्म चिद्रूपम्, कल्पितं तु जडम् । तदुभयातिरिक्तानभ्युपगमात् कल्पिताकारेणाविद्याश्रयत्वे जडस्यैवाविद्याश्रयत्वमुक्तं स्यादित्यर्थ'' इति । तदाह - **जडाज्ञानवादावतारादिति** । तत्रेष्टापत्तिमाशङ्क्याह - **जडस्येति** । **नित्याज्ञत्वेनेति** । नित्यत्वं यावदाश्रयानुबन्धित्वम् । जडस्य यावत्स्वरूपमज्ञतया तस्मिन् सत्येव तदज्ञाननिवृत्तिरनुपपन्नेत्यर्थ: । अज्ञानाश्रये एव अज्ञाननिवृत्तिरूपा मुक्तिरवाश्यं वक्तव्या। अन्यथा बन्धमोक्षयो: वैयधिकरण्यप्रसङ्गादिति भाव: ।

स्वाज्ञाननिवृत्तिवाञ्छानुपपत्तेः जडस्याज्ञानप्रसङ्गाभावाच्च अज्ञाननिवृत्तेः पुरुषार्थत्वमपि न स्यात्। न च तृतीयः; तत्र किं स्वकल्पिताकारविशिष्टे वा स्वयमविद्या तिष्ठेत्, अविद्यान्तरकल्पिताकारविशिष्टे वा? पूर्वत्र आत्माश्रयत्वमन्योन्याश्रयणं वा, स्वकल्पिताकारविशिष्टस्वरूपलाभे सति स्वात्मलाभवर्णनात्। उत्तरत्राप्युक्तचोद्यावतारे अविद्यान्तरापेक्षायामन्योन्याश्रयचक्रकअनवस्थान्यतमापत्तेः।

ननु जडस्य यावत्स्वरूपभावि अज्ञानं ज्ञानाभाव एव, न भावरूपमज्ञानम्। ज्ञानाभावस्य आश्रये विद्यमाने एव निवृत्तिरस्तु इत्याशङ्क्य, जडत्वात्, स्वाज्ञाननिवृत्तिवाञ्छानुपपत्तेः अज्ञाननिवृत्तेः अर्थ्यमानत्वाभावात् जडत्वादेव अखण्डानन्दावभासस्याप्रसक्त्या तदनवभासार्थक्रूतस्याज्ञानस्याप्यप्रसक्तत्वेन तत्समानाधिकरणतन्निवृत्तेः तत्रासिद्धत्वाच्च अज्ञाननिवृत्तेः पुरुषार्थत्वासंभवात् मोक्षशास्त्रव्याकोप इत्याह - **जडस्य स्वाज्ञानेत्यादिना**। तृतीयकल्पं विकल्पपूर्वकं दूषयति - **न तृतीय** इत्यादिना। किं स्वकल्पिताकारः स्वयमेव, उत धर्मान्तरम्। नाद्य इत्याह - **पूर्वत्रेति**। द्वितीय आह - **अन्योन्येति**।

ननु अविद्या स्वकल्पिताकारविशिष्टं स्वमाश्रयति चेत् कथमात्माश्रयः, कथं चान्योन्याश्रयः। आश्रयणस्य कल्पिताकारवैशिष्ट्यापेक्षायामपि स्वरूपे तदनपेक्षणादित्यत्राह - **स्वकल्पितेति**। कदाचिदप्यज्ञानस्य निराश्रयत्वानङ्गीकारादिति भावः।

अविद्यान्तरकल्पिताकारविशिष्टे अविद्या तिष्ठतीति द्वितीयपक्षे तस्याविद्यान्तरस्य स्वकल्पिताकारविशिष्टे वृत्त्यङ्गीकारे पूर्ववत् आत्माश्रयान्योन्याश्रयान्यतरापातेन अविद्यान्तरकल्पिताकारविशिष्टाश्रयकत्वे वक्तव्ये, तस्याविद्यान्तरस्य स्वनिर्वाह्याश्रयताकाविद्यापेक्षायामन्योन्याश्रयः, स्वनिर्वाह्यनिर्वाह्याविद्यान्तरापेक्षायां चक्रकम्; तत्परिजिहीर्षया अविद्यान्तरापेक्षायामनवस्थाप्रसङ्ग इत्याह - **उत्तरत्रेति**।

किंच सर्वजीवभेदकल्पिकाऽविद्या किमेका, उत प्रतिजीवं भिन्ना ? पूर्वत्र एकमुक्तौ अविद्याविनाशात् सर्वमुक्तिप्रसङ्गेन कथं बद्धमुक्तव्यवस्था ? अन्यस्यामुक्तत्वे त्वविद्यास्थित्यवश्यम्भावात् कथमेकस्यापि मोक्षः ? उत्तरत्रापि, 'जीवभेदे स्थिते तन्मूलाविद्याभेदक्लृप्तिः, तन्निश्चयाच्च जीवभेदक्लृप्तिः' इति परस्पराश्रयणम् । न च सत्यो जीवभेदस्त्वयेष्यते । न च तदा तत्सिद्ध्यर्थम-

---

एवम् अज्ञानस्य जीवाश्रयत्वे दोषमुक्त्वा प्रसङ्गात् अज्ञाने दूषणान्तरमाह - **किं चेति** । किमेकैवाविद्या सर्वजीवभेदकल्पनहेतुः उत प्रतिजीवं भिन्ना । आद्ये एकस्य जीवस्य मुक्तौ कल्पकाविद्यानाशात् सर्वमुक्तिप्रसङ्गेन अयं वद्धः अयं मुक्त इति व्यवस्था कथं स्यात् । एकस्य मुक्तावन्यस्य अमुक्तवे अविद्यायाः स्थित्यवश्यंभावात् कथमेकस्यापि मुक्तिः स्यात् । न द्वितीयः । प्रतिजीवमविद्या भिन्ना चेत् जीवभेदे स्थिते तन्मूलकाविद्याभेदक्लृप्तिः । अविद्याभेदनिश्चयाच्च जीवभेदकल्पनमित्यन्योन्याश्रयः इति समुदायार्थः । मूले **सर्वमुक्तिप्रसङ्गेने**त्यस्यानन्तरं कथमन्यस्य बन्धः इत्यध्याहार्यम् । एकमुक्तौ अविद्याविनाशात् सर्वमुक्तिप्रसङ्गेन कथमन्यस्य बन्धः । अन्यस्यामुक्तत्वे च प्रत्यक्षसिद्धेऽविद्यास्थित्यवश्यंभावात् कथमेकस्यापि मोक्षः । ततश्च कथं बद्धमुक्तव्यवस्थेति योजनीयम् । एकस्य मुक्तत्वात् सर्वमुक्तिर्वा स्यात्, एकस्य बद्धत्वात् सर्वबन्धो वा स्यात् न तु व्यवस्थेति वाक्यार्थः । यद्वा अध्याहारो न कार्यः । सर्वमुक्तिप्रसङ्गस्य व्यवस्थाविरह एव साध्यः । मास्तु व्यवस्थेत्यत्राह - **अन्यस्येति** । त्वदीयबन्धस्येदानीं प्रत्यक्षसिद्धत्वात् कथमेकस्यापि शुकादेर्मुक्तत्वेन प्रमाणप्रसिद्धिरित्यर्थः। **उत्तरत्रेति** । जीवभेदे निश्चिते तद्भेदोपपादकतया अविद्याभेदक्लृप्तिः । क्लृप्ते चाविद्याभेदे, उपाधिभेदे उपाधेयभेदस्यावश्यकतया जीवभेदक्लृप्तिरिति परस्पराश्रय इत्यर्थः ।

ननु त्वन्मत इव जीवभेदनिश्चयस्य नोपाधिभेदनिश्चयाधीनतेत्याशङ्क्य, अस्मन्मते जीवभेदस्य सत्यतया उपाध्यनपेक्षत्वान्न जीवभेदज्ञानस्योपाधिभेदज्ञानापेक्षा । त्वन्मते चाविद्योपाधिकत्वाज्जीवभेदस्य तज्ज्ञानमुपाधिभेदज्ञानसापेक्षमेव; न हि घटादिभेदज्ञानाभावे तदुपाधिकाकाशभेदज्ञानं दृष्टमित्यभिप्रायेणाह - **नच सत्य इति** । गत्यन्तराभावात्

विद्याकल्पनमपेक्ष्यते ।। प्रत्यक्षादिसिद्धजीवभेदानुसारेण तत्कल्पकाविद्याभेदक्लृप्तौ को विरोध इति चेन्न; प्रत्यक्षादिसिद्धस्य जीवभेदस्य अस्मन्मतेन सत्यतायां तन्मूलभूताविद्याकल्पनवैयर्थ्यात् । ब्रह्माज्ञानवादेन तु जीवभेदस्य मिथ्यात्वेनैव जीवैक्यात् तद्भेदक्लृप्त्यर्थाविद्याभेदक्लृप्त्यनुपपत्तेः । उभयपक्षोल्लङ्घिनः परमार्थस्य वा अपरमार्थस्य वा भवदभिमतस्य जीवभेदस्याप्यसिद्धेः ।

किंच याभिरविद्याभिर्जीवाः कल्प्यन्ते, किं तासां ब्रह्मैवाश्रयः, उत जीवा

जीवभेदस्य सत्यत्वमिष्यत इत्याशङ्क्य तथा सत्यविद्याभेदकल्पनमेवानुपपन्नमित्याह - **न च तदेति** ।

ननु प्रत्यक्षेण श्रुतिस्मृतिभ्यां च जीवभेदस्य सिद्धौ स्वाभाविकस्य भेदस्य श्रुतिस्मृतिभ्यामेव निरासात् तस्य औपाधिकत्वे अवश्यवक्तव्ये सति तत्सिद्धये अविद्याभेदकल्पनमुपपद्यत एव । आकाशादिभेदे तु तथा प्रमाणाभावात् उपाधिभेदप्रतीत्यैव तद्भेदसिद्धिरिति शङ्कते- **प्रत्यक्षादीति** । किं प्रत्यक्षादिसिद्धो जीवभेदः अस्मन्मत इव सत्यतया इष्यते, उत ब्रह्माज्ञानमत इव मिथ्यात्वेनेति विकल्पमभिप्रेत्य क्रमेण परिहरति - **प्रत्यक्षादिसिद्धस्येति** । **मिथ्यात्वेनैवेति** । अभावेनैवेत्यर्थः । न हि ब्रह्माज्ञानवादे व्यावहारिकोऽपि जीवभेदोऽस्ति । प्रत्यक्षादिकं तु अन्तःकरणभेदविषयं न जीवभेदविषयमिति भावः । नन्वस्तु जीवभेदस्य सत्यत्वम् । तथापि न सिद्धान्तिमत इव स्वाभाविकत्वम् । किं तु आकाशादिभेदवत् औपाधिकमेवास्तु । अतः कथमविद्यानपेक्षा । अथ वा जीवभेदो मिथ्यैवास्तु । अथापि न ब्रह्माज्ञान इव मिथ्या, किं तु व्यावहारिक इत्याशङ्क्याह - **उभयपक्षेति** । स्वाभाविकभेदसत्यत्वोल्लङ्घिनः औपाधिकसत्यस्य जीवभेदस्य मानाभावादेवासिद्धेः । अत एव जीवभेदासिद्धिमतोल्लङ्घिनो व्यावहारिकस्य वा जीवभेदस्यासिद्धेरिति भावः ।

उत्तरपक्ष एव दोषान्तरमाह - **किं चेति** । याभिः अविद्याभिः जीवाः कल्प्यन्ते किं तासामविद्यानां ब्रह्मैव आश्रयः, उत जीवा एव । आद्ये ब्रह्माज्ञानप्रसङ्गः । तत्र च

एव ? आद्ये ब्रह्माज्ञानमपरिहार्यम्। द्वितीये भिन्नजीवाश्रयाविद्याभेदसिद्धौ जीवभेदः, तत्सिद्धौ च तदाश्रयाविद्याभेदसिद्धिरिति मिथस्संश्रयः ॥ अथ जीवभेदकल्पनार्थं नाविद्यान्तरापेक्षा, बद्धमुक्तव्यवस्थासिद्ध्यर्थं कल्पिताभिरेवाविद्याभिर्जीवभेदस्यापि सिद्धे(द्धि)रिति चेन्न; प्रागुक्तपरस्पराश्रयानतिलङ्घनात् । बीजाङ्कुरन्यायेन तदुल्लंघनमिति चेत्-किं याभिरविद्याभिर्ये जीवाः कल्प्यन्ते, तासां तज्जीवाश्रयाणामेव बीजाङ्कुरन्यायमिच्छसि, उत पूर्वपूर्वजीवाश्रयाभिरविद्याभिरुत्तरोत्तरजीवक्लृप्तिम्(ः)? न प्रथमः, तत्र बीजाङ्कुरन्यायस्यासंभवात्। न हि यदङ्कुरोत्पादकं यत् बीजं तदेव तस्यारम्भकम् । नापि द्वितीयः; जीवानां भङ्गुरत्वादिप्रसङ्गेन जीवनित्यत्वाजडत्वादिविरोधात्; अकृताभ्यागमकृतविप्रणाशादिप्रसङ्गाच्च ॥ सन्तानैक्यादविरोध इति चेन्न; क्षणभङ्गवादस्य दुर्निरस(न)नत्वप्रसङ्गात्। जीवब्रह्मणोरत्यन्तवैदेशिकत्व

ब्रह्माज्ञानभङ्गवादेऽनुपपत्तिरुक्तैव । द्वितीये अविद्याभेदे सति जीवभेदः तस्मिंश्च सति भिन्नजीवाश्रितत्वम् तस्मिंश्च सति अविद्याभेदः इति चक्रकमिति भावः । **मिथःसंश्रय** इत्यनेन चक्रकमभिप्रेतमिति व्याख्यानतोऽवगम्यते । चक्रकपरिहारं शङ्कते - **अथेति** । परिहरति- **प्रागुक्तेति** । जीवभेदसिद्धौ अविद्याः सिद्ध्यन्ति । तासु सिद्धासु जीवभेदसिद्धिरित्यन्योत्याश्रय इति भावः । बीजाङ्कुरन्यायेन परिहारमाशङ्क्याह - **बीजेति** । **तदुल्लङ्घनम्** = अन्योन्याश्रयपरिहरणम् ॥ **न प्रथम इति** । बीजाङ्कुरेषु उत्पादकबीजस्य उत्पाद्याङ्कुरापेक्षा नास्ति । उत्पादकाङ्कुरमन्यत् उत्पाद्यं चाङ्कुरमन्यत् । अत्र तु जीवभेदकल्पकाविद्यायाः कल्पनीयजीवाश्रयापेक्षास्ति । कल्पकाविद्याश्रयो जीवः, स एव कल्प्यश्चेति वैषम्यमिति भावः । **तदेव तस्यारम्भकमिति** । तद्बीजमेव तदङ्कुरजनकमित्यर्थः। **नापि द्वितीय** इति । उत्पाद्योत्पादकाङ्कुरव्यक्तिभेदवत् कल्पकाविद्याश्रयकल्प्यजीवव्यक्तिभेदार्थं प्रवाहानादित्वाभ्युपगमे जीवानां नश्वरत्वं स्यात् । तथा अकृताभ्यागमः = अकृतस्य कर्मणः फलानुभवः, कृतविप्रणाशः = कृतस्य कर्मणः निष्फलत्वं च स्यादिति भावः । **भङ्गुरत्वादीति** । आदिशब्देनोत्पत्तिर्गृह्यते । **वैदेशिकत्वप्रसङ्गादिति** । भेदप्रसङ्गादित्यर्थः । एकस्य ब्रह्मणोऽनन्तैः जीवैः अभेदानुपपत्तेरिति भावः ।

-प्रसङ्गाच्च । अथ ब्रह्मण एव पूर्वपूर्वजीवभावाश्रयाभिरविद्याभिरुत्तरोत्तरजीवभावप्रकल्पनमिति मन्यसे, तदपि दत्तोत्तरम्, अविद्याप्रवाहकल्पित-जीवभावस्यापि तद्वत् प्रवाहानादित्वे ध्रुवरूपताभङ्गप्रसङ्गात् । न च तदिष्टम्, आमोक्षाज्जीवभावस्य ध्रुवत्वाभ्युपगमात् ।

यत्तु–अवस्तुरूपायामविद्यायां नेतरेतराश्रयत्वादयः वस्तुदोषाः क्षतिमावहन्तीति–तत् ब्रह्माज्ञानवादे दुर्घटत्वपक्षदूषणेनैव निरस्तम् । एवं च सति ब्रह्माज्ञानवादे, मुक्तानामज्ञानसद्भावे को विरोधः ? शुद्धविद्यास्वरूपे तत्र तेजसीव तमसः कथमशुद्धेः संभव इति चेन्न; अवस्तुभूतायामसंभवस्यैव त्वया गुणत्वस्वीकारात् । अन्यथा कथं प्रागुक्तेषु बाधकेषु जीवत्सु जीवाश्रयाविद्याक्लृप्तिः ? तेन जीवाश्रयाविद्यामपि दुर्घटय, सुघटय वा ब्रह्माश्रयाविद्यामेव । यत्तु मिथः-संश्रयादि-परिहाराय स्वरूपत एव जीवानां जीवकल्पकाविद्यानां तत्कल्पितजीवानां चानादित्वमस्त्वित्यन्वारूढम्, तत्र किमेकैकजीवकल्पिकाऽविद्या जीवान्तरदर्शने कारणम्, न वा ? पूर्वत्र जीवान्तरदर्शनस्यापि भ्रमरूपत्वात् तयैवानन्तजीव-

---

एवं जीवाख्यधर्मिणः प्रवाहानादित्वकल्पने दूषणमुक्तम् । जीवत्वधर्मतत्कल्पकाविद्ययोः प्रवाहानादित्वेऽपि उक्तं दूषणमतिदिशति - **अत ब्रह्मणः एवेति** । पूर्वपूर्वजीवाश्रयाविद्यया उत्तरोत्तरजीवभावकल्पनम्, तत्तदाश्रयाविद्यया तदुत्तरोत्तरजीवभावकल्पन-मित्यर्थः । दत्तोत्तरत्वमेवोपपादयति - **अविद्याप्रवाहेति** । अविद्याप्रवाहाङ्गीकारे तत्तदविद्याकल्पितजीवत्वस्यापि तद्वत् अविद्यावत् प्रवाहानादित्वं स्यात् न ध्रुवरूपत्वम् । आमोक्षाच्च जीवस्य जीवभावस्य च भवदिष्टं ध्रुवत्वं न सिध्येदिति भावः । **ब्रह्माज्ञानवादे** इति । एकोनविंशे वादे इत्यर्थः । अभ्युपेत्याप्याह - **एवं च सतीति** । तर्हि मुक्तान् परं ब्रह्म चाश्रयेदविद्या। शुद्धविद्यास्वरूपत्वात् अशुद्धिरूपा अविद्या न तत्र प्रसजतीति चेत् - किमुपपत्त्यनुवर्तिनी अविद्या? एवं तर्हि उक्ताभिः अन्योन्याश्रयादिभिः उपपत्तिभिः जीवानपि नाश्रयेत् इति भाष्यमत्राभिप्रेतम् ।

स्वरूपत एवेति । एवकारेण प्रवाहव्यवच्छेदः । **पूर्वत्रेति** । एकस्य जीवस्य

क्लृप्तिरनिवार्या । तथाच जितमेकजीववादेन, लाघवात्,; दोषाणां चाविशिष्टत्वात्। उत्तरत्र जीवानां परस्परवार्तानभिज्ञत्वप्रसङ्गेन वादिप्रतिवादिशिष्याचार्यादिव्यवस्थाभङ्गः ॥

यत्पुनरुक्तं प्रतिबिम्बश्यामतादेरिव जीवाशुद्धेरपि मिथ्यात्वात् ज्ञाननिवर्त्यत्वमुपपद्यत इति– तदप्यसत्, अशुद्धिनाशे तत्तदशुद्धिहेतुभूताविद्याख्योपाधिविगमे च प्रतिबिम्बस्थानीयो जीवस्तिष्ठति वा, न वा ? तिष्ठति चेत्, आविद्यकभेदस्थितेरनिर्मोक्षः । न चेत्, जीवस्य स्वरूपोच्छित्तिरेव मोक्षः स्यादित्यवैदिकमतावतारः ॥ मुखात्मना प्रतिबिम्बमिव ब्रह्मात्मना जीवस्तिष्ठतीति चेत्; किं प्रतिबिम्बस्यात्मा मुखम् ? तथा सति सत्यमिथ्यैक्यादिप्रसङ्गात्। अत एव दार्ष्टान्तिकमपि निरस्तम्।

किंच यस्य ह्यपुरुषार्थरूपो दोषः स्वनिष्ठतया प्रतिभासते, तस्य तदुच्छेदापेक्षा

इतरजीवदर्शनं हि भ्रमरूपमेव । अतस्तत्रार्थाभावात् सोऽपि स्वाप्नजीवान्तरवत् तदविद्याकल्पित इति वाच्यम् । एवं जीवान्तरस्यापि जीवान्तरदर्शनं भ्रमरूपमिति तद्दृष्टजीवान्तरमपि तदविद्याकल्पितं वक्तव्यम् । ततश्चानेकजीववादे प्रतिस्वप्नन्यायेन बहुजीवकल्पनाप्रसङ्गात् एक एव जीवः स्वाप्नन्यायेन तत्कल्पितं जीवान्तरमित्यङ्गीकारे लाघवमिति एकशरीरैकजीववाद एव वरमिति भावः । अनेकजीववाद एव अज्ञानस्य जीवाश्रयत्वाङ्गीकारात् अनेकजीवनिरासे अज्ञानस्य जीवाश्रयत्वमपि निरस्तं भवतीति महाचार्याः ।

मुखात्मनेति । बिम्बमुखात्मनेत्यर्थः । **सत्यमिथ्यैक्यादिप्रसङ्गादिति** । प्रतिबिम्बस्य तन्मते मिथ्यात्वादित्यर्थः । प्रतिबिम्बनाशे बिम्बनाशः स्यादिति आदिशब्देन विवक्षितम् । किं च अशुद्धिनिरासश्च तत्साधनानुष्ठानादेव, नान्यथा । श्रवणादिविधानवैयर्थ्यापत्तेः । तदनुष्ठानं च तत्फलभूताशुद्धिनिवृत्तीच्छां विना नोपपद्यते । तदिच्छायाश्च त्वन्मतेऽसंभवात् नाशुद्ध्युच्छेदसंभव इत्याह - **किं चेत्यादिना** । **बिम्बादिस्थानीयेनेति** ।

स्यात्। तत्र (१) किं बिम्वस्थानीयेन स्वात्मनैव स्वगताशुद्धिं पश्यति ब्रह्म, (२) उत प्रतिबिम्बस्थानीयेन जीवात्मना, (३) उतान्येन केनचिदात्मना, (४) अथान्य एव कश्चित् पुरुषस्थानीयः पश्यतीति ? न प्रथमः, ब्रह्माज्ञानवादप्रसङ्गात्। न द्वितीयः, स्वाशुद्धिनिवृत्तेः प्रतिविम्ववत् स्वनाशाविनाभावेन तदुच्छेदापेक्षाविरहप्रसङ्गात्; मुख्यविम्वप्रतिविम्वभावविवक्षायां च द्वयोरपि कल्पयोर्मुखादिवत् दोषप्रतिभासाधारत्वायोगाच्च। तद्वदेवाचेतनत्वात्। न तृतीयचतुर्थौ, असंभवादनभ्युपगमाच्च।

किंच जीवकल्पनारूपो भ्रमः किमविद्यायाः, उत जीवस्यैव, अथ ब्रह्मणः? नाद्यः, अचेतनत्वात् तस्याः। न द्वितीयः, भ्रमविषयतयैव स्वसिद्धौ भ्रमोदयात्प्राक्

लोकसिद्धमुखादिबिम्बस्थानीयेनेत्यर्थः। **प्रतिबिम्बस्थानीयेनेति**। लोकसिद्धमुखादिप्रतिबिम्बस्थानीयेनेत्यर्थः। **ब्रह्माज्ञानेति**। ब्रह्मण एव बिम्बस्वरूपत्वादिति भावः। **न द्वितीय** इत्यादि। मुखादिप्रसिद्धप्रतिबिम्बस्थले मुखगतश्यामता प्रतीयमाना प्रतिबिम्बनिवृत्त्यैव निवर्तते इति दृष्टम्। तद्वत् ब्रह्मस्वरूपे प्रतिबिम्बे जीवे प्रतीयमाना अशुद्धिरपि प्रतिबिम्बजीवनिवृत्तिमपेक्षेत। न चैतद्भवतामिष्टमिति भावः। **मुख्येति**। **द्वयोरपि कल्पयोरिति**। बिम्बस्थानीयेन प्रतिबिम्बस्थानीयेनेति कल्पद्वयेऽपि। ब्रह्मणो दोषप्रतिभासाश्रयत्वे जीवस्य दोषप्रतिभासाश्रयत्वे चेत्यर्थः। **तद्वदेवेति**। चाक्षुषस्यैव प्रतिबिम्बोपपादनात् तस्य च जडत्वात् मुख्यबिम्बप्रतिबिम्बभावाङ्गीकारे जीवब्रह्मणोरचेतनत्वप्रसङ्ग इत्यर्थः। **असंभवादिति**। जीवब्रह्मव्यतिरिक्तस्य द्रष्टुरभावात्, भवतानङ्गीकाराच्चेत्यर्थः। **तस्याः**=अविद्यायाः अचेतनत्वात् जीवकल्पनारूपो भ्रमो न संभवतीत्यर्थः। **न द्वितीय** इति। जीवस्य मिथ्यात्वात् भ्रमविषयतयैव स्वात्मलाभात् भ्रमोत्पत्तेः प्राक् जीवस्वरूपस्याभावेन जीवाश्रयकतयाभिमतस्य भ्रमस्य प्राक्कालीनजीवमनाश्रित्योत्पत्त्यसंभवादित्यर्थः। यद्यपि स्वोत्पत्तिकाले जीवाश्रयकत्वं भ्रमस्य संभवत्येव, तथापि भ्रमात् प्राक् जीवासिद्धौ तस्य भ्रमाश्रयत्वमेवानुपपन्नम्। ज्ञातुरेव तदाश्रयत्वात् ज्ञातुश्च ज्ञानकारणविशेषत्वात् कारणस्य च पूर्ववृत्तित्वावश्यंभावादिति भावः।

स्वरूपासंभवेन निराश्रयभ्रमोदयासंभवात्। स्वभ्रमाश्रयतया पूर्वभेवात्मसद्भावे तु आत्माश्रयः। कल्प्यकल्पनायाः स्वकल्पकत्वं च शुक्तिरजतादिषु न क्वचिद्दृष्टमिति विरुद्धोपलम्भबाधः। न तृतीयः, ब्रह्माज्ञानवादप्रसङ्गादेव।

यत्पुनरुक्तम्—जीवात्मनामपि वस्तुतो ब्रह्माव्यतिरेकात्, 'जीवेनात्मना' इति ब्रह्मणो जीवतादाम्यानुसन्धानं युक्तमिति; तदप्यसारम्, जीवानुसन्धानस्य कल्पितत्वे ब्रह्माज्ञानवादावतारात्। अकल्पितत्वे सयूथ्यदूरापक्रमणप्रसङ्गात्। अनुभयात्मकत्वे तु अनुसन्धानासिद्धेरेव ब्रह्मणो बहुभवनसङ्कल्परूपेक्षण - तत्पूर्वक-विचित्रसृष्टि - जीवात्मत्वानुसन्धा- नतत्पूर्वनामरूपव्याकरणादिवत् अनादिसमस्त-व्यापारनिरोधेन समन्वयाविरोधलक्षणोक्तसमस्तार्थविलयप्रसङ्गात्।

स्वभ्रमाश्रयतयेति। स्वस्यैव स्वभ्रामाश्रयत्वात् भ्रमात् प्राक् स्वस्याभावे च भ्रमाश्रयत्वायोगात् प्रागेव स्वसद्भावे अङ्गीक्रियमाणे आत्माश्रयः, भ्रमात् प्राक्कालीनेन जीवेन भ्रमकाले स्वसिद्धेर्वाच्यत्वादिति भावः। **विरुद्धोपलम्भबाध** इति। यत् कल्प्यं तत् स्वकल्पकं न भवति। यथा कल्प्यं शुक्तिरजतं न स्वकल्पकम्। तद्वत् कल्प्यो जीवः कथं स्वकल्पको भवेत्। कल्प्यत्वकल्पकत्वयोरेकत्रासंभवरूपविरोधवत्तयोपलम्भस्य बाधः स्यादिति भावः। कल्प्यस्य स्वाकल्पकतयैवोपलम्भादिति यावत्। न च कल्प्यस्य शुक्तिरजतादेः स्वाकल्पकत्वं जडत्वात्, न तु कल्प्यत्वादिति वाच्यम्। जीवस्यापि कल्प्यत्वादेव जडतया कल्पकत्वायोगात्। ननु जीवभाव एव कल्प्यः, न तु जीवस्वरूपमिति चेत् - न। तत्किं स्वरूपस्यैव कल्पकत्वं ब्रवीषि? तर्हि ब्रह्मण एव भ्रान्तिर्दुर्वारा।

जीवानुसन्धानस्येति। ब्रह्मणो जीवतादात्म्यानुसन्धानस्य कल्पितविषयकत्वे भ्रमत्वावश्यंभावात् अज्ञानस्य च भ्रमसमानाधिकरणत्वात् ब्रह्मणः अज्ञानमिति वादः स्यात्। जीवतादात्म्यानुसन्धानस्य अकल्पितविषयकत्वे परमार्थविषयकत्वेऽपसिद्धान्त इत्यर्थः। जीवस्य ब्रह्मभाव एव सिद्धान्तः, न तु ब्रह्मणो जीवभाव इति भावः प्रतिभाति।

अनुभयात्मकत्वे इति। सत्यमिथ्याविलक्षणविषयकत्वे विषयस्य निरुपाख्यत्वमेव स्यादित्यर्थः। **ब्रह्मण** इति। जीवभावस्य निरुपाख्यत्वे सति बहुभवनस्यापि तथात्वात्

अत एव भास्करोऽस्तमितः, ब्रह्मणो जीवतादात्म्यानुसन्धाने स्वात्मनो दुःखाद्यनुसन्धानस्य दुर्वारत्वात्; तदभावे बहुभवनसङ्कल्पानुपपत्तेरिति ।। यादवप्रकाशमते तु प्रतिसर्गदशायां सन्मात्रपरिशेषस्य ब्रह्मणः चिदचिदीश्वरसृष्ट्यनुरूपसङ्कल्पप्रसङ्गो न संभवतीति विशेषः ।। प्राचीनकल्पान्ते भविष्यत्सृष्टिसङ्कल्प इति चेन्न; तथात्वे प्रमाणाभावात् । प्रतिसर्गमनन्तरसङ्कल्पश्रुतेर्बाधकाभावाच्च ।

अतो यावत् ब्रह्मणः परस्परं च जीवानामत्यन्तभेदः पारमार्थिको नाङ्गीक्रियते, न तावत् जीवेश्वरबद्धमुक्तादिव्यवस्थासिद्धिरिति ।।

तत्संकल्पतत्पूर्वकजगत्सृष्टिजीवात्मत्वानुसन्धानपूर्वकानुप्रवेशानुसन्धानपूर्वकनामरूपव्याकरणादीनामसिद्धौ ब्रह्मणो जगत्कारणत्वप्रतिपादकशारीरकप्रथमाध्यायस्य तदविरोधप्रतिपादकद्वितीयाध्यायस्य चोच्छेद एव स्यादिति भावः ।

एवं मृषावादिमते जीवात्मभावानुसन्धानं नोपपद्यत इत्युक्तम् । तामेवानुपपत्तिं प्रसङ्गात् भास्करमतेऽप्यतिदिशति - **अत एवेति** । वक्ष्यमाणयुक्तेरित्यर्थः । इदं च दूषणं मृषावादिमतेऽप्यनुसन्धेयम् । **तदभावे**=जीवतादात्म्यानुसन्धानाभावे । **प्रतिसर्गदशायाम्**=प्रलदशायाम् । **सन्मात्रपरिशेषस्य**=सन्यात्रं परिशिष्टं यस्मिन् तत् सन्मात्रपरिशेषम् । सत्चिदचिदीश्वरसमुदायात्मकं ब्रह्म अन्यपदार्थः । चिदचिदीश्वराः सद्रूपस्य ब्रह्मणः परिणामाः । प्रलयकाले सद्रूपं ब्रह्मैवावशिष्यते इति यादवमतम् । ‘सदेव सोम्येदमग्र आसीत्’’ इति सन्मात्रात्मकत्वरूपं प्रलयं प्रतिपाद्य “तदैक्षत” इति सत्मात्रस्यैव बहुभवनसंकल्पप्रतिपादनेन अर्थात् संकल्पस्य प्रलयानन्तर्यसिद्धेरित्यर्थः । मूले प्रतिसर्गनन्तरेति पाठः साधुः, व्याख्यानानुसारात् ।

श्लो. जीवाज्ञानविभागादीश्वरचिदचिद्विभागक्लृप्तिरभूत् ।
इति कल्पयतां जीवः कारणम्, ईशस्तु तत्कार्यम् ।।

तेनाद्वैतवादिनां पारम्पर्यवैपरीत्यक्लृप्तिः पाषण्डपदपर्यवसानभूमिरिति परित्यजन्ति सन्तः ।।

।। इति शतदूषण्यां जीवाज्ञानभङ्गवादः चत्वारिंशः ।। ४० ।।

जीवब्रह्मणोरभेदो न केवलं जीवतादात्म्यानुसन्धानानुपपादक एव, किं तु प्रमाणसिद्धव्यवस्थाभञ्जकोऽपीति प्रसङ्गात् अभेदेऽपि दूषणमाह- **अत इति** । **अत:** = दु:खाद्यनुसन्धानस्य दुर्वारत्वादेवेत्यर्थ: । अस्मिन् वादे चण्डमारुतमेव मूलस्य विशदविवरणमासीदिति प्रायस्तदेव लिखितम् ।

इति श्रीशतदूषणीव्याख्यायां तात्पर्यप्रकाशिकायां जीवाज्ञानभङ्गवादश्चत्वारिंश: ।।

* * *

॥ अथ अविद्यास्वरूपानुपपत्तिवादः एकचत्वारिंशः ॥ ४१ ॥

अविद्याख्यावद्यं फलमपि तदीयं भगवतो
विदूरे यस्येति श्रुतिशिरसि जोघुष्यत इदम्।
यदज्ञानात् बन्धो भवति न तु यद्वैभवविदां
स मे देवः श्रीमान् शमयतु सदा चेतसि तमः ॥

यः पुनरयं स्वप्रकाशचिन्मात्रैकरसस्य ब्रह्मणो विश्वभ्रमहेतुरविद्याख्यो दोषः, स किं परमार्थः, उतापरमार्थः ?

अथ अविद्यास्वरूपानुपपत्तिर्नाम एकचत्वारिंशो वादः ॥

अविद्याख्यावद्यं फलमपि तदीयं भगवतो
विदूरे यस्येति श्रुतिशिरसि जोघुष्यत इदम्।
यदज्ञानात् बन्धो भवति न तु यद्वैभवविदां
स मे देव: श्रीमान् शमयतु सदा चेतसि तम: ॥

अविद्याख्यमवद्यं दोष: तदीयं=अविद्याजन्यं फलमपीत्येतदुभयं यस्य भगवत: विदूरे इति श्रुतिशिरसि "अपहतपाप्मा" "विजर:" "निरवद्यं निरञ्जनम्" इत्यादौ वेदान्ते जोघुष्यते नितरां पौन:पुन्येन च घुष्यते, एवं यस्य भगवत: अज्ञानात् बन्धो भवति, यस्य भगवतो वैभवं जानतां बन्धो न भवति स श्रिय:पतित्वेन द्योतमान: भगवान् मम चेतसि विद्यमानं तम: अज्ञानं शमयतु । जीवाज्ञानप्रसङ्गात् परमते अज्ञानस्वरूपानुपपत्तिरत्र वादे प्रतिपाद्यते ।

स्वप्रकाशज्ञानमात्रस्वरूपस्य ब्रह्मण: विश्वभ्रमहेतु: अविद्याख्यो दोष: इति यदुच्यते अद्वैतिभि:, तत्र अविद्यास्वरूपं किं परमार्थ: उत अपरमार्थ इति विकल्प: । अत्र **स्वप्रकाशपदेन** स्वनिषयकाविद्याश्रयत्वे व्यघात: प्रदर्श्यते । स्वप्रकाशत्वेऽपि अखण्डानन्दादेरप्रकाशात् तदवच्छिन्नविषयकाज्ञानमुपपद्यत एवेत्याशङ्कायामुक्तं **चिन्मात्रेति**। चैतन्यमात्रस्वरूपे आनन्दत्वादयो धर्मा न सन्तीति तद्विशिष्टविषयकमज्ञानं - न घटत इत्यर्थ: । आनन्दत्वादयो धर्मा: सन्त्येवेत्यत्राह- **एकरसस्येति** । भवन्मते

आद्येऽपि ब्रह्मणो भिन्नः अभिन्नो वा ? भिन्नत्वे परमार्थद्वित्वप्रसङ्गः । अभिन्नत्वे च ब्रह्मण एव विश्वभ्रमहेतुदोषत्वमुक्तं स्यात्। तथाच ब्रह्मणो नित्यत्वेन नित्यभ्रमप्रसङ्गः ॥ सहकारिसद्भावात् कदाचिद्भ्रमः तद्वैकल्यात्तु पश्चान्निवृत्तिरिति चेत्–तर्हि प्राप्ताप्राप्तविवेकेन सहकारि दोष इत्युक्तं भवति। तत्रापि हि परमार्थापरमार्थ (र्थादि ?) विकल्पानुपपत्तिर्दुर्वारा। कश्चासौ सहकारित्वेन विवक्षितः ? तत्त्वम-

---

आनन्दत्वादिधर्माणां मिथ्यात्वात् न तद्विषयकत्वमज्ञानस्य युक्तम्, तज्ज्ञानस्याविद्यानिवर्तकत्वप्रसङ्गेन अतत्त्वज्ञानात् मोक्षापत्तेः । भवन्मते सविशेषब्रह्मज्ञानस्य अतत्त्वज्ञानत्वादिति भावः । ब्रह्मणो नित्यमुक्तत्वात् निर्दोषत्वाच्च संसारहेत्वज्ञानाश्रयत्वं व्याहतमित्याशयेनाह - **विश्वभ्रमहेतुरिति** । पूर्वोक्तविकल्पे प्रथमविकल्पं विकल्प्य दूषयति-**आद्येऽपीत्यादिना** । ब्रह्मणोऽविद्याख्यो दोषः परमार्थ इति प्रथमकल्पे स दोषः ब्रह्मणो भिन्नो वा अभिन्नो वेति द्वेधा विकल्पः । तत्र प्रथमकल्पे ब्रह्म तद्भिन्नो दोष इति परमार्थवस्तुद्वयप्रसङ्गः । द्वितीयकल्पे ब्रह्माभिन्नत्वात् अविद्याख्यदोषस्य ब्रह्मैव दोष इति फलति । तथा च विश्वभ्रमहेतुदोषरूपस्य ब्रह्मणः नित्यत्वात् सर्वदा विश्वभ्रमः प्रसजतीति तन्निवृत्तिरेव न स्यात् इति भावः । ननु सहकारिकारणवशात् आतत्त्वज्ञानात् भ्रमः, तत्त्वज्ञाने उत्पन्ने सति सहकारिणो निवृत्तत्वात् न पुनः भ्रमोत्पत्तिरिति शङ्कते-**सहकारीति** । **तद्वैकल्यात्**= सहकारिकारणाभावात् । **तन्निवृत्तिः**=भ्रमनिवृत्तिः । समाधत्ते - **तर्हीति** । ब्रह्मणि सत्यपि सहकारिकारणाभावे भ्रमानुत्पत्तेः तत्सत्त्वे च भ्रमोत्पत्तेः अन्वयव्यतिरेकाभ्यां सहकारित्वेनाभिमतस्यैव भ्रमकारणत्वं स्यात् इति तस्यैव दोषत्वं युक्तं न ब्रह्मण इति भावः । किं च अप्रमां प्रत्यसाधारणकारणमेव दोषः । ब्रह्मणस्तु प्रमां प्रत्यपि कारणत्वात् दोषत्वं न संभवति । किं च सहकारित्वेनाभिमतं वस्तु परमार्थो वा अपरमार्थो वा। आद्ये परमार्थद्वित्वप्रसङ्गः । द्वितीयेऽपि ब्रह्मव्यतिरिक्तस्येत्यनुपदं वक्ष्यमाणो दोष इत्याह-**तत्रापि हीति** । सहकारिण्यपीत्यर्थः । **कश्चासाविति** । अपि च सहकारित्वेन को विवक्षितः। न च तत्त्वमस्यादिवाक्यजन्यं यत् तत्त्वज्ञानं तत्प्रागभावो विवक्षितः । तथा च तत्सहकृतं ब्रह्म

स्यादिवाक्यजन्यतत्त्वज्ञानप्रागभाव इति चेन्न; भावरूपाज्ञानप्रतिपादनप्रयासवैयर्थ्यप्रसङ्गात्। तस्य च प्रागभावस्य न ब्रह्मस्वरूपता युक्ता, तत्त्वज्ञानात् ब्रह्मनिवृत्तिप्रसङ्गात्। ब्रह्मव्यतिरिक्तस्य तु मिथ्यात्वेन तद्दर्शनहेतुदोषत्वं ब्रह्मण एव स्यात्। ब्रह्मणश्च नित्यत्वेन तस्य नित्यप्रकाशप्रसङ्गेन तत्त्वज्ञानानुत्पादप्रसङ्गः।

अपरमार्थभावरूपदोषपक्षेऽप्ययमेव दोषः ॥ अनादित्वान्न दोषान्तरापेक्षेति

विश्वभ्रमहेतुरिति वाच्यम् । भावरूपाज्ञानप्रसाधनप्रयासस्य वैयर्थ्यप्रसङ्गात् । तत्त्वज्ञानप्रागभावेनैव विश्वभ्रमस्य संभवात् इति भावः । किं च किं तत्त्वज्ञानप्रागभावः ब्रह्मस्वरूपमेव उत तदतिरिक्तः । नाद्यः, तत्त्वज्ञानोदयात् तत्त्वज्ञानप्रागभावे निवर्तमाने तत्स्वरूपस्य ब्रह्मणोऽपि निवृत्तिप्रसङ्गात् । न द्वितीयः, ब्रह्मव्यतिरिक्तस्य तत्त्वज्ञानप्रागभावस्य मिथ्यात्वेन तद्दर्शनहेतुत्वं ब्रह्मण एव स्यात् । न चेष्टापत्तिः, ब्रह्मणः नित्यत्वेन तत्स्वरूपस्य तत्त्वज्ञानप्रागभावस्य नित्यं प्रकाशप्रसङ्गेन तत्त्वज्ञानानुत्पत्तिप्रसङ्गात् इत्याह-**तस्य च प्रागभावस्येत्यादिना**।

ननु कथं तत्त्वज्ञानानुत्पादप्रसङ्गः, तत्सामग्रीवशात् तदुत्पादस्यानिवार्यत्वादिति चेत्-न । अध्यासससामग्र्याः नित्यत्वेन तत्त्वज्ञानोत्पत्तियोग्यत्वेनाभिमतकालेऽपि प्रागभावाध्यासस्यावश्यकत्वात् तस्य चाध्यस्यमानो यः प्रागभावः तदबिनाभूतत्वात् तदानीं तत्त्वज्ञानोत्पादे तत्कालीनस्य तदभावत्वायोगप्रसङ्गेन प्रागभावाध्यासस्य नित्यदोषाधीन- त्वमभ्युपगच्छता तत्त्वज्ञानानुत्पत्तेरङ्गीकार्यत्वादिति भावः इति चण्डमारुते ।

एतावता अविद्याख्यो दोषः परमार्थोऽपरमार्थो वेति विकल्पे परमार्थ इति प्रथमकल्पो दूषितः । अथापरमार्थ इति द्वितीयकल्पं दूषयति - **अपरमार्थभावरूपेति** । अविद्यायाः मिथ्यात्वात् तद्दर्शनहेतुदोषान्तराभावात् अविद्याध्यासहेतुभूतदोषत्वं ब्रह्मण एव स्यात् । ततश्चाविद्याध्यासहेतोः ब्रह्मणः नित्यतया तद्धेतुकस्य अविद्याध्यासस्यापि नित्यत्वं स्यात् । ततश्च तद्विरोधित्वेनाभिमतस्य तत्त्वज्ञानस्यानुत्पत्तिरविरोधो वा स्यादिति भावः ।

चेत्–अनादित्वेऽपि तयोः कारणापेक्षा परिहर्तुं शक्यते; न पुनरपरमार्थस्य प्रतिभासे दोषाख्यनिबन्धननैरपेक्ष्यम् । अन्यथा दोषमन्तरेण प्रकाशमानस्य ब्रह्मवत् सत्यत्वप्रसङ्गात् । दोषस्य दोषान्तरापेक्षायामनवस्थाप्रसङ्गात् ॥ स्वपरनिर्वाहकोऽयं दोष इति चेन्न; प्रपञ्चस्यैवं(व) दोषमन्तरेणाध्यासप्रसङ्गात् ॥ मिथ्यार्थस्य दोषमन्तरेण

ननु अविद्यातत्प्रागभावयोरनादित्वात् तदध्यासस्याप्यनादित्वान्न तत्र दोषापेक्षेति शङ्कते - **अनादित्वादिति** । अनादितया दोषापेक्षाया अभावेन दोषनित्यत्वेनाध्यासनित्यतायाः आपादयितुमशक्यत्वात् तत्त्वज्ञानोत्पत्तिसंभव इति शङ्कितुराशयः । समाधत्ते - **अनादित्वेऽपीति** । अविद्यातत्त्वज्ञानप्रगभावयोः अनादित्वेन तयोः कारणापेक्षा यद्यपि नास्ति तथापि तयोः मिथ्यात्वेन तत्प्रतिभासे दोपाख्यकारणमपेक्षितमेव । अन्यथा दोषाजन्यज्ञानस्य तत्त्वविषयकत्वात् तद्विषययोः अविद्यातत्त्वज्ञानप्रागभावयोः ब्रह्मवत् सत्यत्वप्रसङ्ग इति भावः।

ननु अविद्याध्यासे ब्रह्म न दोषः, नाप्यविद्याध्यासस्य दोषानपेक्षत्वम् । किं तु दोषान्तरमेव । तच्च तत्त्वज्ञानात् निवर्तत इति न नित्यमविद्याध्यासप्रसङ्ग इत्याशङ्क्य एतदविद्याध्यासस्य अविद्यान्तराधीनत्वे तदध्यासस्यापि तदन्यदोषाधीनत्वमिति अनवस्थाप्रसङ्ग इति समाधत्ते-**दोषस्येति** । ननु अविद्या स्वस्वाध्यासोभयाध्यासस्य हेतुरिति स्वपरनिर्वाहकत्वाङ्गीकारान्नानवस्थेति शङ्कते - **स्वपरेति** । परिहरति - **प्रपञ्चस्यैवेति** । यथा अविद्यायाः अध्यासः दोषमन्तरेणं भवति, तया प्रपञ्चस्य अध्यासोऽपि दोषमन्तरेण भवितुमर्हतीति अविद्याकल्पनमेव मुधेति भावः ।

ननु मिथ्यार्थस्य दोषं विना प्रतिभासानुपपत्तेः दोषमन्तरेण न प्रपञ्चाध्याससंभवः । अविद्याध्यासेऽपि अविद्यैव दोषः । स्वनिर्वाहकपदेन स्वस्य स्वाध्यासे दोषत्वमेव विवक्षितम्, न तु निर्वाहकान्तरनिरपेक्षत्वम् । न चैवं प्रपञ्चस्यापि स्वनिर्वाहकत्वप्रसङ्ग इति वाच्यम् । प्रपञ्चान्तर्गततत्तद्वस्त्वध्यासे तत्तद्वस्तुनः दोषत्वकल्पनायां गौरवेण सर्वत्राविद्याया एव दोषत्वकल्पनौचित्यात् इत्याशयेन शङ्कते - **मिथ्यार्थस्येति** । अविद्याया इव

प्रतिभासोऽनुपपन्न इति चेन्न; अविद्याया इव स्वस्यैव स्वप्रतिभासहेतुदोषत्वकल्पनामात्रेण तत्प्रतिभासोपपत्तेः ॥ स्वस्यैव स्वहेतुत्वमनुपपन्नम्, अध्यासोत्पत्त्योरविशेषादिति चेन्न; अनाद्यविद्याध्यासे तयोर्विशेषस्य भवतैव स्वीकृतत्वात् । न ह्यसावनध्यस्ता, सत्यत्वतुच्छत्वयोरन्यतरप्रसङ्गात् । न च अध्यस्तापि उत्पन्नतथा, अनादित्वसिद्धान्तभङ्गप्रसङ्गात् । न च सापि आदिमती, प्रपञ्चाविशेषप्रसङ्गात् ॥

प्रपञ्चान्तर्गतपदार्थानामेव स्वप्रतिभासहेतुदोषत्वं युक्तम् । न चैवं गौरवम् । धर्मिकल्पनातो धर्मकल्पनाया लघुत्वेन अननुगतानामपि क्लृप्तानामेव दोषत्वकल्पनं युक्तमित्याशयेन समाधत्ते-**अविद्याया इवेति** । **कल्पनामात्रेणेति** । अविद्याख्यधर्मी तस्य दोषत्वमित्युभयोः कल्पनापेक्षया क्लृप्तेषु पदार्थेषु दोषत्वरूपधर्ममात्रकल्पनं युक्तम् । धर्मिकल्पनातो वरं धर्मकल्पनेति न्यायादिति भावः । अयं च न्यायः समवायदूषणसंदर्भे अद्वैतिभिरप्युपयुक्तः ।

ननु अविद्याया स्वहेतुत्वमनुपपन्नम् । न चाविद्यायाः स्वाध्यासहेतुत्वमेवेष्यते, न तु स्वोत्पत्तिहेतुत्वमिति वाच्यम् । अध्यासोत्पत्त्योः विशेषाभावात् अध्यासहेतुत्वाङ्गीकारात् स्वोत्पत्तिहेतुत्वस्याप्यायातत्वात् । तथा चानुपपत्तिरिति शङ्कते- **स्वस्यैवेति** । समाधत्ते - **अनाद्यविद्याध्यास** इति । अनाद्यविद्यायाः अनादावध्यासेऽङ्गीकृते सति **तयोः** = अध्यासोत्पत्त्योः विशेषस्य त्वयैवाङ्गीकारादित्यर्थः । तमेवोपपादयति **न ह्यसाविति** । असौ अविद्या अनध्यस्ता न, तथा सति सत्यत्वतुच्छत्वयोरन्यतरप्रसङ्गात् इत्यर्थः । ननु अविद्यायाः अध्यस्तत्वेऽप्युत्पन्नत्वात् उत्पत्तिकारणमेवाध्यासकारणमिति न स्वाध्यासे स्वस्य दोषत्वमित्याशङ्क्य अविद्याया भवद्भिः अनादित्वाङ्गीकारात् उत्पन्नत्वं न संभवतीत्याह - **न चाध्यस्तापीति** । सिद्धान्तविरोधमुक्त्वा अर्थविरोधमप्याह - **न च सापीति** । अविद्यापीत्यर्थः । **प्रपञ्चेति** । प्रपञ्चवदेव स्वव्यतिरिक्तदोषापेक्षत्वप्रसङ्गादित्यर्थः। तथा चानवस्थेति भावः । किं च न केवलमनवस्था, अपितु अविद्याकल्पनवैयर्थ्यं चेत्याह-

तथा च किं तया; तद्वदेवानियमतोऽपि प्रपञ्चस्य स्वतोऽध्यासोपपत्तेः । अध्यासोत्पत्त्योरविशेषाभ्युपगमेऽपि अविद्यायां स्वाध्यासमूलदोषतयाऽभ्युपगतायां स्वहेतुत्वव्याघातो दुस्त्यजः ।

किंच यदि निर्दोषस्यापि ब्रह्मणोऽविद्या प्रकाशेत, नित्यं तत्प्रकाशप्रसङ्गः, अविशेषात् ।। निवृत्तत्वात् पश्चान्न प्रकाशिष्यत इति चेन्न; भवत्पक्षे प्रकाशनिवृत्तेरेव

तथा च किं तयेति । यथा अविद्या अविद्यान्तरेणाध्यस्यते एवं प्रपञ्चान्तर्गतो घटादिः प्रपञ्चान्तर्गतमृदादिलक्षणदोषेणैवाध्यस्यताम् । न च तत्तद्घटपटादिप्रपञ्चाध्यासस्य तत्तद्धेत्वधीनत्वेऽननुगमो दोष इति वाच्यम् । क्लृप्तत्वेन लाघवात् । अनियमतोऽपि कल्पितदोषत्ववतः स्वस्वकारणादेव अध्यासस्य न्याय्यत्वात् । अन्यथा अनवस्थिताविद्यापरंपराकल्पनायां गौरवात् इति भावः । स्वत इत्यत्र स्वा शब्दः प्रपञ्चपरः । तथाच प्रपञ्चान्तर्गतव्यक्तिविशेषाणां दोषत्वमुक्तं भवति ।

एवमध्यासोत्पत्त्योः विशेषाङ्गीकारः स्थापितः । इदानीं तयोरविशेषाङ्गीकारेऽपि स्वस्य स्वाध्यासे दोषत्वाङ्गीकारात् अध्यासोत्पत्त्योरविशेषात् स्वस्य स्वोत्पत्तिहेतुत्वमपि सिध्येदित्याह - **अध्यासोत्पत्त्योरिति** । स्वस्य स्वहेतुत्वव्याघातो दुस्त्यज इति भावः ।

अनादित्वान्न दोषापेक्षेति शङ्कायाः परिहारान्तरमाह - **किं च यदीति** । यदि निर्दोषस्यापि ब्रह्मणोऽविद्या प्रकाशेततर्हि सर्वदा अविद्याप्रकाशप्रसङ्गः । तथा हि यदि दोषरूपहेतुवशात् प्रकाशेत तदा पूर्वकाले दोषोऽस्ति तत्त्वज्ञानानन्तरकाले दोषो नास्तीति अविद्याप्रकाशः तत्त्वज्ञानोत्पत्तिपर्यन्त इति वक्तुं शक्येतापि । निर्दोषस्य ब्रह्मणः अविद्याप्रकाशाङ्गीकारे तु **अविशेषात्** = पूर्वापरकालयोः हेत्वधिकरणत्वतदनधिकरणत्वरूपवैषम्याभावात् सर्वदा अविद्याप्रकाशः स्यादिति भावः ।

ननु तत्त्वज्ञानेन अविद्याया निवृत्तत्वात् सा पश्चात् न प्रकाशिष्यत इत्याशङ्क्य भवन्मते मिथ्यावस्तुनः प्रतिभासमात्रशरीरत्वात् प्रकाशनिवृत्तेरेव प्रकाशमानवस्तुनिवृत्तिरूपत्वात् प्रकाशनिवृत्तिप्रकाशमाननिवृत्त्योः कार्यकारणभावेन निर्देशस्यानुपपत्तिरिति

प्रकाशमाननिवृत्तिरूपत्वात् तयोर्हेतुसाध्यभावनिर्देशानुपपत्तेः ।। तत्त्वज्ञानोदयात् पश्चादप्रकाशः, पूर्वं तु तदभावात् तस्याः प्रकाश इति चेत् तथा सति तत्त्वज्ञानप्रागभाव एव ब्रह्मणोऽविद्यादर्शननिबन्धनमिति प्रपञ्चदर्शनस्यापि स एव

समाधत्ते–**निवृत्तत्वादित्यादिना**। अध्यासनिवृत्त्यध्यस्यमाननिवृत्त्योः समानकालिकत्वात् पौर्वापर्यघटितकार्यकारणभावो न घटत इति भावः ।

एवमर्थाभावात् = अविद्यारूपविषयाभावात् अप्रकाशमाशङ्क्य पर्यहार्षीत् । इदानीं सहकार्यभावात् अप्रकाशमाशङ्क्य परिहरति - **तत्त्वज्ञानोदयादिति** । तत्त्वज्ञानोदयात् पश्चात् अविद्यायाः अप्रकाशः, पूर्वं तु तत्त्वज्ञानाभावात् अविद्यायाः प्रकाश इति शङ्का । समाधानं तु तथा सति तत्त्वज्ञानप्रागभाव एव ब्रह्मणः अविद्याप्रकाशे सहकारिकारणमिति पर्यवसानात् प्रपञ्चप्रकाशस्यापि तत्त्वज्ञानप्रागभाव एव प्रयोजको भवतु, किमन्तर्गडुना अविद्ययेति ।

नन्वभावस्य विचित्राध्यासहेतुत्वं कुत्रापि न दृष्टमिति तत्त्वज्ञानप्रागभावस्य विचित्रप्रपञ्चाध्यासहेतुत्वं न संभवति । अतो भावरूपाज्ञानं विचित्राध्यासहेतुतया कल्पनीयमित्याशङ्क्य भावरूपस्य घटादेरपि अध्यासहेतुत्वं न दृष्टमिति भावरूपाज्ञानस्यापि अध्यासहेतुत्वं न स्यात् इति परिहरति - **अभावस्येति** । तत्त्वज्ञानप्रागभावः नाध्यासहेतुः अभावत्वात् घटाद्यभाववदिति शङ्कितुरभिप्रेगमनुमानम् । भावरूपाज्ञानं नाध्यासहेतुः भावरूपत्वात् घटादिवत् इति परिहर्तुः अभिप्रेतमनुमानम् । शङ्कते - **तिमिरादिदोषाणामिति**। भावरूपाणां तिमिरादिदोषाणां भ्रमहेतुत्वं दृश्यते, तद्वत्, भावरूपाज्ञानस्य भ्रमहेतुत्वं संभवति । तथा च भवदीयानुमाने तिमिरादिदोषेषु व्यभिचार इति शङ्कितुराशयः । परिहरति- **भेदाग्रहादेरिति** । पुरोवर्तिनि रजतभेदग्रहाभावस्य रजतभ्रमं प्रति हेतुत्वदर्शनेन शङ्कितुरभिप्रेतेऽनुमाने भेदग्रहे व्यभिचार इति भावः । आदिपदेन शुक्तित्वग्रहो गृह्यते । ननु स्थिरस्याभावस्य पूर्वापरकालविशिष्टत्वाभावात् तत्तत्कालव्यवस्थितकार्यविशेषाध्यासाय तदुचितशक्तिमती अविद्या कल्पनीयेत्याशङ्क्य कल्पितापि अविद्या अभाववत् अनादिः इति

प्रयोजकः किं न स्यात् ? तथाच किमन्तर्गडुना अविद्यया ।। अभावस्य विचित्राध्यासहेतुत्वं न दृष्टमिति चेत्; भावस्य वा घटादेः क्व दृष्टम् ।। तिमिरादिदोषाणां दृश्यत इति चेत्, विशेषाग्रहादेरभावरूपस्यापि तद्दृश्यत इति तुल्यम् । अभ्युपगतं च सर्वैरपि भ्रमेषु भेदाग्रहो निबन्धनमिति ।। अभावस्य पूर्वापरकालाविशिष्टत्वात् तत्तत्कालविशेषप्रतिनियतकार्यविशेषाध्यासाय तादृशमहिमशालिनी अविद्या कल्पनीयेति चेत्-कल्पिताऽपि सा कथमनादिरातत्त्वज्ञानमनुवर्तमानानि तत्तत्कालनियतानि च कार्याण्यध्यस्येत् (ध्यासयेत् ?) ।। स्वभावादिति चेत्, स किमभावे नाङ्गीक्रियते ? कल्पनालाघवं तु तत्र विशेषः ।। विवर्तपारम्पर्यादविद्यायास्तदुपपत्तिः; न त्वभावस्य निर्विकारस्येति चेत्—सा किं विवर्तपरम्परा अविद्यायास्स्वरूपम्, उत तत्कार्याण्येव, यद्वा वस्त्वन्तराणि ? नाऽऽद्यः, उक्तदोषानतिक्रमात्; स्वरूपत्वाविशेषात् सर्वदा

कृत्वा पूर्वापरकालप्रतिनियतकार्यविशेषाध्यासं कथं कुर्यात्? स्वभावादिति चेत् तत्त्वज्ञानाभावे एव स स्वभावोऽङ्गीक्रियाताम् । अतिरिक्ताज्ञानाकल्पनप्रयुक्तलाघवादिति समाधत्ते - **अभावस्येत्यादिना** । **पूर्वापरेति** । अतिरिक्ताया अविद्यायास्तु त्रिगुणात्मकत्वात् तत्तत्सत्त्वादिगुणविशेषोन्मेषकाले तत्तत्कार्याध्यासः नियमेन स्यादिति शङ्कितुराशयः । **आतत्त्वज्ञानमिति** । प्रवाहरूपेणानादीनि आतत्त्वज्ञानमनुवर्तमानानि प्रातिस्विकरूपेण तत्तत्कालनियतानि घटादिकार्याणि सत्त्वाद्युन्मेषमात्रान्न सिध्येयुरिति समाधातुराशयः ।

ननु घटाद्युत्तरोत्तरविवर्तानां मृत्पिण्डादिपूर्वपूर्वविवर्तसापेक्षत्वात् तत्तन्मृत्पिण्डादिरूपेण विवृत्ता अविद्यैव तत्तद्घटादिरूपेण विवर्तत इति प्रतिनियतकार्यसंभव इति चोदयति - **विवर्तपारम्पर्यादिति** । **तदुपपत्तिः**=कालविशेषनियततत्तत्कार्याध्यासोपपत्तिः । **न त्वभावस्येति** । विवर्तपारंपर्यमिति शेषः । **उत तत्तत्कार्याण्येवेति** । तत्तत्कालनियतोत्पत्तिकतया निर्वाह्यत्वेनाभिमतान्येवेति विरोधसूचनार्थ एवकारः । **उक्तदोषेति** । नियताध्यासासंभवरूपदोषादित्यर्थः । असंभवमेवोपपादयति - **स्वरूपत्वेति** ।

सर्वाध्यासप्रसङ्गात्। न द्वितीयः, निर्वाह्यस्यैव निर्वाहकत्वानुपपत्तेः। न च तृतीयः, अनभ्युपगमात्। अभ्युपगमेऽपि तत्सत्यमिथ्यात्वादिविकल्पशतदौस्स्थ्यापातात्। सत्यत्वे सद्वितीयत्वादिप्रसङ्गात्। मिथ्यात्वेऽपि तत्परम्परायां प्रतिनियतकालविचित्राध्यासे तथाविधपरम्परान्तरक्लृप्तिप्रसङ्गात्॥ पूर्वपूर्वविवर्तानामेव उत्तरोत्तरहेतुत्वान्नासौ दोषः, यथा ब्रह्मपरिणामानां प्रकृतिपरिणामानां वा तत्तदुत्तरोत्तरपरिणामहेतुभावे इति चेन्न; तथाऽप्यविद्याकल्पनस्य निर्मूलत्वप्रसङ्गात्, ब्रह्मण्येवान्यनिरपेक्षानाद्यध्यासप्रवाहवैचित्र्येण सर्वाध्याससिद्धेः॥ तर्हि

विवर्तपरंपरायाः अविद्यास्वरूपत्वं हि परंपरान्तर्गतानां मृदादीनामविद्याऽभेद एवेति नियामकत्वेनाभिमतानां मृदादीनां अविद्यावत् सर्वदा सत्त्वात् नियाम्यत्वेनाभिमतानामपि सर्वेषां घटादीनां सर्वदा अध्यासप्रसङ्ग इति भावः।

विवर्तपरंपरा अविद्याकार्याण्येवेति द्वितीयपक्षं दूषयति - **न द्वितीय** इति। **निर्वाह्यस्यैवेति**। कार्यक्रमे किं नियामकमिति प्रकृतप्रश्ने क्रमविशेषविशिष्टकार्यस्यैव नियामकत्वोक्तौ आत्माश्रयः क्रमविशेषविशिष्टकार्याणामेव विवर्तपरंपराशब्दार्थत्वादिति भावः। विवर्तपरंपरा अविद्यातिरिक्तवस्त्वन्तराणीति तृतीयकल्पं निरस्यति - **न च तृतीयः, अनभ्युपगमादिति**। **अभ्युपगमेऽपीति**। विवर्तपरंपरायाः अविद्यातिरिक्तत्वाभ्युपगमेऽपि तस्याः सत्यत्वेऽद्वैतहानिः। मिथ्यात्वे च कालविशेषप्रतिनियतकार्यविशेषाध्यासनियामकत्वेनाङ्गीकृतायाः विवर्तपरंपरायाः क्रमिककार्यघटितत्वात् तत्तत्कार्यक्रमेऽपि विवर्तपरंपरान्तरापेक्षायामनवस्थाप्रसङ्गादिति भावः।

ननु विवर्तपरम्परात्मकसमुदायस्य न समुदायरूपेण नियामकत्वं विवक्षितम्, येनोक्तदोषः स्यात्; किं तु पूर्वपूर्वविवर्तविशेषस्य उत्तरोत्तरविवर्तविशेषहेतुत्वम्। यथा ब्रह्मपरिणामानां वा प्रकृतिपरिणामानां वा महदादीनां उत्तरोतरपरिणामहेतुत्वमिति शङ्कते - **पूर्वपूर्वेति**। परिहरति - **तथापीति**। ब्रह्मण्येव इतरापेक्षां विना अनाद्यध्यासप्रवाहवैचित्र्येण सर्वाध्याससिद्ध्या अविद्याकल्पनस्य व्यर्थत्वादित्यर्थः। शङ्कते - तर्हीति।

परिणामपरम्परासामर्थ्यमाश्रित्य परिणामिद्रव्यापह्नवप्रसङ्ग इति चेन्न; प्रत्यक्षादिविरोधप्रसङ्गात् । न चात्रापि तथा; तद्विषयप्रमाणानां प्रत्येकं प्रतिक्षेपात् । न तथा(तदा ?) निरधिष्ठानभ्रमापत्तिरिति भेतव्यं भवता; ब्रह्मण एव सर्वविवर्ताध्यासाधिष्ठानत्वाभ्युपगमात्। न हि अपरमार्थभूताया अविद्याया अधिष्ठानतया स्वीकारः शक्यः । तथा सति ब्रह्मण एवासिद्धिप्रसङ्गे माध्यमिकसमाजमध्यमध्यास्स्व ॥

ब्रह्मसत्यत्वश्रुत्यादिबलात् तदभ्युपगमः, न तु विवर्ताधिष्ठानत्वादिति चेन्न; विकारतदुपादानप्रकृत्यादिसत्यत्वश्रुतिबलादेव प्रकृतितत्परिणामपरम्पराभ्युपगम-

---

परिणामपरंपरासामर्थ्यदिवोत्तरोत्तरपरिणामसंभवात् परिणामिद्रव्यापलापप्रसङ्ग इत्यर्थः । समाधत्ते - **प्रत्यक्षादीति** । पिण्डत्वघटत्वाद्यवस्थापेक्षयातिरिक्तस्य अनुगतस्य परिणामिनः मृद्द्रव्यस्य प्रत्यक्षसिद्धत्वान्न परिणामिद्रव्यापलापप्रसङ्ग इति भावः । ननु निवर्तपरंपराश्रयभूतमविद्याख्यं वस्तु मृद्द्व्यवदावश्यकमित्याशङ्क्य मृद्द्रव्यवत् अविद्याग्राहकप्रमाणाभावात् न तदावश्यकम् भावरूपाज्ञानभङ्गवादे अविद्याग्राहकप्रत्यक्षादिप्रमाणासंभवस्योपपादित-त्वादिति समाधत्ते - **न चात्रापि तथेति** । **न तथेति** । न तदेति पाठः साधुः । **तदा** अविद्यायाः अनङ्गीकारे निरधिष्ठानभ्रमापत्तिरिति भवता न शङ्कनीयम्, ब्रह्मण एव सर्वविवर्ताधिष्ठानत्वाङ्गीकारादित्यर्थः । **न हीति** । अपरमार्थभूता अविद्यैव सर्वविवर्ताधिष्ठांनमिति स्वीकर्तुं न शक्यते । तथा सति ब्रह्मण एवासिद्धिप्रसङ्गात् । न चेष्टापत्तिः । माध्यमिकमतप्रवेशप्रसङ्गादित्यर्थः ।

ननु "सत्यं ज्ञानमनन्तं ब्रह्म" इति श्रुतिबलात् सत्यभूतं ब्रह्माङ्गीकुर्मः, न तु विवर्ताधिष्ठानत्वात्; येनासत्यायाः अविद्याया एवाधिष्ठानत्वसंभवेन ब्रह्मापलापप्रसङ्गात् माध्यमिकमतप्रवेशः स्यादिति शङ्कते-**ब्रह्मसत्यत्वेति** । यदि श्रुतिबलात् ब्रह्मणः सत्यत्वमङ्गीक्रियते, तर्हि "गौरनाद्यन्तवती सा नित्या सततविक्रिया" "अजामेकां लोहितशुक्लकृष्णां बह्वीं प्रजां जनयन्तीं सरूपाम्" इत्यादिश्रुतिबलात् सत्यभूतानां प्रकृतितत्परिणामपरंपराणामप्यङ्गीकार्यत्वात् नास्माकं विवाद इति समाधत्ते-**विकारेति** । यदि

प्रसङ्गेनाविवादप्रसङ्गात्। तत्सत्यत्वप्रतिपादकश्रुतिवाधे ब्रह्मसत्यत्वप्रतिपादिकाया अपि तस्या बाधितुं शक्यत्वात्।

किंच किमविद्या प्रकाशते ? न वा ? न चेत्, तुच्छत्वम्; निरुपाख्यस्यैव तुच्छत्वात्। प्रकाशते चेत्, स प्रकाशः किमविद्यास्वरूपम्, उत ब्रह्मस्वरूपम् ? अथ तस्यास्तस्य वा धर्मः, उतान्यः कश्चित् ? न तत्राऽऽद्यः; स्वप्रकाशत्वेन ब्रह्मवत् सत्यत्वप्रसङ्गात्। न द्वितीयः; तन्नित्यत्वेन नित्यमविद्याप्रकाशात् अनिर्मोक्षप्रसङ्गात्। नापि तृतीयः; तयोर्ज्ञातृत्वानभ्युपगमात्॥ अध्यस्तज्ञातृत्वाभ्युपगमे कः प्रतीकार इति चेन्न; तस्याप्यध्यासस्याविद्याहेतुकत्वेऽन्योन्याश्रयणात्।

च प्रकृत्यादिसत्यत्वप्रतिपादकश्रुतिः बाध्यत इत्युच्यते तर्हि ब्रह्मसत्यत्वप्रतिपादकश्रुतिरपि बाध्येतेत्याह - **तत्सत्यत्वेति**।

प्रकारान्तरेण अविद्यां दूषयति - **किं चेत्यादिना**। किमविद्या प्रकाशते न वा। न प्रकाशते चेत् शशविषाणवत् तस्यास्तुच्छत्वं स्यात्। **निरुपाख्यस्यैव** = अप्रतीयमानस्यैव तुच्छत्वात्। उपाख्या प्रतीतिः, तद्रहितं निरूपाख्यम्। प्रकाशते चेत् -सः अविद्यायाः प्रकाशः किमविद्यास्वरूपम्, उत ब्रह्मस्वरूपम्, अथ अविद्यायाः ब्रह्मणो वा धर्मः, उतान्यः कश्चित्। नाद्यः, स्वात्मकप्रकाशरूपत्वेन अविद्यायाः ब्रह्मवत् सत्यत्वप्रसङ्गात्। न द्वितीयः, अविद्याप्रकाशस्य ब्रह्मस्वरूपत्वे ब्रह्मणः नित्यत्वेन अविद्याप्रकाशोऽपि नित्यः स्यात्। तथा च मोक्ष एव न स्यात्। नापि तृतीयः। अविद्याप्रकाशस्य ब्रह्मधर्मत्वे अविद्याधर्मत्वे च ब्रह्माविद्ययोः ज्ञातृत्वप्रसङ्गात् प्रकाशाश्रयस्यैव ज्ञातृत्वात्। न चाध्यस्तं ज्ञातृत्वमुभयोरङ्गीक्रियत इति वाच्यम्। ज्ञातृत्वाध्यासस्य अविद्याहेतुकत्वेनान्योन्याश्रयणात् इति समुदायार्थः।

तस्यापीत्यादि। अविद्यायाः ब्रह्मणश्च यो ज्ञातृत्वाध्यास; स किमविद्याहेतुकः, उत ब्रह्महेतुकः, अथ वा अहेतुकः। आद्ये आह-**तस्यापीति**। तस्य ज्ञातृत्वाध्यासस्य अविद्याहेतुकत्वे अन्योन्याश्रयः। कथमिति चेत्-अविद्यायाः ज्ञातृत्वाध्यासः अविद्याधीनः,

प्रकाशाध्यासस्य तदधीनत्वात्, तस्याश्च प्रकाशाधीनसिद्धित्वात् । ब्रह्महेतुकत्वे तस्य नित्याध्यासप्रसङ्गात् । अहेतुकत्वे पूर्ववत् प्रपञ्चाध्यासस्यैवाहेतुकत्वप्रसङ्गात् । आदिमदनादिवैषम्यस्याप्रयोजकत्वोक्तेः । निर्दोषप्रकाशगोचरत्वप्रयुक्तदोषाणां च प्रागनुवृत्तेः । नापि चतुर्थः; सत्यस्य तस्यानभ्युपगमात् । मिथ्याभूतस्य त्वध्यासेऽन्योन्याश्रयप्रसङ्गात् ।

एतेनाविद्याप्रवाहपक्षोऽपि निरस्तः, प्रपञ्चप्रवाहस्यैव हेतुकार्यभावेन

अविद्याप्रकाशश्च ज्ञातृत्वाध्यासाधीन इति । **प्रकाशाध्यासस्येति** । ज्ञातृत्वाध्यासस्येत्यर्थः । अध्यस्तस्याध्यासात् प्रागसिद्धेरिति भावः । द्वितीये आह - **ब्रह्महेतुकत्व** इति । ब्रह्मणः नित्यत्वात् तद्धेतुकः ज्ञातृत्वाध्यासःनित्यः स्यादित्यर्थः । तृतीय आह - **अहेतुकत्व** इति । ज्ञातृत्वाध्यासस्याहेतुकत्वे तद्वत् प्रपञ्चाध्यासस्यैवाहेतुकत्वप्रसङ्गात् इत्यर्थः । **अप्रयोजकत्वोक्तेरिति** । “अनादित्वेऽपि कारणापेक्षा परिहर्तुं शक्यते, न पुनरपरमार्थस्य प्रतिभासे दोषनैरपेक्ष्यम्” इत्यत्रेति शेषः । **किं च निर्दोषेति** । दोषमन्तरेण प्रकाशमानस्य ब्रह्मवत् सत्यत्वप्रसङ्गात् इत्युक्तो दोषः, यदि निर्दोषस्यापि ब्रह्मणः अविद्या प्रकाशेत तदा नित्यं तत्प्रकाशप्रसङ्ग इत्युक्तो दोषः; अविद्यायामुक्तरीत्या तत्त्वज्ञानप्रागभावसत्त्वासत्त्वाभ्यां ज्ञातृत्वस्य प्रकाशाप्रकाशाव्यवस्थायां च “तथा सति तत्त्वज्ञानप्रागभाव एव” इत्यादिना उक्तः अविद्यायाः असिद्धिप्रसङ्गलक्षणदोषश्चात्र विवक्षितः । प्रागनुवृत्तेः इत्यस्य स्थाने प्राग्वदनुवृत्तेरिति पाठः साधुः ।

उतान्यः कश्चिदिति चतुर्थकल्पं दूषयति - **नापि चतुर्थ** इत्यादिना । अन्यत्वेनाभिमतः सत्यो वा मिथ्या वा । नाद्यः, सत्यद्वयप्रसक्तिभिया भवद्भिस्तथानङ्गीकारात् । न द्वितीयः । मिथ्याभूतस्य तस्याध्यासे पूर्ववत् अन्योन्याश्रयणात् इति भावः ।

ननु अविद्याप्रवाहाङ्गीकारपक्षे नायमन्योन्याश्रयः, पूर्वपूर्वाविद्यया उत्तरोत्तराविद्याप्रकाशोपपादनसंभवादित्यत्राह **एतेनेति** । एतद्विवृणोति-**प्रपञ्चेति** । पूर्वपूर्वस्य प्रपञ्चस्य उत्तरोत्तरप्रपञ्चं प्रति हेतुत्वाङ्गीकारेण पूर्वोत्तरप्रपञ्चयोः हेतुतया कार्यतया च स्थितेरुपपत्त्या

स्थित्युपपत्तौ निरर्थकाविद्याप्रवाहकल्पनायोगात्, उपलम्भाद्यसिद्धेश्च।

किं चेयमविद्या (१) निराश्रया, (२) साश्रया वा ? पूर्वत्र ब्रह्मवत् सत्यत्वप्रसङ्गः; शशशृङ्गवद्वा तुच्छत्वप्रसङ्गः । उत्तरत्राप्यसावाश्रयः (१) किं ब्रह्मस्वरूपम्, (२) उत तदेवोपहितम्, (३) अथवा स्वतन्त्रोऽन्यः ?

न प्रथमः; नित्यशुद्धस्याशुद्धिविरोधात्।। अन्यतरमिथ्यात्वे वा उभयमिथ्यात्वे वा तदविरोध इति चेन्न; शुद्धमिथ्यात्वेऽपसिद्धान्तशास्त्रवैयर्थ्यादिप्रसङ्गात् ।

तदध्यासकल्पनं तद्धेतुतया अविद्याप्रवाहकल्पनं च व्यर्थम् इति भावः । ननु अविद्यां विना कार्यप्रवाहानुपपत्त्यभावेऽपि प्रमाणबलादविद्यां स्वीकुर्म इत्याशङ्क्याह - **उपलम्भाद्यसिद्धेश्चेति** । उपलम्भः प्रत्यक्षम् । आदिपदेनानुमानादिकम् । अविद्यासाधकप्रत्यक्षादिप्रमाणासिद्धेः पूर्ववादे उपपादितत्वादित्यर्थः ।

प्रकारान्तरेण अविद्यां दूषयति - **किं चेयमिति** । इयमविद्या निराश्रया वा साश्रया वा । आद्ये ब्रह्म निराश्रयं यथा सत्यं तथा अविद्यायाः सत्यत्वं वा, निराश्रयं शशशृङ्गं यथा तुच्छं तथा तुच्छत्वं वा प्रसज्येतेत्यर्थः । अत्र अविद्या सत्या निराश्रयत्वात् ब्रह्मवत् इति, अविद्या तुच्छा निराश्रयत्वात् शशशृङ्गवदिति चानुमाने विवक्षिते । **उत्तरत्रेत्यादि** । साश्रया इति द्वितीयपक्षे योऽसाविद्याश्रयः स किं ब्रह्मस्वरूपम्, उत उपहितं ब्रह्मस्वरूपम्, अथ वा स्वतन्त्रोऽन्यः । तत्र न प्रथमः । ब्रह्मस्वरूपस्य नित्यशुद्धस्य अविद्यारूपाशुद्ध्याश्रयत्वासंभवात्, इत्यर्थः । ननु शुद्ध्यशुद्ध्योरन्यतरस्य मिथ्यात्वाद्वा उभयोर्मिथ्यात्वाद्वा नास्ति विरोध इत्याशङ्क्य ब्रह्मगतशुद्धेर्मिथ्यात्वे अपसिद्धान्तः ब्रह्मणो नित्यशुद्धत्वप्रतिपादकशास्त्रविरोधश्च भवेत् । अशुद्धेः मिथ्यात्वे तन्निवृत्तिनैरपेक्ष्यप्रसङ्ग इति समाधत्ते- **अन्यतरेत्यादिना** । मूले शुद्धिमिथ्यात्वे, अशुद्धिमिथ्यात्वे इति पाठौ साधू । ननु अशुद्धेः मिथ्यात्वेन कदाचिदपि तदभावेऽपि अशुद्धिप्रतिभासोऽस्तीति तन्निवृत्तिरपेक्षितेत्याशङ्क्य अशुद्धिप्रतिभासस्यापि मिथ्यात्वेनाभावात् तन्निवृत्तेनापेक्षेत्याह-

अशुद्धमिथ्यात्वे तन्निवृत्तिनैरपेक्ष्यप्रसङ्गात् । कदाचिदपि तस्या अभावात् ॥ तत्प्रतिभासनिवृत्तेरपेक्षेति चेत्; प्रतिभासस्यापि मिथ्यात्वे प्रसङ्गसाम्यात् । तत्सत्यत्वानभ्युपगमात् ॥ मिथ्यात्वेऽपि सत्यत्व इवापुरुषार्थत्वाविशेषात् तन्निवृत्त्यपेक्षेति चेत्; तर्ह्यपुरुषार्थाश्रयत्वलक्षणाशुद्धत्वस्य दुस्त्यजत्वात् । तन्मिथ्यात्वोक्ति-

---

कदाचिदपीति । **तत्सत्यत्वानभ्युपगमादिति** । अशुद्धिप्रतिभासस्य सत्यत्वानङ्गीकारादित्यर्थः । ननु अशुद्धि- प्रतिभासस्य मिथ्यात्वेऽपि तस्य व्यावहारिकसत्यत्वाङ्गीकारात् अपुरुषार्थत्वस्य निवृत्तेश्च संभव इति शङ्कते-**मिथ्यात्वेऽपीति** । **तर्हीति** । अशुद्धिप्रतिभासस्यापुरुषार्थत्वाभ्युपगमे ब्रह्मणः अपुरुषार्थभूताशुद्धिप्रतिभासाश्रयत्वरूपमशुद्धत्वं दुस्त्यजमिति समाधानम् । एतदुक्तं भवति - ब्रह्मणो हेयसंबन्धाङ्गीकारे ब्रह्मणो निरवद्यत्वप्रतिपादिकानां बह्वीनां श्रुतीनां तदुपबृंहकबहुस्मृतीतिहासपुराणानां चाप्रामाण्यप्रसञ्जने कृते हेयसंबन्धस्य मिथ्यात्वेन तेषामप्रामाण्यं परिहरसि । तस्य यदि सत्त्वमङ्गीकरोषि, तदा यादृशसत्त्वविशिष्टादशुद्धिर्लोके दृश्यते तादृशी अशुद्धिः ब्रह्मण्यङ्गीकृतैवेति तच्छ्रुतिप्रामाण्योपपादनं वञ्चनमात्रमेवेति ।

ननु धर्मिसमसत्ताकाशुद्धेरेव हेयत्वम्, प्रातिभासिकाशुद्धिविशिष्टे अशुद्धत्वव्यवहाराभावात् । ततश्च धर्मिसमसत्ताकाशुद्धिरेव ब्रह्मणि निषिध्यत इति चेत् तर्हि जीवब्रह्मणोः सावद्यत्वनिरवद्यत्ववैषम्यं न सिध्येत् । जीवेऽपि धर्मिसमसत्ताकस्यावद्यस्याभावात् । उपहितस्यैव अविद्याश्रयत्वात् धर्मिसमसत्ताकत्वमिति चेत् - तत्र किम् उपाधेरविद्याश्रयत्वम्, उतोपाध्युपलक्षितस्य, उतोपाधिविशिष्टस्य । नाद्यः, उपाधेरेव जीवत्वापातेन जीवब्रह्मणोरभेदानुपपत्तेः । न द्वितीयः, उपलक्षितस्य पारमार्थिकतया दोषस्य धर्मिसमसत्ताकत्वाभावेन जीवस्य सावद्यत्वाभावप्रसङ्गात् । तृतीयेऽप्यवद्यस्य किमुभयत्र प्रत्येकं परिसमाप्य वृत्तित्वं विवक्षितम्, उत व्यासज्यवृत्तित्वम् । नाद्यः, पूर्वोक्तदोषद्वयप्रसङ्गात् । न द्वितीयः, असिद्धेः । अन्तःकरणवृत्त्यात्मकस्य दुःखादेः अन्तःकरणे परिसमाप्य वृत्तेः तदभेदात् जीवे प्रतीतावपि व्यासज्यवृत्तित्वासिद्धेः - इति **चण्डमारुते** ।

रुपच्छन्दनमात्रे पर्यवस्यति। उभयमिथ्यात्वे तूभयविधदोषापत्तिः। व्याघातादयश्च स्युः। नापि द्वितीयः; अविद्याश्रयस्य ब्रह्मण उपाधिमत्त्वे सत्यमिथ्याविकल्पिताविद्यान्तरादिपरिग्रहे अपसिद्धान्तानवस्थाविरोधादिदोषसमुन्मेषात्।

नापि तृतीयः; ब्रह्माज्ञानवादपरित्यागादिप्रसङ्गात्। तस्याप्याधारनिरूपणेऽ-

---

व्याघातादयश्चेति । शुद्ध्यशुद्ध्योः भावाभावात्मकयोः समानसत्ताकयोः परस्परव्याघात इत्यर्थः । उभयोः भिन्नसत्ताकत्वे च यद्यशुद्धेर्व्यावहारिकत्वं शुद्धेश्च प्रातिभासिकत्वमिष्यते, तदा ब्रह्मणः शुद्धिप्रतिपादकवेदाप्रमाण्यं स्यात् । यद्यशुद्धेः प्रातिभासिकत्वं शुद्धेर्व्यावहारिकत्वमिष्यते तदा संसारस्य प्रातिभासिकत्वप्रसङ्ग **इत्यादि** दूषणानि आदिपदेन विवक्षितानि ।

उभयमिथ्यात्व इति । शुद्ध्यशुद्ध्योरुभयोर्मिथ्यात्व इत्यर्थः । उभयविधो दोषः = अपसिद्धान्तादिः, निवृत्तिनैरपेक्ष्यादिश्च । अथ अविद्याश्रयः उपहितं ब्रह्मस्वरूपमिति द्वितीयपक्षं दूषयति-**नापि द्वितीय इति । अविद्याश्रयस्येत्यादि ।**

उपहितं ब्रह्मैवाविद्याश्रय इत्यत्र किं स उपाधिः अविद्यान्तरम्, उतान्यः । उभयथापि तस्य सत्यत्वाङ्गीकारे अपसिद्धान्तः । मिथ्यात्वे तु निराश्रयत्वे ब्रह्मवत् सत्यत्वापत्त्या साश्रयत्वे वाच्ये आश्रयान्तरासंभवाच्च ब्रह्माश्रयत्वे वाच्ये केवलब्रह्मणः तदाश्रयत्वे शुद्धिविरोधात् उपहितस्यैव तदुपाध्याश्रयत्वे वाच्ये तदुपाध्याश्रयत्वमपि पूर्ववत् उपाध्यन्तरोपहितस्यैवेत्यनवस्था । तत्परिहारार्थं स्वस्यैवोपाधित्वे उच्यमाने स्वस्मिन् स्ववृत्त्या विरोध इति भावः । किं च यद्युपाधिर्विशेषणं तदा तस्य सांसारिकत्वादिप्रसङ्गः। यदि चोपलक्षणं तदा ब्रह्मण एव सावद्यत्वादिप्रसङ्गश्च आदिपदग्राह्यौ ।

अविद्याश्रयः स्वतन्त्रः = ब्रह्मानाश्रयकोऽन्य इति तृतीयकल्पं दूषयति - **नापि तृतीय** इति । ब्रह्मातिरिक्तस्य स्वतन्त्रस्य कस्यचित् अविद्याश्रयत्वकल्पे ब्रह्मश्रितमज्ञानमिति वादस्य परित्यागप्रसङ्ग इत्यर्थः । ब्रह्माज्ञानवादादीत्यादिशब्देन जीवाज्ञानवादपरित्यागप्रसङ्गो गृह्यते । अन्यगताज्ञाननिवृत्त्यर्थं जीवस्य श्रवणाद्यनुपपत्तिश्च आदिशब्देन विवक्षिता ।

नवस्थादिप्रसङ्गाच्च ॥ स्यादेतत्, ब्रह्मवत् स्वयमेवाविद्या स्वाश्रयेति ॥ तन्न; आश्रयाश्रयित्वयोरेकप्रतिसम्बन्धिकयोः (उपादिभेद)मन्तरेण विरुद्धत्वात्। ब्रह्मणस्तु स्वाश्रयत्वं नास्त्येव। आश्रयान्तरनिषेधाभिप्रायेण स्वाश्रयत्वोक्तिः ॥ अस्तूपाधिभेदेनेति चेन्न; तस्याप्याधाराकारोपाधेरनाधारत्वानुपपत्तेः तदाधारोपाध्यन्तरादिभेद-

---

स्यादेतदिति। ब्रह्म यथा स्वाश्रयं (स्वं आश्रय: यस्य तत्) तथा अविद्यापि स्वाश्रया (स्वं आश्रय: यस्या: सा) इति शङ्का । समाधत्ते-**तन्नेति** । एकवस्तुनिरूपितमाश्रयत्वमाश्रयित्वं च न संभवति। एकस्यैव वस्तुन:स्वनिरूपितमाश्रयत्वमाधेयत्वं च न संभवतीति यावत्। विरुद्धत्वात्। न हि घट: स्वस्याश्रयो भवति। न च एक एव वृक्ष: कपिसंयोगतदभावयो: अग्रमूलोपाधिभेदेनाश्रयो भवतीति वाच्यम्। उपाधिभेदेन विरुद्धयोरेकत्र संभवेऽपि तमन्तरेणासंभवादिति भाव: । मूले **रुपादिभेदमित्यपपाठ:**। उपाधिभेदमिति शुद्धपाठ: । यद्यप्याश्रयत्वाश्रयित्वयोरेकप्रतिसंबन्धिकयो: उपाधिभेदेनापि एकत्र वृत्तिर्न दृष्टा; तथापि विरुद्धधर्माणां केषांचित् कपि संयोगतदभावादीनां मूलत्वाग्रत्वाद्युपाधिभेदादेकत्र वृत्तिदर्शनमात्रेणेदमुक्तम्। ननु ब्रह्मण: "स्वे महिम्नि प्रतिष्ठित:" इति स्वाश्रयत्वश्रुति: कथं संगच्छत इत्याशङ्क्य ब्रह्मण: स्वाश्रयत्वं नास्त्येव। स्वाश्रयत्वोक्तिस्तु आश्रयान्तराभावाभिप्रायेणेति परिहरति - **ब्रह्मणस्तु** इति।

उपाधिभेदेन स्वस्य आश्रयत्वमाश्रयित्वं चास्तु, वृक्षे कपिसंयोगतदभाववत् इति शङ्कते - **अस्तूपाधिभेदेनेति**। आधारत्वाधेयत्वप्रयोजकयोराकारयो: (उपाध्यो:) अविरोधे द्रव्यत्ववृक्षत्वयोरिव कपिसंयोगतदभावप्रयोजकत्वासंभवात् तयोर्विरोधे वाच्ये तयोरेकाश्रयत्वाय उपाध्यन्तरं कल्पनीयमित्यनवस्थेत्याशयेन समाधत्ते-**तस्याप्याधारेति**। **आधाराकारोपाधेरिति**। आधारत्वप्रयोजकोपाधेरित्यर्थ:। स्वस्य स्वाधारत्वप्रयोजको य उपाधि: तस्य सत्यत्वप्रसक्त्या निराधारत्वानुपपत्ते: तस्य कश्चिदाधारो वाच्य: । तस्यानवस्थाभिया स्वाधारत्वाङ्गीकारे पुन: एकस्यैवाधारत्वाधेयत्वानुपपत्त्या तदुपपादकोपाध्यन्तरं स्वीकरणीयमिति रीत्या अनवस्थाप्रसङ्ग इति तात्पर्यम्।

कल्पनेऽनवस्थानात्। आधेयाकारतादात्म्येन तस्यापि स्वाधेयत्वे तु उपाधिभेदवाचोयुक्तिविलोपप्रसङ्गात् ॥ ननु मिथ्याभूतायाः किमाश्रयविकल्पेन; अध्यासस्याधिष्ठानमात्रं ह्यपेक्षितमिति चेन्न; भवत्पक्षे सर्वत्राश्रयाणामध्यासाधिष्ठानमात्रत्वात्। घटादिसंसर्गोऽपि भूतलादावध्यस्त एव; अन्यथा तत्रैव तत्सत्यत्वप्रसङ्गात्।

“आधारत्वाधेयत्वप्रयोजकाकारयोर्विरुद्धयोर्व्यवस्थापके ये उपाध्यन्तरे तयोरपि विरुद्धयोर्व्यवस्थापके उपाध्यन्तरे आदिशब्दार्थः । एतच्च अनवस्थोपपादनार्थमादिशब्देन गृहीतम्” इति चण्डमारुते ।

ननु आधारत्वाधेयत्वप्रयोजकाकारयोः परस्परतादात्म्यादविरोधादेकत्र वृत्त्युपपत्तेः तन्निर्वाह्ययोराधारत्वाधेयत्वयोरपि एकत्र संभवान्नानवस्थेत्याशङ्कामनूद्य परिहरति- **आधेयाकारेति** । आधेयाकार=आधेयत्वप्रयोजकाकारः । अविद्यायाः स्वाधेयत्वप्रयोजकः यः आकारः सः यदि अविद्यानिष्ठः तथा उपाधिभेदात् इति शब्दो नोपपन्नः । यदि अन्यनिष्ठः तदा अनवस्थेति भावः । तस्यापि = आधेयत्वप्रयोजकाकारस्यापि । स्वाधेयत्वे = अविद्याधेयत्वे । आश्रयाधिष्ठानयोर्भेदाभिप्रायेण शङ्कते - **ननु मिथ्याभूताया** इति । अविद्याया इति शेषः । **अधिष्ठानमात्रमिति** । ब्रह्मण एवाधिष्ठानत्वसंभवात् अविद्यारूपाशुद्ध्यधिष्ठानस्य शुद्धिसंभवात् । अशुद्ध्याधारत्वमेव शुद्धिविरोधि, न तु अशुद्ध्यधिष्ठानत्वमिति भावः । समाधत्ते-**भवत्पक्ष** इति । भवन्मते आश्रयत्वाधिष्ठानत्वयोरभेदात् आश्रयत्वाभावेऽधिष्ठानत्वमपि न स्यात् । अधिष्ठानत्वे च जडत्वाद्यशुद्ध्याश्रयघटादिष्विव शुद्धिविरोधः दुस्त्यज इति भावः । ननु अधिष्ठानाश्रययोरभेदे भूतलाश्रितः घटसंसर्गः भूतलाध्यस्त इति वक्तव्यं स्यादित्याशङ्क्य इष्टापत्त्या परिहरति - **घटादिसंसर्ग** इति । अन्यथेति । घटसंसर्गस्य भूतलाध्यस्तत्वाभावे घटसंसर्गस्य सत्यत्वं स्यात् । यत्र यत् अध्यस्तं न भवति तत्र तत् स्वात्यन्ताभावसमानाधिकरणं न भवतीति व्याप्तेः तत्र तस्य मिथ्यात्वासंभवादिति भावः । स्वात्यन्ताभावसमानाधिकरणत्वं हि मिथ्यात्वम् । तच्च अध्यस्तस्यैव भवतीति यावत् ।

किंचापरमार्थभूतेयमविद्याप्रतीतिर्नाहङ्कार-तद्वृत्ति-तदवच्छिन्नदृशिष्वन्यतमा, तेषां तदपत्यत्वात्। अन्यथाऽपि काल्पनिकत्वेन मूलदोषान्तरापेक्षायामनवस्थानात्। न च ततोऽन्या काचिद्दृशिः; तस्याः ब्रह्मस्वरूपत्वे ब्रह्मणोऽपि मिथ्यात्वप्रसङ्गात्। तदतिरिक्तसंविदन्तरासिद्धेश्च।

अपि च प्रकाशमानेयमविद्या (१) किं ब्रह्मात्मना प्रकाशते, (२) उत तदन्यत्वेन, (३) यद्वान्यत्वा- नन्यत्वसाधारणात्मना ? नाऽऽद्यः। स हि ब्रह्मस्वभावनिह्नवेन

प्रकारान्तरेण अविद्यास्वरूपं दूषयति - **किं चेत्यादिना**। अविद्याप्यपरमार्थभूता अविद्याध्यासरूपा प्रतीतिरप्यपरमार्थभूता। अपरमार्थस्य प्रतिभासनियतकालत्वात् प्रतीतिः भाष्ये तु अविद्या त्रिष्वन्यतमेति विकल्प्य दूषणमुक्तम्। भवतु। अपरमार्थभूतः अविद्याध्यासः अहंकारो वा अहंकारवृत्तिर्वा अहंकारतद्वृत्त्युभयावच्छिन्नचैतन्यं वा न भवति, तेषां त्रयाणामप्यविद्यातदध्यासकार्यत्वेन अविद्याध्यासरूपत्वासंभवात् इत्यर्थः। **तदपत्यत्वं** = तत्कार्यत्वम्। तत्कार्यस्य तदध्यासत्वमनुपपन्नम्। कार्यपूर्वकाले तदध्यासाभावेन अविद्यास्वरूपस्यैवासिद्धिप्रसङ्गात्। आध्यासिकस्याध्यासकालनियतसत्ताकत्वादित्यर्थः। अविद्याकार्यत्वाभावेऽपि यदि काल्पनिकत्वं स्यात् तदा तन्मूलभूतं दोषान्तरं वक्तव्यम्। तदध्यासस्यापि काल्पनिकत्वे तत्रापि दोषान्तरमित्यनवस्थेत्यर्थः। **ततोऽन्येति**। अविद्याप्रतिभासादन्या काचित् दृशिर्नास्ति। कुत इत्यत्राह-**तस्या** इति। अपरमार्थभूतायाः दृशेः ब्रह्मस्वरूपत्वे ब्रह्मणोऽपि मिथ्यात्वप्रसङ्गात्। **तदतिरिक्तेति**। अविद्याप्रतिभासादन्यस्य संविद्विशेषस्यासिद्धेरित्यर्थः।

अपि चेत्यादि। किं च प्रकाशमाना इयमविद्या किं ब्रह्मरूपेण प्रकाशते, उत तदन्यतया, अथवा अन्यत्वानन्यत्वसाधारणरूपेणेति विकल्पः। अन्यत्वानन्यत्वमात्रसहचरितत्वेन गृहीतं यद्रूपं तदन्यरूपेणेत्यर्थः।

तत्र प्रथमकल्पं विकल्पपूर्वकं विस्तरेण दूषयितुमारभते - **नाद्य इत्यादिना**। **स हीति**। अविद्याप्रकाशो हीत्यर्थः। ब्रह्मस्वभावनिह्नवो नाम ब्रह्मासाधारणधर्माप्रतीतिः।

वा, स्वस्वभावनिह्नवेन वा उभयोस्समुच्चयेन वा, उभयनिह्नवेन वा। आद्ये ब्रह्मस्वभावनिह्नवे प्रकाशतत्त्वविलयेन तदधीनसत्ताकमविद्यादिकमपि विलीनमेव स्यादिति वृथा शास्त्रादिपरिश्रमः; प्राप्यनिवर्त्यायाः प्रसङ्गस्यापि दूरापास्तत्वात्। अविद्यास्वभावनिह्नवे तु ब्रह्ममात्रप्रकाशे अपवर्गबाधवैषम्यविरहप्रसङ्गेन पूर्वोक्तदोषानति-

---

स्वस्व भावनिह्नवः = अविद्याऽसाधाणधर्माप्रतीतिः । स्वासाधारणधर्मप्रतीतौ भेदप्रतीतेः आवश्यकत्वात् अविद्यायाः ब्रह्मात्मना भानं नोपपद्यत इति प्रथमद्वितीयचतुर्थविकल्पानां भावः । तत्तदाकारयोः अविरोधप्रतीत्या समुच्चयसंभवात् ब्रह्मात्मना भानमुपपद्यत इति तृतीयविकल्पस्य भावः । **आद्ये** इति । ब्रह्मस्वभावस्याप्रकाशे सति तत्प्रकाशात्मकं ब्रह्मस्वरूपमेव न स्यादिति तदधीनसत्ताकं किमपि न स्यादित्यर्थः । शास्त्रादिपरिश्रमवैयर्थ्यमुपपादयति-**प्राप्यनिवर्त्याया** इति । अत्र महाचार्याः - प्राप्येति ल्यबन्तम् । णिच्प्रकृतिभूतधात्वर्थनिवृत्त्यपेक्षया समानकर्तृकत्वं बोध्यम् । यद्वा प्राप्येति णिजन्तादेव ल्यम् । "विभाषापः" (पा.सू.) इति णेरयादेशाभावपक्षे णिजन्तं रूपम् । निवर्तयतिधात्वर्थपेक्षयैवात्र पक्षे समानकर्तृकत्वम् । आत्मा हि अध्यस्य अविद्यां प्रापयति ज्ञानेन निवर्तयति च । यद्वा प्राप्येति अर्हार्थे ण्यत् । प्राप्या चासौ निवर्त्या चेति "पूर्वकालैकसर्व" (पा.सू.) इत्यादिना समानाधिकरणसमासः । पूर्वं प्राप्त्यर्हा अनन्तरं निवृत्त्यर्हेत्यर्थः । पूर्वं प्राप्तौ सत्यामेव अनन्तरं निवृत्त्यर्हेत्युक्तं भवति इति । **अविद्यास्वभावनिह्नवेति** । अविद्यागतासाधारणधर्माप्रतीतावित्यर्थः । **ब्रह्ममात्रप्रकाश** इति । ब्रह्मण एव स्वासाधारणाकारविशिष्टतया प्रतीतावित्यर्थः । अविद्यायाः स्वासाधारणाकारविशिष्टतया प्रतीत्यभावे तन्निवर्तकब्रह्मज्ञानेच्छाया अभावात् ब्रह्मभावप्रकाशस्य च सिद्धत्वात् जिज्ञासाविरहात् अपवर्गार्थप्रवृत्तिर्न स्यादिति भावः । **वैषम्येति** । अविद्यायाः स्वरूपेणैव प्रकाशे तद्गतानर्थत्वादेरप्रकाशात् प्रकाशाधीनसिद्धिकस्य च तस्यानर्थत्वादेरप्रकाशे असिद्धेः तत्त्वज्ञानात् प्राक् अनर्थसंबन्धः तदुत्तरमनर्थनिवृत्तिरिति वैषम्यस्य विलयप्रसङ्गात् तदर्थशास्त्रपरिश्रमवैमर्थ्यमिति भावः । उभयोः समुञ्चयेन वेति पक्षं

पातः। समुच्चयस्तु न संभवत्येव; विद्याविद्ययोः वैरस्य शाश्वतिकत्वात्। अन्यथा विद्यानिवर्त्यत्वमविद्यायाः क्वचिदपि न स्यादिति स्थितमन्यत्र। उभयनिह्नवे तु उभयविधदोषस्यानायाससिद्धिः स्यात्।

स्यादेतत्–यथा दर्पणमुखयोः स्वभावमनपह्नुत्य दर्पणे मुखाध्यासः, यथा वा अतिरस्कृतोभयस्वभावो दीपकज्जलसंभेदः, यथा वा दीपालोकमण्डलस्य तद्बाह्यसन्तमसमण्डलस्य च सामीप्याविरोधः, एवमयमविद्याब्रह्मणोरनपह्नुतोभय-

---

दूषयति - **समुच्चयस्त्विति**। प्रकाशमानेयमविद्या ब्रह्मस्वभावस्वस्वभावसमुच्चयेन प्रकाशते इति पक्षो न संभवति। विद्याविद्ययो: वैषम्यस्य शाश्वतिकत्वात्। तुशब्देन तत्तदसाधारणाकारेण प्रतीतौ भेदप्रतीतेरावश्यकत्वात् अभेदाध्यासो न संभवतीति सूच्यते। भेदेन प्रतीयमाने अभेदाध्यासासंभवे हेमुमाह-**विद्याविद्ययोरिति**। भेदे प्रतीयमानेऽभेद-ज्ञानासंभवात् तदधीनाध्यासो नोपपद्यत इत्यर्थ:। **अन्यथेति**। विद्याविद्ययो: वैषम्याभावे इत्यर्थ:। **क्वचिदपीति**। शुक्तिरजतादिस्थलेऽपि शुक्तिज्ञानात् शुक्त्यज्ञाननिवृत्तिर्न स्यादिति भाव:।

ननु ब्रह्माविद्ययोरसाधारणं रूपद्वयं तयोर्विरोधश्च प्रतीयत एव। न चैतावता ब्रह्मणि अविद्याध्यासानुपपत्ति:। अधिष्ठानाध्यस्यमानयोरसाधारणाकारे प्रतीयमाने सत्येव दर्पणे मुखाध्यासदर्शनात्, तथा शाश्वतिकविरोधवति आलोके सत्येव संतमसदर्शनाच्चेति शङ्कते-**स्यादेतदिति**। **अनपह्नुत्य** = अतिरस्कृत्य। मुख्याध्यास इत्यपपाठ:। मुखाध्यास इति पाठ:। अतिरस्कृतोभयस्वभाव: = अतिरस्कृत: उभयो: स्वभावो यस्य स:। कज्जलम् = कुत्सितं जलम्। संभेद: = संसर्ग:। अयं च निवर्तकसंनिधानेऽपि निवर्त्यसद्भावमात्रे दृष्टान्त:। अनपह्नुतोभयस्वभावयो: = प्रतीयमानतत्तदसाधारणाकार विशिष्टयो:। आसत्तिविशेष: = आध्यासिकं तादात्म्यम्। अध्यासरूपविशेषणसंभवोपपादने दृष्टान्तानां तात्पर्यम्।

स्वभावयोरेवानादिरासत्तिविशेष इति ॥ किमस्मान् वर्णनावशेन वशीचिकीर्षसि ? मैवम्; सर्वत्र तादात्म्याध्यासे भेदाग्रहं संसर्गाध्यासे तु असंसर्गाग्रहमन्तरेण क्वचिदपि भ्रमासिद्धेः । दर्पणमुखाध्यासेऽप्यन्तरालाग्रहणादेव नैरन्तर्यभ्रमः ॥ कथं तर्हि दर्पणस्य दूरस्थताग्रहणमिति चेत्; श्रूयतामवधानेन । दर्पणाभिमुखप्रवृत्तेन नायनतेजः-प्रवाहेण सान्तरालदर्पणग्रहः; दर्पणप्रतिहतेन तु प्रतिस्रोतसा

समाधत्ते - **किमस्मानिति** । किमित्याक्षेपे । वशीकरणेच्छामात्रमेव, न तु तत्फलसिद्धिरिति भावः । **वर्णनावशेनेति** । दृष्टान्तोपन्यासेनेत्यर्थः । यथा कविभिः काव्यादिना उपमाद्यलंकारैः ललितमनसो वशीक्रियन्ते नैवं तत्त्वनिर्णयप्रधाना मादृशा मीमांसकाः वर्णनाविशेषेण वशीकर्तुं शक्यन्त इति भावः । **सर्वत्रेति** । शुक्तौ रजततादात्म्याध्यासं प्रति रजतभेदाग्रहो हेतुः । तत्रैव रजतत्वसंसर्गाध्यासं प्रति रजतत्वासंसर्गग्रहो हेतुः । इत्थं च भेदग्रहः तादात्म्याध्यासं प्रत्येव विरोधीति भेदाग्रहं विना तादात्म्याध्यासः परं न स्यात्, न तु संसर्गाध्यासः । स तु तत्रासंसर्गग्रहस्यैन विरोधितया तदभावं विना परं न स्यात्, न तु भेदाग्रहं बिना । दर्पणे मुखाध्यासश्च मुखसंसर्गाध्यास एवेति ग्रहणभेदोऽविरोधात् संभवत्येवेति नायं दृष्टान्त इति भावः ।

ननु तर्हि विरोधिभूतासंसर्गग्रहे विद्यमान एव दर्पणे मुखसंसर्गाध्यास एव ब्रह्माविद्ययोः भेदग्रहेऽपि तादात्म्याध्यासे दृष्टान्तोऽस्तु इत्यत्राह-**दर्पण इति** । **अन्तरालग्रहणादेवेति** । असंसर्गग्रहादेवेत्यर्थः । एवकारेणाभेदाग्रहो व्यवच्छिद्यते । **नैरन्तर्यभ्रमः** = संसर्गभ्रमः । तथा च दृष्टान्तदार्ष्टान्तिकयोः वैषम्यान्न दर्पणदृष्टान्तः उचित इति भावः । ननु यदि मुखदर्पणयोरसंसर्गग्रहः तदा कथं दर्पणस्य मुखापेक्षया दूरस्थत्वग्रह इति शङ्कते-**कथं तर्हीति**। परिहरति-**श्रूयतामिति** । दर्पणाभिमुखतया प्रवृत्तेन चाक्षुषतेजः प्रवाहेण सान्तरालदर्पणग्रहः = मुखासंसर्गविशिष्टदर्पणग्रहो भवति । दर्पणप्रतिहतेन प्रतिस्त्रोतसा प्रवृत्तेन तु नायनतेजः प्रवाहेण अगृह्यमाणदर्पणासंसर्गविशिष्टमुखस्वरूपग्रहणं भवति । तत एव प्रतिस्रोतसा तेजः प्रवाहेण दर्पणासंसर्गस्य मुखे अग्रहणात् मुखस्वरूपग्रहणाच्च तेन दर्पणाभिमुखप्रवृत्तनायनर-

तेनागृह्यमाणान्तरालमुखस्वरूपमात्रग्रहः; तत एव, 'दर्पणे मुखम्' इति भ्रमः, तद्व्यवहारमात्रं वा जायते ॥ ज्ञानद्वित्वं न दृश्यत इति चेत्; किं धारावाहिकधीसन्ततौ तद्भेदः ? अत्र तु तत्त्वधीभ्रमयोरितरेतरव्यवहिता धारेति विशेषः । यौगपद्यप्रतीतिस्तु शैघ्र्यातिशयेन कालकलाभेदाग्रहणात् । अतः न क्वचिदपि प्रत्यक्षविरुद्धाकारस्य

श्मिजन्यज्ञानोपनीतदर्पणस्य मुखे संसर्गभ्रमो दर्पणे मुखमित्याकारको भ्रमो जायते । यद्यपि दर्पणाभिमुखप्रवृत्तरश्मिभिः मुखदर्पणयोः अंससर्गग्रहः जातः, तथापि संसर्गग्रहहेतुभूतसंनिकर्षेण असंसर्गस्याग्रहणात् असंसर्गग्रहस्य हेतुत्वमव्याहतमेवेति भावः ।

ननु भेदग्रहस्य कथमभेदज्ञानं प्रति कारणत्वम् । अङ्गुल्यवष्टम्भादिना भेदे गृह्यमाण एव चन्द्रादावभेदग्रहात् । अस्ति हि चन्द्रद्वित्वे गृह्यमाण एव दक्षिणचन्द्रो दक्षिणचन्द्रादभिन्न इति ग्रह इति चेत् - न । तद्रूपेणोपस्थिते तद्रूपावच्छिन्नभेदग्रहाभावस्यैव तद्रूपेणोपस्थिते तद्रूपावच्छिन्नाभेदज्ञानं प्रति हेतुत्वम् । अत्र च सव्यचन्द्रत्वावच्छेदेन दक्षिणचन्द्रभेदज्ञानेऽपि दक्षिणचन्द्रो दक्षिणचन्द्रात् भिन्न इति दक्षिणचन्द्रत्वावच्छेदेन दक्षिणचन्द्रभेदग्रहाभावात् दक्षिणचन्द्रत्वावच्छेदेन दक्षिणचन्द्राभेदग्रहसंभवात् ।

अख्यातिमतानुसारेणाह - **व्यवहारमात्रमिति** । दर्पणे मुखमिति व्यवहारमात्रमित्यर्थः। मात्रशब्देन दर्पणे मुखमिति विशिष्टज्ञानानङ्गीकारात् - तादृशविशिष्टज्ञानव्यवच्छेदः । **ज्ञानद्वित्वमिति** । आदौ सान्तरालदर्पणग्रहः, ततः अगृह्यमाणान्तरालमुखस्वरूपमात्रग्रह इति ज्ञानद्वित्वं न दृश्यते इति शङ्का । धारावाहिकज्ञानसंततौ यथा ज्ञानानेकत्वं न दृश्यते तद्वत् ज्ञानद्वित्वादर्शनमुपपद्यत इति परिहारः । **किमिति** । दृश्यत इत्यनुषङ्गः । धारावाहिकधीसन्ततौ ज्ञानद्वित्वं दृश्यते किमित्यर्थः । **अत्र तु** इति । प्रथमप्रवृत्तनायनरश्मिभिः मुखासंसृष्टत्वेन दर्पणग्रहणं तत्त्वज्ञानं (प्रमा) दर्पणप्रतिहतनायनरश्मिभिः दर्पणसंसृष्टतया मुखज्ञानं भ्रमः । द्वयोः ज्ञानयोः शैघ्र्यात् द्वित्वं न गृह्यते । तावता ज्ञानसंतत्यवयवभूतज्ञानभेदः नापलापमर्हतीति भावः ।

क्लृप्तिः दीपकज्जलसंभेदे तु न विरोधगन्धोऽपि; तत्राध्यासप्रसङ्गाभावात् वध्यघातकभावादिविरोधासिद्धेः । मूर्तयोस्समानदेशत्वविरोधस्त्वंशभेदेन सूक्ष्मवैदेश्यात् परिहृतः । आलोकसन्तमसमण्डलयोरपि सादेश्य एव विरोधः; न तु सामीप्ये । न च अत्रापि ब्रह्माविद्ययोः परस्परसमीपदेशत्वादिस्वीकारो युक्तः; परिच्छिन्नत्वादिप्रसङ्गात् । अतो नाविद्याब्रह्मासत्तिर्वक्तुं शक्यते । एवमन्यान्यप्यनन्तानि विकल्पदूषणानि अविद्यास्वरूपमनुबध्नन्ति ।

न विरोधगन्धोऽपीति । नानुपपत्तिलेश इत्यर्थः । "यथा वा अतिरस्कृतोभयस्वभावो दीपकज्जलसंभेद इत्यत्र किं यथा दीपकज्जलयोः भेदे भासमानेऽपि अभेदोऽध्यस्यते तथात्रापीति विवक्षितम्, यथा विरुद्धयोरपि दीपकज्जलयोः संसर्गः तथेहापि विरुद्धयोरपि विद्याविद्योः संसर्ग इति इत्येवं विकल्पमभिप्रेत्य आद्यं दूषयति-**तत्राध्यासेति** । दीपकज्जलयोरभेदाध्यासस्य प्रसक्त्यभावादित्यर्थः । द्वितीयं दूषयति - **वध्यघातकेति** । वध्यघातकभावः = निवर्त्यनिवर्तकभावः । दीपकज्जलयोः निवर्त्यनिवर्तकभावादिरूपस्य विरोधस्यासिद्धेरित्यर्थः । आदिशब्देन एकस्मिन् काले सहानवस्थानलक्षणविरोधो गृह्यते । ननु मूर्तयोः सामान्यतः समानदेशत्वविरोधेऽपि यथा मूर्तयोः दीपकज्जलयोः समानदेशत्वं, एवमिहापि निवर्त्यनिवर्तकयोः सामान्यतः विरोधे सत्यपि विद्याविद्ययोरविरोधोऽस्तु इत्यत्राह-**मूर्तयोरिति** । विरोधः = अनुपपत्तिः । अंशभेदेन = अवयवभेदेन । सूक्ष्मवैदेश्यात् सूक्ष्मभिन्नदेशत्वात् । **परिहृत** इति । प्रदीपकज्जलदृष्टान्तोपादानेन यदि विरुद्धयोरपि कश्चित् संसर्गो न स्यात् तदा मूर्तयोः समानदेशत्वविरोधात् प्रदीपकज्जलयोः मूर्तयोः समानदेशत्वस्य यानुपपत्तिः आपादयितुमिष्यते सा इष्टापत्त्या परिहृतेत्यर्थः ।

आलोकेति । यद्यप्यालोकसंतमसयोः निवर्त्यनिवर्तकभावोऽस्ति । तथापि समानदेशवत्त्वे एव निवर्त्यनिवर्तकभावः । तयोः भिन्नदेशस्थत्वे निवर्त्यनिवर्तकभावाभावात् सामीप्यलक्षणः संसर्गः उपपद्यते । **सादेश्ये** = समानदेशस्थत्वे । **सामीप्ये** = समीपदेशस्थत्वे । ननु ब्रह्माविद्ययोरपि समानदेशस्थत्व एव विरोधः । वस्तुतः तयोः समीप-

ननु किमनेनानिष्टापादनप्रपञ्चेन ? प्रासादनिगरणादिवदवस्तुभूतायामविद्यायां नैते वस्तुदोषाः क्षतिमावहन्ति; यदाहुः, ''दुर्घटत्वमविद्याया भूषणं न तु दूषणम्'' इति; अतोऽविद्याऽप्यनुपपन्नेति स्थितौ ब्रह्माद्वैतमकण्टकमिति चेत्; हन्त । निष्प्रयोजनः प्रयासस्तव माध्यमिकादिमतनिरासे । तेऽपि, 'यदि सर्वशून्यत्वमपि दुर्घटम्, ततोऽपि सर्वशून्यत्वमेव प्रतिष्ठितम्' इतीष्टप्रसञ्जतां यदि

देशस्थत्वमेवेति नाविद्यानिवर्तकत्वं ब्रह्मण इति शङ्कायामाह - **न चेति** । **परिच्छिन्नत्वादीति** । ब्रह्मण इति शेषः । ब्रह्मणः अनधिकरणे समीपदेशे अविद्या वर्तत इति स्वीकारे देशनिष्ठात्पन्ताभावप्रतियोगित्वरूपं परिच्छिन्नत्वं ब्रह्मणः प्रसजतीति भावः । आदिशब्देन ब्रह्मभिन्नदेशस्थाविद्यादेः ब्रह्मण्यध्यस्तत्वानुपपत्तिः, परिच्छिन्नत्वप्रयुक्तमिथ्यात्वादिकं च गृह्यते । **अत इति** । आसत्तिः = तादात्म्याध्यासः । आसक्तिरित्यपपाठः ।

एतावता प्रबन्धेन ''प्रकाशमानेयमविद्या किं ब्रह्मात्मना प्रकाशते'' इत्यादिना प्रस्तुतेषु विकल्पेषु ब्रह्मात्मना प्रकाशत इति प्रथमकल्पो दूषितः । अथ ''उत तदन्यत्वेन, यद्वा अन्यत्वानन्यत्वसाधारणात्मना'' इति द्वितीयतृतीयपक्षौ दूषयन् दूषणान्तराण्यपि संगृह्णाति- **एवमन्यान्यपीति** । अयं भावः - मिथ्यापदार्थस्य हि अधिष्ठानसत्त्वमेव सत्त्वमिति तव सिद्धान्तः । तच्च तादात्म्याध्यास एव स्यात् । ततश्चाविद्यायाः तादात्म्येन ब्रह्मण्यध्यासाभावे प्रातिभासिकत्वं वा व्यावहारिकत्वं वा न स्यादेवेति तुच्छत्वं परमार्थत्वं वा स्यात् । तथा च तत्त्वज्ञानान्निवृत्तिरपि न स्यात् । किं चाधिकरणभिन्नसत्ताकवस्तुप्रतियोगिकोऽभावोऽधिकरणात् भिद्यत इति भवतैवाभिधानात् ब्रह्मणि प्रपञ्चनिवृत्तिः ब्रह्मभिन्नैव स्यात् । तत्र च पारमार्थिकत्वादिविकल्पो दुर्वारः । किं च दृक्दृश्ययोः संबन्धानुपपत्तेः आध्यासिकं तादात्म्यमेव संबन्ध इत्युक्तं भवता । ततश्च ब्रह्मतादात्म्यासिद्धौ दृग्दृश्ययोः

ब्रूयुः, तदानीं किं वक्ष्यसि। यदि सर्वशून्यत्वं दुर्घटम्, तदा परपक्षविजयप्रसङ्गः। ततश्च दुर्घटपक्षं परित्यज्य परपक्षः स्वीक्रियतामिति ब्रूयामिति चेत्; तर्ह्यस्माभिरप्येवमभिधाने भव निरुत्तरः। तदेतत् सर्वमुपक्षिप्तं भाष्ये–'निर्विषया निराश्रया स्वप्रकाशेयमनुभूतिः स्वाश्रयदोषवशादनन्ताश्रयमनन्तविषयमात्मानमनुभवतीत्यत्र किमयं स्वाश्रयदोषः परमार्थभूतः, उतापरमार्थभूतः इति विवेचनीयम्' इत्यादिना। आरम्भणाधिकरणे च व्यस्तृणीत॥

॥ इति शतदूषण्याम् अविद्यास्वरूपानुपपत्तिवादः एकचत्वारिंशः ॥ ४१ ॥

संबन्धान्तरमधिष्ठानभूतदृगन्तरम् अविद्याया अप्रतीतिर्वा स्यात्। तथा तस्या आपरोक्ष्यं च न स्यात्। संवित्तादात्म्यस्यापरोक्षत्वात्। किं चाविद्याया व्यावहारिकत्वे प्रातिभारिकरजतोत्पतिर्न स्यात्। प्रातिभासिकत्वे व्यावहारिकोत्पत्तिर्न स्यात् इति। अन्यत् स्पष्टम्।

इति श्रीशतदूषणीव्याख्यायां तात्पर्यप्रकाशिकायां
अविद्यास्वरूपानुपपत्तिर्नाम एकचत्वारिंशो वादः॥

* * *

।। अथ मायाविद्याविभागभङ्गवादः द्विचत्वारिंशः ।। ४२ ।।

श्लो. य एको दुर्लङ्घत्रिगुणनिजमायानिगलितैः
विंचित्रैः क्षेत्रज्ञैर्विहरति सरोजासहचरः ।
जगत्सर्गक्षेमक्षपणपरिकर्मीणहिमा
दयालुर्देवोऽसौ तुरगवदनस्तारयतु नः ।।

अथ मायाविद्याविभागभङ्गवादः द्विचत्वारिंशः ।।

य एको दुर्लङ्ध्यत्रिगुणनिजमायानिगलितैः
विचित्रैः क्षेत्रज्ञैर्विहरति सरोजासहचरः ।
जगत्सर्गक्षेमक्षपणपरिकर्मीणमहिमा
दयालुर्देवोऽसौ तुरगवदनस्तारयतु नः ।।

य एकः सजातीयद्वितीयरहितः स्वानुग्रहमन्तरेण लङ्घयितुमशक्यया गुणत्रयवत्या स्वकीयया मायया बद्धैः विचित्रैः जीवैः उपकरणभूतैः सरोजया सहचरः सन् क्रीडते, स जगत्सृष्टिस्थितिसंहारालंकृतमहिमा दयालुः तुरगवदनो देवः तां मायां तारयतु संसारात् अस्मान् मोचयतु । अनेन स्वमते त्रिगुणात्मिका प्रकृतिर्माया, कर्म मिथ्याज्ञानं वा अविद्या इति मायाविद्याविभागः, ब्रह्मणो निर्दोषत्वम्, जीवस्य तु अविद्यया सदोषत्वं चोपपद्यते, परमते तु तन्न संभवतीति सूच्यते । अत्र च ''दैवी ह्येषा गुणमयी मम माया दुरत्यया'' इत्यादिवचनार्थोऽनुसंहितः ।

अविद्याप्रसङ्गात् परमतं मायाविद्याविभागं भनक्ति- **येतु इत्यादिना** । अविद्याश्रयत्वे सदोषत्वप्रसङ्गात् ब्रह्मणो नाविद्या, किं तु मायैव । सा च ऐन्द्रजालिकादिष्विव न दोष इत्याहुः । तत्र तस्याः अविद्यामोहनीयपरदर्शनरूपव्यामोहादिहेतुत्वेन अविद्यात्वं पर्यवस्यति। ततश्च तत्र मायाशब्द उपचारमात्रमिति न मायाशब्दप्रयोगमात्रात् ब्रह्मणो निर्दोषत्वसिद्धिरिति भावः ।

ये तु ब्रह्मणो दोषं परिजिहीर्षन्तः ब्रह्माज्ञानं मायाशब्देनोपचरन्ति, तान् प्रति ब्रूमः–मायाविद्ययोः को विशेष इति ।। परव्यामोहनहेतुर्माया; स्वव्यामोहनहेतुरविद्येति चेत्, किं परेषामदर्शनेऽपि तद्व्यामोहनम्, उत तद्दर्शने ? न प्रथमः; असंभवात् । न हि मायाविनः परान् अपश्यन्तः तन्मोहनमिच्छन्ति, मोहयन्ति वा; मायाविशब्दस्य परव्यामोहनाभिसन्धिमत्पुरुषविशेषवाचित्वात् । अन्यथा मोहनहेतूनां मणिमन्त्रौषधीनामपि मायावित्वप्रसङ्गात् । नापि द्वितीयः ।

तान् प्रति ब्रूम इत्यादि । ब्रह्मजीवयोः निर्दोषत्वसदोषत्वनिर्वाहकत्वेनाभिमतयोः मायाविद्ययोः को विशेष इत्यर्थः । **परेति** । मायावित्वेताभिमतब्रह्मापेक्षया परो जीवः तद्व्यामोहनहेतुः माया । अविद्याश्रयत्वेनाभिमतो जीवः स्वशब्दार्थः, तद्व्यामोहहेतुरविद्या इत्यर्थः ।

अन्यत्र तथा वैषम्यसत्त्वेऽपि प्रकृते तत् वैषम्यं निराकर्तुं विकल्पयति - **किं परेषामित्यादिना** । किं ब्रह्म परान् दृष्ट्वा तान् व्यामोहयति, उत अदृष्ट्वेत्यर्थः । असंभवमेवोपपादयति-**न हीत्यादिना** । मायाविनः परानपश्यन्तः तन्मोहनं नेच्छन्ति, न वा मोहयन्ति । इच्छायाः ज्ञानपूर्वकत्वनियमात् परव्यामोहनेच्छा परज्ञानपूर्विकैवेति भावः। ननु परव्यामोहनेच्छाविरहेऽपि परव्यामोहकारित्वादेव मायावित्वं ब्रह्मणः । तथा च न परदर्शनस्यावश्यंभाव इत्यत्राह-**मायाविशब्दस्येति** । परकर्मकव्यामोहनविषयकेच्छावत्पुरुषविशेषवाचकत्वान्मायाविशब्दस्येत्यर्थः । ननु इच्छया अघटितं मोहनहेतुत्वमेव मायावित्वम्, तथा च न परदर्शनापेक्षेत्याशङ्क्याह - **अन्यथेति** । मोहनहेतुत्वस्य मणिमन्त्रादिष्वपि सत्त्वात् तेषामपि मायावित्ववारणाय इच्छाघटितमेव पूर्वोक्तरूपं मायावित्वमिति भावः ।

ब्रह्म परान् दृष्ट्वा तान् व्यामोहयतीति द्वितीयकल्पं विकल्पपूर्वकं निरस्यति - **नापि द्वितीय** इत्यादिना । ब्रह्मणः परकर्मकं दर्शनं किं स्वभावत एव भवति, किं वा अज्ञानेन भवति, अथवा मायया भवति । नाद्यः, निर्दोषदर्शनविषयतया परेषां व्यामोह्यानां जीवानां सत्यत्वप्रसङ्गात् । ब्रह्मणि स्वाभाविकज्ञातृत्वप्रसङ्गाच्च । न द्वितीयः, ब्रह्माज्ञानवादावतारात् तस्य च वादान्तरे निरासात् ।

तद्धि परदर्शनं ब्रह्मणः किं स्वभावतः, उत अज्ञानेन; अथ तयैव मायया ? नाऽऽद्यः; निर्दोषदर्शनविषयतया परेषां सत्यत्वप्रसङ्गात्। ब्रह्मणि ज्ञातृत्वस्य स्वाभाविकत्वप्रसङ्गाच्च। न द्वितीयः; ब्रह्माज्ञानवादावतारात्। तथा(च) सति तैनैवाज्ञानेन सर्वसंभवे तद्व्यतिरिक्तमायाभ्युपगमानुपपत्तिश्च । न च तृतीयः; परेषु दृष्टेषु तन्मोहनमात्रोपकरणत्वान्मायायाः परदर्शनहेतुत्वायोगात् । अथ ब्रह्मगताया मायायास्त्वयमतिशयो धर्मिग्राहकसिद्धो यत्परदर्शन तद्व्यामोहनयोर्हेतुत्वमिति चेन्न; मिथ्याभूतपरदर्शनहेतुत्वांशेन तस्या एवाविद्यात्वस्यापि दुर्वारत्वात्।

अथ मन्यसे–विपरीतदर्शनहेतुरविद्या, यथा शुक्तिरजतादिदर्शनहेतुः; माया

किं च ब्रह्माज्ञानपक्षे तेनाज्ञानेनैव मायाकार्यनिर्वाहे अज्ञानातिरिक्तमायाङ्गीकारो न युक्तः । नापि तृतीयः । परेषु दृष्टेषु तन्मोहनमात्रोपकरणत्वान्मायाया; परदर्शनहेतुत्वासंभवात् इति घट्टार्थः । **स्वाभाविकत्वेति** । हेत्वन्तराप्रयुक्तत्वादितिभावः । **ब्रह्माज्ञानेति** । अज्ञानस्य स्वाश्रयं प्रत्येव मिथ्याभूतपरदर्शनहेतुत्वादिति भावः । **तथा सतीति** । ब्रह्मणो निर्दोषत्वसिद्धये हि मायाकल्पनम् । मायाङ्गीकारेऽपि परदर्शनार्थमज्ञानस्य आवश्यकत्वे निर्दोषत्वस्य भग्नत्वात् अविद्यात एव सर्वकार्योपपत्तेश्च न माया कल्पनीयेति भावः । **परेषु दृष्टेष्विति** । ऐन्द्रजालिकादौ तथा दर्शनादिति भावः । शङ्कते-**अथेति** । ब्रह्मगताया मायायाः जीवगतमायापेक्षया अयं विशेषः यत् तस्याः परदर्शनतद्व्यामोहनोभयहेतुत्वमिति । कथमिदमवगम्यते इति चेत् - मायारूपधर्मिणः ज्ञापकेन "इन्द्रो मायाभिः पुरुरूप ईयते" इत्यादिश्रुतिवचनेन मायया नानात्वदर्शनकथनात् नानात्वदर्शनहेतुत्वरूपो धर्मोऽप्यवगम्यत इति । समाधत्ते-**मिथ्याभूतेति** । मिथ्याभूतपरदर्शनहेतुत्वांशेन मायाया एवाविद्यात्वात् अविद्यात्वाकारेण तस्याः स्वव्यामोहहेतुत्वमपि संभवतीति माया अविद्येति पदार्थद्वयमनावश्यकमिति भावः ।

मायाविद्याविभागं प्रकारान्तरेण शङ्कते - **अथ मन्यस** इत्यादिना । विपरीतदर्शनहेतुः अविद्या । सत्यत्वेन रूपेण मिथ्यार्थप्रतिभासस्य हेतुः अविद्येति यावत् । यथा

तु न ब्रह्मणो विपरीतदर्शनहेतुः, मिथ्याभूतस्य ब्रह्मव्यतिरिक्तस्य मिथ्यात्वेनैव बोधनात् न हि शुक्तिरजतमिथ्यात्वग्राहकस्याविद्यात्वम्; तथा सति बाधकज्ञानानां सर्वेषामप्यविद्यामूलत्वप्रसङ्गात्। भवदभिमतसर्वज्ञस्यापि सर्वेषां जीवानां भ्रमस्वरूपं विजानतः तत्तद्भ्रमविषयैस्सह तद्भ्रमग्रहणादविद्यावत्त्वप्रसङ्गात्। न हि निर्विषयज्ञानग्रहणं संभवति। न चेश्वरस्य भ्रमानभिज्ञता; असर्वज्ञत्वप्रसङ्गात्। आश्रितमोहनिबर्हणार्थप्रवृत्तिशून्यत्वप्रसङ्गाच्च। अतो मिथ्याभूतं ब्रह्मव्यतिरिक्तं मिथ्यात्वेनैव बोधयन्ती ब्रह्मणो माया नाविद्येति।

तदप्यसारम् । किमिंद ब्रह्म स्वव्यतिरिक्तं मिथ्याभूतं स्वभ्रमसिद्धतया

शुक्तिरजतादिभ्रमहेतुः अविद्या। माया तु ब्रह्मणो न विपरीतदर्शनहेतुः। ब्रह्मव्यतिरिक्तस्य मिथ्याभूतस्य प्रपञ्चस्य मिथ्यात्वेनैव ज्ञापनात् । न हि शुक्तिरजतमिथ्यात्वग्राहकस्यापि ज्ञानस्याविद्यात्वं संमतम् । तथा सति सर्वेषामपि बाधकज्ञानानां मिथ्यात्वग्राहकाणां अविद्यामूलकत्वप्रसङ्गात् । तथा च तेषामपि बाध्यत्वप्रसङ्गात् बाध्यबाधकव्यवस्थैव न स्यात् । किं च भवदभिमतः यः सर्वज्ञः स सर्वेषां जीवानां भ्रमस्वरूपं तद्विषयसहितं जानातीति भ्रमं विषयीकुर्वतः तदीयज्ञानस्यापि अविद्यामूलकतया सर्वज्ञस्य तस्याविद्यावत्त्वं प्रसजति । यद्यपि व्यधिकरणप्रकारकत्वाभावान्न तदीयज्ञानस्य भ्रमत्वप्रसङ्गः, तथाप्यनिर्वचनीयविषयकत्वमेव भ्रमत्वमिति मतानुसारेणेदमुक्तम् । ईश्वरः सर्वज्ञः यदि जीवानां भ्रमं न जानाति, तदा तस्य असर्वज्ञत्वं प्रसज्येत । अपि च स्वाश्रितजनगतभ्रमनिवृत्यर्थं तस्य प्रवृत्तिरपि न स्यात्, ज्ञानपूर्वकत्वात् प्रवृत्तेरित्याह- **आश्रितव्यामोहेति**। प्रकृतमाक्षेपं निगमयति - **अतो मिथ्याभूतमिति**।

आक्षेपं समाधत्ते - **तदप्यसारमित्यादिना**। किमिदं ब्रह्म स्वव्यतिरिक्तं मिथ्याभूतं स्वगतो यो भ्रमः तद्विषयत्वात् इदं मिथ्येति मिथ्यात्वेन जानाति, उत परगतो यो भ्रमः तद्विषयत्वात्, मिथ्यात्वेन जानाति, अथवा भ्रमविषयत्वमजानदपि मिथ्यात्वमात्रं जानाति। न प्रथमः। ब्रह्माज्ञानस्य दुस्त्यजत्वात्। भ्रमस्याज्ञानमूलकत्वात्। न द्वितीयः। परानदृष्ट्वा

मिथ्यात्वेन, उत परभ्रमसिद्धतया, अथ भ्रमसिद्धत्वमजानदपि मिथ्यात्वमात्रं जानातीति ? न प्रथमः, ब्रह्माज्ञानस्य दुस्त्यजत्वात्। न द्वितीयः, परेषामदर्शने परभ्रमसिद्धत्वादर्शनात् । परदर्शने पुनरविद्यास्वीकारापाताच्च । परानपि परभ्रमसिद्धतया ब्रह्म पश्यतीति चेन्न; परान्तरस्वीकरणेऽनवस्थानात्। तेषामेव परेषां भ्रमेण तत्सिद्धत्वदर्शनेऽपि तथाविधविशिष्टपरदर्शने स्वस्याविद्यापेक्षणात्। न हि वन्ध्यासुतभ्रमसिद्धो वन्ध्यासुत इति ज्ञाने, 'वन्ध्यासुतस्यैव भ्रमः, न तु तद्विज्ञातुः' इति वक्तुं शक्यम्। न च तृतीयः; भ्रमसिद्धत्वाज्ञाने मिथ्यात्वस्य दुर्ग्रहत्वात्। न ह्यसत्त्वमात्रं मिथ्यात्वम्; अपितु स्वात्यन्ताभावसमानाधिकरणतया प्रतीयमानत्वादिकम्।

तद्गतभ्रमविषयतया मिथ्यात्वं जानाति वा, तान् दृष्ट्वा वा। आद्ये परेषामदर्शने तद्भ्रमसिद्धत्वं न ज्ञातुं शक्यते। द्वितीये परदर्शनहेतुभूता अविद्या स्वीकरणीयेति ब्रह्माज्ञानवादोऽपरिहार्यः, इति भावः। मिथ्यात्वेन रूपेण परदर्शने नाविद्यास्वीकारप्रसङ्ग इति शङ्कते - **परानपीति**। स्वस्वभ्रमसिद्धतयैव परेषां दर्शने नानवस्थेत्यत्राह - **तेषामेवेति**। **तथाविधविशिष्टपरदर्शन इति**। परभ्रमसिद्धत्वविशिष्टपरदर्शने इत्यर्थः।

भ्रमसिद्धत्वमजानदपि ब्रह्म मिथ्यात्वमात्रं जानातीति तृतीयकल्पं निरस्यति - **न च तृतीय इति**। **भ्रमसिद्धत्वाज्ञान इति**। ननु स्वपरौदासीन्येत भ्रमसिद्धत्वमात्रं ज्ञायतामिति चेन्न। एवमपि भ्रमस्य स्वकीयत्वे ब्रह्मणोऽज्ञत्वप्रसङ्गः। परकीयत्वे च तदीयत्वेनाज्ञाने असर्वज्ञत्वप्रसङ्गः। तदीयत्वेन ज्ञाने च प्रागुक्त एव दोषः। भ्रमसिद्धत्वाज्ञाने मिथ्यात्वस्य दुर्ग्रहत्वमुपपादयति-**न ह्यसत्त्वमात्रमिति**। **प्रतीयमानत्वादिकमिति**। आदिशब्देन प्रतिपन्नोपाधौ निषेधप्रतियोगित्वं विवक्षिप्तम्। **न हि प्रतिबिम्बेति**। ननु प्रतिबिम्बचित्रपुरुषादिषु व्यामोहरूपकार्याभावात् व्यामोहनार्थं न प्रवर्तन्ते। इह तु व्यामोहकार्यसद्भावात् प्रवृत्तिः स्यादिति चेत्-न। भेदमिथ्यात्वे ज्ञाते अनिर्वचनीयस्वप्रतियोगिकभेदाश्रयत्वेन ज्ञायमानत्वेन परव्यामोहनार्थं ब्रह्मणः प्रवृत्त्ययोगात्।

परेषां मिथ्यात्वदर्शने च न ब्रह्मणः परव्यामोहनेच्छा संभवति । न हि प्रतिबिम्ब-वन्ध्यासुत-चित्रपुरुषादीनां व्यामोहनाय मायाविनोऽपि मायां प्रयुञ्जते; प्रयुञ्जाना वा कथं स्वयमनुन्मताः स्युः । आहुश्च, 'अचेतनेषु मायावी मायामोचक एव वा । उभावुन्मतपदवीमश्नुवाते मनीषिणाम् ॥' इति । ततश्च ब्रह्मापि मिथ्यात्वेनावधारितपरव्या मोहनार्थं मायां प्रयुञ्जानमुन्मत्तपर्यायमिव स्यादिति तदेव ब्रह्माज्ञानम् ।

अथ स्यात्–यद्यपि परव्यामोहने परदर्शनमवश्यंभावि; मिथ्याभूतपरदर्शनं च न दोषमन्तरेण– तथाऽपि नात्र ब्रह्मणः परदर्शनहेतोर्मायाख्यदोषस्या- विद्यात्वम्;

मनीषिणामिति । ज्ञातृज्ञेयसंबन्धे षष्ठी । मनीषिभिरुन्मत्ततया ज्ञायेतेत्यर्थः । **ततश्चेति** । मिथ्यात्वेन निश्चितान् प्रेरयन् लोके उन्मत्तः अज्ञः तद्वदेव उन्मत्तपर्यायं सत् अज्ञं स्यादिति ब्रह्माज्ञानवाद एव पर्यवस्यतीत्यर्थः ।

शङ्कते - **अथ स्यादिति** । यद्यपि परदर्शनं बिना परव्यामोहनं न संभवति मिथ्याभूतस्य परस्य दर्शनं च दोषं बिना न संभवति; स च दोषः मायैव नाविद्या । मायायाः अविद्यायाश्च लक्षणभेदात् । तथा हि अपुरुषार्थभूतं यत् अपरमार्थदर्शनं तद्धेतुः अविद्या, पुरुषार्थभूतं यत् अपरमार्थदर्शनं तद्धेतुर्माया । अपुरुषार्थत्वप्रकारकापरमार्थविशेष्यकदर्शनहेतुत्वमविद्यायाः लक्षणम्, पुरुषार्थत्वप्रकारकापरमार्थविशेष्यकदर्शनहेतुत्वं मायायाः लक्षणमिति यावत् । ब्रह्मणस्तु माया व्यामोहनीयान् प्रकाशयन्ती नापुरुषार्थतया प्रकाशयति, शोकाद्यजनकत्वात् । अपि तु पुरुषार्थतयैव प्रकाशयति । तथा च अपुरुषार्थत्वप्रकारकपरविशेष्यकदर्शनहेतुत्वरूपाविद्यालक्षणविरहात् न मायायाः अविद्यात्वम् । तत्र दृष्टान्तः स्वप्नदृष्टलीलोपकरणादिवदिति । स्वप्ने दृश्यमानानि लीलोपकरणादीनि यथा अपुरुषार्थतया दृश्यन्ते तद्वत् इति भाव; ।

तथापीति । ब्रह्मणोऽनर्थावहो दोष एवास्माकं परिजिहीर्षितः । माया तु न

अपुरुषार्थापरमार्थदर्शनहेतुरविद्येति तल्लक्षणात्; ब्रह्मणस्तु व्यामोहनीयान् परान् प्रकाशयन्त्यपि माया नापुरुषार्थतया प्रकाशयति, स्वप्रसिद्ध(भोगो) लीलोपकरणादिवत् पुरुषार्थतयैव प्रकाशयति। अतस्तस्या नाविद्यात्वमिति ।।

तदपि न; पुरुषार्थहेतोर्दोषत्वाभावात्। दोषत्वे तु अपुरुषार्थतान्वयस्यावर्जनीयत्वात्। न ह्यनिष्टं किंचिदनन्तर्भाव्य क्वचिदपि दोषत्ववर्णनम्। अन्यथा तत्तत्सामग्र्या तत्कार्योत्पत्तौ सर्वेषां कारणानां दोषत्वमेव वा गुणत्वमेव वा स्यादिति गुणदोषविभागाभावप्रसङ्गात्।

ननु किमिहानिष्ट (हेष्टानिष्ट) चिन्तनेन ? स्वाभाविकाकारो गुणः, औपाधिकाकारस्तु दोषः स्यात्; यथा द्विचन्द्रदर्शनदशायां चक्षुषस्तिमिरादि। न च द्विचन्द्रदर्शने कश्चिदपुरुषार्थस्पर्शः इति चेत्–मैवम्; द्विचन्द्रदर्शनहेतोरपि

ब्रह्मणोऽनर्थावहेति भावः। **नापुरुषार्थतयेति**। शोकाद्यहेतुत्वादिति भावः। परदर्शनस्य भ्रान्तिरूपस्य शोकहेतुत्वं स्यादित्यत्राह-**स्वप्रेति**।

समाधत्ते-**तदपि नेति**। यदि ब्रह्मणः माया पुरुषार्थतया परान् दर्शयेत् तदा तस्याः दोषत्वमेव न स्यात्। दोषत्वे च अपुरुषार्थत्वमवर्जनीयम्। न हि अनिष्टस्य कस्यचित् संबन्धं विना दोषत्वमुपपदायितुं शक्यते इत्यर्थः। **अन्यथेति**। अनिष्टहेतुर्दोषः इष्टहेतुर्गुण इति गुणदोषविभागः। यदि चानिष्टमन्तर्भाव्यैव यत्किंचिद्धेतुत्वमात्रेणैव दोषत्वं स्यात्, तदा हेतुमात्रं दोष एव स्यान्न गुणः। यदि च गुणोऽवश्यं वाच्यः, तदा हेतुमात्रं गुण इति दोषो न स्यात्। गुणदोषयोः परस्परप्रतिकोटित्वात्। ततश्च गुणदोषविभागो न स्यादिति भावः।

ननु किमिहेति। इष्टहेतुः गुणः, अनिष्टहेतुः दोष इति न गुणदोषलक्षणम्। किं तु स्वाभाविकाकारो गुणः, औपाधिकाकारो दोषः। यथा द्विचन्द्रदर्शनदशायां चक्षुषःतिमिरादिः औपाधिकाकारो दोषः। न हि द्विचन्द्रदर्शनेन कोऽपि शोकाद्यपुरुषार्थस्पर्शः इति शङ्का। समाधत्ते-**मैवमित्यादिना**। द्विचन्द्रदर्शनहेतोः तिमिरादेरपि परंपरया अनिष्टजनकत्वमादायैव दोषत्वं प्रतिपादनीयम्। अन्यथा निधिदर्शनादिहेतोरञ्जनादेरपि औपाधिकतया दोषत्व-

पारम्पर्येणानिष्टमन्तर्भाव्यैव दोषत्ववर्णनात् । अन्यथा निधिदर्शनादिहेतोरञ्जनादेरप्यस्वाभाविकतया दोषत्वप्रसङ्गात् । यदि च द्विचन्द्रदर्शनहेतोर्दोषत्वमविद्यात्वं च न स्यात्, कथं तन्निरासाय प्रेक्षावन्तः प्रयस्यन्ति (न्ते) । न ह्यस्पृष्टानिष्टगन्धं किंचित् विमृश्यकारिणां निरसनीयम् ।। मा भूत् तर्हि माया ब्रह्मणो दोषः; पुरुषार्थैकपर्यवसायितया गुण एव तु स्यादिति चेन्न । सा किमुच्छेदनीया, न वा ?

पूर्वत्रापि किं ब्रह्मेच्छया, अन्यतो वा ? यदि ब्रह्मेच्छया, कथं पुरुषार्थैकपर्यवसायिता ? न ह्यस्पृष्टानिष्टं निरसनीयमित्युक्तम् । न चान्यतस्तदुच्छेदः; ब्रह्ममाया(वि)मोहितैरल्पज्ञानशक्तिभिः क्षेत्रज्ञैः सर्वज्ञस्यापरिमितशक्तेर्ब्रह्मणोऽनन्तपुरुषार्थ (र्थैकप्र) साधिकायाः विश्वेन्द्रजाल(लिका)पिञ्छिकाया

प्रसङ्गात् । अपि च यदि द्विचन्द्रदर्शनहेतोः दोषत्वमविद्यात्वं च न स्यात्, तदा कथं तन्निरसनाय प्रेक्षावन्तः प्रवर्तेरन् । न हि अनिष्टलेशेनापि रहितं किंचित् विमृश्यकारिभिः निरसनीयं भवति, निरसनीयत्वे हि तदर्थं प्रेक्षावतां प्रवृत्तिः स्यादिति भावः । प्रयस्यत्तीति पाठः साधुः । ''यक्षु प्रयत्ने'' इति धातोः परस्मैपदित्वात् ।

ननु यद्यपुरुषार्थपर्यवसानं दोषत्वे आवश्यकम्, तर्हि लाघवात्तदेव दोषत्वप्रयोजकं स्यात्, न भ्रमहेतुत्वमपि । तथा च लीलारसहेतुतया ब्रह्मणो माया गुण एवास्तु इति शङ्कते- **मा भूत्तर्हीति** । विकल्पपूर्वकं शङ्कां परिहरति - **सा किमित्यादिना** । सा ब्रह्मणो माया निवर्तनीया न वा । आद्येऽपि ब्रह्मेच्छया वा अन्यतो वा । यदि ब्रह्मेच्छया कथं पुरुषार्थैकपर्यवसायित्वम् । या निवर्तनीया तस्याः अपुरुषार्थत्वेन तन्निवृत्तेः पुरुषार्थत्वाभावात् । न चान्यतः तदुच्छेदः । ब्रह्ममायामोहितैः अल्पज्ञानशक्तिभिः जीवैः सर्वज्ञस्यापरिमितशक्तेः ब्रह्मणः अनन्तपुरुषार्थसाधिकायाः मायायाः निवर्तयितुमशक्यत्वादित्यर्थः । एतदुक्तं भवति-सर्वज्ञः सर्वशक्तिः ईश्वरः स्वप्रयोजनसाधिकाया मायायाः परैरुच्छेदं न सहेतेति अन्यैस्तदुच्छेदोऽशक्य इति । ननु माया ब्रह्मेच्छया वा

अपहर्तुमशक्यत्वात् । न च स्वतः कदाचिन्माया उच्छेदिनीति वाच्यम्; अहेतुकविनाशेन क्षणभङ्गावतारात् (पातात्) । अविशेषात् इतः पूर्वमेव तदुच्छेदप्रसङ्गाच्च। ततश्चानुच्छेदपक्षाव(ति)शेषे नित्यैव माया ब्रह्मस्वरूपानुबन्धिनी स्यात् ।। अस्तु मायायाः नित्यत्वम्, तथाऽपि न ब्रह्माज्ञानप्रसङ्ग इतीष्टप्रसङ्गत्वमेवेति चेन्न; ब्रह्मस्वरूपनुबन्धिनी हि माया किं ब्रह्मवत्परमार्थभूता, उतापरमार्थभूता ? नाऽऽद्यः; अद्वैतपरतया युष्माभिरभ्युपेतैः श्रुतिशतैः विरोधप्रसङ्गात् । अपसिद्धान्ताच्च । अथ पुनर्मायामपि ब्रह्मस्वरूपेऽन्तर्भाव्य श्रुतिविरोधादिकं परिजिहीर्षसि; तथा च सति ब्रह्मण एव मायाशब्देनोपचारात् तस्य च स्वमात्रप्रकाशचिन्मात्रवपुषः परदर्शनहेतुत्वाभावात् परव्यामोहनादिकमेव न स्यात् ।। परदर्शनमपि ब्रह्मणः स्वभाव इति चेदिष्येत, हन्त ! जितं सगुणवादेन ।

अन्येच्छया वा न निवर्तते; किं तु स्वत एव कहाचिन्नश्यतीत्याशङ्क्य हेतुं विना बिनाशाङ्गीकारे क्षणिकवादावतारप्रसङ्ग इत्याह - **न च स्वत इति** । किं च इतः पूर्वमेव तस्या उच्छेदप्रसङ्गः, हेत्वपेक्षाविरहात् इत्याह-**अविशेषादिति** । अहेतुकत्वाविशेषादित्यर्थः। ततश्च पूर्वमिवेदानीमप्यनुच्छेद इति माया नित्या ब्रह्मस्वरूपानुबन्धिनी ब्रह्मस्वरूपानुसारिणी स्यादित्याह-**ततश्चेति** । **अस्तु इति** । मायायाः नित्यत्वमस्तु; तथापि न ब्रह्मज्ञानप्रसङ्ग इति मायाया; नित्यत्वप्रसज्जनमिष्टमेवेति शङ्का । परिहरति-**ब्रह्मस्वरूपेति** । ब्रह्मस्वरूपमनुसरन्ती माया ब्रह्मवत् परमार्थभूता अपरमार्थभूता वा । नाद्यः, परमार्थवस्तुद्वयप्रसङ्गेन अद्वैतपरतया भवदभिमतैः श्रुतिशतैर्विरोधप्रसङ्गात् । अपसिद्धान्ताञ्च । यदि तु मायामपि ब्रह्मस्वरूपेऽन्तर्भाव्य श्रुतिविरोधादिकं परिहर्तुमिच्छसि, तदा ब्रह्मण एव मायाशब्देन उपचारात् ब्रह्मणश्च स्वमात्रप्रकाशरूपचैतन्यमात्रस्वरूपस्य परदर्शनहेतुत्वाभावात् परव्यामोहनादिकार्यमेव न स्यात् । यदि च परदर्शनमपि ब्रह्मणः स्वभाव इतीष्यते, तर्हि ब्रह्मण; सगुणत्वं स्यादिति भावः ।

नापि द्वितीयः; नित्यायास्तस्या मिथ्यात्वस्य साधयितुमशक्यत्वात् । न ह्यबाधितमपि मिथ्येति वक्तुं शक्यम् ॥ बाधिताऽपि द्विचन्द्रादिबुद्धिवत् नित्यमनुवर्तत इति चेन्न; भवत्पक्षे (५) बाधितानु वृत्त्यसम्भवस्योक्तत्वात् । नित्यस्यापि मिथ्यात्वे कथम्, “अनाशी परमार्थश्च प्राज्ञैरभ्युपगम्यते” इति पराशरादिवचनं निर्वक्ष्यसि? ब्रह्मणोऽपि मिथ्यात्वप्रसङ्गं कथं परिहरिष्यसि ॥ अबाधादिति चेन्न; तत्रापि यत्किंचिद्बाधकस्य सुवचत्वात् । प्रमाणाप्रमाणविभागस्य त्वयैव शिथिलीकृतत्वात्।

नित्यैव माया अपरमार्थभूता इति द्वितीयपक्षं दूषयति-**नापि द्वितीय इति** । ब्रह्मवत् नित्यायाः मायाः अपरमार्थत्वस्य साधयितुमशक्यत्वात् । तथा हि नित्येयं माया अबाधिता वा वाधिता वा । नाद्यः, अबाधितायाः मिथ्यात्वासंभवात् । न द्वितीयः । बाधितायाः नित्यत्वासंभवात् इति भावः । ननु बाधितापि माया बाधितानुवृत्तिवशान्नित्यमनुवर्तते, अतः सा नित्या परमार्था चेति शङ्कते - **बाधितापीति** । समाधत्ते- **भवत्पक्ष इति** । भवन्मते बाधितानुवृत्तिर्न संभवतीति पञ्चमे बाधितानुवृत्तिभङ्गवादे स्थापितत्वादित्यर्थः । अपि च नित्यस्यापि मिथ्यात्वे परमात्मनः नित्यस्य मिथ्यात्वप्रसङ्गेन

“अनाशी परमार्थश्च प्राज्ञैरभ्युपगम्यते” इति विष्णुपुराणवचनं कथं निर्वोढव्यं भवेत् । ब्रह्मणः नित्यस्य मायावत् मिथ्यात्वप्रसङ्गः कथं त्वया परिहरिष्यते । नित्यायाः मायायाः ज्ञाननिवर्त्यत्वाभावेऽपि मिथ्यात्वे ब्रह्मणोऽपि मिथ्यात्वं कुतो न स्यात्, अविशेषादिति भावः । ननु ब्रह्मणः निषेधाभावात् न मिथ्यात्वम्; मायायास्तु निषिद्धत्वात् मिथ्यात्वमिति शङ्कते - **अबाधादिति** । समाधत्ते - **तत्रापीति** । ब्रह्मण्यपि “सर्वं शून्यम्” इत्यादिवाक्यस्य निषेधकस्य सुवचत्वादित्यर्थः । ननु प्रमाणतो निषिद्धं मिथ्या, प्रमाणेन अनिषिद्धं सत्यम् । ब्रह्म तु न प्रपञ्चवत् प्रमाणेन निषिद्धम्; अतो न मिथ्येति आशङ्क्य प्रमाणाप्रमाणविभागस्त्वयैव शिथिलीकृत इति परिहरति - **प्रमाणेति** । ब्रह्ममाययोरुभयोर्नित्यत्वे उभयनिषेधस्यापि प्रामाण्यमप्रमाण्यं वा स्यात्, अविशेषादिति भावः ।

किंचेयं माया परमार्थत्वेन ब्रह्मणः प्रकाशते, उतापरमार्थत्वेन ? पूर्वत्र सिद्धं ब्रह्माज्ञानम् । उत्तरत्र कथं तया क्रीडितुमिच्छेत् ? कथं च तन्मूलां (लतया) मिथ्यात्वेनैव प्रतीयमानां क्रीडामभिनिविशेत ? न हि क्रीडोपकरणानि तन्मूलां क्रीडां तदुभयप्रतिभासस्वरूपं चापरमार्थतया जानतां प्रेक्षावतां क्रीडारसो निष्पद्यते।। बालोन्मत्तादयः कथं प्रतिबिम्बादिभिः क्रीडन्तीति चेन्न; तेषां तदानीं प्रतिबिम्बादेस्तत्प्रतिभासस्य च मिथ्यात्वग्रहणाभावात्।। अस्त्विहापि बालादिवत् ब्रह्म । तथा च स्मरन्ति, ''बालः क्रीडनकैरिव'', ''क्रीडतो बालकस्येव चेष्टां तस्य निशामय'' इत्यादीति चेन्न; उन्मत्तवदीश्वरस्याविस्रम्भणीयत्वप्रसङ्गात्। स्वयं व्यामुह्यतः परव्यामोहनसामर्थ्यासंभवाच्च; मुमुक्षुभिरुपेक्ष्यत्वप्रसङ्गाच्च ।। बाल(क)दृष्टान्तस्तर्हि कथमिति चेत्; सर्वथा सादृश्यस्य दृष्टान्तानङ्गत्वात्। अन्यथा बालत्वादेरपि प्रसङ्गात्।

सिद्धं ब्रह्माज्ञानमिति । मायां यदि परमार्थत्वेन ब्रह्म पश्येत्, तर्हि ब्रह्मण: अज्ञानमावश्यकम् । अपरमार्थवस्तुन; परमार्थत्वेन दर्शनस्याज्ञानमूलकत्वादित्यर्थ: । उत्तरत्रेति । मायां ब्रह्म अपरमार्थत्वेन पश्यतीति पक्षे इत्यर्थ: । तया अपरमार्थभूतया मायया । शिष्टं स्पष्टम् ।

अत्र चण्डमारुतम्-

ननु मायाया: ब्रह्मरूपाभावप्रतियोगित्वात् तन्निषेध:, ब्रह्मणश्चाभावप्रतियोगित्वाभावान्न ब्रह्मनिषेध: प्रमाणमिति चेत् - न । मायाया अपि ब्रह्माभावत्वावश्यंभावात्, अविशेषात् । त्वयाप्यविद्याया: ब्रह्माभावत्वाङ्गीकारात् ।

नन्वस्माकं कल्पितसिद्ध्यधीना मायाया: अभावप्रतियोगित्वसिद्धिरिति चेत्- किमत: । एवमपि अभावप्रतियोगित्वस्यानपायात् । अकल्पिताभावप्रतियोगिनिषेध: प्रमाणमिति चेत् - अकल्पितत्वं यदि नित्यत्वम्, तत् मायाया अप्यस्ति । यदि सत्यत्वम्,

किंच यस्य जीवब्रह्मणोरद्वैतं तत्त्वम्, तस्य कथं जीवाज्ञानं ब्रह्माज्ञानं न स्यात् ? अथ यदि जीवो ब्रह्मणस्तत्त्वतो भिन्नः, ततः कथमैक्यज्ञानान्मोक्ष इत्यादिकं घटेत ?

अतो यस्य मते माया सत्या, मायाविनश्च भगवतो न भ्रमः, व्यामोहनीयाश्च जीवाः परस्मादत्यन्तभिन्नाः सत्याश्च, परेण च यथावद्दृश्यन्ते–तस्यैव मायाविद्याविभागेन ब्रह्माज्ञानं सुपरिहरम्; न तु निर्विशेषैकचिन्मात्रवादिन इति ॥

॥ इति शतदूषण्यां मायाविद्याविभागभङ्गवादः द्विचत्वारिंशः ॥ ४२ ॥

तदा तत् यद्यबाधितत्वं तन्न ब्रह्मणोऽपि, केनचित् बाधादित्युक्तत्वात् । ज्ञानानिवर्त्यत्वं मायाया अपि सिद्धमिति विपरीतदर्शतहेतुरविद्येति पक्षाभिप्रायेणोक्तम् । अपुरुषार्थपरमार्थदर्शनहेतुरविद्येति पक्षे तु मायाया अपारमार्थ्याज्ञानात् ब्रह्मणोऽसर्वज्ञत्वप्रसङ्ग इति ।

इति श्रीशतदूषणीव्याख्यायां तत्पर्यप्रकाशिकायां
मायाविद्याविभागभङ्गवादः द्विचत्वारिंशः ॥

* * *

अथ निवर्तकानुपपत्तिवादः त्रिचत्वारिंशः ॥ ४३ ॥

श्लो. अनन्यानां पुंसामनवधिकभक्तिस्थितिजुषाम्
अविद्याध्वंसो यच्चरणवरिवस्यापरिणतेः ।
तदेकं सत्संवित्सुखमवधिदूरीकृतगुणं
हताशेषावद्यं हयवदनमीडीमहि महः ॥

प्रतिष्ठितोऽयमर्थः प्रमाणपरतन्त्राणाम्—यदुत कर्मयोग-ज्ञानयोगपरिशोधितान्तःकरणस्य तत्तद्वर्णाश्रमोचितनित्यनैमित्तिकोपसंहृति-निषिद्धपरिहार-निष्ठस्य अनवरतविहितध्यानार्चनादिक्रमपरिणतनिरतिशयप्रीतिरूपतापन्न-निदिध्यासननिरुद्धसुहृद्द्विषत्संक्रमणीयपूर्वोत्तरपुण्यपापस्य फलोन्मुखकर्मपर्य-

---

अथ निवर्तकानुपपत्तिवादः त्रिचत्वारिंशः ॥

अनन्यानां पुंसामनवधिकभक्तिस्थितिजुषा-
मविद्याध्वंसो यच्चरणवरिवस्यापरिणतेः ।
तदेकं सत्संवित्सुखमवधिदूरीकृतगुणं
हताशेषावद्यं हयवदनमीडीमहि महः ॥

अनन्यशरणानामनवधिकभक्तिनिष्ठानामविद्याध्वंसो यच्चरणसेवापरिणामात् भवति, तत् एकं सत्संवित्सुखरूपमनवधिकगुणं अशेषावद्यरहितं हयवदनं तेजः स्तुवीमहि । परमतं निरस्यन् स्वमते निवर्त्यं निवर्तकं च व्युत्पादयति अनेन पद्येन । स्वमतोपन्यासेन वादप्रतिपाद्यभूतं मतान्तरनिरसनमर्थात् सिध्यति । सत् = निरुपाधिकसत्ताकम् । संवित्सुखं = ज्ञानानन्दस्वरूपम् ।

अद्वैतज्ञानस्याविद्यानिवर्तकत्वानङ्गीकारे अनिर्मोक्षप्रसङ्ग इत्याशङ्कां निराकर्तुमुपोद्घातरीत्वा स्वमतमाह-**प्रतिष्ठित** इति । अनुष्ठिताभ्यां कर्मयोगज्ञानयोगाभ्यामन्तः-

वसाननिर्मुक्तस्थूलसूक्ष्माचित्संसर्गस्य तथाविधभजनाराधितपरमपुरुषप्रसादादेव सार्वज्ञ्यापरपर्याया निश्शेषाविद्यानिवृत्तिरिति । ये पुनरद्वैतविज्ञानादेव ब्रह्माज्ञाननिवृत्तिरिति जल्पन्ति, तान् प्रति ब्रूमः, कथंभूतमिदमद्वैतज्ञानमिति । (१) किं ब्रह्मस्वरूपभूतात् ज्ञानाद्भिन्नम्, (२) उताभिन्नम्, (३) यद्वा भिन्नाभिन्नम्, (४) उतानुभयात्मकम्, (५) उताशक्यवेदनकथम्भावं किञ्चिदिति ।

न प्रथमः; तद्धि निर्विषयम्, सविषयं वा ? पूर्वत्र ज्ञानत्वमेव हीयेत । वृत्तिरूपं हि ज्ञानं सविषयमेवेति भवतामपि सिद्धान्तः । उत्तरत्रापि कस्तस्य

करणं शुद्धं भवति । ततः तत्तद्वर्णाश्रमोचितानां नित्यनैमित्तिककर्मणामनुष्ठाने निषिद्धकर्मत्यागे च निष्ठावतः पुरुषस्य अनवरतं कृतेन भगवद्ध्यानार्चनादिना क्रमेण परिपक्वं यत् निरतिशयप्रीतिरूपापन्नं निदिध्यासनं तेन पूर्वोत्तरपुण्यपापानां विश्लेषो भवति । तानि च पुण्यपापानि सुहृत्सु द्विषत्सु च संक्रमणीयानि । ततः फलोन्मुखस्य प्रारब्धकर्मणः अवसाने स्थूलसूक्ष्माचित्संसर्गान्मुक्तः भवति । ततः तस्य पूर्वोक्तभक्त्याराधितस्य परमपुरुषस्यानुग्रहादेव सर्वज्ञत्वरूपा निःशेषाविद्यानिवृत्तिर्भवतीत्ययमर्थः निर्णीतः श्रुतिस्मृत्यादिभिः - इति स्वसिद्धांन्तः ।

अथ परमतमनूद्य निरस्यति - **ये पुनरित्यादिना** । **तद्धीति** । नन्वद्वैतज्ञानादेव ब्रह्माज्ञाननिवृत्तिरित्युक्तत्वात् कथं निर्विषयत्वविकल्प इति चेत् - न । पर्युदासलक्षणया द्वैतज्ञानादन्यत् अद्वैतज्ञानमिति विवक्षोपपत्तेः । पर्युदासे च नञिवयुक्तन्यायेन ज्ञानत्वेन द्वैतज्ञानसदृशं ज्ञानान्तरमेव गृह्यते । यथोक्तं वार्तिके - ''नञिवयुक्तमन्यसदृशाधिकरणे तथाह्यर्थगतिः'' इति । तत्र भाष्यम् - ''नञ्युक्तम् इवयुक्तं च कार्यमन्यस्मिन् तत्सदृशे विज्ञायते । तथाह्यर्थो गम्यते अब्राह्मणमानयेत्युक्ते ब्राह्मणसदृशः क्षत्रियः आनीयते । नासौ लोष्टमानीय कृती भवति'' इति । निवर्तकज्ञानस्य ब्रह्मस्वरूपातिरिक्तत्वाङ्गीकारे तस्य वृत्तिरूपत्वलाभात् वृत्तेश्च सविषयत्वात् ।

न प्रथम इत्यादि । अज्ञाननिवर्तकत्वेनाभिमतमद्वैतज्ञानं ब्रह्मस्वरूपभूतात् ज्ञानात्

विषयः ? (१) किं ब्रह्मस्वरूपम्, (२) उत तदेव अविद्याशबलम्, (३) यद्वा तद्व्यतिरिक्तम्; (४) तस्य मिथ्यात्वं वा, (५) अथवाऽन्यदेव किञ्चिदिति । नाद्यः, आत्मस्वरूपस्येव ज्ञानस्य तस्यापि भ्रमनिवर्तकत्वायोगात्; उभयोरपि यथावस्थितब्रह्मस्वरूपप्रकाशरूपत्वाविशेषात् । ननु (ब्रह्म) स्वरूपप्रकाशोऽध्यासौपयिकाधिष्ठानप्रकाशात्मकः, यथेदं रजतमित्यत्र इदमर्थप्रकाशः । विषयप्रकाशस्त्वध्यासनिवर्तकः, यथेदमर्थस्य शुक्तिरिति प्रकाशः रजतव्यावर्तकः-

---

भिन्नमिति प्रथमकल्पे तत् निर्विषयं वा सविषय्यं वेति विकल्पः । तत्र नाद्यः; निर्विषयस्य ज्ञानत्वासंभवात् । ब्रह्मस्वरूपात् भिन्नं हि ज्ञानं वृत्तिरूपमिति भवतां मतम् । वृत्तिरूपं च ज्ञानं सविषयमेवेति भवतामपि सिद्धान्तात् निर्विषयत्वं ब्रह्मस्वरूपभिन्नस्य ज्ञानस्यासिद्धम्। द्वितीये सविषयत्वपक्षेऽपि कस्तस्य विषयः? ब्रह्मस्वरूपं वा अविद्याशबलं ब्रह्मस्वरूपं वा, ब्रह्मस्वरूपव्यतिरिक्तं वा, तस्य मिथ्यात्वं वा, अन्यदेव किंचित् विषय इति पञ्चधा, विकल्पः । तत्राद्यकल्पं विस्तरेण दूषयति - **नाद्य** इत्यारभ्य **प्रपञ्चस्यापि सत्यत्वप्रसङ्गात्** इत्यन्तेन ग्रन्थेन । **आत्मस्वरूपस्यैवेति** । ब्रह्मस्वरूपभूतात् ज्ञानात् भिन्नस्य ज्ञानस्य सविषयकस्य ब्रह्मस्वरूपं विषय इति आद्यकल्पो न युक्तः । ब्रह्मस्वरूपभूतं ज्ञानं यथा अविद्यायाः निवर्तकं न भवति, तथा ततोऽन्यत् ज्ञानमपि ब्रह्मस्वरूपमात्रप्रकाशरूपत्वात् अविद्यायाः भ्रमस्य च निवर्तकं न भवति । विषयवैलक्षण्यविरहात् इत्यर्थः । तत्र शङ्कते - **ननु स्वरूपेत्यादिना** । शङ्कितुरयमाशयः - उभयोः समानविषयकत्वेऽपि अध्यासानुपयोगि अधिष्ठानज्ञानं तु न निवर्तकम् । इदमिति ज्ञानस्य शुक्तिरिति ज्ञानस्य च समानविषयकत्वेऽपि इदमिति ज्ञानस्य रजताध्यासोपयोग्यंधिष्ठानज्ञानरूपतया न रजतभ्रमनिवर्तकत्वम्, शुक्तिरिति ज्ञानस्य तु रजताध्यासानुपयोगितया रजतभ्रमनिवर्तकत्वमिति दृश्यते । तद्वत् ब्रह्मस्वरूपभूतं ज्ञानमध्यासोपयोगित्वान्न भ्रमनिवर्तकम्, ब्रह्मस्वरूपविषयकं तद्भिन्नं ज्ञानं तु अध्यासानुपयोगित्वात् भ्रमनिवर्तकमिति विशेष इति ।

इति चेन्न-दत्तोत्तरत्वात् । न हीदमिति प्रकाशस्य शुक्तिरिति प्रकाशस्य चात्यन्तसमानविषयता । इदमिति प्रकाशस्य शुक्तिरजतसाधारणाकारविशिष्टगोचरत्वात् । शुक्तिरिति प्रकाशस्य रजतव्यावर्तकशुक्तित्वविशिष्टविषयत्वात् । अन्यथा तस्यापि भ्रमानिवर्तकत्वप्रसङ्गात् । न चात्राप्याकारभेदोऽधिको वृत्तिज्ञानेन बोध्यत इति वाच्यम्; तस्याऽऽकारस्य सत्यत्वे सगुणसिद्धान्तोररीकरणप्रसङ्गात् ।

समाधत्ते- **दत्तोत्तरत्वादिति** । उभयोरपि यथावस्थित ब्रह्मस्वरूपप्रकाशरूपत्वाविशेषादिति ग्रन्थेन समाधानस्योक्तत्वादित्यर्थः । दृष्टान्तेऽपि निवर्तकत्वानिवर्तकत्वयोर्विषयभेद एव प्रयोजक इत्याह- **न हीत्यादिना** । इदमिति प्रकाशः शुक्तिरजतसाधारणेदंत्वाकारविशिष्टविषयकः, शुक्तिरिति प्रकाशस्तु रजतव्यावर्तकशुक्त्यसाधारणशुक्तित्वविशिष्टविषयक इति प्रकारभेदात् निवर्तकत्वानिवर्तकत्वे दृष्टान्ते उपपद्येते । दार्ष्टान्तिके तु नैवं वक्तुं शक्यम्, ब्रह्मणो निर्धर्मकत्वादिति भावः । अत्र **साधारणाकारेति** । शुक्त्यसाधारणत्वेनागृहीतधर्मो विवक्षितः । तेन "इदंत्वस्य तत्तद्व्यक्तिपर्यवसिततया न केवलान्वयित्वम्" इति जिज्ञासानुपपत्तिवादोक्तेन न विरोधः" इति चण्डमारुतग्रन्थोऽवधेयः। परं तु जिज्ञासानुपपत्तिवादे मूले नायं विषयो दृश्यते ।

ननु इदंज्ञानशुक्तिज्ञानयोरप्यत्यन्तसमानविषयकत्वमेव । तत्र च भ्रमनिवर्तकत्वानिवर्तकत्वे उक्तप्रयोजकाभ्यामेवेत्याशङ्क्य अध्यासोपयोगानुपयोगावेव विषयवैलक्षण्याभावे न संभवत इत्याह - **अन्यथेति** । **तस्यापि** = शुक्तिज्ञानस्यापि । ब्रह्मस्वरूपं विषय इत्यत्र किं ब्रह्मस्वरूपमात्रं विषयः, उतानन्दत्वादिविशिष्टब्रह्मस्वरूपमिति विकल्पं हृदिनिधाय आद्यः कल्पो निरस्तः । इदानीं द्वितीयमाशङ्क्य निराकरोति - **न चात्रापीति** । ब्रह्मस्वरूपभूतज्ञानापेक्षया वृत्तिज्ञाने आकारविशेषः यदि अधिकतया प्रकाशते तर्हि तस्य आकारस्य सत्यत्वे ब्रह्मणः सगुणत्वसिद्धान्तोऽङ्गीकार्यः स्यात् । मिथ्यात्वे वृत्तिज्ञानस्य मिथ्याविषयकत्वात् भ्रमत्वप्रसङ्गेन अज्ञानानिवर्तकत्वं स्यादिति भावः । ननु मालायां कस्यचित् आदौ सर्पभ्रमो जातः । अनन्तरं तस्यामेव भूरन्ध्रभ्रमो जातः । तेन च

मिथ्यात्वे भ्रान्तिज्ञानत्वादेव सुतरामनिवर्तकत्वप्रसङ्गात् ।। वसुन्धरारन्ध्रबोधे मालाभुजङ्गनिवृत्तिवदुपपद्यत इति चेन्न; तस्यैव भ्रमरूपत्वेन तद्वदेव स्वयं स्वविषयाबाधकत्वात् सर्वभ्रमनिवृत्त्यसिद्धिप्रसङ्गात् । बाधकान्तरगवेषणायामनवस्थानात् । स्वपरनिर्वाहकसमाधेरपि बाधकज्ञानविषयीभूतप्रपञ्चविरोधिमिथ्याकाराध्याससहस्वरूपप्रकाशातिरिक्तप्रकाशाभावेन तस्याकारस्य बाध्यत्वासिद्धे(द्धि?)रेवेति परिहृतत्वात् । स्वस्यैव स्वविषयार्थबाधकत्वे व्याघाताच्च ।

मालासर्पः तद्भ्रमश्च निवर्तते । एवं च तत्र भ्रमस्यापि भ्रमनिवर्तकत्वं संभवतीत्याशङ्कते - **वसुन्धरारन्ध्रेति** । भूरन्ध्रभ्रमे सतीत्यर्थः । **मालाभुजङ्गेति** । मालायां प्रतीयमानस्य सर्पस्य निवृत्तिवत् इत्यर्थः । परिहरति-**तस्यैवेति** । वसुन्धरारन्ध्रबोधस्यैवेत्यर्थः । वसुधारन्ध्रभ्रमस्थले वसुधारन्ध्रभ्रमस्य स्वविषयाबाधकत्वात् सर्पभ्रमनिवृत्त्यभाववत् अधिकाकारविशिष्टब्रह्मज्ञानस्य स्वविषयाबाधकत्वात् स्वस्य च भ्रमरूपत्वात् सर्वभ्रमानिवृत्तिप्रसङ्गादित्यर्थः । **समाधेरपीत्यस्य परिहृतत्वात्** इत्युत्तरेणान्वयः । **बाधकज्ञानविषयेति** । अध्याससहिष्णुप्रकाशातिरिक्तो हि अधिष्ठानप्रकाशः अध्यासनिवर्तको भवति । तस्मात् अद्वितीयत्वरूपाधिकाकारविशिष्टब्रह्मविषयकतया प्रपञ्चनिवर्तकत्वेऽपि तदाकाराध्याससहाधिष्ठानस्वरूपप्रकाशातिरिक्ततद्विरुद्धाकारप्रकाशाभावेन तस्याकारस्य बाध्यत्वासिद्धेरिति भावः । **परिहृतत्वात्** परिहृतप्रायत्वात् । **यथावस्थितब्रह्मस्वरूपेत्यादि**पूर्वग्रन्थेनेति शेषः । **व्याघाताच्चेति** । साक्षिणोऽविद्याभासकत्वात् न तद्बाधकत्वमिति स्ववचनेन विरोधादित्यर्थः ।

ननु अयं देवदत्त इति ज्ञानमभिज्ञा । सोऽयं देवदत्त इति ज्ञानं प्रत्यभिज्ञा । उभयत्रापि देवदत्त एव विषयः । परंतु प्रत्यभिज्ञायाः तद्भिन्नोऽयं (पूर्वदृष्टात् देवदत्तात् भिन्नोऽयम्) इत्यतत्त्वभ्रमनिवर्तकत्वं भवति । अभिज्ञायास्तु तादृशभ्रमनिवर्तकत्वं न संभवति । एवं स्वरूपरूपप्रकाशस्य तदतिरिक्तप्रकाशस्य च प्रकाश्यविषयभेदाभावेऽपि

अस्तु तर्ह्यभिज्ञाप्रत्यभिज्ञयोरिव स्वरूपतद्विषयज्ञानयोः साध्यभेद इति चेन्न; दत्तोत्तरत्वात्॥ तत्रैतत् स्यात्, यथा देवदत्तगोचरत्वाविशेषेऽप्यसावित्यवगाहमाना अभिज्ञा न देवदत्तभेदभ्रमं (अदेवदत्तभ्रमं) निवर्तयति, सोऽयमिति प्रत्यभिज्ञाबुद्धिस्तु तत्प्रतिक्षेपाय प्रगल्भते-तद्वदत्रापि स्वरूपप्रकाशः सोऽहमिति कल्पिताकारप्रकाशश्चेति चेन्न; दत्तोत्तरत्वात्। तत्राप्यभिज्ञाप्रत्यभिज्ञयोः प्रकाश्याकारभेदोऽस्ति। अन्यथा अभिज्ञाप्रत्यभिज्ञयोर्भेदासिद्धिप्रसङ्गात्। को वा भवन्तमन्तरेण स इत्यधि (इत्याधि) कोल्लेखिनीं प्रत्यभिज्ञामसावित्येतावन्मात्रोल्लेखिन्या अभिज्ञया सह

देवदत्तविषयकाभिज्ञाप्रत्यभिज्ञयोः अतत्त्वभ्रमनिवर्तकत्वतदभाववत् अविद्यानिवर्तकत्वतदभावौ उपपद्येते इति शङ्कते - **अस्तु तर्हीति**। यद्वा मिथ्याकाराविषयकः स्वरूपमात्रविषयक एव प्रकाशो बाधकः। न च स्वप्रकाशस्यापि बाधकत्वापत्तिः अभिज्ञाप्रत्यभिज्ञयोरिव समानविषयकत्वेऽपि वैलक्षण्यसंभवादिति शङ्का। **दत्तोत्तरत्वात् इति**। पूर्ववदेवेति शेषः। अभिज्ञाप्रत्यभिज्ञयोरपि भिन्नविषयकत्वमेवेति भावः।

नन्वभिज्ञाप्रत्यभिज्ञयोर्न विषयभेदः, स्वरूपमात्रविषयकत्वात्। सोऽयं देवदत्त इति वाक्यस्याखण्डार्थपरत्वव्यवस्थापनेन तत्समानविषयकप्रत्यभिज्ञाया अपि स्वरूपमात्रविषयकत्वावश्यंभावात् इत्याशयेन शङ्कते-**तत्रैतत् स्यादिति**। ''इष्टं हि विदुषां लोके समासव्यासधारणम्'' इति संक्षेपेणोक्तस्य विस्तरेणोक्तिरिति काचित् प्राचीनशैली। तद्रीत्यात्र **अस्तु तर्हीति** पूर्वपक्षवाक्यस्यैव विवरणं **'तत्रैतत् स्यात्'** इत्यादिना। अयमिति वक्तव्ये असाविति अदःशब्दप्रयोगात् अत्र देवदत्तो न विषयः अपि तु पूर्वदृष्टात् देवदत्तादन्य एवेति विवक्षितम्। **देवदत्तभेदभ्रमम्** = पूर्वदृष्टदेवदत्तप्रतियोगिकभेदभ्रमम्। **तत्प्रतिक्षेपाय** = देवदत्तभेदभ्रमनिवर्तनाय। **प्रगल्भते** = शक्तो भवति। **दत्तोत्तरत्वादिति**। पूर्ववदेवेति शेषः। तस्य अखण्डार्थत्वं च निरस्तमेवेति भावः। गत्यन्तराभावात् पूर्वदूषितामेव प्रकाश्याकारभेदशङ्कां पुनरुत्थाप्य परिहरति - **तत्रेति**। यद्वा दत्तोत्तरत्वादिति समाधानवाक्यस्य विवरणं - **तत्रापीत्यादिना**।

धारावाहिकवत् अत्यन्तसमानविषयामभिमन्येत। अत्रापि आकारातिरेकाभ्युपगमे तु दत्तमुत्तरम्।। प्रकाशातिरेकिविषयि(य) त्वतदभावाभ्यां वैषम्यमिति चेत्; किं

अत्र प्रकरणे-

“ननु विषयवैषम्याभावेऽपि कस्यचित् ज्ञानस्य भ्रमाविरोधित्वं कस्यचित् भ्रमविरोधित्वं च दृष्टमभिज्ञाप्रत्यभिज्ञयोः । अयमेको देवदत्त इत्यभिज्ञायाः ऐक्यविषयत्वेऽपि पूर्वदृष्टादयमन्य इति पुरुषद्वित्वभ्रमो दृष्टः । प्रत्यभिज्ञायास्तु सोऽयमेको देवदत्त इति देवदत्तैक्यविषयत्वेऽपि द्वित्वविरोधित्वं दृष्टमिति विषयवैषम्याभावेऽपि प्रमाणज्ञानस्य भ्रमनिवर्तकत्वं युक्तमिति शङ्कायामाह - **एतदुक्तमिति** । अनेनाभिज्ञाप्रत्यभिज्ञयोरपि विषयवैषम्यमुक्तं भवति । अभिज्ञायामेकस्य धर्मिणः एकदेशकालसंबन्धित्वप्रतीतिः न द्वित्वभ्रमविरोधिनी । एकस्य धर्मिणः कालद्वयदेशद्वयसंबन्धित्वं हि ऐक्यम्; तत्तु द्वित्वविरोधीति तत्प्रतिपत्तिः द्वित्वभ्रमं निवर्तयति। अतस्तत्रापि विषयवैषम्यमस्तीति फलितम्-”इति श्रुतप्रकाशिकाग्रन्थोऽप्यनुसन्धेयः । तत्र द्वित्वभ्रम इत्यस्य भेदभ्रम इत्यर्थः । एवम्-

“अभिज्ञाप्रत्यभिज्ञयोरपि हि देशकालादिविशेषात् अस्त्येव मात्रया वैषम्यम् ।

अभिज्ञाया; प्रत्यभिज्ञा विशिष्टविषया सती । तदशक्यभिदाबाधप्रगल्भा न तथात्र ते ।।”

इति न्यायसिद्धाञ्जनसूक्तिरप्यनुसन्धेया । **दत्तमुत्तरमिति** । सगुणत्वप्रसङ्गादि ।

ननु ब्रह्मस्वरूपभूतज्ञानतद्विषयकवृत्तिज्ञानयोः प्रकाश्याकारभेदाभावेऽपि सविषयत्वतदभावाभ्यां वृत्तिज्ञानत्वतद्भिन्नत्वाभ्यां च वैषम्यमस्ति । तत एव निवर्तकत्वानिवर्तकत्वे उपपद्येते । न हि विषयभेदादेव निवर्तकत्वानिवर्तकत्वे नियते। तथा सति श्वेतत्वप्रत्यक्षानुमित्योः शङ्खपीतत्वभ्रमनिवर्तकत्वतदभावव्यवस्थानुपपत्तेरिति शङ्कते - **प्रकाशेति** । यद्वा ननु स्वप्रकाशस्य स्वविषयकत्वं नास्ति, अकर्मकत्वात् । वृत्तिज्ञानस्य तु सकर्मकत्वात् ब्रह्मविषयकत्वमस्तीति वैलक्षण्यमेव बाधाबाधोपपादकमिति शङ्कते- **प्रकाशेति** । शङ्खश्वेतत्वप्रत्यक्षस्यापि विरोधिविषयकप्रत्यक्षत्वेनैव पीतभ्रमनिवर्तकत्वम्; न

ततः ? बाधकत्वाबाधकत्वे प्रति अप्रयोजकत्वात् । वृत्तिज्ञानस्य हि बाधकत्वं यथावस्थितब्रह्मस्वरूपप्रकाशात्मकत्वेन; न तु वृत्तित्वाद्याकारेण । तथासति विरोधिप्रकाशातिरिक्तवृत्तित्वा(वृत्त्या) द्याकारबाध्यत्वेन मुद्गरादिनिवर्त्यसर्पघटादेरिव प्रपञ्चस्यापि सत्यत्वप्रसङ्गात् ।

एतेन (२) अविद्याशबलं तदेव विषय इति दत्तोत्तरम्, साक्षिप्रत्यक्षवदेव

तु प्रत्यक्षत्वमात्रेण, अतिप्रसङ्गादित्याशयेन परिहरति-**किं तत** इत्यादिना । विषयित्वतदभावौ स्तां नाम; न तु तयोः बाधकत्वाबाधकत्वे प्रति प्रयोजकत्वम् । किं तर्हि प्रयोजकमिति शङ्कायामाह-**वृत्तिज्ञानस्य हीति** । वृत्तित्वादीत्यादिशब्देन विषयित्वं गृह्यते । **तथा सतीत्यादि** । विरोधिविषयकप्रकाशत्वातिरिक्तो वृत्तित्वाद्याकारो यस्य तद्बाध्यत्वेनेत्यर्थः। विरोधिसाक्षात्कारत्वेन ज्ञाननिवर्त्यत्वस्य मिथ्यात्वप्रयोजकत्वाङ्गीकारादिति भावः । अत्र प्रपञ्चः सत्यः विरोधिविषयकप्रकाशत्वातिरिक्ताकारवद्बाध्यत्वात् मुद्गरादिनिवर्त्यघटादिवत् इत्यनुमानमभिप्रेतम् । दृष्टान्ते तादृशमुद्गारत्वरूपाकारवन्मुद्गरबाध्यत्वम् । पक्षे तु वृत्तित्वविषयित्वरूपाकारवदृत्तिबाध्यत्वम् ।

एतावता अज्ञाननिवर्तकमद्वैतज्ञानं ब्रह्मस्वरूपभूतात् ज्ञानात् भिन्नमिति प्रथमकल्पे तत्किं निर्विषयं सविषयं वेति विकल्पे कृते तत्र सविषयमिति द्वितीयकल्पे स विषयः क इति प्रश्नपूर्वकं पञ्चधा कृतेषु विकल्पेषु ब्रह्मस्वरूपं विषय इति प्रथमकल्पो निरस्तः । अथ अविद्याशबलं ब्रह्मस्वरूपं विषय इति द्वितीयकल्पं निरस्यति-**एतेनेति** । **तदेव=ब्रह्मैव** । एतेनेत्यस्य भ्रान्तित्वात् अध्याससहाधिष्ठानस्वरूपप्रकाशातिरिक्तप्रकाशाभावात् स्वस्य स्वविषयार्थबाधकत्वे व्याघाताच्चेत्यर्थः । एतदेव विवृणोति-**साक्षीति** । यथा साक्षिचैतन्यम् अविद्याप्रकाशकत्वात् भ्रमोपकारकं तथा अविद्याशबलब्रह्मविषयकं ज्ञानमपि भ्रमोपकारकं स्यादिति तस्य भ्रमानिवर्तकत्वप्रसङ्ग इति भावः ।

ननु कथमुपकारकत्वप्रसङ्गः, नहि साक्षिप्रत्यक्षस्य अविद्याविषयकत्वादेव भ्रमोपकारकत्वम्; किं तु अविद्यायाः साक्ष्यधीनसिद्धिकत्वात्, प्रपञ्चभ्रमस्य

भ्रमोपकारकत्वप्रसङ्गात्। अन्यथा साक्षिप्रत्यक्षस्यापि भ्रमनिवर्तकत्वप्रसङ्गेन प्रपञ्च-(प्रति) निर्भासस्याप्यनुदयप्रसङ्गात् । साक्षिप्रत्यक्षमपि हि अविद्याप्रकाशात्मकं स्वप्रकाशात्मकं च । (३) ब्रह्मव्यतिरिक्तमात्रगोचरत्वपक्षे स्वयं तद्भ्रमरूपत्वात् तद्बाधकरूपत्वसंभावनाऽपि नास्ति । न हि शुक्तिकलधौतधीरेव कलधौतधियमवधुनोति ।

(४) तन्मिथ्यात्वविषयपक्षस्तु तदा शोभते, यद्यधिष्ठानयाथात्म्यग्रहणमन्तरेणापि तन्मिथ्यात्वं सुग्रहं (त्वग्रहः) स्यात् । याथात्म्यग्रहरूपता च

चाविद्योपादानकत्वात् । निवर्तकत्वेनाभिमतायाः ब्रह्मस्वरूपविषयकवृत्तेश्चाविद्यास्वरूपसाधकत्वाभावादिति चेत् न । भ्रमोपकारकपदेन भ्रमानिवर्तकत्वस्य विवक्षितत्वात् ।

अन्यथेति । अविद्याविषयकवृत्तेरविद्यानिवर्तकत्वे अविद्याविषयकसाक्षिप्रत्यक्षस्याप्यविद्यानिवर्तकत्वप्रसङ्गेन अविद्योपादानकप्रपञ्चभ्रमस्याप्यनुदयप्रसङ्गादित्यर्थः । **साक्षिप्रत्यक्षमपीति** । स्पष्टोऽर्थः । यद्वा तद्व्यतिरिक्तमिति तृतीयकल्पं दूषयति - **ब्रह्मव्यतिरिक्तेति** । अद्वैतज्ञानं ब्रह्मस्वरूपात् भिन्नं ब्रह्मव्यतिरिक्तमात्रविषयकमिति पक्षे तस्य ज्ञानस्य भ्रमरूपत्वात् अधिष्ठानाविषयकत्वाच्च अज्ञानतत्कार्यप्रपञ्चभ्रमनिवर्तकत्वसंभावनापि नास्ति । अधिष्ठानविषकज्ञानस्यैव निवर्तकत्वादिति भावः । **न हीति** । शुक्तिरजतभ्रमस्याधिष्ठानविषयकस्याप्यारोप्यविषयकत्वेन अनिवर्तकत्वदर्शनात् आरोप्यब्रह्मव्यतिरिक्तमात्रविषयकज्ञानस्य भ्रमानिवर्तकत्वं कैमुतिकन्यायसिद्धमिति भावः।

ब्रह्मव्यतिरिक्तमिथ्यात्वविषयकमिति चतुर्थपक्षं दूषयति - **तन्मिथ्यात्वेति** । ब्रह्मव्यतिरिक्तस्य मिथ्यात्वं यदि अधिष्ठानयाथात्म्यग्रहमन्तरेण सुग्रहं स्यात् तदा स पक्षः शोभते । वस्तुतः ब्रह्मव्यतिरिक्तमिथ्यात्वज्ञानस्य अधिष्ठानयाथात्म्यविषयकत्वं न संभवति । याथात्म्यस्य स्वरूपत्वेऽध्यासानुपपत्तेः, स्वरूपातिरिक्तत्वे च सत्यत्वमिथ्यात्वविकल्पेन प्रागेव दूषितत्वादिति भावः ।

दूषितैव। किंच, इदं निवर्तकज्ञानं स्वविषयं ब्रह्मव्यतिरिक्तमिथ्यात्वं किं मिथ्यात्वेन गृह्णाति, उत सत्यत्वेन, उतानिर्द्धारितविशेषात्मनेति।

आद्ये व्याघातः, मिथ्यात्वस्य च मिथ्यात्वग्रहणे प्रपञ्चस्य सत्यत्वेन प्रकाशप्रसङ्गात्; स्वप्नावगतपितृमरणमिथ्यात्वेन पितृसत्यतावत्, सम्यग्रजतमिथ्यात्वमिथ्यात्वेन रजतसत्यतावच्च॥ ब्रह्मव्यतिरिक्तत्वोपाधिक्रोडीकारवशात् प्रपञ्चस्य

ननु अधिष्ठानयाथात्म्यग्रहणाभावेऽपि आरोपितस्य मिथ्यात्वं सुग्रहमेव। तद्रजतं मिथ्येत्याप्तोपदेशादिव ''नेह नानास्ति किंचन'' इति वाक्यात् प्रपञ्चमिथ्यात्वग्रहसंभवात् इति चेत् - न। मिथ्यात्वसाक्षात्कारस्य अधिष्ठानयाथात्म्यज्ञानं विना असिद्धेः, शाब्दज्ञानस्य च परोक्षतया अविद्यानिवर्तकत्वासिद्धेः।

किं चेत्यादि। इदं निवर्तकत्वेनाभिमतं ब्रह्मव्यतिरिक्तमिथ्यात्वविषयकं ज्ञानं किं ब्रह्मव्यतिरिक्तमिथ्यात्वरूपं स्वविषयं मिथ्यात्वेन विषयीकरोति, उत सत्यत्वेन, अथवा अनिर्धारितसत्यत्वमिथ्यात्ववत्तया इति विकल्पः। तत्र आद्यं दूषयति-**आद्ये व्याघात** इत्यादिना। प्रपञ्चमिथ्यात्वस्य मिथ्यात्वेन ग्रहणे प्रपञ्चस्य सत्यत्वेन प्रकाशप्रसङ्गात् एकस्मिन् ज्ञाने एकस्य विरुद्धाभ्यां सत्यत्वमिथ्यात्वाभ्यां भानासंभवादित्यर्थः। मिथ्यात्वं हि प्रतिपन्नोपाधौ निषेधप्रतियोगित्वम्, तस्य मिथ्यात्वं नाम प्रपञ्चे तदभावः सत्यत्वपर्यवसितः इति प्रपञ्चस्य सत्यत्वेनैव प्रतीतिप्रसङ्गो न मिथ्यात्वेनेति तात्पर्यम्। तत्रोदाहरणद्वयं स्वप्नावगतस्य पितृमरणस्य मिथ्यात्वे पितृसत्यत्वम्, सम्यग्रजतमिथ्यात्वमिथ्यात्वे रजतसत्यत्वं चेति। आद्यम् अन्यथाख्यात्यनुसारेण, द्वितीयं सर्वसाधारण्येनेति विवेकः।

ननु ब्रह्मव्यतिरिक्तं मिथ्येति ज्ञानं ब्रह्मव्यतिरिक्तत्वाकारेण ब्रह्मव्यतिरिक्तस्य प्रपञ्चस्य तद्गतस्य मिथ्यात्वस्य च एकरूपेणैकदैव मिथ्यात्वं गृह्णाति। तावता न प्रपञ्चसत्यत्वप्रसङ्गः। यथा सत्यत्ववादिमते प्रपञ्चः तद्गतसत्यत्वं च सत्यमिति ज्ञानं प्रपञ्चस्य तत्सत्यत्वस्य च सत्यत्वं गृह्णत् नैकस्यापि मिथ्यात्वं गृह्णाति तद्वदिति शङ्कते - **ब्रह्मव्यतिरिक्तत्वेति**। समाधत्ते - **विरोधेति**। ब्रह्मव्यतिरिक्तगतमिथ्यात्वस्य

तन्मिथ्यात्वस्य च मिथ्यात्वमेकहेलया लभ्यते, यथा भवतां प्रपञ्चस्य तत्सत्यत्वस्य च सत्यत्वमिति चेन्न; विरोधाविरोधाभ्यां वैषम्यात् । न हि रजतमिथ्यात्वमिथ्यात्वेऽपि रजतमपि मिथ्याभूतं दृष्टम् । न च शुक्तिरजतमिथ्यात्वे तन्मिथ्यात्वं मिथ्याभूतं दृष्टम् ।। तदयं संग्रहः–

श्लो॰ मिथ्यात्वस्य च मिथ्यात्वे मिथ्यात्वं बाधितं भवेत् ।
सत्यत्वस्य तु सत्यत्वे सत्यत्वं स्थापितं भवेत् ।।

ननु वन्ध्यासुततन्मरणयोरिव द्वयोरपि मिथ्यात्वमुपपद्यत इति चेन्न; निराश्रयतया तत्र धर्मिमिथ्यात्वोपपत्तेः । न हि तत्रापि वन्ध्यासुतमिथ्यात्वं वा तन्मरणमिथ्यात्वं वा मिथ्याभूतं दृष्टम् ।

मिथ्यात्वगतमिथ्यात्वस्य च विरोधोऽस्ति । विरोधश्च पूर्वमुपपादितः । प्रपञ्चसत्यत्वस्य सत्यत्वसत्यत्वस्य च नास्ति विरोध इति वैषम्यादित्यर्थः । विरोधमविरोधं चोपपादयति - **न हीति** । सम्यग्रजतमिथ्यात्वमिथ्यात्वे सम्यग्रजतस्य मिथ्यात्वं न हि दृश्यते, प्रत्युत सत्यत्वमेव दृश्यते । शुक्तिरजतमिथ्यात्वे तन्मिथ्यात्वं मिथ्याभूतं न दृश्यत इत्यर्थः । ननु शुक्तिरजतमिथ्यात्वेऽपि शुक्तिरजतं मिथ्यैव दृष्टमिति कथं विरोध इत्याशङ्क्य शुक्तिरजतमिथ्यात्वस्य मिथ्यात्वे न मानमस्ति, प्रत्युत सत्यत्वेनैव प्रतीतेः सत्यत्वमेवेत्यभिप्रायेणाह-**न च शुक्तीति** । उक्तमर्थं कारिकया संगृह्णाति **मिथ्यात्वस्य तु मिथ्यात्व** इति ।

ननु वन्ध्यासुततन्मरणयोः द्वयोः यथा मिथ्यात्वं तथा शुक्तिरजततन्मिथ्यात्वयोरुभयोर्मिथ्यात्वमुपपद्यत इति शङ्कते - **ननु बन्ध्येति** । किं वन्ध्यासुतप्रतीतिरसद्विषया, उत मिथ्याविषया इति विकल्पमभिप्रेत्य आद्ये दोषमाह-**नेति** । निराश्रयता - असदाश्रयकता। मिथ्यात्वम् = असत्त्वम् । द्वितीये दोषमाह- **न हीति** । न हि वन्ध्यासुतो मिथ्या । तस्याप्रसिद्धत्वेनारोपासंभवात् । किं तु सुतस्य वन्ध्याजन्यत्वं सुते वन्ध्याप्रतियोगिकत्वं वा मिथ्येति वक्तव्यम् । तथा मरणे तादृशारोपविषयः प्रतियोगिकत्वं मिथ्येति वक्तव्यम् ।

द्वितीये तु ब्रह्मव्यतिरिक्तस्य प्रपञ्चमिथ्यात्वस्य सत्यत्वेन प्रकाशनात् सद्वितीयत्वभ्रान्तित्वादिदोषो दुस्तरः । ब्रह्माव्यतिरेके तु दत्तमुत्तरम् । तृतीयेऽप्य(संभवः) ग्रहणप्रसङ्गात् । ब्रह्मव्यतिरिक्तत्वग्रहणे प्रयोजकज्ञानवतो

तच्च मिथ्यात्वं सत्यमेवेत्यर्थः । एतावता इदं निवर्तकज्ञानं स्वविषयं ब्रह्मव्यतिरिक्तमिथ्यात्वं मिथ्यात्वेन गृह्णातीति प्रथमकल्पो दूषितः । अथ सत्यत्वेन गृह्णातीति द्वितीय कल्पं दूषयति- **द्वितीये तु इति** । ब्रह्मव्यतिरिक्तमिथ्यात्वं यदि सत्यत्वेन गृह्णीयात् तदा ब्रह्म ब्रह्मव्यतिरिक्तमिथ्यात्वमिति सत्यद्वयं भवेत् । तथा च ब्रह्मण; सत्यद्वितीयवत्त्वप्रसङ्गेनावद्वैतहानिः । अपि च मिथ्यात्वस्य सत्यत्वेन ग्रहणे तस्य ज्ञानस्य भ्रमत्वं स्यात् इति भावः । भ्रान्तित्वादीत्यादिशब्देन प्रपञ्चस्य निवृत्तावपि मिथ्यात्वस्य अनिवृत्तेः सर्वभ्रमनिवृत्त्यसिद्धिप्रसङ्गो विवक्षितः । ननु निवर्तकज्ञानं ब्रह्मव्यतिरिक्तमिथ्यात्वं सत्यत्वेनैव गृह्णाति । तच्च मिथ्यात्वं सत्यमेव । अतो न भ्रमत्वम् । नापि सद्वितीयत्वम्, तस्य ब्रह्मस्वरूपत्वादित्याशङ्क्य परिहरति - **ब्रह्माव्यतिरेक** इति । **दत्तमुत्तरमिति** । प्रपञ्चस्य निवर्तकज्ञानेन निवृत्तावपि ब्रह्मस्वरूपस्य तन्मिथ्यात्वस्य निवृत्त्यभावात् सर्वभ्रमनिवृत्त्यसिद्धिप्रसङ्ग इति भावः ।

निवर्तकज्ञानं ब्रह्मव्यतिरिक्तमिथ्यात्वमनिर्धारितविशेषात्मना गृह्णातीति तृतीयकल्पं दूषयति - **तृतीयेऽप्यसंभव** इति । अस्मिन् कल्पे निवर्तकज्ञानेन ब्रह्मव्यतिरिक्तमिथ्यात्वं सत्यत्वमिथ्यात्वरूपविशेषाकारं बिना गृह्यत इति पर्यवस्यति । तत्र पृच्छामः - ब्रह्मव्यतिरिक्तगतं मिथ्यात्वं सत्यत्वेन वा मिथ्यात्वेन वा न गृह्यतां नाम । तत् मिथ्यात्वं ब्रह्मव्यतिरिक्तत्वेन गृह्यते न वा । तत्रापि आद्ये ब्रह्मव्यतिरिक्तत्वस्य मिथ्यात्वप्रयोजकत्वग्रहणमस्ति वा न वा । अस्ति चेत् मिथ्यात्वप्रयोजकस्य ब्रह्मव्यतिरिक्तत्वस्य मिथ्यात्वेऽपि सत्त्वात् तस्य मिथ्यात्वस्य मिथ्यात्वग्रहणमावश्यकम् । ब्रह्मव्यतिरिक्तत्वस्य मिथ्यात्वप्रयोजकत्वज्ञानं नास्ति चेत् ब्रह्मव्यतिरिक्तस्य प्रपञ्चस्यापि मिथ्यात्वग्रहणं न स्यात् । मिथ्यात्वं ब्रह्मव्यतिरिक्तत्वेन न गृह्यत इति पक्षे गृह्यमाणस्य मिथ्यात्वस्य ब्रह्मणश्च व्यतिरेको

मिथ्यात्वेनैव ग्रहणप्रसङ्गात्; प्रयोजकज्ञानाभावे प्रपञ्चमिथ्यात्वस्याप्यग्रहणप्रसङ्गात् । ब्रह्मव्यतिरेकेंणाग्रहणे गृह्यमाणस्य मिथ्यात्वस्य ब्रह्मणश्चागृह्यमाणव्यतिरेकयोः शुक्तिरजतयोरिवैक्येन ग्रहणप्रसङ्गात् । ततश्च सत्यत्वेन प्रकाशाप्रसक्तेर्न साधारणाकारग्रहणसंभवः ।

(५) अन्यस्य कस्यचिद्विषयत्वमपि परमार्थापरमार्थविकल्पेन दत्तैरेव दूषणैर्दूषितम् । परमार्थत्वे ब्रह्मव्यतिरेके द्वैतप्रसङ्गात्, तदव्यतिरेकेऽन्यत्वस्यैवा-

---

न गृह्यत इत्यायाति । तथा सति भेदेनागृह्यमाणयोः शुक्तिरजतयोरिव ब्रह्मप्रपञ्चमिथ्यात्वयोरैक्येन ग्रहणप्रसङ्गः । ततश्च मिथ्यात्वस्य सत्यत्वेन असाधारणाकारेण ग्रहणमायातमिति सत्यत्वमिथ्यात्वसाधारणाकारेण ग्रहणमित्येतद्गतमिति समुदायार्थः । मूले प्रकाशाप्रसक्तेरित्यस्य स्थाने प्रकाशप्रसक्तेरिति पाठः साधुः । अथ पङ्क्त्यर्थः -

असंभव इति । साधारणाकारग्रहणासंभव इत्यर्थः । असंभवमेवोपपादयति- **ब्रह्मव्यतिरिक्तत्वेत्यादिना** । मिथ्यात्वं ब्रह्मव्यतिरिक्तत्वेन गृह्यते न वेति विकल्पमभिप्रेत्य आद्ये दोषमाह-**ब्रह्मव्यतिरिक्तत्वेति** । आद्येऽपि ब्रह्मव्यतिरिक्तत्वस्य मिथ्यात्वप्रयोजकत्वग्रहणमस्ति न वेति विकल्पमभिप्रेत्य आद्ये दोषमाह- **प्रयोजकेति** । ब्रह्मव्यतिरिक्तत्वं मिथ्यात्वप्रयोजकमिति ज्ञानवत इत्यर्थः । सत्यत्वेन प्रकाशप्रसक्तेः= सत्यत्वेन असाधारणाकारेण ग्रहणस्य आयातत्वात् । **साधारणेति** । अनिर्धारितविशेषात्मनेत्येतन्नोपपद्यत इत्यर्थः ।

एतावता वादारम्भे ''उत्तरत्रापि कस्तस्य विषयः'' इत्यादिना विकल्पितेषु पञ्चसु कल्पेषु चत्वारः कल्पाः दूषिताः । अथ ''अथ वा अन्यदेव किंचित् अद्वैतज्ञानस्य विषयः'' इति पञ्चमं कल्पं दूषयति - **अन्यस्य कस्यचिदिति** । ब्रह्मस्वरूपात्, अविद्याशबलात् ब्रह्मस्वरूपात्, तदुभयव्यतिरिक्तात्, तस्य मिथ्यात्वाच्चान्यस्य कस्यचित् अद्वैतज्ञानविषयत्वस्वीकारेऽपि तत् परमार्थोऽपरमार्थो वेति विकल्प्य पूर्वोक्तदूषणैरेव दूषितमित्यर्थः । दूषितत्वप्रकारमेवाह-**परमार्थत्व** इति । यदि परमार्थः तदा तत् ब्रह्मव्यतरिक्तं वा

सिद्धिप्रसङ्गात् । अपरमार्थत्वे अविद्यातत्कार्यकोटयन्तर्भावेन बाध्याकारतया प्रागुक्तदोषापातात् । बहिर्भावे तद्बाधकगवेषणप्रसङ्गात् ।

किंच ब्रह्मव्यतिरिक्तं तत् बाधकं ज्ञानं सत्यमसत्यं वा ? असत्यत्वे त्विदमपि बाध्याकारकोटौ घटमानं कथमिव तद्बाधकं स्यात् ॥ आकारभेदादविरोध इति चेन्न; बाधकाकारभेदस्यापि बाध्यत्वाभ्युपगमात् । अन्यथा तस्य सत्यत्वप्रसङ्गात् ।

तदव्यतिरिक्तं वा? आद्ये परमार्थद्वैतप्रसङ्गः । द्वितीये अन्यत्वस्यैवासिद्ध्या अन्यस्य विषयत्वमिति पक्षस्यानुत्थतिः । यदि अपरमार्थः तदा तस्य अविद्यायां वा तत्कार्ये वा अन्तर्भावे तद्विषयकज्ञानस्य बाधकत्वं (निवर्तकत्वं) न स्यात् । तस्य अविद्यातत्कोटिबहिर्भावे अपरमार्थस्य तस्य बाधकमन्यत् अन्वेषणीयं स्यादिति भावः । अत्रैव पक्षे दूषणान्तरमाह-**किं चेति** । ब्रह्मव्यतिरिक्तं अन्यविषयकं बाधकं तज्ज्ञानं सत्यमसत्यं वा । सत्यत्वे अद्वैतभङ्ग इति मनसि निधाय असत्यत्वे दूषणमाह - **असत्यत्वे तु** इत्यादिना । असत्यत्वे तु इदमपि ज्ञानं बाध्यकोटौ प्रविष्टं कथं अविद्यादेर्बाधकं स्यात्। **घटमानमिति** । घटकं प्रविष्टमित्यर्थः ।

ननु ब्रह्मज्ञानत्वेनैव बाधकत्वम् (न तु सत्यत्वेन) एवं ब्रह्मभिन्नत्वेन बाध्यत्वम् । तदुभयं ब्रह्मज्ञानत्वं ब्रह्मभिन्नत्वं च ब्रह्मज्ञानेऽस्तीति तद् बाध्यं बाधकं च । रजते बाधकताप्रयोजकं न किंचिदस्तीति न शुक्तिरजतं बाधकमित्याशयेन शङ्कते - **आकारभेदादविरोध** इति । बाधकतावच्छेदकत्वेनाभिमतस्याकारस्यापि ब्रह्मभिन्नत्वेन बाध्यत्वात् शुक्तिरजतत्ववन्न बाधकतावच्छेदकत्वमपीत्याशयेन परिहरति- **बाधकाकारेति** । ननु बाधकतावच्छेदकताप्रयोजकं तत्त्वज्ञानत्वमिति ब्रह्मज्ञानत्वं बाधकतावच्छेदकम् । शुक्तिरजतत्वं तु न बाधकतावच्छेदकम्, तत्प्रयोजकाभावात् इत्याशङ्क्य तत्वज्ञानत्वमपि बाध्यत्वादेव न बाधकतावच्छेदकताप्रयोजकं स्यात् शुक्तिरजतत्ववत् । अवच्छेदकताप्रयोजकत्वतदप्रयोजकत्वयोरपि आकारभेदाधीनत्वोपगमे

तत्राप्याकारभेदाभ्युपगमेऽनवस्थानात्। प्रमाणस्थापके(ने) प्रमाणविशेषस्थापकाकारविशेषस्यापि स्थाप्यत्ववदविरोध इति चेन्न; (वैषम्यात् ?) स्थापकाकारविशेषस्थितेः स्थाप्यसामान्यविशेषस्थित्युपयुक्तत्वात् । बाधकाकारविशेषबाध्यत्वस्य विश्वबाधासिद्धिपर्यवसितत्वात्।

किंचैतन्निवर्तकं ज्ञानमद्वैतश्रवणादिमात्रसमुद्भवमिदानीन्तनमेव ज्ञानम् ? एष्यद्वा किमपि ? पूर्वत्र भवन्मतश्राविणां तत्क्षणादेव प्रपञ्चविलयप्रसङ्गः; यद्वा आत्मैक्यात् विश्वेषामेव । बाधितानुवृत्तिस्तु दूषितैव । उत्तरत्रापि तत् किं

तस्याप्याकारभेदस्य मिथ्यात्वात् अप्रयोजकत्वापादने प्रयोजकान्तरान्वेषणपरंपरायामनवस्थेत्याह - **तत्राप्याकारेति** ।

ननु बाधकाकारस्य बाध्यत्वेऽपि बाधकतावच्छेदकत्वमुपपद्यते, यथा साधकाकारस्य साध्यत्वेऽपि साधकतावच्छेदकत्वं तद्वत् । यथार्थप्रवृत्त्यनुपपत्त्यादिना प्रमाणमात्रत्वसाधको यः प्रमाणविशेषः तस्य योऽसाधारणाकारः तस्य मानाधीना मेयसिद्धिरिति न्यायेन मानाधीनसिद्धिकत्वेऽपि मानसाधनतावच्छेदकत्ववत् इत्याशयेन शङ्कते-**प्रमाणस्थापके** इति । परिहरति-**न स्थापकाकारेति** । सामान्यतः प्रमाणमात्रसाधके प्रमाणविशेषे योऽयमसाधारणाकारः स सामान्येन प्रमाणसिद्ध्यनुगुण एव । तदाकारविशेषाभावे तदवच्छिन्नप्रमाणाभावेन तत्साध्यस्याप्यसिद्धेः । बाधकतावच्छेदकविशेषाकारस्य बाध्यत्वे तु तदवच्छिन्नस्यासिद्ध्या तत्साध्यविश्वबाधो न सिध्येदिति भावः ।

दूषणान्तरमाह-**किं चैतदित्यादिना** । अविद्यादिनिवर्तकतयाभिमतमद्वैतज्ञानं किं गुरुमुखात् अद्वैतश्रवणादिमात्रेण समुत्पन्नदिदानीं विद्यमानं ज्ञानं वा, अथवा भविष्यत् किमपि ज्ञानम् । आद्ये भवन्मतश्रोतॄणां सर्वेषामपि श्रवणानन्तरमेव प्रपञ्चनिवृत्तिप्रसङ्गः । यद्वा आत्मैक्यात् श्रोतॄणामिव अश्रोतॄणामपि सर्वेषां प्रपञ्चविलयप्रसङ्गः । न च श्रवणेन बाधितोऽपि प्रपञ्चः चक्रभ्रमवदनुवर्तत इति वाच्यम् । बाधितानुवृत्तेः दूषितत्वात् । द्वितीये भविष्यत् ज्ञानं किं पूर्वोत्पन्नज्ञानाविशिष्टविषयकमपि सत् निवर्तकम्, उत विशिष्टविषयम् । नाद्यः,

पूर्वाविशिष्टविषयमपि निवर्तकम्, उत विशिष्टविषयम् ? अविशिष्टविषयत्वे तु पूर्वस्यापि निवर्तकत्वप्रसङ्गः । तस्य तदभावे तु उत्तरस्यापि तन्न स्यात् । विशिष्टविषयत्वं तु न संभवत्येव । ब्रह्मणि प्रकाशिष्यमाणपरमार्थाकारान्तरानभ्युपगमात् । अपरमार्थाकारान्तरप्रकाशस्य प्रागुक्तन्यायेन दूषितत्वात्। प्रपञ्चमिथ्यात्वव्य (त्वाध्य) वसायस्य च भवन्मतश्रद्धाजडानामिदानीमपि सिद्धत्वात् ॥ परोक्षरूपमिदानीन्तनज्ञानमपरोक्षभ्रमबाधकं न भवति; अपरोक्षं तु भविष्यज्ज्ञानं बाधनायालमिति चेन्न–परोक्षापरोक्षशब्दाभ्यामविशदविशदत्वविवक्षायामनति-

---

पूर्वतनस्यापि ज्ञानस्य निवर्तकत्वप्रसङ्गात् । तस्यानिवर्तकत्वे चोत्तरस्याप्यनिवर्तकत्वात् । विषयवैषम्याभावात् । न द्वितीयः, इदानीमप्रकाशमानस्य भविष्यत्काले प्रकाशिष्यमाणस्य परमार्थस्याकारान्तरस्य ब्रह्मणि भवद्भिरनङ्गीकारात् । अपरमार्थाकारान्तरप्रकाशस्य च भ्रमत्वेन तस्य निवर्तकत्वासंभवादिति भावः । **प्रागुक्तन्यायेनेति** । भ्रमत्वादिनेत्यर्थः । ननु इदानीमुत्पद्यमानं ज्ञानमद्वितीयब्रह्मज्ञानम् । अद्वितीयत्वं च ब्रह्मस्वरूपम् । पश्चात् उत्पस्यमानं ज्ञानं च प्रपञ्चमिथ्यात्वविषयकं पूर्वतनज्ञानात् भिन्नविषयकम् । प्रपञ्चमिथ्यात्वस्य ब्रह्मस्वरूपत्वाभावात् । तथा च प्रपञ्चमिथ्यात्वविषयकं भविष्यत् ज्ञानमविद्यादिनिवर्तकमस्तु इत्याशङ्कां निराकरोति - **प्रपञ्चेति** । प्रपञ्चमिथ्यात्वनिश्चयस्य भवन्मते श्रद्धावतामिदानीमपि सद्भावात् इदानीमेव प्रपञ्चविलयप्रसङ्गः इति भावः । ननु इदानींतनं प्रपञ्चमिथ्यात्वज्ञानं परोक्षरूपम् । अतस्तन्नाविद्यानिवर्तकम् । न वा तद्धेतुकापरोक्षभ्रमनिवर्तकम् । भविष्यत् प्रपञ्चमिथ्यात्वज्ञानं तु अपरोक्षरूपमपरोक्षभ्रम-निवर्तनसमर्थमिति शङ्कते - **परोक्षरूपमिति** । परोक्षशब्देन अविशदत्वस्य अपरोक्षशब्देन विशदत्वस्य च विवक्षायां न्यूनविषयकत्वमविशदत्वम्, अधिकविषयकत्वं विशदत्वम् इत्येव लोके व्यवहारात् भवदभिमतयोरिदानींतनभविष्यत्कालिकज्ञानयोः समानविषयकत्वेन विशदत्वाविशदत्वकृतापरोक्षत्वपरोक्षत्वयोः असंभवादित्याशयेन परिहरति - **परोक्षेति** ।

रिक्तविषयतयैव तथाविधभेदासिद्धेः । करणभेदाधीनभेदस्य चाकिंचित्करत्वात् । न चास्य करणभेदः, भविष्यतोऽपि विशदज्ञानस्य भवद्भिर्वाक्यजन्यत्वाभ्युपगमात् ।

एतेन वेदान्तनैरर्थक्यमपि फलितम्; यतःकुतश्चिदनुमानादेरप्यद्वैत (वि) ज्ञानसम्पादनोपपत्तेस्तदतिरिक्तस्य कस्यचिंद (दप्यं) शस्य वेदान्तेऽपि भवद्भिः प्रतिपादनानभ्युपगमात् । सत्यस्य प्रामाण्यस्योभयत्रानभ्युपगमात्; व्यवहारिकस्य

अनतिरिक्तविषयतयैवेति । पूर्वज्ञानात् पश्चात्कालिकज्ञानस्य अधिकविषयकत्वाभावेनेत्यर्थः । **तथाविधभेदासिद्धेरिति** । परोक्षत्वापरोक्षत्वकृतभेदासिद्धेरित्यर्थः ।

ननु परोक्षापरोक्षज्ञानयोः करणाधीनवैलक्षण्यम् इन्द्रियकरणकत्वतदितरकरणकत्वरूपमस्त्येव । तदेव परोक्षापरोक्षशब्दाभ्यां विवक्ष्यते इत्यत्राह - **करणभेदेति** । प्रत्यक्षापेक्षया शाब्दज्ञानानुमित्योः करणभेदाधीनभेदे सत्यपि प्रञ्चभ्रमनिवर्तकत्वादर्शनात् तादृशभेदस्यानुपयोगित्वमिति भावः । ननु अन्वयव्यतिरेकाभ्यामिन्द्रियकरणकस्य ज्ञानस्य भ्रमनिवर्तकत्वं नेतरस्येत्यत्राह-**न चास्येति** । भविष्यज्ज्ञानस्येत्यर्थः । कुत इत्यत्राह - **भविष्यतोऽपीति** । एवं ब्रह्मस्वरूपभूतात् ज्ञानात् भिन्नं ज्ञानं प्रपञ्चभ्रमनिवर्तकमिति कल्पस्यैव दूषणमनुवर्तते । इदानीं तत्रैव दूषणान्तरमाह– **एतेनेति** । भविष्यज्ज्ञानेदानींतनज्ञानयोः विषयभेदाभावेन एष्यज्ज्ञानस्य निवर्तकत्वमिदानींतनज्ञानस्यानिवर्तकत्वमिति निवर्तकत्वानिवर्तकत्वरूपवैषम्याभावात् अनिवर्तकभूतानुमितिसमानविषयकस्य वेदान्तवाक्यजन्यज्ञानस्याप्यनिवर्तकतया वेदान्तानां नैरर्थक्यं फलितमिति भावः । तदाह **यतःकुतश्चिदिति** । ननु शाब्दानुमित्योः प्रामाण्याप्रामाण्याभ्यां वैषम्यात् निवर्तकत्वानिवर्तकत्वे भवत इत्यत्राह - **सत्यस्येति** ।

ननु यद्यपि अद्वैतविज्ञानमनुमानादिनापि संपादयितुं शक्यम्; तथापि ब्रह्मोपासनतत्फलादिज्ञानस्यानुमानादिभिः संपादयितुमशक्यत्वात् तत्प्रतिपादनद्वारा ब्रह्मसाक्षात्कारहेतुभूतोपासनानुष्ठानबोधकतया वेदान्तोऽर्थवानेवेत्याशङ्क्य अद्वैतोपासनपराणां वेदान्तवाक्यानामद्वैतज्ञानस्य पूर्वोक्तन्यायेन भ्रमनिवर्तकत्वासिद्ध्या

तु तस्योभयत्र सम्मतत्वात्। उपासनादिपरवेदान्तभागस्य तत्तत्फलविशेषपर्यन्ततया बन्धकत्वेन बन्धनिवृतिं प्रति प्रतिकूलत्वाभिधानात् । अतो यदा प्रपञ्चमिथ्यात्वानुमानादिकं न विश्वबाधकम्, तदात्वे वेदान्तवाक्यान्यपि न तद्बाधकानि स्युः; तदविशिष्टज्ञानजनकत्वात्। यदि तानि बाधकानि स्युः, तदा तदविशिष्टादनुमानादेरपि तद्बाधः स्यादिति निरर्थकस्तत्त्वावेदको वेदान्तभागः। एवञ्च वेदान्तमन्तरेणापि यथावस्थितब्रह्मस्वरूपज्ञानसम्पादनोपपत्तेः शारीरकापशूद्राधिकरणानारम्भप्रसङ्गश्च। ननु भेदवासनाविक्षिप्तचेतसां बुभुत्सोद्बोधने शास्त्रोपयोग इति चेन्न; सांख्यसौगतसमयेऽपि तत्त्वविचारमारभमाणैः पुरुषैस्तापत्रयाभिहतानां भेदवासनाविक्षिप्तचेतसामपि तत्त्वबुभुत्सोत्पत्तेः । न च प्रतिपत्तृभेदेन शास्त्रमनुमानं च सप्रयोजनमिति वाच्यम्; सर्वात्मना

नैष्फल्यस्य सिद्धत्वात्, सगुणोपासनपरवेदान्तवाक्यानां तत्फलसिद्ध्या सार्थकत्वेऽपि प्रपञ्चनिवृत्त्या अर्थवत्त्वासंभवात् वेदान्तवाक्यं व्यर्थमेवेत्याशयेनाह- **उपासनादीति**। शिष्टं स्पष्टम् ।

यदा वेदान्तभागो निरर्थकः इत्यागतम्, तदा वेदान्तमन्तरेण अनुमानादितोऽपि यथावस्थितब्रह्मस्वरूपज्ञानसंपादनोपपत्तेः शूद्रादीनामपि तादृशज्ञानेन मोक्षस्यानिवार्यत्वात् शारीरकापशूद्राधिकरणं निष्फलत्वादनारम्भणीयं स्यादित्याह - **एवं चेति**।

शङ्कते - **ननु भेदवासनेति**। प्रत्यक्षादिभिः भेदस्यैव निश्चयेन अभेदरूपकोट्यन्तरानुपस्थितेश्च संदेहासंभवात् तन्मूलकबुभुत्सा न संभवति । भेदविरुद्धाभेदप्रतिपादकशास्त्रदर्शने सति द्वैताद्वैतसंदेहात् बुभुत्सोत्पद्यत इति बुभुत्सोत्पादकतया सार्थक्यात् न शास्त्रस्य वैयर्थ्यमिति शङ्कितुराशयः। परिहरति - **न सांख्येत्यादिना**। सांख्याः ज्ञातृत्वकर्तृत्वादेः बुद्धिधर्मत्वमङ्गीकुर्वन्तः आत्मनो निर्गुणत्वमाहुः । सागताः प्रपञ्चस्यासत्यत्वमाहुः। अतस्तन्मतश्राविणां प्रत्यक्षादावप्रामाण्यशङ्कया ब्रह्मनिर्गुणत्वसगुणत्वप्रपञ्चसत्यत्वासत्यत्वसंदेहात् बुभुत्सोत्पत्तिसंभवात् न बुभुत्सोत्पादकत्वेन वेदान्तानां सार्थक्यमिति

साधकबाधकप्रमाणसंभावनावैदेशिके विषये शास्त्रार्थतत्त्वस्य मीमांसितत्वात् । अतस्तत्र भवतां महत्तरेषु मठ(मत) गह्वरेषु महावाक्यश्रवणमपि बालव्यामोहनमात्रमित्यापद्यते । अतो न निवर्तकज्ञानं ब्रह्मणो भिन्नम् ।

नापि द्वितीयः; ब्रह्मस्वरूपस्य विश्वनिवर्तकत्वे तस्यानादित्वेन प्रपञ्चाध्यासाभावप्रसङ्गेन (ध्यासस्यांभाव प्रसंगात्) प्रपञ्चप्रतिभासस्याप्यनुदयप्रसङ्गात् ॥ एकस्यैव दण्डादेर्घटादिकारणत्त्वतन्नाशकत्ववदुपपद्यत इति चेत्; यौगपद्ये विरोधात्,

---

परिहर्तुराशय; । भेदवासनाविक्षिप्तचेतसामपि तत्त्वविचारमारभमाणैः पुरुषैः तत्त्वबुभुत्सोत्पत्तेः इति योजना । यद्वा सांख्यसौगतसमयेऽपि आत्मनिर्गुणत्वप्रपञ्चासत्यत्वबुभुत्सया हि विचारमारभन्ते । अतस्तत्र येनैव हेतुना बुभुत्सोत्पादः तेनैव हेतुना प्रकृतेऽपि बुभुत्सोत्पत्तिसंभवात् किं वेदान्तेनेति भावः । बुभुत्सोत्पत्तेरित्यनन्तरम् अङ्गीकारादिति शेषः । तत्त्वविचारमारभमाणैः तत्त्वबुभुत्सोत्पत्तेः अङ्गीकारादित्यन्वयः ।

न च प्रतिपत्तृभेदेनेति । यदिशास्त्रवेद्यं विषयमनुमानमपि प्रतिपादयिनुं शक्नुयात् तदा प्रतिपत्तृभेदेन शास्त्रानुमानयोः सप्रयोजनता स्यात् । सर्वात्मना साधकबाधकंप्रत्यक्षादिप्रमाणागोचरे ब्रह्मणि शास्त्रप्रवृत्तेः प्रतिपत्तृभेदेन तयोः सप्रयोजनता न वक्तुं शक्येत्यर्थः ।

एवं उक्तरीत्या वेदान्तानां नैरर्थक्यात् त्वादृशां तच्छ्रवणं तत्प्रवचनं च बालव्यामोहनमात्रमित्युपालभते - **अतस्तत्रभवतामिति** । **महावाक्यम्** = जीवब्रह्मणोरभेदप्रतिपादकत्वेनाभिमतं तत्त्वमस्यादिवाक्यम् । एतावता महता प्रबन्धेन वादारम्भे प्रस्तुतः ब्रह्मस्वरूपभूतात् ज्ञानात् भिन्नं ज्ञानमविद्यादिनिवर्तकमिति प्रथमकल्पः दूषितः । अथ तत्र प्रस्तुतः उताभिन्नमिति द्वितीयकल्पः दूष्यते - **नापि द्वितीय** इत्यादिना। ब्रह्मस्वरूपाभिन्नस्य ज्ञानस्य प्रपञ्चनिवर्तकत्वे ब्रह्मस्वरूपस्यानादित्वेन निवर्तके तस्मिन् जाग्रति प्रपञ्चाध्यासाभावप्रसङ्गेन प्रपञ्चप्रतिभासोऽपि नोत्पद्येतेति भावः । ननु एकस्यैव दण्डादेः चक्रभ्रमणद्वारा घटहेतुत्वं ताडनद्वारा घटनाशहेतुत्वं च दृश्यते । तद्वत् ब्रह्मस्वरूपस्य ज्ञानस्य प्रपञ्चाध्यासहेतुत्वं तन्निवृत्तिहेतुत्वं च भवितुमर्हतीत्याशङ्क्य युगपत् उभयहेतुत्वं न संभवति । दण्डादेस्तु क्रमेण उत्पत्तिनाशोभयहेतुत्वमिति समाधत्ते-**एकस्यैवेत्यादिना** ।

क्रमे तु सहकार्यवश्यम्भावात्। न हि दण्डो घटकारणसामग्रीमध्यमध्या-सीन एव घटं नाशयति; अपितु सिद्धे घटे अभिघातरूपसंयोगादिकमपेक्ष्य ।। अत्रापि तर्हि ब्रह्म स्वरूपेणाध्यासानुगुणम्, अध्यासमेव तु निवर्त्यं (तन्निवर्त्यं) सहकारित्वेनापेक्ष्य तन्निवर्तकम्, नि(तन्नि) वर्तनशक्तस्यापि निवर्त्यासिद्धौ निवृत्तिजनकत्वायोगादिति चेन्न; तथाप्यनादेरध्यासस्य चिरतरानुवृत्तिभङ्गप्रसङ्गात्। एवं पूर्वपूर्वक्षणानुवृत्तिभङ्गे कदाचिदपि नाध्याससिद्धिः । किञ्च परिशुद्धं ब्रह्मस्वरूपमध्यासानुगुणम्, अशुद्धं तु तन्निवर्तकमिति महदिदमुपपादनम्।। अस्तु

ननु ब्रह्मस्वरूपस्यापि क्रमेणोभयहेतुत्वमस्त्वित्यत्राह- **क्रमे तु इति** । यथा दण्डः घटकारणसामग्रीसमवधानकाले घटं न नाशयति, अपि तु उत्पन्ने घटे अभिघातरूपसंयोगं सहकारिणमासाद्य तं नाशयतीति क्रमो दृश्यते । तद्वत् प्रकृते क्रमनियामकं सहकारि किमिति विवेचनीयम् । ननु ब्रह्म स्वरूपेण अध्यासानुगुणम् । निवर्त्यमध्यासमेव सहकारित्वेन अपेक्ष्य तस्य निवर्तकम् । निवर्तनशक्तस्यापि निवर्त्यस्याभावे तन्निवृत्तिजनकत्वायोगात् । नाशं प्रति प्रतियोगिनः कारणत्वात् इति चेत् - न । अनादेः अविद्याध्यासस्य चिरतरानुवृत्तिभङ्गप्रसङ्गात् । एतदुक्तं भवति - पूर्वेद्युः निवर्त्यायाः अविद्यायाः तदध्यासस्य च सत्त्वे तदानीमेव तन्निवृत्तेरावश्यकतया नैतावत्कालमनुवृत्तिरुपपद्यते । तथा तत्पूर्वकालेऽपि तन्निवृत्तेरावश्यकतया तदानीमपि नाविद्याध्याससंभवः । ततश्च अविद्याध्यासाधिकरणत्वयोग्यक्षणस्य कस्याप्यलाभात् कदाप्यविद्याध्यासो न स्यात् । तदभावे च तन्मूलः कार्याध्यासोऽपि न स्यादिति ।

एवमविद्याध्यासानुपपत्त्या प्रपञ्चरूपकार्याध्यासानुपपत्तिरुक्ता । इदानीं कार्याध्यासासंभवे हेत्वन्तरमाह - किं चेति । शुद्धम् = आरोप्याविषयकम् । **अशुद्धम्** = आरोप्यविषयकम् । अध्यासमेव तु निवर्त्यं सहकारित्वेनापेक्ष्य इत्यत्र अध्यासस्यैव सहकारित्वोक्तेः तस्मिन् स्वस्यैव तद्भ्रमरूपत्वात् अशुद्धस्यैव निवर्तकत्वमित्युक्तं भवति । एतत्प्रतिकोटितया ब्रह्म स्वरूपेणाध्यासानुणमित्यत्र आरोप्याविषयकत्वलक्षणशुद्धिरेवाभि-

तर्हि सामग्र्यभावादितःपूर्वमनुत्पन्नं सामग्रीसम्पत्तिदशायामुत्पत्स्यमानमन्तःकरणवृत्तिविशेषमेव सहकारित्वेनापेक्ष्य ब्रह्मैव निवर्तकम्; तन्न, प्राप्ताप्राप्तविवेकेनान्तःकरणवृत्तेरेव निवर्तकत्वप्रसङ्गात्। तथा च सति ब्रह्मस्वरूपान्तर्गतत्वपक्षव्याघातः।

प्रेता स्यात्। ततश्च आरोप्याविषयमध्यासानुगुणम् आरोप्यविषयं तन्निवर्तकमिति व्याहतमित्यर्थ इति **चण्डमारुतम्**।

वस्तुतः अशुद्धं ब्रह्मस्वरूपमध्यासानुगुणं, परिशुद्धं तु ब्रह्मस्वरूपमध्यासनिवर्तकमिति वक्तव्ये, भवता तद्वैपरीत्येन परिशुद्धं ब्रह्मस्वरूपमध्यासानुगुणं, अशुद्धं तु तत् तन्निवर्तकमित्युच्यत इति परिहसति - **किं चेति**। ननु ब्रह्मस्वरूपमेव अविद्यानिवर्तकम्। यद्यपि पूर्वमपि ब्रह्मस्वरूपमस्ति, तथापि सामग्र्यभावात् तदानीमन्तःकरणवृत्तिरूपं सहकारिकारणं नोत्पन्नम्। पश्चात् सामग्रीसंपत्तिदशायामन्तःकरणवृत्तिरूपं सहकारिकारणमुत्पत्स्यते। तत्सहकृतं ब्रह्मस्वरूपं पश्चात् निवर्तकं भविष्यतीति शङ्कते - **अस्तु तर्हीति**। अन्तःकरणवृत्तिमनपेक्ष्य ब्रह्मस्वरूपं न निवर्तकमित्युक्ते अन्तःकरणवृत्तिरेव निवर्तिकेत्यायाति न ब्रह्मस्वरूपमिति परिहरति-**प्राप्ताप्राप्तेति**। प्राप्ताप्राप्तविवेको नाम अन्वयव्यतिरेकनिरूपणं युक्तायुक्तविवेचनम् वा। अन्तः करणवृत्तिसत्त्वे अविद्यानिवृत्तिः तदभावे तदभाव इत्यन्वयव्यतिरेकनिरूपणम्। तदधीनः अन्तःकरणवृत्तिरेव निवर्तिकेति युक्तमिति निश्चयश्च प्राप्ताप्राप्तविवेकः। ननु भवतु अन्तःकरणवृत्तिरेव निवर्तिकेत्यत्राह- **तथा च सतीति**। अन्तः करणवृत्तेर्निवर्तकत्वे सति तस्याः ब्रह्मस्वरूपात् भिन्नतया ब्रह्मस्वरूपाभिन्नं ज्ञानं निवर्तकमिति पक्षान्तर्गतत्वव्याघात इत्यर्थः। स पक्षो हीदानीं विचार्यमाणोऽस्तीति भावः।

एतेन वृत्तिप्रतिबिम्बितचैतन्यं निवर्तकमिति पक्षोऽपि निरस्तो वेदितव्यः। प्राप्ताप्राप्तविवेकेन वृत्तेरेव निवर्तकत्वप्रसङ्गात्। किं च "यथा ह्ययं ज्योतिरात्मा विवस्वान् अपो भिन्ना बहुधैकोऽनुगच्छन्" इत्यादिभिः आपातप्रतीत्या अन्तःकरणे प्रतिबिम्ब-

अत एव न तृतीयः । अपसिद्धान्ताच्च । किञ्च तस्य सत्यत्वे भेदांशेन ब्रह्मणः सद्वितीयत्वप्रसङ्गः । मिथ्यात्वे त्वभेदांशेन ब्रह्मणोऽपि मिथ्यात्वप्रसङ्गः । नित्यत्वानित्यत्वविकल्पेनापि दूषणमूह्यम् ।

चतुर्थस्तूभय प्रतिक्षेपरूपोऽनिर्वचनीयोक्त (रूपानिर्वचनीय) दूषणनयेनोभयसिद्ध्यनतिरेकात् तद्दूषणेनैव दूषितः । पञ्चमस्तु परिशिष्यते ।

कल्पनायामपि न वृत्तौ प्रतिबिम्बकल्पनम्, तत्र प्रमाणाभावात् जलपरिणामभूतायां करकायां प्रतिबिम्बादर्शनात् ।

निवर्तकं ज्ञानं ब्रह्मस्वरूपात् भिन्नाभिन्नमिति तृतीयपक्षं दूषयति - **अत एव न तृतीय** इति । ब्रह्मस्वरूपाद्भिन्नमिति पक्षे अभिन्नमिति पक्षे चोक्तानां दोषाणां प्रसङ्गादेवेत्यर्थः । दोषान्तरमाह - **अपसिद्धान्ताच्चेति** । भवद्भिः भिन्नाभिन्नमिति सिद्धान्तस्यानभ्युपगमादित्यर्थः । तृतीयकल्प एव दूषणान्तरमाह - **किंचेति** । **तस्य** = भिन्नाभिन्नत्वस्य सत्यत्वे सत्यभूतं भेदमादाय ब्रह्मणः सद्वितीयत्वप्रसङ्गः । सत्यभूतस्य द्वितीयवस्तुभूतस्य भेदस्य सत्त्वात् । भिन्नाभिन्नत्वस्य मिथ्यात्वे असत्यभूतमभेदमादाय ब्रह्मणः मिथ्यात्वप्रसङ्ग इति भावः । ब्रह्माभेदस्य ब्रह्मस्वरूपत्वात् अभेदस्य मिथ्यात्वेन ब्रह्मणोऽपि मिथ्यात्वं स्यादिति तात्पर्यम् । दूषणान्तरमाह- **नित्यत्वानित्यत्वेति** । भिन्नाभिन्नत्वं नित्यमनित्यं वा । नित्यत्वे नित्यभूतं भेदमादाय नित्यवस्तुद्वयप्रसङ्गः । अनित्यत्वेऽनित्यभूतमभेदमादाय ब्रह्मणोऽनित्यत्वप्रसङ्ग इति दूषणमूह्यमित्यर्थः ।

अथानुभयात्मकमिति चतुर्थकल्पं दूषयति-**चतुर्थस्तु** इत्यादिना । निवर्तकं ज्ञानं ब्रह्मस्वरूपभूतात् ज्ञानात् भिन्नमपि न भवति अभिन्नमपि न भवतीति चतुर्थकल्पपर्यवसानम् । तत्र भिन्नं न भवति चेत् अभिन्नं भवतीत्यर्थः । अभिन्नं न भवति चेत् भिन्नं भवतीत्यर्थः । ततश्च भेदाभेदोभयानतिरेकात् भेदाभेदोभयपक्षे यानि दूषणानि उक्तानि तानि दूषणानि प्रसजन्ति । यथा सदसद्भिन्नमित्युक्ते सदसद्रूपमित्यत्रैव पर्यवसानम् । सद्भिन्नं हि असत्, असद्भिन्नं च सदिति तथेति भावः । **तद्दूषणेनैवेति** । उभयपक्षदूषणेनैवेत्यर्थः ।

तथाभूतं किं तज्ज्ञानं यथाकथंचिदपि प्रतीतिपदवीं नावतरति, अथावतरति ? पूर्वत्र किं साधनदूषणप्रयासेन ? उत्तरत्र कथंचिदपि उक्तकोटिबहिर्भावासिद्धेः न पृथग्दूषणीयमवशिष्टमिति ।

किंच निवर्तकज्ञानं निवर्तिष्यते, न वा ? पूर्वत्र तन्निवृत्तेरेवागन्तुकत्वात् ब्रह्मस्वरूपातिरिक्ताविद्यास्थितिप्रसङ्गः । उत्तरत्र ब्रह्मस्वरूपातिरिक्तनिवर्तकज्ञानसद्भावेनै (संभवेनैव) वाविद्यास्थितिरनिवार्या । अतो यत् विद्याया निवर्तकत्वेन सम्मतम्, तदेव स्वात्मना स्वनिवृत्त्या वा तामेव स्थापयतीति विपरीतापत्तिरिति। निवर्तकज्ञानप्रध्वंसोऽपि निवर्तिष्यत इति चेत्–तर्हि तत्तन्निवर्तकनिवृत्त्यनुवृत्ति-

---

पञ्चमस्तु इति । अशक्यवेदनकथंभावं किंचिदिति पञ्चमः पक्ष इत्यर्थः । ईदृक्प्रकारमिति ज्ञातुमशक्यं किंचित् ज्ञानं निवर्तकमित्यर्थः । तादृशं ज्ञानं येन केनापि प्रकारेण प्रतीयते न वा । न चेत् तस्य साधने दूषणे वा क्रियमाण; प्रयासो विफलः । प्रतीयते चेत् पूर्वोक्तरीत्या भिन्नतया अभिन्नतया भिन्नाभिन्नतया वा प्रतीयेतेति तत्र तत्र प्रकारे उक्तानि दूषणानि अवर्जनीयानि इति न पृथक् दूषणमवशिष्यत इति भावः ।

अथ सामान्यदूषणमाह - **किं चेत्यादिना** । निवर्तकं ज्ञानं निवर्तिष्यते न वा । आद्ये निवर्तकज्ञाननिवृत्तेः आगन्तुकत्वात् तद्धेतुभूतायाः अविद्यायाः स्थितिः स्यात् इति मोक्षानुपपत्तिः । उत्तरत्र ब्रह्मस्वरूपातिरिक्तस्य निवर्तकज्ञानस्य सद्भावेन तद्धेतुभूतायाः अविद्यायाः स्थितिरवर्जनीयेति उभयतःस्पाशा रज्जुः । निगमयति-**अत** इति । **अविद्यायाः** निवर्तकत्वेन संमतं यत् ज्ञानं तत्सिद्ध्यर्थं वा तन्निवृत्तिस्थित्यर्थं वा अविद्यास्थितेः आवश्यकत्वात् अविद्यानिवृत्तिरूपो मोक्षो न स्यात् तद्विपरीतो बन्ध एव स्यादिति भावः। शङ्कते - **निवर्तकेति** । निवर्तकज्ञाननिवृत्तिरपि निवर्तिष्यते चेदित्यर्थः । समाधत्ते **तर्हीति** ।

प्रसङ्गेन ब्रह्मणो यावदात्मभाविन्यविद्यानुवृत्तिस्स्यादिति वैपरीत्यस्थैर्यापत्तिः । इत्यलं हिताहितविपर्यस्तचेतसां शोच्यानां निग्रहेणेति ॥

॥ इति शतदूषण्यां निवर्तकानुपपत्तिवादः त्रिचत्वारिंशः ॥ ४३ ॥

निवर्तकज्ञाननिवृत्तेर्या निवृत्तिः तस्याः स्थित्यर्थम् अविद्यानुवृत्तिः स्यादित्येवंरीत्या यावद्ब्रह्मस्वरूपभाविनी अविद्या स्यादिति मोक्षवैपरीत्यस्य बन्धस्य स्थिरता स्यादिति भावः ।

न च निवर्तकज्ञाननिवृत्तेः अविद्यानिवृत्तेश्च ब्रह्मस्वरूपत्वात् न तदर्थमविद्यास्थित्यपेक्षेति वाच्यम् । एतत्पक्षस्य उपरितनवादे निरसिष्यमाणत्वात् ।

इति श्रीशतदूषणीव्याख्यायां तात्पर्यप्रकाशिकायां
निवर्तकानुपपत्तिवादः त्रिचत्वारिंशः ॥

• • •

।। अथ निवृत्त्यनुपपत्तिवादः चतुश्चत्वारिंशः ।। ४४ ।।

येयं ब्रह्म(णः) श्रवणमनननिदिध्यासनादिक्रमपरिणतविशदाद्वैतवाक्यार्थविज्ञानहेतुका निश्शेषाविद्यानिवृत्तिरुच्यते, सा किमध्यासरूपा, न वा ?

पूर्वत्र कथं निश्शेषाविद्यानिवृत्तिः, अध्यासरूपायां तस्यां सत्यां तन्मूलाविद्याया अपि विद्यमानत्वात्। उपादानमन्तरेणोपादेयस्थि- त्ययोगात् ।। आत्मोपादाना साऽस्त्विति चेन्न, आत्मनः परिणामित्वप्रसङ्गात्। सत्योपादानायाश्च

अथ निवृत्त्यनुपपत्तिवादः चतुश्चत्वारिंशः ।।

सत्यानीव विरुद्धजातिजनुषा सिद्धानिं सिद्धाश्रमे
वैरं यत्र मिथस्त्यजन्ति विधयः सर्वैर्निषेधैः सह।
तं रङ्गेशयमङ्गसङ्गिकमलालक्ष्येश्वरप्रक्रियं
शान्तावद्यमनन्तमङ्गलगुणं देवं प्रपद्येमहि ।।

अयं श्लोकः द्विपञ्चाशत्तमे वादेऽप्यादौ निवेशितः। तत्र निवेश एव उचितः। तत्रैव व्याख्यास्यते।

परमतमनुवदति - **येयमिति**। आदौ श्रवणं ततो मननं ततो निदिध्यासनं इत्यादिक्रमेण परिपक्वं यत् अद्वैतवाक्यार्थविज्ञानं तद्धेतुका निःशेषाविद्यानिवृत्तिरिति येयमविद्यानिवृत्तिरुच्यते इत्यनुवादः। एतन्मतं विकल्पपूर्वकं दूषयितुमारभते - **सा किमित्यादिना**। **अध्यासरूपा**=अध्यासः रूपं यस्याः सा अध्यासरूपा अध्यस्ता मिथ्येति यावत्। **पूर्वत्रेति**। अविद्यानिवृत्तेः मिथ्यात्वे तन्मूलभूतायाः अविद्यायाः सत्त्वात् तत्कार्यभूतायाः अविद्यानिवृत्तेश्च सत्त्वात् सकार्याविद्यानिवृत्तिरूपा निःशेषाविद्यानिवृत्तिः कथं घटत इत्यर्थः। अविद्याया अपीति अपिना कार्यविद्यमानत्वस्य समुच्चयः। मिथ्याभूतं सर्वमविद्योपादानकमिति भवत्सिद्धान्तात् अविद्यायाः तत्कार्यभूतायाः मिथ्याभूताया; अविद्यानिवृत्तेश्च सद्भावादिति भावः। तदाह - **उपादानमिति**। ननु अविद्यानिवृत्तेः मिथ्याभूतायाः न अविद्या उपादानकारणम्, अपि तु आत्मेत्याशङ्कते - **आत्मोपादानेति**।

सत्यत्वेन सद्वितीयत्वप्रसङ्गात् । न च दोषमन्तरेणाध्यासो भवतामपीष्टः; तथा सति अविद्याकल्पनस्यैव निर्मूलत्वप्रसङ्गात् । यदि सा ब्रह्मवत् अविद्यावच्च उपादानरहिता, तदा कथं तया सहाविद्या तिष्ठेत् ? स्थिता वा किमिति पश्चान्नावतिष्ठते ।। निवृत्तिरपि ब्रह्मव्यतिरिक्तत्वैकप्रयोजकप्रयुक्तमिथ्यात्ववशान्निवर्तिष्यत इति

। आत्मः उपादानं यस्याः सा आत्मोपादाना । परिहरति-**आत्मन इति** । आत्मनः उपादानत्वस्वीकारे परिणामित्वप्रसङ्गः । उपादानत्वस्य परिणामित्वव्याप्यत्वादिति भावः । किं च भवद्भिः उपादानोपादेययोः तुल्यसत्ताकत्वाङ्गीकारात् अविद्यानिवृत्तेः सत्यभूतात्मोपादानकत्वाङ्गीकारे अविद्यानिवृत्तेरपि सत्यत्वप्रसङ्गेन सत्यभूतवस्तुद्वयस्वीकारेण अद्वैतभङ्ग इति भावः । **सत्योपादानायाश्चेति** । अविद्यानिवृत्तेरिति शेषः । **सद्वितीयत्वप्रसङ्गादिति** । सत्यभूतद्वितीयवस्तुमत्त्वप्रसङ्गादित्यर्थः । किं च अविद्यानिवृत्तिरपि यदि अध्यासविषयभूता तर्हि तस्याध्यासस्य अकारणकत्वं वा सकारणकत्वं वा; नाद्यः । दोषरूपकारणं बिना अध्यासस्य अदर्शनात् भवद्भिरनङ्गीकाराच्च । किं च दोषं बिना अध्यासाङ्गीकारे प्रपञ्चाध्यासोऽपि अविद्यां बिना भवितुमर्हतीति अविद्याकल्पनमेव निर्मूलं स्यात् इत्याह - **न च दोषमन्तरेणेति** । **निर्मूलत्वप्रसङ्गादिति** । न च दोषत्वेनाविद्याया अकल्पनेऽपि उपादानत्वेन तत्कल्पनमस्तु इति वाच्यम् । अविद्यानिवृत्तेरिव प्रपञ्चस्यात्मोपादानकत्वसंभवात् इति भावः ।

दूषणान्तरमाह - **यदि सेति** । सा अविद्यानिवृत्तिः यदि उपादानकारणरहिता तदा ब्रह्मवत् अविद्यावच्च अनादिः स्यात् । तथा सति अविद्यया सह अनादेः अविद्यानिवृत्तेरपि स्थितिर्वाच्या । सा चानुपपन्ना । अविद्यातन्निवृत्त्योः युगपत् स्थित्यसंभवात् । युगपत् स्थितौ अविद्यानिवृत्तिरूपमोक्षकालेऽपि अविद्या अवतिष्ठेतेति भावः । ननु अविद्यानिवृत्तिः अविद्योपादानैव, न ब्रह्मोपादाना, नापि निरुपादाना । न च निःशेषाविद्यानिवृत्त्यसंभवः । अविद्यानिवृत्तेरपि निवृत्तेरिति शङ्कते-**निवृत्तिरपीति** । अविद्यानिवृत्तिनिवृत्तेरपि

निश्शेषाविद्यानिवृत्तिरिति चेन्न; निवृत्तिनिवृत्तौ तन्मिथ्यात्वे च निवर्त्योन्मज्जनतत्सत्यत्वयोः प्रसङ्गात् ॥ प्रागभावनिवृत्तिरूपस्य घटस्य निवृत्तावपि प्रागभावानुन्मज्जनवत्, जागरदशायां स्वाप्नान्धकारनिवृत्तिरूपस्य स्वाप्नप्रदीपस्य निवृत्तावपि स्वा(स्व)प्ना न्धकारमिथ्यात्ववच्चानुन्मज्जनमिथ्यात्वयोः सिद्धिरिति चेन्न; घटतत्प्रागभावनिवृत्त्यात्मकस्य प्रध्वंसस्य, स्वाप्नतेजस्तमोबाधकस्य जागरस्य

कार्यत्वेनाविद्योपादानकत्वावश्यंभावात् अविद्यास्थितिरवर्जनीयैवेत्याशयेन समाधत्ते- **निवृत्तिनिवृत्ताविति** । घटनाशस्य नाशे घटोन्मज्जनवत् अविद्यानिवृत्तेः निवृत्तौ अविद्योन्मज्जनं स्यात् । एवमविद्यानिवृत्तिनिवृत्तेः मिथ्यात्वे अविद्यानिवृत्तेः सत्यत्वं स्यात् इति भावः । इदमुपलक्षणम् अविद्यानिवृत्तिनिवृत्तेः मिथ्यात्वे तदुपादानतया अविद्यास्थितिरवर्जनीयेति ।

शङ्कते - **प्रागभावेति** । निवृत्तिनिवृत्तौ निवर्त्योन्मज्जनं निवृत्तिसत्यत्वं च यत् पूर्वं प्रसञ्जितम्, तदुभयं न प्रसजतीत्यत्र क्रमशः दृष्टान्तद्वयं प्रदर्श्यते । घटप्रागभावनिवृत्तिरूपस्य घटस्य निवृत्तावपि (नाशेऽपि) घटप्रागभावस्योन्मज्जनं न भवति । एवं स्वप्ने दीपः तेन अन्धकारनिवृत्तिश्च दृश्यते । जागरे अन्धकारनिवर्तकस्य दीपस्य निवृत्तावपि स्वाप्नान्धकारस्य मिथ्यात्वं दृश्यते । तद्वत् अविद्यानिवृत्तेर्निवृत्तावपि अविद्योन्मज्जनं वा अविद्यानिवृत्तेः सत्यत्वं वा न प्रसजतीति भावः । **स्वाप्नान्धकारनिवृत्तिरूपस्येति** । इदं भावान्तरमभाव इति मतेन । प्रदीपपदमन्धकाराभावपरं वा । प्रदीपस्य निवृत्तावपीत्यत्र निवृत्तिपदं तत्प्रयोज्यमिथ्यात्वपरम्, तस्यैव प्रकृतत्वात् ।

समाधत्ते-**घटप्रागभावेति** । घटप्रागभावनिवृत्तिरूपस्य घटस्य ध्वंसे सति घटप्रागभावोन्मज्जनं न भवति । घटनिवृत्तेः घटप्रागभावनिवृत्तेश्च घटप्रागभावविरोधित्वात् । एवं जागरदशायां स्वाप्नान्धकारस्य तन्निवृत्तिरूपस्वाप्नदीयस्य च निवृत्तावपि स्वाप्नान्धकारस्य मिथ्यात्वं संभवति । जागरस्य स्वाप्नान्धकारस्वाप्नदीपोभयविरोधित्वात् । दार्ष्टान्तिके तु अविद्यातन्निवृत्त्योर्विरोधि किमपि नास्तीति अविद्यानिवृत्तिनिवृत्तौ अविद्यायाः पुनरुन्मज्जनमविद्यानिवृत्तेः सत्यत्वं च दुर्वारमिति भावः ।

Govt. of India
Guruvayoor Campus Library
Puranattukara.P.O., Thrissur-680551
Acc.No. 39370
Acc.Date 27/02/2026

च विद्यमानत्वेन तद्द्वयानुन्मज्जनमिथ्यात्वयोरुपपत्तेः । अत्र तु अविद्यातन्निवृत्त्योर्द्वयोरपि प्रत्यनीकमन्यन्न परिशिष्यते ।। अस्ति ब्रह्मस्वरूपमिति चेन्न; तस्य तदुभयप्रत्यनीकत्वे तस्यानादित्वात् तयोः प्रागप्यारोपाभावप्रसङ्गात् । तथा च सति भेदप्रतिभासादेर्निर्मूलत्वे सर्वप्रमाणविरोधः मोक्षशास्त्रानारम्भश्च । पूर्वं तदविरोधित्वे पश्चादपि तद्वैरासंभवात् ।। कैवल्येन रूपेण पश्चाद्विरोध इति चेन्न; कैवल्यस्य स्वरूपमात्रत्वे दत्तोत्तरत्वात् स्वरूपातिरिक्तत्वे(त्वेन) सत्यत्वे

दार्ष्टान्तिकेऽपि अविद्यातन्निवृत्त्योर्विरोधि ब्रह्मस्वरूपमस्तीति शङ्कते - **अस्तीति** । ब्रह्मस्वरूपस्य अविद्यातन्निवृत्तिविरोधित्वे तस्यानादित्वेन तयोरारोप एव न स्यादिति का तन्निवृत्तिकथेत्याशयेन समाधत्ते - **तस्य तदुभयेति** । **तस्य** = ब्रह्मस्वरूपस्य । **तदुभयप्रत्यनीकत्वे** = अविद्यातन्निवृत्त्युभयविरोधित्वे । **तस्य** = ब्रह्मस्वरूपस्य । ननु मास्तु अविद्यादेरध्यास इत्याशङ्क्याह- **तथा च सतीति** । अविद्यारोपाभावे सति अविद्याया एवाभावात् तन्मूलकभेदप्रतिभासादे; अभावात् सकलप्रमाणविरोधः । प्रत्यक्षादिपमाणैर्भेदस्य प्रतिभासमानत्वात् । भेदप्रतिभासाभावे भेदप्रतिभासनिवृत्तिरूपमोक्षस्य तदुपायप्रतिपादकशास्त्रस्य चानारम्भश्च प्रसजति इति भावः । ननु ब्रह्मस्वरूपं पूर्वं अविद्यातन्निवृत्त्योः अविरोधि । अतः अविद्याप्रतिभासादिकं भवति । तत्त्वज्ञानानन्तरं ब्रह्मस्वरूपं तयोर्विरोधि । अतोऽविद्यादेर्नोन्मज्जनादिकमित्याशङ्क्य प्राग्वत् पश्चादपि अविशेषात् ब्रह्मस्वरूपस्य न विरोधित्वमिति परिहरति-**पूर्वमिति** । **तदविरोधित्वे** = अविद्यातन्निवृत्त्यविरोधित्वे । **तद्वैरासंभवात्** = अविद्यातन्निवृत्तिविरोधित्वासंभवात् । ब्रह्मस्वरूपस्येति प्रकृतम् । ननु ब्रह्मस्वरूपस्य पूर्वमविरोधित्वेऽपि पश्चात् कैवल्येन रूपेणाविद्यादिविरोधित्वमित्याशङ्क्य, तत् कैवल्यं ब्रह्मस्वरूपं वा तदतिरिक्तं वा । आद्ये पूर्वमपि विरोधित्वात् अविद्याध्यासानुपपत्तिः । अन्त्ये ब्रह्मणः सविशेषत्वापत्तिः । कैवल्यस्य मिथ्यात्वात् न सविशेषत्वमिति न वाच्यम् । तर्हि कैवल्यार्थमविद्यास्थितेरावश्यकत्वात् मोक्षानुपपत्तिरिति समाधत्ते-**कैवल्येनेत्यादिना** । **दत्तोत्तरत्वादिति** ।

सद्वितीयत्वप्रसङ्गात्। तन्मिथ्यात्वे तत एवाविद्यास्थित्यवश्यम्भावात्। एतेन प्रयोजकं यदुक्तम्, तदपि दत्तोत्तरम्।

अत एव न द्वितीयः; अनध्यासरूपाया निवृत्तेः स्वरूपान्तर्भावादिविकल्पदुस्स्थत्वात्। अन्तर्भावे ब्रह्मणोऽनादित्वेनाविद्याया नित्यनिवृत्तिप्रसङ्गात्। यद्यपि घटादेः स्वरूपमेव तत्प्रागभावनिवृत्तिरितिवत् ज्ञानस्वरूपं ब्रह्मैवाज्ञाननिवृत्तिरिति वक्तुं शक्यम्—तथाऽपि स्वप्रागभावनिवृत्तिरूपघटादेरिव स्वाज्ञाननिवृत्तिरूपब्रह्मणोऽपि तदनन्तरत्वावश्यम्भावे कादाचित्कत्वादयो दोषाः समुन्मिषेयुः।

अविद्याध्यासानुपपत्तिरित्युत्तरं दत्तमित्यर्थ;। **तन्मिथ्यात्वे**=कैवल्यस्य मिथ्यात्वे। **प्रयोजकं यदुक्तमिति।** निवृत्तिरपि ब्रह्मव्यतिरिक्तत्वरूपैकप्रयोजकप्रयुक्तमिथ्यात्ववशान्निवर्तिष्यते''इति ग्रन्थेन पूर्वं यत् प्रयोजकमुक्तम् तदपि दत्तोत्तरमित्यर्थः। ब्रह्म व्यतिरिक्तत्वं सत्यं वा मिथ्या वा। आद्ये ब्रह्मणः सद्वितीयत्वापत्तिः। द्वितीये तदर्थमविद्यास्थित्यवश्यंभावात् इत्युत्तरं दत्तमित्यर्थः।

एतावता निःशेषाविद्यानिवृत्तिः अध्यासरूपेति प्रथमकल्पो दूषितः। अथ अध्यासरूपा नेति द्वितीयकल्पं दूषयति - **अत एव न द्वितीय** इति। **अत एव** = वक्ष्यमाणहेतोः। तमेव हेतुमाह-**अनध्यासरूपाया** इति। अनध्यासरूपायाः सत्यभूतायाः अविद्यानिवृत्तेः ब्रह्मस्वरूपान्तर्भावो वा बहिर्भावो वेति विकल्पेन दूषितत्वात् इत्यर्थः। अन्तर्भावपक्षं दूषयति - **अन्तर्भावे** इत्यारभ्य **तुल्यप्रसरत्वात्** इत्यन्तेन। सत्यभूतायाः अविद्यानिवृत्तेः ब्रह्मस्वरूपान्तर्भावे सति ब्रह्मस्वरूपस्यानादित्वेन अविद्यानिवृत्तिरप्यनादिः स्यात्। तथा च अविद्यास्वरूपमेव कदापि न संभवेदिति भावः। ननु कथं ब्रह्मणोऽविद्यानिवृत्तित्वं तथा सति घटस्यापि पटनिवृत्तित्वप्रसङ्गात्। अतो ब्रह्मैवाविद्यानिवृत्तिरिति पक्षस्योत्थितिरेव न संभवतीति किं तद्दूषणप्रयासेनेत्याशङ्क्य कथंचित्तदुत्थानं समर्थयन् दूषणान्तरमप्याह - **यद्यपीत्यादिना**। यथा घटस्वरूपमेव घटप्रागभावनिवृत्तिः तथा ज्ञानस्वरूपं ब्रह्मैव ज्ञानप्रागभावरूपाज्ञाननिवृत्तिरिति वक्तुं शक्यम्,

ननु पूर्वसिद्धभूतलस्वरूपमेव पश्चिमसिद्धघटादिनिवृत्तिरित्यभावापलापवादिभिरभ्युपगम्यत इति चेत् किमनेन ? अस्माभिस्तत्रापि घटसंसर्गप्रत्यनीकतारूपस्य पराभिमतघटाभावाविनाभूतभावान्तरात्मककालविशेषसंसर्गतन्मूल-

---

तथापि स्वप्रागभावनिवृत्तिरूपो घटः यथा घटप्रागभावानन्तरकालिकः तथा स्वाज्ञाननिवृत्तिरूपब्रह्मणोऽपि स्वाज्ञानानन्तरकालिकत्वमावश्यकमिति ब्रह्मणः कादाचित्कत्वादिकं स्यादिति भावः । अत्र चण्डमारुतम् – अज्ञानस्य ज्ञानप्रागभावरूपत्वाभावेऽपि ज्ञानप्रागभावप्रतिपादनयोग्याज्ञानशब्दबोध्यत्वमात्रेण, भावरूपाज्ञानस्य ब्रह्मरूपज्ञानप्रागभावत्वाङ्गीकारेण वा तन्निवृत्तिरूपत्वं ब्रह्मणः घटदृष्टान्तेनोपपाद्यते । वस्तुतस्तु अन्यस्यासंभवात् ब्रह्मैव अज्ञाननिवृत्तिरिति वक्तव्यमिति विवक्षितम् – इति ।

अत्र मूले-ब्रह्म अज्ञानानन्तरकालिकम् अज्ञाननिवृत्तिरूपत्वात् यत् यन्निवृत्तिरूपं तत् तदनन्तरकालिकं यथा घटप्रागभावनिवृत्तिरूपो घटः घटप्रागभावानन्तरकालिक इत्यनुमानप्रयोगो विवक्षितः । तस्मिन्ननुमाने व्यभिचारं शङ्कते – **ननु पूर्वसिद्धेति** । अतिरिक्तमभावं ये नाङ्गीकुर्वन्ति ते पूर्वसिद्धं भूतलस्वरूपमेव पश्चात्सिद्धघटनिवृत्तिरूपमित्यङ्गीकुर्वन्ति । तत्र घटनिवृत्तिरूपे भूतले घटानन्तरकालिकत्वाभावात् व्यभिचार इति शङ्कितुराशयः । तत्रापि साध्यसत्वान्न व्यभिचार इत्याशयेन समाधत्ते – **किमनेनेत्यादिना** । घटसंसर्गस्य विरोधी यः घटाभावाधिकरणत्वेन पराभिमतदेशनिष्ठः कालविशेषसंसर्गः, तन्मूलकः परिणामः, तत्कालीनद्रव्यान्तरसंयोगादिर्वा स एव घटाभावः इत्यस्माभिः अङ्गीकारात् तस्य घटसंसर्गोत्तरकालीनत्वेन यद्विरोधी योऽभावः स तदुत्तरकालिक इति व्याप्तौ व्यभिचाराप्रसक्तेः । तथा च ब्रह्मणः अज्ञानविरोधितन्निवृत्तिरूपत्वाङ्गीकारे ब्रह्मणः अज्ञानोत्तरकालिकत्वावश्यंभावेन कादाचित्कत्वादिप्रसङ्गो दुर्वार इति भावः । यद्विषयकज्ञाने सति यद्विषयकज्ञानं विरुध्यते तस्य तदभावरूपता, अधिकरणज्ञानं तु न तन्निरोधकमिति भावः । **घटसंसर्गप्रत्यनीकतारूपस्येति** । घटसंसर्गप्रत्यनीकता रूपं धर्मो यस्य तत् घटसंसप्रत्यनीकतारूपम्, तस्येत्यर्थः । घटसंसर्गविरोधिन इति यावत् । इदं च

परिणामादेः प्रत्यक्षसिद्धस्य भूतलावस्थाविशेषस्य यथायथं घटाभावत्वाभ्युपगमात् तस्य घटसंसर्गोत्तरभावित्वेन पूर्वसिद्धत्वासिद्धिः(द्धेः) । नन्वभाववादिनोऽपि कार्यप्रागभावस्य कारणाश्रयत्वात् कारणेऽपि(णेन) कार्यप्रागभावस्य सम्बन्धोऽभ्युपगतः । सम्बन्धिनः प्रागभावस्य निवृत्तौ च तत्सम्बन्धनिवृत्तिरास्थेया । सा च सम्बन्धनिवृत्तिः कारणस्वरूपानतिरेकिणीष्टा च । कार्यं तु दृश्यमानं स्वप्रागभावस्यैव निवृत्तिः, एवं कार्यकारणयोस्सम्बन्धोऽपि स्वप्रागभावनिवृत्तिरेवेति परिशेषात् पूर्वसिद्धकारणस्वरूपमेव कार्यप्रागभावकारणयोस्सम्बन्धनिवृत्तिरिति ॥ –

कालविशेषसंसर्गादिर्विशेषणम् । **घटाभावेति** । **घटाभावाविनाभूतः** = घटाभावाधिकरणदेशवृत्तिः भावान्तरस्वरूपः कालविशेषसंसर्गः तन्मूलकः परिणामः कपालत्वाद्यवस्थः आदिपदग्राह्यः तत्कालिकद्रव्यान्तरसंयोगश्च प्रत्यक्षसिद्धः भूतलनिष्ठः आगन्तुको धर्मः तस्य यथायोग्यं घटाभावरूपत्वाङ्गीकारात् इत्यर्थः । परिणामादिरूपस्य भूतलावस्थाविशेषस्येति समानाधिकरणे षष्ठ्यौ ।

पुनरपि व्यभिचारं शङ्कते – **नन्वभावेत्यादिना** । अतिरिक्तमभावं ये स्वीकुर्वन्ति वैशेषिकादयः ते कार्यप्रागभावः कारणनिष्ठः इति स्वीकुर्वन्ति । यथा घटप्रागभावः घटसमवायिकारणकपालनिष्ठः । ध्वंसप्रागभावौ स्वप्रतियोगिसमवायिकारणे वर्तेते इति तेषां सिद्धान्तः । एवं च कपाले घटप्रागभावः घटप्रागभावसंबन्धश्च स्वरूपात्मकः अङ्गीकृतः । संबन्धिनः कार्यप्रागभावस्य निवृत्तौ च कार्यप्रागभावसंबन्धनिवृत्तिश्चाङ्गीकरणीया । कार्यप्रागभावसंबन्धनिवृत्तिश्च समवायिकारणस्वरूपानतिरिक्ता तैरिष्यते । घटरूपकार्यं तु घटप्रागभावसंबन्धनिवृत्तिरूपम् । एवं कार्यकारणयोः यः संबन्धः समवायः सोऽपि कार्यप्रागभावनिवृत्तिरेव । एवं च परिशेषात् कार्यकारणयोः संसर्गनिवृत्तिरपि पूर्वसिद्धकारणस्वरूपमेव । इत्थं च कार्यकारणसंबन्धरूपायाः कार्यप्रागभावनिवृत्तेः पूर्वसिद्धकारणोत्तरकालिकत्वाभावात् उक्तव्याप्तौ व्यभिचार इति शङ्का ।

तदप्यसत्, कार्यतत्प्रागभावयोः (तत) कारणेन सह स्वरूपातिरिक्तसम्बन्धमनभ्युपगच्छतां पुरतो नेदं चोद्यम् । अभ्युपगच्छतामपि कार्यसम्बन्धप्रागभावः कार्यप्रागभावकारणयोस्सम्बन्ध एवेति तस्य तन्निवृत्तित्वं युक्तम् । कार्यमेव वा स्वप्रागभावतत्सम्बन्धयोरप्यभावो भवतु, विरोधाविशेषात् । यथैक एव प्रध्वंसः कार्यतत्प्रागभावयोः प्रतिपक्षः(क्षेपः) इत्यादि स्वयमूह्यम् ।

ननु भवतामप्यविद्यानिवृत्तिः पूर्वसिद्धजीवस्वरूपाविर्भाव एव, 'स्वेन रूपेणाभिनिष्पद्यत' इति श्रुत्यनुसारात् । तद्वत् ब्रह्मस्वरूपाविर्भाव एवास्माकम-

---

समाधत्ते - **तदप्यसदिति** । कार्यतप्रागभावयोः कारणेन सह स्वरूपमेव संबन्धः न तु तदतिरिक्तसमवायादिः इति स्वीकुर्वतामस्माकं मते प्रागभावसंबन्धस्य प्रागभावाभिन्नतया प्रागभावनिवृत्तिरूपस्य कार्यस्यैव स्वप्रागभावसंबन्धनिवृत्तिरूपत्वात् स्वप्रागभावसंबन्धनिवृत्तिरूपस्य घटादेः स्वप्रागभावसंबन्धोत्तरकालिकत्वेन व्यभिचाराभावात् उक्तव्याप्त्यनुसारेण ज्ञानप्रागभावसंबन्धनिवृत्तिरूपस्य ब्रह्मणोऽपि ज्ञानप्रागभावसंबन्धोत्तरकालिकत्वमावश्यकमिति कादाचित्कत्वादिप्रसङ्गस्तदवस्थ इति भावः । **अभ्युपगच्छतामपीति** । कार्यतत्प्रागभावयोः कारणेन सह स्वरूपातिरिक्तं संबन्धमङ्गीकुर्वतामपि मते कार्यसंबन्धप्रागभाव एव कार्यप्रागभावकारणयोः संबन्ध इति कार्यसंबन्धस्य कार्यसंबन्धप्रागभावनिवृत्तित्वं युक्तम् । अथवा कार्यमेव स्वप्रागभावतत्संबन्धयोरपि निवृत्तिर्भवतु । सर्वथा पूर्वोक्तदोषः दुर्वार इति भावः । **विरोधाविशेषादिति** । कार्यस्य कार्यप्रागभावस्य च यथा विरोधः तथा कार्यसंबन्धस्य कार्यप्रागभावतत्संबन्धाभ्यां विरोधः अविशिष्ट इत्यर्थः । तत्रोदाहरणम् - यथा घटध्वंसेन साकं घटघटप्रागभावयोः विरोधः, तद्वत् । प्रतिपक्षः = विरोधी ।

शङ्कते - **ननु भवतामपीति** । विशिष्टाद्वैतिनामपि अविद्यानिवृत्तिः पूर्वसिद्धस्य जीवस्वरूपस्य आविर्भाव एव, "स्वेन रूपेणाभिनिष्पद्यत" इति श्रुत्यनुसारात् । तद्वत् ब्रह्मस्वरूपाविर्भाव एवास्माकमविद्यानिवृत्तिरस्तु । आविर्भावस्य कादाचित्कत्वप्रसक्तावपि

विद्यानिवृत्तिरस्त्विति चेन्न; संसरदशायामनाविर्भूतानेकाकारगोचरस्याविर्भावशब्दार्थस्य धर्मभूतज्ञानविकासविशेषस्य पूर्वं कर्मणा प्रतिबद्धस्य पश्चात्तन्निवृत्तौ स्वरूपानुबन्धित्वादनिवर्तनीयस्यास्माभिरभ्युपगमात्। भवतस्तु निराकारे ब्रह्मणि नित्याविर्भूतज्ञप्ति (व्यक्ति) मात्रस्वरूपे नापूर्वः कश्चिदाविर्भावः। ननु ब्रह्माकारनिवृत्ता(वर्ता)न्तःकरणवृत्त्युपलक्षितस्वरूपेणापूर्वेण ब्रह्म स्वाज्ञाननिवृत्तिः, कारणविनाशाच्चोपलक्षकान्तःकरणवृत्तिविनाशे तदुपलक्षणाभावेन न सद्वितीयत्वादिप्रसङ्गावकाश इति चेत्– तदप्यतिमन्दम्; उपलक्षणस्वरूपस्यैव निष्कर्षवशान्निवृत्तिरूपत्वप्रसङ्गेनाध्यास-

---

ब्रह्मण: कादाचित्कत्वप्रसङ्गाभावात् इति शङ्का। समाधत्ते-**संसारदशायामिति**। अस्माकं मते संसारदशायाम् अनाविर्भूता ये अपहतपाप्मत्वादयोऽनेके स्वाभाविका आकारा: तेषां मुक्तौ आविर्भाव: धर्मभूतज्ञानविकासविशेष:। स च पूर्वं कर्मणा प्रतिबद्ध: पश्चात् कर्मनिवृत्तौ स्वाभाविकत्वात् हेतो: अनिवर्तनीयतया तिष्ठतीत्यङ्गीक्रियते। स्वेन रूपेणेति श्रुतेरपि स्वरूपाविर्भावस्य कर्मनिबन्धनत्वाभावे अनिवर्तनीयत्वे च तात्पर्यम्। भवन्मते तु ब्रह्म निराकारं नित्याविर्भूतज्ञानमात्रस्वरूपं तस्य नापूर्व: कश्चिदाविर्भाव इति वैलक्षण्यम्। अत: पूर्वोक्तदोषो दुर्वार इति भाव:।

पुन: शङ्कते - **ननु ब्रह्माकारेति**। तत्त्वमस्यादिवाक्यजन्या या ब्रह्माकारेण परिणममानस्यान्त:करणस्य वृत्ति: अथवा या ब्रह्माकारपरिणामरूपा अन्त:करणवृत्ति: तदुपलक्षितेनापूर्वेण स्वरूपेण ब्रह्म अज्ञाननिवृत्तिरूपं भवति। कारणभूताविद्याविनाशे च तन्मूलाया: उपलक्षणभूताया: अन्त:करणवृत्ते: नाशे सति ब्रह्मस्वरूपमात्रमवतिष्ठत इति न सद्वितीयत्वादिप्रसङ्गावकाश इति शङ्का।

समाधत्ते-**तदपि मन्दमिति**। ब्रह्माकारान्त:करणवृत्त्युपलक्षितं ब्रह्मस्वरूपमविद्यानिवृत्ति: इत्युक्तावपि स्वरूपस्य पूर्वमपि सत्त्वात् प्राप्ताप्राप्तविवेकेन उपलक्षणभूता अन्त:करणवृत्तिरेव अविद्यानिवृत्ति: इति पर्यवसानात् तस्याश्चाध्यासरूपत्वात् (मिथ्यात्वात्)

रूपत्व(वि)कल्पानुप्रवेशात्; तस्य च दूषितत्वात्। उक्तानां च विकल्पोत्त (ल्पान्त) राणां तथाविधान्तःकरणवृत्ति(वि)नाशे तन्मूलो(तन्निमित्तो) पलक्षणनाशे च तुल्यप्रसरत्वात् (इति) । बहिर्भावे तु सद्वितीयत्वापत्तेः । समुच्चये विरोधात् । आकारभेदकल्पनेऽनवस्थानात् । आकारैक्ये भेदाभेदयोरैक्यप्रसङ्गात् । किंच

वादारम्भे अध्यासरूपा न वेति विकल्पे प्रथमकल्पान्तर्भावात् तत्रोक्तदूषणान्यप्यत्रानुसन्धेयानीत्याह-**उपलक्षणस्वरूपस्यैवेति** । **निष्कर्षवशादिति** । प्राप्ताप्राप्तविवेकवंशादित्यर्थ ।‘‘**तदुपलक्षणाभावेनेति** । उपलक्षककाकाधीनोत्क्रमणत्ववत् अत्राप्युपलक्षकवृत्त्यधीनः कश्चित् धर्मविशेषः उपलक्षणशब्देन विवक्षितः । अत एवाह-‘**तन्मूलोपलक्षणविनाशे चेति ।**’ इति चण्डमारुते । **विकल्पोत्तराणाम्**=अध्यास-कल्पदूषणानाम् ।

एतावता अनध्यासरूपायाः अविद्यानिवृत्तेः ब्रह्मस्वरूपान्तर्भावपक्षे दूषणान्युक्तानि। अथ तस्याः ब्रह्मस्वरूपबहिर्भावपक्षे दूषणमाह- **बहिर्भावे तु इति** । अध्यासरूपा न वेत्यत्र द्वितीयपक्षान्तर्भावे इत्यर्थः । अविद्यानिवृत्तेः अनध्यासरूपत्वे सत्यतया ब्रह्मणः सत्यभूतद्वितीयवस्तुमत्त्वं स्यादिति भावः । ननु भावभूतं वस्तु एकम् इति भावाद्वैताङ्गीकारात् अविद्यानिवृत्तिरूपेण अभावेन सद्वितीयत्वं न दोषायेति चेत् - न । अद्वितीयश्रुतेः द्वितीयसामान्यशून्यत्वप्रतिपादिकायाः भावद्वितीयराहित्यपरतया संकोच-प्रसङ्गात् । ननु अविद्यानिवृत्तेः ब्रह्मस्वरूपान्तर्भावात् न बहिर्भावप्रयुक्तो दोषः । तस्या ब्रह्मस्वरूपबहिर्भावात् नान्तर्भावप्रयुक्तो दोष; । तथा चाविद्यानिवृत्ते; ब्रह्मस्वरूपान्तर्भावबहिर्भावसमुच्चयं ब्रूम इति शङ्कामनूद्य परिहरति - **समुश्चये विरोधादिति** । अन्तर्भावबहिर्भावयोः विरोधात् एकत्र वृत्तिरूपः समुच्चयो न संभवतीत्यर्थः । इदमुपलक्षणम् - अन्तर्भावबहिर्भावयोः सत्त्वे उभयप्रयुक्तदोषः स्यात्, न तु अन्यतरेण इतरप्रयुक्तदोषनिरास इत्यपि द्रष्टव्यम् ।

ननु एकस्य स्वरूपेणैव अन्तर्भावबहिर्भावयोः कल्पने विरोधः, न तु किंचिदाकारविशिष्टरूपेण तयोः कल्पने इत्याशङ्क्य, किं केनचिदाकारेणान्तर्भावः आकारान्तरेण बहिर्भावः इति अन्तर्भावबहिर्भावप्रयोजकाकारभेद इष्यते, उत एक एवाकारः उभयप्रयोजकः इति विकल्पमभिप्रेत्य, आद्यं दूषयति-**आकारभेदेति** । तयोरप्याकारयो;

ब्रह्मस्वरूपबहिर्भावे(च) सा किमनादिः, उतादिमती ? पूर्वत्र नित्यमविद्यानिवृत्तिप्रसङ्गः। उत्तरत्र कारणाभावात् कार्याभावः। न हि मिथ्याभूतमविद्यादिकं सत्यभूतायास्तस्याः कारणं संभवति; असत्यात् सत्योत्पत्तेरन्यत्र (३०) दूषणात्। न च सत्यं ब्रह्मैव तत्कारणमस्त्विति वाच्यम्; तदनादित्वप्रसङ्गेन प्रागुक्तोपद्रवात्। न च (...) विगलितशबलभावं ब्रह्मैव तत्कारणम्; शबलभावविगलनस्यैव कारणान्वेषणेनाऽऽत्माश्रय(त्व)प्रसङ्गात्।

अन्तर्भावबहिर्भावान्यतराङ्गीकारे तत्तत्पक्षोक्तदोषप्रसङ्गेन अन्तर्भावबहिर्भावसमुच्चयस्यैवाङ्गीकर्तव्यत्वात् तत्र च विरोधपरिहाराय तत्राप्याकारभेदो वक्तव्यः, तत्रापि तथेत्यनवस्थेति भावः। द्वितीयं दूषयति - **आकारैक्य** इति। अन्तर्भावो हि अभेदः, बहिर्भावश्च भेदः। तयोः भेदाभेदयोः भिन्नत्वे विरुद्धयोस्तयोः एकेनाकारेण एकाधिकरणवृत्तित्वोपपादनासंभवात् तयोरैक्यं स्यादिति भावः।

दूषणान्तरमाह - **किं चेति**। अविद्यानिवृत्तेः **ब्रह्मस्वरूपबहिर्भावे**=ब्रह्मस्वरूपान्यत्वे सा अविद्यानिवृत्तिः किमनादिः, उत आदिमती। आद्ये नित्यमविद्यानिवृत्तिप्रसङ्गः। तथा च कदाप्यविद्यातत्कार्यप्रपञ्चयोरुपलम्भो न स्यात्। तदाह - **पूर्वत्र नित्यमविद्यानिवृत्तिप्रसङ्ग** इति। कि च ब्रह्मव्यतिरिक्तायाः पारमार्थिक्याः अजन्यायाः अविद्यानिवृत्तेरभ्युपगमेऽपि तद्भिन्नसत्ताकायाः अविद्यायाः तया सह विरोधाभावात् निवृत्त्युत्पत्तावपि अविद्या तिष्ठत्येवेति अनिर्मोक्षप्रसङ्गः। **उत्तरत्रेति**। ब्रह्मभिन्नायाः अविद्यानिवृत्तेः आदिमत्त्वे तस्याः उत्पत्तिकारणं किमिति वक्तव्यम्। न चाविद्यैव कारणमिति वाच्यम्। मिथ्याभूतायाः अविद्यायाः सत्यभूतामविद्यानिवृत्तिं प्रति कारणत्वासंभवात्। असत्यात् सत्योत्पत्तेः वादान्तरे दूषितत्वात् इति भाव;। **कारणाभावात् कार्याभाव** इति। अविद्यानिवृत्तेः कारणं नास्तीति कार्यभूतायाः तस्या अभाव इत्यर्थः। तत्र किमविद्या कारणम् उत ब्रह्मेति विकल्प्य आद्यं दूषयति - **न हि मिथ्याभूतमिति**। द्वितीयं दूषयति - **न च सत्यमिति**। कारणस्य ब्रह्मणोऽनादित्वेन तत्कार्यभूतायाः

नन्वविद्यानिवृत्तिर्न सती, ब्रह्मव्यतिरिक्तत्वात् । नापि सदसदात्मिका; व्याघतादिदोषशतोन्मेषात् । न च सदसद्विलक्षणा; सदसद्विलक्षणनिवृत्त्यात्मकत्वव्याघातात् । अतः परिशेषादसती वा, तामपि कोटिं परित्यज्य पञ्चमप्रकारो(रा)

अविद्यानिवृत्तेरपि अनादित्वापत्त्या अविद्यातत्कार्योपलम्भाभावप्रसङ्गादिदोषप्रसङ्ग इति भावः। किं च किम् अविद्याशबलं ब्रह्म अविद्यानिवृत्तेः कारणम्, उत अविद्याशबलत्वरहितं ब्रह्म कारणम् । नाद्यः, शबलस्य मिथ्यात्वेन सत्यभूतामविद्यानिवृत्तिं प्रति कारणत्वासंभवादिति मनसिकृत्य द्वितीयं दूषयति - न हीति । अविद्याशबलत्वराहित्ये किं कारणमित्येवेदानीं विचार्यमाणतया स्वस्यैव स्वकारणत्वाङ्गीकारे आत्माश्रयात् इति भावः । एतदुक्तं भवति - विगलितशबलभावमित्यस्य अविद्यानिवृत्त्युपलक्षितमित्यर्थः । तत्र प्राप्ताप्राप्तविवेकेन अविद्यानिवृत्तेरेव अविद्यानिवृत्तिकारणत्वं पर्यवस्यतीति आत्माश्रय इति ।

पुनः प्रकारान्तरेण शङ्कते - **नन्वबिद्यानिवृत्तिरि**त्यादिना । अविद्यानिवृत्तिर्न सती, ब्रह्मव्यतिरिक्तत्वात् । ब्रह्मव्यतिरिक्तस्य सत्यत्वाभावात् । नापि सदसदात्मिका । परस्परविरुद्धयोः सत्त्वासत्त्वयोरेकत्र असंभवात् । अद्वैतश्रुतिविरोधाच्च । नापि सदसद्विलक्षणा । मोक्षदशायां सकलप्रपञ्चनिवृत्तेर्वक्तव्यतया सदसद्विलक्षणायाः अविद्यानिवृत्तेरपि सदसद्विलक्षणप्रपञ्चरूपतया अविद्यानिवृत्तेरपि निवृत्तेर्वक्तव्यतया व्याघातात् । अविद्यानिवृत्तितन्निवृत्त्योः एकदा स्थित्यसंभवात् । अतः परिशेषात् अविद्यानिवृत्तिः असती वा स्यात् तामपि कोटिं परित्यज्य पञ्चमकोटिर्वा स्यात् । अनयोः चतुर्थपञ्चमकोट्योः न काप्यनुपपत्तिः । (पञ्चमप्रकारो नाम न सत्; नासत्, न सदसत्, न सदसद्विलक्षणं अपि तु एतेभ्यश्चतुर्भ्यो विलक्षणम् इति । कुतो नानुपपत्तिरिति चेत् - श्रूयताम् । सतो घटादेः निवृत्तिः सद्रूपा मिथ्यारूपा च । असतः = निरुपाख्यस्य निवृत्तिः असद्रूपा=निरुपाख्या । अज्ञानं तु सदसद्विलक्षणम्, तन्निवृत्तिश्च प्रमाणसिद्धेति सदसद्विलक्षणाज्ञानानुसारेण तन्निवृत्तिरपि सदसदादिसर्वप्रकारविलक्षणा कल्प्यते, यक्षानुरूपो बलिरिति न्यायादिति ।

वा। भावाभावयोरेव हि सदसदादिप्रकारा निवृत्तयः। सदसद्विलक्षणश्चा(त्व)ज्ञानम्; तन्निवृत्तिश्च प्रमाणसिद्धेति सदसदनिर्वचनीयाज्ञानानुसारेण यक्षानुरूपो बलिरिति न्यायात् सदसदादिसर्वप्रकारविलक्षणा तन्निवृत्तिः कल्प्यत इति किं नोपपन्नमिति चेत्(चेन्न)–

अहो परापादनीयमात्मनः परिवादमात्मनैवाऽऽविष्कृत्य वैदग्ध्यमभिनयसि। तथा हि– कोटित्रयस्य भवतैव दूषितत्वात् अल्पशेषं कृतं शत्रुकार्यम्। यत्तु-असती वेत्युक्तम्, तत्र भावान्तराभावनयेन भावान्तरविवक्षायां सद्वितीयत्वप्रसङ्गः।

ननु सत्त्वमसत्त्वं मिथ्यात्वमिति प्रकारत्रयं स्यात्। कथं पञ्चमप्रकारत्वमित्यत्राह - **भावाभावयोरिति**। सदसतोरित्यर्थः। सदसदादीति आदिशब्देन मिथ्यात्वं विवक्षितम्। ननु कथमज्ञाने सदसद्विलक्षणत्वम्, सद्विलक्षणत्वासद्विलक्षणत्वयोः व्याघातात् इति चेन्न। मिथ्याभूतस्य सदसद्विलक्षणत्वस्य संभवात्। ननु दृष्टान्तानु सारेण सत्त्वमनिर्वचनीयत्वं वा स्यात्। यदि च तथा नेष्यते तर्हि निवृत्तिरसत्यैव स्यादित्यत्राह - **तन्निवृत्तिरिति**। सदादिरूपत्वस्य उक्तरीत्या असंभवात् ख्यातिबाधाभ्यां प्रामाणिकार्थविलक्षणानिर्वचनीयवत् सदसदनिर्वचनीयविलक्षणाया; अज्ञाननिवृत्तेः अङ्गीकारो युक्त इति भावः। उक्तशङ्कां परिहरति - **अहो** इत्यादिना। अहो इत्याश्चर्ये खेदे वा। परैः आपादनीयं स्वस्य परिवादं स्वयमेव आविष्कृत्य वैदग्ध्यं परिवादविरहमभिनयसीत्याश्चर्यमेतत् अथवा शोचनीयमिति भावः। परिवादमेव प्रकटयति **तथा हीत्यादिना**। अविद्यानिवृत्तिः सती सदसदात्मिका सदसद्विलक्षणेति कोटित्रयस्य भवतैव दूषितत्वात् अल्पशेषयुक्तमस्मत्कर्तृकदूषणरूपकार्यं भवता कृतम्। यत्तु असती वा पञ्चमप्रकारो वेत्युक्तम्, तत्र किम् असतीत्यनेन भावरूपत्वं विवक्षितम्, त निरुपाख्यत्वमिति विकल्पमभिप्रेय आद्यं दूषयति **तत्रेत्यादिना अभावप्रतियोगित्वात्** इत्यन्तेन। भावान्तरमभाव इति न्यायेन असती इत्यनेन सद्भिन्नस्य भावान्तरस्य विवक्षायां ब्रह्मणः सद्वितीयत्वप्रसङ्गः। भावान्तरमिथ्यात्वस्य पूर्वोक्तन्यायेनासंभवात्। अतिरिक्ताभावविवक्षायां च तेनैवाभावेन

अतिरिक्ताभावविवक्षायां च सद्वितीयत्वं तेनैवाभावेन तत्प्रतियोगिना च सत्येन(सत्यत्वेन) दुस्त्यजम्; अभाववादिनां सत्यस्यैवाभावप्रतियोगित्वात् । निरुपाख्यत्वविवक्षायां च तस्याः शशभृङ्गादिवत् अकादाचित्कत्वप्रसङ्गः । ततश्च पूर्ववत् सर्वदैवाविद्यानिवृत्तिरनिवार्येत्यसंसारः । तस्याः संसारस्य चाविरोधे अनिर्मोक्षः ॥ परमार्थतः सर्वदा संसाराभावात्(वः?) तत एव परमार्थमोक्षाभावश्चेति नानिष्टप्रसङ्गाविमाविति चेन्न; व्यावहारिकबन्धमोक्षव्यवस्थाभङ्गस्यैव प्रसज्यमानत्वात् । तामपि व्यवस्थां परित्यजतः लौकिकवैदिकसर्वव्यवहारविलोपप्रसङ्गः ।

तत्प्रतियोगिना च ब्रह्मणः सद्वितीयत्वं दुस्त्यजम् । उभयोः सत्यत्वात् । अतिरिक्ताभाववादिमते सत्यस्यैवाभावप्रतियोगित्वात् इति भावः । **तेनैवेति** । मिथ्यात्वस्य पूर्वोक्तन्यायेनासंभवादित्यर्थः । पूर्जोक्तन्यायश्च अविद्यानिवृत्तेर्मिथ्यात्वे तन्मूलभूताविद्यास्थितेरावश्यकतया अनिर्मोक्षप्रसङ्गरूपः । असतीत्यनेन निरूपाख्यत्वं विवक्षितमिति द्वितीयकल्पं दूषयति-**निरुपाख्यत्वेति** । अविद्यानिवृत्तेः निरुपाख्यत्वे शशशृङ्गादेरिव अकादाचित्कत्वप्रसङ्ग इत्यर्थः । तस्या; अकादाचित्कत्वमिष्टमेवेत्यत्राह-**ततश्चेति** । अविद्यानिवृत्तेः अकादाचित्कत्वे सर्वदैव विद्यमानतया संसार एव न स्यात् । अविद्यानिवृत्तेः संसारस्य च विरोधाभावे अविद्यानिवृत्तिदशायामपि संसारस्य विद्यमानतया मोक्ष एव न स्यादिति भावः ।

शङ्कते - **परमार्थत** इति । अस्मन्मते संसारो वा मोक्षो वा परमार्थतो नास्तीति संसाराभावः मोक्षाभावश्च इष्ट एवेति तदुभयप्रसञ्जनं नानिष्टप्रसञ्जनमिति शङ्का । भवद्भिः व्यावहारिकः बन्धः व्यावहारिको मोक्ष इति व्यावहारिकबन्धमोक्षव्यवस्थायाः स्वीकारात् तादृशव्यवस्थाभङ्गप्रसङ्ग इति समाधानम् । तादृशव्यवस्थाभङ्गस्य भवदनिष्टत्वात् प्रसङ्ग अनिष्टप्रसङ्गरूप इति समाधानम् । यदि व्यावहारिकी बन्धमोक्षव्यवस्थापि नाङ्गीक्रियते, तदा तादृशव्यवस्थाश्रितस्य सर्वस्यापि लौकिकस्य वैदिकस्य च व्यवहारस्य भङ्गप्रसङ्ग

किंच अविद्यानिवृत्तेरसत्त्वे नित्यमविद्यासद्भावप्रसङ्गः । ननु घटप्रध्वंसस्यासद्रूपत्वेऽपि घटादेः कादाचित्कत्ववत् अविद्याप्रध्वंसस्यासद्रूपत्वेऽप्यविद्यायाः कादाचित्कत्वमुपपद्यत इति चेन्न; घटप्रध्वंसस्य असद्रूपत्वाभावात् । स ह्यभावात्मकोऽपि तत्कालीनतया प्रमाणतस्सिद्धः । अन्यथा घटनित्यत्वस्यापि दुर्निवारत्वात् ॥ असद्रूपमेव घटप्रध्वंसमभ्युपेत्य दूषणं ब्रूया इति चेन्न–शमलं भक्षय, शापितोऽसि गुरुणेत्यादिवदशक्यत्वात् । शक्यत्वाभ्युपगमे वा त्वयैव दूषणमनुमतमिति किमस्माकं तत्समर्थनेन ?

पञ्चमीं कोटिमाटीकमानस्यापि ते न काचित् गतिः । सा हि माध्यमिकगोष्ठीमध्ये भवन्तमध्यारोप्य अनिर्वचनीयाग्रहाविशिष्टं च सदद्वितीयं ब्रह्म

इत्याह-**तामपीति** । असत्त्वपक्षे दोषान्तरमाह-**किं चेति** । **ननु** इत्यादि । घटध्वंसस्य असद्रूपत्वेऽपि घटादेः कादाचित्कत्ववत् अविद्याध्वंसस्यासद्रूपत्वेऽपि अविद्यायाः कादाचित्कत्वमुपपद्यत इति शङ्का न युक्ता । घटध्वंसस्यासद्रूपत्वाभावात् । कुत इत्यत्राह **स हीति** । अभावात्मकोऽपि घटध्वंसः तत्कालवृत्तित्वेन प्रमाणसिद्धत्वात् नासद्रूपः । अन्यथा घटध्वंसस्य असद्रूपत्वे घटनाशो नास्तीत्यायातम् । तथा च घटस्य नित्यत्वं स्यादिति भावः । ननु असद्रूपमेव घटध्वंसमुपगम्य तदुपरि दूषणं वद । तावता नित्यत्वं न प्रसजतीत्याशङ्क्य तथा अभ्युपगमः अशक्य इत्याह - असद्रूपमेवेति ।

न्यायभाव्येऽपि असत्पदेन भावातिरिक्तत्वमेवाभिमतं, न तुच्छत्वमित्यर्थः "शमलं भक्षय शापितोऽपि गुरुणा" इत्यस्य आकरमन्विष्य प्रकृते योजनीयम् । शमलं-नरमृगमलादि । **दूषणमनुमतमिति** । अभ्युपगममापादयता त्वया तथा स्वरूपानङ्गीकारात् दूषणमनुमतमेवेत्यर्थः । यद्वा निवृत्तेः ब्रह्मस्वरूपत्वतदतिरिक्तत्वपारमार्थिकत्वान्यतमपक्षमेव समर्थयता त्वया अविद्यानिवृत्तेः असत्त्वे दूषणमनुमतमेवेत्यर्थः । **पञ्चमीमिति** । पञ्चमप्रकारायाः अविद्यानिवृत्तेः स्वीकारे भवतः तत्स्वीकर्तृमाध्यमिकमतप्रवेशापत्त्या सतोऽद्वितीयस्य ब्रह्मणोऽपि विलोपापत्त्या सा भवन्तं माध्यमिकगोष्ठीमध्ये अध्यारोप्य

विलुम्पन्ती त्वय्यन्तवादवारवाणमवधूय अन्तर्गतं प्रकाशयेत्। ते ह्येवमाहुः, 'न सन्नासन्न सदसन्न चाप्यनुभयात्मकम्। चतुष्कोटिविनिर्मुक्तं तत्त्वं माध्यमिका विदुः ॥' इति। न चैकदेशवैषम्याद्विशेषः, पञ्चमकोटिपरिग्रहस्य भिक्षुपादप्रसरणन्यायेन समस्तभवत्सिद्धान्तावस्कन्दात् (न्दकत्वात्?) व्यवस्थाहेतूनामपि व्यावहारिकत्वेनाव्यवस्थिततत्वस्यैव व्यवस्थिततत्वात्। न च यक्षानुरूपो बलिरिति न्यायस्यात्रावकाशः; आनुरूप्यस्याविरोधित्वरूपत्वे सदसदनिर्वचनीयाज्ञाननिवृत्तेरप्यनिर्वचनीय(रूप)त्वप्रसङ्गात्। विरोधिरूपत्वे त्वनिर्वचनीयप्रत्यनीकत्वस्य

ब्रह्मातिरिक्तं सर्वमनिर्वचनीयमिति यस्ते आग्रहः तमपि लोपयति। तदविशेषेण अद्वितीयं ब्रह्मेत्येतदपि लोपयति इति भावः। अविशिष्टमिति क्रियाविशेषणम्, अविशेषेणेत्यर्थः। **अन्तर्गतमिति** त्वन्मनसि विद्यमानं त्वद्गुरुमाध्यमिकपक्षपक्षपातमेव प्रकाशयेत् इत्यर्थः। यद्वा कञ्चुकपिहितं बौद्धत्वमित्यर्थः। वारवाणं = कवचम्।

ननु सर्वशून्यवादिबौद्धानङ्गीकृतं ब्रह्मास्माभिरङ्गीकृतमिति वैषम्यमस्मन्मते तन्मतापेक्षया वर्तत इत्याशङ्क्य तत् अकिंचित्करमित्याह - **न चेति**। तन्मतस्वीकृतस्य पञ्चमप्रकारस्य भवताङ्गीकारे भिक्षुपादप्रसरणन्यायेन ब्रह्मशून्यत्वमप्यापतेदिति क्रमशो भवत्सिद्धान्तविलोपः स्यादित्यर्थ;। **व्यवस्थाहेतूनामिति**। प्रातिभासिकव्यावृत्तव्यावहारिकव्यवस्थायाः सिद्ध्ये हि व्यावहारिकसत्यत्वमिष्यते। तदङ्गीकारेऽपि व्यवस्थाया असिद्धेः न प्रपञ्चस्यापि व्यावहारिकत्वमेष्टव्यम्। अविद्यानिवृत्तेरिव प्रपञ्चस्यापि पञ्चमप्रकारत्वसंभवादिति भावः। यदुक्तं यक्षानुरूपो बलिरिति न्यायेन पञ्चमप्रकारा निवृत्तिः कल्प्यत इति तत्र समाधानमाह - **न चेति**। सदसदनिर्वचनीयाज्ञानानुरूप्यं पञ्चमप्रकारायाः

निर्वचनीयत्वेन सदसत्त्व(तत) समुच्चयकोटिबहिर्भावायोगात्। तस्याश्च दूषितत्वात्। यदा च भवदभिमता सदसद्विलक्षणकोटिरपि निशिततर्कशूलकोटिमारोपिता, तदा कैव कथा निर्विशेषपरब्रह्माधिष्ठानानिर्वचनीयभावरूपाज्ञानविक्षेपात्मकात्मव्यतिरिक्तजडरूपाहमर्थाहङ्कारवृत्तिविशेषरूपमिथ्यास्वरूपतत्त्वमस्यादिवाक्यलक्षणाप्रभवब्रह्मात्मैक्यविज्ञानकृत(जन्य) सदसदनिर्वचनीयविश्वनिवृत्तिरूपाया गन्धर्वनगरगोपुराधिरूढगगनारविन्दमकरन्दपानमदभरमन्थरवन्ध्यासुतशुभकरतलकलितखरविषाणकोदण्डकोटिघटितकमठरोमशिञ्जनीनिर्यन्त्रनिर्यदैन्द्रजालिकशरशलाकाकृतभविष्यद्देवदत्तपुत्रशिरश्छेदसोदरायाः दुरभिलपकारकज्ञापकायाः पञ्चम्याः कोटेरित्यलमपरिणतभणितिपरिहसनेनेति ॥

॥ इति शतदूषण्यां निवृत्त्यनुपपत्तिवादः चतुश्चत्वारिंशः ॥ ४४ ॥

अविद्यानिवृत्तेर्यदि स्यात् तदैव तस्य न्यायस्यात्र प्रसक्तिः। तत्र आनुरूप्यं किंरूपमिति विवेचनीयम् यदि सजातीयत्वरूपमविरोधित्वम्, तदा अज्ञाननिवृत्तेरपि अज्ञानवत् सदसदनिर्वचनीयत्वमेव स्यात् न पञ्चमप्रकारत्वम्। यदि विजातीयत्वरूपं विरोधित्वम्, तदा अनिर्वचनीयत्वविजातीयत्वस्य निवर्चनीयत्वस्यैव सिद्ध्या सदसत्त्वसमुच्चयकोटिबहिर्भावासिद्ध्या पञ्चमप्रकारत्वं न स्यादिति भावः। **निर्वचनीयत्वेन** = निर्वचनीयत्वरूपत्वेन। **तस्याश्चेति**। सदसत्त्वसमुच्चयरूपकोटेरित्यर्थः। **दूषितत्वादिति**। "नापि सदसदात्मिका, व्याघातादिदोषशतोन्मेषात्" इति ग्रन्थेनेति शेषः। पञ्चमीं कोटिं सपरिहासं दूषयति - यदा **चेत्यादिना**। विक्षेपात्मकात्मव्यतिरिक्तेति पाठः साधुः। पञ्चम्याः कोटेः इत्यस्य कैव कथेति पूर्वतनेनान्वयः।

इति श्रीशतदूषणीव्याख्यायां तात्पर्यप्रकाशिकायां
निवृत्त्यनुपपत्तिवादः चतुश्चत्वारिंशः ॥

***

।। अथ शब्दावेद्यत्वनिरासवादः पञ्चचत्वारिंशः ।। ४५ ।।

यन्नामानि परोरजांसि गृणतां यादृच्छिकैर्हेतुभिः
दुर्लङ्घोऽप्युपयाति गोष्पदतुलां संसारवारांनिधिः ।
दूरे नित्यमसीमभूमकतया वाचां यदाचक्षते
तत् वन्देमहि सर्वशब्दविषयं त्रय्यन्तवेद्यं महः ।।

यदूचिरे–निर्धूतनिखिलकल्पनाजाले स्वप्रकाशचिन्मात्रे ब्रह्मणि न

अथ पञ्चचत्वारिंशः शब्दावेद्यत्वभङ्गवादः ।।

यन्नामानि परोरजांसि गृणतां यादृच्छिकैर्हेतुभिः
दुर्लङ्घोऽप्युपयाति गोष्पदतुलां संसारवारांनिधिः ।
दूरे नित्यमसीमभूमकतया वाचां यदाचक्षते
तद्वन्देमहि सर्वशब्दविषयं त्रय्यन्तवेद्यं महः ।।

परोरजांसि रजसो दूरे वर्तमानानि यस्य महसो नामानि पुत्राह्वानादियादृच्छिकहेतुभिः गृणतामुच्चारयतां जनानां दुःखेन लङ्घयितुमशक्योऽपि संसारजलधिः गोष्पदतुल्यतां गोष्पदवत् सुलङ्घतामुपयाति यत् महः निरवधिकमहिमकतया वाचामगोचरमिति श्रुतयः स्मृतयश्च आचक्षते तत् सर्वशब्दवाच्यं वेदान्तवेद्यं महः वन्देमहीत्यन्वयार्थः । नामानीत्यनेन स्वमात्रवाचकवाच्यत्वं सर्वशब्दविषयमित्यनेन वाच्यान्तरवाचकवाच्यत्वं चोक्तम् । तर्हि कथं वाचां दूरे इत्यत उक्तम्-**असीमभूमकतयेति** । अनेनास्य वादस्यार्थः संगृहीतः । ब्रह्माश्रयमज्ञानं निराकृतम् । इदानीं ब्रह्मणः अवाच्यत्वं निराक्रियते ।

पूर्वपक्षः

पूर्वपक्षमनुवदति यदूचिरे इत्यारभ्य अतो न ब्रह्म कस्यचिदपि शब्दस्य वाच्यमिति इत्यन्तेन । अत्र पूर्वपक्षे ब्रह्मणः सामान्येन वृत्तिविषयत्वं मुख्यवृत्तिविषयत्वं बोध्यसमानसत्ताकवृत्तिविषयत्वं च निराक्रियते। अद्वैतिभिः उपहिते ब्रह्मणि वृत्तिविषयत्वाङ्गीकारात् अनुपहितस्वरूपे वृत्तिविषयत्वनिषेधार्थ स्वरूपमनुवदति - **निर्धूतेति** ।

कस्यचिच्छब्दस्य वृत्तिः संभवति । न हि निमित्तमन्तरेण शब्दाः प्रवर्तेरन् । न चावेद्ये वेदकानामवकाशः । न च सर्वेषामात्मसाक्षिकं प्रकाशमाने प्रकाशकापेक्षा।

अत्र विशेषणत्रयं हेतुगर्भम् । अत्र निर्धूतनिखिलकल्पनाजाल इत्याद्यो हेतुः । वृत्तिनिषेधपक्षे शक्तिनिषेधपक्षे च निखिलकल्पनाशून्य इति तदर्थः । कल्पनापदं कल्पितपरम् । वृत्तिनिमित्तस्य उपहितगतत्वेन स्वरूपगतत्वाभावात् न स्वरूपे शब्दस्य वृत्तिः शक्तिर्वेति तात्पर्यम् । तथा च ब्रह्म शब्दवृत्तेः शब्दशक्तेश्चाविषयः कल्पितनिमित्तशून्यत्वादित्यनुमानमभिप्रेतम् । बोध्यसमानसत्ताकशक्तिविषयत्वनिषेधपक्षे च मिथ्याभूतकल्पनाजाले इत्यर्थः । अस्मिंश्च पक्षे स्वरूपे निमित्तमस्त्येव । तथापि तस्य बोध्यसमानसत्ताकत्वाभावात् न बोध्यसमानसत्ताकशक्तिरिति तात्पर्यम् । तथा च ब्रह्म स्वसमानसत्ताकशक्त्यविषयः मिथ्याभूतकल्पितधर्मवत्त्वात् इत्यनुमानं विवक्षितम् । स्वप्रकाश इति तृतीयो हेतुः स्वप्रकाशपदेन सजातीयानपेक्षप्रकाशत्वं गृह्यते । मात्रचा सजातीयापेक्षप्रकाशत्वाभावरूपं हेत्वन्तरं गृह्यते । तथा च ब्रह्म लक्षणायाः शक्तेश्चाविषयः स्वप्रकाशत्वात् इति अनुमानम् ।

तत्र आद्यहेतुमुपपादयति - **न हीति** । शक्यतावच्छेदकलक्ष्यतावच्छेदकसादृश्यानि निमितानि विना शब्दस्य वृत्तिरेव न संभवति । यथा गोत्वरूपशक्यतावच्छेदकसद्भावात् गवि गोशब्दस्य शक्तिः, लक्ष्यतावच्छेदकस्य तीरत्वस्य सत्त्वात् तीरे गङ्गाशब्दस्य लक्षणा, अग्निसादृश्यस्य माणवके सत्त्वात् अग्निशब्दस्य माणवके लक्षणा, तथा ब्रह्मणि उक्तानां त्रिविधानां निमित्तानाम् अभावात् तत्र शब्दस्य शक्तिः लक्षणा वा न संभवतीत्यर्थः । यद्वा प्रवृत्तिनिमित्ताभावात् शक्तिर्न संभवतीत्यर्थः । यद्वा बोध्यसमानसत्ताकनिमित्ताभावात् ब्रह्मणि बोध्यसमानसत्ताकशक्तिर्न संभवतीत्यर्थः । मात्रचा विवक्षितां युक्तिं बिवृणोति - **न चावेद्य इति** । यस्य वेद्यत्वमेव नास्ति तत्र कथं वेदकस्य शब्दादेरवकाश इति भावः । स्वप्रकाशपदोक्तं हेतुं बिवृणोति - **न च सर्वेषामिति** । स्वयमेव प्रकाशमाने वस्तुनि प्रकाशकशब्दाद्यपेक्षा नास्ति इत्यर्थः । ननु स्वयंप्रकाशस्य वस्तुनः प्रकाशकापेक्षा नास्ति

न चैवमुपदेशनैरर्थक्यम्; स्वत एव प्रकाशमानेऽपि स्वरूपे कल्पितोपप्लवप्रशमनमात्रार्थतया प्रतिपन्नार्थप्रतिष्ठापनार्थप्रत्यभिज्ञापकतया वोपदेशसाफल्यात्।

चेत् उपदेशवैयर्थ्यम्। उपदेशस्य शब्दरूपस्य प्रकाशार्थमनपेक्षितत्वात् इत्याशङ्क्य स्वयमेव प्रकाशमाने वस्तुनि कल्पितोपप्लवबाधार्थतया उपदेशसार्थक्यमिति समाधत्ते - **स्वत एवेति।** उपदेशेन कल्पितस्य प्रपञ्चस्य मिथ्यात्वमेव बोध्यते न तु ब्रह्मेति भावः। उपदेशस्य प्रयोजनान्तरमाह - **प्रतिपन्नार्थेति।** स्वयं ज्ञातस्यैवार्थस्य निर्णयफलिका या तदेवेदं इति प्रत्यभिज्ञा तद्धेतुतया उपदेशसाफल्यमित्यर्थः। स्वतः प्रकाशमानस्य पुनर्बोधनात् स्वरूपात्मकाभेद- विषयकत्वाच्च प्रत्यभिज्ञात्वोक्तिः। प्रत्यभिज्ञां विना स्वरूपप्रकाशमात्रात् नाविद्यानिवृत्तिरिति भावः। **अत एवेति।** प्रतिपन्नार्थप्रतिष्ठापनार्थप्रत्यभिज्ञाजनकतयेत्यर्थः। **यद्यपीति।** अविद्याकल्पितदोषादिनिषेधपरेषु ''नेह नानास्ति किं चन'' ''अस्थूलमनण्वह्रस्वम्'' ''सदेव सोम्येदम्'' इत्यादिवेदान्तवाक्येषु सद्ब्रह्मादिशब्दैः ब्रह्म निर्दिश्यते, धर्मिनिर्देशाभावे निषेधासंभवात्। तथा च सद्ब्रह्मादि शब्दवाच्यत्वं ब्रह्मणः दुस्त्यजमिति शङ्का भवति, तथापि, यथा शाखा संयोगं विनैव केनचित् संबन्धविशेषेण चन्द्रं ज्ञापयति तथा शब्दोऽपि वृत्तिं विनैव ब्रह्म अन्येन केनचित् संबन्धेन ज्ञापयतीति न शब्दवृत्तिविषयत्वं ब्रह्मण इति भावः। **संस्पर्शः**=शब्दशक्तिविषयत्वम्। व्यावहारिकं शक्यत्वमङ्गीकृत्य पारमार्थिकशक्यत्वनिषेधपक्षे ब्रह्मणः शक्त्या बोधनमस्त्येव। तथाप्यन्येषामिव बोध्यसमानसत्ताकशाक्तिमच्छब्देन निर्देशः वक्तव्य इति आशङ्कितुर्भावः। शक्त्या विनापि बोधदर्शनेन बोधमात्रे शक्तेरप्रयोजकत्वे बोध्यसमानसत्ताकत्वविशिष्टायाः शक्तेः सुतरामप्रयोजकत्वमिति परिहर्तुरभिप्रायः। उपलक्षणशब्दः बोध्यसमानसत्ताकशक्त्यभावपरः। संस्पर्शशब्दः बोध्यसमानसत्ताकशक्तिपरः। यद्यपि ब्रह्मादिशब्दैः स्वरूपं शक्त्या निर्दिश्यते, तथापि न पारमार्थिकशक्त्या निर्देशः कार्यः। अन्यथापि प्रतीतिसंभवादिति भावः।

ननु त्वया ब्रह्मशब्देन ब्रह्म निर्दिश्य तत् अवाच्यमिति प्रतिज्ञातव्यम् ततश्च त्वयैव

अत एव वेदान्तानां ब्रह्मणि प्रवृत्तिरपि व्याख्याता । यद्यप्यविद्योपाधिकोपरागप्रशमनपरेषु वाक्येषु सद्ब्रह्मात्मज्ञानादिशब्दैर्ब्रह्म निर्दिश्यते, तथाऽप्युपलक्षणभूतैस्तैश्चन्द्रमस इव शाखया न ब्रह्मणस्संस्पर्शः । अत एव न ब्रह्मादिशब्दनिर्देशेन स्ववचनविरोधः । न च नामकीर्तनविधीनां विरोधः, सगुणब्रह्मविषयत्वात् तेषाम् । अत एव हि परस्मिन् ब्रह्मणि, मौनं मन्त्रजपः' इत्याचार्याः । अन्यथा कथमसंप्रज्ञातोऽपि समाधिस्स्यात् । न च विचित्रनामरूपभाक्त्व- श्रुतिविरोधः; तस्यास्तत्कार्योपहितविषयत्वस्य युष्माभिरप्यङ्गीकारात् । न च शब्दतत्त्वमेव ब्रह्मेति

शब्देन ब्रह्मणो बोधनात् स्ववचनविरोध इति शङ्कापि उक्तयुक्त्यैव निरस्तेत्याह - **अत एवेति** । ननु वृत्त्यभावे वा शक्त्यभावे वा बोध्यसमानसत्ताकशक्त्यभावे वा ''विश्वं विष्णुर्वषट्कार:''इत्यादीनां ब्रह्मनामत्वमनुपपन्नमिति नामसंकीर्तनविधीनां विरोध: इत्याशङ्क्य तेषां सगुणब्रह्मविषयत्वान्न विरोध इति परिहरति - **न च नामकीर्तनेति** । मौनं मन्त्रजप इति । वृत्तिनिषेधपक्षे स्पष्टोऽर्थ: । शक्तिनिषेधपक्षे सौदर्शनादिमन्त्रस्थपदानां सुदर्शनादाविव शक्त्या बोधनाभावात् तद्विषये मन्त्रजपो मौनप्राय इत्यर्थ: । यद्वा अन्यत्रैव मन्त्रस्थपदानां शक्तत्वात् ब्रह्मणि शक्त्यभावात् तद्विषये मौनमेव कर्तव्यं न मन्त्रजप इत्यर्थ: । बोध्यसमानसत्ताकशक्तिनिषेधपक्षे तादृशशक्त्यभावात् मन्त्रजपो मौनप्राय इति वा तत एव मौनमेव कार्यमिति वा अर्थ: सगुणविषये मन्त्रजपेन यत् साध्यं तत् निर्गुण विषये मौवसाध्यम्, तस्य वागगोचरत्वादिति भाव: । **अन्यथेति** । मन्त्रस्याप्युच्चारणाङ्गीकारे तस्यापि प्रतीत्याविकल्परूपतया निर्विकल्पकरूपासंप्रज्ञाताख्यसमाधित्वं भज्येतेति भाव: ।

ननु ''तद्धेदं तर्ह्यव्याकृतमासीत् तन्नामरूपाभ्यां व्याक्रियत'' इति ब्रह्मणो विचित्रनामरूपभाक्त्वं श्रूयते । तत् वृत्त्यभावे शक्त्यभावे बोध्यसमानसत्ताकशक्त्यभावे वा कथं घटतामित्याशङ्क्य तस्या: श्रुते: कार्योपहितब्रह्मविषयकत्वात् न स्वरूपविषयकत्वमिति परिहरति- **तस्या इति** । **युष्माभिरपीति** । अव्याकृतशरीरकब्रह्मण एव सिद्धान्तिभिस्तत्र विवक्षितत्वादिति भाव: । ननु शब्दस्य ब्रह्माभेद: त्वयाप्यङ्गीक्रियत एव । **ब्रह्मण:**

स्वप्रकाशत्वे स्ववाच्यतया शब्दवाच्यता; शब्दब्रह्मणोऽपि ब्रह्मविवर्तमात्रत्वात्। अत एव स्मरन्ति, 'शब्दब्रह्मणि निष्णातः परं ब्रह्माधिगच्छति' इति। आह च साम्बः, 'शब्दार्थत्वविवर्तमानपरमज्योतीरुचो गोपतेः' इति। न च ब्रह्म शब्दवाच्यं वस्तुत्वात् घटवदित्यनुमानोदयः, काल्पनिकवाच्यत्वेन सिद्धसाधनात्। तदति-

---

स्वप्रकाशतया तदभिन्नशब्दस्यापि स्वप्रकाशत्वं वक्तव्यम्। शब्दप्रकाश्यत्वमेव च शब्दवाच्यत्वमिति शब्दस्य शब्दवाच्यतया तदभिन्नब्रह्मणोऽपि शब्दवाच्यत्वमवर्जनीयमित्यत्राह - **न चेति**। यद्यपि शब्दशक्तिविषयत्वमेव शब्दवाच्यत्वं न तु प्रकाश्यत्वमात्रमिति शब्दाभेदेऽपि ब्रह्मण: शब्दवाच्यत्वसिद्धि:, तथापि शब्दाभेदे सत्येव हीयं चिन्ता। स एव नास्ति किं तु ब्रह्माधिष्ठानकतया ब्रह्मतादात्म्यं शब्दस्येत्याह - **शब्दब्रह्मणोऽपीति**। **अत एवेति**। यत: शब्दब्रह्मणो: भेद: अत एव शब्दब्रह्म परं ब्रह्मेति भेदेन स्मरन्तीत्यर्थ:। **आह चेति**।

"शब्दार्थत्वविवर्तमानपरमज्येतीरुचो गोपते:
उद्गीथोऽभ्युदित: पुरारुणतया यस्य त्रयीमण्डले।
भास्वद्वर्णपदक्रमेरिततनु: सप्तस्वराश्वैर्विय-
द्विद्यास्यन्दनमुन्नयन्निव नमस्तस्मै परब्रह्मणे॥"

इति साम्बकृतसूर्यस्तोत्रस्यायं प्रथम: श्लोक:। शब्दरूपेणार्थरूपेण च विवर्तमानं ब्रह्मेति तत्रोक्तम्। तेन शब्दस्य ब्रह्माधिष्ठानकाध्यासविषयत्वमेवोक्तमित्यर्थ:। अनुमानेन ब्रह्मण: शब्दवाच्यत्वं सिध्यतीति शङ्कते - **न चेति**। शब्दवाच्यत्वमित्येतत् शब्दवृत्तिविषयत्वस्य बोध्यसमानसत्ताकशक्तिविषयत्वस्य चोपलक्षणम्। काल्पनिकं वाच्यत्वं साध्यते वा पारमार्थिकं वाच्यत्वं साध्यते वा। आद्ये सिद्धसाधनम्। काल्पनिकस्य शब्दवाच्यत्वस्य ब्रह्मण्यस्माभि: स्वीकारात्। द्वितीये दृष्टान्ते साध्यवैकल्यम्। घटे पारमार्थिकस्य शब्दवाच्यत्वस्य अस्मन्मतेनाभावात् इति समाधत्ते- **काल्पनिकेत्यादिना**। **तदतिरिक्तस्येति**। काल्पनिकवाच्यत्वातिरिक्तस्य

रिक्तस्य तु दृष्टान्तेऽप्यस्मन्मतेनासिद्धेः। घटादिषु (च) वस्तुत्वानभ्युपगमेन साधनविकलत्वाच्च। न च प्रकाशमानत्वादिमात्रं वस्तुत्वमिति विवक्षितमिति वाच्यम्; तथाऽपि प्रकाशमानैः शुक्तिरजतादिभिः शशविषाणादिभिश्चानैकान्त्यात्। न हि तेषां पारमार्थिकं वाच्यत्वं वोऽपी(भी)ष्टम्; स्वयमसतः परमार्थधर्मानाधारत्वात्। किंच यदि वाच्यत्वं वाच्यम्, ततस्तस्यापि वाच्यत्वान्तरम्, एवं तस्यापीत्यनवस्था। यदि पुनरवाच्यम्, तेनैवानैकान्त्यं दुष्परिहरम्। ब्रह्म न शब्दवाच्यं निर्विशेषत्वादिति

पारमार्थिकवाच्यत्वस्य तु इत्यर्थ:। तस्मिन्ननुमाने दृष्टान्ते साधनविकलत्वरूपं दोषान्तरमाह- **घटादिषु चेति**। घटादिषु वस्तुत्वरूपहेत्वभावात् साधनवैकल्यमित्यर्थ:। ननु प्रकाशमानत्वमेव वस्तुत्वम्, तत् घटादिष्वस्त्येवेति न साधनवैकल्यमित्याशङ्क्य साधनवैकल्यपरिहारेऽपि शुक्तिरजत-शशविषाणादिषु प्रकाशमानत्वरूपहेतुसत्त्वात् साध्यस्य पारमार्थिकवाच्यत्वस्याभावाच्च व्यभिचार इत्याह - **न च प्रकाशमानत्वादिमात्रमिति**। आदिशब्देन सत्त्वसामान्यं विवक्षितम्। **तथापीति**। सत्त्वसामान्यस्यापि शुक्तिरजतादौ व्यभिचार इति भाव:। शुक्तिरजतादे: पारमार्थिकं वाच्यत्वं कुतो नास्तीत्यत्राह **न हीत्यादिना**। असत: शुक्तिरजतशशविषाणादे: परमार्थधर्मानाधारत्वात् परमार्थवाच्यत्वं नास्तीत्यर्थ:। (व्यावहारिकवाच्यत्वसाधनेऽपि सिद्धसाधनमेव।) **वोऽपीति**। सिद्धान्तिनां युष्माकमपीत्यर्थ:।

ब्रह्म शब्दवाच्यं वस्तुत्वात् घटवदित्यनुमाने पूर्वपक्षी दोषान्तरमाह-**किं चेत्यादिना**। वाच्यत्वं वाच्यं न वा। आद्ये वाच्यत्वस्य वाच्यत्वं वाच्यत्ववाच्यत्वस्यापि वाच्यत्वमिति उत्तरोत्तरवाच्यत्वकल्पनाया: विश्रान्त्यभावात् अनवस्था। द्वितीये वाच्यत्वरूप-साध्याभाववति वाच्यत्वे वस्तुत्वरूपहेतुसत्त्वात् व्यभिचार इति भाव:।

किं च ब्रह्म शब्दवाच्यमित्यनुमानस्य सत्प्रतिपक्षतामाह-**ब्रह्म न शब्दवाच्यमिति**। यद्यत् शब्दवाच्यं तत् सर्वं घटादिकं सविशेषं दृष्टम्। ब्रह्म तु निर्विशेषम्, अतो न शब्दवाच्यमिति केलवव्यतिरेक्यनुमानमेतत्। निर्विशेषत्वादितीत्यत्र इतिशब्द: प्रकारार्थ:।

प्रत्यनुमानं(मातव्यं) च। आगमे च परिपन्थिनि कथमनुमानगन्धः। तथा हि, 'यतो वाचो निवर्तन्ते, अप्राप्य मनसा सह', 'न शब्दगोचरो यस्य योगिध्येयं परं पदम्' इत्यादिश्रुतिस्मृतिशतैर्बाधः स्फुट एव। न च सामान्य(तासामन्य ?) परत्वम्; ब्रह्मस्वरूपोपदेशपरतयैव प्रवृत्तेः । न च कतिपयशब्दनिषेध (विवय) परतया सङ्कोचः; तथा सति सर्ववस्तुसाधारण्येनातिशयासिद्धेः । असङ्कोचे चास्मदुक्त-विषयव्यवस्थायाः सङ्ग्राह्यत्वात् । तदेतत् सर्वमभिप्रेत्याह भगवान् पराशरः,

---

एवंप्रकाराणि ब्रह्मण: शब्दावाच्यत्वसाधकानि स्वप्रकाशत्व -अवेद्यत्व-शक्यतावच्छेदक-धर्मशून्यत्वादीनि लिङ्गान्तराण्यपि विवक्षितानि।

किं च वाच्यत्वसाधकानुमानस्य आगमबाध इत्याह-**आगमे चेति**। **परिपन्थिनि**= शब्दवाच्यत्वबाधके जाग्रतीति शेष: । आगमशब्देन श्रुति: स्मृतिश्च विवक्षिता । ब्रह्मण: शब्दवाच्यत्वबाधकानि श्रुतिस्मृतिवचनान्युदाहरति - **यतो वाच** इत्यादिना। आगमादेरपि ब्रह्मणि वृत्तिनिषेध: शक्तिनिषेध: पारमार्थिकशाक्तिनिषेधश्च अर्थतया विवक्षित: । **यतो वाच** इति । यतो ब्रह्मण: सकाशात् वाच: मनश्च अप्राप्य संबन्धमलब्ध्वा निवर्तन्ते बोधनव्यापाररहिता भवन्ति तत् ब्रह्मेत्यन्वय: । अत्र अप्राप्येत्यनेन वृत्तिसामान्याभाव: शक्त्यभावश्च विवक्षित: । **न शब्देति**। यस्य परमात्मन: परं पदं स्वरूपं योगिभिर्ध्येयं न शब्दगोचर इत्यन्वयार्थ: । ननु उदाहृतश्रुतिस्मृतीनामर्थवादत्वान्न स्वार्थे तात्पर्यमित्याशङ्क्य विधिशेषत्वाभावान्नार्थवादत्वमिति समाधत्ते - **नचासामन्यपरत्वमिति**। आसां=श्रुति-स्मृतीनाम्। ब्रह्मस्वरूपपरता च सिद्धान्तिनाप्यङ्गीक्रिय एवेति भाव: । **न च कतिपयेति**। कतिपयशब्दवाच्यत्वं ब्रह्मणोऽङ्गीकृत्य निषेधस्य कतिपयशब्दवाच्यत्वाभावविषयकतया संकोचो न युक्त इत्यर्थ: । नन्वसंकोचेन ब्रह्मण: सर्वशब्दवाच्यत्वनिषेधे यत इत्यादिशब्देन ब्रह्मणो निर्देशोऽनुपपन्न इत्यत्राह - **असंकोचे चेति** । असंकोचस्यैव कर्तव्यत्वे सिद्धे निषेधस्य वृत्तिविषयकत्वं शक्तिविषयकत्वं पारमार्थिकशक्तिविषयकत्वं च ग्राह्यम् । न च ब्रह्मणि पदानां वृत्ते: शक्ते: पारमार्थिकशक्तेश्च अभावे कथं ब्रह्मादिशब्दैर्निर्देश इति

'प्रत्यस्तमितभेदं यत् सत्तामात्रमगोचरम्। वचसामात्मसंवेद्यं तज्ज्ञानं ब्रह्मसंज्ञितम्।' इति। अतो न ब्रह्म कस्यचिदपि शब्दस्य वाच्यमिति।

अत्रोच्यते–यदुक्तं समस्तविशेषरहिते ब्रह्मणि निमित्ताभावेन(भावादेव) न शब्दप्रवृत्तिरिति; तत्र सविशेषत्वोपपादनादेव हेतुरसिद्धः। यथा च निमित्तं निमित्तान्तरमन्तरेण शब्दवाच्यं भवति, तथा स्वरूपमपीति निरूप्यतां त्वया। येषां शब्दानां यत्र यन्निमित्तद्वारेण प्रवृत्तिः, तेषामेव हि तत्र तदभावे निवृत्तिः॥

वाच्यम्। शाखाचन्द्रन्यायेन वा लक्षणया वा व्यवहारिकशक्त्या वा स्वरूपोपस्थितिसंभवात् न कोऽपि विरोध: इति तात्पर्यात्। पूर्वपक्षमुपसंहरति - **अतो न ब्रह्मेति**।

सिद्धान्त:

एवं बहुधा निष्पन्नं पूर्वपक्षं क्रमशोऽनूद्य दूषयितुमारभते-**अत्रोच्यत** इत्यादिना। यदुक्तं समस्तविशेषरहिते ब्रह्मणि प्रवृत्तिनिमित्तविरहेण शब्दवृत्तिर्न संभवतीति, तन्न। ब्रह्मण: सविशेषत्वोपपादनादेव प्रवृतिनिमित्ताभावरूपहेत्वसिद्धे:। तथा च सविशेषे ब्रह्मणि प्रवृत्तिनिमित्तानां बृहत्त्वादीनां सद्भावात् शब्दवृत्तिर्भवितुमर्हतीति भाव:। किं च प्रवृत्तिनिमित्ताभावेऽपि शब्दवृत्तिर्भवितुमर्हतीत्याह- **यथेति**। यथा घटशब्दप्रवृत्तिनिमित्तं घटत्वं स्वस्मिन् निमित्तान्तराभावे ऽपि घटशब्दवाच्यं भवति तथा ब्रह्मणि निमित्ताभावेऽपि शब्दवाच्यं भवितुमर्हति। तथा च ब्रह्म शब्दावाच्यं प्रवृत्तिनिमित्ताभावादित्यनुभाने शब्दावाच्यत्वाभाववति प्रवृत्तिनिमित्ते प्रवृत्तिनिमित्ताभावरूपहेतुसत्त्वात् व्यभिचार इति भाव:। युक्तं चैतदित्याह - **येषां शब्दानामिति**। येषां शब्दानां घटादिशब्दानां यन्निमित्तद्वारेण घटत्वादिनिमित्तद्वारेण यत्र घटादौ प्रवृत्ति: तेषामेव शब्दानां घटादौ घटत्वाभावे प्रवृत्त्यभाव:। निमित्तं बिना प्रवर्तमानेषु शब्देषु निमित्ताभाव: न प्रवृत्त्यभावप्रयोजक इति ब्रह्मणि निमित्ताभावेऽपि शब्दवृत्तिर्भवितुमर्हतीति भाव:। तथा च ब्रह्म शब्दावाच्यं निमित्तशून्यत्वात् इत्यनुमानप्रयोजिकायां यत् शब्दवाच्यं तत् सनिमित्तकमिति व्यतिरेकव्याप्तौ सनिमित्तकशब्दवाच्यत्वमुपाधि: इति भाव:। अत्र- "अत्र निमित्तद्वारा प्रवर्तमानशब्दानामेव हि

अन्यादृशस्तु शब्दो ब्रह्मणि न दृश्यत इति चेत्-किं कुर्मः? सङ्केत्यतां व्यवहाराय तथाविधः शब्दोऽपि(ब्दः) । यच्च–'अवेद्ये वेदकानां नावकाशः; न च स्वयंप्रकाशे प्रकाशकापेक्षा' इति–तच्च स्वप्रकाशस्यापि ज्ञानान्तरवेद्यत्वस्थापनादेव परिहृतम् । यच्चोपदेशानां वेदान्तानां च कल्पितोपप्लवप्रशमनमात्रार्थत्वमुक्तम्, तदपि तदा शोभते, यदि स्वरूपमनिर्दिश्य उपरागाः शमयितुं शक्येरन् । अन्यथा ब्रह्मणो निर्विशेषत्वमपि नोक्तं स्यात् ॥ ननु किं ब्रह्म(णो)निर्देशेन ? विशेषा एव प्रतीयमाना

निमित्ताभावे निवृत्तिः न तु निर्निमित्तकशब्दानामपि । अतोब्रह्मणि निर्निमित्तकशब्दप्रवृत्तौ न विरोध इत्येतावदिहोपजीव्यम्'' इति **चण्डमारुत** ग्रन्थोऽवधेयः । शक्तिनिवृत्तिप्रयोजकनिमित्तनिवृत्तिशिक्षणं यत्रेत्यादिना क्रियत इति मन्तव्यम् ।

ननु ब्रह्मादिशब्दाः सनिमित्तका एव ''बृहति बृंहयति तस्मादुच्यते परं ब्रह्म'' इत्यनुशासनात् । निर्निमित्तकस्तु शब्दो ब्रह्मणि नास्त्येवेति शङ्कते - **अन्यादृशस्तु इति** । निर्निमित्तक इत्यर्थः । **व्यवहाराय**=शब्दप्रयोगाय । **तथाविधः** = निर्निमित्तकः । न च संकेतस्य विषयोपस्थितिपूर्वकत्वात् तस्याश्च शब्दान्तराधीनत्वेनानवस्थेति वाच्यम् । उपहितब्रह्मशक्तेनैव पदेन तदन्तर्गतस्वरूपस्याप्युपस्थितौ तत्रैव संकेतसंभवात् ।

यच्चेत्यादि । अवेद्ये वस्तुनि वेदकानां नावकाशः, नापि स्वयंप्रकाशे वस्तुनि प्रकाशकापेक्षेति यदुक्तं, तदपि स्वप्रकाशस्यापि ज्ञानान्तरवेद्यत्वस्थापनादेव परिहृतम् । अवेद्यत्वभङ्गवादे ब्रह्मणः ज्ञानान्तरवेद्यत्वस्य स्थापनादेव ''अवेद्ये वेदकानां नावकाश'' इत्येतत् परिहृतम् । स्वं प्रति स्वसत्तयैव प्रकाशमानत्वेऽपि पुरुषान्तरं प्रति तदीयज्ञानेनैव प्रकाशमानतया ज्ञानान्तरवेद्यत्वसमर्थनादेव ''न च स्वप्रकाशे प्रकाशान्तरापेक्षा'' इत्येतच्च निरस्तमित्यर्थः । **यच्चेत्यादि** । उपदेशानां वेदान्तानां च न ब्रह्मज्ञानार्थत्वम् ब्रह्मणः स्वयमेव प्रकाशामानत्वात् । किंतु कल्पितोपप्लवप्रशमनार्थत्वमिति यदुक्तम् तदपि ब्रह्म निर्दिश्यैव तत्रोपप्लवानां निषेधनीयत्वात् ब्रह्मणः शब्दवाच्यत्वमवर्जनीयमिति परिहृतम् । शब्देनानिर्देशे कस्योपप्लवशून्यत्वं निर्विशेषत्वं वा उच्येत । शङ्कते - **ननु किमिति** । ब्रह्मणः शब्देन निर्देशं

मिथ्यात्वेन ज्ञाप्यन्ते; ब्रह्म तु स्वप्रकाशं तिष्ठत्येवेति चेत्-तदपि न; 'निर्गुणम्', 'निरञ्जनम्' इत्यादीनां ब्रह्मणो विशेषणतयैव प्रयोगात्। प्रकाशमानमात्रनिषेधे च ब्रह्मणोऽपि निषेधप्रसङ्गात्। यदि ब्रह्मव्यतिरिक्तमिति विशेष्येत, तदा(था)पि सिद्धस्तन्निर्देशः। प्रतियोगितयेति तु विशेषः। यच्चोपदेशादेः प्रत्यभिज्ञापकत्वमिति, ततः किमायातमवाच्यत्वस्य ? पूर्वप्रतिपन्नेऽपि शब्दप्रवृत्तिमात्रस्यान(भ्यु)पगमात्। यत्तु शाखाचन्द्रन्यायेन सद्ब्रह्मादिशब्दैरुपलक्षणभूतैर्न ब्रह्मणः संस्पर्श इति–तदप्यसत्। उपलक्ष्योपलक्षणयोरपि बोध्यबोधकभावलक्षणसंस्पर्शस्य सर्वत्र

बिनापि प्रत्यक्षादिना प्रतीयमाना विशेषा मिथ्यात्वेन शास्त्रेण ज्ञाप्यन्ते। ब्रह्म तु स्वप्रकाशं तिष्ठत्येवेति नाशङ्कनीयम्।"निर्गुणं निष्क्रियं शान्तं निरवद्यं निरञ्जनम्" इत्यादिशास्त्रेण ब्रह्म निर्दिश्यैव तद्विशैषणतया निर्गुणत्वादीनां प्रतिपादनात् इत्यर्थः। ननु ब्रह्मज्ञानाभावे कथमविद्यानिवृत्तिः, ब्रह्मज्ञानस्यैव मोक्षसाधनतया श्रुतत्वादिति शङ्कायामुक्तम्- **ब्रह्म तु** इति। विशेषमिथ्यात्वज्ञानसहकृतेन स्वरूपप्रकाशेन अविद्यानिवृत्तिरिति भावः। **विशेषणतयेति**। निर्गुणत्वादीनां विशेषणतया प्रतीतिः विशेष्यप्रतीतिं बिना न संभवतीति ब्रह्मणो विशेष्यतया प्रतीतिः अवर्जनीयेति भावः।

किं च निर्गुणमित्यादिवाक्यैः किं प्रकाशमानं सर्वं निषिध्यते, उत ब्रह्मव्यतिरिक्तम्। आद्ये ब्रह्मणोऽपि निषेधप्रसङ्गः। द्वितीये व्यतिरिक्तत्वप्रतियोगितया ब्रह्मणः शब्दनिर्देश्यत्वमवर्जनीयमित्याह - **प्रकाशमानमात्रेति**। **किमायातमिति**। तदेव विवृणोति- **पूर्वेति**। पूर्वप्रवृत्तिर्हि विधिविरोधिनी न तु शब्दशक्तिविरोधिनीति भावः। मूले अनभ्युपगमात् इत्यस्य स्थाने अभ्युपगमादिति पाठः साधुः इति प्रतीयते। **यत्तु इत्यादि**। यथा शाखा स्वसंबन्धं विनापि चन्द्रंबोधयति तथा शब्दः ब्रह्म बोधयति इति यदुक्तं, तत्रापि दृष्टान्ते शाखायाश्चन्द्रस्य च संयोगादिसंबन्धाभावेऽपि बोध्यबोधकभावरूपः संबन्धोऽस्तीति तन्नयेन शब्दस्य ब्रह्मणश्च बोध्यबोधकभावः सिध्यतीति शब्दवेद्यत्वं ब्रह्मणः सिध्यत्येव। ननु न वयं ब्रह्मणः शब्दवेद्यत्वं निषेधामः, किं तु शब्दवाच्यत्वमात्रम्। ततश्च शाखावद्वा

दुस्त्यजत्वात्, तावतैव च शब्दवेद्यत्वसिद्धेः ॥ लक्षणामात्रं तु तत्र, न तु वाच्यत्वमिति चेत्; किमतः? तावताऽपि शब्दवेद्यत्वस्य स्थितत्वात्। मुख्यार्थसम्बन्धादेश्च लक्षणानिमित्तस्य लाक्षणिकशब्देनापि अपेक्ष(लक्ष)णीयत्वाच्च ॥ एतावन्मात्रं शब्दवेद्यत्वमिष्यत इति चेत्; किमन्यन्नेष्यते; न तावन्निमित्ताभावादेरित्युक्तम्। न च वाङ्मनसनिषेधश्रुतिर्लक्षणामनुजानातीति नियामकं पश्यामः ॥ विरोध-

---

लक्षणया वा ब्रह्मणः शब्दबोध्यत्वेऽपि न क्षतिरिति शङ्कते - **लक्षणामात्रं तु** इति। **तत्र**=ब्रह्मणि। समाधत्ते - **किमत इति**। यथाकथंचित् शब्दवेद्यत्वसाधन एवास्माकं तात्पर्यमिति भावः। दूषणान्तरमाह - **मुख्यार्थेति**। लक्षणापक्षेऽपि लक्षणाया निमित्तभूतं मुख्यार्थसंबन्धादिकमपेक्षितम्। तत्तु दुर्घटं भवन्मत इति प्रथमवाद एव निरूपितम्। ननु ब्रह्मशब्दमुख्यार्थेन उपहितेन अनुपहितस्य अभेदरूपः संबन्धोऽस्ति। तं पुरस्कृत्य अनुपहिते लक्षणा भवितुमर्हतीति चेन्न। तथा सति उपहितवत् तदभिन्नस्य अनुपहितब्रह्मणः वाच्यत्वस्यैवापत्त्या लक्षणाया असंभवात्। आदिशब्देन लक्ष्यतावच्छेदकं गृह्यते। लक्ष्यतावच्छेदकधर्मं बिना लक्षणायाः असंभवात् निर्धर्मके ब्रह्मणि लक्षणा न संभवतीति भावः।

तावतापि शब्दवेद्यत्वस्य स्थितत्वादित्यत्र शङ्कते - **एतावन्मात्रमिति**। शक्त्या लक्षणया वा बोधनासंभवात् उपलक्षकेन वा बोधनमिष्यत इत्यर्थः। उपलक्षकेन बोधनमिष्यते चेत् शक्त्या बोधनं कुतो नेष्यत इति पृच्छति - **किमन्यन्नेष्यत** इति। **किं**=कुतः, **अन्यत्**=शक्त्या बोधनं नेष्यत इत्यर्थः। न तावन्निमित्ताभावात्। अत्रोच्यत इत्यादिना सिद्धान्तारम्भ एवास्याः शङ्कायाः परिहृतत्वादित्याशयेनाह- **उक्तमिति**। निमित्ताभावादिति शङ्कायाः समाधानं पूर्वमेवोक्तमित्यर्थः। ननु ब्रह्मणि शब्दशक्त्यनङ्गीकारे श्रुतिरेव हेतुरित्यत्राह - **न चेति**। अत्र श्रुतौ वाङ्निवृत्तिरेव हि श्रूयते, न तु शक्तिनिवृत्तिरिति भावः। ननु "अप्राप्य" इति शक्तिरेव निषिध्यत इति चेत्-न। "मनसा सह" इति श्रवणात् मनस्साधारणसंवन्धस्यैव वाच्यत्वात्। मनसः वृत्त्यात्मक-

परिहाराय वृत्तिविशेषविषयत्वेन(विषय)व्यवस्था क्रियत इति चेत्–तर्हि लक्षणावृत्तिरेव निषिद्ध्यताम्, नियामकाभावात् । अस्मन्नयेन सर्वप्रमाणाविरुद्धेनापरिच्छेद्यमाहात्म्यं तदर्थमातिष्ठस्व । अतः सर्वप्रकारशब्दवेद्यत्वनिषेधस्य दुश्शकत्वात्

शक्त्यसिद्ध्या परिच्छिद्य ब्रह्मबोधनसामर्थ्याभावस्यैव अप्राप्तिशब्देन विवक्षणीयत्वात् । एतदभिप्रेत्यैव वाङ्निषेधश्रुतिरित्यनुक्त्वा वाङ्मनोनिषेधश्रुतिरित्युक्तम् ।

किं च शक्तिरूपप्राप्तिनिषेधे लक्षणारूपप्राप्तिनिषेधोऽपि कुतो न स्यात् । ननु शक्तिर्हि शब्दार्थयो: संबन्ध:, न तु लक्षणा । तस्या: शक्यार्थसंबन्धत्वेन परंपरासंबन्धत्वादिति चेत्- ् तर्हि परंपरारूपसंबन्धान्तरसत्त्वेऽपि शक्तिरूपसंबन्ध एव निषिध्यत इति कुतोऽवगम्यते? शब्दस्यार्थबोधकत्वे शक्तिरूपसंबन्धस्यैव प्रयोजकतया तदभावस्यैवार्थानवबोधरूपनिवृत्तिप्रयोजकत्वादिति चेत् - तथा सति लक्षणाया अपि बोधप्रयोजकत्वात् सापि निषेध्येति तुल्यम् । अन्यथा निवृत्त्यसिद्धे: । निवृत्ते: बोधकत्वाभावरूपत्वात् । न च निवृत्तिपदं शक्त्यधीनबोधाभावपरम् इति वाच्यम् । संकोचकाभावात् । उपक्रमस्थत्वेन प्राधान्येन च तस्यैवानुरोद्धव्यतया तदनुसारेणैवाप्राप्तेर्वर्णनीयत्वात् । एतदेवाभिप्रेत्योक्तं **लक्षणामनुजानातीति नियामकं** पश्याम इति ।

ननु यत इति निर्देशस्य वाङ्निषेधस्य च विरोधपरिहाराय वाङ्निषेधस्य शक्तिरूपवृत्तिविशेषविषयकतया संकोचेन व्यवस्थां कुर्म इति शङ्कते- **विरोधपरिहारायेति** । समाधत्ते - **तर्हीति** । यत इति निर्देशेन शक्तिरवगम्यते, तदनुसारेण वाङ्निषेधश्रुति: लक्षणारूप-वृत्तिविशेषनिषयिणी इत्यपि व्यवस्थाया: कर्तुं शक्यत्वात् भवदुक्तरीत्यैव व्यवस्थेत्यत्र नियामकाभावादित्यर्थ: । तर्हि श्रुते: कथं निर्वाह इत्यत्राह- **अस्मन्नयेनेति** । तदर्थम=वाङ्मनसनिषेधश्रुत्यर्थम् । एवं शक्तिनिषेधासिद्धे: अविद्योपरागशमनपरेषु वाक्येषु सदादिशब्दै: शक्त्यैव ब्रह्मस्वरूपनिर्देश: कर्तव्य इति स्थितम्। उक्तहेतोरेव पूर्वपक्षोक्तौ स्ववचनविरोधोऽपि दुस्तर इत्याह - **अत इति** । स्वरूपमनिर्दिश्येति शेष: । स्वरूपं शब्देनानिर्दिश्य सर्वै: प्रकारै: शब्दवेद्यत्वं नेति निषेधस्य

स्ववचनविरोधो दुष्परिहरः(दुस्तरः)। यत्तु नामकीर्तनविधीनां सगुणब्रह्मविषयतेति; तत् तावत् सत्यम्, यदि तदतिरिक्तं ब्रह्म नाभिसन्दध्याः। यश्चासौ, 'मौनं मन्त्रजपः' इति व्याहतोपदेशः, सोऽपि मौनप्रशंसापरश्चेत्, उपपद्यते; न तु मन्त्रजपं विहितं प्रतिषेद्धुं क्षमते(क्षमेत)। न चाधिकारिविशेषेण विषयव्यवस्था, समाधिनिष्ठमधि-

---

दुःशकत्वात् स्ववचनविरोधो दुष्परिहरः। **अतः=श्रुतेः** शब्दवेद्यत्वसामान्यनिषेधपरत्वस्य त्वया वाच्यत्वादेव ब्रह्म श्रुतिबलात् शब्दवेद्यं न भवतीति भवदीयप्रतिज्ञायां प्रतिज्ञास्थ-ब्रह्मपद=शब्दवेद्यत्वनिषेधयोर्विरोध इत्यर्थः।

यत्तु इत्यादि। यदि सगुणब्रह्मातिरिक्तं किंचित् निर्गुणं ब्रह्म ब्रूयाः तदा नामकीर्तनविधेः सगुणब्रह्मविषयत्वम् अवाच्यत्वविधेः निर्गुणविषयत्वमिति वक्तुं शक्येत। न च तदस्ति। परमार्थतो निर्गुणस्यैव ब्रह्मणः मिथ्याभूतगुणाश्रयत्वादित्यर्थः। अनेन "तदतिरिक्तं ब्रह्म ब्रूयाः" इति पाठः। नाभिसन्दध्याः इति पाठे सगुणपदव्यावर्तनीयं निर्गुणं ब्रह्म यदि नाभिसंदध्याः, किं तु सगुणमेव ब्रह्म तादृशमेव च नामविषय इति अभिसंदध्याः तदा अस्मन्मतप्रवेशात् त्वदुक्तं सम्यगेवेत्यर्थः - इति व्याख्यातारः। **व्याहतोपदेश** इति। मौनं चेत् मन्त्रोच्चारणरूपो जपो न भवति, जपश्चेत् तदनुच्चारणरूपं मौनं न संभवतीति व्याहतोऽयमुपदेश इति।

सोऽपि मौनं मन्त्रजपस्थानीयं मन्त्रजपतुल्यमित्यभिप्रायकश्चेत् मौनप्रशंसापरो भवति। तदा नानुपपत्तिः। मौनमेव मन्त्रजपः, मन्त्रजपोऽनावश्यक इत्येवंपरश्चेत् विहितमन्त्रजपस्य निपेधरूपो भवति इति विहितनिषेधायोगादनुपपन्नः इति भावः। **विषयव्यवस्थेति**। जपविधेः, मौनं मन्त्रजप इत्यस्य चेति शेषः। मौनं मन्त्रजप इत्यस्य समाधिनिष्ठमुमुक्षुविषयत्वात् स्वरूपे जपनिषेधविषयत्वम्; जपविधेः काम्यविषयत्वात् सगुणविषयत्वमिति अधिकारिविशेषेण विषयव्यवस्थेत्यर्थः। **समाधिनिष्ठमिति**।" यः पुनरेतं त्रिमात्रेण ओमित्यनेनैवाक्षरेण परं पुरुषमभिध्यायीत" "ओमित्यात्मानं युञ्जीत" इत्यादिभिः समाधिनिष्ठमधिकृत्यैव मन्त्रविधानात् मन्त्रजपस्यापि मुमुक्षुविषयत्वात् जपविधेः

कृत्यैव तद्विधानात्। असंप्रज्ञातसमाधिरपि न शब्दवाच्यताविरोधी, अपितु केवलं तदातनशब्दानुसन्धानपरिपन्थीति समाधिशास्त्रविदः । यत्तु–विचित्रनामरूपभाक्त्वश्रुतिस्त(त्त)त्कार्योपहितविषयेति– तदस्माभिरपीष्यत एव (ष्यते। एवं) तथाऽपि तत्तदुपहितब्रह्मण्यपि तत्तन्नामपर्यवसानविवक्षा दुर्वारा । अन्यथा, 'बहु स्याम्' इति सङ्कल्पस्य, 'तन्नामरूपाभ्यां व्याक्रियत' इत्यादेश्च दुर्निर्वहत्वात्। शब्दतत्त्वस्य ब्रह्मव्यतिरेकसाधनं त्विष्टमेव। विवर्तता तु प्रकृतानुपयोगिनी; पराकृता

काम्यविषयकत्वमिति व्यवस्था नोपपद्यत इत्यर्थः । **असंप्रज्ञातसमाधिरपीति ।**

शब्दाद्यगोचरं ध्यानं निर्विकल्पात्मकं यदा ।
असंप्रज्ञातः समाधिः स्यात् स्वयं निर्वाणसाधनम् ॥

अर्थज्ञानावसरे शब्दस्मरणं संस्कारबलात् सहजम् । अर्थज्ञानावसरे शब्दस्मरणं न भवति चेत्, तादृशं ध्यानम् असंप्रज्ञातसमाधिः । तावता ब्रह्मणः शब्दवाच्यत्वविरोधी स समाधिर्न भवतीति भावः ॥

तत्तदुपहितब्रह्मण्यपीति । उपधेये विशेष्यभूते ब्रह्मण्यपि तत्तन्नामपर्यवसानतात्पर्यं नामरूपभात्तवश्रुतेः दुर्वारम् । ततश्च तत्तत्कार्योपहितब्रह्मातिरिक्तस्य ब्रह्मणोऽसिद्धेरेव तस्य शब्दावाच्यत्वं दुरुपपादमिति भावः । **अन्यथेति** । ब्रह्मणः तत्कार्यवाचिशब्दवाच्यत्वाभावे तद्वाचकबहुशब्देन ''बहु स्याम्'' इति सामानाधिकरण्यायोगात् ''तद्ध्याक्रियत'' इति नामरूपव्याकरणकर्मत्वप्रतिपादनायोगाच्चेति भावः ।

यच्च पूर्वपक्षिणा शब्दस्य ब्रह्मव्यतिरिक्तत्वं साधितं तत् अस्माकमिष्टमेव । परं तु शब्दस्य ब्रह्मविवर्तत्वं यदुक्तं तत् प्रकृतानुपयुक्तम्, अन्यत्र पराकृतं चेत्याह- **शब्दतत्त्वस्येत्यादिना** । यत्तु ब्रह्म शब्दवाच्यं वस्तुत्वात् इति सिद्धान्त्यनुमाने काल्पनिकस्य शब्दवाच्यत्वस्याङ्गीकारात् सिद्धसाधनमित्युक्तम्, तदपि स्वाभ्युपगतस्य अवाच्यत्वस्य परित्यागे पर्यवसितम् । घटादेरपि काल्पनिकस्यैव वाच्यत्वस्य

च यत्तु-शब्दवाच्यत्वसाधने काल्पनिकवाच्यत्वाभ्युपगमात् सिद्धसाधनत्वमुक्तम्, तदपि स्वबाधपर्यवसितम्, घटाद्यविशेषप्रसङ्गात्। घटादीनां शब्दवाच्यत्वमभ्युपगम्य ब्रह्मणि तन्निषेधप्रवृत्तत्वात्। घटादितुल्यशब्दवाच्यत्वाभ्युपगमे च विवादाभावात्। न हि वयं ब्रह्मणि लोकसिद्धातिरिक्तप्रकारं वाच्यत्वमिच्छामः, येन तन्निषेधसिद्धिः। न च वाच्यत्वमात्रस्य दुर्निरूपतया ब्रह्मणि तदभावः; सामान्यतो दुर्निरूपत्वप्रक्रियायाः, प्रपञ्चमिथ्यात्वसाधकानां च निरस्तत्वात्। अत एव वस्तुत्वादि(ति) हेत्वसिद्धिरपि परिहृता।

यत्तु प्रकाशमानत्वादिति हेतोः शुक्तिरजतादिभिरनैकान्त्यमिति–तन्न; तत्रापि

भवताङ्गीकारात् इत्याह - **यत्तु इति** । घटाद्यविशेषेऽपि कथं बाधपर्यवसानं = स्वाभ्युपगतावाच्यत्वपरित्यागपर्यवसानमित्यत्राह - **घटादीनामिति** । ननु घटादितुल्यं वाच्यत्वं ब्रह्मणि नास्माभिर्निषिध्यते, किं तु अन्यादृशमेवेत्यत्राह - **न हि वयमिति** । लोके घटादौ यादृशं वाच्यत्वं प्रसिद्धमस्ति तदतिरिक्तं वाच्यत्वं ब्रह्मणि यदि वयमिच्छामः तदा भवता तन्निषेधः कर्तुं शक्यते । न वयं तथा इच्छामः इति भावः । ननु घटादितुल्यस्यैव वाच्यत्वस्य मिथ्यात्वात् ब्रह्मणि तदभावः साध्यते । घटादेश्चाधिष्टानत्वाभावात् न तत्र तदभाव इति न घटाद्यविशेषप्रसङ्गः इत्येकदेशिमतं दूषयति-**नचेति** । **दुर्निरूपतयेति** । सदसदनिर्वचनीयतयेत्यर्थः । **अत एवेति** । सामान्यतो दुर्निरूपत्वप्रक्रियायाः प्रपञ्चमिथ्यात्वसाधकानां च निरस्तत्वादेवेत्यर्थः । **वस्तुत्वादिहेत्वसिद्धिरिति** । दृष्टान्तस्य घटादेः मिथ्यात्वेन तत्र वस्तुत्वरूपहेतुवैकल्यं यदुक्तं तदपि घटादेः मिथ्यात्वस्य निराकृतत्वात् परिहृतमित्यर्थः ।

यत्तु तस्मिन्ननुमाने हेतुभूतं वस्तुत्वं प्रकाशमानत्वरूपम् तत् घटादौ दृष्टान्तेऽस्त्येवेति न साधनवैकल्पमिति सिद्धान्तिना उक्ते पूर्वपक्षिणा उक्तं तथापि व्यभिचारो दुर्वारः, पारमार्थिकवाच्यत्वाभाववति शुक्तिरजतशशविषाणादौ प्रकाशमानत्वसत्त्वात् इति, तदनूद्य दूषयति - **यत्तु इति** । शुक्तिरूपाधिष्ठानस्य आरोप्यरजतस्य तयोः संबन्धस्य च भ्रमे

प्रकाशमानस्य सर्वस्याधिष्ठानारोप्यसम्बन्धादेः शब्दवाच्यत्वसिद्धेः तदतिरिक्तस्य कस्यचिदस्माभिः प्रकाशमानत्वानभ्युपगमात् । असद्व्यवहारप्रसङ्गस्यान्यत्र निस्तीर्णत्वात् । यत्तु वाच्यत्वधर्मेणानैका(न्तिकत्व) न्त्यमुक्तम्– तदप्यसत्; तस्यापि वाच्यत्वशब्देन वाच्यत्वात् । अन्यथा वाच्यत्वमिति वक्तुमशक्यत्वात् । न चानवस्था; घटादिगतवाच्यत्वस्य वाच्यत्वगतवाच्यत्वस्य च वाच्यत्वशब्द-

---

भासमानस्य सर्वस्य वाच्यत्वात् साध्यमेवास्ति इति व्यभिचारस्य नावकाशः शुक्तिरजते । अदिशब्देन यथार्थख्यातिवाद्यभिमतशुक्तिसंसृष्टरजतावयवो गृह्यते । शशविषाणादौ व्यभिचारं परिहरति - **असद्व्यवहारेति** । तत्रापि प्रकाशमानशशविषाणसंबन्धानां सत्पत्वात् न व्यभिचार इति भावः । न च शशविषाणमसदिति व्यवहारः कथमिति वाच्यम् । शशे विषाणं नास्तीति तदर्थात् ।

यच्च पूर्वपक्षिणा ब्रह्म वाच्यं वस्तुत्वादित्यनुमान एव वाच्यत्वं वाच्यं न वा । आद्ये अनवस्था । द्वितीये वाच्यत्वाभाववति वाच्यत्वे वस्तुत्वसत्त्वात् व्यभिचार इत्युक्तं तद्दूषयति - **यत्तु इत्यादिना** । **तस्यापीति** । वाच्यत्वस्यापि वाच्यत्वशब्दवाच्यत्वात् साध्यसत्त्वान्न व्यभिचारः । **अन्यथा**=वाच्यत्वस्य वाच्यत्वाभावे वाच्यत्वमिति शब्दप्रयोग एव न स्यात् इत्यर्थः । **न चानवस्थेति** । वाच्यत्वस्य वाच्यत्वे या अनवस्था उक्ता सा न प्रसजति । वाच्यत्वमिति शब्दो हिं घटादिगतं वाच्यत्वं, वाच्यत्वगतं वाच्यत्वं च वाच्यत्वशब्दवाच्यत्वेन वाच्यत्वत्वेन सामान्यरूपेण बोधयति । अतः वाच्यत्वातिरिक्तं वाच्यत्वगतं वाच्यत्वं नास्तीति क्वानवस्थेति भावः । एतदुक्तं भवति - घटपटादौ प्रवृत्तिनिमित्तस्य घटत्वपटत्वादेः भेदात् वाच्यत्वभेदः । परं तु घटादिगतवाच्यत्वेषु वाच्यत्वगतवाच्यत्वे च वाच्यत्वत्वमेकमिति तेन रूपेणानुगतीकृतेषु वाच्यत्वशब्दवाच्यत्वमेकमेव । ततश्च घटादिवाच्यत्वमेव स्वस्मिन्नपि वाच्यत्वमिति नानवस्थेति । **वाच्यत्वशब्दवाच्यसामान्यमित्यस्य** वाच्यत्वत्वमित्यर्थः । यदि च प्रवृत्तिनिमित्तस्य वाच्यत्वशब्दप्रवृत्तिनिमित्तस्य वाच्यत्वत्वस्य एकत्वेऽपि

वाच्यसामान्यरूपेणैकतया तदतिरिक्तगवेषणाभावात् । प्रतिवस्तुनियतशब्दव्यापारभेदेऽपि दोषाभावात् । स्वपरनिर्वाहकसमाधिं च स्वप्रकाशवादादौ परिगृहीतं किमत्र विस्मरसि ?

यत्तु निर्विशेषत्वादिति प्रत्यनुमानम्–तत्र केषांचित् स्वरूपासिद्धिः । सिद्धानामपि स्वयंप्रकाशत्वादीनां स्ववचनविरोधादिभिर्निरासः; ब्रह्मेति धर्मिनि(तया तन्नि) र्देशात् तत्पर्यवसितसाध्यहेतुनिर्देशाच्च । अन्यथा आश्रयासिद्धि-अनन्वय-स्वरूपासिद्ध्यादिदोषप्रसङ्गात् ॥ मुख्यवृत्तिनिषेधः साध्यते; लक्षणया तु धर्मिखरूपादिनिर्देश इति चेन्न; ब्रह्म न लक्ष्यं निर्विशेषत्वादित्यपि वक्तुं शक्यत्वात्। सर्वस्य च ब्रह्मव्यतिरिक्तस्य येनकेनापि शब्देन लक्ष्यत्वसिद्धेर्न सपक्षत्वप्रसङ्गः ॥

वाच्यत्वाश्रयभेदात् वाच्यत्वभेदः तदापि प्रामाणिकत्वान्नानवस्था दोषाय भवतीत्याह - **प्रतिवस्तु** इति । शब्दव्यापारः वाच्यत्वम् । प्रतिवस्तु विद्यमानस्य वाच्यत्वस्य आश्रयभूतवस्तुभेदात् भेदेऽपीत्यर्थः । **दोषाभावात्** = अनवस्थाख्यदोषाभावात् । प्रामाणिकत्वादिति शेषः । नन्वेवमपि वाच्यत्वे वाच्यत्वस्वीकारे आत्माश्रयदोषप्रसङ्ग इत्यत्राह - **स्वपरेति** । एकमेव वाच्यत्वं स्वस्मिन् घटादौ च वाच्यत्वव्यवहारप्रयोजकमिति नात्माश्रय इति भावः । तत्र दृष्टान्तः **स्वप्रकाशेति** । यथा ज्ञानं स्वयंप्रकाशं स्वस्य परस्य च प्रकाशे हेतुः तद्वत् इति भावः ।

यच्च पूर्वपक्षिणा ब्रह्म न शब्दवाच्यं निर्विशेषत्वादिति प्रत्यनुमानमुक्तं तत् दूषयति- **यत्तु निर्विशेषत्वादिति** । **तत्र**=अनुमाने **केषांचित्** = ब्रह्म सविशेषमिति वादिनां मते स्वरूपासिद्धिः । पक्षे ब्रह्मणि निर्विशेषत्वरूपहेत्वभावात् । **ब्रह्म न लक्ष्यमिति** । येन निर्विशेषत्वेन हेतुना ब्रह्मणि वाच्यत्वाभावः साध्यते तेनैव लक्षयत्वाभावोऽपि साधयितुं शक्यते । शक्यतावच्छेदकविरहात् शक्यत्वाभाववत् लक्ष्यतावच्छेदकविरहात् लक्ष्यत्वाभावोऽपि साधयितुं शक्यः । ननु ब्रह्म न लक्ष्यं निर्विशेषत्वादिति हेतुरसाधारणः सपक्षभूतअलक्ष्यघटादिव्यावृत्तत्वादिति शङ्कां परिहरति-**सर्वस्य चेति** । ब्रह्मव्यतिरिक्तस्य

मा भूल्लक्ष्यत्वमपीति चेत्–तर्हि धर्मिनिर्देशादित्यागे कथमनुमानकथा ? ‘यतो वाचो निवर्तन्ते’ इत्यादिकं तु न ब्रह्मणः शब्दवाच्यतां बाधते। तस्य शतगुणितोत्तरक्रमेण ब्रह्मगुणानन्त्यं प्रतिपाद्य तथाविधापरिच्छेद्यत्वनिबन्धनवाङ्निवृत्ति-प्रतिपादनपरत्वात् । ‘आनन्दं ब्रह्मणो विद्वान्’ इति व्यतिरेकनिर्देशेन च गुणविषयत्वं व्यक्तम् । अन्यथा वाच्यत्वमात्रनिषेधे तु अत्रत्ययच्छब्दादेः समुद्रघोषत्वप्रसङ्गः । एवंच यत्र गुणप्रकर्षप्रसङ्गमन्तरेणैव शब्दवाच्यत्वं निषिद्धम्, तत्राप्ययमेव शास्त्रार्थोऽनुगमयितव्यः । न चैवंविधा वाचोनिवृत्तिर्वस्त्वन्तरेषु विद्यते, येन कतिपयशब्दमात्रागोचरत्वे(त्वसाम्येन) अतिशयासिद्धिं (अ)शङ्केथाः । या पुनस्तवासंकोचेन विषयव्यवस्थाऽभिमता, साऽप्याशामात्रसिद्धा; लक्षणावृतेर्ब्रह्मणि काल्पनिकवाच्यत्वस्य वा दुस्त्यजत्वात्। अन्यथा स्ववचनविरोधादेः प्रतिपादितत्वात् ॥

सर्वस्य वस्तुन: यत्किंचिच्छब्दलक्ष्यतया लक्ष्यभिन्नस्य सपक्षस्याभावात् तद्व्यावृत्तत्वरूपमसाधारण्यं न भवतीति भाव: । ननु ब्रह्मण: शब्दवाच्यत्ववत् शब्दलक्ष्यत्वमपि मा भूत्, का नो हानिरित्याशङ्क्य परिहरति - **मा भूदिति** । ब्रह्म शब्देन निर्दिश्य तत्र किमपि साधनीयम् । ब्रह्मण: वाच्यत्वलक्ष्यत्वयोरभावे ब्रह्मपक्षकानां भवदुक्तानां बहूनामनुमानानां वैयर्थ्यमिति भाव: ।

स्वमतेन सिद्धान्ती “यतो वाच” इत्यादिश्रुतेरभिप्रायं वर्णयति-**यतो वाच इति** । ब्रह्मगुणस्यानन्दादे: अपरिच्छिन्नत्वात् वाचा मनसा वा ब्रह्मगुण: आनन्दादि: परिच्छिद्य ज्ञातुं न शक्यत इति श्रुत्यर्थ इति भाव: । उपपादितं चैतत् पूर्वमेव । तथा च “यतो वाच” इति श्रुति: ब्रह्मगुणविषयिणी न ब्रह्मविषययिणीति तात्पर्यम् । तस्या: ब्रह्मगुणविषयकत्वे प्रमाणमाह - **आनन्दं ब्रह्मण** इति । ब्रह्मपरत्वेऽपि सा श्रुति: न वाच्यत्वनिषेधपरेत्याह - **अन्यथेति** । **समुद्रेति** । समुद्रघोषवत् निरर्थकशब्दत्वप्रसङ्ग इत्यर्थ: । **अयमेव शास्त्रार्थ:** = परिच्छिद्य ज्ञातुमशक्यत्वरूप: । **असंकोचेनेति** । वाच्यत्वनिषेधस्येति शेष: । **ब्रह्मणीति** । अनुपहिते इति शेष: । धर्मिसमानसत्ताकवाच्यत्वाभावेऽपि विषमसत्ताक-

श्लो. अवाच्यमिति वाच्यं चेत्-ब्रह्म वाच्यत्वमृच्छति ।
अवाच्यमित्यवाच्यं चेत् ब्रह्म वाच्यत्वमृच्छति ॥

यत्तु, ‘प्रत्यस्तमितभेदम्’ इत्यादि–तदपि परिशुद्धात्मस्वरूपोपदेशपरमिति प्रकरणा(द्य)नुसारेण व्याख्यातं भाष्ये। भवतु वा तस्य परब्रह्मविषयत्वम्; तथापि न सर्वशब्द(सर्वथा) वाच्यत्वनिषेधशङ्का, स्ववचनविरोधादेरत्रापि दुर्निरासत्वात्।

वाच्यत्वं वा लक्षणा वा अङ्गीकरणीया । तथा च वाङ्निवृत्तिश्रुतेर्नासंकोचसिद्धिरित्यर्थः। एतदुक्तं भवति - ब्रह्माभिप्रायेण प्रयुक्तेषु शब्देषु समुद्रघोषत्वप्रसङ्गवारणाय ब्रह्मणः पारमार्थिकवाच्यत्वाभावेऽपि “अपारमार्थिकं वाच्यत्वं वा लक्षणा वा स्वीकरणीया । तथा च निवृत्तिश्रुतेः पारमार्थिकवाच्यत्वाभावपरतया वा वाच्यत्वाभावपरतया वा संकोचः अवर्जनीय इति भवन्मतेऽपि असंकोचेन वाङ्निवृत्तिश्रुतेरर्थवर्णनं न संभवतीति । ततश्च यस्तूभयोः समो दोष इति न्यायेन मन्मते संकोचेनार्थवर्णनरूपो दोषो नोद्भावनीयः । पूर्वापरानुगुण्यात् अङ्गीकरणीयः संकोच इति भावः ।

अनुपहितब्रह्मणः वाच्यत्वानङ्गीकारे दोषमाह कारिकया **अवाच्यमिति** । ब्रह्म अवाच्यमिति भवद्भिः उच्यते । तत्र अवाच्यमिति शब्देन ब्रह्म वाच्यं न वा । वाच्यं चेत् ब्रह्मणः वाच्यत्वमागतम् । न चेत् अवाच्यमिति शब्देन न वाच्यं चेत् तथापि ब्रह्म वाच्यमेव भवति । यत् अवाच्यशब्दवाच्यं न भवति तस्य वाच्यत्वनियमात् । अवाच्यमिति पदेनावाच्यत्वं तदवाच्यत्वं वाच्यत्वप्रयुक्तमेवेति वाच्यत्वभागेव ब्रह्मेति ।

यानि ब्रह्मणः शब्दावाच्यत्वबोधकतया स्मृतिवचनानि उदाहृतानि तेषां तात्पर्यमाह **यत्तु इत्यादि** । परिशुद्धात्मस्वरूपस्य देवमनुष्यादिशब्दवाच्यत्वं नास्ति । शरीरस्य वा तद्विशिष्टस्य वा देवमनुष्यादिशब्दवाच्यत्वमित्येवंपरतया “प्रत्यस्तमितभेदम्’ इत्यादिस्मृतिवचनानि भाष्यकारैर्व्याख्यातानि । अतो न तेषां ब्रह्मणः शब्दावाच्यत्वपरत्वमिति भावः । अन्यथा तत्रैव स्मृतौ ब्रह्मणः शब्दवाच्यत्वोक्त्या तद्विरोध

येन महर्षिणैवसुक्तम्, ''शुद्धे महाविभूत्याख्ये परे ब्रह्मणि शब्द्यते । मैत्रेय भगवच्छब्दः सर्वकारणकारणे ॥ तत्र पूज्यपदार्थोक्तिपरिभाषासमन्वितः । शब्दोऽयं नोपचारेण ह्यन्यत्र ह्युपचारतः ॥ एवमेष महाशब्दो मैत्रेय भगवानिति । परमब्रह्मभूतस्य वासुदेवस्य नान्यगः ॥'' इति–स कथं ब्रह्मणः (सर्वथा) शब्दवाच्यत्वं प्रतिक्षिपेत् ? न च त्वदुक्ता एव श्रुतिस्मृतयः; 'बृहति बृंहयति तस्मादुच्यते परं ब्रह्म', 'तस्योदिति नाम', 'तस्योपनिषदहरिति'– अधिदैवतम्–, 'तस्योपनिषदहमिति'– 'अत्यध्यात्मम्, 'सर्वाधारं धाम विष्णुसंज्ञम्'

इत्याह - **येन महर्षिणेत्यादिना** । विष्णुपुराणकर्ता पराशरः महर्षिशब्दार्थः । एतेषां श्लोकानां श्रुतप्रकाशिकायामेवं व्याख्यानम्- **शुद्ध इति** । शुद्ध एव नित्यशुद्ध इत्यर्थः । **महाविभूत्याख्ये** - विभूतिभूतस्य महाविभूतित्वायोगात् उभयविभूतिशेषिणीत्यर्थः । इदं समस्तचेतनव्यावर्तकम् । परे ब्रह्मणीत्यनेव च चेतनव्यावृतिः सिद्धा । सर्वकारणकारणत्वं च भगवत एव । एवमुक्तप्रवृत्तिनिमित्तपौष्कल्यात् सर्वेश्वर एव भगवच्छब्दो मुख्यवृत्तो नान्यत्रेत्यर्थः । भगवच्छब्दः शब्द्यते प्रयुज्यते । कथं तत्रैव भगवच्छब्दस्य मुख्यवृत्तत्वम् । अन्यत्रापि हि भगवच्छब्दप्रयोगो दृश्यत इत्यत्राह - **तत्रेति** । पूज्यपदार्थोक्तिः पूज्यानामवयवार्थानामुक्तिः, **परिभाषा** रूढिः ताभ्यां योगरूढिभ्यां समन्वितोऽयं भगवच्छब्दः । अत एव [१]नोपचारेण मुख्यवृत्तं इत्यर्थः । अन्यत्रामुख्यत्वमुक्तमित्याह- **अन्यत्र हीति** ।

एवमेष इति । एवं प्रवृत्तिनिमित्तपौष्कल्यात् भगवच्छब्दस्य भगवत्येव मुख्यवृत्तत्व माह - **एवमिति** । महार्थगर्भत्वात् महाशब्दत्वम् । मुक्तात्मव्यावृत्त्यर्थं परमप्रह्मभूतस्येत्युक्तम् । ब्रह्मावाच्यत्वपराः श्रुतिस्मृतय इव तद्वाच्यत्वपराः श्रुतिस्मृतयोऽपि सन्तीत्याह - **न च त्वदुक्ता एवेति** । उच्यत इति वाच्यत्वं स्पष्टमुक्तम् । उदिति **नाम** = वाचकः शब्दः । तस्य परमात्मनः उत् इति वाचकः शब्द इत्यर्थः । **तस्योपनिषदहरिति** । तस्य परमात्मन अहः इति उपनिषत्=रहस्यनामेत्यर्थः । **विष्णुसंज्ञम्**=

इत्यादिश्रुतिशतैः तत्तच्छब्दानां ब्रह्मणश्च नामनामिभावेनैव व्यपदेशात्। 'ओमिति ब्रह्म' इत्यादिना प्रणववाच्यत्वं (च ?) श्रूयते। स्मरन्ति च, 'नतास्स्म सर्ववचसां प्रतिष्ठा यत्र शाश्वती', 'वचसां वाच्यमुत्तमम्' इति। आह च स्वयमेव, 'वेदैश्च सर्वैरहमेव वेद्यः' इति। अतः, 'सर्वे वेदा यत्पदमामनन्ति' इत्यादिसर्वश्रुत्याद्यविरोधाय स्ववचनविरो(धादि) परिहाराय च मुमुक्षूपादेयब्रह्मनामवर्गसंरक्षणाय अपरिच्छेद्यमाहात्म्यादिनिबन्धनैव ब्रह्मणि वाचोनिवृत्तिः श्रुतिस्मृतिभिर्विवक्षितेतिन ब्रह्मणि शब्दवाच्यत्वमात्रं प्रतिक्षेप्तुं शक्यमिति।

॥ इति शतदूषण्यां शब्दावेद्यत्वनिरासवादः पञ्चचत्वारिंशः ॥ ४५ ॥

विष्णुपदवाच्यम्। संज्ञा हि वाचकः शब्दः नामनामिभावेन। नाम वाचकम्, नामि वाच्यम्। वाच्यवाचकभावेनेत्यर्थः।

वादार्थं संगृह्णन् उपसंहरति - अत इति। शब्दवाच्यत्वमात्रमिति। मात्रपदेन शब्दवाच्यत्वं प्रतिक्षिप्यते चेत् शब्दलक्ष्यत्वमपि प्रतिक्षेप्यम्। उपपादितं चैतदधस्तात्।

इति श्रीशतदूषणीव्याख्यायां तात्पर्यप्रकाशिकायां
शब्दावेद्यत्वनिरासः पञ्चचत्वारिंशो वादः॥

***

॥ अथ निष्प्रपञ्चीकरणनियोगभङ्गवादः षट्चत्वारिंशः ॥ ४६ ॥

श्लो. आविर्भावतिरोभावजन्मनाशविकल्पवत् ।
यस्यैतदक्षयं नित्यं जगत्, तं विष्णुमाश्रये ॥

ये पुनः सर्वशब्दानां कार्यपरत्वं वदतां मतमपि कटाक्षयन्तः, सिद्धरूपे ब्रह्मणि स्वतो निरतिशयपुरुषार्थरूपे ज्ञानजननमात्रेण प्रयोजनपर्यवसाने वेदान्तानां संभवत्यपि प्रत्यक्षाद्यबाधितनिरतिशय- पुरुषार्थरूपब्रह्मज्ञाने स्वतःप्रामाण्यमपि

अथ निष्प्रपञ्चीकरणनियोगभङ्गो नाम षट्चत्वारिंशो वादः ॥

आविर्भावतिरोभावजन्मनाशविकल्पवत् ।
यस्यैतदक्षयं नित्यं जगत् तं विष्णुमाश्रये ॥

आविर्भावतिरोभावजन्मनाशरूपविविधप्रकारयुक्तं स्वरूपतः अक्षयं नित्यं च जगत् यस्य शेषभूतं तं विष्णुमाश्रये । प्रपञ्चस्य स्वरूपतः नित्यत्वात् निष्प्रपञ्चताकरणासंभवात् निष्प्रपञ्चीकरणनियोगो न संभवतीति वादार्थोऽनेन सूचितः । यदि वाच्यत्वरूपं शक्तिविषयत्वं ब्रह्मणः स्यात् तदेव नियोगविषयत्वं स्यादित्युत्थानात् संगतिः

ये पुनरित्यादि । अद्वैत्येकदेशिनः अत्र पूर्वपक्षिणः । तेषामयमाशयः - सर्वशब्दानां कार्य एव प्रामाण्यात् वेदान्तानामपि नियोगाख्यकार्यपरत्वं वक्तव्यम् । नियोगो नाम कृतिसाध्यमपूर्वम् । पुरुषान् स्वस्मिन् नियुङ्क्त इति नियोग इति व्युत्पत्तेः । सिद्धे प्रामाण्येऽपि प्रयोजनपर्यवसानार्थं कार्यपरत्वं वाच्यम् । परमपुरुषार्थभूतब्रह्मप्रतिपादनेन सद्यः प्रीतिहेतुतया प्रयोजनपर्यवसानसंभवेऽपि तस्य प्रयोजनस्य काव्यनाटकादिवत् अतत्त्व प्रतिपादनेनाप्युपपत्तेः ब्रह्मणि प्रामाण्यं न स्यादिति ।

स च न युक्तः । सिद्धेऽपि प्रामाण्यस्थापनात् । ब्रह्मणश्च निरतिशयानन्दरूपतया तत्प्रतिपत्तेः स्वयंप्रयोजनत्वात् प्रामाण्यस्वतस्त्वस्थापनेन प्रामाण्यस्यापि तत्र सिद्धेरिति

विस्मरन्तः, तथाविधपरिनिष्पन्नब्रह्मस्वरूपशु(सि)द्ध्यर्थं तस्य निष्प्रपञ्चताकरणनियोगविषयतामाहुः– तेषां तथाविधनियोग(विधि) वाक्यासंभवात् सपरिकरनियोगासिद्धेश्च निर्मूलः प्रलापः। तथा हि–न तावत्, 'निष्प्रपञ्चं ब्रह्म कुर्यात्' इति विधिवाक्यमधीमहे। न च फल-करणदर्शनादिभिः कल्प्यते। न च स्मृत्याद्यनुसारेण तथाविधश्रुतिरनुमीयते। न च नित्यानुमेया श्रुतिरुपपद्यते। न च तदनुमितिलिङ्गतया निष्प्रपञ्चताकरणाचारः केनचित् क्वचिदपि दृष्टपूर्वः। न च

भावः। **तथाविधेति**। अविद्यासंसर्गात् अशुद्धस्य ब्रह्मणः शुद्ध्यर्थतया विधेः संस्कारकर्मत्वं निष्प्रपञ्चताकरणनियोगविषयकत्वं च वदन्ति।

न च भूतभाव्युपयोगाभावात् कथं ब्रह्मणः संस्कार्यत्वमिति वाच्यम्। प्रयोजनान्वयार्थं हि उपयोगापेक्षा। शुद्धं च ब्रह्म स्वयमेव प्रयोजनमिति न तत्र तदपेक्षेति भावः। **तस्येति** ब्रह्मण इत्यर्थः। नियोगविषयत्वं निष्प्रपञ्चीकरणद्वारा विवक्षितम्।

तन्मतं दूषयति - **तेषाभित्यादिना**। तेषां प्रलापः निष्प्रपञ्चकरणविषयकनियोगविधिवाक्यासंभवात् सपरिकरनियोगासिद्धेश्च निर्मूलः। तत्राद्यं हेतुमुपपादयति - **तथा हीत्यादिना**। ननु निष्प्रपञ्चं ब्रह्म कुर्यादिति विधिवाक्याभावेऽपि यथा ''तरति ब्रह्महत्यां योऽश्वमेधेन यजते'' इति अर्थवादवाक्ये फलस्य करणस्य च श्रवणात् विधिः कल्प्यते तथात्रापि कल्प्य इत्याशङ्क्य तथाविधार्थवादवाक्यविरहात् तत्कल्पनं न संभवतीत्याह - **न च फलेति**। स्मृतिरपि नास्ति यया तथाविधविधिः कल्प्येतेत्याह- **न च स्मृत्यादीति**। स्मर्तृभिरदृष्टा नित्यानुमेया श्रुतिरनुमीयत इत्यत्राह - **न च नित्येति**। न च आचारेण श्रुतिस्मृती अनुमेये इत्यत्राह - **न च तदनुमितीति**। निष्प्रपञ्चीकरणनियोगविध्यनुमितिलिङ्गतया निष्प्रपञ्चीकरणविषयकः आचारः केनापि न दृष्टपूर्वः, येन श्रुतिस्मृती अनुमीयेताम् इत्यर्थः। न च मद्वचनमेव तादृशविधौ प्रमाणमित्यत्राह - **न चेति**। भवदीयवचने विश्वासाभावादिति भावः।

श्रुत्या अर्थापत्या च निष्प्रपञ्चताकरणविधिः कल्प्यत इति शङ्कते - **ननु**

निष्प्रमाणकोऽपि विधिः, अस्तीति वाङ्मात्रेणापि सिध्यति ॥ ननु किमनेन कदर्थनेन(विकत्थनेन) ? नानात्वदर्शननिन्दावचनैः नानादर्शन(नानात्व)-निषेधवचनैः निर्गुणादिश्रुतिभिः, मायोपादानत्वान्यथानुपपत्त्यादिभि(तिभि)-श्चानुगृहीतः, 'न दृष्टेर्द्रष्टारं पश्येः' इत्येवमादिको विधिः उपलक्षणपरस्सन्, 'द्रष्टृदृश्यादिसमस्तभेदशून्यं दृशिमात्रं ब्रह्म कुर्यात्' इति नियुञ्जनः प्रकृतार्थे परिपूर्णं प्रमाणम्; नित्यसिद्धस्यापि ब्रह्मणो निष्प्रपञ्चतारूपेण साध्यत्वमप्यविरुद्धमिति चेन्न–

किमनेनेत्यादिना । कदर्थनेन = **पीडनेन** । "मृत्योः स मृत्युपाप्नोति य इह नानेव पश्यति" इत्यादिभिः नानात्वदर्शननिन्दावचनैः, "नेह नानास्ति किंचन" इत्यादिभिः नानात्वनिषेधवचनैः, "निर्गुणं निष्क्रियम्" इत्यादिभिः निर्गुणत्वप्रतिपादकश्रुतिभिः, मायोपादानत्वान्यथानुपपत्त्या च अनुगृहीतः "न दृष्टेर्द्रष्टारं पश्येः" इत्यादिविधिरेव निष्प्रपञ्चीकरणे प्रमाणम् । यद्यप्ययं विधिः द्रष्टारमेव निषेधति न सकलप्रपञ्चम् । तथापि तस्य विधेः उपलक्षणपरतया द्रष्टृदृश्यादिसकलभेदशून्यं दृशिमात्रं ब्रह्म कुर्यादिति नियोगे तात्पर्यमिति स एव विधिः न्प्रिपञ्चीकरणनियोगरूपे प्रकृतार्थे प्रमाणम् । नित्यसिद्धस्यापि ब्रह्मणः निष्प्रपञ्चतारूपेण साध्यत्वमप्यविरुद्धम् इति शङ्का । समाधत्ते-**अनुग्राहकत्वेनेति** । अनुग्राहकत्वेनाभिमतानां नानात्वदर्शननिन्दादीनां सर्वेषां प्रत्येकं वादान्तरेषु दूषितत्वात् तत्रेदानीमौदासीन्यं बिभृमः । यस्तु तैरनुगृहीतो "न दृष्टेर्द्रष्टारं पश्येः" इति विधिः प्रदर्शितः तत्स्वरूपमपि इदानीं विमृशामः । कोऽत्र विधौ ब्रह्मवाचकः शब्दः, कश्च तस्य ब्रह्मणः निष्प्रपञ्चताकरणवाचकः शब्दः ।" न दृष्टेः द्रष्टारं पश्येः न मतेर्मन्तारं मन्वीथाः, न श्रुतेः श्रोतारं शृणुयाः" इति विधिवाक्ये विद्यमानाः दृष्टिमतिश्रुत्यादिशब्दाः ज्ञानस्वरूप-ब्रह्मवाचकाः, द्रष्टृमन्तृप्रभृतिदर्शननिषेधः निष्प्रपञ्चताकरणवाचकः इति चेत् - किं मुख्यवृत्त्या सिद्धोऽयमर्थः उत वाक्यार्थानुपपत्त्या लक्षणादिवशात् सिद्धः किं वा भवत्सैद्धान्तिकसंकेतवशात् इति विकल्पः ।

(चेत्–तन्न) अनुग्राहकत्वेनाभिमतानां सर्वेषां प्रत्येकं विस्तरतो दूषणात्।

विधिस्वरूपमपि पश्यामः (विमृशामः ?)–कोऽत्र ब्रह्मवाचकश्शब्दः, कश्च तस्य निष्प्रपञ्चताकरणवाचीति ॥ दृष्टिमतिश्रुत्यादयः शब्दाः संविद्रूपब्रह्मवाचकाः, द्रष्टृमन्तृप्रभृतिदर्शननिषेधो निष्प्रपञ्चताकरणवाचीति चेत्–किं व्युत्पत्तिसिद्धोऽय(मेषा)मर्थः, उत तदनुपपत्त्या लक्षणादिवशादङ्गीक्रियते, किं वा भवत्सैद्धान्तिकसङ्केतादिति ? न प्रथमः; दृष्टिमतिश्रुत्यादिशब्दानां तावत् ब्रह्मशब्दपर्यायत्वाभावात्। तत्तत्करणायत्तबुद्धिविशेषा एव हि तैरभिधीयन्ते। अन्यथा पुनरुक्तिः स्यात् । द्रष्टृप्रभृतिदर्शननिषेधोऽपि तत्तज्ज्ञानवृत्तिमेव वदति, न तु

तत्र प्रथमं कल्पं दूषयति - **न प्रथम इति** । दृष्टिमतिश्रुत्यादिशब्दानां ब्रह्मशब्दपर्यायत्वाभावेन ब्रह्मवाचकत्वाभावात् । कुत इत्यत्राह - **तत्तत्करणेति** । दृष्टिशब्दो हि चक्षुःकरणकज्ञानपरः, मतिशब्दः मनःकरणकज्ञानवाचकः श्रुतिशब्दः श्रोत्रकरणकज्ञानवाचकः । **अन्यथेति** । तेषां ज्ञानसामान्यवाचकत्वे पुनरुक्तिः स्यात् । **द्रष्टृप्रभृतीति**। ''न दृष्टेर्द्रष्टारं पश्येः'' इत्यादिना यः द्रष्ट्रादिविषयकदर्शननिषेधः सोऽपि न द्रष्टादिनिवृत्तिं प्रतिपादयति, अपि तु द्रष्ट्रादिविषयकज्ञाननिवृत्तिं प्रतिपादयति । **तत्तन्निवृत्तिमित्यस्य** द्रष्ट्राद्युपलक्षितप्रपञ्चनिवृत्तिमित्यर्थः । **लक्षणादिवशादिति** द्वितीयकल्पं दूषयति - **नापि द्वितीय** इति । लक्षणाबीजभूतायाः वाक्यार्थानुपपत्तेरभावादित्यर्थः । **उचितेति** । उचितस्यार्थान्तरस्यादर्शनमेवानुपपत्तिः, तद्बलात् लक्षणा स्वीक्रियते । ज्ञानस्याविधेयत्वेन तन्निषेधस्य विध्यनर्हत्वादिति न वाच्यम् । तथापि अनुचितस्यार्थस्यकल्पनायोगात् । प्रत्युत उचितमर्थान्तरं दृश्यत इत्याह - **तथाहीत्यादिना** । न दृष्टेर्द्रष्टारं पश्येः इत्यादिवाक्यस्यायमर्थः । अतिरिक्तमिति पदम् अध्याह्रियते चेत् द्रष्टारं जीवं दृष्टेरतिरिक्तं न पश्येः इत्यर्थः संपद्यते । तेन स्वयंप्रकाशतयां ज्ञानस्वरूपस्य जीवस्य ज्ञानत्वेन

तत्तन्निवृत्तिम् । नापि द्वितीयः । अनुपपत्तेरदर्शनात् । उचितार्थान्तरादर्शनमेवानुपपत्तिरिति चेन्न; तथाप्यनुचितार्थान्तरकल्पनायोगात्। दृश्यते चार्थान्तरमुचितम्। तथा हि– यदा दृष्टेरतिरिक्तं द्रष्टारं न पश्येरित्यतिरिक्तपदाध्याहारेण योजना, तदा द्रष्टुः पुरुषस्यापि स्वयंज्योतिषः स्वधर्मभूत-दृष्टिमत्यादिशब्दाभिलप्य-ज्ञानसाजात्येन तदतिरिक्तत्वनिषेधोपपत्तेः न कस्यचिदपि मिथ्यात्वसिद्धिः। अनध्याहारे तु दृष्टेर्द्रष्टेति जीवात्मा निर्दिश्यते। ओदनपाकं पचतीतिवत् कर्तृत्वमात्र-विवक्षया द्रष्ट्रादिशब्दः। ततश्च तत्तत्करणायत्तज्ञानकर्तारं जीवात्मानं नोपासीथाः; अपितु तदन्तर्यामिणं करणनिरपेक्षस्वाभाविकनिरतिशय-ज्ञानादिगुणगणम् अशेषदोषवैदेशिकं परमात्मानमुपास्स्वेत्युक्तं भवति । न च जीवस्यापि विशेषणतया उपास्यत्वाभ्युपगमात् तद्दर्शननिषेधानुपपत्तिरिति वाच्यम्; करण(प्र)-

---

दृष्टिमत्यादिशब्दवाच्यदर्शनमननादिरूपज्ञानसजातीयत्वात् । द्रष्टारं मन्तारं च जीवात्मानं दर्शनादिज्ञानसजातीयान्यं न पश्येः इत्यर्थः । तेन जीवात्मनः ज्ञानसजातीयातिरिक्तत्वं निषिद्धं भवति । न तावता द्रष्ट्रादिप्रपञ्चस्य मिथ्यात्वं सिध्यति । यदि तु अतिरिक्तमिति पदं नाध्याह्रियते, तदा दृष्टेर्द्रष्टा इत्यस्य द्रष्टा जीवात्मा इत्यर्थः । यथा ओदनपाकं पचतीत्यतः ओदनं पचतीत्येव बोधः । धात्वर्थपाकवाचकपदस्य पाकमित्यस्य पृथक्श्रवणात् प्रत्ययार्थकर्तृमात्रविवक्षेति निर्वहन्ति । तथा दृष्टेर्द्रष्टा इत्यत्र दृशधात्वर्थदृष्टेः पृथक्प्रयोगात् तृजर्थकर्तृमात्रविवक्षया पदद्वयेनापि दृष्टिकर्तैव बोध्यते । ततश्च **दृष्टेर्द्रष्टारं** मतेर्मन्तारं इत्यादिवाक्यस्य चक्षुरादिकरणायत्तदर्शनादिकर्तारं जीवात्मानं **न पश्येः** नोपासीथाः, अपि तु तदन्तर्यामिणं करणनिरपेक्षस्वाभाविकनिरतिशय-ज्ञानादिगुणगणं निर्दोषं परमात्मानमुपासीथाः इति वाक्यार्थो भवति । न तावता जीवमिथ्यात्वं सिध्यतीति भावः ।

शङ्कते - **न च जीवस्यापीति** । सिद्धान्ते जीवस्यापि परमात्मविशेषणतया उपास्यत्वस्य स्वीकारात् जीवात्मानं नोपासीया:इत्यर्थवर्णनं न युक्तमिति भावः। समाधत्ते- **करणेति** । चक्षुरादिकरणप्रवृत्तिरहितं स्वाभाविकविकासशालिबुद्धियुक्तं यत् परिशुद्धं जीवात्मस्वरूपं तद्विशिष्टस्य परमात्मनः उपास्यत्वात् करणायत्तज्ञानविशिष्टसांसारिकजीस्वरूपस्य परमात्मविशेषणतया उपास्यत्वाभावात् सांसारिकस्वरूपविशिटं

वृत्तिलङ्घिस्वाभाविकविकासशालिपरिशुद्धस्वरूपजीवविशिष्टस्य परमात्मन उपास्यत्वात्। एवमर्थान्तराण्यपि कर्तृत्वाभिमानत्यागादिरूपाणि प्रत्यक्षाद्यविरुद्धानि समुचितानि कल्पयितुं शक्यानि । अतो नानुपपत्तिलेशः । नापि तृतीयः; अतिप्रसङ्गात्। परसिद्धान्तसिद्ध(न्तरसिक)सङ्केतवशादपि भवत्पक्षस्य कार्त्स्न्येन भङ्गप्रसङ्गात्। एवं विधिवाक्यासंभवो दर्शितः।

अथ सपरिकरनियोगासिद्धिं ब्रूमः। तथा हि–नियोगवाक्यार्थवादिना नियोगः, नियोज्यः, तद्विशेषणं विषयः करणमितिकर्तव्यता प्रयोक्ता च वक्तव्याः। तत्रासौ नियोगस्तावत् सामान्यतो विशेषतोऽपि प्रमाणादर्शनादेव निरस्तः॥

कश्चात्र नियोज्यः ? न तावत् ब्रह्म; त्वन्मते तस्याज्ञत्वात् अनियोज्यत्वात्।

जीवात्मानं नोपास्स्वेति तात्पर्यात् न कोऽपि दोष इति भावः। न दृष्टेर्द्रष्टारं पश्येः इत्यादिवाक्यस्य अन्योऽप्यर्थो वक्तुं शक्य इत्याह - **एवमिति**। दर्शनादिषु स्वतन्त्रकर्तृत्वाभिमाःनयुक्तं जीवं नोपासीथा इत्यर्थः। आदिशब्देन द्रष्टारं न पश्येः इति परमात्मनि करणायत्तज्ञाननिषेधः परमात्मानं करणायत्तज्ञानवन्तं न पश्येः इत्याद्यर्थः गृह्यते।

भवत्सैद्धान्तिकसंकेतादिति तृतीयकल्पं दूषयति-**नापि तृतीय** इति। अतिप्रसङ्गमेवोपपादयति - **परसिद्धान्तेति**। वृत्तं वर्तिष्यमाणं चाह - **एवमिति**। **तथा हीत्यादि**। **नियोगः**= अपूर्वम्। **नियोज्यविशेषणम्** - ममेदं कार्यमिति यो बुध्यते स नियोज्यः प्रेर्यः तस्य विशेषणम् निमित्तं फलकामना च। **विषयः** नियोगं विशिंषन् यागादिः, कृतिसाध्यापूर्वप्रतिपंत्तिवेलायां कृत्यवच्छेदकत्वेन स विषयः। करणं यागादिरेव। इतिकर्तव्यता करणोपकारकम्। प्रयोक्ता अनुष्ठाता। स्वर्गकामनियोज्यकं सेविकर्तव्यताक यागकरणकयागविषयककृतिसाध्यमपूर्वमिति स्वर्गकामो यजेतेति वाक्यार्थ इति वर्णयन्ति प्राभाकराः। **तत्रासाविति**। अपूर्वाख्यो नियोगः "फलमत उपपत्तेः" इति सामान्यतः निरस्तः। "निष्प्रपञ्चं ब्रह्म कुर्यात्" इति वाक्यं नाधीमहे इति पूर्वमुक्तत्वात् अयं नियोगो विशिष्यापि निरस्त इत्यर्थः। **अत्र** निष्प्रपञ्चं ब्रह्म कुर्यात् इति विधौ नियोज्यः कः। न तावत् ब्रह्म। त्वन्मते तस्याज्ञत्वेन अप्रेर्यत्वात्। ज्ञातैव हि प्रेर्यः। अस्मन्मते ब्रह्मणः

अस्मन्मते तु सर्वज्ञत्वादेव नियोक्तव्यत्वाभावात् । अत एव नाप्यविद्या । नाप्यहङ्कारादिकम्, तत्प्रतिफलितचैतन्यादिकं वा, तेषामपि विमृश्यकारिणां स्वोच्छेदकरणे नियोक्तुमशक्यत्वात्। अविमृश्यकरणे तु न शास्त्रयोग्यता। न च निर्विशेषानुभूतिस्थितये निरूपकः बालो(परीक्षको भ्रान्तो) वा कश्चित् स्वोच्छेदमनुमन्यते। अत एव तेषामधिकारित्वप्रयोक्तृत्वाद्यवस्थान्तरमपि भग्नम्। न च शास्त्रं वायूदकादिवत् मुमुक्षा(विवक्षा)मनुत्पाद्यैव प्रवर्तयति, अशास्त्रत्वप्रसङ्गात्। ततोऽपि नियोगस्य मूलोच्छेदः ॥

किं वाऽत्र (तावत्) नियोज्यविशेषणम् ? ब्रह्मस्वरूपयाथात्म्यानुभव इति चेत्; तत् किं निमित्ततया स्थित्वा नियोज्यं विशिनष्टि, उत फलतया ? नाऽऽद्यः; जीवनपुत्रजन्मादिवत् तस्यासिद्धत्वात्, सिद्धत्वे वा किं नियोगेन, तत एव

सर्वज्ञत्वेन अनियोज्यत्वात् । **अत एवेति** । अज्ञत्वादेव अविद्या न नियोज्येत्यर्थः । **नाप्यहंकारादिकमिति** । अहंकारादिकमपि न नियोज्यं विमृश्यकारिणां तेषामपि स्वनाशकरणे नियोक्तुमशक्यत्वात् । अविमृश्यकारिणां तु शास्त्रयोग्यता नास्तीति न ते नियोज्याः । अपि च निर्विशेषानुभूतिस्थित्यर्थं स्वनाशं कोऽपि नानुमन्येत । **विवक्षाम्**=ज्ञानम् । **किं तावदित्यादि** । नियोज्यविशेषणं स्वर्गादिफलं जीवनादिनिमित्तं च । अत्र नियोज्यविशेषणं ब्रह्मस्वरूपयाथात्म्यानुभव इति वक्तुं न शक्यते । स हि निमित्ततया नियोज्यविशेषणं वा फलतया वा । नाद्यः, पूर्वसिद्धं जीवनादिकं हि निमित्तं भवति । ब्रह्मयाथात्म्यानुभवस्तु पूर्वमसिद्धः कथं निमित्ततया विशेषणं भवेत् इत्यर्थः । **जीवनपुत्रजन्मादीति** । जीवने निमित्ते सति ''यावज्जीवं दर्शपूर्णमासाभ्यां यजेत'' इति यागः विधीयते । पुत्रजन्मनि निमित्ते सति पुत्रकामेष्टिः निधीयते । **सिद्धत्वे वेति** । ब्रह्मयाथात्म्यानुभवस्य पूर्वं सिद्धत्वे नियोगस्य नोपयोगः । ब्रह्मयाथात्म्यानुभवादेव तत्फलस्य मोक्षस्य सिद्धेरित्यर्थः ।

तत्फलसिद्धेः ॥ अथ श्रवणजन्यः परोक्षानुभवस्सिद्धस्सन् विशेषणमिति चेन्न; श्रवणेन तथाविधानुभवजननस्यैव निष्प्रपञ्ची(ञ्चता) करणरूपत्वात् । न हि ततोऽतिरिक्तं किंचिदत्र पुरुषव्यापारविषयं पश्यामः ॥ साक्षात्कारज्ञानं तद्विषय इति चेन्न; साक्षात्कारस्य नियोगसाध्यत्वाभ्युपगमात् ततः पूर्वं तदसिद्धेः । तत्सिद्धौ वा किं नियोगेनेत्युक्तम् । अथ यदि नित्यब्रह्मस्वरूपप्रकाश एव निमित्तमित्युच्येत, न तर्हिं(हि)तत् कस्यचिद्विशेषणम्, अनन्यनिष्ठत्वात् । तस्य च निमितत्वे तन्नित्यत्वेन जीवननिमिताग्निहोत्रवन्नित्यं विषयानुष्ठानप्रसङ्गः । नापि द्वितीयः; तथापि हि (स?) याथात्म्यानुभवः शब्दजन्यो वा, अक्षजन्यो वा, स्वरूपभूतानुभव

अथेति । श्रवणजन्यः ब्रह्मयाथात्म्यविषयकपरोक्षानुभवः पूर्वं सिद्धः सन् निमित्ततया नियोज्यविशेषणम् । तथा चापरोक्षानुभवेनैवाविद्यानिवृत्तेर्न नियोगस्य नैष्फल्यम् इति भावः। समाधत्ते - **श्रवणेनेति** । श्रवणेन परोक्षानुभवजननस्यैव निष्प्रपञ्चीकरणरूपत्वात् तस्य च विषयत्वात् नियोज्यविशेषणत्वं न संभवति । विषयात् अन्यस्यैव नियोज्यविशेषणत्वादिति भावः । ननु ब्रह्मयाथात्म्यनिषयकपरोक्षानुभवः निमित्तविधया नियोज्यविशेषणम् । तद्विषयकसाक्षात्कारः नियोगस्य विषय इति शङ्कते - **साक्षात्कारेति** । परिहरति - **साक्षात्कारस्येति** । भवद्भिः साक्षात्कारस्य नियोगसाध्यत्वाङ्गीकारात् तत्पूर्वमसतस्तस्य नियोगविषयत्वासंभवात् । नियोगात् पूर्वं तस्य सत्त्वे च किं नियोगेनेति उक्तत्वादिति भावः

शङ्कते-**अथेति** । नित्यो यो ब्रह्मस्वरूपप्रकाशः स एव निमित्ततया नियोज्यविशेषणम् । तस्य पूर्वसिद्धत्वात् इति शङ्का । परिहरति - **न तर्हीति** । नित्यब्रह्मप्रकाशस्य अनन्याधारत्वात् नियोज्यनिष्ठत्वं नास्तीति न तन्नियोज्यविशेषणमिति भावः । किं च नित्यब्रह्मस्वरूपप्रकाशस्य निमित्तत्वे तस्य नित्यत्वेन नित्यं विषयानुष्ठानप्रसङ्गः । जीवनं यावत् यागानुष्ठानवत् इत्यर्थः ।

ब्रह्मयाथात्म्यानुभवः फलतया नियोज्यविशेषणमिति द्वितीयविकल्पं दूषयति - **नापि द्वितीय** इत्यादिना । किं शब्दजन्यब्रह्मयाथात्म्यानुभवः फलतया निशेषणम्, अथवा **अक्षजन्यः**=इन्द्रियजन्यः उत स्वरूपभूतानुभवः । **आद्ये इति** । शब्दजन्य

एव वा ? आद्ये नियोगात्पूर्वं(र्व)सिद्धस्य कथं नियोगफलत्वम् ? द्वितीये(ऽपि) तु असंभवः, न हि निष्प्रपञ्चतायां असिद्धायामक्षाणि तज्जन्यं वा ज्ञानं संभवति। संभवे वा कथं निष्प्रपञ्चता ? तृतीये तु कथं नित्यसिद्धस्य फलत्वम् ? स यदि साध्यः, तदा स्वर्गादिवदनित्यः स्यात्। प्रपञ्चनिवृत्तिरूपेण साध्यत्वमिति चेत्; न तर्ह्य(न ह्य)न्यरूपेणान्यस्साध्यस्स्यात्। अतः प्रपञ्चनिवृत्तिरेव साध्येत्युक्तं भवति। ततश्च हेतुसाध्ययोरैक्यप्रसङ्गः॥

कश्चात्र नियोगविषयः ? किं ब्रह्मैव, उत निष्प्रपञ्च(ञ्चं)ब्रह्म, अथ प्रपञ्चनिवृत्तिरेव ? न प्रथमः; तस्य नित्यत्वेनाभाव्यत्वात्, अभावार्थत्वाच्च। अत

याथात्म्यानुभवस्य नियोगात् पूर्वं सिद्धस्य कथं फलत्वं स्यात् इत्यर्थः। **द्वितीये त्विति।** ब्रह्मानुभवस्य इन्द्रियाजन्यत्वात् अक्षजन्यः याथात्म्यानुभवः न संभवति इति भावः। यद्वा निष्प्रपञ्चीकरणानन्तरं अक्ष्णां वा तज्जन्यज्ञानस्य वा असंभवात् कथमक्षजन्यानुभवः फलं भवेत् इत्यर्थः। संभवे वा कथं निष्प्रपञ्चता। अक्ष्णां तज्जन्यज्ञानस्य च प्रपञ्चान्तर्गतत्वात्। **तृतीये त्विति।** ब्रह्मस्वरूपभूतानुभवः फलतया नियोज्यविशेषणमिति तृतीयपक्षो न युक्तः। स्वरूपभूतानुभवस्य नित्यसिद्धस्य फलत्वासंभवात्। यदि तु स साध्यः तदा स्वर्गादिवत् नश्वरः स्यात् इत्यर्थः। ननु नित्यसिद्धस्यापि स्वरूपानुभवस्य प्रपञ्चनिवृत्तिरूपेण नियोगसाध्यत्वं निवृत्तेश्चानन्तत्वान्नानित्यत्वमित्याशङ्क्य अन्यरूपेण अन्यस्य साध्यत्वासंभवात् प्रपञ्चनिवृत्तिरेव साध्येति वक्तव्यम्। तथा च निष्प्रपञ्चीकरणेन निष्प्रपञ्चीकरणमेव साध्यमिति हेतुसाध्ययोरैक्यप्रसङ्ग इति समाधत्ते-**प्रपञ्चनिवृत्तिरूपेणेत्यादिना।**

अथ विकल्पपूर्वकं नियोगविषयं दूषयति - **कश्चात्रेति।** ब्रह्म, निष्प्रपञ्चब्रह्म, प्रपञ्चनिवृत्तिर्वा विषय इति त्रेधा विकल्पः। **न प्रथम** इति। साध्यः सन् धात्वर्थो यो भवति स एव नियोगस्य विषयः। ब्रह्मणस्तु साध्यत्वं धात्वर्थत्वं च नास्तीति विषयत्वं न भवतीत्यर्थः। **अभाव्यत्वात्** = असाध्यत्वात्। **अभावार्थत्वात्**=धात्वर्थत्वाभावात्।

एव न द्वितीयः; न हि निष्प्रपञ्चमपि ब्रह्म भावार्थः ॥ तथापि तस्य साध्यत्वं संभवतीति चेत्; किं ततः ? न हि स्वर्गादिकं साध्यमित्येतावता विधिविषयों(ऽपि) भवति । अतोऽत्रापि केवलं फलत्वमात्रं संभाव्येत । तत्र च प्राप्ताप्राप्तविवेकेन विशेषणस्यैव साध्यत्वमिति कथं ब्रह्मस्वरूपस्य विधिविषयत्वम् ? अत एव न तृतीयः; तस्याः फलत्वाच्च । न हि प्रपञ्चनिवृत्त्यतिरिक्तो मोक्षो नाम भवन्मते । किमर्थं च तया नियोगः साध्यते ? न हि नियोगसाध्यं तदतिरिक्तं किंचित् । कथं

क्रियारूपत्वाभावादिति यावत् । **न द्वितीय** इति । निष्प्रपञ्चं ब्रह्म **अत एव**=असाध्यत्वात् अभावार्थत्वाच्च न विषय इत्यर्थः । **तथापि तस्येति** । निष्प्रपञ्चस्य ब्रह्मणः भावार्थत्वाभावेऽपि साध्यत्वं विशिष्टवेषेण संभवतीति नाशङ्कनीयम् । साध्यस्य स्वर्गादिवत् विषयत्वासंभवात् । साध्यत्वे सति धात्वर्थक्रियाया एव नियोगविषयत्वादिति भावः । **अतोऽत्रापीति** । निष्प्रपञ्चं ब्रह्म विषय इत्युक्तावपि साध्यत्वविशिष्टभावार्थत्वरूप विषयत्वघटकं साध्यत्वमात्रं संभाव्येत । तदपि विशेष्यस्य ब्रह्मणः साध्यत्वाभावात् विशेषणस्य निष्प्रपञ्चत्वस्यैव प्राप्ताप्राप्तविवेकेन साध्यत्वमिति कथं ब्रह्मस्वरूपस्य विषयत्वमिति भावः । प्रपञ्चनिवृत्तिरेव विषय इति तृतीयकल्पं दूषयति - **अत एवेति** । असाध्यत्वादेवेत्यर्थः । पारमार्थिकतया तस्याः ब्रह्मस्वरूपत्वादिति भावः । **तस्याः फलत्वाच्चेति** । प्रपञ्चनिवृत्तेः नियोगफलत्वात् न नियोगविषयत्वम् । फलव्यतिरिक्तस्यैव विषयत्वादिति भावः । प्रपञ्चनिवृत्तेः फलत्वमुपपादयति - **न हीति** । दूषणान्तरमाह - १ **किमर्थं चेति** । यथा विषयेण यागेन साध्यः नियोगः (अपूर्वं) स्वर्गार्थो भवति तथा प्रपञ्चनिवृत्तिरूपेण विषयेण साध्यः नियोगः किंफलकः? प्रपञ्चनिवृत्त्यतिरिक्तस्य फलस्याभावात् प्रपञ्चनिवृत्तिफलक इति वक्तव्यम् । तथा सत्यन्योन्याश्रयः, नियोगात् प्रपञ्चनिवृत्तिः, प्रपञ्चनिवृत्त्या नियोग इतीति भावः । प्रपञ्चनिवृत्तेः नियोगविषयत्वे दूषणान्तरमाह - **कथं चेति** । नियोगस्य विषयसाध्यत्वेन प्रपञ्चनिवृत्त्या नियोगः साध्यः।

च सर्वप्रपञ्चनिवृत्तौ नियोगस्वरूपलाभः ? तस्याश्च नियोगविषयत्वे, तया नियोगः, तेन च सेति परस्पराश्रयणं च। उक्तन्यायेन प्रपञ्चनिवृत्तेः करणत्वमपि निरस्तम्; विषयकरणयोरतीव भेदाभावात्। स चायं नियोगः किं स्वयमेव प्रपञ्चं निवर्तयति, उत तत्त्वज्ञानमुत्पाद्य ? पूर्वत्र किं मिथ्याभूतस्य प्रपञ्चस्य ज्ञानबाध्यत्वं परित्यज्य नियोगबाध्यत्वमङ्गीकरोषि ? तथा सति प्रायश्चित्तनिवर्त्यदुरितवत् सत्यता प्रपञ्चस्य। अन्यथा तत्त्वज्ञानेनैव बाध्यत्वे नियोगकृत्यं न पश्यामः । उत्तरत्रापि

नियोगस्यापि प्रपञ्चान्तर्गतत्वात् तन्निवृत्तौ नियोगस्वरूपलाभः कथं भवेत् । **तस्याश्चेति** । किं च प्रपञ्चनिवृत्तेः नियोगविषयत्वे नियोगस्य विषयसाध्यत्वेन प्रपञ्चनिवृत्त्यतिरिक्तफलाभावात् तस्या नियोगसाध्यत्वेन चान्योन्याश्रयः प्रपञ्चनिवृत्त्या नियोगः नियोगेन प्रपञ्चनिवृत्तिरिति । **तस्याः** = प्रपञ्चनिवृत्तेः । **तया**=प्रपञ्चनिवृत्त्या । **सा**=प्रपञ्चनिवृत्तिः । **उक्तन्यायेन** = प्रपञ्चनिवृत्तेः विषयत्वाभावसाधकेन पूर्वोक्तन्यायकलापेन । विषयकरणयोरत्यन्तभेदाभावात् । नियोगाख्यं यत् कार्यं कृतिसाध्यं तन्निरूपककृतेः सविषयकतया विषयनिरूप्यत्वात् कृत्यवच्छेदद्वारा कार्यतावच्छेदकत्वं विषयत्वम् । नियोगकरणत्वं तु नियोगोद्देशेन प्रवृत्तपुरुषकृतिव्याप्यत्वमिति भेदः । एतदुभयं यागादिनिष्ठम् ।

प्रपञ्चनिवृत्तेः नियोगसाध्यत्वे दोषान्तरमाह - **स चायमित्यादिना** । स चायं नियोगः किं स्वयमेव तत्त्वज्ञानमद्वारीकृत्य प्रपञ्चं निवर्तयति उत तत्त्वज्ञानमुत्पाद्य तद्वारा । पूर्वत्र किं तत्त्वज्ञानमनिवर्तकं नियोग एव निवर्तक इत्यभिमतम् किं वा नियोगतत्त्वज्ञानाभ्यां बाध्यत इति विकल्पं हृदिनिधाय तत्राद्यमनूद्य दूषयति - **पूर्वत्रेति** । मिथ्याभूतस्य प्रपञ्चस्य ज्ञाननिवर्त्यत्वं परित्यज्य नियोगमात्रनिवर्त्यत्वाङ्गीकारे प्रायश्चित्तनिवर्त्यदुरितस्येव प्रपञ्चस्य सत्यत्वं स्यात् ।

द्वितीयं दूषयति - **अन्यथेति** । केवलनियोगस्यानिवर्तकत्वे नियोगतत्त्वज्ञानाभ्यां प्रपञ्चो बाध्यत इति पक्षे तत्त्वज्ञानेनैव प्रपञ्चनिवृत्तिसंभवात् नियोगकृत्यं किमपि नास्तीति तस्य नियोगस्य वैयर्थ्यभिति भावः ।

आकाङ्क्षादित्रयवता वाक्येनैव तत्त्वज्ञानं जायत इति किं नियोगात् ? (नियोगेन) तेनैव च तत्त्वज्ञानेन ब्रह्मव्यतिरिक्तसमस्तबाधात् कथं सपरिकरनियोगोत्पत्तिश्च ॥ परोक्षापरोक्षनिवर्तकज्ञानयोरविशेषोपपादनादिकमन्यत्र ग्राह्यम् । किंच प्रपञ्चनिवर्तकोऽयं नियोगो न तावत् ब्रह्मस्वरूपम्, निवर्तकस्य (तस्य) नित्यतया नित्यं प्रपञ्चाभावप्रसङ्गात्; नित्यस्य विषयानुष्ठानसाध्यत्वायोगाच्च । अतो ब्रह्मस्वरूपव्यतिरिक्त एष्टव्यः । स च कृत्स्नप्रपञ्चनिवृत्तिरूपविषयानुष्ठानेन

नियोगः तत्त्वज्ञानमुत्पाद्य प्रपञ्चं निवर्तयतीति पक्षं दूषयति - **उत्तरत्रेति** । यद्यप्यत्र कल्पे तत्त्वज्ञानोत्पादनाख्यं नियोगकृत्यं वक्तुं शक्यम् । तथापि आकाङ्क्षादित्रयवता वाक्येनैव तत्त्वज्ञानं जायत इति नियोगस्य नोपयोग इति भावः । **आकाङ्क्षादित्रयं =** आकाङ्क्षा योग्यता तात्पर्यं च । किं च प्रथमं वाक्योत्पन्नतत्वज्ञानेनैव ब्रह्मव्यतिरिक्तस्य समस्तस्य बाधात् कथं सपरिकरनियोगोत्पत्तिश्चेत्याह - **तेनैव चेति** । ननु प्राथमिकं ज्ञानं परोक्षम्, न तेन प्रपञ्चनिवृत्तिः । किं तु नियोगसाध्यापरोक्षज्ञानादेवेत्यत्राह - **परोक्षेति** । परोक्षं च अपरोक्षनिवर्तकज्ञानं चेति द्वन्द्वः । परोक्षं यत् ब्रह्मज्ञानं निवर्तकत्वेनाभिमतमपरोक्षं च यत् ब्रह्मज्ञानं तयोः स्वरूपप्रकाशातिरिक्तविषयकत्वाभावात् परोक्षज्ञानेनैव प्रपञ्चनिवृत्तिः संभवतीति भावः ।

नियोगवाक्यार्थे दोषान्तरमाह - **किं चेत्यादिना** । प्रपञ्चनिवर्तकोऽयं नियोगः न तावत् ब्रह्मस्वरूपम् । ब्रह्मस्वरूपस्य नित्यतया सर्वदा प्रपञ्चाभावप्रसङ्गात् । नित्यस्य विषयानुष्ठानसाध्यत्वासंभवाच्च । नियोगो हि विषयानुष्ठानसाध्यः । अतो नियोगो ब्रह्मस्वरूपातिरिक्त इत्यङ्गीकार्यम् । कृत्स्वप्रपञ्चनिवृत्तिरूपविषयानुष्ठानेन प्रपञ्चान्तर्गतानुष्ठातुरपि नष्टत्वात् नियोगः निराश्रयः कथं उत्पद्येत । आश्रयस्य स्थितौ च कथं कृत्स्नप्रपञ्चनिवृत्तिरूपविषयलाभः । निराश्रय एव नियोग उत्पद्यत इति स्वीकारेऽपि नियोगाख्यमिथ्यापदार्थस्य स्थितौ कथं कृत्स्नप्रपञ्चनिवृत्तिः । नियोगस्य सिद्धावपि किमन्यत् नियोगसाध्यं मोक्षरूपं फलं भवति - इति समुदायार्थः ।

प्रयोक्तुरपि नष्टत्वान्निराश्रयः कथमुत्पद्येत ? आश्रयस्थितौ वा कथं विषयलाभः ? निराश्रयोत्पत्तावपि नियोगाख्यमिथ्यापदार्थस्थितौ कथं कृत्स्नप्रपञ्चनिवृत्तिः (सिद्धिः)? सिद्धावपि किमन्यन्नियोगसाध्यं मोक्षाख्यं फलमिति ।

किंच करणभूतायाः प्रपञ्चनिवत्तेः का नामेतिकर्तव्यता ? न काचिदिति चेन्न; अनुपकृतस्य करणत्वायोगात् । यथाहुः, 'न हि तत् करणं लोके वेदे वा किंचिदीदृशम् । इतिकर्तव्यतासाध्ये यस्य नानुग्रहेऽर्थिता ।।' इति । अस्तु वा काचिद्भावरूपेति चेन्न; सा हि सन्निपत्योपकारिका वा स्यात्, आरादुपकारिका वा ? नाद्यः, कृत्स्नप्रपञ्चनिवृत्तिरूपकरणशरीरनिवर्तकस्य कस्यचिददर्शनात् ।। अद्वैतज्ञानं दृश्यत इति चेन्न; तेनैव प्रपञ्चनिवृत्तिरूपमोक्षसिद्धौ करणादिनिष्पाद्या-

---

किं चेत्यादि । नियोगस्य करणभूतायाः प्रपञ्चनिवृत्तेः का इति कर्तव्यता (करणोपकारकं किम्) न काचिदिति चेत् इतिकर्तव्यतया अनुपकृतस्य कथं करणत्वम् । उद्यमननिपातनादीतिकर्तव्यतोपकृतस्य हि परश्वादेः छिदादिकरणत्वं भवति । उक्तं हि भट्टपादैः -

न हि तत् करणं लोके वेदे वा किंचिदीदृशम् ।
इतिकर्तव्यतासाध्ये यस्य नानुग्रहेऽर्थिता ।।

यस्य इतिकर्तव्यतासाध्योपकारापेक्षा नास्ति तस्य करणत्वं लोके वेदे वा न दृश्यत इति तदर्थः ।

अस्तु वेत्यादि । करणभूतायाः प्रपञ्चनिवृत्तेः भावरूपा काचित् इतिकर्तव्यता अस्तु इति चेत् - सा किं संनिपत्योपकारिका=करणशरीरनिष्पादिका आरादुपकारिका=करणानुग्राहिका अदृष्टरूपकरणानुग्रहजनिका वा ।नाद्यः, कृत्स्नप्रपञ्चनिवृत्तिरूपकरणनिष्पादकस्य कस्यचिददर्शनात् । न चाद्वैतज्ञानमेव करणशरीरनिष्पादकमिति वाच्यम् । तेन अद्वैतज्ञानेनैव प्रपञ्चनिवृत्तिरूपमोक्षसिद्धौ निष्पाद्यस्य करणादेरसिद्धेः । नाप्यारादुपकारिका । तया करणानुग्रहोत्पादने कृत्स्नप्रपञ्चनिवृत्तिरूपकरणस्वरूपस्यासिद्धेः । तत्सिद्धौ च

सिद्धिप्रसङ्गात्। नापि द्वितीयः, कृत्स्नपपञ्चनिवृत्तिरूपकरणस्वरूपासिद्धेः, तत्सिद्धौ तदनुग्राहकांशानवस्थानमित्युभयतस्स्पाशा रज्जुः ॥ अथाभावरूपानुग्राहकस्थितौ न विरोध इति मन्यसे; तन्न; तस्य कृत्स्नप्रपञ्चनिवृत्त्यन्तर्गतत्वेन करणेतिकर्तव्यताभेदासिद्धेः। तदेतदभिप्रेत्याह, 'अभावरूपत्वे चाभावादेव न करणशरीरं निष्पादयति, नाप्यनुग्राहकम्' इति। अभावात्—कृत्स्नप्रपञ्चनिवृत्त्यन्तर्गतत्वेन करणात्पृथगभावाभावादित्यर्थः। केचितु अस्य भाष्यस्यैवमर्थमाहुः, अभावत्वादेव न हेतुत्वमित्युच्यत इति। तत्र शब्दास्वारस्या(स्यम ?) र्थानौचित्यादिकं च द्रष्टव्यम्। तदेवं विधायकादर्शनात् सपरिकरनियोगानुपपत्तेश्च निष्प्रपञ्चब्रह्मविषयो विधिर्न संभवतीति सिद्धम्॥

॥ इति शतदूषण्यां निष्प्रपञ्चीकरणनियोगभङ्गवादः षट्चत्वारिंशः ॥ ४६ ॥

अनुग्राहकांशस्य इतिकर्तव्यतासाध्यस्य अदृष्टरूपस्य करणोपकारस्य अवस्थितिर्न स्यादिति उभयतःस्पाशा रज्जुः ।

अथाभावरूपा काचित् इतिकर्तव्यता भवतु इति चेत्-न । तस्याभावरूपस्यानुग्राहकस्य कृत्स्नप्रपञ्चनिवृत्तिरूपकरणान्तर्गतत्वेन करणम् इतिकर्तव्यतेत्यनयोर्भेदस्यासिद्धेः ।

श्रुतप्रकाशिकायां तु - अथाभावरूपेतिकर्तव्यतां दूषयति - **अभावरूपत्व इति**।

अभावादेव=भावरूपेतिकर्तव्यताया अप्रामाणिकत्वादेव । निवृत्तिरूपशमादीनां नाभावरूपेतिकर्तव्यतात्वम् । तेषां ज्ञाननिष्पादकत्वेन प्रपञ्चनिवृत्तिरूपकरणनिष्पादकत्वायोगादिति भाव:। अत्राभावादेवेत्येवकारेण पूर्वमदृष्टार्थभावरूपेतिकर्तव्यताया अप्रामाणिकत्वस्याभिप्रेतत्वं गम्यत इति व्याख्यातम् ।

वादार्थं निगमयति - **तदेवमिति**।

इति शतदूषणीव्याख्यायां तात्पर्यप्रकाशिकायां
निष्प्रपञ्चीकरणनियोगभङ्गो नाम षट्चत्वारिंशो वादः ॥

॥ अथ विकल्पाप्रामाण्यभङ्गवादः सप्तचत्वारिंशः ॥ ४७ ॥

श्लो. संसारसागरोत्तारकारणं वारणाचले ।
अविकल्पविकल्पाभ्यामध्यक्षितमुपास्महे ॥

यदुच्यते–विप्रतिपन्नो विकल्पो मिथ्याविषयः विकल्पत्वात्, यथा शुक्तिरजतविकल्पः । यो न मिथ्याविषयः, नासौ जात्यादिविशिष्टप्रत्यय इति

अथ विकल्पाप्रामाण्यभङ्गो नाम सप्तचत्वारिंशो वादः ॥

संसारसागरोत्तारकारणं वारणाचले ।
अविकल्पविकल्पाभ्यामध्यक्षितमुपास्महे ॥

संसारसागरादुत्तारं प्रति कारणभूतं हस्तिशैले निर्विकल्पकसविकल्पकभेदेन भिन्नाभ्यां समाधिभ्यां अध्यक्षितं प्रत्यक्षविषयीकृतं वरदमुपास्महे । न्यूनाकारविषयकं निर्विकल्पकम् अधिकाकारविषयकं सविकल्पकम् ।

अद्वैत्येकदेशिनः सविशेषविषयकस्य सविकल्पकस्य प्रामाण्याङ्गीकारे ब्रह्मणः सविशेषत्वं सिध्येत् इति भीत्या सर्वमपि सविकल्पक**मप्रमाणमित्यास्थितवन्तः** । तन्निरसनार्थोऽयं वादः ।

ननु निर्विकल्पभङ्गवादेऽपि सविकल्पकप्रामाण्यं समर्थितमिति चेत् -सत्यम् । तत्र प्रत्यक्षसामग्र्यभावात् प्रत्यक्षप्रमाणं न भवतीत्याशङ्क्य समर्थितम् । अत्र तु विकल्पत्वात् अप्रामाण्यमाशङ्क्य निराक्रियते इति निवर्त्यभेदान्न पुनरुक्तता ।

पूर्वपक्षः

तन्मतमनुवदति - **यदुच्यत** इत्यादिबा । विप्रतिपन्नः मिथ्याविषयकत्वतदविषयकत्वविप्रतिपत्तिविषयः **विकल्पः** = सविकल्पकज्ञानं पक्षः । मिथ्याविषयक इति साध्यम् । विकल्पत्वात् इति हेतुः । शुक्तिरजतभ्रमात्मकः विकल्पः दृष्टान्तः । अनेनानुमानेन विकल्पे भासमानानां जात्यादिविशिष्टानां मिथ्यात्वे सति अर्थात् जात्यादिविशिष्टप्रपञ्चस्य मिथ्यात्वेन ब्रह्मैव परमार्थ इति अद्वैतं सिध्यतीति तेषामाशयः ।

सर्वस्यापि भेदस्य विकल्पविषयतया मिथ्यात्वे परिशेषादद्वैतसिद्धिरिति–तदेतत् सविकल्पकमपि प्रत्यक्षविभागतयोदाहरद्भिर्भाष्यकारैर्निरस्तप्रायम्। तद् विस्तृणीमहे। तत्र तावत् पक्षादयो न निर्विकल्पकविषयतया सिद्धाः; तथा सति अभिलापसम्बन्धानर्हत्वप्रसङ्गात् । विकल्पविषयतया सिद्धौ तु, य एते पक्षादिग्राहिणो विकल्पाः, किं तेऽपि पक्षीक्रियन्ते, उत तद्व्यतिरिक्ता इति। न प्रथमः; व्याघातात्। विकल्पानां विसंवादित्वविकल्पस्य विसंवादे, पुनः(?) तेषामपि संवादपर्यवसानात्। संवादे पुनः तेषां विसंवादे पर्यवसानात् आश्रयाद्यसिद्धिप्रसंङ्गात्। अविसंवादातिरिक्तायाश्च तत्सिद्धेरनिरूपणात्। (विसंवादातिरिक्तायास्तदसिद्धेरनिरूपणात्।)

सिद्धान्त:

स्तम्भादिप्रत्ययो मिथ्या प्रत्ययत्वात् तथा हि यः ।
प्रत्ययः स मृषा दृष्टः स्वप्नादिप्रत्ययो यथा ॥

इति बौद्धोक्तमिदमनुमानमिति प्रत्यभिजानाति ।

तन्मतं दूषयति - **तदेतदिति पक्षादय** इति । पक्ष-साध्य-हेतु अनुमितिपरामर्शादय: कथं सिध्यन्ति । निर्विकल्पकेन वा सविकल्पकेन वा । नाद्य:; निर्विकल्पकविषयाणां तेषां शब्देनाभिलपितुमशक्यत्वात् । न द्वितीय: । सविकल्पकविषयतया पक्षादीनां सिद्धौ य एते पक्षादिविषयका: विकल्पा: तेऽपि किं पक्षीक्रियन्ते उत तद्व्यतिरिक्ता: । नाद्य:, व्याघातात् । व्याघातमुपपादयति - **विकल्पानामिति** । पक्षादिविषयकसविकल्पकानां **विसंवादित्व-विकल्पस्य** - मिथ्याविषयकत्वग्राहकानुमिते: **विसंवादे**=मिथ्याविषयकत्वे **तेषां**= पक्षभूतविकल्पानां **संवादे** = अबाधितविषयकत्वे पर्यवसानात् व्याघात: बाध इति भाव: । दोषान्तरमाह-**आश्रयादीति** । आश्रयग्राहिविकल्पस्य मिथ्याविषयकत्वे आश्रयासिद्धि: । आदिशब्देन हेतुग्राहिविकल्पस्य मिथ्याविषयकत्वे स्वरूपासिद्धि: इत्यादि विवक्षितम् । ननु पक्षादिविकल्पानां विसंवादित्वे कथमसिद्धिरित्यत्राह-**अविसंवादेति** । विकल्पादिगोचरप्रमाया एव विकल्पादिसिद्धित्वादिति भाव: । ननु निश्चयमात्रादेव

विसंवादेऽपि वा तत्सिद्धौ सर्वत्र विशिष्टार्थसिद्धेर्दुर्निवारत्वात् । नापि द्वितीयः, तैरेवानैकान्त्यात् ।। अविसंवादोऽपि तेषामनिश्चित इति चेन्न; तथाऽपि सन्दिग्धानैकान्त्यस्य स्थितत्वात् । अन्यतस्तेषां विसंवादसाधनेऽप्युक्तदोषानुधावनात् । यदि च सर्वे विकल्पा विसंवादिनः, कथमनुमानादिविकल्पास्ते प्रमाणं भवेयुः ? परम्परया अर्थप्रतिबन्धादिति चेत्; तुल्यं विकल्पेऽपि । मा भूत् तेषां प्रामाण्यमिति चेत्;

सिद्धिरित्यत्राह - **विसंवादेऽपीति** । **सर्वत्र**=भ्रमस्थले सर्वत्र मिथ्याविषयकत्वेऽपि अनुमित्या पक्षादिसिद्धौ ह्रदेऽपि बाष्पादिना धूमभ्रमविषयेण वह्न्यनुमित्या वह्निसिद्धिप्रसङ्ग इति भावः । पक्षादिग्राहिणो ये विकल्पाः तद्व्यतिरिक्ताः पक्षीक्रियन्त इति द्वितीयकल्पं दूषयति - **नापि द्वितीय** इति । **तैरेवानैकान्त्यादिति** । मिथ्याविषयकत्वरूपसाध्याभाववत्सु पक्षादिविषयकसविकल्पकेषु विकल्पत्वरूपहेतुसत्त्वात् व्यभिचार इत्यर्थः । शङ्कते- **अविसंवादोऽपीति** । विकल्पस्य मिथ्याविषयकत्वानुमितेः प्राक् पक्षादिविषयक-विकल्पेषु अविसंवादः मिथ्याविषयकत्वाभावोऽपि न निश्चितः, अतो न तेषु व्यभिचारः इति शङ्कितुर्भावः । तथापि तेषु मिथ्याविषयकत्वरूपसाध्यसंदेहात् संदिग्धानैकान्त्यं दुर्वारम् । साध्यसंदेहवति हेतुसत्त्वनिश्चये संदिग्धानैकान्त्यादिति परिहरति - **तथापीति** । अविसंवादसंदेहेऽपीत्यर्थः । पक्षादिग्राहिविकल्पानां हेत्वन्तरेण मिथ्याविषयकत्वसाधनेऽपि पूर्वोक्तो व्याघातो दुर्वार इत्याह - **अन्यतस्तेषामिति** । तेषां=पक्षादिविकल्पानां । **विसंवादसाधने**=मिथ्याविषयकत्वसाधने । यद्वा तस्मिन्नप्यनुमाने पक्षादिग्राहकविकल्पानां पक्षीकरणेऽपक्षीकरणे च पूर्वानुमानोक्तदोषप्रसङ्ग इति उक्तदोषानुधावनादित्यस्यार्थः । विकल्पः मिथ्याविषयकः विकल्पत्वादित्यनुमानस्य बौद्धोपदेशलब्धत्वात् तेन चानुमानस्य प्रामाण्याङ्गीकारात् तदन्तेवासिनामपि तदेव मतमापाद्य दूषयति - **यदि चेति** । यदि च सर्वे **विकल्पाः**=सविकल्पकाः विसंवादिनः । मिथ्याविषयकाः तदा अनुमानादिरूपा विकल्पा अपि मिथ्याविषयका इति ते कथं प्रमाणं भवेयुरित्यर्थः । शङ्कते - **परंपरयेति** । अर्थप्रतिबन्धात् अर्थसंबन्धात्, अर्थेन व्याप्तेः, अर्थाव्यभिचारित्वादिति यावत् । **तुल्यं विकल्पेऽपीति** । प्रकृतविवादास्पदनिर्विकल्पकातिरिक्तप्रत्यक्षेऽपीत्यर्थः । प्रत्यक्ष-

तदा (तथापि) कथमेतदनुमानं समीहितसाधनायोदाहरसि ? ।। लोकव्यवहारसिद्धतया, परमतसिद्धतया वेति चेन्न; आत्मघातिनामीदृशानां लौकिकैः (बालिशैः) परीक्षकैश्च(र्वा) साध्यसिद्ध्यङ्गत्वानभ्युपगमात्।

किंच निर्विकल्पकस्यापि संवादः किं विकल्पगृहीतः, उत निर्विकल्पकगृहीतः ? नाऽऽद्यः, निर्विकल्पकस्य विसंवादित्वप्रसङ्गात्। अन्यथा क्वचिद्विकल्पप्रामाण्याभ्युपगमे अनैकान्त्यादिदोषात्। न द्वितीयः; स्वस्यापि संवादित्वग्रहणे

विकल्पस्याप्रामाण्यम् । अनुमानविकल्पस्य तु प्रामाण्यमिति विभागो न सिध्येदिति भावः । ननु मा भूदनुमानादिविकल्पानां प्रामाण्यमित्याशङ्क्य अनुमानादिविकल्पानामप्रामाण्ये प्रकृतस्य विकल्पपक्षकमिथ्याविषयकत्वानुमानस्याप्यप्रमाणतया कथमेतदनुमानं विकल्पस्य मिथ्याविषयकत्वं साधयेदिति प्रतिवक्ति-**तथापीति** । **आत्मघातिनामिति** । विकल्पसामान्यस्याप्रामाण्यसाधने स्वस्यापि विकल्पमध्यप्रविष्टतया अप्रामाण्यापादकत्वेन स्वव्याघातकान्येतादृशान्यनुमानानि बालिशाः परीक्षकाश्च साध्यसिद्ध्यङ्गतया नाङ्गीकुर्यरित्यर्थः ।

दूषणान्तरमाह-**किं चेत्यादिना** । निर्विकल्पकस्य परं **संवादः**= अवाधितविषयकत्वं (प्रामाण्यं) किं सविकल्पकेन गृहीतम् उत निर्विकल्पकेन गृहीतम् । नाद्यः, निर्विकल्पकसंवादित्वग्राहकसविकल्पकस्यापि विकल्पत्वेन मिथ्याविषयकतया तद्विषयस्य संवादित्वस्य मिथ्यात्वात् संवादित्वासिद्धेः । प्रत्युत विसंवादित्वस्यैव प्रसङ्गात् इति भावः । **संवादः**=अबाधितविषयकत्वम् ।विसंवादित्वप्रसङ्गात् = मिथ्याविषयकत्वप्रसङ्गात् । **अन्यथेति** । निर्विकल्पकस्य अविसंवादित्वग्राहको यो विकल्पः तस्य प्रामाण्ये, अन्यस्य विकल्पस्याप्रामाण्ये च अनैकान्त्ययम् । निर्विकल्पकाविसंवादित्वग्राहकविकल्पे मिथ्याविषयकत्वाभाववति विकल्पत्वसत्त्वात् इत्यर्थः । **आदिशब्देन** क्वचित् विकल्पे प्रामाण्याङ्गीकारे तुल्यन्यायतया विकल्पान्तरेऽपि प्रामाण्यप्रसङ्गो विवक्षितः । निर्विकल्पकस्य संवादः निर्विकल्पकगृहीत इति द्वितीयकल्पं दूषयति - **न द्वितीय इति** ।

तस्यानधिकारात् । अधिकारे वा विकल्पत्वप्रसङ्गात् । तेन विकल्पवत् निर्विकल्पकस्यापि प्रामाण्यनिर्मूलनादप्रयत्नविजयिनो माध्यमिकाः ।

कश्चायं विसंवादः ? किं (१) संवादिज्ञानान्तरराहित्यम्, (२) आहोस्वित् अर्थक्रियास्थित्यभावः, (३) बाधकज्ञानान्तरोदयो वा, (४) यद्वा अनर्थज(भूत)त्वम्, (५) अथवा अनर्थविषयत्वम्, (६) यद्वा अन्यस्यान्यात्मनोल्लेखः, (७) अन्यद्वा किंचित् इति । न प्रथमः; क्वचिद्बाधात्, क्वचिदिष्टप्रसङ्गात्; अकिंचित्करत्वाच्च ॥ संवादकाभावे कथमध्यवसाय इति चेत् – यथा संवादकस्येति पश्य । परस्परसंवादात् उभयाध्यवसाय इति चेन्न; शुक्तिरजतबोधधारावाहिकसन्ततौ

स्वस्यापीति । स्वगतसंवादित्वग्रहणे निर्विकल्पकस्यासामर्थ्यादित्यर्थः । निर्विकल्पकेन संवादित्वग्रहणे बाधकमाह - **अधिकारे वेति** । स्वगतसंवादित्वं निर्विकल्पकेन यदि गृह्येत तदा संवादित्वविशिष्टस्वग्राहकतया निर्विकल्पकस्य सविकल्पकत्वप्रसङ्ग इति भावः । तत्रेष्टापत्तिमाशङ्क्याह - **तेनेति** । निर्विकल्पकप्रामाण्यग्राहिणोऽपि विकल्पत्वेन तद्विषयीभूतस्य निर्विकल्पकप्रामाण्यस्य मिथ्यात्वात् इत्यर्थः । एवं ब्रह्मविषयकनिर्विकल्पकस्याप्यप्रामाण्यात् सर्वशून्यता स्यादिति भावः ।

विकल्पः मिथ्याविषयकः विकल्पत्वादित्यनुमाने साध्यभूतं मिथ्याविषयकत्वं विसंवाद इति तं विकल्पयति-**कश्चायं विसंवाद** इति । अत्र सप्तधा विकल्पः । **अर्थक्रियास्थित्यभावः**=अर्थक्रियाविरहव्यवसायः । **अनर्थभूतत्वम्**=अनर्थात् भूतत्वम्, अनर्थजत्वमिति यावत् । **न प्रथम इति** । संवादिज्ञानान्तरराहित्यं न विसंवादः । संवादिज्ञानान्तरसत्त्वस्थले बाधः । संवादिज्ञानान्तराभावस्थले सिद्धसाधनम् । संवादिज्ञानान्तराभावेऽपि बाधाभावे याथार्थ्यक्षितेश्चेत्यर्थः । ननु संवादकज्ञानाभावे कथमध्यवसायः प्रामाण्यनिश्चय इत्याशङ्क्य संवादकज्ञानस्य यथा प्रामाण्यनिश्चयः तद्वत् इति समाधत्ते - **संवादकाभाव** इति । **शुक्तीति** । बाधे सति परस्परसंवादेऽपि प्रामाण्यानध्यवसायादित्यर्थः । ननु शुक्तिरजतज्ञानधारावाहिकज्ञानेषु अर्थक्रियाविरह-

तदसिद्धेः ॥ अर्थक्रियाविरहव्यवसायविसंवादात् तत्र सर्वत्राप्रमात्वमिति चेत्, एतेन द्वितीयः कल्पः परिजिघृक्षितः। सोऽपि न; सर्वासामर्थक्रियाणां विकल्पोपज्ञत्वात्। न हि निर्विकल्पकेन कश्चित् प्रवर्तते। न च विकल्पतः प्रवृत्तस्यार्थक्रिया न संभवति (सिध्यति); मणिप्रभाविषयमणिविकल्पप्रवृत्तस्येव स्वलक्षणप्रसूतनिर्विकल्पक- जनिततदारोपितार्थोल्लेखविकल्पप्रवृत्तस्यापि पारम्पर्येणार्थसंम्बन्धात् ॥ निर्विकल्पकनिदान एव संवाद इति चेन्न; नियामकाभावात्।

व्यवसायरूपात् विसंवादात् अप्रमात्वमिति शङ्कते - **अर्थक्रियेति**। एवं पृच्छता भवता अर्थक्रियास्थित्यभावरूपो द्वितीयः कल्पः परिग्रहीतुमिष्टः। सोऽपि सर्वासामर्थक्रियाणां विकल्पजन्यत्वात् परिहृतः। विकल्परूपेण ज्ञानेन तद्विषये प्रवृत्तौ अर्थक्रियादर्शनात् विकल्पविषयस्यैवार्थक्रियात्त्वम्। ततश्चानुमाने बाध इति भावः। एतदुपपादयति-**न हीति**। बाधमुपपादयति - **न चेति**। अर्थक्रिया नाम प्रयोजनवती क्रिया, प्रयोजनं वा। ननु

मणिप्रदीपप्रभयोर्मणिबुद्ध्याभिधावतोः।
मिथ्याज्ञानाविशेषेऽपि विशेषोऽर्थक्रियां प्रति।

इति प्रमाणवार्तिकम्। मणिप्रदीपयोर्ये प्रभे तयोर्मणित्वबुद्ध्या तद्ग्रहणार्थं धावतोः भ्रान्तत्वस्याविशेषेऽपि विशेषोऽक्रियां प्रति। **मणिप्रभायां** मण्यध्यवसायी मणिसाध्यामर्थक्रियां प्राप्नोति इति तदर्थः। एदद्दृष्टान्तवत् मणिप्रभायां मणिभ्रान्तावपि मणिलाभवत् स्वलक्षणक्षणिकयथार्थवस्तुप्रसूतनिर्विकल्पकजनितः यः स्वलक्षणेऽध्यस्तः उल्लेखात्मको विकल्पः तेन प्रवृत्तस्यापि परंपरया अर्थसंबन्धात् निर्विकल्पकहेतुक एव संवाद इति शङ्कते - **मणिप्रभेत्यादिना**। स्वलक्षणविषयकनिर्विकल्पकजन्यत्वादेव स्वलक्षणारोपितार्थोल्लेखित्वम्। ततश्च विकल्पविषयस्य स्वलक्षणारोपिततया स्वलक्षणरूपार्थसंबन्धात् विकल्पस्य पारंपर्येणार्थसंबन्धित्वम्। तथा च निर्विकल्पविषय एवार्थक्रियासंवाद इति सविकल्पकविषयोऽर्थक्रियाशून्य एवेति भावः। समाधत्ते-**नियामकाभावादिति**। निर्विकल्पकविषय एवार्थक्रियासंबन्ध इत्यत्र नियामकाभावादित्यर्थः।

बाधितत्वमिति चेत्–ततस्तृतीयः पक्षः स्वीकृतः । सोऽप्यसारः, असिद्धेः । अत एवानुमानात् तत्सिद्धिरिति चेन्न–अद्यापि तत्प्रामाण्यानिश्चयात् ।। अर्थजत्वात् तत्सिद्धिरिति चेन्न; साक्षादसिद्धेः । परम्परया त्वविशेषात् । अत एव न चतुर्थः । न च जात्यादिविशिष्टस्य जात्यादिविशेषणस्य वा

सविकल्पकाधीनत्वान्निर्विकल्पकार्थसंबन्धस्य तदनभ्युपगमे निर्विकल्पकेऽर्थसंबन्धे प्रमाणाभावात् स्वेच्छामात्राधीनत्वे वैपरीत्यप्रसङ्गादित्यर्थः'' इति **नृसिंहराजीये** । बाधितस्यार्थक्रियासंबन्धो नास्तीति नियामकं शङ्कते - **बाधितत्वमिति चेदिति** । विकल्पस्य विसंवादित्वे बाधितत्वं नियामकमित्युच्यते चेत् - तर्हि बाधकज्ञानान्तरोदयो वेति तृतीयकल्पे पर्यवसानं स्यात् । सोऽपि कल्पोऽसारः । **बाधितत्वस्यासिद्धेः** = बाधितत्वस्य अनुपलम्भादित्यर्थः । ननु विकल्पः मिथ्याविषयक इति प्रकतानुमानादेव बाधितत्वं सिध्यतीत्याशङ्क्य अस्यानुमानस्याद्यापि प्रामाण्यानिश्चयात् न तेन बाधितत्वं सिध्यतीत्याह - **अत एवेति** । एतदनुमानोदेवेत्यर्थः । **अद्यापीति** । अनुमितेरपि विकल्पत्वेनाप्रामाण्यात् विकल्पस्य बाधितत्वं न सिध्यतीत्यर्थः । **यद्वा सोऽप्यसारः,** असिद्धेरिति । बाधस्यानुपलब्धिबाधितत्वादित्यर्थः । इदानीं बाधानुपलम्भेऽपि कालान्तरीयबाधो **नानुपलब्धिबाध्य** इत्याह - **अत एवानुमानादिति** । अर्थजत्वादनुमानप्रामाण्यसिद्धिरित्याशङ्कते - **अर्थजत्वादिति** । तत्सिद्धिः अनुमानप्रामाण्यनिश्चयः । **साक्षादसिद्धेरिति** । अनुमानस्य साक्षादर्थजत्वाभावादित्यर्थः । परंपरया अर्थाजन्यत्वं तु निर्विकल्पकेऽप्यविशिष्टमित्याह **परंपरयेति** । विसंवादो नाम अनर्थजत्वम्अर्थाजन्यत्वमिति चतुर्थकल्पोऽपि साक्षादर्थाजन्यत्वं परंपरया अर्थाजन्यत्वं वेति विकल्पेनानुपदं प्रोक्तात् दूषणादेव दूषित इत्याह - **अत एव नेति** । विकल्पस्य विसंवादो नाम अर्थाजन्यत्वं चेत्तत्र साक्षादर्थाजन्यत्वविवक्षणे अनुमानस्य अप्रामाण्यं स्यात् । परंपरया अर्थाजन्यत्वविवक्षणे साक्षादर्थजन्यत्वेनाभिमते निर्विकल्पके परंपरया अर्थाजन्यत्वसत्त्वेन अप्रामाण्यं स्यादिति भावः । दूषणान्तरमाह - **न च जात्यादीति** । सविकल्पेन

दृढोपलम्भसिद्धस्याबाधितस्याप्यनर्थत्वं निश्चिनुमः, यतस्तत्प्रसूतस्य विकल्पस्यानर्थजत्वम्। अत एव न पञ्चमः; अनुमानादिनिर्मूलनाच्च।

षष्ठोऽपि स्वलक्षणाकारतयैव जात्यादिसिद्धेर्निरस्तः। न चाशब्दात्माऽर्थः शब्दात्मना विकल्पे भातीति वाच्यम्; सर्वेषु विकल्पेषु शब्दानुवेधाभावात्। यत्र च शब्दानुवेधः, तत्रापि न शब्दोऽर्थात्मना (शब्दात्मनाऽर्थः?) प्रतिभाति, अशब्दात्मनैव पूर्वमेवाध्यवसायात्। न च गौरित्यत्र गकारौकारविसर्ज

जात्यादिविशिष्टस्य जात्यादिरूपविशेषणस्य वा अबाधिततया उपलभ्यमानस्य **अनर्थत्वम्**=अपरमार्थत्वं न निश्चेतुं शक्नुमः; येन **तत्प्रसूतस्य** - जात्यादिविशिष्टार्थजन्यस्य **विकलपस्य**=सविकल्पकस्य, **अनर्थत्वम्**=अप्रमात्वं भवेदित्यर्थः । **अत एवेति**=अनर्थत्वानिश्चयात् विषयस्य अपरमार्थत्वानिश्चयादिति यावत् । **न पञ्चमः** = अनर्थविषयत्वम्=अपरमार्थविषयकत्वं विसंवाद इति पञ्चमपक्षोऽपि न युक्त इत्यर्थः । दूषणान्तरमाह - **अनुमानादेरिति** । अनुमानादेरपि जात्यादिविषयकत्वेन विसंवादे प्रकृतानुमानस्याप्यप्रमाणत्वप्रसङ्गादित्यर्थः । विसंवादो नाम अन्यस्यान्यात्मनोल्लेख इति षष्ठकल्पं दूषयति - **षष्ठोऽपीति** । जात्यादीनां **स्वलक्षणाकारतयैव**=परमार्थतयैव सिद्धेः अन्यस्यात्यात्मनोल्लेखरूपस्य विसंवादस्य नावकाश इति भावः । अन्यस्यात्यात्मना भानमस्तीति शङ्कते- **न चाशब्देति** । शब्दभिन्नस्वरूपोऽर्थः शब्दात्मना संविकल्पके भाति । वाचकशब्दानुवेधेनार्थस्य घटादेःभानात् इति शङ्का । परिहरति - **सर्वेष्विति** । बालमूकादिविज्ञानेषु सविकल्पकेषु शब्दानुवेधं विना अर्थस्य भानात् इति भावः । यत्रापि सविकल्पके शब्दानुवेधोऽस्ति, तत्रापि अर्थः न शब्दात्मना प्रतिभाति, ततः पूर्वमर्थस्य शब्दभिन्नत्वनिश्चयात् । न खलु अयं गौः इति यो जानाति, सः गकारौकारविसर्जनीयात्म-कोऽयमिति मन्यते । अपि तु गोशब्दप्रवृत्तिनिमितभूतगोत्वाश्रयोऽयमिति मन्यते । यद्वा गोशब्दवाच्योऽयमिति मन्यते इति भावः । अत्र मूले ''तत्रापि शब्दोऽर्थात्मना प्रतिभाति'' इति पाठो दृश्यते । सोऽसाधुः । अपितु ''तत्रापि न शब्दात्मनार्थः प्रतिभाति'' इति पाठः साधुः । अर्थस्य शब्दात्मना प्रतिभानाभावं विशेषदर्शनेनोपपादयति - **अशब्दात्मनेति** ।

नीयात्मकोऽयमिति मन्यन्ते(न्यते); अपि तु गोशब्दप्रवृत्तिनिमित्तभूतगोत्वाश्रय इति । एकार्थानेकशब्देषु अनेकार्थैकशब्देषु च शब्दानामर्थानां च परस्परविरोधादेव नैकता (नैतत्ता ?) दात्म्याध्यवसायसंभवः । न चात्र साम्यसन्निकर्षादिकमध्यासनिमित्तं पश्यामः । न च चाक्षुषनीलादिप्रत्यये श्रावणनीलादिशब्दात्मनोल्लेखो युक्तः। न च विकल्पाः सर्वे मानसाः; (समानाः, मानस) वाह्येन्द्रियव्यापारान्वय-

---

वाक्येन । अनुपलम्भेन तमुपपादयति - **अपि तु इति** वाक्येन । इदमुपलक्षणम्-क्वचित् गोशब्दवाच्य इत्यपि भासत इति भावः ।

शब्दार्थयोर्भेदग्रहस्यावश्यकत्वमाह - **एकार्थेति** । एकार्थवाचकाः येऽनेकशब्दाः घटकलशादिशब्दाः, अनेकार्थकैकशब्दाः हर्यादिशब्दाः । तत्र एकस्मिन्नर्थे अनेक शब्दतादात्म्यायोगात् अनेकेष्वर्थेषु एकशब्दतादात्म्यायोगाच्च शब्दार्थतादात्म्याध्यवसायो न संभवतीति भावः । **परस्परविरोधात्**=परस्परं भिन्नत्वात् । **नैकतादात्म्येति** । एकार्थतादात्म्यमनेकेषु शब्देषु, एकशब्दतादात्म्यमनेकेष्यर्थेषु च निश्चेतुं न शक्यम्, तदभिन्नाभिन्नस्य तदभिन्नत्वमिति न्यायेन शब्दानामर्थानां चैक्यप्रसङ्गादिति भावः । कारणाभावाच्च न शब्दाध्याससंभव इत्याह - **न चात्रेति** । अन्यत्रान्यत्वाध्यवसाये साम्यसंनिकर्षादिकं कारणम् । यथा चन्द्रसादृश्यात् मुखे चन्द्रत्वाध्यासः । गङ्गासंनिकृष्टत्वात् तीरे गङ्गात्वाध्यासः । आदिशब्देन तत्स्थत्वादिकं गृह्यते । न चेह अर्थे शब्दाध्यासे शब्दसाम्यादिरूपं कारणं दृश्यत इति भावः । **न च चाक्षुषेति** । नीलाद्यर्थविषयके चाक्षुषप्रत्यक्षे श्रावणप्रत्यक्षविषयनीलादिशब्दतादात्म्यं कथं भासेतेति भावः । भिन्नेन्द्रियग्राह्ययोः शब्दार्थयोः कथमेकेनेन्द्रियेण तादात्म्यं ग्रहीतुं शक्यमिति यावत् ।

ननु सर्वेऽपि विकल्पाः एकेनैवेन्द्रियेण जायन्ते । अतः शब्दतादात्म्यारोपः अर्थे संभवतीत्याशङ्क्य निराकरोति-**न च विकल्पा** इति । **समानाः** = मनोरूप-एकेन्द्रियजन्याः । केषांचित् विकल्पानां मनस्सनिकर्षाऽन्वयव्यतिरेकानुविधानं केषांचित् विकल्पानां वाह्येन्द्रियसंनिकर्षान्वयव्यतिरेकानुविधानं तत्रापि केषांचित् चक्षुरिन्द्रि-

व्यतिरेकानुविधानविरोधात्। न च गोशब्दात्मना खण्डशब्दात्मना च गोव्यक्तौ विकल्पितायां जातिव्यक्तिशब्दविभागनिमित्तं संभवति। न च जातिशब्दो व्यक्तौ नाध्यस्यत इति वाच्यम्; गौरयमित्येव प्रतिभासात्। तथा(तदा ?) च व्यक्तिशब्दस्यापि तुल्यन्यायतया नाध्यासः। अतस्तटस्थ एव शब्दः स्वविषयमावेदयति,

---

यान्वयव्यतिरेकानुविधानं केषांचित् श्रोत्रेन्द्रियान्वयव्यतिरेकानुविधानमिति व्यवस्थायाः दर्शनात् सर्वेषामेकेन्द्रियग्राह्यत्वे तद्विरोधप्रसङ्ग इति भावः। “न च सर्वे विकल्पाः समानाः, मानसबाह्येन्द्रियव्यापारान्वयव्यतिरेकानुविधानविरोधात्” इति पाठमनुसृत्य उक्तरीत्या व्याख्यातम्। “न च विकल्पाः सर्वे मानसाः, बाह्येन्द्रियव्यापारान्वयव्यतिरेकानुविधान विरोधादि”ति पाठान्तरम्। अर्थस्तु स्पष्ट एव।

शब्दात्मना अर्थाध्यासपक्षे दोषान्तरमाह - **न चेति**। अयं जातिशब्दः, अयं व्यक्तिशब्द इति विभागे निमित्तं न संभवति। गोशब्दात्मना गोव्यक्तौ विकल्पविषयीकृतायां जातिशब्दः, खण्डशब्दात्मना गोव्यक्तौ विकल्पविषयीकृतायां व्यक्तिशब्दः इति विभागे निमित्तं न संभवति। अयं गौरित्यत्र वा अयं खण्ड इत्यत्र वा विकल्पे गोव्यक्तेरेव विषयीकरणादिति भावः। ननु जातिशब्दः गोशब्दः गोत्वजातावेवाध्यस्यते, खण्डशब्दः व्यक्तावेवाध्यस्यत इति जातावध्यस्यमानः शब्दः जातिशब्दः व्यक्तावध्यस्यमानः शब्दः व्यक्तिशब्द इति विभागः संभवतीत्याशङ्कां निराकरोति - **न च जातिशब्द** इति। **गौरयमित्येव प्रतिभासादिति**। यादृश्या गौरयमिति प्रतीत्या त्वया जातौ शब्दाध्यास उच्यते तादृश्यैव प्रतीत्या व्यक्तावपि शब्दाध्यासः दुर्वार इति भावः। ननु न जाति शब्दस्य व्यक्तावध्यासः, इति शङ्कायामाह - **तथाचेति**। यदि जातिशब्दो व्यक्तौ नाध्यस्यते तर्हि खण्डादिव्यक्तिशब्दोऽपि व्यक्तौ नाध्यस्येत इति भावः।

अत इति। शब्दाध्यासपक्षे प्रत्यक्षादिविरोधादित्यर्थः। शब्दः तटस्थः सन् प्रतीतिविषयानन्तर्भूत एव व्युत्पन्नमर्थं बोधयति। प्रत्यक्षादिष्वपि क्वचित् वाच्यवाचकभावसंबन्धेन विशेषणतया भासमानः शब्दः वस्त्वन्तरात् व्यवच्छिनत्तीति

वस्त्वन्तराच्च व्यवच्छिनतीत्ती न शब्दाध्याससंभवः ।

नापि सप्तमः, बाधपर्यवसितस्य कस्यचिदन्यस्यानुपलम्भात्, अन्यादृशस्य साधनेऽपि विरोधाभावादिति ।

न च संस्कारप्रसूततामात्रेण विकल्पस्याप्रामाण्यम्; स्मृतिप्रामाण्यवादिषु तस्य दुर्वचत्वात्, संस्कारमात्रासाधारणकारणकस्य स्मृतित्वात् । स्मृत्यनुभवात्मक-

---

भाव:। उपसंहरति - **इति न शब्दाध्याससंभव इति** । अन्यद्वा किंचिदिति सप्तमकल्पं निरस्यति - **नापि सप्तम** इति । मिथ्याविषयकत्वे पर्यवसितस्य पूर्वोक्तेभ्योऽन्यस्य कस्यचिदनुपलम्भात् इत्यर्थ: । एतदुक्तं भवति - सप्तमोऽपि किं बाधपर्यवसित: उत नेति विकल्प्य आद्यं दूषयति-**बाधेति** । द्वितीयं दूषयति-**अन्यादृशस्येति** । बाधेऽपर्यवसितस्य कस्यचित् साधने विरोधाभावादिति ।

ननु सविकल्पकस्य संस्कारसहकृतेन्द्रियजन्यत्वं भवद्भिरङ्गीकृतम् । तथा सति संस्कारजन्याया: स्मृते: अप्रामाण्यदर्शनात् संस्कारजन्यत्वमप्रामाण्यप्रयोजकम् । एवं च विकल्पोऽप्रमाणं संस्कारजन्यत्वात् स्मृतिवत् इति शङ्कते - **न च संस्कारेति** । स्मृते: प्रामाण्यमङ्गीकुर्वतां मते संस्कारजन्यत्वस्याप्रामाण्याप्रयोजकत्वात् इति समाधत्ते - **स्मृतिप्रामाण्येति । तस्य दुर्वचत्वादिति** । संस्कारजन्यत्वमात्रेण अप्रामाण्यस्य दुर्वचत्वादित्यर्थ: । तथा चोक्तानुमानस्य दृष्टान्ते साध्यवैकल्यमिति भाव: । ननु न वयं विकल्पस्यायथार्थत्वलक्षणमप्रामाण्यमापादयाम:, किं तु स्मृतित्वलक्षणमप्रामाण्यमित्यत्राह - **संस्कारमात्रेति** । संस्कारमात्रासाधारणकारणकं ज्ञानं हि स्मृति: । विकल्पस्तु न संस्कारमात्रजन्य:, संस्कारसहकृतेन्द्रियजन्यत्वात् । अत: विकल्पस्य न स्मृतित्वरूपाप्रामाण्यप्रसङ्ग इति भाव: । विकल्प: प्रत्यभिज्ञावत् स्मृत्यनुभवोभयात्मक इति मतेऽपि तत्ताद्यंशे स्मृतित्वरूपमप्रामाण्यं प्रसज्येत, न तु विसंवादित्वरूपम् अप्रामाण्यमित्याह - **स्मृत्यनुभवेति** । विसंवादित्वं मिथ्या-विषयकत्वं तदभाववति तत्प्रकारकत्वं वा । एतावता विकल्प: मिथ्याविषयक: विकल्पत्वात् इत्यमुमाने साध्यदूषणं कृतम् । यथ हेतुं विकल्प्य

त्वपक्षेऽप्यंशे स्मृतित्वलक्षणमप्रामाण्यं प्रसज्येत; न पुनर्विसंवादित्वलक्षणम्।

विकल्पत्वादिति हेतुश्च विशिष्टप्रत्ययत्वमात्रम् ? तद्विशेषो वा ? नाद्यः, निर्विकल्पकस्याप्यस्मन्मतेन यत्किंचिद्विशिष्टप्रत्ययत्वेनानैकान्त्यात्। तस्यापि पक्षीकारे तदतिरिक्तनिर्विकल्पकस्यानुपपत्त्या सर्वप्रत्यक्षोच्छेदप्रसङ्गात्। नापि द्वितीयः, प्रथमाक्षसन्निपातजविशिष्टप्रत्ययादुपरितनविशिष्टप्रत्ययस्य कारणदोषादिविशेषाभावात्; संस्कारसंभेदादेश्चादोषरूपत्वस्थापनात्। अतो विशिष्टप्रत्ययमात्राप्रामाण्यवादिना सर्वप्रत्यक्षनिर्मूलने परिशेषोऽपि

दूषयति। **विकल्पत्वादिति**। विकल्पत्वमित्यनेन किं विशिष्टिविषयकज्ञानत्वं विवक्षितम्। उत प्रथमाक्षसंनिपातजन्यप्रत्ययोत्तरविशिष्टविषयकप्रत्ययत्वमिति। तत्रापि किमुभयवादिसंप्रतिपन्नो विकल्पः पक्षः, उत विशिष्टप्रत्ययमात्रम्। आद्ये दोषमाह **निर्विकल्पकस्यापीति**। अस्मन्मते निर्विकल्पकस्यापि किंचिद्विशिष्टविषयकत्वेन तत्र व्यभिचारः संदिग्धानैकान्त्यम्। पक्षातन्तर्भवेऽपि तस्मिन् साध्यसंदेहात् हेतुनिश्चयाच्च। संदिग्धसाध्यवति निश्चितहेतुमत्त्वं संदिग्धानैकान्त्यम्। द्वितीये दोषमाह - **तस्यापीति**। विशिष्टप्रत्यमात्रं पक्षश्चेत् निर्विकल्पकस्यापि पक्षान्तर्गततया तदृतिरिक्तस्य निर्विकल्पकस्याभावात् प्रत्यक्षसामान्यस्य मिथ्याविषयकत्वं पर्यवसितमिति प्रत्यक्षसामान्यस्य **उच्छेदः** अप्रामाण्यं प्रसजतीति भावः। द्वितीये अप्रयोजकत्वमाह-**नापि द्वितीय इति। तद्विशेषः** - विशिष्टप्रत्ययत्व-विशेषः विशिष्टप्रत्ययत्वव्याप्यं प्रथमाक्षसंनिपातजन्यज्ञानोत्तरविशिष्टज्ञानत्वं हेतुरिति द्वितीयकल्पे प्रथमाक्षसंनिकर्षजन्यविशिष्टज्ञानात् उत्तरं जायमानस्य विशिष्टप्रत्ययस्य कारणदोषाद्यभावात् मिथ्याविषयकत्वं नास्तीति साध्याभाववति तत्र उक्तविशिष्टप्रत्ययत्वरूपहेतुसत्त्वात् व्यभिचार इति भावः। ननु संस्कारसंभेद एव दोष इत्यत्राह - **संस्कारेति**। स्मृतेः संस्कारजन्यायाः विसंवादित्वाभावेन संस्कारस्यादोषत्वादिति भावः। सर्वोऽपि विकल्पः विशिष्टप्रत्ययः अप्रमाणमिति ये वदन्ति तेषां मते ब्रह्मविषयकप्रत्यक्षस्यापि विशिष्टविषयकप्रत्यक्षत्वात् तदपि अप्रमाणं

शून्यतत्त्वमुपस्थापयेत्; न पुनरद्वैतम् । किंच परकल्पितबाह्यविषयनिर्विकल्पकस्य त्वन्मतेन मिथ्याविषयत्वात् तद्दृष्टान्तेनाद्वैतविषयनिर्विकल्पकस्यापि मिथ्याविषयत्वमनुमेयमिति । किंच–

श्लो. विकल्पाविषयत्वं चेत्–ब्रह्मणः प्रतिपाद्यते ।
श्रोतव्यादिविधीनां स्यादश्रोतव्यत्वमेव ते ॥

अतो न निर्विशेषस्य(स्यापि) ब्रह्मणो विकल्पाविषयत्वमपीति ॥

॥ इति शतदूषण्यां विकल्पाप्रामाण्यभङ्गवादः सप्तचत्वारिंशः ॥ ४७ ॥

स्यादिति ब्रह्मणोऽप्यसिद्धौ परिशेषः शून्यतत्त्वे स्यादिति शून्यतत्त्वमेव प्रमापयेत् न पुनः अद्वैतमित्यर्थः । **किंचेति** । त्वन्मते बाह्यपदार्थानां कल्पितत्वात् तद्विषयकनिर्विकल्पकस्य मिथ्याविषयकत्वात् तद्दृष्टान्तेनाद्वैतविषयकनिर्विकल्पकस्यापि मिथ्याविषगकत्वमेव स्यादित्यर्थः । अत्रायमनुमानप्रयोगः - अद्वैतविषयकनिर्विकल्पकं मिथ्याविषयकं निर्विकल्पकत्वात् कल्पितबाह्यविषयकनिर्विकल्पकवत् इति ।

ननु ब्रह्मविषयकप्रत्यक्षस्यापि विशिष्टविषयकत्वादिति यदुक्तं तदस्माकमनभिमतम् । निर्विशेषस्य ब्रह्मणः विकल्पविषयत्वाभावादित्याशङ्क्याह -

विकल्पाविषयत्वं चेत् ब्रह्मणः प्रतिपाद्यते ।
श्रोतव्यादिविधीनां स्यादश्रोतव्यत्वमेव ते ॥

इति । श्रवणादीनां विशिष्टप्रत्ययत्वेन विकल्पाविषये ब्रह्मणि असंभवात् श्रवणादिविधीनामप्रामाण्येनानुपादेयत्वं स्यादिति भावः । **अत इति** । अश्रोतव्यत्वप्रसङ्गादित्यर्थः । तथा च ब्रह्मणः श्रोतव्यत्वाङ्गीकारे ब्रह्मविषयको विकल्पोऽङ्गीकरणीयः । ततश्च विकल्पो मिथ्याविषयकः विकल्पत्वात् इत्यनुमानेन ब्रह्मविषयकविकल्पस्य मिथ्याविषयकत्वे ब्रह्मणः मिथ्यात्वं स्यादिति भावः ।

इति श्रीशतदूषणीव्याख्यायां तात्पर्यप्रकाशिकायां
विकल्पाप्रामाण्यभङ्गो नाम सप्तचत्वारिंशो वादः ॥

॥ अथ उपबृंहणवैघट्यवादः अष्टचत्वारिंशः ॥ ४८ ॥

गुणविभूतिविशेषविचित्रितं निगमसीमनि यत् समधीमहे।
स्मृतिपुराणशतैरुपबृंहितं तदिदमस्तु सदा हृदयेषु नः ॥

यदुच्यते–निर्विशेषचिन्मात्रब्रह्मात्मैक्यं त्रय्यन्तसिद्धं स्मृतिपुराणादीन्युपबृंहयन्तीति–तत्र तावत् तत्तत्प्रकरणादिपरामर्शेन भाष्कारैरेव तेषां यथावस्थितोऽर्थः प्रदर्शितः । सामान्यतः किंचिदुच्यते–यदा शब्दमात्रस्य निर्विशेषबोधनसामर्थ्यं नास्तीत्युपापीपदाम, तदा कैव कथा तद्विशेषाणाम् ? यदा

अथ उपबृंहणवैघट्यवादः अष्टाचत्वारिंशः ॥

गुणविभूतिविशेषविचित्रितं निगमसीमनि यत् समधीमहे ।
स्मृतिपुराणशतैरुपबृंहितं तदिदमस्तु सदा हृदयेषु नः ॥

निगमसीमनि=वेदान्ते उपनिषदि गुणविशेषैः विभूतिविशेषैश्च । विचित्रितं स्मृतिशतैः पुराणशतैश्च यत् उपबृंहितं तदिदम् अस्माकं हृदयेषु सदा अस्तु ॥

गुणविभूतीति । अनेनानुक्तविशेषैः सहावगतार्थव्यक्तीकरणरूपमुपबृंहणं स्वमते उपपद्यते, परमते तु तद्वैघट्यमिति सूच्यते । अनेन वादार्थः संगृहीतो भवति । स्मृतिपुराणादीनामपि विशिष्टविषयकत्वेन निर्विशेषविषयकत्वाभावात् विकल्पस्याप्रामाण्ये तेषामुपबृंहकत्वं न स्यादिति भावः) **यदुच्यत इति** । जीवात्मनः निर्विशेषचित्मात्रब्रह्मैक्यं उपनिषत्सिद्धं स्मृतिपुराणादीनि उपबृंहयन्तिः व्यक्तीकुर्वन्तीति यदुच्यते अद्वैतिभिः, तत्र भाष्यकारैः अद्वैत्युदाहृतवचनानां तत्तत्प्रकरणपरामर्शपूर्वकं यथावस्थितोऽर्थः प्रदर्शितः । अत्र सामान्यतः किंचिदुच्यते । "भाष्यकारैः प्रदर्शितः" इत्यनेन निर्विशेषे प्रकरणादिविरोधस्याविचाल्यत्वम् इह तदनुपपादने हेतुश्च सूच्यते । सामान्यत इह किंचिदुच्यत इति प्रतिज्ञा ।

यदा इति । पूर्वेषु वादेषु शब्दसामान्यं बिर्विशेषवस्तुबोधनसमर्थं न भवतीत्यस्माभिरुपपादितत्वात् शब्दविशेषरूपाणामितिहासपुराणादीनां निर्विशेषबोधकत्वं न भवतीति किं पृथग्वक्तव्यमस्ति । यदा च अशेषापि श्रुतिपरिषत् विशिष्टविषयेति निरणैष्म,

च श्रुतिपरिषदशेषाऽपि विशिष्टविषयेति निरणैष्म, तदा कथं तदुपबृंहणानि तत्प्रतीपानि(तत्प्रतिपादकानि) प्रतिपद्येमहि ? यदा पुनः निर्विशेषपरा सेति पश्यसि, तदा तत्रोपबृंहणं नाम (१) किं यथोक्तानुवादमात्रम् ? (२) उत तद्व्यक्तीकरणम्? (३) अथानुक्तवस्त्वन्तरवर्णनम्, (४) अन्यद्वा किंचित् इति । न प्रथमः, अनुवादमात्रेषूपबृंहणत्वप्रसिद्ध्यभावात्; प्रयोजनाभावाच्च । ज्ञातस्थिरीकरणं प्रयोजनमिति चेन्न; श्रुतिप्रामाण्ये तदर्थे च यथावन्मीमांसिते तदनुवादमात्रेण तदतिरिक्तस्थिरीकरणासंभवात् । यदि तत्रानाश्वासः, तदा कैव कथा

तदा श्रुतिपरिषदुपबृंहणानि श्रुतिविरुद्धतया निर्विशेषप्रतिपादकानीति कथं विश्वसिमः । यदा पुनः सा श्रुतिपरिषत् निर्विशेषपरेति आलोचयसि, तदा तत्र श्रुतिपरिषद्विषये स्मृत्यादिभि उपबृंहणं नाम किंरूपम्? श्रुत्युक्तार्थानुवादमात्रं वा, श्रुतिप्रतिपादितार्थस्पष्टीकरणं वा, श्रुतिपरिषदनुक्तार्थवर्णनं वा, अन्यद्वा किंचित् इति विकल्पयामः ।

तत्र प्रथमकल्पं दूषयति - **न प्रथम** इत्यादिना । श्रुत्युक्तानुवादमात्रे उपबृंहणत्वप्रसिद्ध्यभावात् उक्तार्थकथने प्रयोजनाभावाच्चेत्यर्थः । श्रुत्या ज्ञातस्यैवार्थस्य स्थिरीकरणं अनुवादस्य प्रयोजनमिति शङ्कते - **ज्ञातस्थिरीकरणमिति** । किमर्थनिश्चय एव स्थिरीकरणम्, उत ततोऽन्यत् किंचित् । नाद्यः, अर्थनिश्चयस्य निश्चितप्रामाण्येन मीमांसितेन च श्रुतिवाक्येन सिद्धतया अनुवादापेक्षाविरहात् । न द्वितीयः । अनुवादेन अर्थनिश्चयातिरिक्तस्य स्थिरीकरणाख्यस्य कस्यचिददर्शनादिति समाधत्ते - **न श्रुतिप्रामाण्ये इति** । **मीमांसिते**=मीमांसयानिश्चिते । **तदनुवादमात्रेण**=श्रुत्युक्तानुवादमात्रेण । कथितस्य पुनःकथनमनुवादः । **तदतिरिक्तेति** । मीमांसितातिरिक्तेत्यर्थः । विश्वासार्थमनुवाद इत्यत्राह- **यदि तत्रेति** । श्रुतौ अविश्वासे सति हि विश्वासार्थं स्मृत्यादिभिरनुवादः इति युज्यते । तत्रेदमालोचनीयम्-यदि भ्रमप्रमादादिसंभावनाशून्ये अपौरुषेये वेदेऽपि विश्वासो नास्ति, तदा भ्रमप्रमादादिसंभवानाविषयेषु पौरुषेयेषु स्मृत्यादिवाक्येषु कथं विश्वासो भवेत् इति । अर्थनिश्चयहेतुपौष्कल्येऽपि श्रुतितोऽर्थनिश्चयाभावे अर्थसंदेहहेतुमत्स्मृत्यादिभ्यः सुतरामर्थनिश्चयो न संभवतीति भावः।

संभवद्भ्रमप्रमादादिदोषेषु वाक्येषु। न च साक्षात्सौगतमतमाश्रित्य संवादात्प्रामाण्यमनुमन्तुमर्हसि। नचैवमु (चैतदु ?) पबृंहणान्तरसापेक्षम्; अनवस्थाप्रसङ्गात्। न च तन्निरपेक्षम्; श्रुतिवदेव तव तत्राप्यनाश्वासप्रसङ्गात्॥ परस्परसंवादादुभयत्राश्वास इति चेत्, न (मास्तु); असकृदनुसंहितैकश्रुति-वाक्यमात्रजन्मनि तत्प्रत्ययप्रवाहेऽपि तस्य कर्तुं शक्यत्वात्, अतिप्रसङ्गश्च तदेति।

नापि द्वितीयः, निर्विशेषपक्षे तदयोगात्। तथा हि–यन्निर्विशेषं श्रुतम्, तत्

ननु संवादादेव शब्दस्य प्रामाण्यनिश्चयः । ततश्च उपबृंहणसंवादात् प्राक् श्रुतेरर्थनिश्चयाभावात् उपबृंहणाधीनमेवार्थावधारणात्मकं स्थिरीकरणमित्यत्राह - **न च साक्षादिति ।** बाह्यत्वप्रच्छादनं विनेत्यर्थः । तथा च संवादेन वेदप्रामाण्योक्तौ तव सौगतमतप्रवेशापत्तिः । बौद्धा हि संवादेन प्रामाण्यमिति वादिनः । संवादात् प्रामाण्ये दोषान्तरमाह-**नचैवमिति ।** किम् उपबृंहणस्य प्रामाण्यमपि उपबृंहणान्तरसंवादसापेक्षम्, उत तन्निरपेक्षम् । नाद्यः, अनवस्थाप्रसङ्गात् । न द्वितीयः, श्रुताविव उपबृंहणेऽप्यविश्वासप्रसङ्गात् इति भावः । शङ्कते - **परस्परेति ।** उपबृंहणसंवादात् श्रुतौ विश्वासः, श्रुतिसंवादात् उपबृंहणे विश्वास इति शङ्का । परिहरति - **मास्तु इति ।** परस्परसंवादो मास्तु । पुनः पुनः अनुसंहितं यत् एकं श्रुतिवाक्यं तज्जन्ये तदर्थविषयकज्ञानप्रवाहेऽपि **तस्य**=आश्वासस्य कर्तुं शक्यत्वात् इत्यर्थः । न च प्रमाणान्तरसंवाद एवाश्वासहेतुरिति वाच्यम् । अनिश्चितप्रामाण्यत्वाविशेषे सति स्वसंवादादप्याश्वाससंभवादिति भावः । **अतिप्रसङ्गश्च तदेति ।** बाह्यागमानामपि परस्परसंवादादाश्वासप्रसङ्ग इति भावः ।

उपबृंहणं नाम श्रुत्युक्तार्थव्यक्तीकरणमिति द्वितीयकल्पं दूषयति - **नापि द्वितीय इति ।** निर्विशेषं ब्रह्मेति पक्षे व्यक्तीकरणायोगात् । अयोगमेवोपपादयति -. **तथा हीत्यादिना।** किं निश्चयमात्रं व्यक्तीकरणम्, उत सामान्यतः प्रतिपन्नस्य अतिरिक्तविशेषाकारनिश्चयः इति विकल्पमभिप्रेत्य आद्ये दोषमाह-**यन्निर्विशेषमिति ।** यन्निर्विशेषं तत् श्रुत्यैव निश्चितमिति

श्रुत्यैव व्यक्तम् । तदतिरिक्तप्रकाशने तु सविशेषत्वावश्यंभावादुपबृंहणीयवैघट्यम् । मिथ्याभूतातिरिक्ताकारबोधनेऽपि कथं तत्त्वावेदकस्यातत्त्वावेदकमुपबृंहणं स्यात् । अथ श्रुतौ कस्यचिदप्रतिपन्नं कस्यचित्प्रतिपन्नं ब्रह्मस्वरूपमेवात्र व्यज्यत इति मन्यसे—तदपि न; श्रुतिं प्रति अनङ्गत्वप्रसङ्गात् ॥ तदाभिमुख्यजननात् तदङ्गत्वमिति चेत् तत्फलसिद्धौ किं तदाभिमुख्येन ? असिद्धौ वा कुतस्तत् ?

नापि तृतीयः; अनुपबृंहणत्वप्रसङ्गादेव । अन्यथा परस्परभिन्नार्थानां वेदभागानामेव परस्परोपबूंहणत्वप्रसङ्गात् ।

न निश्चयार्थमुपवृंहणावश्यकतेत्यर्थः । द्वितीये अतिरिक्ताकारः किं सत्यः उत मिथ्या । आद्ये आह - **तदतिरिक्तेति** । सत्यस्य अतिरिक्ताकारस्य उपबृंहणेन प्रकाशने उपबृणीयश्रुतेः उपबृंहणस्मृत्यादीनां च विरोधः स्यादित्यर्थः । द्वितीये आह **मिथ्याभूतेति** । मिथ्याभूतस्यातिरिक्ताकारस्य बोधनेऽपि तत्त्वावेदकश्रुतेः अतत्त्वावेदकस्मृत्यादिकं कथमुपबृंहणं स्यात् इत्यर्थः । ननु श्रुतौ कस्यचित् पुरुषस्यानवगतं कस्यचिदवगतं च यत् ब्रह्मस्वरूपं तदेवात्र उपबृंहणे **व्यज्यते**=ज्ञायते इति चेत्-न । श्रुतिं प्रति उपबृंहणस्यानङ्गत्वप्रसङ्गात् । श्रुत्या प्रतिपन्नेऽर्थे विशेषबोधनेन वा श्रुतौ संशयितार्थव्यक्तीकरणेन वा श्रुत्युपकारकत्वे एव उपबृंहणत्वं स्यात्, व तु स्वातन्त्र्येण कंचित् पुरुषं प्रति बोधकत्वमात्रेणेति भावः । शङ्कते-**तदाभिमुख्येति** । मूलभूतश्रुतौ प्रवृत्त्युत्पादनेन श्रुत्यङ्गत्वं श्रुत्युपकारकत्वमिति नाशङ्कनीयम् । उपबृंहणेनैवार्थावधारणरूपफले सिद्धे सति किं श्रुत्याभिमुख्योत्पादनेन । **असिद्धौ वा कुतस्तत्**=उपबृंहणेनार्थावधारणरूपफलस्य असिद्धौ **तत्** = आभिमुख्यं कुतः । उपबृंहणावधारितार्थस्य उपादेयत्वबुद्ध्या हि तत्प्रतिपादकश्रुतौ मूलभूतायां प्रवृत्तिः स्यादिति भावः ।

अनुक्तवस्त्वन्तरमात्रवर्णनं व्यक्तीकरणमिति तृतीयपक्षं दूषयति - **नापि तृतीय** इति। **अनुपबृंहणत्वादेवेति** । श्रुत्यनुक्तार्थप्रतिपादकस्य श्रुत्युपबृंहणत्वाभावादेवेत्यर्थः । **अन्यथा**=अनुक्तार्थान्तरप्रतिपादकस्यापि उपवृंहणत्वे परस्परभिन्नार्थप्रतिपादकेषु वेदभागेष्वेव परस्परोपबृंहणत्वप्रसङ्गात् इत्यर्थः ।

नापि चतुर्थः; अत्यन्तभिन्नार्थत्वस्य, अभिन्नार्थत्वेऽप्यन्यूनानतिरिक्तविषयत्वस्य, अतिरिक्तविषयत्वेऽपि सत्यमिथ्यार्थत्वयोर्दूषितत्वात् न्यूनबोधनमवशिष्यते। न च तदाऽप्युपबृंहणता; उक्तांशस्य तुल्यतया नैरपेक्ष्यात्। अनुक्तांशेऽनुक्तेरेवोपबृंहणत्वगन्धाभावादिति। किंच, यच्चाधिकं श्रुतौ बोध्यते, तत्सत्यत्वे सविशेषता। तन्मिथ्यात्वे श्रुतिरतत्त्वावेदिका, पुंवाक्यं तु न तथेत्यापन्नम्। न च मा भूदुपबृंहणमिति वाच्यम्; शारीरकाधिकरणेषु तत्रतत्र स्मृतिसंवादोदाहरणादिविरोधात्। अन्यथा वेदा(चेद)नुग्राहकतर्कस्यापि प्रहाणप्रसङ्गात्।

अन्यद्वा किंचिदिति चतुर्थपक्षं दूषयति - **नापि चतुर्थ** इत्यादिना। अत्रायं समुदायार्थः - अस्तु नाम उपबृंहणत्वं नाम यत्किंचित्। तथापि उपबृंहणत्वेनाभिमतं स्मृतिपुराणादिकं उपबृंहणीयश्रुत्या साकं किम् अत्यन्तभिन्नार्थम्, उताभिन्नार्थम्। अभिन्नार्थत्वेऽपि अतिरिक्तविषयकं वा न वा। अतिरिक्तविषयकत्वेऽपि सत्यविषयकं वा मिथ्याविषयकं वा। अतिरिक्तविषयकत्वाभावेऽपि अन्यूनानतिरिक्तविषयकं न्यूनविषयकं वा। तत्र पक्षान्तरेषु उपबृंहणत्वस्य त्वया वक्तुमशक्यत्वस्योपपादितत्वात् न्यूनविषयकमिति चरमः पक्षः परिशिष्यते। तत्रापि उपबृंहणत्वं न संभवति। तथा हि किं स्मृत्यादिकं श्रुत्यर्थांशमुपबृंहयति, उत श्रुत्यनुक्तार्थांशम्। नाद्यः स्वोक्तांशो यथा श्रुत्या प्रतिपाद्यते तथैव स्वेनापि प्रतिपाद्यमानो दृश्यते न त्वाकारविशेषेणेति तस्य स्वनैरपेक्ष्यात्। न द्वितीयः तदंशस्य श्रुत्यनुक्तत्वादेव उपबृंहणत्वाभावादिति।

यच्चाधिकमिति। उपबृंहणस्य-यूनविषयकत्वे यत् अधिकं श्रुतौ बोध्यते तस्य सत्यत्वे सविशेषता। मिथ्यात्वे श्रुतिरतत्त्वावेदिका भवेत्। स्मृत्यादिकं पुरुषवाक्यं तु न तथेत्यापन्नम् इत्यर्थः। इयता प्रबन्धेन पूर्वं परोक्ततया अनूदितं स्मृत्यादीनापुपबृंहकत्वं दूषितम्। अथ यदि कश्चित् उपबृंहणं क्वाप्यनपेक्षितमिति ब्रूयात् तमपि प्रसङ्गान्निराकरोति- **न च माभूदिति**। यदि उपबृंहणं क्वाप्यनपेक्षितं, तदा शारीरकमीमांसाधिकरणेषु तत्र तत्र ''स्मृतेश्च'' इति संवादतया स्मृतिप्रदर्शनं विरुध्येत इति भावः। **अन्यथेति**। अन्यथोच्यते

तत्प्रहाणे पुनः, 'आंर्षं धर्मोपदेशम्' इत्यादिमहर्षिवचनविरोधः । न चैवमस्मन्मते प्रसङ्गः, श्रुतिप्रतिपन्नस्यैव ब्रह्मणोऽनन्तगुणविभूतेरप्रतिपन्नानेकगुणविभूतिवैशिष्ट्यबोधनेन व्यक्तीकरणोपपत्तेः । न चाप्रतिपन्नस्यांशस्यावेदार्थत्वम् विप्रकीर्णानन्तशाखे महति वेदवृक्षे यत्र क्वचित् कोटरे तस्यापि निलीनत्वात् । तस्य चाल्पभागश्राविभिरयोगिभिरधिगन्तुमशक्यत्वात्, तत्कृते च

चेत् उपबृंहणापेक्षा नास्तीत्युच्यते चेदित्यर्थः । श्रुत्यनुग्राहकतया प्रसिद्धयोः तर्कोपवृंहणयोः अन्यतरस्य त्यागे तर्कोऽपि त्याज्यःस्यात् । न चेष्टापत्तिः इति वाच्यम् ।

"आर्षं धर्मोपदेशं च वेदशास्त्राविरोधिना ।
यस्तर्केणानुसन्धते स धर्मं वेद नेतरः ॥"

इत्यादिमहर्षिवचनविरोध इति भावः ।

ननु भवतामपि स्मृत्या न श्रुतिप्रतिपन्नांशस्योपवृंहणमावश्यकम् । तंदशे भवदुक्तन्यायेन उपबृंहणस्य वैयर्थ्यात् । न च श्रुत्यप्रतिपन्नांशे । तद्विषयकत्वे श्रुतिमूलकत्वाभावेनाप्रामाण्यप्रसङ्गात् । तस्मात् भवन्मतेऽप्युपवृंहणानुपपत्तिस्तुल्येत्याशङ्कां परिहरति - **न चैवमस्मन्मत इति** । ब्रह्मणोऽनन्तगुणविभूतिविशिष्टतया कतिपयगुणविभूतीनामस्मदधीतवेदभागेषूपलम्भेऽपि अनधीतवेदभागेपु अधिकगुणविभूतीनामुपलम्भात् तद्बोधनाय, अनन्तशाखायुक्ते महति वेदवृक्षे यत्र क्वचित् कोटरलीनानामस्माभिरज्ञातानां गुणविभूतीनां बोधनाय च योगिनां महर्षीणां श्रुत्युपबृंहणस्मृत्यादिप्रणयनस्योपपत्तेः । अतोऽस्मदप्रतिपन्नार्थस्य स्मृत्युक्तस्य वेदार्थत्वं नास्तीति न मन्तव्यम् । तथा चाधीयमानश्रुत्यर्थस्य श्रुत्यन्तरप्रतिपाद्यविशेषैः सह प्रतिपादनमुपबृंहणमिति भावः ।

अत्र मूले "योगिभिरुपबृंहणप्रणयनोपपत्तेः" इति वाक्ये उपबृंहणस्य प्रणयनमिति कर्मणि षष्ठ्याः "कर्मणि च" इति सूत्रेण समासनिषेधात् अयं प्रयोगोऽसाधुरित्याशङ्क्य तस्य साधुत्वसमर्थनं विस्तरेण चण्डमारुते कृतमस्ति ।

योगिभिरुपबृंहणप्रणयनोपपत्तेः । कति कति च (न) दृश्यन्ते अधीयमानास्वपि शाखास्वप्रतिपन्नाः संशयिताश्च उपबृंहणाधीनाध्यवसायाः सारार्थाः । अन्यथा कथं वेदार्थे वादिनां मतभेदसमुत्थानम् ? न चोपबृंहणानां मिथो विरोधान्निर्णयासिद्धिः; उपबृंहणीयविरोधाविरोधाभ्यां विशेषात् । अत एव हि शारीरकस्मृत्यधिकरणे कपिलादिस्मृतेर्निरासः । उपबृंहणीयाविरुद्धमन्वादिस्मृतिसन्निधौ तद्विरुद्धकपिलादिस्मृतेरप्रमाणत्वान्न तैरुपबृंहणम्; नाप्युपबृंहणीयबाध इति हि तत्रार्थः । तेन तामसराजससङ्कीर्णपुराणादिभिर्वेदोपबृहणं पुराणविभागविवेकपरिज्ञानशून्यानामविवेकितानिबन्धनमिति तन्नाद्रियामहे । उक्तं हि मात्स्ये, ‘‘अग्नेः शिवस्य माहात्म्यम्’’ इत्यारभ्य, ‘‘सात्त्विकेष्वथ कल्पेषु माहात्म्यमधिकं हरेः । तेष्वेव योगसंसिद्धा गमिष्यन्ति परां गतिम् ॥’’, इत्यन्तम् । तदेतत् सर्वमर्थतो

श्रुत्या निश्चेतुमशक्याः उपबृंहणेनैव निश्चेयाः सारार्थाः बहवःसन्ति । यदि सर्वं वेदेनैवावसीयेत तर्हि वादिनां मतभेदः नोत्तिष्ठेत् । अत उपबृंहणमावश्यकमेवेत्याह - **कति चेति ।**

ननूपबृंहणापेक्षायां श्रुत्या निर्णयो न सिध्येत् । उपबृंहणानां परस्परविरोधात् । अन्यतरपरित्यागे नियामकाभावादित्याशङ्क्य निराकरोति - **न चोपबृंहणानामिति ।** यस्योपबृंहणस्य उपबृंहणीयश्रुतिविरोधो नास्ति तत् ग्राह्यम् । यस्य तु श्रुतिविरोधोऽस्ति तत् त्याज्यमिति निर्णयान्न दोष इति भावः । **अत एव हि**=श्रुतिविरोधादेव हि ब्रह्ममीमांसागतस्मृत्यधिकरणे कपिलमुनिप्रणीतस्मृतेर्निरासः । **तद्विरुद्धेति** । उपबृंहणीयश्रुतिविरुद्धेत्यर्थः । **उपबृंहणीयबाधः** उपबृंहणीयश्रुतेः कपिलस्मृत्या बाधः । **तत्रार्थः** = स्मृत्यधिकरणप्रतिपाद्योऽर्थः । **पुराणविवेकेति** । सात्त्विकं राजसं तामसमिति पुराणे विभाग इत्यर्थः ।

एतावता उक्तः सर्वोऽप्यर्थः अतिगम्भीरे भाष्ये संक्षिप्तैः भावगर्भैः शब्दैः निदर्शित इत्याह - **तदेतत् सर्वम् इति ।**

निदर्शितं भाष्ये–'उपबृंहणं नाम विदितसकलवेदतदर्थानां स्वयोगमहिमसाक्षात्कृतवेदतत्त्वार्थानां वाक्यैः स्वावगतवेदवाक्यार्थव्यक्तीकरणम्। सकलशाखानुगतस्य वाक्यार्थस्याल्पभागश्रवणदुरवगमत्वेन तेन विना निश्चयायोगादुपबृंहणं हि कार्यमेव' इति। एवं च सामान्यतो निर्विशेषतया उपवृंहणासंभवेऽनुपवृंहितेन वेदेनार्थनिश्चयायोगात् वेदविप्लावक एव निर्विशेषवादः। स्मरन्ति च– 'इतिहासपुराणाभ्यां वेदं समुपबृंहयेत्। विभेत्यल्पश्रुतात् वेदो मामयं प्रतरिष्यति॥ इति॥

॥ इति शतदूषण्याम् उपबृंहणवैघटचवादः अष्टचत्वारिंशः ॥ ४८ ॥

"गम्भीरे ब्रह्मभागे गणयितुमखिलं कः प्रवीणः प्रमेयं" इत्याचार्योक्तरीत्या गम्भीरे श्रीभाष्ये निगूढमर्थमन्विष्य अस्मान् बोधयितुं कोऽन्यः समर्थः सर्वतन्त्रस्वतन्त्रेभ्यः दयालुभ्यः आचार्यवर्येभ्यः।

निगमयति - **एवं चेति**। उक्तरीत्या स्मृतिपुराणादिभिः ब्रह्मणो निर्विशेषतया उपबृंहणमशक्यमिति, उपबृंहणानुपकृतेन वेदेन अर्थनिश्चयो न संभवतीति च स्थिते निर्विशेषवादः वेदविप्लावकः वेदवञ्चक इति स्थितमिति भावः। उपबृंहणावश्यकताप्रदर्शकस्मृतिवचनमुदाहरति - **स्मरन्ति चेति**।

इति श्रीशतदूषणीव्याख्यायां तात्पर्यप्रकाशिकायाम्
उपबृंहणवैघटचवादः अष्टचत्वारिंशः॥

* * *

॥ अथ ऐक्योपदेशान्यथानुपपत्तिभङ्गवादः एकोनपञ्चाशः ॥ ४९ ॥

श्लो. त्रिविधचिदचिदन्तर्यामितां प्राप्य तिष्ठन्
निखिलनिगमनिष्ठैर्नित्यमैक्योपदेशैः ।
भ्रमममलधियां यो वारयत्येकभक्त्या
भवतु शरणवाणी तत्पदे शाश्वती नः ॥

यदाहुः-'तत्त्वमसि', 'क्षेत्रज्ञं चापि मां विद्धि' इत्याद्यैक्योपदेशान्यथानुपपत्त्या

अथ ऐक्योपदेशान्यथानुपपत्तिवादः एकोनपञ्चाशः ॥

त्रिविधचिदचिदन्तर्यामितां प्राप्य तिष्ठन्
निखिलनिगमनिष्ठैर्नित्यमैक्योपदेशैः ।
भ्रममलिनधियां यो वारयत्येकभाक्त्या
भवतु शरणवाणी तत्पदे शाश्वती नः ॥

एकभक्त्या अनन्यभक्त्या सहितैः निखिलवेदनिष्ठैः ऐक्योपदेशैः शरीरात्मभावनिबन्धनैः भ्रममलिनधियां भक्तानां स्वनिष्ठत्वभ्रमं स्वरूपैक्यभ्रमंच त्रिविधचेतनाचेतनान्तर्यामी यो वारयति तस्य भगवतो नारायणस्य फलप्रदानोन्तरमिवाद्यापि चरितार्थमन्यतामापादयन्ती मम शरणवाणी भवतु। ऐक्योपदेशैः जनितं भ्रमं जीवब्रह्मैक्यभ्रमं जगन्नास्तीति भ्रयं च अन्तर्यामितां प्राप्य वारयतीति वा अर्थः । पूर्ववादे उपबृंहणवैघटच्मुक्तम् । अत्रतूपब्रंहणीयोपदेश एव न संभवतीति निरूप्यत इति संगतिः ।

पूर्वपक्षः

यदाहुरिति । "तत्त्वमसि" क्षेत्रज्ञं चापि मां विद्धि" इत्यादेः जीवब्रह्मणोरैक्योपदेशस्य तत्त्वज्ञानद्वारा मोक्षार्थत्वात् श्रुतिसिद्धस्यैक्यस्य पारमार्थिकत्वात् तदन्यथानुपपत्त्या जीवब्रह्मभेदज्ञानस्य भ्रमत्वं परिशुद्धेऽपि ब्रह्मणि भ्रमोपपादकमज्ञानं तन्निवृत्त्या उपदेशस्य सप्रयोजनत्वं च कल्पनीयमित्यर्थः । भेदभ्रमनिवृत्तिरूपमोक्षोपदेशस्य सप्रयोजनत्वं चेत्यपि विवक्षितम् । "अतो जीवपरयोः" इत्यादिना तस्यापि उपसंहरिष्यमाणत्वात् । "अज्ञानं

परिशुद्धे ब्रह्मण्येवाज्ञानं भेदभ्रमश्चावश्यं कल्पनीयम्। न चात्रैक्यं न प्रतीयते; न चाविवक्षितम्; सामानाधिकरण्यस्य तन्निष्ठत्वात्; विशिष्टैक्यवादिनाऽप्यैक्यमात्रस्याऽऽस्थितत्वाच्च । न चेदमारोपवृत्त्या सामानाधिकरण्यम्, तत्त्वोपदेशप्रकरणविरोधात्। न च सम्बन्धादिद्वारोपचारः; बाधकाभावात्। यद्यप्यस्मन्मतेऽपि लक्षणा, तथाऽपि प्रधानभूतसामानाधिकरण्यप्रतिपाद्यस्य मुख्यस्यैक्यस्यापरित्यागात्

भेदभ्रमश्चावश्यं कल्पनीयम्'' इत्यत्र ''नपुंसकमनपुंसकेन'' इति सूत्रेण एकशेषः नपुंसकत्वं च । ननु भेदप्रतीतिबलात् ऐक्योपदेशोऽन्यपर इत्यत्राह - **न चात्रैक्यमिति** । संभाव्यमानान्यथासिद्धेः भेदप्रत्यक्षात् असंभाव्यमानदोषगन्धा श्रुतिर्बलीयसीत्यभिप्रायेणाह - **सामानाधिकरण्यस्येति** । **तन्निष्ठत्वात्**=ऐक्यतात्पर्यकत्वात् । ऐक्याविवक्षायां विशिष्टाद्वैतिनामप्यपसिद्धान्त इत्याह - **विशिष्टैक्येति** । **आस्थितत्वात्**=श्रुतितात्पर्यविषयतया स्वीकृतत्वात् । ननु स्तुत्यर्थं जीवे ब्रह्मारोपोऽस्तु आदित्यो यूप इतिवत् इति सामानाधिकरण्यस्यान्यथासिद्धिमाशङ्क्य विधिशेषत्वाभावात् न स्तुतिपरत्वमित्याह - **न चेदमिति** । **न च संबन्धादीति** । संबन्धः शक्यसंबन्धः । आदिशब्देन मुख्यार्थानुपपत्तिर्विवक्षिता । यद्वा समानगुणग्रहणम् । तथा च जीवे ब्रह्मशब्दप्रयोगः ब्रहसंबन्धप्रयुक्तः औपचारिको भवतु इति शङ्का । संबन्धादिः द्वारं प्रयोजको यस्य स संबन्धद्वारः स चासावुपचारश्च संबन्धद्वारोपचारः । **बाधकाभावादिति** समाधानम् । मुख्यार्थे ऐक्येऽनुपपत्त्यभावादिति तदर्थः । ननु भवद्भिरद्वैतिभिरपि तत्त्वंपदयोर्लक्षणा स्वीक्रियते, सापि बाधकाभावान्न स्यात् । यदि च सर्वज्ञत्वविशिष्टाल्पज्ञत्वविशिष्टयोरैक्यानुपपत्त्या लक्षणा, तर्हि अस्माकमपि तदनुपपत्त्यैव लक्षणास्तु इत्यत्राह - **यद्यपीति** । अस्मन्मतेऽपि अद्वैतिमतेऽपि । **प्रधानभूतसामानाधिकरण्यप्रतिपाद्यस्येति** । प्रधानभूतं यत् समानाधिकरण-वाक्यं तत्प्रतिपाद्यस्येत्यर्थः । एतदुक्तं भवति - वाक्यं हि पदात् प्रधानम् । अतः तदर्थ एव अनुरोद्धव्यः । समानाधिकरणवाक्यस्य च मुख्यविशेष्यैक्यं मुख्यतात्पर्यविषयः तदभावे तु अमुख्यार्थैक्यमिति सर्वसंमतम् । अतस्तत्त्वमस्यादिवाक्ये पूर्वोक्तारोपवृत्तिरूपोपचाराङ्गीकारे मुख्यार्थैक्यपरित्यागो दोषः । अस्मन्मते तु मुख्यैक्यापरित्यागात् न लक्षणा

तत्संरक्षणाय च स्वरूपोपलक्षणभूतनिमित्तमात्रप्रहाणादिकं न दोषाय भवति । न च भेदाभेदसमुच्चयः; व्याघातात् । अत एव नोभयत्यागः । तात्पर्यविरोधस्योक्तत्वाच्च । अन्यथा शून्यतैव पर्यवस्येत् । न चैष दृष्टिविधिः; उपासनैकवाक्यत्वाभावात्; तत्सद्भावेऽपि तल्लिङ्गाभावाच्च । अतो जीवपरयोरैक्ये तद्भेदे च प्रतीयमाने द्विचन्द्रदर्शनमूलभूतदोषवत् आत्मभेददर्शनहेतुरविद्याऽभ्युपगन्तव्या । तन्मूलभेदभ्रमोन्मूलनेन सप्रयोजन एवैक्योपदेशः यथैकश्चन्द्र इतीति ॥

दोषः । अपि च प्रवृत्तिनिमित्तपरित्यागेन स्वरूपलक्षणा मुख्यैक्यसिद्ध्यर्थमेवाङ्गीक्रियते । तव तु न तदर्थम् । अतोऽपि स्वरूपलक्षणा न दोषः, प्रत्युत मुख्यैक्यार्थत्वात् अनुकूलैवेति । **तत्संरक्षणायेति** । मुख्यैक्यसंरक्षणायेत्यर्थः । **स्वरूपेति** । स्वरूपस्योपलक्षणभूतं यत् निमित्तं सर्वज्ञत्वमज्ञत्वं च तत्मात्रत्यागादिकं इत्यर्थः । मात्रशब्देन विशेष्यस्वरूपत्यागव्यवच्छेदः ।

जीवब्रह्मणोः भेदाभेदाङ्गीकारात् न भेदज्ञानस्य भ्रमत्वं कल्पनीयमिति कस्यचित् चोद्यं निरस्यति - **न च भेदाभेदेति** । भेदाभेदयोरेकाधिकरणकत्वं समुच्चयः । स च व्याहत इत्यर्थः। ननु भेदप्रतीतेरभेदाभावो विषयः, ऐक्योपदेशस्य च भेदाभावो विषयः । अतो भेदाभेदोभयत्यागे न दोष इत्यत्राह - **अत एवेति** । व्याघातादेवेत्यर्थः । अभेदाभावे भेदस्य, भेदाभावेऽभेदस्य च नियतत्वात् भेदाभेदसमुच्चय एव पर्यवसानात् व्याघात इति भावः । दूषणान्तरमाह - **तात्पर्येति** । ऐक्यतात्पर्यस्योक्तत्वात् भेदाभेदपक्षे तद्विरोध इत्यर्थः । भेदाभेदोभयत्यागे दोषान्तरमाह - **अन्यथेति** । ननु तत्त्वमसीति वाक्यं मनो ब्रह्मेत्यादिवत् दृष्टिविधिः इत्यत्राह - **न चैष इति** । मनो ब्रह्मेत्युपासीतेति उपासनैनैकवाक्यत्वात् मनसि ब्रह्मदृष्टिविधिराश्रीयते । न तथा तत्त्वमसीत्यत्र उपासनैकवाक्यत्वमस्तीत्यर्थः। **तत्सद्भाव इति** । क्वचित् उपासनैकवाक्यत्वेऽपि ऐहिकामुष्मिकफलादिरूपलिङ्गात् दृष्टिविधित्वमाश्रीयते । तत्त्वमसीत्यत्र न तादृशं लिङ्ग-मस्तीत्यर्थः । अथवा इतिशब्दरूपं लिङ्गमपि अत्र विवक्षितम् । **अत इत्यादि** । तद्भेदे च इत्यतः पूर्वं सिद्धे इति शेषः । जीवपरयोरैक्ये

अत्र ब्रूमः-यदि ऐक्योपदेशोऽन्यथानुपपन्नः स्यात्, तदैव परिशुद्धे ब्रह्मण्यज्ञानभेदभ्रमादयः कल्प्येरन् । स त्वन्यथाऽप्युपपन्नः, अन्यथैवोपपन्नश्च । तथा हि—शरीरात्मभावनिबन्धनं सामानाधिकरण्यं व्युत्पादितमन्यत्र । न चात्र द्वयोः स्वरूपैक्यं विवक्षितुं शक्यम् । विरुद्धयोस्तदसंभवात् । अन्यथा यूपादित्यैक्यवाक्येऽपि भेदभ्रमहेतुदोषकल्पनप्रसङ्गात् । विरोधादेश्च समानत्वात् । न च लाक्षणिकसामानाधिकरण्येऽप्यैक्यं परित्यक्तम्; यया कयाचिद्वृत्त्या

सामानाधिकरण्येन सिद्धे सति तयोर्भेदे प्रतीयमाने सति द्विचन्द्रदर्शनमूलभूतदोषवत् आत्मभेददर्शनहेतुः अविद्या अङ्गीकार्या । अविद्यामूलकभेदभ्रमोन्मूलनेन सप्रयोजन एव ऐक्योपदेशः, यथा चन्द्रभेदभ्रमनिवर्तकः एकश्चन्द्र इत्युपदेशः तद्वत् इति ।

सिद्धान्तः

सिद्धान्तमारभते- **अत्र ब्रूम इति** । ऐक्योपदेशः यदि स्वरूपैक्यं बिना अनुपपन्नः स्यात्, तदैव अर्थापत्त्या परिशुद्धे ब्रह्मणि अज्ञानं भेदभ्रमः भ्रमोन्मूलनं च कल्प्येरन् । स तु ऐक्योपदेशः अन्यथापि स्वरूपैक्यं बिनापि उपपन्नः, अन्यथैवोपपन्नश्च । अतोऽज्ञानादिकल्पनं निर्मूलमित्यर्थः । भ्रमादय इति आदिशब्देन भ्रमोन्मूलनं गृह्यते । **अन्यथापीति** अभ्युपगम्यवादः । तावताप्यर्थापत्तिनिरासात् । तत्त्वार्थमाह-**अन्यथैवोपपन्न** इति । वस्तुतस्तु इति शेषः । **तथा हीत्यादि** । सामानाधिकरण्यं शरीरात्मभावनिबन्धनमिति अखण्डार्थसाभानाधिकरण्यवादे उपपादितत्वात् तथैव निर्वाहे संभवति अत्यन्तविरुद्धस्वभावयोर्जीवब्रह्मणोरैक्यं न विवक्षितुं योग्यमिति ऐक्योपदेशः शरीरात्मभावेनोपपादनीयः, न तु परिशुद्धे ब्रह्मणि भ्रमादिकल्पनेनेति भावः । **अन्यथेति** । अविरुद्धगतिसद्भावेऽपीत्यर्थः । आदित्यो यूप इति ऐक्योपदेशात् यूपादित्ययोः स्वरूपैक्यमेव तयोर्भेदभ्रमस्तु अज्ञानमूलक इति कल्पनीयं स्यादिति भावः ।

एवमैक्योपदेशस्य शरीरात्मभावेनान्यथोपपत्तिरुक्ता । अथ पूर्वपक्षिणा दूषितमुपचारपक्षमुद्धरति - **न च लाक्षणिकेति** भागत्यागलक्षणया=पदद्वयप्रवृत्ति-

एकस्मिन्नेव वृत्तेरङ्गीकृतत्वात् । अतः सामानाधिकरण्यस्य संभवति गत्यन्तरे परिशुद्धब्रह्मणि तन्मूलविरुद्धाज्ञानादिपरिकल्पनं निर्मूलम् । अज्ञानमूलभेदभ्रमवादे च उपदेश एव नोपपद्यत इति स्थितमन्यत्र(३४वा) । न चानुपपन्नत्वस्योपपादकतया स्वयमनुपपन्नान्तरं कल्प्यम् । न चाविद्यादेः स्वरूपमुपपत्तिमदिति दर्शितम् (४१ वा) । यदि च दूरं गत्वा दुर्घटत्वमेव भूषणमिति वल्गसि, तर्ह्यैक्योपदेशमेवादौ दुर्घटमभिमन्येथाः ॥ अप्रामाण्यं तर्हि तस्य स्यादिति चेत् (न; ?) अस्मन्मत-प्रतिपादितप्रकारेण प्रामाण्यस्य सिद्धत्वात् । यदि वा मा भूत् प्रामाण्यम् ।

निमित्तत्याग- पूर्वकविशेष्य-स्वरूपलक्षणया सादृश्यमूलकगौणीवृत्त्या वा एकस्मिन्नेवार्थे प्रवृत्त्यङ्गीकारात् समानाधिकरणवाक्यप्रधानार्थस्यैक्यस्य अपरित्यागात् उपचारो न दोषायेत्यर्थः । अयमभ्युपगम्यवादः **अत** इति । अविरुद्धगत्यन्तरे संभवति विरुद्धं मुख्यविशेष्यैक्यमपि त्याज्यमेव । अन्यथा निमित्तमपि न त्यज्येत, यूपादित्यवाक्येऽपि भेदभ्रमहेतुदोषश्च कल्प्येतेति भावः । **तन्मूलेति** । सामानाधिकरण्यमूलकं प्रमाणविरुद्धाज्ञानादिकल्पनं निर्मूलमित्यर्थः । किं चाज्ञानमूलकोऽयं जीवेशभेद शति वादे (मते) उपदेश एव नोपपद्यत इति उपदेशानुपपत्तिवादे निरूपितमित्याह - **अज्ञानमूलेति** । किं चाविद्यास्वरूपस्यैवानुपपन्नत्वात् न तेन ऐक्योपदेशोपपादनं शक्यमित्याह - **न चेति** । जीवब्रह्मैक्यस्य भेदभ्रमं विना यदनुपपन्नत्वं तदुपपादकतया अनुपपन्नस्वरूपमज्ञानं न कल्पयितुं शक्यमित्यर्थः । **दर्शितमिति** । अविद्यास्वरूपानुपपत्तिवादादौ इति शेषः । **यदिचेति** । अविद्याया अनुपपन्नत्वं भूषणम् इति यदि **वल्गसि** वदसि तदा ऐक्योपदेशस्यैव दुर्घटत्वं भूषणमिति वद, किमिति सुदूरं गमनेनापि अविद्यायाः दुर्घटत्वं भूषणमिति वदसि इत्यर्थः ।

ननु भेदमिथ्यात्वादेरकल्पने ऐक्योपदेशस्याप्रामाण्यं स्यादिति शङ्कते- **अप्रामाण्यमिति** । **तस्य**= ऐक्पोपदेशस्य । परिहरति - **अस्मन्मतेति** । यदि ऐक्योपदेशस्य प्रामाण्यार्थमुपपादकापेक्षा तर्हि अस्मदभिमतेन सुघटेन शरीरात्मभावेनैव ऐक्योपदेशस्य प्रामाण्यं तदुपपाद्यताम्, किं दुर्घटाविद्यादिनेत्यर्थः । **यदिवेति** । यद्वेत्यर्थः । ऐक्योपदेशस्य प्रामाण्यं

यत् अज्ञानादिपरिकल्पनेऽप्यन्ततः फलति, तच्चेदादौ तदप्रामाण्यं सिध्यति, किं दूरं धावसि ?

किंच भेदोपदेशान्यथानुपपत्त्या परमार्थभिन्नेऽप्यात्मन्यैक्यभ्रममूलमज्ञानं किं न कल्प्यते ? ऐक्यश्रुतीनामतत्त्वावेदकत्वप्रसङ्गभयादिति चेंत्; तर्हि भेदश्रुतीनां

मा भूत् । तथापि भवतो न काचित् क्षतिः । अन्ततः अप्रामाण्यस्य फलितत्वात् । तथा हि ऐक्योपदेशानुपपत्त्या भेदप्रतीतेर्मिथात्वादिकल्पने उपदेशप्रामाण्यरूपभेदस्यापि मिथ्यात्वेन प्रामाण्याभावरूपमप्रामाण्यं फलति । तत् आदावेव सिद्ध्यति चेत् किं दूरं धावसि इत्यर्थः। अत्रैवं पदानामन्वयः - **यत्** = उपदेशाप्रामाण्यम् अज्ञानादि परिकल्पनेऽपि अन्ततः फलति तत् तदप्रामाण्यम् उपदेशाप्रामाण्यम् आदौ सिध्यति चेत् किं दूरं धाबसि - इति । तस्याप्रामाण्यं तदप्रामाण्यमिति समस्तपदम् । तत इति पृथक्पदं तु पूर्ववाक्यस्थयच्छब्दप्रतिसंबन्धीत्यवधेयम् । तथा च त्वदभिलषितस्य अप्रामाण्यस्य आदावेव सिद्धौ

"अत्के चेन्मधु विन्देत किमर्थं पर्वतं व्रजेत्"
इति न्यायात् दूरधावनमनुचितमिति भावः ।

प्रतिबन्दीमाश्रित्याह -**किं च भेदोपदेशेति** । यथा श्रुतौ जीवब्रह्मैक्योपदेशो वर्तते तथा तद्भेदोपदेशोऽपि । तस्य भेदोपदेशस्य ऐक्यभ्रमं विनानुपपत्त्या ऐक्यस्य भ्रमः तन्मूलभूतम् अज्ञानं च कुतो न कल्प्यते । ऐक्यश्रुतीनामतत्त्वावेदकत्वप्रसङ्गभयात् तत् न कल्प्यत इति चेत् - तर्हि भेदश्रुतीनामतत्त्वावेदकत्वप्रसङ्गभयात् भेदभ्रमः तन्मूलभूतमज्ञानं च न कल्प्यताम् इत्यर्थः । न च भेदज्ञानवत् ऐक्यज्ञानस्य लोकेऽप्रसिद्धत्वात् ऐक्यभ्रमः तन्मूलमज्ञानं च न कल्प्यते, भेदज्ञानं तु प्रसिद्धमिति विशेष इति वाच्यम् । तव मते श्रुत्येकजन्याया अपि सार्वज्ञ्यादिभेदप्रतीतेः भ्रमत्वेन अज्ञानमूलत्ववत् श्रुतिजन्यस्यैव ऐक्यज्ञानस्य भ्रमतया तन्मूलाज्ञानस्य कल्प्यत्वात् । यादृशो भेदः श्रुत्येकसमधिगम्यः स न लोकप्रसिद्ध इति तात्पर्यम् । ननु भेदश्रुतिः निषेध्यार्पकतया अभेदश्रुतितो

तत्प्रसङ्गभयात् भेदभ्रममूलाज्ञानमपि न कल्पय। न चैका श्रुतिरितरस्या दासी, येन तदर्थं तामुपद्रवेम। प्रत्यक्षादिसंवादाच्च भेदश्रुतेरेव बलीयस्त्वम्। न च भेदस्वरूपं दुर्निरूपमिति तदप्रामाण्यस्वीकारः; अभेदस्वरूपस्यापि तथाविधयुक्तिभिर्दुर्निरूपतया तत्प्रतिपादकानां तत्स्वीकारप्रसङ्गात्। किंच त्वदुक्तयैवानुपपत्त्या नास्त्येव भेदप्रतीतिरिति किं न कल्प्यते ?॥ प्रत्यक्षादिविरोधादिति चेत्-तर्हि निरवद्यभेदश्रुतिविरोधे दृष्टिं पातय॥ भ्रान्तिसिद्धे भेदेऽप्यैक्योपदेशो द्विचन्द्रादिष्विव घटत इति चेत्—अज्ञानादिरहितेऽपि ब्रह्मणि भ्रान्तिसिद्धैक्येन तदुपदेशोऽपि संभवत्येव॥ भिन्ने ब्रह्मण्यभिन्नत्वभ्रमः किमर्थमुत्पाद्यत इति चेत्; अभिन्ने ब्रह्मणि भिन्नत्वभ्रमः किमर्थमुत्पाद्यते ? अथो(तथो ?) पासनेन फलविशेषार्थमिति चेत्—तुल्यम्॥

दुर्बलेत्याशङ्क्याह - **न चैकेति**। एका श्रुतिः = भेदश्रुतिः, इतरस्याः = अभेदश्रुतेः दासी अभेदापेक्षितसमर्पकतया दुर्बला। **तदर्थम्**-अभेदार्थम्, तां=भेदश्रुतिम्। उपद्रवेम=बाधेमहि। श्रुत्येकसमधिगम्यस्य सार्वज्ञादिभेदस्य निषेधार्थमनुवादासंभवात्, प्रत्यक्षादिसिद्धभेदस्य निषेधासंभवात् न भेदश्रुतिर्निषेधार्थमनुवाद इति भावः। भेदश्रुतेरेव **बलीयस्त्वमिति**। तत्त्वावेदकत्वाध्यवसाय इत्यर्थः। **तत्स्वीकारप्रसङ्गात्** = अप्रामण्यस्वीकारप्रसङ्गात्।

किंचेति। ऐक्योपदेशानुपपत्त्या भेदप्रतीतिस्वरूपमेव नास्तीत्युच्यताम्, कृतं तस्य भ्रमत्वकल्पनेनेति भावः। **प्रत्यक्षादिविरोधादित्यादि**। यदि प्रत्यक्षादिविरोधान्न भेदप्रतीत्यपह्नवः शक्यः, तर्हि निर्दोषभेदश्रुतिविरोधात् भेदप्रतीतेर्भ्रमत्वकल्पनमपि न युक्तमिति भावः।

ननु भेदप्रतीतेः प्रामामाण्यत्यागमात्रात् ऐक्योपदेशसंभवात् न भेदप्रतीतिं निह्नुमह इति शङ्कते - **भ्रान्तिसिद्ध** इति। यथा द्विचन्द्रे भ्रान्तिसिद्धेऽपि चन्द्रैक्योपदेश इति दृष्टान्तः। समाधत्ते-**अज्ञानरहितेऽपीति**। **तदुपदेशोऽपि** = अभेदोपदेशोऽपि। ऐक्योपदेशास्य भेद-
ज्ञानप्रामाण्यत्यागेनेव स्वप्रामाण्यत्यागेनापि संभवात् नाज्ञानादिकल्पना गौरवादिति भावः।

उपासनविध्येकवाक्यत्वं दृष्टिलिङ्गं वाऽत्र न दृश्यत इति चेत्, तुल्यम्। दूरानुकर्षात् तत्र दृश्यत इति चेत्– किमत्रापि ? अपिच ब्रह्मणः शुद्धत्वान्यथानुपपत्त्यैव तस्य जीवैक्योपदेशो नास्त्येवेति वा, सन्नप्यन्यपर इति वा, तत्परोऽपि भ्रान्तिमूल इति वा कल्पयितुं युक्तम् । न चाशुद्धिमिथ्यात्वेनाविरोधः, उपदेशमिथ्यात्वेन तदुपपादकाभावेऽप्यविरोधप्रसङ्गात् । यश्चासौ, 'क्षेत्रज्ञं चापि मां विद्धि' इति तत्त्वपरिज्ञानसापेक्षस्तदुपदेशः, तेनैव च तदज्ञानं कल्प्यत इति चित्रम् ! तदेतत् श्रीगीताभाष्येऽपि स्पष्टमाह। तथा भाष्येऽप्यदर्शयत्, 'नाप्यैक्योपदेशान्यथानुपपत्त्या' इत्यादिना ॥

॥ इति शतदूषण्याम् ऐक्योपदेशान्यथानुपपत्तिभङ्गवादः एकोनपञ्चाशः ॥ ४९ ॥

प्रदेशान्तरे उपासनविधेः सत्त्वात् तदेकवाक्यतया जीवे ब्रह्मभिन्नत्वदृष्टिविधिरुपपद्यत इति शङ्कते - **दूरेति** । दूरे विद्यमानस्य उपासनविधेरनुकर्षणात् दृश्यते - दृष्टिलिङ्गम् इति शेषः । अभिन्नत्वदृष्टावपि तथा किं न स्यादित्याह - **न किमत्रापीति** ।

अपि चेति । यदि ब्रह्मणः जीवैक्योपदेशो भवेत् तर्हि जीवगतमशुद्धत्वं स्यात् इति जीवैक्योपदेशो नास्त्येवेति वा कल्पनीयं सन्नप्युपदेशः अन्यपरः इति वा ऐक्यपरोऽपि भ्रान्तिमूलक इति वा कल्पयितुं युक्तम् । न च जीवाशुद्धेर्मिथ्यात्वात् जीवैक्येऽपि ब्रह्मणः नाशुद्धिः प्रसजतीति वाच्यम् । ऐक्योपदेशमिथ्यात्वेनैव अशुद्धिप्रसक्त्यभावात् ऐक्पोपपादकभेदभ्रमाज्ञानाद्यभावेऽपि विरोधाभावात् अज्ञानादिकल्पनं मुधेति भावः । श्रौतैक्योपदेशान्यथानुपपत्तिं दूषयित्वा स्मार्तैक्योपदेशानुपपत्तिं दूषयति - १ **यश्चासावित्यादिना** । **तेनैवेति** । उपदेशेनैवेत्यर्थः । तदज्ञानं-तत्त्वाज्ञानम् ।

इति श्रीशतदूषणीव्याख्यायां तात्पर्यप्रकाशिकायाम्
ऐक्योपदेशान्यथानुपपत्तिभङ्गो नाम एकोनपञ्चाशो वादः ॥

* * *

।। अथ परमते शास्त्राधिकारिभङ्गवादः पञ्चाशः ।। ४० ।।

श्लो. हताशेषक्लेशा निरवधिमहानन्दधनिनो
वयं भूयास्मेति स्थिरमनघवर्त्मन्यधिकृताः ।
अनाघ्रातद्वन्द्वा हयमुखपदद्वन्द्वरुचयः
स्वदन्तां मे सन्तः श्रुतिजलधिमुष्टिन्धयधियः ।।

साधनचतुष्टयं पूर्ववृत्तमिति वदद्भिर्मुमुक्षुत्वं तावत् अधिकारिविशेषणमित्यङ्गीकृतम् । सा च मुमुक्षा मोक्षो मे स्यादित्येवमाकारा । तथाविधा सा कस्याधिकारिणो विशेषणमिति कथयन्तु कलिब्रह्म मीमांसकाः, (१) किं नित्यमुक्तस्वभावस्य संविदात्मनः, (२) उत तस्यैवाविद्यासाक्षितामापन्नस्य, (३) उतान्तःकरणप्रतिफलितचिदाभासस्य, (४) तद्वृत्तिसंभेदा(समा) रोपितक्रियात्वस्य वा चैतन्यस्य, (५) अन्तःकरणस्यैव वा, (६) अथ यस्यकस्यचिदनभिलप्यस्य, (७) न वा कस्यचित् इति ।

अथ परमते शास्त्राधिकारिभङ्गवादः पञ्चाशः ।।

हताशेषक्लेशा निरवधिमहानन्दधनिनः
वयं भूयास्मेति स्थिरमनघवर्त्मन्यधिकृताः ।
अनाघ्रातद्वन्द्वा हयमुखपदद्वन्द्वरुचयः
स्वदन्तां मे सन्तः श्रुतिजलधिमुष्टिंधयधियः ।।

एकया मुष्ट्या श्रुतिजलधिं पातुं समर्था धीर्येषां ते, हयवदनपदद्वन्द्वरुचिर्येषां ते, शीतोष्णसुखदुःखादिद्वन्द्वगन्धरहिताः सन्तः ब्रह्मज्ञानिनः ध्वस्तसमस्तसांसारिकक्लेशाः निरवधिकमहानन्द एव धनं येषां तादृशाः वयं भूयास्मेति इच्छया बुद्ध्या स्थिरतया शास्त्रोक्तनिर्दोषमार्गे अधिकृताः महान्तः मह्यं स्वदन्ताम् । अत्र वयं भूयास्मेति इच्छा मोक्षशास्त्रे अधिकार इति लभ्यते । तेन अहमर्थविनाशपक्षे अधिकारासंभवः सूच्यते । अनेन एतद्वादार्यः संगृहीतो भवति । पूर्वमुपदेशासंभवः उक्तः । तादृशोपदेशेऽधिकार्यसंभवमत्र निरूपयति ।

न प्रथमः, विरोधात्; तस्य नित्यमुक्तत्वादेव मोक्षेच्छाविरहात्; अन्यथा नित्यमपि तत्प्रसङ्गात् ।। मुक्तमप्यात्मानं बद्धमिवाभिमत्य मुमुक्षतीति चेन्न; तस्य तथाविधाभिमानेऽप्यनधिकारात् । तत्सद्भावे वा नित्यमुक्तत्वव्याघातात् ।। भ्रान्त्या वस्तुवृत्त्या च द्वयोरविरोध इति चेन्न; भ्रान्तेरेव तद्विरोधितया तदनधिकारस्योच्य-

---

साधनचतुष्टयं ब्रह्मविचारात् पूर्वमपेक्षित्तमिति वदद्भिः मुमुक्षुत्वं तावत् शास्त्राधिकारिविशेषणमिति स्वीकृतम् । सा च मुमुक्षा मोक्षो मे स्यात् इत्येवमाकारा । तथाविधा सा मुमुक्षा कस्य अधिकारिणो विशेषणमिति कथयन्तु कथयन्तु कलियुगस्था ब्रह्ममीमांसकाः अद्वैतिनः । अत्र "चापले द्वे १भवतः" इति वार्तिकेन द्विर्वचनम् । चापलं त्वरा । अत्र सप्तधा विकल्पः कृतः- १) नित्यमुक्तस्वरूपस्य संविदात्मनः मुमुक्षा विशेषणम् (२) अविद्यासाक्षितामापन्नस्य तस्यैव संविदात्मनः (३) अन्तःकरण-प्रतिबिम्बितचिदाभासस्य (४) अन्तःकरणवृत्तिसमारोपितक्रियात्वस्य चैतन्यस्य (५) अन्तःकरणस्य (६) यस्य कस्यचिदनभिलप्यस्य (७) न वा कस्यचित् इति ।

प्रथमकल्पनिरासः

न प्रथम इति । नित्यमुक्तसंविदात्मनः मुमुक्षा अधिकार इति वक्तुं न शक्यते । संविदात्मनः नित्यमुक्तत्वात् मोक्षेच्छाविरहात् । यो ह्यमुक्तः तस्य खलु मोक्षे इच्छा स्यात् । अन्यथा यदि नित्यमुक्तस्यापि मोक्षेच्छा स्यात् सर्वदा मोक्षेच्छा स्यादित्यर्थः । ननु नित्यमुक्तमप्यात्मानं बद्धमिव मन्यमानः मोक्षमिच्छतीति शङ्कते-**मुक्तमपीति** । नित्यमुक्तस्य बद्धत्वाभिमानोऽपि कथं स्यात् अभिमानस्यैव संसारत्वात् तत्सत्त्वे मुक्तत्वविरोधादिति परिहरति - **तस्येति** । नित्यमुक्तस्येत्यर्थः । ननु नित्यमुक्तस्य वस्तुतो मुक्तत्वं, भ्रान्त्या च बन्धः इति वास्तविकमुक्तत्वस्य बद्धत्वभ्रमस्य च न विरोध इति शङ्कते - **भ्रान्त्येति** । भ्रान्तिरपि संसार एवेति तस्या नित्यमुक्तत्वा विरोधितया भ्रान्तावपि तस्य नाधिकार इत्यस्माभिरुच्यत इति समाधत्ते-**भ्रान्तेरपि इति** । भ्रान्तेरपि भ्रान्तिसिद्धत्वेन मित्यात्वात् वास्तवनित्यमुक्त्या सह न विरोध

मानत्वात्॥ साऽपि भ्रान्तिसिद्धेत्यविरोध इति चेन्न; दूरं गत्वाऽपि तद्भ्रान्तेर्दुस्त्यजत्वात्।

न द्वितीयः; भवत्पक्षे साक्षित्वानुपपतेः (२८. वा) अविद्यानुपपतेश्च (४१. वा) पृथगुपपादनात्। अस्तु वा साक्षित्वम्। तस्याप्यत्यन्तमव्यवस्थतयोदासीनस्वभावस्यानुकूलप्रतिकूलपक्षपातविरहात् संसारोद्वेग-तन्मूलमोक्षेच्छा तदायत्तश्रवणमननादिप्रयत्नासंभवात् नतरामधिकारः। सर्वसाक्षिणश्च तस्य मुमुक्षायाम्, युगपत्सर्वात्ममोक्षश्च प्रसजति। न चैतन्नानाजीववादिभिरिष्यते। एकजीववादिनोऽपि शुको मुक्तो वामदेवो मुक्त इत्यादि(प्रसिद्धिमूलभूत ?) प्रतिनियतमोक्षोपदेशः प्रतिनियतमोक्षेच्छाधीनः। सा चेच्छा यदि साक्षिणः, तदा शुकादिमोक्षदशायामेव सर्वमोक्षे संसारानुवृत्त्यसंभवः। अथ स्वप्नदृष्टस्येव साक्षितया कल्पितस्य कस्यचित्; तर्हि मिथ्याभूतस्य मोक्षो नाम अत्यन्तभवनिवृत्त्यात्मा

इति शङ्कते - **सापीति**। तथा सत्यनवस्था स्यादिति तद्वारणाय क्वचित् सत्यभूतभ्रान्तेरङ्गीकरणीयतया तया सह नित्यमुक्तत्वविरोधो दुर्वार इत्याह - **दूरं गत्वापीति**।

द्वितीयकल्पनिरासः

अविद्यासाक्षित्वमापन्नस्य संविदात्मनः मोक्षेच्छेति द्वितीयकल्पं दूषयति - **न द्वितीय इति**। **पृथगुपपादनादिति**। साक्षित्वभङ्गवाद इति शेषः। **तस्याप्यत्यन्तमव्यवस्थतयेति**। व्यवस्थितस्वभावरहिततया उदासीनस्वभावस्य अयमनुकूलः अयं प्रतिकूल इति पक्षपाताभावात् संसारे निर्वेदः मोक्षेच्छा तदधीनश्रवणमननादिप्रयत्नः इत्येतेषामसंभवात् न तरां तस्य अधिकार इत्यर्थः।

सर्वेति। सर्वपुरुषसाधारणस्य अविद्यानुभवरूपसाक्षिण इत्यर्थः। इष्टापत्तिमाशङ्क्य परिहरति - **न चैतदिति**। नानाजीववादिभिर्नेष्यताम्, एकजीववादिभिस्तु इष्यत इति शङ्कायामाह - **एकेति**। ननु यत् सत्यं ब्रह्मस्वरूपं कल्पितसाक्षितापन्नं तस्य मुमुक्षां न ब्रूमः, किं तु अन्यस्य स्वरूपतः कल्पितस्य साक्षिणः। तथा च तन्मुक्त्या न सर्वमोक्षप्रसङ्ग इत्याशङ्क्य निराकरोति - **अथेति**। **तर्हीति**। कल्पितस्य साक्षिणः -

स्वरूपनिवृत्तिपर्यवसित इति साधु मोक्षः समर्थितः । अथ स्वस्मिन् विनष्टे अज्ञाने स्वसाक्षिभूतायाः संविदः साक्षित्वेऽप्यतिक्रान्ते स्वप्रकाशानन्दमात्ररूपा संविदवतिष्ठत इति तदर्थमयमपवर्गारम्भ इति चेत्–प्रेक्षावत्प्रवृतेस्तथात्वासंभवात् । तदाहुः–, ''निरस्ताखिलदुः खोऽहमनन्तानन्दभाक् स्वराट् । भवेयमिति मोक्षार्थी श्रवणादौ प्रवर्तते ॥ अहमर्थविनाशश्चेन्मोक्ष इत्यध्यवस्यति । अपसर्पेदसौ मोक्षकथप्रस्तावगन्धतः ॥ मयि नष्टेऽपि मत्तोऽन्या काचित् ज्ञप्तिरवस्थिता । इति तत्प्राप्तये यत्नः कस्यापि न भविष्यति ॥'' इति ।

अत एव न तृतीयः; तस्यापि चिदाभासत्वादेव विनाशावश्यम्भावात् ।

मिथ्यात्वात् मिथ्याभूतस्य तस्य मोक्षो नाम आत्यन्तिकसंसारनिवृत्तिरूप: स्वरूपनिवृत्तौ पर्यवसित इति आश्रयाभावात् मोक्षो न स्यादिति भाव: । ननु मोक्षेच्छाश्रयस्य कल्पितसाक्षिणो नाशेऽपि मोक्षाश्रय: अन्य एवेति नोक्तदोष इति शङ्कते - **अथ स्वस्मिन्निति** । स्वस्मिन् विनष्टे, अज्ञाने तत्साक्षिभूतसंविद: साक्षित्वे च नष्टे स्वप्रकाशानन्दमात्रस्वरूपा संवित् अवतिष्ठते इति तदर्थमयमपवर्गार्थ: प्रयत्न इति चेत् इत्यर्थ:। **स्वसाक्षीति** । अज्ञानकल्पकसाक्षिरूपसत्यसंविद: इत्यर्थ:। परिहरति-**प्रेक्षावत्प्रवृत्तेरिति** । स्वनाशानन्तरं तिष्ठन्त्या: निर्विशेषसंविद: मोक्षार्थं न कोऽपि प्रेक्षावान् प्रवर्तेतेत्यर्थ: । उक्तमर्थं भाष्यसंवादेन प्रमाणयति - **यदाहुरिति** । अहमर्थविनाशे उक्तो दोष: उक्तसाक्षिविनाशेऽपि तुल्य इत्याशयेन एतच्छ्लोकोपादानम् । किं चैवं मुमुक्षाया: अधिकारत्वं न स्यात्, मोक्षसमानकर्तृकेच्छाया एव मुमुक्षात्वात् । इच्छा साक्षिया:, मोक्षस्तु संविद इति इच्छामोक्षयोर्भिन्नकर्तृकत्वात् । न च मुमुक्षाशब्देन इच्छामात्रमत्र लक्ष्यत इति वाच्यम् । ''मुमुक्षुर्वै शरणमहं प्रपद्ये'' इत्यादिमुमुक्षाधिकारवोधक-श्रुतिस्मृत्यादिविरोधात् ।

तृतीयविकल्पनिरास:

अन्त:करणप्रतिफलितचिदाभासस्य मुमुक्षेति तृतीयकल्पं निरस्यति - **अतएवेति** ।

प्रतिबिम्बस्य नाशेऽपि बिम्बात्मनाऽवस्थानवत् अन्तःकरणप्रतिफलितरूपविनाशेऽपि ब्रह्मात्मना स एव तिष्ठतीति चेन्न–प्रतिबिम्बस्य मिथ्याभूतस्य सत्यबिम्बात्मनाऽवस्थानाऽसंभवात्॥ बिम्बप्रतिबिम्बयोर्भेदनिषेधे स्वरूपमेकमेव भवतीति चेन्न; सत्यमिथ्यार्थयोर्भेदनिषेधस्यैवासंभवात्। संभवे वा सर्वसत्यत्वं सर्वशून्यत्वम् अनेकान्तवादो वा प्रसज्येरन्(ज्येत ?) अस्तु वाऽत्र भेदनिषेधः; तदा प्रतिफलितचिदाभासस्य ब्रह्मणश्च स्वरूपैक्ये ब्रह्मण एव सर्वोपरागप्रसङ्गात्

द्वितीयकल्पोक्तदोषादेवेत्यर्थः। तमाह-**तस्यापीति**। चिदाभासस्यापि मिथ्यात्वादेव विनाशावश्यंभावात् मोक्षेच्छा न स्यात्। मयि नष्टेऽपीत्युक्तयुक्तेरित्यर्थः। दृष्टान्तमुखेन शङ्कते - **प्रतिबिम्बस्येति**। दृष्टान्तासंप्रतिपत्त्या परिहरति - **प्रतिबिम्बस्येति** / दृष्टान्तस्य प्रतिबिम्बस्य मिथ्यात्वेन तस्य सत्यभूतबिम्बात्मनावस्थानमित्येतदेव न संप्रतिपन्नमित्यर्थः। ननु मदीयमेवेदं मुखं दर्पणे दृश्यते इत्यादिप्रत्यभिज्ञया बिम्बप्रतिबिम्बयोः अभेदसिद्धेः भेदनिषेधात् प्रतिबिम्बस्यापि सत्यत्वं विम्बाभेदश्च युज्यत इति शङ्कते- **बिम्बेति**। परिहरति - **सत्येति**। बिम्बं सत्यं, प्रतिबिम्बो मिथ्या। अनयोर्भेदावश्यंभावात् भेदनिषेध एव न संभवति। संभवे वा सर्वसत्यत्वं सर्वमिथ्यात्वं सत्यं मिथ्या चेति अनेकान्तवादो वा प्रसज्येरन् इति भावः। दर्पणे मुखं नास्तीति बुद्ध्या बाधितस्य मुखस्य शुक्तिरजतादिवत् मिथ्यात्वात् तयोर्भेदनिषेध एव न संभवति। प्रत्यभिज्ञा तु मिथ्यात्वानभ्युपगमपक्षे उपपद्यते। तदभ्युपगमपक्षे तु कर्दमलग्नपादप्रतिमुद्रायां मम पादाविति प्रत्यभिज्ञावदुपपाद्येति व्याख्याने। **अस्तु वेति**। अस्तु वा अन्यत्र प्रतिबिम्बस्य मिथ्यात्वाभ्युपगमेऽपि अत्र तदनभ्युपगमः (अत एव भेदनिषेधोऽपि भवतु।) किं तु बिम्बप्रतियोगिकभेदमात्रस्य मिथ्यात्वं, ततश्च प्रतिबिम्बस्य बिम्बात्मना अवस्थानम् तदापि प्रतिफलितचिदाभासस्य ब्रह्मणश्चैक्ये ब्रह्मण एव सर्वावद्यप्रसङ्गात् प्रतिफलनकल्पनमपि निरर्थकम्। एतदुक्तं भवति - ब्रह्मणो बन्धाश्रयत्वे अवद्यप्रसङ्गपरिहारार्थं हि जीवस्य तदाश्रयस्य प्रतिबिम्बत्वकल्पनाम्।

प्रतिफलनादिविलृप्तिरपि निरर्थिका। प्रतिफलनादिकं च दुरुपपादमिति स्थितमन्यत्र (३७ वा)।

न चतुर्थः; तस्य क्रियात्वेनैव प्रकाशमानस्य मोक्षेच्छा-तदर्थप्रयत्नाद्याश्रयत्वस्य तद्भ्रमस्य वा दूरनिरस्तत्वात्। अत एव वृत्तिमदन्तःकरणभेदाग्रहणात् तस्य तदभिमान इति निरस्तम्।

न पञ्चमः; अपवर्गे अन्तःकरणस्यापि स्वरूपोच्छेदाभ्युपगमात्। सुषुप्तिप्रलयादिषु स्वयमेव नश्वरतयाऽभ्युपगतस्य किं मोक्षार्थेन महता प्रयासेन ? न चान्तःकरणाख्यस्य द्रव्यस्य ज्ञानेच्छादिसंभवः। ज्ञातृत्वाध्यासश्च न संभवतीति सिद्धमन्यत्र (२७. वा)।

प्रतिविम्बस्य बिम्बाभेदे तदपरिहारात् तत्कल्पनं व्यर्थमिति। अपि च प्रतिफलनादिकं संविदो दुरुपपादमिति वादान्तरे निर्णीतमित्याह - **प्रतिफलनादिकमिति**।

चतुर्थकल्पनिरास:

अन्त:करणवृत्तिसमारोपितक्रियात्वविशिष्टस्य चैतन्यस्य मुमुक्षेति चतुर्थ: कल्पोऽपि न युक्त:। क्रियात्वेन प्रकाशमानस्य चैतन्यस्य अन्त:करणात् भेद एव गृहीत इति मोक्षेच्छाद्यसंभवादित्यर्थ:। **अत एवेति**। क्रियात्वेन प्रकाशमानस्य तस्यान्त:करणात् भेदस्यैव गृहीतत्वात् इत्यर्थ:।

पञ्चमकल्पनिरास:

अन्त:करणस्यैव मुमुक्षेति पञ्चमकल्पं निरस्यति - **न पञ्चम इति**। अन्त:करणस्यापि मोक्षे नाशाभ्युपगमात् मयि नष्टेऽपीति न्यायेन तस्यापि मोक्षेच्छा न संभवतीत्यर्थ:। ननु उच्छेद एव पुरुषार्थ इत्यत्राह - **सुषुप्तीति**। सुषुप्तावेव मुक्तत्वादिति भाव:। किं च अन्त:करणस्य जडद्रव्यतया ज्ञानेच्छादिकं न संभवतीत्याह- **न चेति**। न चान्त:करणस्य ज्ञातृत्वाध्यासात् इच्छादिकं संभवतीत्यत्राह- **ज्ञातृत्वेति**।

नापि षष्ठः; तस्यापि मिथ्यात्वेन विनाशावश्यम्भावात् । सत्यत्वे ब्रह्मस्वरूपान्तर्भावबहिर्भावयोरनधिकारत्वसद्वितीयत्वादिप्रसङ्गात् । न च अनभिलपनीयं मोक्षाधिकारिस्वरूपमपरिज्ञायैव स्वयमधिकरोतीति वाच्यम्; अविदिताधिकारिस्वरूपस्य क्वचिदप्यनधिकारात्।। विदितत्वेऽपि इक्षुक्षीररसादिवत् दुरभिलपत्वं तस्येति चेन्न; अहमर्थातिरिक्तस्य कस्यचिन्मुमुक्षोः स्वात्मसाक्षिकोपलम्भादर्शनात्। उक्तं हि, 'निरस्ताखिलदुःखोऽहम्' इत्यादिना।

नापि सप्तमः; अधिकारितद्विशेषवर्णनप्रयासनैष्फल्यात्, तन्मूलश्रवणादि-

---

षष्ठकल्पनिरासः

नापि षष्ठ इति । यस्य कस्यचिदनभिलप्यस्येत्यनेनैव तस्य मिथ्यात्वाविष्करणात् निनाशोऽवश्यंभावी । तथा च ''मयि नष्टे'' इति न्यायेन पूर्वोक्तरीत्या मोक्षेच्छा तस्य न स्यादिति भावः । **सत्यत्व** इति । यदि तस्य सत्यत्वं स्यात् तर्हि ब्रह्मस्वरूपान्तर्भावे नित्यमुक्तत्वात् मोक्षेच्छाविरहः स्यात्, अनधिकारः स्यादिति यावत् । बहिर्भावे सद्वितीयत्वप्रसङ्गः । ननु जीवस्यैव किंचिन्मोक्षाधिकारिस्वरूपमस्ति; तच्च दुर्विज्ञेयत्वात् अनभिलपनीयम् । जीवश्च तदज्ञात्वैव प्रवर्तत इत्यत्राह - **न चेति** । अस्मिन् कर्मणि अधिकारी कः इति अधिकारिस्वरूपं यो न जानाति तस्य कुत्राप्यधिकाराभावात् । ब्रह्मकल्पितस्यापि अधिकारिणः स्वगतमधिकारिविशेषणं न जानाति चेत् प्रवृत्तिर्न स्यादिति यावत् । अधिकारिस्वरूपस्य ज्ञातत्वेऽपि इक्षुक्षीररसादिवत् शब्दतो निर्देष्टुमशक्यत्वमित्याशङ्कते - **विदितत्वेऽपीति** । परिहरति - **अहमर्थेति** । अहमर्थस्यैव मुमुक्षा दृश्यते नाहमर्थातिरिक्तस्येत्यर्थः । तदुक्तं भाष्ये-

निरस्ताखिलदुःखोऽहमनन्तानन्दभाक् स्वराट् ।
भवेयमिति मोक्षार्थी श्रवणादौ प्रवर्तते ॥ इति ।

सप्तमकल्पनिरासः

न वा कस्यचिदिति सप्तमकल्पं निरस्यति - **नापि सप्तम** इति । मोक्षशास्त्रे मोक्षे वा कस्याप्यधिकारो नास्ति चेत् - भवद्ग्रन्थे अमुकः अधिकारी अमुकमधिकारि-

प्रवृत्त्यनुपपत्तेः । शास्त्रारम्भभङ्गप्रसङ्गाच्च । ‘‘नास्त्येव वस्तुतः कश्चिदधिकारी, तथाऽपि सन्निव भातीति तस्य....मुमुक्षा विशेषणमिति चेत्; कस्यासौ सन्निव भातीति वक्तव्यम् । न कस्यचिदिति चेत्; तर्हि कथं सन्निव भातीति ? ब्रह्मण इति चेन्न; तस्य परानुसन्धानादिसामर्थ्यविरहस्योक्तत्वात् । तत्सद्भावेऽपि, ‘ब्रह्मैवेदं विशेषणम्’ इत्यनुसन्दध्यात् । स्वयमनुसन्धानाभावे च न प्रवृत्तिः ॥ अधिकारतन्मूलप्रवृत्त्यादिविशिष्टतयैव ब्रह्मणा तदनुसन्धानमिति चेत्; किमतः, न हि तावताऽपि स्वनाशरूपेऽपवर्गे ब्रह्मदृष्टस्य तस्य मुमुक्षोपपादिता भवति ॥ स्वनाशमविदित्वैव स्वावस्थानाभिमानेन तस्य मुमुक्षाऽपि जायत इत्येवंरूपोऽयं

विशेषणमिति वर्णनप्रयासनैष्फल्यं स्यात् । किं च अधिकारज्ञानपूर्वकं श्रवणादौ प्रवृत्तिर्या दृश्यते सा न स्यात् । कस्याप्यधिकाराभावे शास्त्रारम्भवैयर्थ्यं च । शङ्कते - **नास्त्येवेति** । मोक्षे मोक्षशास्त्रे वा कोऽप्यधिकारि नास्त्येव । तथापि सन्निव भातीति शङ्का । तां परिहरति- **कस्यासाविति** । कस्यासौ अधिकारी सन्निव भातीति पृच्छामः । न कस्यचित् इति चेत् - कथं सन्निव भातीत्युच्यते । ब्रह्मणः सन्निव भातीति चेत् - न । निर्विशेषस्य तस्य परानुसन्धानादिसामर्थ्यं नास्तीत्युक्तत्वात् । तत्सद्भावेऽपि इदमधिकारिविशेषणमिति अनुसंदध्यात् नान्यः प्रवर्तमानः । प्रवर्तमानस्य पुरुषस्य अधिकारिविशेषण विषयकानुसन्धानाभावे मोक्षार्थं प्रवृत्तिर्न स्यादिति भावः ।

ननु अधिकार-तदनुसन्धान-तन्मूलकप्रवृत्तिविशिष्टतया ब्रह्मणा कल्पितस्य कस्यचित् मोक्षार्थप्रवृत्त्युपपत्तिरिति शङ्कते - **अधिकारतन्मूलेति** । समाधत्ते-**किमतः** इति । अनेन उपपादनेन न किमपि समाधानं भवति । तथाहि-ब्रह्मणा तथा कल्पितस्य मिथ्यात्वावश्यंभावात् स्वनाशरूपेऽपवर्गे इच्छा उपपादिता भवतीत्यर्थः । स्वनाशाज्ञानमुमुक्षयोरपि ब्रह्मकल्पिततया सर्वोपपत्तिरिति शङ्कते - **स्वनाशमिति** । ब्रह्मणः एवंरूपः संमोहोऽस्तीति कथं ज्ञायते भवता । शास्त्रत इति चेत् - तर्हि तेनैव स्वनाशवेदनसिद्ध्या पुनः अप्रवृत्तिरेव स्यात् इत्यर्थः ।

ब्रह्मणः संमोह इति चेन्न; एवंरूपस्य संमोहस्यापि शास्त्रतोऽवसाये स्वनाशवेदनसिद्धौ पुनरप्रवृत्तिप्रसङ्गात्।। ननु यदि स्वनाश एवापवर्ग इति तत्त्वम्, तदा तदपेक्षायां को विरोध इति चेन्न; माध्यमिकवदौपनिषदैः, ''स्वनाशापत्तिर्मोक्षः'' इत्यनभ्युपगमात्। अभ्युपगमे वा कथमस्य पुरुषार्थत्वमुपपादयिष्यसि ? दुःखात्यन्तनिवृत्तिरूपत्वादिति चेन्न; 'रसं ह्येवायं लब्ध्वाऽऽनन्दी भवति' इत्यादिश्रुतिशतकोपप्रसङ्गात्। अस्तु वा स्वनाशः पुरुषार्थः, तथाऽपि तदर्था प्रवृतिरस्य न संभवति, ब्रह्माज्ञाननिवृतिमन्तरेण तत्कल्पितस्वरूपनिवृत्तेर्दुस्साधत्वात् ।। ब्रह्माज्ञानमपि तत्प्रवृत्त्यैव निवर्तत इति चेत्; तर्ह्येकमोक्षे सर्वमोक्षप्रसङ्गात् ब्रह्मदृष्टेषु जीवेषु

ननु स्वनाश एवापवर्गः इति यदि शास्त्रवेद्यं तत्त्वम्, तदा स्वनाशापेक्षायां को विरोध इत्याशङ्क्य माध्यमिकैरेव तथा अङ्गीक्रियते, औपनिषदैस्तु कैरपि तथा नाङ्गीक्रियत इति समाधत्ते - **ननु यदीत्यादिना**। **अभ्युपगमे वेति**। स्वनाश एवापवर्ग इति अङ्गीकारेऽपि कथमस्य पुरुषार्थत्वमुपपादयिष्यसि। पुरुषेणार्थ्यमानो हि पुरुषार्थः। न हि स्वनाशं कोऽपि पुरुषोऽर्थयते । स्वनाशे सति दुःखात्यन्तनिवृत्तिर्भवति। अतः स्वनाशो दुःखात्यन्तनिवृत्तिरूप इति पुरुषैरर्थ्यमानत्वात् पुरुषार्थ इति शङ्कते- दुःखात्यन्तेति। दुःखनिवृत्तिमात्रं न पुरुषार्थः अपि तु आनन्दवत्त्वमिति "रसँ ह्येवायं लब्ध्वानन्दी भवति" इति श्रुत्या अवगम्यते। स्वनाशे सति आश्रयाभावात् आनन्दो न स्यादिति परिहरति - **रसमिति**। **अस्तु वेति** अभ्युपगम्याह। अस्तु वा स्वनाशः पुरुषार्थः, तथापि तदर्थं प्रवृत्तिः कस्यापि न संभवति। ब्रह्माज्ञाननिवृत्तिं विना तदज्ञानकल्पितस्य स्वस्यापि नाशासंभवात्। न च ब्रह्माज्ञानमपि मोक्षार्थप्रवृत्त्यैव निवर्तत इति वाच्यम्। तर्हि एकस्य मोक्षे सर्वस्य मोक्षप्रसङ्गः ततश्च ब्रह्मणा कल्पितेषु जीवेषु बद्धमुक्तव्यवस्थाभङ्गप्रसङ्गः। तत एव च सर्वेषां मोक्षप्रसङ्गादेव केषांचिदेव मुमुक्षा न सर्वेषामिति व्यवस्थायाश्चासंभव इति भावः।

ननु बद्धमुक्तव्यवस्थाभङ्ग इष्ट एव। इदानीं च संसारोपलम्भः इतः पूर्वं कस्याप्यमुक्तत्वादुपपन्नः। इतः परमपि कल्पान्तरादिषु कल्पिता मुमुक्षा संसारनिवृत्तिपर्यन्ता

बद्धमुक्तव्यवस्थाभङ्गः । तत एव च प्रतिनियतमुमुक्षाद्यसम्भवः । स्वभावतः कश्चिदेव मुमुक्षादिसंमोहः कदाचित् ब्रह्माज्ञानं निवर्तयतीति चेत्–तर्हि किमर्थमिदानीं भवद्भिः प्रत्येकमुमुक्षादिपूर्वकं शास्त्रमारभ्यते ॥ न वयं वस्तुतः शास्त्रमारभामहे, किंतु अस्मदारम्भात्मना ब्रह्मण एवायं संमोह इति चेन्न; ब्रह्मण एव शास्त्रारम्भतज्जन्यज्ञानादिपरिज्ञाने तावतैवापवर्गसिद्धौ पुनःसंसारानुवृत्त्यभावप्रसङ्गादिति दुर्वचस्ते शास्त्राधिकारी । ननु भवतोऽपि समानोऽयं दोषः, ईश्वरस्य कारणावस्थस्य कार्यावस्थस्यावताराद्यवस्थस्य च नित्यमुक्तत्वादेव तस्य मुमुक्षाद्यसंभवात्, जीवस्यापि स्वतोऽपहतपाप्मत्वादिस्वभावत्वाभ्युपगमेन तस्यापि तदसंभवादिति चेन्न; स्वत उष्णस्य वह्नेर्मणिमन्त्रादिवशात् प्रतिबन्धवत् स्वतः शुद्धियोगिनोऽपि जीवस्य

भविष्यति स्वभावात् । न त्विदानीं कल्पिता । अत: सर्वोपपत्तिरित्याशङ्क्याह - **स्वभावत इति** । **तर्हीति** । यदा कल्पान्तरादिष्वेव मुमुक्षा भविष्यति, तर्हि किमर्थमिदानीं भवद्भि: प्रत्येकं मुमुक्षादिपूर्वकं शास्त्रमारभ्यते इत्यर्थ: । ननु भुक्तवति पुरुषे अन्येन कल्पितं भोजनं यथा प्रयोजनाभावपर्यनुयोगानर्हं तथा अस्माकं ब्रह्मणा कल्पितशास्त्रारम्भतज्जन्यज्ञानादिकमिति शङ्कते - **न वयमिति** । **संमोह:**=कल्पनम् । समाधत्ते - **ब्रह्मण एवेति** । शास्त्रारम्भादिकं सर्वं ब्रह्मणा कल्पितमिति ज्ञाने सति तत एव सर्वमिथ्यात्वज्ञानात् सद्य एव मोक्ष: स्यात् । न तु कालान्तरभाविज्ञानस्य एतस्मात् कश्चिद्विशेष: मिथ्यात्वपक्षे युज्यत इति भाव: ।

शङ्कते - **ननु भवतोऽपीति** । सिद्धान्तिनस्तव मतेऽपि समान: अस्मास्वारोपितो दोष: । तथा हि - किं भवन्मते ईश्वरस्य मुमुक्षा, उत जीवस्य । नाद्य:, ईश्वरस्य कारणावस्थस्य कार्यावस्थस्य अवताराद्यवस्थस्य च नित्यमुक्तत्वादेव तस्य मुमुक्षाद्यसंभवात् । नापि द्वितीय:, जीवस्यापि स्वतोऽपहतपाप्मत्वादिस्वभावत्वस्य भवताङ्गीकारेण तस्यापि मुमुक्षाद्यसंभवात् इति । समाधत्ते-**स्वत उष्णस्येति** । स्वत

कर्मवशात्संसारे तन्निवृत्त्यपेक्षोप(क्षा)पत्तेः । न हि वयं तन्निवृत्तिर्नित्येति वदामः; येन नित्यमुक्तत्वादिचोद्यावकाशः । न चात्मानं ज्ञप्तिमात्ररूपम्; येनेच्छाप्रयत्नाद्यनुपपत्तिः स्यात् । न च सर्वदा सर्वज्ञम्, येन क्षुद्रपुरुषार्थाद्यभिलाषासंभवे कर्मशास्त्रस्य निर्मूलता भवेत् । अतो नित्यमुक्तब्रह्मात्मैकत्ववादे दुर्लभो मोक्षशास्त्राधिकारीति ॥

॥ इति शतदूषण्यां परमते शास्त्राधिकारिभङ्गवादः पञ्चाशः ॥ ५० ॥

उष्णस्यापि अग्नेः मणिमन्त्रादिना औष्ण्यप्रतिबन्धवत् स्वतःशुद्धस्यापि ज़ीवस्य कर्मवशात् शुद्धिप्रतिबन्धात् तन्निवृत्त्यर्थं इच्छायाः संभवः मम मते । न वयमशुद्धिनिवृत्तिर्वा शुद्धिप्रतिबन्धनिवृत्तिर्वा नित्येति वदामः, येन नित्यमुक्तत्वविरोधादिचोद्यावकाशः । नापि वयं जीवात्मानं ज्ञप्तिमात्रस्वरूपं वदामः येन तस्येच्छाप्रयत्नाद्यनुपपत्तिः स्यात् । न च सर्वदा सर्वज्ञ इति वदामः; येन क्षुद्रपुरुषार्थामिलाषासंभवे कर्मशास्त्रस्य निर्मूलता भवेत् । अतो नित्यमुक्तव्रह्मात्मैक्यवादे मोक्षशास्त्राधिकारी दुर्लभ इति सिद्धम् ।

अत्र चण्डमारुतम्

स्वत उष्णस्येति । आनन्दात्मकज्ञानविकासरूपा पापनिवृत्तिः शुद्धिः । सा चासाधारणकारणान्तरनिरपेक्षत्वात् स्वाभाविकी । स्वतःशुद्धियोगित्वं च तादृशशुद्धियोग्यता। सा च सर्वदा विद्यमानापि कर्मणा प्रतिबन्धान्न शुद्धिरूपफलोपहितेत्यर्थः । परमते नित्यमुक्तत्वात् निर्विशेषत्वेन मुमुक्षाद्याश्रयत्वानुपपत्तेश्च हि दोष उक्तः । स्वमते तदभावमाह - **नहि वयमिति** । स्वतोऽपहतपाप्मत्वप्रयुक्तमोक्षानधिकारशङ्कायां परिहृतायां प्रसङ्गात् स्वाभाविकज्ञानवत्त्वप्रयुक्तां कर्मानधिकारशङ्कां परिहरति - **न चेति** । परमते हि सर्वज्ञेश्वराभेदात् कर्मशास्त्राधिकारोऽपि न स्यादिति फलितम् - इति ।

इति श्रीशतदूषणीव्याख्यायां तात्पर्यप्रकाशिकायां
शास्त्राधिकारभङ्गो नाम पञ्चाशो वादः ॥

* * *

।। अथ मुक्तसंविन्निर्विषयत्वभङ्गवादः एकपञ्चाशः ।। ५१ ।।

श्लो. अनुकूलतया सर्वं पश्यन्त्या मुक्तसंविदः ।
आन्ध्यं निर्विषयत्वेन वदतोऽर्थान् निरुन्ध्महे ।।

"धीसन्ततिः स्फुरति निर्विषयोपरागा" इति सौगतोपदिष्टमेव सन्ततिशब्दप्रहाणमात्रेण संगृह्णन्तः श्रुतिभिस्तावत् बाह्यतया ख्याप्यन्ते । तथा हि, 'ब्रह्मविदाप्नोति परम्' इत्युपक्रम्य, 'सोऽश्नुते सर्वान् कामान् सह ब्रह्मणा

अथ मुक्तसंविन्निर्विषयत्वभङ्गवादः एकपञ्चाशः ।।

अनुकूलतया सर्वं पश्यन्या मुक्तसंविदः ।
आन्ध्यं निर्विषयत्वेन वदतोऽर्थान्निरुन्ध्महे ।।

सर्वं ब्रह्मबिभूत्यन्तर्गतत्वेनानुकूलतया पश्यन्त्याः संविदः निर्विषयत्वेन पूर्वं मोक्षार्थोपदेशानुपपत्तिरुक्ता, तदनुबन्धि प्रासङ्गिकं चोक्तम् । इदानीं मुक्तिप्रसङ्गात् मुक्तिकालीनसंविदः निर्विषयत्वं निराकरोति ।

"धीसन्ततिः स्फुरति निर्विषयोपरागे" उपरागे मोक्षे धीसंततिः निर्विषया स्फुरति इति बौद्धाः । तैःधियां क्षणिकत्वाङ्गीकारात् संततिः इत्युक्तम् । एवं च मुक्तौ क्षणिकज्ञानपरंपरा निर्विषया स्फुरतीत्याहुः । अद्वैतिनस्तु संततिपदं परित्यज्य नित्या संवित् निर्विषया प्रकाशते मुक्तावित्याहुः । तथा च बौद्धसमाना एते वेदबाह्या एव ।

मुक्तौ संवित् निर्धूतसकलविशेषविषयत्वेनावतिष्ठते इति वदन्ति । तन्मतं निराक्रियते। तत्रादौ स्वमतेन मुक्तात्मसमवेतज्ञानस्य विभूतिगुणविशिष्टविषयकत्वं सप्रमाणं प्रतिपादयति। **तथा हीत्यादिना** । "ब्रह्मनिदाप्नोति पर" मित्यादेरयमर्थः । अत्र ब्राह्मणे ब्रह्म तद्वेदनं प्राप्तिः प्राप्यं चेति चतुष्टयमुक्तम् । एतद्विवरणं "सत्यं ज्ञानमनन्तं ब्रह्म" इत्यादिमन्त्रेण क्रियत इति श्रुविरेवाह" तदेषाभ्युक्ता" इति । तदेव ब्रह्म अभिमुखीकृत्य ऋगेषा अध्येतृभिरुक्तेत्यर्थः । "सत्यं ज्ञानमनन्तं ब्रह्म" इति ब्रह्मशब्दार्थ उक्तः , "यो वेद निहितं गुहायाम्" इति विच्छब्दार्थः, "परमे व्योमन् सोऽश्नुते" इति प्राप्तिः "सर्वान् कामान्"

विपश्चिता’ इति ब्रह्मवेदनफलत्वेन विभूतिगुणविशिष्टब्रह्मानुभव एव प्रपञ्च्यते। ‘यदा पश्यः....ईशं.... निरञ्जनः परमं साम्यमुपैति’ इतीश्वरपरमसाम्यापत्तिवचनाच्च सार्वज्ञ्यादिकं मुक्तस्य सिद्धम् । ‘मम साधर्म्यमागताः’ इति च भगवान् स्वयमेवाऽऽह। ‘ब्रह्म वेद ब्रह्मैव भवति’ इत्यादिकमपि, ‘वैष्णवं वामनमालभेत स्पर्धमानो विष्णुरेव भूत्वा’ इत्यादाविव साधर्म्यमात्रविषयमेव। न हि स्पर्धमानस्य यागविशेषमात्रेण साक्षाद्विष्णुत्वापत्तिः । जयरूपश्च फलान्तरं स्फुटमभिधीयते। ‘इववद्वैवमेव’ इति च नैघण्टुकाः । प्रकारैक्ये च तत्त्वव्यवहारो मुख्यवत् प्रसिद्ध एव। एवकारादिश्च साधर्म्यातिरेकादमुख्ये मुख्यार्थोपचारद्योतको द्रष्टव्यः (दृष्टः)। यथा–‘नेदं मुखमिदं पद्मं न नेत्रे भ्रमराविमौ। एतानि केसराण्येव न च दन्तार्चिष-

---

इत्यादिना प्राप्यमिति । **ब्रह्मानुभव एवेति** । ‘‘सह ब्रह्मणा’’ इत्यत्र सहशब्दस्य भोग्यसाहिसपरत्वादिदिति भावः। तथा च भाष्यम् - ब्रह्मणा सह तद्गुणान् सर्वान् अश्नुत इत्यर्थः इति । दहरविद्यायां ‘‘तस्मिन् यदन्तस्तदन्वेष्टव्यम्’’ इतिवत् गुणप्राधान्यं वक्तुं सहशब्द इति । एतच्च प्रकाशितमाचार्यैः - अस्य वाक्यस्य प्राप्यवाचिपरशब्दविवरण-रूपत्वात् ‘‘सर्वान् कामान् ब्रह्मणा सह’’ इति भोग्यवाचिपदेनाव्यवहितप्रयोगस्वारस्याच्च सहशब्दो भोग्यसहित्यपर इति । मुक्तस्य सार्वज्ञ्यश्रुतिवलादपि मुक्तसंविदः सविशेषविषयकत्वमित्याह- **यदा पश्य इत्यादाविति**। मुक्तोपसृप्यस्य ब्रह्मणः ज्ञानादियोगं परमसाम्यप्रतियोगित्वं मोक्षदशात्वं च ख्यापयितुं वाक्यमेतदुदाहृतम् । परकल्पितमर्थं निराकुर्वन् मुक्तसंविदः सविषयकत्वे प्रमाणान्तरमाह - **ब्रह्म वेदेति** । **वैष्णवमिति** । साम्यमात्रे दृष्टान्तः, न तु परमसाम्ये । विष्णुरेवेत्यनेन शत्रुजयकामनया यागानुष्ठातुः विष्णुसाम्यमेवोच्यते न तु विष्णुत्वम्। जयरूपं फलान्तरं स्फुटमवगम्यते, न तु मोक्षः। तथा च फलकामेनानुष्ठितं फलानुरूपं कर्म च तत्फलं जनयेत् न तु मोक्षम्। न चायं मोक्षकामी। शत्रुजंयस्यैव काम्यतया निर्देशात्। अत्तोऽत्र विष्णुसाम्यमेवोच्यते। अवधारणार्थत्वेऽपि न दोष इत्याह-**प्रकारैक्य इति** । **नेदमिति** । एवकारसमानार्थक-वाक्यस्य सादृश्यद्योतकत्वोक्तौ एवकारस्यापि तत् सिध्यत्येवेति भावः ।

स्तव ।।' इत्यादिषु । न च तद्रूपस्य तद्रूपतापत्तिः फलम्; सिद्धत्वात् । नाप्यतद्रूपस्य; अपसिद्धान्तात्, अशक्यत्वाच्च । यथोक्तं भगवता पराशरेणापि, 'परमात्मात्मनोर्योगः परमार्थ इतीष्यते । मिथ्यैतत् अन्यद्द्रव्यं हि नैति तद्द्रव्यतां यतः ।।' इति । अत्र योग इति तादात्म्यमुच्यते । 'नैति तद्द्रव्यतां यतः' इति तादात्म्यस्योतरत्र निषेधात् । न चाऽऽदिभरतमृगत्ववत् तज्जातीयतापतिः; तथाऽपि साधर्म्यमात्रे पर्यवसानात् । वस्तुतश्च ब्रह्मणः सर्वविजातीयत्वात् । न च तद्रूपस्यैव सततस्तद्रूपताप्रादुर्भाव इह विवक्षित इति वाच्यम्; तथाऽपि वाक्यस्यामुख्यार्थतात्पर्याविशेषात् ।

ब्रह्माभेदस्यैव साध्यत्वे दोषमाह - **न च तद्रूपस्येति** । किं ब्रह्मस्वरूपस्यैव ब्रह्मविदः ब्रह्मस्वरूपतापत्तिः इत्युच्यते, किं वा ब्रह्मस्वरूपतारहितस्य तस्य । नाद्यः, सिद्धत्वात् फलत्वानुपपत्तेः । न द्वितीयः, ब्रह्मस्वरूपतारहितस्य ब्रह्मस्वरूपतापत्तेः भवद्भिरनङ्गीकारेण अपसिद्धान्तात् ।

मुक्तस्य ब्रह्मसाम्यमेव, न तु ब्रह्मैक्यमित्येतन्निराकरोति - **न चेति** । पूर्वमेव ब्रह्मरूपस्य जीवस्य ब्रह्मरूपतापत्तिः न फलम्, सिद्धत्वात् । नाप्यतद्रूपस्य अपसिद्धत्तात्, अशक्यत्वाच्च । तदाह - **परमात्मात्मनोरिति** । परमात्मजीवात्मनोरैक्यं परमार्थ इति कैश्चिदुच्यते, तत्तु मिथ्या । अप्रामाणिकम् । यतः अन्यत् द्रव्यं अन्यद्रव्याभिन्नं न भवतीति तदर्थः । ननु ब्रह्म भवतीति वाक्येन ब्रह्मोपासकस्य ब्रह्मजातीयतापत्तिः फलतयोच्यत इति कस्यचिन्मतमपाकरोति - **न चादिभरतेति** । **तथापीति** । ब्रह्मजातीयत्वमपि ब्रह्मसादृश्यमेव, न तु ब्रह्मत्वमेव । तत्र हेतुमाह - **वस्तुत इति** । ब्रह्मणः जगत्कारणत्वादिभिः सर्वविजातीयतया ब्रह्मशब्दप्रवृत्तिनिमित्तस्यान्यत्र क्वाप्यसंभवात् इत्यर्थः । **अमुख्यार्थेति** । वाक्ये प्रादुभार्ववाचकपदाभावादित्यर्थः । एवं च मुक्तस्य यदि ब्रह्माभेदः श्रुतिसिद्धः स्यात् मुक्तस्य निर्विषयसंविद्रूपता वक्तुं शक्येतापि, तदभेदस्तु न श्रुतितात्पर्यविषय इति प्रदर्शयितुं प्रमाणान्युपन्यस्तानि । ब्रह्मसाम्यश्रुतिस्तु मुक्तस्य सर्वज्ञत्वेन तत्साम्यं वदति । तावता मुक्तः सर्वविषयकज्ञानवानिति लाभात् मुक्तसंविदः सर्वविषयकत्वमेव सिध्यति न निर्विषयकत्वमित्याशयः ।

अतो वरं साम्यश्रुत्याद्यविरोधेन यथोक्त एवार्थः । 'तत् केन कं पश्येत्', 'न दृष्टेर्द्रष्टारं पश्येः' इत्यादिकं तु भाष्य एव सुव्यक्तं व्याख्यातम् । 'सर्वं ह पश्यः पश्यति' इत्यादिश्रुतयश्च मुक्तस्य साक्षात्सर्वज्ञतां स्फुटतरमुपपादयन्ति । 'यथा न क्रियते ज्योत्स्ना मलप्रक्षालनान्मणेः ।' इत्यारभ्य, 'तथा हेयगुणध्वंसादवबोधादयो गुणाः । प्रकाश्यन्ते न जन्यन्ते नित्या एवात्मनो हि ते ॥' इति च स्मर्यंते ।

ननु मोक्षशायां विषयदर्शननिषेधात् मुक्तसंविदः सर्वविषयकत्वं नोपपद्यते । ''न प्रेत्य संज्ञास्ति'' इत्युपक्रमात् तस्याः श्रुतेर्मुक्तविषयकत्वमवगम्यते । दृष्ट्यतिरिक्तस्य द्रष्टुर्निषेधाच्च न सर्वद्रष्टृत्वेन साम्यसंभव इत्यत्राह - **तत् केनेति** । भाष्य एव सुव्यक्तं व्याख्यातमिति । अयं भाष्यग्रन्थः-

''कृत्स्नस्य जगतः ब्रह्मकार्यतया तदन्तर्यामिकतया च तदात्मकत्वेनैक्यात् तत्प्रत्यतीकनानात्वं प्रतिषिध्यते - '' इति,

''यत्तु '' न दृष्टेर्द्रष्टारम्'' इति श्रुतिः दृष्टेर्मतेर्व्यतिरिक्तं द्रष्टारं मन्तारं च प्रतिषेधतीति, तदागन्तुकचैतनगुणयोगितया ज्ञातुरज्ञानस्वरूपतां कुतर्कसिद्धां मत्वा न तथा आत्मानं पश्येः मन्वीथाः अपितु द्रष्टारं मन्तारमप्यात्मानं दृष्टिमतिरूपमेव पश्येरित्यभिदधातीति परिहृतम्'' इति । **सर्वं हेति** । पश्मः द्रष्टा मुक्तः सर्वं पश्यति इति कथनेन मुक्तस्य सर्वविषयकसाक्षात्कारवत्त्वमवगम्यते । शौनकवचनमपि सर्वज्ञत्वे प्रमाणमिति तदुदाहरति - **यथा न क्रियत इति** । शौनकस्मृतिः ।

''यथा न क्रियते ज्येत्स्ना मलप्रक्षालनान्मणेः ।
दोषप्रहाणान्न ज्ञानमात्मनः क्रियते तथा ॥
यथोदपानकरणात् क्रियते न जलाम्बरम् ।
सदेव नीयते व्यक्तिमसतः संभवः कुतः ॥

तथा हेयगुणध्वंसादवबोधादयो गुणाः ।
प्रकाश्यन्ते न जन्यन्ते नित्या एवात्मनो हि ते ॥'' इति ।

तथाच, 'पश्चादुद्भूतबोधाश्च' इत्यादि । सूत्रं च, 'जगद्व्यापारवर्जम्' इत्यादि, 'भोगमात्रसाम्यलिङ्गाच्च' इति । अतः श्रुतिस्मृतिसूत्रानुवर्तिनामीश्वरपरमसाम्यापत्त्या सार्वज्ञ्यमेव मुक्तस्य स्फुटम् ।

किंच स्वप्रकाशैकस्वरूपस्य ब्रह्मणः कदाचित् स्वेतरविषयत्वं कदाचिच्च निर्विषयत्वमिति(त्यत्र) उभयमपि किं तत्त्वम्, उभयमप्यतत्त्वम्, उतान्यतरत् तत्त्वम्, अन्यतरदतत्त्वम् ? इति ।

न प्रथमः; विषयविषयितत्सम्बन्धादिभेदस्य सत्यत्वप्रसङ्गात् ।

न द्वितीयः; उभयस्वरूपमात्रनिषेधे व्याघातात्; कालोपश्लेषेण निषेधो द्वयोरपि नित्यतामापादयेदिति पुनरपि व्याघातः ।

विष्णुपुराणवचनमाह - **पश्चादिति** ।

"पश्चादुद्भूतबोधाश्च ध्याने नैवोपकारकाः ।
नैसर्गिको न वै बोधस्तेषामप्यन्यतो यतः ॥
तस्मात्तदमलं ब्रह्म निसर्गदिव बोधवत् ॥" इति

ब्रह्मसाम्ये सार्वज्ञ्ये च मुक्तस्य सूत्रवचनं प्रमाणतयोदाहरति - **जगद्व्यापारेति** ।' जगद्व्यापारवर्जं प्रकरणादसंनिहितत्वाच्च" इति सूत्रम् ।

इदानीमद्वैतमतं मुक्तसंविन्निर्विषयत्वं विशेषतः कटाक्षयति - **किं चेत्यादिना** । स्वप्रकाशैकस्वरूपस्य ब्रह्मणः बन्धदशायां स्वेतरविषयकत्वं मुक्तिदशायां सर्वविषयकत्वमिति भवद्भिरुच्यते । तेन प्रकाशैकस्वरूपस्य ब्रह्मणः कदाचित् स्वेतरविषयकत्वं कदाचित् निर्विषयकत्वमिति फलति । तत्र विकल्पयामः - किं कदाचित् सविषयकत्वं कदाचित् निर्विषयकत्वमित्येतदुभयमपि सत्यम् अथ उभयमप्यसत्यम्, उत अन्यतरत् सत्यम् अन्यतरत् असत्यमिति । तत्र **न प्रथमः इति** । **विषयेति** । सविषयकत्वं निर्विषयकत्वमुभयं सत्यमिति स्वीकारे विषयः विषयी तयोः संबन्धः इत्यादिकं सर्वं सत्यमिति प्रसजतीति भावः । **न द्वितीय इति** । कदाचित् सविषयत्वं कदाचिन्निर्विषय-

अथ कालावच्छिन्नान्यतरनिषेधार्थोऽन्यतरानुवाद इति मन्यसे, तदा तृतीयः

त्वमित्येतदुभयमसत्यमिति द्वितीयपक्षे कादाचित्कत्वविशिष्टसविषयकत्वं कादाचित्कत्वविशिष्टनिर्विषकत्वमित्येतदुभयमसत्यमिति फलति । तत्र किं विशेष्ययोः सविषयकत्वनिर्विषयकत्वयोरसत्यत्वात् विशिष्टासत्यत्वमुच्यते, उत विशेषणयोः कादाचित्कत्वयोर्निषेधात् विशिष्टासत्यत्वमुच्यते इति विकल्पः । तत्राद्ये विशेष्ययोःनिर्विषयकत्वसविषयकत्वयोः असत्यत्वे ब्रह्मस्वरूपे निर्विषयकत्वमपि नास्ति सविषयकत्वमपि नास्तीत्यायाति । तत्र व्याघातः भावाभावयोरन्यतरनिषेधेऽन्यतरस्यावर्जनीयत्वात् सविषयकत्वाभावे निर्विषयकत्वस्य, निर्विषयकत्वाभावे सविषयकत्वस्यावर्जनीयतया उभयनिषेधरूपोभयासत्यत्वासंभवादिति भावः । द्वितीयमनूद्यदूषयति - **कालोपश्लेषेणेति** । कादाचित्कत्वरूपकालसंबन्धात्मक विशेषणमात्रासत्यत्वे विशेष्ययोः निर्विषयकत्वसविषयकत्वयोः सत्यत्वे पर्यवसानात् पुनरपि व्याघात एव । एकत्र ब्रह्मणि तदुभयासंभवादिति भावः । **नित्यताम्** = नित्यसत्तामित्यर्थः । ननु व्यासज्यवृत्तिधर्मपुरस्कारेण द्वयोर्निषेध इति शङ्कते - **अथेति** । यथा घटवति घटपटोभयं नास्तीत्यत्र उभयत्वेन रूपेण घटनिषेधार्थं घटवतीत्यनुवादः तद्वत् कादाचित्कसविषयकत्वकादाचित्कनिर्विषयकत्वयोर्मध्ये व्यासज्यबृत्तिधर्मपुरस्कारेण अन्यतरनिषेधार्थस्तदितरानुवाद इति मन्यसे'', तथा अन्यतरदसत्यमिति तृतीयपक्ष एव पर्यवस्यति । तत्र सविषयकत्वस्य कादाचित्कत्वं विना सत्यत्वे तस्य नित्यत्व सद्वितीयत्वादयो दोषाः प्रादुर्भवेयुः । निर्विषयत्वस्य नित्यत्वे संसाररूपविषयाभावप्रसङ्गात् संसारोपलम्भविरोधः **उपदेशवैयर्थ्यम् शास्त्रानुद्धारः** शास्त्रानुत्थितिः **अपसिद्धान्तः**=संसाराभ्युपगमविरोधः **स्ववचनविरोधः**= संसारप्रतिपादकस्ववचनविरोधः वादानधिकारः इत्यादयो दोषाः प्रसज्येरन्निति भावः । एतदुक्तं भवति - अस्मिन् तृतीयपरिशेषे यदि कादाचित्कसविषयकत्वकादाचित्कनिर्विषयकत्वयोर्मध्ये कादाचित्कसविषयकत्वमतात्त्विकम्, तदपि कादाचित्कत्वरूपविशेषणाभावादिति मतम्,

पक्षः परिशिष्यते । सविषयत्वस्य कालानवच्छेदेन तात्त्विकत्वे प्रागुक्तदोषाः प्रादुःष्युः । निर्विषयत्वस्य तात्त्विकत्वे नित्यत्वेन संसाराभावप्रसङ्गात् उपलम्भविरोध-उपदेशवैयर्थ्य-शास्त्रानुत्थान(द्धार)- अपसिद्धान्त-स्ववचनविरोध-वादानधिकारादिदोषशतसाम्राज्यम् ॥ वस्तुतो विषयाभावेऽपि सविषयता भातीति संसारादिसंभ (समुद्भ)वान्न दोष इति चेन्न; विषयाभावेऽपि सविषयत्वं तात्त्विकमिति त्वयाऽभ्युपगन्तव्यत्वात्। अन्यथा निर्विषयख्यातिप्रसङ्गात्। न हि शुक्तिकारजतादिसंविदां रजतविषयतामपि बाधन्ते बाधकाः । अबाधितस्यापि मिथ्यात्वमित्यतिसाहसम् ॥ अस्त्वेवं मिथ्याविषयगोचरत्वलक्षणं सविषयत्वं

तदा दोषमाह - **सविषयत्वस्येति** । सविषयकत्वरूपविशेष्याभावात् कादाचित्कसविषयकत्वस्य अतात्त्विकत्वे अनुपदं निर्विषयत्वस्य नित्यत्वे इत्यादिना वक्ष्यमाणं संसाराभावप्रसङ्गरूपं दूषणं बोध्यम् । **निर्विषयत्वस्येति** । पूर्ववत् कादाचित्कत्वरूपविशेषणविरहात् कादाचित्कनिर्विषयकत्वस्यातात्त्विकत्वे इदं दूषणम् । निर्विषयकत्वरूपविशेष्याभावात् तथात्वे तु सविषयकत्वनित्यत्वपक्षोक्तदोष - इति ।

शङ्कते - **वस्तुत इति** । यद्यपि संवित् वस्तुतो निर्विषया तथापि सविषयतया भातीति नाशङ्कनीयम् । वस्तुतो विषयाभावे किंचिन्निष्ठविषयतानिरूपकत्वरूपं सविषयकत्वं संबिदः तात्त्विकमिति भवताभ्युपगन्तव्यम् । अन्यथा निर्विषयख्यातिप्रसङ्गात् । विषयस्य बाधेऽपि सविषयकत्वं तात्त्विकमित्याह-**न हीति** । शुक्तौ रजतविषयकबुद्धौ सत्यां रजतरूपविषयस्य बाधेऽपि रजतविषयकत्वं बुद्धौ न बाध्यते । रजतं नास्तीत्येव व्यवह्रियते, न तु बुद्धौ रजतविषयकत्वं नास्तीति । अवाधितस्यापि मिथ्यात्वमिति वचनं तु अतिसाहसमित्यर्थः । शङ्कते - **अस्त्वेवमिति** एवं भवदुक्तरीत्या मिथ्याविषयकत्वरूपं सविषयकत्वं ब्रह्मणः सत्यम् अस्तु तावता अस्माकं का हानिरिति चेत् - न । तत् मिथ्याविषयकत्वं नित्यमनित्यं वा । आद्ये नित्यसंसारप्रसङ्गः, सविषयकत्वस्यैव संसारत्वात् । द्वितीये सविषयकत्वमनित्यं चेत् - तात्त्विकत्वपरिग्रहायोगः । अनित्यस्य तात्त्विकत्वाभावात्

ब्रह्मणस्तात्त्विकम्, किं नश्छि(तच्छि)च्छि न्नमिति चेन्न; तन्नित्यत्वे नित्यसंसारप्रसङ्गात्। तदनित्यत्वे तात्त्विकत्वपरिग्रहायोगात्। न ह्यनित्यमपि किंचित् पारमार्थिकं भवन्तो मन्यन्ते ॥ स्वरूपानुप्रवेशात् तात्त्विकमिति न दोष इति चेन्न; स्वरूपस्याप्यनित्यत्वप्रसङ्गात्। तन्नित्यतया तदात्मना तन्नित्यत्वे पुनर्नित्यसंसारप्रसङ्गात्।

किञ्चानादिकालं सविषयायाः संविदो निर्विषयता कुत आगता ॥ विषयग्रहणसामग्रीसन्तानात्यन्तोच्छेदादिति चेत्-(न); किं नित्यायास्सामग्र्यपेक्षया ॥ संविदन्तरसिद्ध्यर्थं सेति चेत्; किं संविद्भेदमङ्गीकरोषि । विषयावगाहनार्थं सेति चेत्--किमिदमवगाहनं संवित्स्वरूपम्, उतान्यत् ? पूर्वत्र

भवन्मते । तदाह - **न ह्यनित्यमिति** । ननु अनित्यस्यापि सविषयकत्वस्य ब्रह्मस्वरूपान्तर्गतत्वात् तात्त्विकत्वं युज्यत इति शङ्कते - **स्वरूपानुप्रवेशादिति** । परिहरति - **स्वरूपस्यापीति** । सविषयकत्वमनित्यं स्वरूपाभिन्नमित्यङ्गीकारे स्वरूपस्यानित्यत्वप्रसङ्गः । स्वरूपनित्यतया तदभिन्नस्य सविषयकत्वस्य नित्यत्वे पुनरपि नित्यसंसारप्रसङ्ग इत्यर्थः । मिथ्यावस्तुविषयकत्वं हि सविषयकत्वं, स एव च संसारो भवन्मते ।

किं चेत्यादि । अनादिकालात् सविषयायाः संविदः मुक्तौ निर्विषयता केन हेतुना आगता । विषयावगाहनसामग्रीसंतानस्य उच्छेदात् निर्विषयता आगता इति शङ्कते - **विषयग्रहणेति** । विषयग्रहणं विषयावगाहनम् । ग्रहणशब्दस्य ज्ञाने विषयावगाहने च साधारणत्वात् किं ग्रहणशब्देन संविद्विवक्षिता उत विषयावगाहनम् - इति विकल्पमभिप्रेत्य, आद्येऽपि किम् अनादिसिद्धा संविदेव विवक्षिता उत संविदन्तरमिति विकल्प्य आद्यं दूषयति- **किं नित्याया इति** । द्वितीयमाशङ्क्य दूषयति - **किं संविदन्तरमिति** । **संविद्भेदं** = संविन्नानात्वम् । विषयावगाहनमिति द्वितीयपक्षं शङ्कते - **विषयेति** । विकल्पपूर्वकं दूषयति - **किमिदमिति** । अवगाहनं संवित्स्वरूपम्? उतान्यत्? आद्ये सामग्रीनैरपेक्ष्यम् । द्वितीये किमसौ विषयिधर्मः उत विषयधर्मः उतोभयधर्मः यद्वा विषयस्वरूपमेव । आद्ये

नैरपेक्ष्यमेव । उतरत्र किमसौ विषयिधर्मः, उत विषयधर्मः, उतोभयधर्मः, यद्वा विषयस्वरूपमेव ? आद्ये सविशेषत्वम् । मिथ्याधर्मप्रलापदूषणं तु स्थलान्तरेऽनुसन्धेयम् ॥ द्वितीये तदुत्पत्ताबपि रूपाद्युत्पत्ताविव संविदस्तत्सम्बन्धाभावेन तादवस्थ्यमेव ॥ तृतीयेऽपि सविकारत्वमवर्जनीयमेव ॥ चतुर्थे सम्बन्धासिद्धिः । विषयग्रहणसामग्र्या विषयोत्पादनमिति हास्यत्वं च । सिद्धे हि विषये प्रकाशार्थं सा ॥ भ्रान्तौ (तु) तदुत्पत्तिस्तद्ग्रह इति न भेद इति चेन्न; आत्मख्यातिवादप्रसङ्गात् ।

सविशेषत्वप्रसङ्गः । अवगाहनस्य मिथ्यात्वान्न तेन सविशेषत्वप्रसङ्ग इत्याशङ्क्याह- **मिथ्याधर्मप्रलापे** इति । **स्थलान्तरे**=मिथ्यात्वभङ्गे । मुक्तिदशायां सविषयत्वनिवृत्तेः ब्रह्मस्वरूपतदतिरेकविकल्पेन अविद्यानिवृत्तिवादोक्तदूषणं चानुसन्धेयम् । विषयधर्म इति पक्षेऽपि किं संविदः तद्धर्मनिरूपकत्वमस्ति उत न । आद्ये पूर्ववत् सविशेषत्वादिकमित्यभिप्रेत्य द्वितीयं दूषयति - **द्वितीय** इति । विषयधर्मावगाहननिरूपकत्वं संविदो नास्ति चेत् विषयावगाहनोत्पत्तेः प्राक् यथा संविदः निर्विषयत्वं तथा पश्चादपि निर्विषयत्वं स्यादिति भावः । यथा विषयधर्मस्य रूपादेः उत्पत्तेः प्राक् पश्चाच्च संविदो रूपशून्यत्वं तद्वदिति दृष्टान्तः । **तृतीयेऽपीति** । विषयविषय्युभयधर्मः=अवगाहनमिति तृतीयपक्षे संविदः सविकारत्वं = सविशेषत्वमवर्जनीयमेवेति भावः । विषयावगाहनं विषयस्वरूपमिति चतुर्थपक्षे दूषणमाह - **चतुर्थे संबन्धासिद्धिरिति** । संविदि विषयनिरूपकत्वस्य पूर्ववत् अभावादित्यर्थः । किं च विषयावगाहनरूपं विषयग्रहणं यदि विषयस्वरूपं तदा विषयग्रहणसामग्र्या विषयोत्पादनमित्युक्तं भवति । तथा हि साक्षात्कारात्मकविषयग्रहणसामग्र्यां विवयस्यापि प्रविष्टतया आत्माश्रयप्रसङ्गात् । सर्वयापि ज्ञानसामग्र्या विषयानुत्पत्तेः, अतीतादिविषयज्ञानस्थले अतीतादिविषयस्य पुनरुत्पत्तिप्रसङ्गाच्च हास्पत्वमिति भावः ।

ननु यदि हि ज्ञानात् प्राक् विषयः सिद्धः स्यात् तदा हि विषयग्रहणसामग्री विषयार्था न स्यात् । भ्रमे तु विषयस्य ज्ञानात् प्रागसत्त्वात् सामग्र्याः विषयार्थत्वमविरुद्धमिति शङ्कते- **सिद्धे हीति** । **तदुत्पत्तिस्तद्ग्रह** इति । विषयोत्पत्तिरेव विषयग्रह इत्यर्थः । तथा सति आत्मख्यातिवादप्रसङ्ग, तन्मते ज्ञानार्थयोरभेदादिति समाधत्ते - **आत्मख्यातीति** ।

प्राक् सतामेव हि विषयाणां ग्रहणार्थं प्रमाणकल्पनं व्यावहारिकमपि भवत्परिगृहीतम्; अन्यथा क्षणभङ्गनिराकरणस्याप्ययोगात् । अतः सामग्रीनिरपेक्षसंवित्स्वरूपप्रकाशवादिनस्ते न निर्विषयदशा सिध्यति ॥

अस्तु तर्हि विषयविनाशादेव निर्विषयतासिद्धिरिति चेन्न; नष्टस्यापि विषयत्वाविरोधात् । अन्यथा अतीतादिविषयस्मृत्यनुमानादिभङ्गप्रसङ्गात् ॥ तद्विषयत्वे स्थितेऽपि तन्नाशान्न संसारादिप्रसङ्ग इति चेत्; किमसौ नाशोऽप्रकाशात्मा,

---

सिद्धान्तविरोधमप्याह - **प्राक्सतामेवेति** । ज्ञानात् प्राक् सतामेव विषयाणां ग्रहणार्थम् व्यावहारिकमिन्द्रियादिप्रमाणकल्पनं भवद्भिः परिगृहीतम् । प्रत्यक्षे इन्द्रियसंनिकर्षस्य कारणत्वात् इन्द्रियसंयोगदशायामपि विषयसत्तायाः वक्तव्यत्वादेव हि क्षणभङ्गनिराकरणं भवतां युज्यते इति भावः । **अत इति** । संविदः स्वरूपेण प्रकाशः संवित्स्वरूपप्रकाशः । प्रकाशो भासमानता । सामग्रीनैरपेक्ष्यस्योपपादितत्वात् न सामग्रीसंतानोच्छेदतात् संविदः निर्विषयत्वदशायाः उपपादनं संभवतीति भावः ।

ननु मा भूत् विषयग्रहणसामगीविरहान्निर्विषयदशेत्येतत् । विषययाभावात् तु सा दशा मुक्तौ स्यादिति साक्षात्सिद्धान्तमेवाशङ्कते - **अस्त्विति** । **निर्विषयता**=विषयानुल्लेखः । समाधत्ते - **नष्टस्यापीति** । नष्टस्यापि घटादेः ज्ञानविषयत्वदर्शनात् विषयनाशात् निर्विषयत्वमिति वक्तुं न शक्यते । ततश्च संविदः निर्विषयत्वाभावः संसारश्च प्रसज्येयातामिति भावः । **अन्यथा** = नष्टस्य ज्ञानविषयत्वाभावे । अतीतविषयस्य स्मरणमनुमानं शब्दतः प्रकाशनं च न स्यादिति भावः ।

ननु मुक्तौ संविदि अतीतप्रपञ्चविषयकत्वमस्ति, तथापि न संसारप्रसङ्गः विषयस्य प्रवञ्चस्य नाशादित्याशङ्कां परिहरति - **तद्विषयत्व इति** । प्रपञ्चविषयकत्वे स्थितेऽपि प्रपञ्चनाशादित्यर्थः । संसारादिप्रसङ्ग इत्यादिपदेन निर्विषयत्वाभावो गृह्यते । मुक्तसंविदः सविषयकत्वे सत्यपि अतीतविषयकत्वेन तदानीं विषयाभावादेव निर्विषयकत्वव्यपदेशोऽपि घटत इति शङ्काया भावः । परिहरति - **किमसाविति** । किं च विषयनाशः किम् अप्रकाश-

उत प्रध्वंसात्मा ? आद्ये तद्विषयत्वे स्थितेऽपि तन्नाशादिति स्ववचनविरोधः। द्वितीये निवर्त्यसत्यत्वम्, निवृत्त्या सद्वितीयत्वमित्यादिदोषप्रसङ्गः ॥ निवृत्तान्(र्तिं) निवृत्त(त्ति) तया विषयीकरोतीति न दोष इति चेत्; विषयीकरणं किं स्वरूपम्, उत तदतिरिक्तम् ? स्वरूपपक्षे संसारदशायामपि नित्यं निवृत्ततया विषयीकारप्रसङ्गः, सर्वत्र स्वरूपस्य तदानीमपि विद्यमानत्वात्। अतिरिक्तपक्षे तत् किं सत्यम्, उत मिथ्या ? सत्यत्वे सद्वितीयत्वादिप्रसङ्गः। मिथ्यात्वे तु तस्यैव दृगधीन-

---

रूप: उत प्रध्वंसरूप: । आद्ये प्रकाशस्य नित्यतया प्रकाशाभावो नाम तद्विषयकत्वाभाव इत्येव पर्यवसानात् तद्विषयकत्वे स्थितेऽपि तन्नाशादिति स्ववचने विरोध: इति भाव: । **द्वितीय इति** । नाश: ध्वंसरूप इति पक्षे मोक्षदशायां विषयध्वंसोऽस्तीत्यायातम् । तदानींतनस्य तस्य आविद्यकत्वाभावात् सत्यत्वं वाच्यम् । तथा नाशविरोधिन: विषयस्यापि सत्यत्वं वाच्यम् । समानसत्ताकयोरेव विरोधात् । एवं च ब्रह्मण: मुक्तदशायां नाशेन सत्येन सद्वितीयत्वं, निवर्त्यस्य सत्यत्वं च प्रसजतीति भाव: । **इत्यादिदोष** इति आदिपदेन निवृत्तेः ब्रह्मस्वरूपत्वे तस्यासाध्यत्वेन तदर्थं श्रवणादेर्वैयर्थ्यं प्रसजति इत्यादिकं ग्राह्यम् ।

पूर्वं नष्टस्यापि विषयत्वाविरोधादिति यदुक्तं तत्र पुन: शङ्कते - **निवृत्तानिति** । मुक्तिदशायां संवित् निवृत्तानपि विषयान् निवृत्ततया विषयीकरोति । अनिवृत्ततया प्रपञ्चरूपविषयदर्शनमेव संसार:, अतो न संसारप्रसङ्ग । निवृत्ततया विषयीकरणमेव निर्विषयकत्वमिति शङ्का । इमां शङ्कां परिहरति - **विषयीकरणमिति** । यदिदं निवृत्ततया विषयीकरणं तत् किं ब्रह्मस्वरूपं उत तदतिरिक्तम्, स्वरूपपक्षे संसारदशायापपि स्वरूपस्य सत्त्वात् तदापि निवृत्ततया विषयीकरणप्रसङ्ग: । स्वरूपातिरिक्तमिति पक्षे तत् विषयीकरणं किं सत्यम् उत मिथ्या । सत्यत्वे सद्वितीयत्वादिदोष: । मिथ्यात्वे तु विषयीकरणस्य दृगधीनसिद्धिकतया (प्रातिभासिकतया) प्रकाशात् तत्कारणीभूताविद्याया अनुवृत्ते: आवश्यकतया पुनरपि संसारानुच्छेदप्रसङ्ग इति भाव: । **सद्वितीयत्वादीति** । आदिपदेन नित्यत्वं गृह्यते । **मिथ्यात्वे तु इति** । अविद्याविषयीकरणयो: निवृत्तत्वेनाविषयीकरणात्

Sanskrit University
Ministry of Education, Govt. of India
Guruvayoor Campus Library
Puranattukara.P.O., Thrissur-680551
Acc.No. 39370
Acc.Date 27/02/2026

सिद्धेः प्रकाशात् तत्कारणाविद्यानुवृत्त्यवश्यंभावाच्च पुनरपि संसारानुच्छेदः ॥ तावन्मात्रं क्षम्यत इति चेन्न; तस्य तस्याश्चानिवर्त्यत्वेन सत्यत्वप्रसङ्गे सद्वितीयत्वादिप्रसङ्गात् तुल्यन्यायात् प्रपञ्चबाधादिमूर्खप्रलापानां निरोधप्रसङ्गात्। अतः संविदि नित्यायाम्, सामग्रीनिवृत्त्या विषयनिवृत्त्या वा निर्विषयत्वापादनं त्वया वक्तुं न शक्यम्॥

ननु भवतामात्मस्वरूपस्य संविद्रूपत्वेऽपि यथा निर्विषयत्वम्, तथाऽस्माकमपि स्यात्॥ न स्यात्; अस्माकमात्मस्वरूपस्य प्रतीचः कदाचिदपि बाह्यार्थगोचरत्वानभ्युपगमात्। भवतस्तु तद्विषयाया एव तद्विषयत्वनिवृत्तेर्दुर्वचत्वात्॥

इति भावः। ननु मुक्तिदशायामविद्याविषयीकरणयोर्द्वयोरेव परं स्थितिरङ्गीक्रियत इत्याशङ्कते- **तावन्मात्रमिति**। अविद्या विषयीकरणं चेति द्वयमात्रम्, क्षम्यते=अनिवृत्ततया स्वीक्रियत इति चेदित्यर्थः। परिहरति - **तस्येति**। **तस्य**= विषयीकरणस्य तस्याः = अविद्यायाश्च अनिवर्त्यत्वे तयोः सत्यत्वप्रसङ्गेन ब्रह्मणः सद्वितीयत्वादिप्रसङ्ग इत्यर्थः। आदिपदेन अविद्यायाः सत्यत्वे तन्मूलकप्रपञ्चस्यापिसत्यत्वं ज्ञानानियवर्त्यत्वं च स्यादिति विवक्षितम्। **तुल्यन्यायादिति**। मिथ्यात्वेऽपि अविद्याविषयीकरणयोर्ज्ञानबाध्यत्वाभावे तुल्यन्यायात् प्रपञ्चस्यापि ज्ञानबाध्यत्वं न स्यादिति भावः। प्रकृतं निगमगति - **अतश्चेति**। मुक्तसंविदः निर्विषयत्वं दुर्घटमिति भावः।

सिद्धान्तेऽपि दोषः समान इति शङ्कते - **ननु भवतामिति**। विशिष्टाद्वैवतिनां भवतां मतेऽपि जीवात्मस्वरूपं ज्ञानरूपं निर्विषयं चेष्यते, तथा अस्मन्मतेऽपि ब्रह्मणः ज्ञानस्वरूपस्य निर्विषयत्वं कुतो न स्यादिति। समाधत्ते - **न स्यादित्यादिना**। अस्मन्मते प्रत्यगात्मस्वरूपस्य कदाचिदपि संसारदशायां मुक्तिदशायां वा बाह्यार्थविषयकत्वं नाङ्गीक्रियते। भवन्मते तु ब्रह्मस्वरूपस्य ज्ञानस्य संसारदशायां बाह्यार्थविषयकत्वं मुक्तिदशायां बाह्यार्थविषयकत्वनिवृत्तिश्चाङ्गीकृता। सा च दुर्वचेति विशेष इति भावः।

अस्तु तर्हि भवतां धर्मभूतज्ञानवत् कदाचित् सविषयत्वम्, कदाचिच्च निर्विषयत्वमिति चेन्न; अस्माभिः परमार्थाकारान्तरापत्त्यभ्युपगमात्, भवतां तु तदनभ्युपगमात् तदयोगात्। अतो नित्यसंवित्स्वरूपप्रकाशमात्राधीनसिद्धीनां सर्वेषामपि पदार्थानां नित्यत्वमपि प्रसज्येत । तदधीनसिद्धित्वाभावे तु सिद्धिनिषेधे तुच्छत्वम् । तादधीन्यनिषेधे तु सत्यत्वम् । अतस्तन्मात्राधीनसिद्ध्यभ्युपगमे तद्वदेव तदधीनस्यापि नित्यत्वमवर्जनीयमेव। तथा च सति सर्वप्रपञ्चः सत्य इति जितं यथार्थवादिभिः। तद्भयात् संविन्नित्यत्वपरित्यागे साक्षात्सौगतत्वादिप्रसङ्गः। अत एव, "स्वापमदमूर्च्छादिषु निर्विषया संवित्" इत्यपि भवद्भिर्दुर्वचमेव, निर्विषयनिराश्रयसंवित्प्रकाशस्तदानीमनुभूतः (भूयत) इति, कस्यचिदपि सावधानस्यापि समस्तसंस्कारतिरस्कारकदेहविगमादिक्लेशाभावेऽपि न परामर्शोऽस्ति। किंतु अहमपि न विनष्टः, विषया अपि स्थिताः, प्रकाश एव सुषुप्त्यादौ निवृत्त इति सर्वे

पुनः शङ्कते - **अस्तु तर्हीति**। भवद्भिः स्वरूपातिरिक्तं धर्मभूतज्ञानमङ्गीकृतम् । तस्यैव कदाचित् सविषयकत्वं कदाचिच्च निर्विषयकत्वं भवतु इति । परिहरति - **अस्माभिरिति**। अस्माभिः धर्मभूतज्ञानस्य पारमार्थिकं विषयीकरणरूपमाकारान्तरमङ्गीक्रियते । भवद्भिस्तु पारमार्थिकस्य स्वरूपातिरिक्तस्य आकारस्य विषयीकरणस्य अनङ्गीकारात् स्वरूपमेव विषयीकरणमिति वक्तव्यम्। तस्य च पूर्वोक्तरीत्या निवृत्तिः दुर्वचेति भावः । ततश्च विषयीकरणस्य नित्यत्वे तद्वत् सर्वेषामपि पदार्थानां नित्यत्वं प्रसज्येतेति भावः। **तदधीनेति**। सर्वेषां पदार्थानां दृगधीनासिद्धित्वाभावे तुच्छत्वं स्यात्। तथा हि सिद्धिर्नाङ्गीक्रियते वा तदधीनत्वं नाङ्गीक्रियते वा आद्ये तुच्छत्वम्। द्वितीये सत्यत्वं प्रसज्यत इत्यर्थः ।

ननु सविषयाया एव संविदः सुषुप्त्यादिदशायां निर्विषयत्ववत् मुक्तौ निर्विषयत्वं स्यादित्यत्राह - **अत एवेति**। न केवलं भवता दुर्वचत्वम्। निर्विषयनिराश्रयसंविदः प्रमाणाभावात् बाधाच्च तदानीमसिद्धिरेवेत्याह - **निर्विषयेति**। ननु "नाह खल्वयमेवं

प्रत्यवमृशन्ति । 'नाह खलु' इत्यादिश्रुतिरपि ज्ञाननिषेधपरैव; न जानामीत्यत्रैव तात्पर्यात् । अस्माभिस्तु विषयप्रकाशलक्षणावस्थाविशेषरहितज्ञानद्रव्यमात्रसत्ता, 'न विज्ञातुर्विज्ञातेर्विपरिलोपो विद्यते' इत्यादिश्रुतिबलादभ्युपेयते । न चास्ति तत्र प्रत्यक्षविरोधः, विषयप्रकाशव्यतिरिक्तदशायां तस्याः स्वप्रकाशायोग्यत्वात् । ज्ञानान्तरस्य तु तदानीं सामग्र्यभावादेवानुदयात् तावताऽपि तदातनज्ञाननिषेधश्रुतेश्चरितार्थत्वात् ।

संप्रत्यात्मानं जानाति अयमहमस्मीति नो एवेमानि भूतानि'' इति सुषुप्तौ सविषयकत्वनिषेधात् तदा संविन्निर्विषयेत्यत्राह - **नाहेति** । सा श्रुतिः सुषुप्तौ ज्ञाननिषेधपरा, न तु ज्ञानस्य निर्विषयत्वपरा । न जानामीत्यत्रैव तात्पर्यात् इति भावः । ननु भवन्मते ज्ञाननित्यत्वाङ्गीकारात् कथं सुषुप्तौ ज्ञाननिषेध इत्यत्राह - **अस्माभिस्तु** इति । अस्माभिः ''न विज्ञातुर्विज्ञातेर्विपरिलोपो विद्यते'' इति श्रुतिबलात् धर्मभूतज्ञाननित्यत्वाङ्गीकारात् तदविरोधाय ''नाह खलु'' इत्यादौ श्रूयमाणस्य ''न जानामि'' इत्यस्य विषयप्रकाशकत्वरूपावस्थाविशिष्टज्ञानाभावपरतया व्याख्यानं क्रियते । सोऽप्यभावः विशेषणीभूतविषयप्रकाशकत्वाभावप्रयुक्तः न विशेष्याभावप्रयुक्त इति सुषुप्तिदशायां विषयप्रकाशकत्वाभावसहितज्ञानसत्ता पर्यवस्यति । भवन्मते तु विषयीकरणस्य ज्ञानस्वरूपत्वाङ्गीकारात् सविषयकत्वविशिष्टज्ञाननिषेधोऽपि ज्ञानाभाव एव पर्यवस्यतीति सुषुप्तौ ज्ञानाभाव एव श्रुत्यनुसारात् वक्तव्यः । स च भवता नाङ्गीकृत इति श्रुतिविरोधो दुस्त्यज इति भावः ।

ननु सुषुप्तौ विषयप्रकाशरहितज्ञानसत्ता प्रत्यक्षविरुद्धेत्याशङ्क्य स्वप्रकाशप्रत्यक्षविरोधः वक्तुं न शक्यते । तदानीं विषयप्रकाशाभावात् स्वप्रकाशत्वाभावात् । विषयप्रकाशव्यतिरिक्तदशायामेव धर्मभूतज्ञानस्य स्वप्रकाशत्वात् ज्ञानान्तरस्यानुमित्यादेः तदानीं सामग्र्यभावादेवानुदयात् न तद्विरोध इति समाधत्ते- **न चास्तीति** । **तावतापीति** ।

अतस्त्वत्पक्षे ज्ञानस्य कदाचिदपि निर्विषयदशा दुरुपपादा, मुक्तौ तु सुतरामिति यथाश्रुति सार्वज्ञ्यमेव तदा स्वीकार्यम् ॥ अन्यपरास्ताः श्रुतय इति चेन्न; परब्रह्मोपासनप्रकरणात् तत्फलप्रतिपादनपरत्वेन च सांसारिकफलत्वायोगात्, तत्रतत्रैव च निवृत्तसमस्तपुण्यपापत्वादिप्रतिपादनात्, विध्यपेक्षिते फले समर्प्यमाणे केवलार्थवादत्वकल्पनायोगात् । अन्यथाश्रुतहानाश्रुतकल्पनादिदोषसमुद्भवात् (मात्) । अतस्सिद्धं न कथंचिदपि मुक्तिदशायां सर्वविषयवैमुख्यलक्षणमान्ध्यं संविदः शङ्कनीयमिति ॥

॥ इति शतदूषण्यां मुक्तसंविन्निर्विषयत्वभङ्गवादः एकपञ्चाशः ॥ ५१ ॥

स्वप्रकशात्वाभावात् ज्ञानान्तराभावाच्चेत्यर्थः । **सार्वज्ञ्यमेव स्वीकार्यमिति** । सर्वज्ञत्वस्वीकारे च सर्वविषयकत्वमेव आयाति न निर्विषयकत्वं ज्ञानस्येत्यर्थः । ननु सार्वज्ञ्यादिश्रुतयः न मुक्तिविषयाः इत्याशङ्क्याह - **अन्यपरास्ता इति** । परब्रह्मोपासनप्रकरणे सर्वज्ञत्वस्य फलतया निर्देशात् न तत् सांसारिकं फलम् । तत्रैव पुण्यपापादिनिवृत्तिपूर्वकं सर्वज्ञत्वस्य प्रतिपादनात् मोक्षफलान्तर्गतमेव सर्वज्ञत्वम् । अपि च उपासनविधेरपेक्षितस्य फलस्य प्रतिपादनेन विधिशेषस्यार्थवादस्य सार्थकतया न प्रशंसापरत्वमन्यपरत्वं वेति भावः । **श्रुतहानेति** । श्रुतस्य सर्वज्ञत्वादिरूपफलस्य त्यागः अश्रुतस्य फलान्तरस्य कल्पनमित्यादयो दोषा भवेयुरित्यर्थः । वादार्थमुपसंहरति - **अतःसिद्धमिति** ।

इति श्रीशतदूषणीव्याख्यायां तात्पर्यप्रकाशिकायां
मुक्तसंविन्निर्विषयत्वभङ्गो नाम एकपञ्चाशो वादः ॥

* * *

।। अथ सगुणनिर्गुणश्रुतिव्यवस्थावादः द्विपञ्चाशः ।। ५२ ।।

सत्त्वानीव विरुद्धजातिजनुषां सिद्धानि सिद्धाश्रमे
वैरं यत्र मिथस्त्यजन्ति विधयः सर्वे निषेधैः सह ।
तद् रङ्गेशयमङ्गसङ्गिकमलालक्ष्येश्वरप्रक्रियं
शान्तावद्यमनन्तमङ्गलगुणं ब्रह्म प्रपद्येमहि ।।

निर्गुणश्रुतिभिः केचित् बाधन्ते सगुणश्रुतीः ।
तासामन्योन्यसौहार्दमा- हुर्यतिवराश्रयाः ।।

अस्ति तावत् उपनिषत्सु ब्रह्मण्येव सगुणवादो निर्गुणवादश्च । यथा–'यः

अथ सगुणनिर्गुणश्रुतिव्यवस्था नाम द्विपञ्चाशो वादः ॥

सत्वानीव विरुद्धजातिजनुषां सिद्धानि सिद्धाश्रमे
वैरं यत्र मिथस्त्यजन्ति विधयः सर्वे निषेधैः सह ।
तद्रङ्गेशयमङ्गसङ्गिकमलालक्ष्येश्वरप्रक्रियं
शान्तावद्यमनन्तमङ्गलगुणं ब्रह्म प्रपद्येमहि ॥

निर्गुणश्रुतिभिः केचित् बाधन्ते सगुणश्रुतीः ।
तासामन्योन्यसौहार्दमाहुर्यतिवराश्रयाः ॥

सिंहगजादिमिथोविरुद्धजातौ जन्मना विरोधितया सिद्धाः सिद्धाश्रमे यथा मिथो विरोधं त्यजन्ति, तथा सर्वे गुणादिविधयः गुणादिनिषेधैः सह यस्मिन् ब्रह्मणि विरोधं त्यजन्ति, तत् रङ्गेशयानम् स्वाङ्गसङ्गिकमलया लक्ष्म्या दृश्यमाना ईश्वरप्रक्रिया ईश्वरत्वं यस्य तादृशं निरस्तावद्यम् अनन्तकल्याणगुणं ब्रह्म प्रयद्येमहि ।

केचित् - अद्वैतिनः निर्गुणश्रुतिभिः सगुणश्रुतीः बाधन्ते । यतिवरं भगवद्रामानुजमुनिमाश्रितास्तु निर्गुणश्रुतीनां सगुणश्रुतीनां च पररपरसौहार्दमेवाहुः । पूर्ववादे विकल्पानां मिथ्यामिथ्यानिषयकत्वप्रस्तावात् निर्गुणश्रुत्यन्यथानुपपत्त्या गुणविभूतिश्रुतीनां मिथ्याविषयकत्वमिति शङ्कापरिहारोऽत्र वादे ।

अस्ति तावदित्यादि । उपनिषत्सु कानिचिद्वाक्यानि "यः सर्वज्ञः" इत्यादीनि

सर्वज्ञः सर्ववित्', 'पराऽस्य शक्तिर्विविधैव श्रूयते स्वाभाविकी ज्ञानबलक्रिया च', 'सत्यकामः सत्यसङ्कल्पः', 'ब्रह्मणा विपश्चिता' इत्याद्याः परस्सहस्राः सगुणश्रुतयः। एवम् 'निर्गुणं', 'निरञ्जनं', 'निष्कलं निष्क्रियं शान्तम्', 'अपहतपाप्मा विजरः' 'यत्तदद्रेश्यमग्राह्यमगोत्रमवर्णमचक्षुश्श्रोत्रं तदपाणिपादम्', 'अस्थूलमनणु' इत्याद्याः निर्गुणश्रुतयः। आसामन्योन्यविरोधस्तावत् आपाततः प्रतीयते। न च सिद्धे वस्तुनि विकल्पसंभवः। तत्र विरोधस्थिरीकरणेन बाध्यबाधकभाव इति नीचाः, विषयव्यवस्थया सन्धिरिति साधवः।

ननु कथं विषयव्यवस्था ? सा हि (१) आश्रयभेदेन वा, शीतोष्णवत्; (२) देशभेदेन वा, चित्रे नीलपीतादिवत्; (३) कालभेदेन वा, पाकजपरमाणुगुणवत्; (४) समुच्चयेन वा, प्रदेशवर्तिसंयोगतदभाववत्; (५) प्रतिसम्बन्धिभेदेन वा, पितृत्वपितृव्यत्ववत्; (६) ग्राहकभेदेन वा, रूपस्पर्शवत्; (७) ग्रहीतृभेदेन वा, जातिव्यवस्थितभोगादिवत्; (८) विधेयनिषेध्यभेदेन वा ब्रह्महत्याग्नीषोमीयादिवत्; (९) अन्येन वा केनचित् श्वेतपीतादिबोधवत् इति।

ब्रह्मणः सगुणत्वं वदन्ति। कानिचित् "निर्गुणं निरञ्जनम्" इत्यादीनि ब्रह्मणः निर्गुणत्वं वदन्ति। आसां श्रुतीनां परस्परविरोधः आपाततः प्रतीयते। सिद्धे वस्तुनि निर्गुणत्वं सगुणत्वं वेति विकल्पस्तु न संभवति। अतो विरोधमङ्गीकृत्प निर्गुणश्रुत्या सगुणश्रुतेः बाध इति नीचा वदन्ति। विषयव्यवस्थया विरोधपरिहाररूपं सान्धिं साधवो वदन्तीति। अत्र साधुनीचपदाभ्यां।

"नीचाः कलहमिच्छन्ति सन्धिमिच्छन्ति साधवः" इति न्यायो द्योत्यते।

पूर्वपक्षः

ननु इत्यादि। सगुणनिर्गुणश्रुत्योः सिद्धान्त्यभिमता विषयव्यवस्था संभवद्भिः नवभिरपि प्रकारैः कर्तुं न शक्यत इति पूर्वपक्षी दूषयति। तथा हि (१) शीतोष्णस्पर्शयोः विरोधः आश्रयभेदात् शाम्यति। (२) चित्रपटे नीलपीतादीनां रूपाणां विरोधः प्रदेशभेदेन

न तावदाद्यः; परमेव ब्रह्माधिकृत्य सगुणनिर्गुणश्रुत्योरुदयात्। न च जीवविषयाः काश्चित्, अन्यास्तु परविषया इति विवेक्तुं शक्यम्; विशेषाभावात्। न च सर्वज्ञत्वादिश्रुतीनां जीवविषयत्वम्; प्रत्यक्षविरोधात्, संसारोच्छेदप्रसङ्गाच्च। न

परिह्रियते। (३) परमाणुषु पाकवशात् जायमानानां नीलपीतादिरूपाणां विरोधः कालभेदात् शाम्यति (४) अव्याप्यवृत्तिसंयोगतदभावयोः विरोधः प्रदेशभेदेन वा कालभेदेन वा परिह्रियते। (५) पितृत्वपितृव्यत्वयोर्विरोधः निरूपकभेदात् परिह्रियते स्वपुत्रनिरूपितं पितृत्वं स्वभ्रातृपुत्रनिरूपितं पितृव्यत्वमिति। (६) इदं रूपम् अयं स्पर्श इति व्यवस्था ग्राहकेन्द्रियभेदात् भवति। (७)

परिव्राट्कामुकशुनामेकस्यां प्रमदातनौ।
कुणपं कामिनी भक्ष्यमिति तिस्रो विकल्पनाः॥

इत्युक्तरीत्या एकस्यामेव प्रमदातनौ मनुष्यपश्वादिजातीयभोक्तृभेदात् भोग्यतावैलक्षण्यं दृष्टम् (८) विधेयनिषेध्यभेदेन व्यवस्था यथा अग्नीषोमीयहिंसाविधेः न हिंस्यादिति हिंसानिषेधस्य च अग्नीषोमयाग - ब्रह्महत्याभ्यां व्यवस्था (९) अन्येन वा केनचित् - इति। अस्य पक्षस्य विवरणमेतत्पक्षदूषणावसरे करिष्यते।

तत्र प्रथमप्रकारेण सगुणनिर्गुणश्रुत्योः व्यवस्थां दूषयति - **न तावदाद्य इति**। परमेव ब्रह्माधिकृत्य सगुणनिर्गुणश्रुत्योः उदयात्सगुणत्वस्याश्रयोऽन्यः निर्गुणत्वस्याश्रयोऽन्य इति आश्रयभेदात् व्यवस्था कर्तुं न शक्यत इत्यर्थः। ननु सगुणश्रुतयः जीवविषयाः, निर्गुणश्रुतयः परमात्मविषया इति आश्रयभेदात् व्यवस्था भवितुमर्हतीत्याशङ्क्य सगुणश्रुतयः परमात्मविषयाः निर्गुणश्रुतयः जीवविषया इति वैपरीत्येनापि वक्तुं शक्यते, विशेषाभावादिति आश्रयभेदेन निर्धारणं त संभवतीति भावः। न केवलं जीवपरेयं श्रुतिरिति निर्धारणासंभवः प्रत्युत उभयोरपि श्रुत्योः जीवपरत्वमसंभवि चेत्याह - **नच सर्वज्ञत्वादीति**। **प्रत्यक्षविरोधादिति**। जीवानाम् असर्वज्ञत्वस्य प्रत्यक्षत उपलम्भात् जीवानां सर्वज्ञत्वं प्रत्यक्षविरुद्धत्वात् न श्रुत्यवसेयं तदिति भावः। अपि च जीवानां सर्वज्ञत्वे मोक्षसाधनतत्त्वज्ञानस्य सत्त्वात् संसारान्मोक्षप्रसङ्ग इत्याह - **संसारेति**। ननु जीवस्य योगाधीनं

चेदं यौगिकं सार्वज्ञ्यम्; नित्यसर्वज्ञत्वोक्तेः। नापि निर्गुणश्रुतीनाम्; तत एव। उपलभ्यते हि बुद्धिसुखादिमत्तया जीवः; तदभावे च तस्य संसरणं निर्बीजम्।

न द्वितीयः; स हि सम्बन्धिदेशभेदो वा स्यात्, स्वप्रदेशभेदो वा। आद्ये, रूपाद्यवच्छिन्नप्रदेशभेदेन सगुणत्वनिर्गुणत्वयोर्व्यवस्थेति स्यात्। तत्र तावत् एकस्यैव पुंसः क्वचित्सर्वज्ञत्वं क्वचिदान्ध्यमिति स्यात्। तत्तु व्याहतम्; धर्मिभेदाभावात्॥ प्रदेशवर्तिगुणोत्पतिवदि(देवे)ति चेन्न; प्रदेशवर्तिनोऽपि ज्ञानस्य सर्वविषयीकरणे

सर्वज्ञत्वं श्रुतिप्रतिपाद्यम्। तस्य चेदानीमभावान्न प्रत्यक्षविरोधादीत्याशङ्क्याह - **न चेदं यौगिकमिति**। योगाभ्यासजन्यमित्यर्थः। **नित्यसर्वज्ञत्वोक्तेः**। सदा सर्वज्ञ इति कथनात् जीवस्य तत् न संभवतीत्यर्थः। **नापीति**। निर्गुणश्रुतीनामपि जीवविषयकत्वं न संभवति। **तत एव** = प्रत्यक्षविरोधात् संसारोच्छेदप्रसङ्गाच्चेत्यर्थः। तदुपपादयति - **उपलभ्यते हीति**। बुद्धिसुखादिगुणवत्तया जीवस्य दर्शनात् तस्य निर्गुणत्वं न संभवति। बुद्ध्याद्यभावे च तस्य संसारोऽपि न स्यात्। ज्ञातृत्वकर्तृत्वभोक्तृत्वात् हि संसारः।

न द्वितीय इति। देशभेदेन सगुणनिर्गुणश्रुत्योः विषयव्यवस्था न संभवति। कुत इत्यत आह - **स हीति**। देशभेदो नाम संबन्धिदेशभेदो वा स्वप्रदेशभेदो वेति। संबन्धी यो देशः तद्भेदः उपाधिभेदः। आद्ये उपाध्यवच्छिन्नप्रदेशभेदेन सगुणत्वनिर्गुणत्वव्यवस्थेति स्यात्। तत्र तावत् एकस्यैव पुंसः किंचिदुपाध्यवच्छिन्ते स्वस्मिन् सगुणत्वं, उपाध्यन्तरावच्छिन्ते स्वस्यिन् निर्गुणत्वम्, अथ वा एकत्रैव सर्वज्ञत्वमज्ञत्वं चेति वक्तव्यम्। तत्तु विरुद्धम्। उपाधिभेदेऽपि धर्मिभेदाभावात् इति भावः।

ननु स्वतो धर्म्यभेदे सत्यपि वृक्षे मूलावच्छेदेन कपिसंयोगाभावः, अग्रावच्छेदेन कपिसंयोग इतिवत् सर्वज्ञत्वाज्ञत्वनिर्गुणत्वसगुणत्वादेः व्यवस्था भवितुमर्हतीति शङ्कते - **प्रदेशवर्तीति**। अव्याप्यवर्तिगुणोत्पत्तिवदित्यर्थः। प्रदेशवृत्तिसंयोगतदभावापेक्षया प्रदेशवृत्तिज्ञानतदभावयोः वैलक्षण्यमस्ति। तथा हि - एकस्मिन् आत्मनि कार्त्स्न्येन सर्वज्ञत्वे सति यत् कार्यं कृत्स्नेऽपि प्रदेशे भ्रमासंभवरूपं भवति, तत् एकदेशवर्तिनापि

तद्धर्मिणः कात्स्न्येंन सर्वज्ञत्वानपायात्। यद्यपि प्रदेशान्तरे तस्य समवायो नास्ति, तथापि तत्र भ्रान्त्यादियोगित्वं क्वचित्केनापि सार्वज्ञ्येन विरुद्धमेव; यथावत्प्रकाशमाने अध्यासाद्यसंभवात् । औपाधिकब्रह्मभेदाभेदवादनिराकरणेन(णे ?) चायमर्थो व्यक्तमनुसन्धेयः। प्रादेशिकगुणसमवायाभावकथनेन च न ब्रह्मणः कश्चिदतिशयः, सर्वद्रव्यसमत्वात्। एतेनैव स्वप्रदेशभेदोऽपि निरस्तः। स ह्यौपाधिकस्तावन्निरस्त एव। स्वाभाविकोऽपि तुल्यन्यायतया निरस्त एव। न च स्वाभाविकोंऽशस्तत्र

सर्वज्ञत्वेन भवति । यद्यपि प्रदेशान्तरे ज्ञानस्य समावायो नास्ति, तथापि तदवच्छेदेन भ्रमादिमत्त्वं प्रदेशान्तरावच्छिन्नेनापि सर्वज्ञत्वेन विरुद्धमेव। यथावत् सर्वस्मिन् प्रकाशमाने भ्रमाद्यसंभवादिति भावः । तथा च ज्ञानं स्वाश्रये भ्रमविरोधि, न तु स्वावच्छेदकोपाध्यवच्छिन्ने, गौरवादिति भावः । **औपाधिकब्रह्मभेदेति**। भास्कराचार्यैः ब्रह्मणः स्वाभाविकोऽभेदः औपाधिको भेदः इत्युच्यते, तन्मते या अनुपपत्तयः समन्वयाधिकरणादिषु भाष्यकारैः प्रदर्शिताः ताः एकस्मिन्नेव ब्रह्मणि उपाधिभेदात् सर्वज्ञत्वमज्ञत्वं चेति पक्षेऽप्यनुसन्धेया इत्यर्थः। **प्रादेशिकेति**। अपि च ब्रह्मणि कृत्स्ने गुणनिषेधे हि अद्वितीयत्वसिद्धेः अतिशयः सिध्यति, नैवमेकदेशे निषेधे । तत्र गुणसामान्यनिषेधे हेयगुणस्यापि निषेधादतिशयो वक्तव्यः । न चैकदेशे हेयगुणा न सन्तीत्युक्त्या कश्चिदतिशयः सिद्ध्येत् । हेयगुणाश्रयस्यापि एकदेशे तदभावोपपत्तेः । पादाद्यवच्छेदेन दुःखिनोऽपि जीवस्य प्रदेशान्तरे दुःखाभावदर्शनादिति भावः। **एतेनैवेति**। उपाधिगत एव भेदः उपाधिसंबन्धिनि धर्मिणि परंपरासंबन्धेन (स्वाश्रयावच्छिन्नत्व-संबन्धेन) भेदकार्यनिमित्तमित्येकं मतम्। उपाधिभेदेन धर्मिणि भेद उत्पद्यत इत्यपरं मतम्। तत्र पूर्वं प्रागुक्तम् । द्वितीयमधुनोच्यत इति भेदः । एवं सत्यपि औपाधिकभेदशब्द-वाच्यत्वात् उभयोः पूर्वस्य पक्षस्य निरासेनैवायमपि पक्षो निरस्त इत्युक्तम्।

कस्मिंश्चिदंशे सर्वज्ञत्वं कस्मिंश्चिदंशेऽ-

ब्रह्मणि यदि स्वाभाविकोंऽशः स्यात् तदा कस्मिंश्चिदंशे सर्वज्ञत्वं कस्मिंश्चिदंशेऽज्ञत्वमिति वक्तुं शक्येतापि। न च सोऽस्तीत्याह - **न च स्वाभाविक इति**। कुत इत्यत

संभवति, निरवयवत्वश्रुतिविरोधात्॥ निरवयवत्वमंशभेदेन (सं) भवत्विति चेत्; अंशनिरवयवत्वादंशिनोऽपि निरवयवत्ववचने सर्वस्याप्यवयविनो निरवयवत्वाविरोधेन सावयवत्वलक्षणनिषेध्यासिद्धौ निषेधासिद्धेः॥ समुदायेषु सांशतया तत्सिद्धिरिति चेन्न; अत्रापि तत्सम्भ(त्सद्भा)वात् तन्निषेधासिद्धेः। एकदेशस्य त्वेकदेशित्वनिषेध इति निरर्थो(र्थको)क्तिः।

आह - **निरवयवत्वश्रुतिविरोधादिति**। ननु एकस्मिन्नेव सगुणत्वनिर्गुणत्वयोः अंशभेदेन यथा व्यवस्था इष्यते, एवं सावयवत्वनिरवयवत्वयोरप्यंशभेदेन व्यवस्था इष्यत इत्याशङ्कते- **निरवयवत्वमिति**। अंशस्य निरवयवत्वात् अंशिनो निरवयवत्वम्, अंशस्य सावयवत्वात् अंशिनः सावयवत्वमित्येवं कथने सर्वस्यापि घटादेरपि अवयविनः निरवयवत्वसंभवात् सावयवत्वरूपनिषेध्यस्यासिद्ध्या तन्निषेध एव न स्यात्। एतदुक्तं भवति घटादेरपि निरवयवांशसंभवेन तदंशेन निरवयवत्वात् सावयवानामप्यंशानां निरवयवांशकत्वे निरवयवत्वप्रसङ्गे तदवयविनो घटादेरप्यंशैर्निरवयवतया तदवच्छेदेनापि सावयवत्वात् घटादावपि सावयवत्वाप्रसिद्धेः तन्निषेधायोग इति। ननु प्रत्येकांशावच्छेदेन घटादीनां निरवयवत्वेऽपि निरवयवसमुदायावच्छेदेन सावयवत्वात् निषेध्यप्रसिद्धिरिति शङ्कते - **समुदायेष्विति**। परिहरति - **अत्रापीति**। ब्रह्मण्यपीत्यर्थः। निरवयवत्व सावयवत्वव्यवस्थापकांशाभ्यामेव ब्रह्मणः सावयवत्वसंभवात् तन्निषेधासिद्धिरिति भावः। ननु समुदायस्य सावयवत्वेऽपि सावयवत्वनिषेधस्य तदेकदेशविषयत्वान्न निरवयवत्वश्रुतिविरोध इत्याशङ्क्य, तस्य सावयवसर्वद्रव्यसाधारणत्वान्न तन्निषेधेन ब्रह्मणः कश्चिदतिशय इत्याह - **एकेदेशस्येति**।

नापि तृतीय इति। कालभेदेन निर्गुणत्वसगुणत्वयोः व्यवस्थेति च तृतीयोऽपि पक्षो न युक्तः। प्रागुक्तविकल्पायोगात्=आश्रयभेदेन व्यवस्थेति प्रथमकल्पे यथा कस्मिन्नाश्रये गुणः कस्मिन् आश्रये तदभाव इति विकल्पः, एवमिहापि कस्मिन् काले गुणः कस्मिन् काले

नापि तृतीयः; प्रागुत्तरत्वविकल्पायोगात्; पूर्वमत्यन्तनिर्गुणत्वे पश्चादपि कारणाभावेन गुणोत्पत्त्ययोगात्, पश्चान्निर्गुणता हेतुतः संभवन्त्यपि (निर्गुणताहेतुः संभवतीत्यपि) सर्वविशेषमिथ्यात्वाभावे नात्यन्ताय स्यात्, वस्त्वन्तरसत्यत्वे तत्संयोगादिलक्षणस्यावर्जनीयत्वात्। वस्त्वन्तराणां च मिथ्यात्वमन्तरेणात्यन्तोच्छेदासंभवात्। सत्कार्यवादसमर्थनेन निरन्वयविनाशादिनिराकरणात्।

तदभाव इति विकल्पासहत्वादित्यर्थः । तदेवोपपादयति - पूर्वमिति । पूर्वम् **अत्यन्तनिर्गुणत्वे**=गुणसामान्यशून्यत्वे पश्चादपि कारणाभावेन गुणोत्पत्त्यनुपपत्तेः । द्रव्यान्तरस्य कारणत्वे पूर्वं तत्संयोगप्रसङ्गः । द्रव्यान्तरगुणस्य कारणत्वेऽपि पूर्वं तद्वत्संयोगप्रसङ्गः । न चेष्टापंत्तिः । संयोगाख्यगुणोत्पत्तौ किं कारणमिति प्रश्नोत्थानात् । पूर्वं विद्यमानानां स्वगतगुणानामुत्तरकालिकस्वगतगुर्णात्पत्तौ हेतुत्वमिति तु नैव संभवतीत्याशयेन अत्यन्तनिर्गुणत्व इत्युक्तम् । ननु ब्रह्मणः पूर्वं सगुणत्वं पश्चान्निर्गुणत्वं भवतु इत्याशङ्क्याह- **पश्चादिति** । पश्चात् कारणवशात् निर्गुणत्वं यद्यपि संभवेत्, तथापि सा निर्गुणता न अत्यन्ताय स्यात् कात्सर्न्येन न स्यात् गुणात्यन्ताभावरूपा न स्यादिति यावत् । तथा हि- पूर्वं सगुणस्य ब्रह्मणः पश्चात् निर्गुणता केन कारणेन भवति इति प्रश्ने वस्त्वन्तरसंयोगेन भवतीति वक्तव्यम् । तत्र वस्त्वन्तरं सत्यं वा मिथ्या वा । सत्यं चेत् तस्संयोगस्यापि सत्यत्वात् संयोगरूपगुणस्यावश्यकतया गुणसामान्याभावरूपा निर्गुणता कथं भवेत् । वस्त्वन्तरस्य मिथ्यात्वे च तस्संयोगस्यापि मिथ्यात्वात् वस्त्वन्तरतत्संयोगरूपकारणाभावात् गुणोत्पत्त्ययोग इति भावः । तथा च गुणानां विशेषाणांनां वा अत्यन्तोच्छेदरूपं निर्गुणत्वं वस्त्वन्तरमिथ्यात्वं विना न संभवति । वस्त्वन्तरमिथ्यात्वे च वस्त्वन्तररूपकारणाभावेन गुणोत्पत्तिर्न संभवतीति तात्पर्यं प्रतीयते ।

सत्कार्यवादेति । सतो द्रव्यस्यावस्थान्तरयोगः कार्यतेति समर्थनात् कार्यस्य संतो नाशोऽप्यवस्थान्तरमेव स्यात् । अतोऽवस्थाविशिष्टं द्रव्यं निष्ठेदेवेत्यर्थः । अतो निरन्वयविनाशरूपोऽत्यन्तोच्छेदो न संभवतीति भावः ।

अत एव चतुर्थोऽपि निरस्तः, समुच्चये प्रत्येकपक्षोक्तदूषण(दोषस्य) समुच्चयस्याप्यपरिहार्यत्वात्। न हि ब्रह्मांशस्य कदाचित्संसरणं कदाचिदपवर्ग इति भास्करयादवप्रकाशमताद्दवीयः। दूषितं चैतत् कालावच्छिन्नसार्वज्ञ्यदूषणादिना; यथोक्तम्–

‘‘सार्वज्ञ्यसर्वशक्त्यादिगुणकः केन सिध्यति। ई(ने)श्वरस्यापि विज्ञेयाः(यः)
स्वतः सर्वगुणः(णः) श्रुतेः । सार्वज्ञ्यादिस्वतस्त्वे तु विवादो यदि कल्प्यते ।

अत एवेति। अव्याप्यवृत्तिसंयोगतदभाववत् ब्रह्मणि निर्गणत्वसागुणत्वसमुच्चयः इति चतुर्थकल्पोऽपि त युक्तः । समुच्चयपक्षेऽपि प्रत्येकपक्षोक्तदोषसमुच्चयस्यापरिहार्यत्वादित्यर्थः । एतदुक्तं भवति - यद्यपि अस्मिन् पक्षे पूर्वं निर्गुणप्रदेशस्यापि द्रव्यान्तरतद्गुणादिना पश्चात् गुणोत्पत्तिः संभवति । न च प्रागपि तत्प्रदेशस्य द्रव्यान्तरसंयोगादिना सगुणत्वापत्ति; प्राक् प्रदेशान्तरस्थितेनापि निर्गुणप्रदेशे पश्चात् संयोगाद्युत्पादनसंभवात्। एवं पूर्वं सगुणस्य पश्चात् निर्गुणतायामपि नोक्तदोषः। निरन्वयविनाशाभावेऽपि द्रव्यस्य ध्वंसाख्योत्तरावस्थाया: प्रदेशान्तरे वृत्तिसंभवात्गुणप्रदेशावच्छेदेनात्यन्तनैर्गुण्योपपत्तेः । तथापि यत्प्रदेशे द्रव्यवत्त्वं तत्प्रदेशे संयोगस्यावर्जनीयत्वात् सगुणप्रदेशत्वमेव स्यात् । तथा च प्रदेशभेदेन व्यवस्थाया अयोगः । अतः समुच्चयपक्षे निर्गुणप्रदेशे न कदापि द्रव्यसंभव इति सगुणप्रदेश एव प्राग्वा पश्चाद्वा द्रव्यस्य सत्त्वं वाच्यम्। तथा चोक्तदूषणद्वयमव्याहतमिति भाव इति चण्डमारुते। किं च ब्रह्मणः अंशभेदेन सगुणत्वं निर्गुणत्वं चेति स्वीकारे भास्करयादवप्रकाशमतप्रबेशापत्तिः । ते हि ब्रह्मणः अंशे कदाचित् संसारः कदाचित् अपवर्ग इति स्वीकुर्वन्ति । तन्मतात् न दूरवर्ति भवेत् भवन्मतमित्याह - **न हि ब्रह्मांशस्येति**। **दूषितं चैतदिति**। कालभेदेन वा पाकजपरमाणुगुणवदिति कल्पदूषणावसर इति भावः। **सार्वज्ञ्येत्यादि**। ईश्वरस्य सर्वज्ञत्वसर्वशात्तयादयो गुणाः केन सिध्यन्तीति नाशङ्कनीयम्। श्रुतिप्रमाणेन गुणानां स्वभाविकत्वावगमात्। यदि तत्र विवादः कल्प्यते तर्हि त्वदभिमतसत्यत्वादावपि विवादः कुतो न कल्प्येतेति भावः।

सत्यत्वादौ विवादः किं न स्यान्निर्गुणवादिनाम् ॥'' इति । न पञ्चमः; पुत्रत्वपितृत्वादिवत् सगुणनिर्गुणत्वयोः प्रतिसंबन्ध्युपाधिकत्वाभावात्; नीलपीतादिवन्निरपेक्षत्वेनैवोपलम्भात् । न हि तत्त्वतो नीलमेव कञ्चित् प्रति पीतम् ॥ पुरुषभेदेनोष्णोऽनुष्णश्च कृष्णवर्त्मा कदाचित् भवतीति चेन्न; तत्रानुष्णत्वाभावात्। प्रतिबन्धकबलेन तु कश्चिदुष्णत्वं नोपलभते । तत्कार्यं च स्फोटादिकं तदा न जायते ॥ 'शीतो भव हनूमतः', 'तातैष वह्निः पवनेरितोऽपि न मां दहत्यत्र समन्ततोऽहम् । पश्यामि पद्मास्तरणास्तृतानि शीतानि सर्वाणि दिशां(शा) मुखानि ॥' इत्यादि कथमिति चेत्–इत्थम्–(तत्र हि) प्रभावविशेषप्रतिबद्धतया दाहकत्वाभाव एव (हि) तात्पर्यम्; यद्वा चान्द्रमससमहस इव देवताप्रभावोपनीतसलिलाद्यवयव-

---

प्रतिसंबन्धिभेदेन पितृत्वपितृव्यत्ववत् विषयव्यवस्थेति पञ्चमपक्षं दूषयति – **न पञ्चम इति** । यथा कस्यचित् एकस्यैव स्वपुत्रं प्रति पितृत्वं स्वभ्रातृपुत्रं प्रति पितृव्यत्वम् इति निरूपकभेदात् दृश्यते, तथा ब्रह्मण: कंचित् प्रति निर्गुणत्वं कंचित् प्रति सगुणत्वमिति वक्तुं न शक्यते । सगुणत्वनिर्गुणत्वयो: निरूपकनिरुप्यत्वाभावात् । यथा घटस्य नीलत्वं पीतत्वं वा निरूपकनिरपेक्षमेवोपलभ्यते, न हि नीलं कंचित् प्रति अनीलं पीतं दृश्यते । तथा सगुणत्वनिर्गुणत्वयो: निरुपकानिरूप्यतयैव श्रुत्या आवेदनात् पितृत्वपितृव्यत्ववत् प्रतिसंबन्धिभेदाधीनत्वं न संभवतीति भाव: । ननु अग्नि: पुरुषभेदेन उष्ण: शीतश्च कदाचित् भवतीत्याशङ्क्य, तत्रापि अग्ने: कदाचिदपि अनुष्णत्वं न भवति । चन्द्रकान्तमण्यादिप्रतिबन्धकबलेन तु कश्चित् उष्णत्वं नोपलभते, उष्णत्वकार्यं दाहादिकं च न जायत इति समाधत्ते- **पुरुषभेदेनेत्यादिना** । **स्फोट:** = दाह: । शङ्कते - **शीतो भवेति** । राक्षसै: उद्दीपितलाङ्गूलं हनुमन्तं ज्ञात्वा सीताया: आशासनं "शीतो भव हनूमत:" इति श्रीमद्रामायणे। "तातैष वह्नि:" इति श्लोक: प्रह्लादस्य स्वपितरं प्रति श्रीविष्णुपुराणे । **प्रभावविशेष:** सीताया: वा, हनुमत: प्रह्लादस्य च भगवद्भक्त्यादिप्रयुक्तो: वा । अग्नि: शीत इति वचनस्य पूर्वोक्तप्रभावविशेषेण. प्रतिबद्धदाहकत्वशक्तिमत्त्वे तात्पर्यमिति भाव: । **यद्वेति** । चान्द्रमसे उष्णे तेजसि जलावयवसमूहसंयोगवशात् यथा शैत्यं, तथा

निवहसंवलनवशादननुभूतौष्ण्यस्य (नुद्भूतौष्ण्यस्य) दहनस्योपलभ्यमानशीतिमारोपेण शीतव्यपदेशः ।

नापि षष्ठः; ग्राह्यभेदस्य ग्राहकभेदाधीनत्वे रूपस्पर्शादिभेदविलयप्रसङ्गात् । हिंसाऽहिंसा(दि) वाक्ययोरेकस्मिन्नेव क्रतावन्वये(ऽपि) विरोधाभावप्रसङ्गाच्च ।

सीताया नारायणस्य वा देवतायाः प्रभावविशेषेण हनुमतः लाङ्गूलाग्नौ प्रह्लादपरिसरवर्त्यग्नौ च शीतसलिसंबलनवशात् उष्णत्वमनुद्भूतं भवति, ततः जलावयवसमूहगतशीतत्वारोपेण अग्नौ शीतत्वव्यपदेश इत्यर्थः । अनुद्भूतौष्णस्येत्यस्य स्थाने अननुभूतौष्ण्यस्येति पाठान्तरम् । तत् युक्ततरम् ।

अथ ग्राहकभेदेने वा रूपस्पर्शवत् इति षष्ठपक्षं दूषयति-**नापि षष्ठ इति** । किं रूपादीनां धर्म्यनतिरिक्तत्वमिति पक्षे रूपोपलम्भेऽपि स्पर्शानुपलम्भार्थं रूपस्पर्शयोर्भेदो वक्तव्यः । तथा च रूपात्मकस्य धर्मिणः तद्भिन्नत्वविरोधे प्रसक्ते ग्राहकभेदात् व्यवस्थोच्यते चक्षुषा गृह्यमाणं रूपात्मकम् त्वचा गृह्यमाणं तदनात्मकम्, किं तु स्पर्शात्मकमिति । किं वा रूपस्य विजातीयरूपान्तरेणेव स्पर्शेनाप्यसामानाधिकरण्यात्मकविरोधे प्रसक्ते ग्राहकव्यवस्थया विरोधपरिहारो वक्तव्यः, तद्वदत्रापीत्यभिप्राय इति विकल्पं हृदि निधाय आद्यं दूषयति - **ग्राह्यभेदस्येति** । ग्राह्यकभेदादेव ग्राह्यभेदस्य कल्पनीयतया ग्राह्यभेदस्य ग्राहकभेदाधीनयत्वे अन्योन्याश्रमः ग्राहकभेदात् ग्राह्यभेदः ग्राह्यभेदात् ग्राहकभेद इतीति भावः । अपि च नीलपीतशीतोष्णाद्यवान्तरभेदस्यापि ग्राहकभेदाधीनत्वं प्रसजेत् । तथा च रूपग्राहकाणीन्द्रियाणि अनेकानि स्पर्शग्राहकानीन्द्रियाणि चानेकानि कल्पनीयानि स्पुरिति । दोषान्तरमाह - **हिंसाहिंसयोरिति** । एकस्यैव क्रतोः ग्राहकभेदेन हिंसात्वग्राहकतदभावग्राहकवाक्यभेदेन धर्माधर्मात्मकत्वसंभवात् धर्मत्वाधर्मत्वयोः विरोधाभावप्रसङ्गादिति भावः । ननु भिन्नेन्द्रियाभ्यां चक्षुस्त्वग्भ्यां ग्राह्ययोः रूपस्पर्शयोः एकाधिकरणवृत्तित्वेन एकाधिकरणावृत्तित्वरूपो विरोधो नास्ति, तथा सगुणत्वनिर्गुणत्वयोर्न विरोध इत्याशङ्क्य, सगुणत्वनिर्गुणत्वयोः भावाभावरूपतया एकाधिकरणावृत्तित्वरूपो विरोधः,

न च भिन्नकरणग्राह्यरूपस्पर्शयोरिव सगुणत्वनिर्गुणत्वयोरविरोधः; भावाभावरूपत्वात्; रूपस्पर्शयोस्तु सहानवस्थानहेतोः कस्यचिदप्यदर्शनात् (दभावात्) ।

नापि सप्तमः; आनुकूल्यप्रातिकूल्यादेः सप्रतिसम्बन्धिकत्वेन जातिव्यवस्थितभोगाद्युपपत्तेः । सगुणत्वनिर्गुणत्वयोस्तु तदभावेनानुपपत्तेः; उपपत्तौ वा ब्रह्मणोऽव्यवस्थितस्वभावत्वप्रसङ्गात् ।

न चाष्टमः; निर्गुणश्रुतीनां सर्वगुणनिषेधपरत्वेन विधेयगुणविशेषपरिशेषासिद्धेः ।। गुणविधिवशादेव निर्गुणश्रुतयः सङ्कोचमर्हन्तीति चेन्न; असङ्कुचितनिर्वाहे सति सङ्कोचानुपपत्तेः ।। तथा सति सगुणश्रुतीनामप्रामाण्यं प्रसज्येतेति चेन्न;

रूपस्पर्शयोस्तु भावाभावरूपत्वाभावान्न विरोध इति समाधत्ते - **न च भिन्नकरणेति** । भिन्नेन्द्रियग्राह्ययोः रूपस्यर्शयोरित्यर्थः । ननु भावाभावरूपयोरिव प्रसक्तविरोधयो रूपस्यर्शयोः कथं तर्हि एकाधिकरणवृत्तित्वमित्यत्राह - **रूपस्पर्शयोस्त्विति** । सहानवस्थानहेतोः = एकाधिकरणावृत्तित्वहेतोः कस्यचिदभावात्, भावाभावरूपत्वस्य चाभावात् इत्यर्थः ।

अथ ग्रहीतृभेदात् सागुणत्वं निर्गुणत्वं च ब्रह्मण इति सप्तमपक्षं निराकरोति - **नापि सप्तम इति** । एकमेव वस्तु अनुकूलं प्रतिकूलं अनुकूलप्रतिकूलानात्मकं च भवति । तत् कस्य हेतोः, अनुकूलत्वप्रतिकूलत्वादेः सप्रतिसंबन्धिकत्वात् प्रतिसंबन्धिजन्तुभेदेन अनुकूलत्वप्रतिकूलत्वादे; एकत्र समावेशः । यथा कण्टकं क्रमेलकस्यानुकूलम् इतरस्य प्रतिकूलम् । तदनुसारेण च सुखदुःखभोगवैषम्यं भवति । सगुणत्वनिर्गणत्वयोश्च सप्रतिसंबन्धिकत्वाभावेन कंचित् प्रति सगुणं कंचित् प्रति निर्गुणमिति वक्तुं न शक्यत इति भावः । **तदभावेन** = सप्रतिसंबन्धिकत्वाभावेनेत्यर्थः । अभ्युपगम्याप्याह - **उपपत्तौ वेति**। आनुकूल्यादिकं तु प्रतिसंबन्धिभेदेन व्यवस्थितमिति भाव; । सगुणत्वनिर्गुणत्वयोरेकत्रोपपत्तौ वा ब्रह्मणः अव्यवस्थितस्वभावत्वं स्यादिति भावः ।

विधेयनिषेध्यभेदेन वा ब्रह्महत्याग्नीषोमीयादिवदिति अष्टमकल्पं दूषयति - **न चाष्टम**

अपच्छेदनयेन प्रमाणत्वेऽपि बाध्यत्वोपपत्तेः ॥ पौर्वापर्यायोगेनापच्छेदनयानवतार इति चेन्न; अपच्छेदनये प्रमाणपौर्वापर्यस्य निमित्तपौर्वापर्यमात्राधीनत्वात् अत्राप्यर्थतो विधिनिषेधयोः पौर्वापर्यसिद्धेः । विधिर्ह्यन्यानपेक्षतया पूर्वो भवति; निषेधस्तु(श्च)

इति । यथा अग्नीषोमीयपशुहिंसाविधेः अग्नीषोमीयपशुविषयकत्वं 'न हिंस्यात्' इति निषेधस्य तद्भिन्नब्रहत्यादिविषयकत्वमिति व्यवस्था तद्वत् सगुणत्वनिर्गुणत्वयोः व्यनस्था न संभवति। निर्गणश्रुतीनां सर्वगुणनिषेधविषयत्वेन विधेयगुणविशेषस्य तदविषयतया परिशेषस्यासिद्धेः । न च सर्वज्ञत्वादिगुणविधिवशात् निर्गुणश्रुतेः तदतिरिक्तविषयकतया संकोचोऽस्तु इति वाच्यम् । असंकोचेन निर्वाहे संभवति संकोचस्यानुपपत्तेः । न च निर्गुणश्रुत्या ब्रह्मण; गुणसामान्याभाववत्त्वाङ्गीकारे सगुणत्वप्रतिषादकश्रुतीनामप्रामाण्यं स्यादिति वाच्यम् । तासां प्रमाणत्वेऽपि अपच्छेदनयेन बाध्यत्वसंभवात् इति भावः । ननु प्रमाणत्वेऽपि यदि वाध्यत्वं तदा विपरीतो बाध्यबाधकभावः कुतो न स्यात् । सगुणश्रुत्यैव निर्गुणश्रुतेः बाध्यत्वं कुतो न स्यात् । तथा च कथं निर्गुणत्वं तात्त्विकमित्यत आह - **अपच्छेदनयेनेति** । ननु द्वयोः श्रुत्योः पौर्वापर्यं यत्र वर्तते तत्रैव अपच्छेदनयः प्रवर्तते । सगुणनिर्गुणवाक्ययोः पाठक्रमाभावेन पौर्वापर्याभावात् स न्यायो नात्र अवतरतीति शङ्कते- **पौर्वापर्येति** । समाधत्ते - **अपच्छेदनय** इति । अपच्छेदन्यायप्रवृत्तिस्थले प्रमाणयोः पौर्वापर्यं निमित्तपौर्वापर्यमात्राधीनं न तु पाठक्रमाधीनम् इत्यर्थः । **निमित्तेति** । मात्रपदेन पाठक्रमो व्यावर्त्यते । ननु प्रकृते निमित्तपौर्वापर्यस्याप्यभावात् कथमपच्छेदनयावतार इत्यत आह - **अत्रापीति** । प्रमाणपौर्वापर्यमात्रं हि अपच्छेदन्यायापेक्षितम् । तच्च निमित्तपौर्वापर्यादिव प्रकारान्तरेणापि संभवति इति भावः । **अर्थत इति** । सगुणत्वनिर्गुणत्वरूपार्थस्वभावपर्यालोचनेनेत्यर्थः । यद्वा अर्थापत्येत्यर्थः । अर्थत इत्येतदुपपादयति - **विधिर्हीति** । विधिः इतरनिरपेक्षत्वात् पूर्वो भवति । निषेधस्तु प्रतियोगिसापेक्षत्वात् प्रतियोगिग्राहकं विधिमपेक्षत इति परो भवति । तथा च पौवापर्यस्य अर्थकृतस्य सद्भावात् अपच्छेदन्यायावतारात् निर्गुणवाक्येन सगुणवाक्यं बाध्यत इति भावः । ननु हिंसाविधितन्निषेधवाक्ययोरपि उक्तरीत्या पौर्वापर्यसद्भावात्

निषेध्यप्रसङ्गसाकाङ्क्षतया परः ॥ एवं सति हिंसाविधिनिषेध-वाक्ययोरप्यपच्छेदनयावतार इति चेन्न; तत्र विधिवाक्यस्यात्यन्ताप्रामाण्यप्रसङ्गात्; अत्र तु सगुणवाक्यानां मिथ्या(विद्यादि) विषयाणामपि दृष्टिविशेषे उक्तन्यायेन तत्तत्फलाभिलाषबम्भ्रम्यमाणपुरुषविशेषविषयोपासनविधिशेषतयाऽपि प्रामाण्योपपत्तेः । अतः उभयोः प्रामाण्येऽपि बाध्यबाधकभावव्यवस्था । अत एव तत्त्वतो निर्गुणत्वं च सिध्यतीति न निर्गुणश्रुतीनां सङ्कोचहेतुमुपलभामहे ।

अत एव नवमोऽपि दत्तोत्तरः; अस्मत्सिद्धान्तनीतिमन्तरेणोभयप्रामा-

---

अपच्छेदन्यायप्रवृत्त्या परेण हिंसानिषेधवाक्येन पूर्वं पशुहिंसावाक्यं बाध्येतेति शङ्कते - **एवं सतीति** । परिहरति - **तत्रेति** । अपच्छेदनयोदाहरणे प्रयोगान्तरे प्रामाण्यं संभवति । सगुणवाक्यस्यांप्यनुपदवक्ष्यमाणरीत्या प्रामाण्यं संभवति । हिंसाविधिवाक्यस्य तु बाध्यत्वे सर्वात्मना प्रामाण्यं न स्यात् इत्यभिप्रायकमत्यन्तपदम् ।

ननु सगुणवाक्यानामप्यत्यन्ताप्रामाण्यं स्यात् । न च व्यावहारिकसगुणत्वविषयकतया प्रामाण्यमिति वाच्यम् । मिथ्यार्थप्रतिपादने प्रयोजनाभावेन तात्पर्याभावात् तत्राप्रामाण्यात् । सगुणत्वस्य सत्यत्वे तु तद्विषयकतत्त्वज्ञानेन मोक्षफलसंभवादित्यत आह - **अत्र तु** इति । “अत्र तु सगुणवाक्यानां मिथ्याविषयाणामपि दृष्टिविशेषे उक्तन्यायेन” इति पाठः साधुः । वस्तुतः सगुणवाक्यानि मिथ्याभूतगुणविषयाणि । तथापि अब्रह्मणि ब्रह्मदृष्टिविधिस्थले मोक्षातिरिक्तं प्रयोजनं श्रूयत इति दृष्टीनां मोक्षातिरिक्तफलकत्वमिति यथा स्वीक्रियते तथा सगुणविधीनामपि मोक्षातिरिक्तफलसाधनभूतोपासनविधिशेषतया प्रामाण्यमुपपद्यत इति भावः । तथा च सगुणवाक्यानां मोक्षातिरिक्तफलसाधनोपासनविषयगुणप्रतिपादकतया प्रामाण्यम् । निर्गुणवाक्यानां मोक्षसाधनतत्त्वज्ञानविषयनिर्गुणत्वप्रतिपादकतया प्रामाण्यमिति तात्पर्यम् । तदाह - **अत उभयोरिति** ।

अन्येन वा केनचित् श्वेतपीतादिबोधवदिति नवमपक्षं दूषयति - **अत एव नवमोऽपीति** । अस्य पक्षस्यायमाशयः - श्वेतपीतबोधयोस्तावदस्ति विरोधः । एकस्यैव

ण्यनिर्वहणासिद्धेः । उभयाप्रामाण्यस्य वैदिकैः सामान्यतस्तावदनभ्युपगमात् । उभयोरप्यान्यपर्यवादिनां निरीश्वरमीमांसक निगमतरुवन्दकानां सिद्धार्थतात्पर्यसमर्थनादिभिरुन्मूलितत्वात् । अन्यतराप्रामाण्यपक्षेऽप्यन्ततोऽस्मन्नयमन्तरेण गत्यभावात् । न हि निर्गुणवाक्यमेव बाधितुं युक्तम्, तदुपदेशनैष्फल्यप्रसङ्गात् ।

पुरुषस्य एकस्मिन्नेव विषये एकस्मिन्नेव काले श्वेत: पीत इति बोधादर्शनात् । एवं च श्वेत: पट: पीतो घट इति समूहालम्बनस्य स्वेनापि विरोधप्रसङ्गे उक्तप्रकारेभ्योऽन्येनैव प्रकारेण व्यवस्था उच्यते । स चान्य: प्रकार: घटपटरूपविषयभेद: । तद्वदिहापि उक्तप्रकारेभ्योऽन्यो य: कश्चित् प्रकार: सगुणत्वनिर्गुणत्वयोर्व्यवस्थापको भवतु इति । तत्रोत्तरं तु अस्मत्सिद्धान्तमार्गं पूर्वोक्तमन्तरेण उभयो: प्रामाण्यं न निर्वोढुं शक्यत इति । अस्तु तर्हि उभयोरप्रामाण्यमित्यत्राह - **उभयाप्रामाण्यस्येति** । ननु निरीश्वरमीमांसकोक्तरीत्या सगुणनिर्गुणश्रुत्योरुभयोरप्यान्यपर्यमस्तु इत्यत्राह-**उभयोरपीति** । **आन्यपर्यम्**= कर्मशेषभूतात्मस्तुत्यर्थतया=कर्मविधिशेषता । सिद्धेऽप्यर्थे तात्पर्यसमर्थनात् न ब्रह्मपरवाक्यानां कर्मविधिशेषत्वमिति समाधानम् । निरीश्वरमीमांसका एव निगमतरुवन्दका: तत्सारग्राहिण इति यावत् । ननु सगुणनिर्गुणवाक्ययोर्मध्ये अन्यतरदेवास्तु प्रमाणम् । एवं चोभयो: प्रामाण्यनिर्वाहाय न त्वत्सिद्धान्तानुसरणम् । तथा च निर्गुणवाक्यस्यैवाप्रामाण्यसंभवान्न सगुणत्वविरोध इत्यत्राह - **अन्यतरेति** । अन्यतराप्रामाण्यपक्षेऽपि पूर्वोक्तरीत्या सगुणवाक्यस्यैवाप्रामाण्यम् । न निर्गुणवाक्यस्य । तथा सति निर्गुणत्वोपदेशस्य वैयर्थ्यप्रसङ्गात् । न चेष्टापत्ति: इति वाच्यम् । ''तमेव विदित्वातिमृत्युमेति'' ''तमेवैकं जानथात्मानम्'' ''एकधैवानुद्रष्टव्यम्'' इत्यादिना निर्गुणज्ञानात् मोक्षश्रवणात् । न च सगुणवाक्यानामप्यप्रामाण्ये नैष्फल्यप्रसङ्ग इति वाच्यम् । तत्र फलाश्रवणेन इष्टापादनत्वात् । न च सगुणोपासनादपि फलं श्रूयत इति वाच्यम् । आरोपितेनापि गुणेनोपासनोपपत्त्या गुणानां तात्त्विकत्वासिद्ध्या सगुणवाक्येन निर्गुणवाक्यस्य बाधायोगादिति भाव: ।

न च स्वरूपपराणां वाक्यानामुपासनविधिशेषत्वेन यथाकथञ्चन नेयता शङ्क्या; त्रय्यन्तराद्धान्तापराधप्रसङ्गात्। अतः पारिशेष्यान्निर्गुणवाक्यैः सगुणवाक्यानामेव बाधः।

यद्यपि सत्यज्ञानादिवाक्यं स्वरूपपरमपि सामानाधिकरण्यधर्मारण्यं(ण्यं पदसाधारण्यं) शरणयद्भिः भवद्भिस्तत्तत्प्रवृतिनिमितविशिष्टस्वरूपपरमित्युप पादितम्, तथापि ज्ञानानन्दादिशब्दावगतं ब्रह्मस्वरूपं न ज्ञातृत्वानन्दित्वादिविशेष-

---

नन्वस्तु सगुणनिर्गुणवाक्ययोरुभयो: प्रामाण्यम् । तथापि निर्गुणवाक्यानामुपासननिधिशेषतया प्रामाण्यम्, सगुणवाक्यानां तु तत्त्वपरतयेति वैपरीत्यमेव कुतो नेष्यत इत्याशङ्क्य निराकरोति - **न च स्वरूपपराणामिति** । निर्गुणवाक्यानामित्यर्थ: । त्रय्यन्तराद्धान्त:=सिद्धार्थपरत्वम्, तद्विरोधप्रसङ्गादित्यर्थ इत्याहु: । वस्तुतस्तु निर्गुणज्ञानस्य ब्रह्मैक्यावाप्ति: फलमिति वेदान्तसिद्धान्त: । तादृशफलश्रवणात्'' ब्रह्मवित् ब्रह्मैव भवति'' इति । न च तत्त्वतो यद्भिन्नं तेनाभेद: संभवति । अत: अभिन्नस्यैवाभेद: फलमिति वक्तव्यम् । इदं च न भेदमिथ्यात्वमन्तरेण । न च मिथ्याभेदोपमर्दपूर्वकपूर्वसिद्धाभेदावाप्ति: तत्त्वज्ञानादन्येन भवति । अतस्तादशफलहेतुभूतं ज्ञानं तत्त्वज्ञानमेव न तु आरोपितविषयकमुपासनमिति निर्गुणवाक्यस्य नोपासनविधिशेषतासंभव इति भाव: । **अत** इति । निर्गुणवाक्यस्य तत्त्वज्ञानपरत्वात् तेन उपासनशेषसगुणवाक्यानामेव बाध: युक्त इति भाव: ।

ननु ''सत्यं ज्ञानमनन्तं ब्रह्म'' ''विज्ञानमानन्दं ब्रह्म'' इत्यादिवाक्यानामुपासनपरत्वाभावस्य सर्वसंमतत्वात् तेषां ''भिन्नप्रवृत्तिनिमित्तानां शब्दानामेकस्मिन्नर्थे वृत्ति: सामानाधिकरण्यम्'' इत्युक्तसामानाधिकरण्यलक्षणनिर्वाहाय तै: सगुणब्रह्मसिद्धि: अनिवार्येत्यत आह - **यद्यपीति** । स्वरूपपरमपीत्यस्य विशिष्टस्वरूपपरमित्यनेनान्वय: । सामानाधिकरण्यधर्मारण्यं शरणयद्भि: इति पाठ: साधुरिति वदन्ति । **तत्तत्प्रवृत्तिनिमित्तेति**। सत्यत्वज्ञानत्वानन्तत्वरूपप्रवृत्तिनिमित्तेत्यर्थ: । **तथापीति** । वस्तुतोऽखण्डार्थवादोक्तरीत्या

सहमित्युप(पनी)पद्यते । न हि ज्ञानस्य ज्ञानम् आनन्दस्यानन्दो वा गुणपक्षपातिभिरपि भवद्भिरभ्युपजिगमिष्यते । अतः शब्दादर्थाच्च गुणनिषेधसिद्धिः । न च वाच्यं सुखमात्ररूपत्वे तद्भावापत्तेर्मोक्षस्य पुरुषार्थता न स्यात्; न हि सुखं स्यामिति कश्चिदिच्छति; अपि तु सुखी स्यामित्येव; अतः सुखसंबन्धेन वैशिष्ट्यमवर्जनीयमिति । सुखापरोक्षमात्रेण पुरुषार्थतासिद्धौ सम्बन्धस्याप्रयोजकस्य कल्पनायोगात् ॥

द्रव्यत्वोपादानत्वादिभिः सगुणत्वमनुमीयत इति चेन्न–द्रव्यशब्देन

स्वरूपपरमेवेदम् ।त्वदुक्तन्यायेन विशिष्टपरत्वाङ्गीकारेऽपि ज्ञानानन्दादिगुणनिषेधसिद्धेः सर्वज्ञत्वादिश्रुतेर्बाधः सिद्ध इति भावः । ज्ञानानन्दादिगुणनिषेधसिद्धिमुपपादयति - **न हि ज्ञानस्येति** । ज्ञानस्य ज्ञानं वा आनन्दस्य आनन्दश्च गुण इति सगुणवादिभिः भवद्भिरपि नाङ्गीकर्तुमिष्यत इति भावः । उक्तमुभयथा गुणनिषेधमुपसंहरति - **अतः शब्दात्** इति । निर्गुणमिति शब्दात् न हि ज्ञानस्येत्यादिना उक्तार्थापत्त्या चेत्यर्थः ।

ननु यदि ब्रह्म सुखमात्रं न सुखि तदा तत्प्राप्तेः पुरुषार्थत्वं न स्यात् । यतः सर्वोऽपि अहं सुखी स्यामित्येवेच्छति न तु अहं सुखं स्यादिति । तस्मात् ब्रह्मणः सुखवत्तया सविशेषत्वमवर्जनीयमिति शङ्कते - **न च वाच्यमिति** । अवर्जनीयमिति न च वाच्यमित्यन्वयः । **सुखमात्रेति** । ब्रह्मणः सुखवत्त्वे तदभेदे स्वस्यापि सुखप्राप्तेः ब्रह्मभावापत्तिः पुरुषार्थो भवति । ब्रह्मणः सुखरूपत्वे तु स्वस्य ब्रह्मभावेऽपि सुखाप्राप्त्या पुरुषार्थो न स्यादिति भावः । वैरिष्ट्यम्=सविशेषत्वम् । समाधत्ते - **सुखापरोक्षमात्रेणेति** । आत्मनः सुखापरोक्षमात्रेण सुखस्य पुरुषार्थतासिद्धौ सुखसंबन्धः पुरुषार्थतायामप्रयोजकः। ततश्च ब्रह्मणि सुखसंबन्धकल्पनमयुक्तमित्यर्थः । ननु निर्गुणश्रुतेः तर्कसहकृतसगुणश्रुत्या बाध इत्यभिप्रायेण शङ्कते-**द्रव्यत्वेति** । ब्रह्म सगुणं द्रव्यत्वात् घटादिवत्, ब्रह्म सगुणम् उपादानत्वात् मृदादिवत् । आदिशब्देन आत्मत्वं गृह्यते । ब्रह्म सगुणम् आत्मत्वात् जीवात्मवत् इत्यनुमानानि अत्र विवक्षितानि । समाधत्ते - **द्रव्यशब्देनेत्यादिना** ।

वस्तुत्वादिमात्रविवक्षायां मुख्यामुख्यविकल्पेन दोषात्, अन्ततस्तयोरपि परिहरणीयत्वात्। एतेनोपादानत्वमपि निरस्तम्; आत्मत्वमप्यात्मभेदानभ्युपगमात् दृष्टान्तहीनम् । तथा आत्मशब्देन आत्मत्वजातिचैतन्यादिगुणविशिष्टाकारविवक्षायामसिद्धिः । ज्ञानत्वविवक्षायामप्रयोजकत्वं विरोधो वा। एवमन्यदपि दूष्यम् । न च वाच्यम्, अहं जानामीत्यादिप्रत्यक्षेणैव बुद्धिसुखादिविशिष्ट एवात्मा प्रतीयत इति– तत्तद्वृत्तिविशेषविशिष्टस्यैवाहङ्कारस्य तथा प्रतीतेः । अन्यथा स्थूलोऽहमित्यादिप्रत्यक्षेण स्थौल्यादिगुणवैशिष्ट्यस्यापि प्रसङ्गात्;

द्रवयशब्दस्य वस्तुमात्रपरत्वे वस्तुत्वादिति हेतुर्भवति । तत्र मुख्यस्य वस्तुत्वस्य विवक्षायां साधनवैकल्यम् । अमुख्यस्य वस्तुत्वस्य विवक्षायां स्वरूपासिद्धिः । अन्ततः वस्तुत्वरूपधर्म एव पक्षे नास्तीति । **आत्मत्वमिति** । जीवात्मनः पक्षभूतब्रह्माभेदे दृष्टान्तत्वं न संभवति । भेदे च अपसिद्धान्तात् । पक्षभूतब्रह्माभेदे दृष्टान्तत्वं न संभवति । भेदे च अपसिद्धान्तात् दृष्टान्तविकलमनुमानमिति भावः ।

ननु ईश्वरः सदा अवाप्तसमस्तकल्याणगुणः तत्प्रेप्सुत्वे सति तत्र शक्तत्वात्, ब्रह्म स्वज्ञानाबाध्यधर्मवत् विचार्यत्वात् इत्याद्यनुमानमाशङ्क्य निराकरोति-**एवमन्यदपीति** । ईश्वरस्य प्रेप्सावत्त्वे प्रमाणाभावात् प्रथमहेतोरसिद्धिः । सत्तावधारणात्मकस्वरूपज्ञानादेव विचारोपपत्तेः स्वरूपसत्तानिश्चयस्यैव विचारफलत्वोपपत्तेश्च द्वितीयहेतोरप्रयोजकतेति भाव इति चण्डमारूते ।

ननु अहं जानामीति प्रत्यक्षेण अहं सुखी इत्यादिप्रत्यक्षेण च आत्मनः ज्ञानसुखादिविशिष्टत्वमवगम्यते। तद्विरोधात् निर्गुणश्रुतिः दुर्बलेत्याशयेन शङ्कते - **न च वाच्यमिति** । बुद्धिसुखादिरूपा या अन्तःकरणवृत्तिः तद्विशिष्टः अहंकारः एव अहं जानामि इत्यादिप्रत्यक्षविषयः न तु आत्मेत्याशयेन परिहरति - **तत्तद्वृत्तीति** । **अन्यथेति** । अहं जानामि सुखीत्यादिप्रत्ययबलात् आत्मनः बुद्ध्यादिगुणवत्त्वाङ्गीकारे अहं स्थूलः कृश इत्यादिप्रत्ययबलात् आत्मनः स्थूलत्वादिगुणवैशिष्ट्यमप्यङ्गीकार्यं स्यादिति भावः ।

देहव्यतिरेकसाधनात् तन्निषेधे अहङ्कारव्यतिरेकसाधनात् तद्धर्मनिषेधस्यापि सिद्धेः।

अतः प्रत्यक्षाद्यप्राप्तार्थप्रतिपादकनिर्गुणश्रुतिसामर्थ्यादेव निर्गुणे ब्रह्मणि सिद्धे, मायावच्छिन्नमिथ्यागुणविशिष्टेश्वरगोचराः सगुणश्रुतय इति ॥

सिद्धान्तः—अत्रोच्यते-यदुक्तं सगुणनिर्गुणश्रुतीनामाश्रयभेदादिना निर्वाहे

देहव्यतिरेकेति। आत्मनः शरीरातिरिक्तत्वसाधनात् स्थूलत्वादिकं नास्तीत्युच्यते चेत्, अहंकारव्यतिरिक्तत्वसाधनात् अहंकारधर्मबुद्ध्याद्यभावस्यापि सिद्धेः इत्यर्थः। निर्गुणश्रुतेःप्राबल्ये कारणान्तरं वदन्नेव पूर्वपक्षमुपसंहरति - **अतः प्रत्यक्षादीति**। सर्वज्ञत्वादिकं तु जगत्कारणत्वाद्याक्षिप्तमिति न तत्र श्रुतेः तात्पर्यम्। सगुणवादिनैव अहं जानामीत्यादिप्रत्यक्षस्य सगुणत्वे प्रमाणतयोपन्यासादेव न श्रुतेस्तत्र तात्पर्यम्। प्रत्यक्षाद्यप्राप्तार्थप्रतिपादकत्वात् श्रुतेरिति भावः।

सिद्धान्तः

पूर्वपक्ष्युक्तकल्पदूषणेषु कतिपयदूषणाभ्युपगमपूर्वकं विमतिस्थलेषु दोषकथनपूर्वकं स्वसिद्धान्तमाह - **अत्रोच्यत इत्यादिना**। सगुणनिर्गुणश्रुतीनामाश्रयभेददेशभेदकालभेदादिना निर्वाहे यद्दूषणमुक्तं, तदस्माकमपि संमतमेव। यत्तु विधेयनिषेध्यभेदेनेति अष्टमकल्पे यदुक्तं निर्गुणश्रुतेः संकोचं बिना गुणसामान्याभावपरत्वसंभवे विहितव्यतिरिक्तविषयकतया संकोचोऽनुपपन्न इति। तत्रोच्यते। सगुणश्रुतिबाधमन्तरेण असंकुचितनिर्वाहो यदि भवेत् तदा भवदुक्तं शोभेत। सगुणश्रुतिभिः गुणवत्त्वप्रतिपादनात् निर्गुणश्रुतेः गुणसामान्याभावपरत्वाङ्गीकारे सगुणश्रुतिविरोधः स्यात्। तत्परिहाराय निर्गुणश्रुत्या सगुणश्रुतेः बाधो वक्तव्यः। तत्रेदं विचारणीयम् सगुणश्रुतेर्बाध उचितो वा निर्गुणश्रुतेः विहितगुणव्यतिरिक्तगुणाभावविषयकतया संकोच उचितो वेति। तत्र बाधापेक्षया संकोच एव न्याय्यः। न च संकोचपक्षेऽपि गुणसामान्याभावप्रतिपादकश्रुतेः विहितगुणाभावविषये बाधः आवश्यक इति बाधोऽवर्जनीय इति वाच्यम्। क्वचिद्विषये बाधापेक्षया सर्वविषये बाधस्यानुचितत्वात्। अन्यथा संकोचापेक्षया सर्वांशे बाधस्य ग्राह्यत्वे हिंसानिषेधकश्रुत्यसंकोचाय पश्वालम्भश्रुतेर्बाधः स्यात्। न चेष्टापत्तिः। तथा सत्युत्सर्गापवादन्याय एव निर्मूलः स्यादिति भावः।

दूषणम्, तदस्माकमपीष्टमेव। यत्तु विधेयनिषेध्यभेदेन विषयव्यवस्थायामुक्तम्, 'असंकुचितनिर्वाहे सति सङ्कोचोऽनुपपन्नः' इति, तत् तदा शोभेत, यदि सगुणश्रुतिबाधमन्तरेणासंकुचितनिर्वाहः स्यात्। बाधात् सङ्कोच एव न्याय्यः ।। सङ्कोचोऽपि क्वाचित्कबाध एवेति चेत्, सत्यम्; न तु सार्वत्रिकः, तत एव तस्य संग्रहणीयता अन्यथा उत्सर्गापवादनय एव निर्मूलः स्यात्। यच्चोक्तमपच्छेदनयेन प्रमाणत्वेऽपि बाध्यत्वमुपपद्यत इति; तदपि मीमांसामांसलितचेतसां जुगुप्सनीयम्। अनियतविरोधपौर्वापर्ये ह्यपच्छेदनयः। अन्यतरापच्छेदे बाधकाभावेन प्रामाण्यसिद्धेः, युगपदपच्छेदे विकल्पत उभयोः प्रामाण्यसंभवात्। क्रमेणापच्छेद एव केवलं

अत्र चण्डमारुतम् - ननु सगुणवाक्यस्य सार्वत्रिकबाधेऽपि व्यावहारिकगुणविषयकतया स्वविषये सर्वत्र प्रामाण्यं संभवति। संकोचे तु निर्गुणवाक्यस्य यस्मात् संकोचः तत्र न कथंचिदपि प्रामाण्यमिति संकोचात् बाध एव न्याय्यः। हिंसावाक्यस्य तु अत्यन्तबाधे न कथंचिदपि प्रामाण्यम्। प्रातिभासिकस्य विधानायोग्यत्वात्। अहिंसावाक्यसंकोचे तु प्रामाण्यमिति बाधात् संकोचस्तत्र न्याय्यः इति चेत्-उच्यते। सगुणवाक्यानां बाधे तेषामुत्सर्गप्राप्तं तत्त्वावेदकत्वलक्षणप्रामाण्यं हीयेत। निर्गुणवाक्यानां संकोचे सर्वेषां सगुणनिर्गुणवाक्यानां तत्त्वावेदकत्वमेव सिध्यति। तत्त्वावेदकत्वं यदि नौत्सर्गिकं तदा निर्गुणवाक्यानामपि तत्त्वावेदकता न स्यात्।

ननु निर्गुणवाक्यानां संकोचे यस्मात् विषयात् संकोचः तत्र प्रामाण्यं न स्यादिति चेत् - एवमपि सर्ववाक्यानां तत्त्वावेदकत्वसिद्धये तदपि सोढव्यमेव। किं च यदि तत्राप्रामाण्यं दोषः, तर्हि निर्गुणवाक्यानां गुणविषये प्रामाण्याभावेऽपि दोषः स्यात् - इति।

यदपि सगुणवाक्यानां प्रमाणत्वेऽपि अपच्छेदन्यायेन निर्गुणवाक्येन बाध्यत्वमुपपद्यत इति तदपि मीमांसापरिश्रमशीलानां जुगुप्सनीयम्। यत्र अनियतो विरोधः अनियतं च पौर्वापर्यं तत्रैवापच्छेदन्यायः प्रवर्तते। प्रकृते तु सगुणत्वनिर्गुणत्वयोः नियतो विरोधः नियतं पौर्वापर्यं चेति नापच्छेदन्यायः प्रवर्तते इति भावः। तदेव उपपादयति - **अन्यतरापच्छेद** इत्यादिना।

अत्रेदमाकूतम्-

पूर्वमीमांसायां षष्ठाध्याये पञ्चमपादे अपच्छेदपेटिकायां पञ्चषेष्वधिकरणेषु अपच्छेदन्यायः शिक्षितः । ज्योतिष्टोमे प्रातस्सबने बहिष्पवमानस्तोत्रार्थं हविर्धानमण्टपात् बहिष्पवमानदेशं गच्छतां परस्परमन्वारम्भः श्रुतः “अध्वर्युं प्रस्तोता संतनुयात् प्रस्तोतारमुद्गाता उद्गातारं प्रतिहर्ता प्रतिहर्तारं ब्रह्मा ब्रह्माणं यजमानः यजमानं प्रशास्ता” इति । अन्वारम्भो नाम स्वस्य पुरतो गच्छतः पृष्ठभागकच्छग्रहणम् । संतनुयात् इत्यस्य कच्छं गृह्णीयात् इत्यर्थः । एवमन्वारभ्य पिपीलिकावत् प्रङ्क्त्याकारेण गच्छतां मध्ये कच्छग्रहणरूपस्यान्वारम्भस्य विच्छेदे प्रायश्चित्तं श्रूयते” यदि प्रस्तोतापच्छिन्द्यात् ब्रह्मणे वरं दद्यात्, यदि प्रतिहर्ता सर्ववेदसं दद्यात्, यद्युद्गातापच्छिन्द्यात् अदक्षिणं तं यज्ञमिष्ट्वा तेन पुनर्यजेत, तत्र तद्दद्यात् यत् पूर्वस्मिन्दास्यन् स्यात्” इति ।

तत्र एकैकापच्छेदे तत्तन्निमित्तकं प्रायश्चिन्तं कर्तव्यम् इत्यविवादम् । यत्र चोभाभ्यामृत्विग्भ्यां युगपदपच्छेदः तत्र नैमित्तिकानुष्ठानस्य कर्तव्यत्वे शक्यत्वे च सति न कस्यचिन्नैमित्तिकस्य बाधः । यत्र तु विरोधः यथा उद्गातृप्रतिहर्त्रोर्युगपदपच्छेदे तत्र युगपदेव नैमित्तिकप्रायश्चित्तविधायकवाक्यद्वयप्रवृत्तेः नैमित्तिकयोः सर्वस्वदानादक्षिणाकत्वयोः युगपदनुष्ठातुमशक्यत्वात् अनुष्ठाने विरोध इति तयोर्विकल्प इति सिद्धान्तितम् – “तत्र विप्रतिषेधाद्विकल्पः स्यात्” (पू.मी.सू. ६-५-४८) इति ।

ततः यत्रोद्गातृप्रतिहर्त्रोः क्रमेणापच्छेदः कच्छग्रहणविच्छेदः तत्र किं पूर्वोत्पन्ननिमित्तकं प्रायश्चित्तं कर्तव्यम् उत पश्चादुत्पन्नविमित्तकम् इति संशये, पूर्वनिमित्तमसंजातविरोधं निर्विघ्नमवगम्यते । तद्विरुद्धत्वादुत्तरमवगन्तुमशक्यम् । अतः पूर्वस्य बलीयस्त्वत् । यदि तु उपक्रमर्यालोचनयैवोपसंहारस्यात्मलाभस्थले एव पूर्वस्य प्रावल्यम् । अत्र तु पूर्वमनपेक्ष्यैवोत्तरस्यात्मलाभ इति न पूर्वस्य प्रावल्यमिति वैषम्यमिति पर्यालोच्यते, तदा युगपदपच्छेद इव क्रमेणापच्छेदेऽपि विकल्पोऽस्तु इति पूर्वपक्षे प्राप्ते सिद्धान्तितम् –

“पौर्वापर्ये पूर्वदौर्बल्यं प्रकृतिवत्” (पू.मी.सू. ६-५-५४) इति । नात्र पूर्वेणोत्तरस्य ज्ञानस्योत्पत्तिः शक्यते निरोद्धुम् । प्रत्यक्षेण वाक्येन उत्तरस्य ज्ञानमवश्यमुत्पाद्यत एव । तच्चोत्पद्यमानं स्वविरुद्धं पूर्वज्ञानं बाधमानमेवोत्पद्यते । तेनोत्पन्नमपि पूर्वप्रायश्चित्तज्ञानं

मिथ्या=अप्रमा भवति बाधितत्वात्। उत्तरस्य तु न किंचित् बाधकमस्ति। न हि पूर्वज्ञानमुत्तरबाधेनोत्पद्यते, तस्यामवस्थायामुत्तरस्यानुपजातत्वात्। जाते तूत्तरविज्ञाने तेन बाधितं पूर्वविज्ञानमसत्कल्पं नोत्तरं बाधितुं क्षमते।तस्मात् पूर्वस्यदौर्बल्यं परस्य प्राबल्यम्। मूले प्रकृतिवदित्यस्य यथा प्राकृतस्य कुशादेः वैकृतशराद्यपेक्षया दौर्बल्यं तद्वदित्यर्थः। तदाहुः-

पूर्वात् परबलीयस्त्वं तत्र नाम प्रतीयताम्।
अन्योन्यनिरपेक्षाणां यत्र जन्म धियां भवेत्॥

इति। अनेन पूर्वमुपजीव्य यत्रोत्तरशास्त्रं प्रवर्तते तत्र पूर्वं प्रबलम्। यत्र तु पूर्वमनुपजीव्य उत्तरं प्रवर्तते तत्रोत्तरस्य प्राबल्यमिति सिध्यति। पूर्वात् परबलीयस्त्वम् इति वार्तिककारैरपच्छेदन्यायस्थलं निष्कर्षद्भिः अन्यत्रोपक्रमाधिकरणप्रवृत्तिर्दर्शिता। अनेन च यदपेक्षया यस्य प्राबल्यं वर्णनीयम्, तन्निरपेक्षं तत्र बोधोत्पत्तिरपेक्षिता। प्रतिहर्त्रपच्छेदनिमित्तकप्रायश्चित्तशास्त्रं हि उद्गात्रपच्छेदनिमित्तकप्रायश्चित्तशास्त्रनिरपेक्षमेव बोधं जनयति। तस्मात् योऽपच्छेदः परः तन्निमित्तकं प्रायश्चित्तं प्रबलमिति। अत्रान्योन्यनिरपेक्षाणामित्यनेन एकैकप्राबल्यविषयेऽपि उभयगतं निरपेक्षत्वं प्रयोजकत्वेन नोच्यते। किं तु तन्निरपेक्षं बोधकत्वात् इदमपि कदाचित् प्रबलम्; एतन्निरपेक्षं बोधकत्वात् तदपि कदाचित् प्रबलमित्येव। उपक्रमाधिकरणन्यायश्च तत्र, यत्र सापेक्षं बोधजनकत्वम्। यथा'' अग्नेर्ऋग्वेदः वायोर्यजुर्वेदः, आदित्यात् सामवेदः इत्युपक्रमस्थार्थवादानां ''उच्चैर्ऋचा क्रियते, उपांशु यजुषा, उच्चैः साम्ना'' इत्यनन्तरविधीनां च। न हि तत्तन्नैमित्तिकशास्त्रवत् अर्थवादविध्योरन्योन्यनिरपेक्षं प्रवृत्तिरस्ति। तथा चोपसंहारस्थो विधिरपि उपक्रमस्थार्थवादनिरपेक्षमबोधकत्वात् प्रथमप्रतीतार्थवादिकार्थविरोधाय लाक्षणिकार्थपरतयैव प्रामाण्यं लभत इति स्थितिः।

एवं च प्रकृते उद्गातृप्रतिहर्त्रोरुभयोरपच्छेदनियमो नास्ति। तत्रापि अभयोः क्रमेणापच्छेद इत्यपि नास्ति नियमः। तन्नियमे सति हि सर्वस्वदक्षिणाकत्वादक्षिणाक-

''पूर्वाबाधेन नोत्पत्तिरुत्तरस्य हि सिध्यति'' इति न्यायेन पूर्वबाधः। तथापि प्रयोगान्तरे प्रामाण्यं सिध्यत्येव, नियतविरोधपौर्वापर्ये तूपक्रमाधिकरणन्यायेन परानुत्पत्तिरेव। ततश्चोत्सर्गापवादन्यायस्यैव सगुणनिर्गुणश्रुत्योर्विषयता। अतो विहितव्यतिरिक्तगुणविषयो निषेधः।

यच्चोक्तं सगुणवाक्यानां मिथ्याविषयाणामपि दृष्टिविधिवत् फलविशेषार्थोपासनार्थतया प्रामाण्यमिति–तदपि न; तत्रैव मोक्षाख्यस्य फलस्य

त्वयोर्विरोधनियमो भवेत्। एवमुद्गातृप्रतिहर्त्रोरुभयोरपच्छेदे तस्य क्रमभावित्वे च उद्गात्रपच्छेदः पूर्वभावी प्रतिहर्त्रपच्छेदः पश्चाद्भावी इति वा विपर्ययेणेति वा पौर्वापर्यनियमोऽपि नास्ति। अतोऽपच्छेदन्यायस्य अनुष्ठानावधिको विरोधो विषयः, न तु स्वरूपतो विरोधः, सगुणनिर्गुणवाक्यविरोधस्तु स्वरूपप्रयुक्ततया नियतः, न त्वनियतः। एवं सगुणनिर्गुणवाक्ययोः पौर्वापर्यं च नियतम्, विधिनिषेधरूपत्वात्। तस्मात् अनियतविरोधविषयकः अनियतपौर्वापर्यविषयकश्चापच्छेदन्यायो न प्रवर्तते। किंतूपक्रमाधिकरणन्यायः प्रवर्तेत। तत्र चोपक्रमविरोधेन निर्गुणशास्त्रस्य अनुत्पत्तिरेव वा बाधो वा स्यात्। अत उभयोरपि शास्त्रयोरबाधाय उत्सर्गापवादन्यायविषयत्वमेव सगुणनिर्गुणश्रुत्योर्युक्तम्॥ तेन यथा न हिंस्यात् इत्युत्सर्गशास्त्रस्य विहितहिंसाव्यतिरिक्तविषयकत्वं तथा निर्गुणशास्त्रस्यापि विहितगुणव्यतिरिक्तगुणविषयकत्वमित्येव युक्तम् - इति।

प्रयोगान्तर इति। क्रमेणापच्छेदरहितप्रयोग इत्यर्थः। एतावता सगुणनिर्गुणश्रुत्योर्विरोधमभ्युपगम्य अत्रापच्छेदन्यायो न प्रवर्तते, अपि तु उपक्रमाधिकरणन्याय एव प्रवर्तेत। तत्रापि निर्गुणशास्त्रस्य प्रमित्यनुत्पादकत्वरूपोऽनुदयो भवेदित्यालोच्य उत्सर्गापवादन्यायः प्रवर्तत इत्युक्तमाचार्यैः। वस्तुतस्तु विरोध एव नास्ति, विषयभेदादिति श्रीभाष्यादावुक्तम्। आचार्या अपि वादान्ते वक्ष्यन्ति।

यच्चोक्तमित्यादि। वस्तुतः सगुणवाक्यानां मिथ्याभूतगुणविषयकत्वेऽपि दृष्टिविधीनामिव मोक्षातिरिक्तफलविशेषसाधनीभूतोपासनतात्पर्यकतया प्रामाण्यमिति यदुक्तं,

बहुलमुपलब्धेः । पुण्यपापप्रहाणपूर्वकस्वाभाविकरूपाविर्भावरूपफलविशेषस्य सांसारिकत्वोक्तिः साहसिकेभ्य एव स्वदते ॥ अस्तु तर्हि मिथ्यार्थविषयसगुणोपासनेनापि विधिबलान्मोक्ष इति चेन्न; तथा सति निर्गुणवाक्यानामेव मिथ्यार्थविषयत्वकल्पनं किं न स्यात् ? तत्त्ववेदनस्यैव मोक्षहेतुत्वमिति नियमनिष्कासनात्। तथाच तत्त्वोपदेशश्च निष्पयोजनः स्यात्, अन्यथापि मोक्षसिद्धेः । अतो विषयव्यवस्थयैवोभयप्रामाण्यसिद्धिः । अतो नवमस्य कल्पस्यानवतार एव ।

यत् पुनरुक्तं न ज्ञानस्य ज्ञानम्, आनन्दस्यानन्दो वा जाघटीतीत्यर्थतो

तदपि न । सुगुणोपासनस्थल एव मोक्षाख्यस्य फलस्य बहुशः श्रवणात् । ''ध्रुवा स्मृतिः स्मृतिप्रतिलम्भे सर्वग्रन्थीनां विप्रमोक्षः'' स एष संप्रसादोऽस्माच्छरीरात् समुत्थाय स्वेन रूपेणाभिनिष्पद्यत'' इत्याद्याः श्रुतयः उपासनस्य मोक्षफलप्रतिपादिकाः । तथा च मोक्षस्य सत्यविषयकज्ञानसाध्यत्वात् न मिथ्याभूतगुणविषयकमुपासनमिति भावः ।

ननु उपासनप्रकरणे श्रूयमाणं फलं न मोक्षः इत्यत्राह - **पुण्येति** । ननु मोक्षार्थतया उपासनविधिबलात् मिथ्यार्थविषयकसगुणोपासनादपि मोक्षरूपं फलमस्तु, तावता ब्रह्मणः सगुणत्वं न सिध्यतीति शङ्कते - **अस्तु तर्हीति** । मोक्षरूपं फलं यदि मिथ्यार्थविषयकज्ञानादपि भवतीत्युच्यते तर्हि निर्गुणत्वस्य मिथ्यात्वं स्वीकृत्य मिथ्याभूतनिर्गुणत्वज्ञानादेव मोक्ष इति कुतो नोच्यते । तत्त्वविषयकज्ञानमेव मोक्षहेतुरिति नियमस्य परित्यागादिति समाधत्ते - **तथा सतीति** । दोषान्तरमाह - **तथाचेति** । तत्त्वज्ञानस्यैव मोक्षहेतुत्वमिति नियमस्य त्यागादिति भावः ।

ननु कथं तत्त्वोपदेशस्य निष्प्रयोजनत्वम् । मिथ्यार्थविषयकोपासनवत् तत्त्वज्ञानस्यापि मोसाधनत्वात् इति चेत्-न । तत्त्वज्ञानादेव मोक्ष इति नियमानङ्गीकारे तत्त्वोपदेशातत्त्वोपदेशविभागो न स्यादित्यत्र तात्पर्यात् ।

यत्पुनरित्यादि । ज्ञानरूपस्य आनन्दरूपस्य च ब्रह्मणः ज्ञानरूपो गुणः आनन्दरूपो गुणश्च न संभवतीति अर्थात् ज्ञानानन्दादिगुणशून्यत्वं सिध्यतीति यदुक्तं पूर्वपक्षिणा तत्

गुणनिषेधसिद्धिरिति-(१) किं तत्र धर्मस्य धर्मान्तराभ्युपगमेनानवस्थादिरभिप्रेतः, (२) उतैकजातीययोर्धर्मधर्मिभावो नोपपद्यत इति, (३) यद्वा ज्ञानानन्दाद्यवान्तरजातीयस्य ततदवान्तरजातीयाधारत्वं न दृष्टमिति, (४) अथ ज्ञानानन्दयोरज्ञानानानन्दरूप एवाश्रयो दृष्ट इति, (५) अथवा ज्ञानानन्दरूपस्यात्मनो ज्ञानानन्दादिकं शशादेरिव शृङ्गादिकमुपलम्भबाधितमिति? नाऽऽद्यः; अनुक्तोपालम्भरूपत्वात्। न हि वयं धर्मभूतचैतन्यादेः चैतन्यान्तरादिकं ब्रूमः। धर्मस्य चोपलम्भादेव धर्मान्तराभ्युपगमे कथमनवस्था ? नापि द्वितीयः; धर्मधर्मिणोः सर्वत्र सतादिभिर्यथाकथञ्चिदेकजातीयत्वावश्यंभावात् । प्रभाप्रभावदादिषु

विकल्पपूर्वकं दूषयति - **किं तत्रेत्यादिना**। (१) ज्ञानादिरूपस्य धर्मस्य ज्ञानादिधर्माङ्गीकारे तस्यापि ज्ञानादिरित्येवमनवस्थाप्रसङ्गोऽभिप्रेतो वा (२) उत एकजातियुक्तयो: धर्मधर्मिभावो नोपपद्यत इति (३) अथ वा ज्ञानत्वादिरूपव्याप्यजातिविशिष्टस्य ज्ञानत्वविशिष्टनिरूपितमाधारत्वं न संभवतीति (४) यद्वा ज्ञानानन्दयो: आश्रय: ज्ञानातिरिक्त: आनन्दातिरिक्त एवाश्रयो दृष्ट इति (५) अथ वा ज्ञानानन्दरूपस्यात्मन: ज्ञानान्दादिगुण: शशे शृङ्गमिवोपलम्भबाधितमिति पञ्चधा विकल्प: । धर्मिण एव स्वधर्मगतत्वाङ्गीकारेऽन्योन्याश्रय: । धर्मे धर्मव्यहारस्य स्वरूपविषयकत्वाङ्गीकारे प्रथमधर्मस्याप्यभावप्रसङ्ग: आदिशब्देन विवक्षित: । अथ ज्ञानेति । ज्ञानस्य ज्ञानाश्रयत्वं ज्ञानाश्रयस्य ज्ञानत्वाभावदर्शनात् बाधितमित्यर्थ: । तत्राद्यं दूषयति **नाद्य:, अनुक्तोपालम्भरूपत्वादिति** । धर्मस्य धर्मान्तरं नास्माभिरुक्तमिति तदाश्रयेण अनवस्थाप्रसञ्जनमनुक्तोपालम्भ इत्यर्थ: । तमेबोपपादयति - **न हि वयमिति** । धर्मभूतस्य ज्ञानस्य वा धर्मभूतस्यानन्दस्य वा न वयं तद्धर्मभूतं ज्ञानान्तरमानन्दान्तरं वा अङ्गीकुर्म:, येन भवदीयदूषणमुक्तोपालम्भ: स्यादित्यर्थ: ।

धर्मस्य धर्मान्तराभ्युपगमेऽनवस्थामभ्युपगम्य परिहार उक्त: । इदानीं तदभ्युपगमेऽप्यनवस्था नास्तीत्याह - **धर्मस्य चेति** । **नापि द्वितीय इति** । भूतलघटयो:

विशेषतोऽपि सजातीययोर्धर्मधर्मिभावो दृष्टः। अवयविवादे च परमाणुद्व्यणुकादिष्वाश्रयिषु पार्थिवत्वादिविशेषसाजात्यमिष्टम्। नापि तृतीयः; अन्यत्रादृष्टेरन्यत्र निषेधकत्वाभावात्। अन्यथाऽतिप्रसङ्गात्। तत्र दृष्टान्तेनानुमाने

सत्तारूपैकजातिमतोः धर्मधर्मिभावदर्शनात् एकजातीयमोः धर्मधर्मिभावो न भवतीति नियमो नास्तीत्यर्थः। तथा च ज्ञानं न ज्ञानाश्रयः ज्ञानवृत्तिजातिमत्त्वात् यो यद्वृत्तिजातिमान् स तदनाश्रय इति विवक्षायां घटवृत्तिसत्ताजातिमति भूतले घटाश्रये व्यभिचार इति भावः। ननु सत्ताव्याप्यजातिपतोः धर्मधर्मिभावो न संभवतीत्याशङ्क्याह - **प्रभाप्रभावदादिषु इति**। सत्ताव्याप्यद्रव्यत्वव्याप्यतेजस्त्वजातिमतोः प्रभाप्रभावतोः धर्मधर्मिभावस्य दर्शनात् उक्तनियमोऽपि व्यभिचारीति भावः। तथा च ज्ञानं न ज्ञानाश्रयः, ज्ञानवृत्तिसत्ताव्याप्यजातिमत्त्वात् ज्ञानवृत्तिद्रव्यत्वव्याप्यजातिमत्त्वाद्वा यो यद्वृत्तियद्व्याप्यजातिमान् स तदनाश्रय इति विवक्षायामपि प्रभावृत्तितेजस्त्वाश्रये प्रभाश्रये व्यभिचार इति भावः। यद्यपि भूतलघटयोरपि विशेषतः सजातीययोः धर्मधर्मिभावे निदर्शनत्वं संभवति; तथापि अपृथक्सिद्धधर्मधर्मिभावः सजातीययोर्न संभवतीत्युक्तावपि व्यभिचारप्रदर्शनार्थं प्रभाप्रभावदादिषु इत्याद्युक्तम्। **अवयविवादे चेति**। अवयवातिरिक्तमवयविनमङ्गीकुर्वतां वैशेषिकानां मते पार्थिवपरमाणोः पार्थिवद्व्यणुकाश्रयत्वं तथा पार्थिवद्व्यणुकस्य पार्थिवत्र्यणुकाश्रयत्वमित्यङ्गीक्रियते। तत्र पार्थिवत्वादिविशेषजातिमतोरपि धर्मधर्मिभावाङ्गीकारात् विशेषतः सजातीययोः धर्मधर्मिभावो नास्तीति वक्तुं न शक्यत इति भावः। **परमाणुद्व्यणुकादिषु आश्रयिषु इति**। आश्रयाश्रयिषु इति पाठः साधुरिति प्रतीयते। परमाणोराश्रयित्वाभावात्। **नापि तृतीय इति**। लोके ज्ञानत्वजातीयस्य आनन्दत्वजातीयस्य वा प्रसिद्धस्य धर्मभूतज्ञानस्य धर्मभूतानन्दस्य च ज्ञानान्तरानन्दान्तराधारत्वं न दृष्टम्। अतो धर्मिभूतस्य ज्ञानानन्दरूपात्मनोऽपि ज्ञानानन्दाधारत्वं न संभवतीति शङ्का। धर्मभूतज्ञानानन्दयोः ज्ञानानन्दाश्रयत्वादर्शनेऽपि धर्मिभूतज्ञानानन्दयोः ज्ञानानन्दाश्रयत्वं कुतो न संभवति। अन्यत्रादर्शनस्य अन्यत्र निषेधकत्वासंभवादित्यर्थः। **अन्यथेति**। शशे शृङ्गादर्शनेन गव्यपि शृङ्गाभावनिश्चयप्रसङ्गादिति भावः।

तु श्रुत्यादिबलेन कालात्ययापदेशात्। नापि चतुर्थः; असिद्धेः। ननु किं ज्ञानतया आनन्दतया च ज्ञातोपलभ्यत इति चेत्–किं वा जडतया दुःखतया चोपलभ्यते॥ तदपि नास्तीति चेत्; कस्तर्हि विरोधः॥ सन्दिग्धस्वरूपत्वमिति चेन्न; तावता

ननु अन्यत्र ज्ञाने ज्ञानाश्रयत्वादर्शनं प्रत्यक्षसहकारितया वा स्वातन्त्र्येण का आत्मनि ज्ञानाभावसाधकतया न विवक्षितम्। किं तु अयं घट इत्यादिज्ञाने ज्ञानत्वाभावव्याप्ति ग्रहोपयोगितया। तथा च आत्मा ज्ञानाभाववान् ज्ञानत्वात् अयं घट इत्यादिज्ञानवत् इत्यनुमानमभिप्रेतमित्याशङ्क्याह - **तत्र दृष्टान्तेनेति**। तत्र ज्ञानरूपे आत्मनि, दृष्टान्तेन अयं घट इत्यादिज्ञानरूपेण ज्ञानाभावानुमाने तु इत्यर्थः। **श्रुत्यादीति**। ईश्वरात्मनि ज्ञानाभावसाधने "यः सर्वज्ञः" इत्यादिश्रुतिबाधः। जीवात्मनि तत्साधने "एव हि दृष्टा... बोद्धा" इत्यादिश्रुत्या अहं जानामीत्यादिप्रत्यक्षेण च बाध इत्यार्थः।

अथ ज्ञानानन्दयोरज्ञानानानन्दरूप एवाश्रयो दृष्ट इति चतुर्थपक्षं दूषयति - **नापि चतुर्थ** इति। **असिद्धेरिति**। ज्ञानानन्दयोराश्रयः ज्ञानानन्दभिन्नतयैव दृश्यत इत्येतदसिद्धमित्यर्थः। ननु ज्ञानानन्दभिन्नतया आत्मनः दर्शनमसिद्धं चेत् ज्ञानतया आनन्दतया च दृश्यत इति वक्तव्यम्। तथा दर्शनं नास्ति किलेति शङ्कते- **किं ज्ञानतयेति**। ज्ञानभिन्नतया आनन्दभिन्नतया च अर्थात् जडतया दुःखतया च आत्मा दृश्यते किमिति प्रतिपश्नं करोति **किं वा जडतयेति**। पुनः पृच्छति - **तदपि नेति चेदिति**। जडतया दुःखतया च दर्शनं नास्तीति चेदित्यर्थः। प्रतिपृच्छति - **कस्तर्हि विरोध इति**। विरोधहेतुरित्यर्थः। ज्ञानानन्दरूपत्वाभावहेतुरिति यावत्। **संदिग्धरूपत्वमिति**। आत्मा ज्ञानभिन्नतया आनन्द- भिन्नतया नोपलभ्यते, नापि ज्ञानतया आनन्दतया चोपलभ्यते। अतः आत्मा ज्ञानानन्द-स्वरूपो वा जडदुःखस्वरूपो वेति संदेहो भवतीति चेदित्यर्थः। **तावतेति**। संदेहस्य ज्ञानानन्दरूपत्वाभावहेतुत्वं न संभवतीत्यर्थः। ननु साधकाभावेन बाधकाभावेन च नित्यसंशयात् ज्ञानानन्दत्वनिर्णयासंभवः। अतः कथं विरोधहेतुत्वासिद्धित्यत्राह -

विरोधहेतुत्वासिद्धेः । शास्त्रादिभिस्तु विशेषनिष्कर्षात् । पञ्चमस्तु प्रत्यक्षश्रुतिभ्यामेव प्रतिक्षिप्यत इति नानुपपत्तिं पश्यामः ।

यत्तूक्तं सुखापरोक्ष्यमात्रेण पुरुषार्थ(ता)सिद्धौ सम्बन्धस्याप्रयोजकस्य कल्पनमयुक्तमिति–तदपि निजहृदयविसंवादि जल्पितम् । तथा हि–न हि परस्य सुखापरोक्ष्यमात्रेण स्वयमपि लब्धपुरुषार्थो भवति, तथा सति एकस्य सुखस्य दुःस्वस्य सर्वार्थत्वप्रप्रङ्गेन प्रत्यक्षानुमानशास्त्रादिसमस्त- प्रमाणक्षोभप्रसङ्गात् । स्वरसतश्च परोपकारापकारयोरपि प्रवृत्तिनिवृत्तिप्रसङ्गात् । अतः स्वसम्बन्धितयैव

शास्त्रादिभिरिति । विशेषनिष्कर्षादिति । ज्ञानानन्दरूपत्वनिर्णयादित्यर्थः ।'' एष हि द्रष्टा... विज्ञानात्मा पुरुषः'' इति श्रुतिः ''सुखमहमस्वाप्सत्'' इति परामर्शहेतुभूत-सौषुप्तिकाहमर्थानुभवश्च यथाक्रमं जीवस्य ज्ञानरूपत्वमानन्दरूपत्वं चावगमयतः । ''आनन्दो ब्रह्म'' आनन्दं ब्रह्मणो विद्वान्'' सत्यं ज्ञानमनन्तं ब्रह्म'' इत्यादिश्रुतयः ब्रह्मणःज्ञानरूपत्व-मानन्दरूपत्वं चावगमयतः ।

ज्ञानानन्दरूपस्यात्मनः ज्ञानानन्दादिकमुपलम्भबाधितमिति पञ्चमपक्षं प्रतिक्षिपति – **पञ्चमस्तु इति** । प्रत्यक्षेण श्रुत्या च ज्ञानानन्दवत्वोपलम्भात् तदभावस्यासंभवात् इत्यर्थः । यदुक्तम् आत्मनः स्वरूपभूतसुखापरोक्षमात्रेण सुखस्य पुरुषार्थतासिद्धौ सुखसंबन्धः पुरुषार्थतायामप्रयोजकः । अतः सुस्वरूपगुणवत्त्वमात्मनो न सिध्यतीति,तदनूद्य परिहरति– यत्तूक्तमिति । **तदपि निजहृदयेति** । स्वानुभवविरुद्धं जल्पितमित्यर्थः । तदेवोपपादयति । **तथा हीत्यादिना** । यदि स्वसंबन्धि वा स्वासंबन्धि वा सुखम् अपरोक्षमिति कृत्वा पुरुषार्थः तदा सुखमात्रं कंचित् प्रति अपरोक्षं प्रकाशत इति सर्वान् प्रति पुरुषार्थः स्यात् । एवं दुःखमपि । न च सुखं यस्यापरोक्षविषयः तं प्रति पुरुषार्थ इति वाच्यम् । मुक्तस्य सुखप्रत्यक्षराहित्येनापुरुषार्थत्वप्रसङ्गादिति भावः । **अनुमानेति** । मुखविकारादिना परस्मिन् सुखदुःखादिकमनुमीयते । **शास्त्रेति** ।'' स्वर्गकामो यजेत'' ''योऽपगुरते तं शतेन यातयात्'' इत्यादि । आदिपदेन पराभिमतार्थापत्त्यनुपलब्धी विवक्षिते । **स्वरसतश्चेति** । परस्य सुरवार्थ

सुखमपरोक्षतयाऽर्थनीयं भवति ।। स्वरूपस्य तर्हिं भवतां कथं सुखत्वमिति चेत्; सच्चिदानन्दरूप आत्मेति वदता भवता नैवं चोदनीयम् । स हि सदात्मा सुखत्वर्विंशिष्टाकारेण प्रकाशात्मतया संबध्यत इति निपुणं चिन्तय ।

यत्तु सगुणत्वानुमाने दूषणमुक्तम्; न तेनास्माकं चेतसि चमत्कारः । जीवेश्वरयोः प्रत्यक्षागमाभ्यां सगुणत्वसिद्धेः । यत्तु अहं जानामीत्यादिप्रत्यक्षस्य वृत्तिविशिष्टाहङ्कारविषयत्वमुक्तम्, तत्तु अहमर्थात्मत्वसमर्थनादौ परिहृतं द्रष्टव्यम्। अतो जीवस्य सर्वगुणशून्यत्ववचनं प्रत्यक्षादिसर्वप्रमाणविरुद्धम् । ईश्वरस्य तु आगमैकसमधिगम्यस्यागमविरुद्धम् ।

परोपकारे प्रवर्तन्ते, परस्य दुःखार्थं परापकारे प्रवर्तन्ते । यदि सुखं दुःखं वा नात्मधर्मः तदा परोपकारापकारयोः या प्रवृत्तिः तन्निवृत्तिप्रसङ्गादिति भावः । **अत इति** सुखस्य आत्मसंबन्धित्वाभावे पूर्वोक्तदोषप्रसङ्गात् स्वसंबन्धितयैव सुखमपरोक्षं भवतु इति सर्वैः प्रार्थनीयं भवतीति आत्मनः सुखवत्त्वमवर्जनीयमिति भावः ।

ननूक्तरीत्या भवतु आत्मनः सुखवत्त्वम्, सुखरूपत्वं तु कथमित्याशङ्क्य सच्चिदानन्दरूप आत्मेति वदता भवता एवं चोद्यं न कर्तव्यम् इत्याह - **स्वरूपस्येति** । यत्तु इत्यादि । द्रव्यत्वोपादानत्वादिहेतुना आत्मनः सगुणत्वानुमाने यद्दूषणमुक्तं तेन नास्माकं मनसि कोऽपि खेदः । अनुमानेन सगुणत्वासिद्धावपि प्रत्यक्षागमाभ्यां तत्सिद्धेः । अहं जानामि, अहं सुखी इत्यादिप्रत्यक्षेण पूर्वोक्तागमेन च आत्मनः जीवस्येश्वरस्य च ज्ञानादिगुणकत्वसिद्धेः इति भावः ।

प्रत्यक्षादिसर्वप्रमाणविरुद्धमिति । यद्यपि उपादानत्वादिहेतुकानुमानदूषणमनुपदमेवाभ्युपगतम् । तथापि मुखविकासादिहेतुकसुखाद्यनुमानसंभवात् अनुमानमप्यन्तर्भाव्य सर्वप्रमाणविरुद्धमित्युक्तम् । **ईश्वरस्य तु इति** । ईश्वरस्य आगमैकसिद्धस्य ज्ञानादिगुणकतयैव आगमैः प्रतिपादनात् तस्य निर्गुणत्ववचनं धर्मिग्राहकप्रमाणबाधितमिति भावः । आगमविरुद्धमित्यस्य गुणशून्यत्ववचनमिति शेषः ।

एतदुक्तं भवति–निर्गुणश्रुतिवदेव सगुणश्रुतयोऽपि तत्त्वविषयाः प्रमाणभूताश्च। अत एव न तासां मिथो बाध्यबाधकभावः। उत्सर्गापवादनयाच्च विहितव्यतिरिक्तविषयोऽत्र निषेधः। अतो भिन्नविषयत्वान्न विरोधगन्धः। विरोधाभावाच्च न बाध्यबाधकभावः। तदभावाच्चोभयप्रामाण्यं यथार्थरूपं स्वतःप्रतीयमानमनपोदितमिति। उक्तं च श्रीवरदगुरुभिस्तत्त्वसारे–

“यत् ब्रह्मणो गुण-शरीर-विकार-जन्म-कर्मादिगोचरविधिप्रतिषेधवाचः।
अन्योन्यभिन्नविषया न विरोधगन्धमर्हन्ति; तन्न विधयः प्रतिषेधबाध्याः ॥”

इति।

इति शतदूषण्यां सगुणनिर्गुणश्रुतिव्यवस्थावादः द्विपञ्चाशः ॥ ५२ ॥

एतावता निर्णीतमर्थं संगृह्णाति - एतदुक्तमित्यादिना विरोधाभावाच्चेति। चकारेण पूर्वोक्तस्य प्रमाणभूतत्वस्य समुच्चय:।

यद्ब्रह्मणो गुणशरीरेति। “गुणानामाकरो महान्” आप्रणखात् सर्व एव सुवर्ण:” तन्मनोऽकुरुत” “बहुधा जायमान:” “तत्तेजोऽसृजत” “एकस्तु पिबते” इत्यादीनि गुणादिसद्भावपरवाक्यानि अप्राकृतगुणादिविषयाणि। “निर्गुणम्” “अकायम्” “निर्विकारम्” “अजायमान:” “निष्क्रियम्” “असङ्ग:” इत्यादिनि गुणादिनिषेधकानि वाक्यानि हेयगुणादिविषयणि इति व्यवस्था।

इति श्रीशतदूषणीव्याख्यायां तात्पर्यप्रकाशिकायां
सगुणनिर्गुणश्रुतिव्यवस्था नाम द्विपञ्चशो वादः ॥

*****

अथ ब्रह्मोपादानत्वान्यथानुपपत्तिभङ्गवादः त्रिपञ्चाशः ।। ५३ ।।

सद्ब्रह्मादिमुखैः पदैः श्रुतिषु यत् तत्त्वं समुद्घोषितं
स्यामित्येव चराचरं जगदिदं सृष्ट्वा प्रविश्याभवत् ।
तस्मै विस्मयनीयमङ्गलगुणस्थेम्ने सदा स्थायिने
सर्वावस्थसमस्तवस्तुवपुषे धाम्ने परस्मै नमः ।।

अस्तु तर्हि ब्रह्मोपादानत्वान्यथानुपपत्त्या विश्वमिथ्यात्वसिद्धिः । तथा हि–

अथ ब्रह्मोपादानत्वान्यथानुपपत्तिभङ्गो नाम त्रिपञ्चाशो वादः ।।

सद्ब्रह्मादिमुखैः पदैः श्रुतिषु यत्तत्त्वं समुद्घोषितं
स्यामित्येव चराचरं जगदिदं सृष्ट्वा प्रविश्याभवत् ।
तस्मै विस्मयनीयमङ्गलगुणस्थेम्ने सदा स्थायिने
सर्वावस्थसमस्तवस्तुवपुषे धाम्ने परस्मै नमः ।।

सत् ब्रह्म इत्यादिभिः शब्दैः श्रुतिषु समुद्घोषितं यत् तत्त्वं बहु स्याम् इति संकल्प्य चराचरात्मकमिदं जगत् सृष्ट्वा तदनुप्रविश्य यथासंकल्पं चराचरात्मकं जगदभवत् आश्चर्यविषयकल्याणगुणस्थेम्ने सदा स्थायिने सृष्ट्यादिसर्वावस्थासु सगलजगच्छरीरकाय परस्मै ज्योतिषे तस्मै नमः । अनेन विशिष्टोपादानत्वरूपो वादार्थः सूचितः । **स्यामित्येवेति**। "बहु स्याम्" इति संकल्प्यैव न तु बहु स्यादिति संकल्प्येत्यर्थः । अनेन ब्रह्मणोऽवस्थाश्रयतया उपादानत्वमुक्तम् । **अभवदिति** । यथासंकल्पं बह्वभवदित्यर्थः । चेतनाचेतनविशिष्टस्य उपादानत्वेऽपि चेतनाचेतनगतदोषासंस्पृष्टत्वमाह-**विस्मयनीयेति** । दोषाणां विशेषणगतत्वप्रदर्शनार्थम्, उपादानोपादेयत्वसिद्ध्यर्थम्, इदंसदादिपदानां परमात्मपर्यन्तवाचकत्वसिद्ध्यर्थं चाह - **सर्वावस्थेति** ।

पूर्वपक्षः

पूर्ववादेन संगतिं प्रदर्शयन् पूर्वपक्षमाह - **अस्तु तर्हीत्यादिना** । निर्गुणत्वान्यथानुपपत्त्या गुणादिप्रपञ्चमिथ्यात्वासिद्धावपि ब्रह्मणः श्रूयमाणोपादानत्वान्यथानुपपत्त्या

केवलनिमित्तेश्वरवादप्रतिक्षेपेण(पमुखेन) ब्रह्मण एवोपादानत्वमपि, ‘प्रकृतिश्च प्रतिज्ञादृष्टान्तानुपरोधात्’ इत्यादिभिः समर्थितम्। (१) तदेतदुपादानत्वं किं मृद्घटादिवत् स्वरूपतः, (२) उत बालयुवादिवत् सूक्ष्मचिदचिद्विशिष्टवेषेण ? (३) अथवा रज्जुसर्पादिवत् अविद्यावैचित्र्यनिबन्धनभ्रान्त्यैवेति।

न तावत् प्रथमः, निर्विकारत्वनिरवद्यत्वश्रुतिकोप(क्षोम)प्रसङ्गात्। न चांश-

---

विश्वमिथ्यात्वं सिध्यति। ईश्वरः निमित्तकारणमात्रम्, न तूपादानकारणमपीति वादस्य निराकरणद्वारा ब्रह्मण एवोपादानकारणत्वमपि ''प्रकृतिश्च प्रतिज्ञादृष्टान्तानुपरोधात्'' इत्यादिभिः सूत्रैः उपपादितम्। तथाहि - प्रकृतिश्च उपादानकारणं च ब्रह्माभ्युपगन्तव्यम्। कुतः, प्रतिज्ञादृष्टान्तानुपरोधात्। प्रतिज्ञा तावत् ''येनाश्रुतं श्रुतं भवति'' इत्यादिका। सा चोपादानकारणत्व एव युज्यते। तज्ज्ञानेन सर्वस्य तत्कार्यस्य ज्ञानात्। दृष्टान्तोऽपि ''यथा सोम्यैकेन मृत्पिण्डेन'' इत्यादिरुपादानविषयक एवाम्नायते। स च ब्रह्मण उपादानत्व एव युज्यते। किं च ''यतो वा इमानि भूतानि'' इति पञ्चमी उपादानार्थिका। ''जनिकर्तुः प्रकृतिः'' इति सूत्रेण उपादानस्यापादानसंज्ञाविधानात् अपादाने च पञ्चम्यनुशासनात् ''सोऽकामयत बहु स्याम्'' इति बहुभवनकामनोपदेशात्, ''तदात्मानं स्वयमकुरुत'' इति स्वात्मन एव जगद्रूपेण कृतिश्रवणाच्चेति भावः।

तदेतदिति। सूत्रकारेण समर्थितमुपादानत्वं किं ब्रह्मणः मृदादेः घटादिकं प्रतीव स्वरूपतः, उत बालत्वविशिष्टशरीरकस्य जीवस्य युवत्वविशिष्टशरीरकं स्वं प्रतीव सूक्ष्मचिदचिद्विशिष्टत्वेन, अथ रज्जुसर्पादिवत् अविद्यावैचित्र्यनिबन्धनभ्रान्त्येति विकल्पः। तत्र प्रथमकल्पः ब्रह्मस्वरूपपरिणामवादिभास्करादिमतेन। द्वितीयकल्पः विशिष्टाद्वैतमतानुसारेण। तृतीयकल्पः अद्वैतमतानुसारेण। सर्पभ्रमाधिष्ठानस्य रज्जोरिव अविद्यामूलकप्रपञ्चाध्यासाधिष्ठानत्वमेव ब्रह्मणः प्रपञ्चोपादानत्वमिति यावत्।

न तावत् प्रथम इति। मृदः घटादिरिव ब्रह्मणः प्रपञ्चः परिणाम इति स्वीकृत्य ब्रह्मस्वरूपस्य प्रपञ्चाकारपरिणामवत्त्वमुपादानत्वमिति स्वीकारे ब्रह्मणः निर्विकारत्व-

भेदेन कालभेदेन वा विषयव्यवस्था; निरवयवत्वाकालकाल्यत्वादिस्वभाव(त्व)विरोधप्रसङ्गात्। न च सावयवत्वादिकमपि तथैव व्यवस्थाप्यम्; तथाऽपि तदात्मके ब्रह्मण्येव समस्तदोषप्रसङ्गस्य दुष्परिहरत्वात्। न च ब्रह्मांशानां ब्रह्मणोऽत्यन्तभेदं वा ब्रह्माध्यस्तत्वं वा स्वप्नेऽप्यङ्गीकरोषि ॥ श्रुतिबलादेव ब्रह्मणि सर्वात्मके सावयवत्वनिरवयवत्वसदोषत्वनिर्दोषत्वोपादानत्वादि(कं) सर्वमभ्युपगच्छाम इति चेन्न; व्याघातोत्सादे पूर्वपक्षस्यापि अप्रतिक्षेप्यत्वात्। तथा चालं ब्रह्ममीमांसानिरूपणक्लेशेन।

निर्दोषत्वप्रतिपादकश्रुतिविरोधप्रसङ्गादिति भावः। ननु ब्रह्मणः कस्मिंश्चिदंशे सविकारत्वम् सावद्यत्वं च अंशान्तरे निर्विकारत्वम् निरवद्यत्वं च, इति अंशभेदेन वा एवं कस्मिंश्चित् काले सविकारत्वं सावद्यत्वं च, कस्मिंश्चित् काले निर्विकारत्वं निरवद्यत्वं चेति कालभेदेन वा निर्विकारत्वसविकारत्वादिव्यवस्थेत्याशङ्क्य निरवयवत्वं अकालकाल्यत्वं च ब्रह्मणः स्वभावः इति प्रतिपादकश्रुतिविरोधः इति परिहरति - **न चांशभेदेनेति**। अनादिः काल इत्यवगमात् अकालकाल्यत्वं भगवतः सिद्धम्। अकालकाल्यत्वं नाम कालकृतपरिणामराहित्यम्। पुनः शङ्कते - **न च सावयवत्वादिकमपीति**। आदिपदेन कालकाल्यत्वं गृह्यते। **तथेति**। अवयवकालभेदाभ्यामित्यर्थः। सावयवत्वनिरवयवत्वव्यवस्थापकावयवभेदस्यापि संकोचकाभावेन श्रुत्या निषेधात् अंशादिभेदेन व्यवस्था न संभवति। तथापि अभ्युपेत्योच्यत इत्याशयेन **तथापीत्युक्तम्**। **तदात्मके** इति। अवयवात्मके इत्यर्थः। अवयवातिरिक्तावयविनोऽभावात् अवयवगतविकारावद्यादिकं तदभिन्ने ब्रह्मण्येव प्रसजतीति भावः। अंशानां ब्रह्मभिन्नत्वात् अध्यस्तत्वाद्वा तद्गतदोषैर्न ब्रह्मणो निरवद्यत्वश्रुतिविरोध इत्यत्राह-**न च ब्रह्मांशानामिति**। शङ्कते-**श्रुतिबलादेवेति**। ब्रह्मणि साव-यवत्वनिरवय-वत्वादीनामङ्गीकारे तेषां परस्परं विरोधो नास्तीत्यायाति। तथा सति पूर्वपक्षस्यापि सिद्धान्तविरुद्धस्य भवद्रीत्या विरुद्धत्वाभावात् अनिराकरणीयत्वं प्रसजतीति समाधत्ते-**व्याघातोत्साद** इति। मिथोविरोधस्यादोषत्व इत्यर्थः। न चेष्टप्रसङ्ग इत्यत्राह-

नापि द्वितीयः, विशिष्टस्योपादानत्वे प्राप्ताप्राप्तविवेकेन विशेषणस्यैवोपादानत्वापातात् । यदि पुनर्विशिष्टमुपादानमित्यत्र विशेषणं विशेष्यं चेत्युभयमप्युपादानमिति विवक्षितम्, तदा विशेष्यस्यापि सविकारत्वप्रसङ्गो दुर्वारः। तथाच किं विशेषणवैशिष्ट्यवृथाग्रहेण ? किंच, यदि चिदचिदीश्वरैः संभूय जगदाख्यं कार्यमारभ्यते, तदा कार्याणां सर्वेषां त्रिस्वभावत्वप्रसङ्गः, यथा शुक्लकृष्ण-

---

तथा चालमिति । पूर्वोत्तरपक्षोपन्यासपूर्वकं पूर्वपक्षस्य निराकरणं सिद्धान्तस्थापनं च विचारनिरूपणस्य फलम् । पूर्वपक्षसिद्धान्तयोर्विरोधाभावे तन्न घटत इति भावः ।

सूक्ष्मचिदचिद्विशिष्टवेषेण ब्रह्मण उपादानत्वमिति द्वितीयपक्षं निराकरोति - **नापि द्वितीय** इत्यादिना । स्वरूपत उपादानत्वाभावाद्धि विशिष्टवेषेणोपादानत्वानुधावनम् । तत्र च प्राप्ताप्राप्तविवेकेन विशेषणस्यैवोपादानत्वं भवेत्, न विशेष्यस्य ब्रह्मण इति भावः।

प्राप्ताप्राप्तविवेको नाम युक्तायुक्तविवेचनम् । **यदि पुनरिति** । सक्ष्मचिदचिद्विशिष्टं ब्रह्मोपादानमित्यस्य विशेषणं विशेष्यं चोभयमुपादानमित्यर्थः । तथा च विशेष्यस्य ब्रह्मणोऽप्युपादानत्वं भवतीति यद्युच्यते, तदा उपादानस्य विशेष्यस्य ब्रह्मणोऽपि सविकारत्वप्रसङ्गो दुर्वारः, उपादानत्वस्य सविकारत्वव्याप्यत्वादिति भावः । यदि च सविकारत्वमङ्गीक्रियते, तर्हि ब्रह्मण एव उपादानत्वसंभवात् विशेषणनिशिष्टस्योपादानत्वमित्याग्रहो न कार्य इत्याह - **तथा चेति** ।

विशिष्टस्योपादानत्वे दोषान्तरमाह - **किं च यदीति** । चिदचिद्विशिष्टस्य ब्रह्मण उपादानत्वाङ्गीकारे चित् अचित् ब्रह्मेति त्रिभिः मिलित्वा जगदाख्यं कार्यमुत्पाद्यत इति पर्यवस्यति । तथा सति सर्वेषामपि कार्याणां त्रिस्वभावत्वं प्रसजति । केषांचित् चित्स्वभावत्वमेव केषांचिदचित्स्वभावत्वमेव इति दृश्यमाना व्यवस्था न स्यादिति भावः।

तत्र दृष्टान्ताः - **यथेति** । शुक्लैः कृष्णैः रक्तैश्च तन्तुभिरारब्धस्य पटस्य शुक्लकृष्णरक्तस्वभावत्वं दृश्यते । अथवा सीसताम्राभ्यामारब्धस्य कार्यस्य (कांस्यस्य) द्वितयोत्तीर्णस्वभावत्ववत् चिदचिदीश्वरैरारब्धस्य जगतः त्रितयोत्तीर्णस्वभावत्वं प्रसज्येतेत्यर्थः । यद्वा

रक्ततन्त्वारब्धे पटे शुक्लकृष्णरक्तस्वभावत्वम् । सीसताम्रारब्धकांस्यवद्वा (कार्यस्येव वा) त्रितयोत्तीर्णस्वभावत्वप्रसङ्गः । लाक्षारसावसिक्तकार्पासकुसुमरागवत् रुमाप्रक्षिप्तकाष्ठलावण्यवद्वा विश्वस्याप्यनभिभवनीयेश्वरस्वभावत्वापत्तिः । किंच विशिष्टस्योपादानत्वं किं श्रौतम्, उत कल्पितम् ? न पूर्वः; कारणवाक्यस्थसद्ब्रह्मात्मा- दिशब्दानां ब्रह्मस्वरूपमात्रे रूढत्वात् । उक्तं च भवतां भाष्येऽपि, ‘शरीरिभूतपरमात्माभिधायिभिः सद्ब्रह्मादिभिः शब्दैः’ इति । न च स्वरूपे च विशिष्टे च शक्तिरित्यनेकार्थतावक्लृप्तिः; कल्पकाभावात् कल्पनागौरवोपहतत्वाच्च । एवं, ‘ब्रह्म वनं ब्रह्म स वृक्ष आसीत्’, ‘तदात्मानं

लाक्षारसेनावसिक्तस्य कार्पासकुसुमस्य रक्तत्वपत् रुमायां प्रक्षिप्तस्य काष्ठस्य लवणत्ववच्च सर्वस्यापि जगत ईश्वरस्वभावत्वं प्रसजतीति । **रूमा**=लवणोत्पत्तिस्थानम् उप्पङ्कलिइति तमिल्भाषायाम् । तत्र प्रक्षिप्तं काष्ठं लवणात्मना परिणमति ।

विशिष्टस्योपादानत्वे दोषान्तरमाह - **किं च विशिष्टस्येति** । सूक्ष्मचिदचिद्विशिष्टस्य ब्रह्मण: उपादानत्वं किं श्रुतिप्रतिपन्नम् उत कल्पितम् । नाद्य:, जगत्कारणप्रतिपादकश्रुतिवाक्येषु विद्यमानानां सत् ब्रह्म आत्मा इत्यादिशब्दानां ब्रह्मस्वरूपमात्रे रूढत्वात् चिदचिद्विशिष्टशक्तत्वाभावात् । श्रीभाष्येऽपि - ‘‘शरीरिभूतपरत्मात्माभिधायिभि: सद्ब्रह्मादिभि: शब्दै:’’ इति ब्रह्मस्वरूपवाचकत्वमेव सद्ब्रह्मात्मादिशब्दानां भाषितम् । तथा च विशिष्टस्योपादानत्वं न श्रौतमिति भाव: । ननु भाष्ये स्वरूपे शक्तिरुक्ता । विशिष्टे शक्तिस्तु न निषिद्धा । तथा च स्वरूपे विशिष्टे च शक्ति: स्यात् इत्यत्राह - **न च स्वरूपे चेति** । अनेकार्थे शक्तिकल्पनायां प्रमाणाभावात् गौरवाच्चेत्यर्थ: । कारणवाक्यस्थ सदादिपदानां ब्रह्मस्वरूपपरत्वस्थ भाष्येऽभिहितत्वात् न विशिष्टशक्तावपि किंचित्प्रयोजनमिति भाव: ।

जगत्कारणविधिपराणि वाक्यानि कारणवाक्यशब्देन पूर्वं विवक्षितानि । अथ सिद्धे जगत्कारणे तद्विशेषादिपराणि वाक्यानि उदाहरति - **एवं ब्रह्म बनमिति** ।

स्वयमकुरुत', 'यद्भूतयोनिं परिपश्यन्ति धीराः' इत्यादिभिरपि ब्रह्मस्वरूपस्यैवोपादानत्वं श्रूयते । नाप्युत्तरः, कल्पकाभावात्; प्रत्युत समस्तभेदरहितस्यैव कारणवाक्येऽवधारणात् तद्विरोधिविशेषणकल्पनं वाक्यतात्पर्यविरुद्धं च ।

अतः इदमिति निर्दिष्टकृत्स्नप्रपञ्चरूपेण बहु स्यामिति स्वरूपस्यैव बहुभवनसङ्कल्पपूर्वकोऽयं विश्वारम्भः, मृद्घटादिदृष्टान्तानुसाराच्च स्वरूपस्यैपोपादानत्वं सिद्धमिति स्वरूपनिर्विकारत्वश्रुतिविरोधपरिहारे तृतीयः पक्षः परिशिष्यते । यथा चैकैव रज्जुः सर्पभूदलनाम्बुधारादिरूपेण भ्रमादनुवर्तते, यथा चैकस्मिन्नेव निरवयवे गगने युगपदनन्तभेदभिदुरगन्धर्वनगरारम्भः, यथा च मुखचन्द्रादेः दर्पणतरङ्गाद्युपाधिभेदेन नानात्वोपलम्भः, तथा निरंशेऽपि

विशिष्टस्योपादानत्वं कल्पितमिति द्वितीयपक्षं दूषयति - नाप्युत्तर इति । तथा कल्पने प्रमाणाभावादित्यर्थः । प्रत्युतेति । "सदेव सोम्येदमग्र आसीदेकमेवाद्वितीयम्" इति जगत्कारणप्रतिपादके वाक्ये एकशब्दैवकाराद्वितीयशब्दैः सजातीयविजातीयस्वगतभेदरहितस्य सद्रूपस्य वस्तुन एव कारणत्वनिर्धारणात् तद्विरोधिचिदचिद्विशेषणकल्पनं वाक्यतात्पर्यविरुद्धम् । तथा च इदमिति निर्दिष्टकृत्स्नप्रपञ्चरूपेण बहु स्यामिति स्वरूपस्यैव बहुभवनसंकल्पपूर्वकोऽयं प्रपञ्चारम्भः । तत्र मृद्घटादिदृष्टान्तानुसारात् ब्रह्मस्वरूपस्यैवोपादानत्वमवगम्यते । तथा सति स्वरूपस्य निर्विकारत्वश्रुतिविरोधः प्रसजति । अतः तृतीयपक्ष एवावशिष्टः स्वीकरणीयः । स च पक्ष एवम् यथा एकैव रज्जुः सर्पभूदलनाम्बुधारादिरूपेण भ्रमात् प्रतीयते, यथा चैकस्मिन्नेन गगनेऽनेकभेदभिन्न-गन्धर्वनगरारम्भः यथाच मुरवस्य चन्द्रादेश्च दर्पणतरङ्गादिरूपग्राहकोपाधिभेदेन नानाप्रकारेणोपलम्भः, तथा निर्विशेषस्वप्रकाशे निरंशे स्वतःशुद्धे निर्विकारे च ब्रह्मणि अपिद्याख्यदोषमूलकः विचित्रचिदचिदात्मकजगदध्यास इति तत्त्वावेदकनिर्विकारजगदु-पादानकारणप्रतिपादकश्रुतितात्पर्यमिति स्वीकरणीयम्

निर्विशेषस्वप्रकाशे स्वतश्शुद्धे ब्रह्मणि असंभवद्विकारे दुर्निरूपदोषमूल-विकल्पासह- विचित्रचिदचिदात्मकजगदध्यास इत्यभ्युपगन्तव्यमिति तत्त्वावेदकनिर्विकारजगदुपादानश्रुतितात्पर्यविद्यया (र्यम्। अविद्यया च) सर्वमन्यत् प्रपञ्चसत्यत्वग्राहकं ग्रहवत् निग्राह्यमिति।

अत्र प्रतिविधीयते–स्वरूपपरिणामपक्षदूषणं तावदस्माकमपि सम्मतमेव। तथापि बहु(ल) प्रमाणोपस्थापितबहुमुखव्याघातशतसादितात् भवन्मतात् त्रिचतुरविरोधसितासितभास्करादिमतानुरोधेन कार्यकारणसंरक्षणमेव समुचितम्।

इति भावः। **दुर्निरूपदोषेति**। सदसदनिर्वचनीयाविद्याख्यदोषेत्यर्थः। **विकल्पसहेति** जगतो विशेषणम्। सत्त्वासत्त्वविचारासहेति तदर्थः। मिथ्याभूतेति यावत्। तथा च जगदध्यासाधिष्ठानत्वं जगदुपादानत्वमिति पर्यवसितम्। अत्र मूले **"श्रुतितात्पर्यम्।** अविद्यया च सर्वमन्यत्'' इति पाठो दृश्यते। तत्र अभिप्रायो न स्पष्टः। अतः ''श्रुतितात्पर्यविद्यया सर्वमन्यत्'' इति पाठमूहन्ते **उत्तमूरुस्वामिनः**। विद्ययेत्यस्य पिशाचोच्चाटनमन्त्रेणेत्यर्थः। यथा च कस्यचन पिशाचेन ग्रहः तदुच्चाटनमन्त्रेण निगृह्यते, तथा पूर्वोक्तश्रुतितात्पर्यरूपेण मन्त्रेण प्रपञ्चसत्यत्वग्राहकं प्रमाणं निग्राह्यं बाधनीयमिति भावः।

सिद्धान्तः

सिद्धान्तमारभते - **अथ प्रतिविधीयत इति**। यद्यपि ब्रह्मस्वरूपस्यैव जगदाकारेण परिणाम इति पक्षस्य यत् दूषणं भवद्भिरुक्तं तदस्माकमपि संमतमेव। परं तु भवन्मतात् स्वरूपपरिणामवादिभास्करादिमतमेव समीचीनमित्यर्थः। **बहुप्रमाणेति**। बहुभिः प्रमाणैः उपस्थापितैः बहुभिर्विरोधशतैः दूषितं भवन्मतमपेक्ष्य कतिपयविरोधदूषितभास्करादिमतानुसारेण कार्यकारणस्वभावसंरक्षणमेवोचितमित्यर्थः। **त्रिचतुरविरोधेति**। भास्करमते निर्विकारत्वश्रुतिविरोधः निरवद्यत्वश्रुतिविरोधः भेदाभेदसमावेश इति त्रयः स्थूलदोषाः। यादवप्रकाशमते एतैः दोषैः सह जीवाद्यनादित्वभङ्ग इति चत्वारो दोषाः। **सितासितेति**। शुद्धाशुद्धेत्यर्थः। भास्कारादिमते क्वचिद्विषये शुद्धत्वं निर्दोषत्वम्, क्वचिद्विषये अशुद्धत्वं सदोषत्वम्। शांकरमते तु अशुद्धत्वमेवेति ज्ञाप्यते। **कार्यकारणसंरक्षणम्=** कार्यकारण-

यत्तु(यत्) विशिष्टपक्षे प्राप्ताप्राप्तविवेकेन विशेषस्यैवोपादानत्वमापन्नमिति; तत्र विशेषणस्य साक्षाद्विकाराश्रयत्वप्रसङ्ग इष्टः । विशेष्यस्यापि परम्परयाऽऽश्रयत्वेऽप्याश्रयत्वमात्राविशेषादुपादानशब्दवाच्यत्वप्रतिक्षेपस्त्वशक्यः । यथा

योरबाध्यत्वकल्पनम् ।

अथ सूक्ष्मचिदचिद्विशिष्टस्य ब्रह्मणः उपादानत्वे पूर्वपक्ष्युक्तान् दोषान् क्रमशः उद्धरति - **यत्तु विशिष्टपक्ष** इत्यादिना । विशिष्टस्य उपादनत्वे प्राप्ताप्राप्तविवेकेन विशेषणस्यैवोपादानत्वं पर्यवसन्नमिति यदुक्तम्, तत्र विशेषणस्य साक्षाद्विकाराश्रयत्वमिष्टमेव । विशेष्यस्य ब्रह्मणोऽपि स्वाश्रयाश्रयत्वरूपपरंपरासंबन्धेनाश्रयत्वेऽपि विकाराश्रयत्वानपायात् उपादानशब्दवाच्यत्वं न प्रतिक्षेप्तुं शक्यमित्यर्थः । अत्र साक्षादाश्रयत्वमद्वारकमाश्रयत्वम्। परंपरया आश्रयत्वं सद्वाराकमाश्रयत्वम् । यथा यागस्य सद्वारकं स्वर्गकारणत्वम्, प्रोक्षणादेश्च सद्वारकमपूर्वशेषत्वम्, ब्रीह्यपूर्वद्वारा परमापूर्वशेषत्वम् । **अशक्य इति** । अवस्थाश्रयत्वमेवोपादानत्वम्, न तु साक्षादवस्थाश्रयत्वं, गौरवात् । आश्रयत्वे सति साक्षात्त्वविरहेणानुपादानत्वादर्शनाच्चेति भावः ।

ननु यदि क्वचित् सद्वारकमाश्रयत्वमुपलभ्येत, तदा उपादानत्वश्रुतेः निर्विकारत्वश्रुत्यविरोधेन तद्विषयता स्यात् । न च कारणत्वशेषत्वादिवत् सद्वारकमाश्रयत्वमुपलभामह इति चेत् - न । ''तदभावो नाडीषु तच्छ्रुतेरात्मनि च'' इति सूत्रोक्तप्रासदखट्वान्यायेन सद्वारकाश्रयत्वस्य लोकसिद्धत्वात् । प्रासादस्थखट्वास्थपर्यङ्के शयनेऽपि प्रासादे शेत इति हि प्रतीयते । न च निर्विकारत्वश्रुतेः विकारनिष्ठसाक्षात्संबन्धावच्छिन्नप्रतियोगिताकाभावपरत्वे नियायकाभाव इति वाच्यम् । उपादानत्वश्रुतोरेव नियामकत्वात् । किं च निर्विकारत्वश्रुतेः हेयसंबन्धाभावपरत्वात् येन संबन्धेनान्यत्र हेयत्वं दृष्टं तेनैव संबन्धेन हेयत्वप्रसक्तौ तत्संबन्धनिषेधस्यैव स्वरसत्वात् । किं च विकारो हि स्वरूपान्यथाभावः। तस्यैव निषेधान्न विरोधशङ्कालेशः ।

तन्मतानुसारेणैव दृष्टान्तमाह - **यथा भवतोऽपीति** । भवन्मतेऽपि साक्षादविद्याया

भवतोऽप्यविद्याया एव साक्षाद्विवर्ताश्रयत्वेऽपि तस्या एव साक्षिभूतब्रह्माधीनसत्ताकत्वात् ब्रह्म विवर्तत इत्युक्तिः–तथा परिणामस्यापि साक्षात् ब्रह्मशरीरभूतद्रव्यगतत्वेऽपि तस्य तदाधारतया(तदारब्धतया) तदधीनतामात्रात् ब्रह्म परिणमतीति वक्तुं शक्यम् । नैतावता विशेष्यस्य साक्षाद्विकाराश्रयत्वप्रसङ्गः । परम्परयाश्रयत्वं तु भवत इवास्माकमपि संमतमदोषावहं च । यथा बालो युवा जात इत्यादौ विशेष्य-

---

एव विकाराश्रयत्वम् विकाराश्रयाविद्याश्रयत्वेन ब्रह्मण उपादानत्वम् । ब्रह्मणः अविद्याश्रयत्वं साक्षिभूतब्रह्माधीनसत्ताकत्वात् अविद्यायाः ।

"आश्रयत्वविषयत्वभागिनी निर्विभागचितिरेव केवला" इति संक्षेपशारीरकेऽप्युक्तम् । तथा परिणामस्य साक्षात्संबन्धेन ब्रह्मशरीरभूतद्रव्यगतत्वेऽपि तस्य द्रव्यस्य ब्रह्मजन्यतया तदधीनतामात्रात् ब्रह्म परिणमतीति शक्यं वक्तुम् । नैतावता विशेष्यस्य ब्रह्मणः साक्षाद्विकाराश्रयत्वम् । परंपरया स्वाश्रयाश्रयतया विकारवत्त्वं तु न दोषावहमिति भावः । **साक्षादित्यस्य** द्रव्यगतत्वेऽपीत्यनेनान्वयः । परिणामस्य साक्षात् ब्रह्माश्रितत्वाभावेऽपीति भावः । **तदारब्धतयेति** । ब्रह्मणः उपादानात्वमुभयसंप्रतिपन्नम् । परिणामविवर्तयोरेव विवादः । न च अवस्थाश्रयघटाधारस्य भूतलस्यापि घटगतावस्थाश्रयत्वं स्यादिति वाच्यम् । अवस्थाश्रयवस्तुनिष्ठापृथक्सिद्धिसंबन्धावच्छिन्नाधेयतानिरूपकस्यैव अवस्थाश्रयत्वात् । तादृशावस्थाश्रयत्वस्यैव उपादानताप्रयोजकत्वादिति भावः । **एतावतेति** । परिणामाश्रयत्वमात्रेणेत्यर्थः ।

ननु विवर्तपक्षे मिथ्यात्वान्न दोषावहत्वम् । परिणापक्षे तु सत्यत्वात् दोषावहत्वं स्यादित्यत्राह - **यथा बाल** इति । बालो युवा जात इत्यादौ बालत्वविशिष्टशरीरकः आत्मा युवत्वविशिष्टशरीरकोऽभूदित्यर्थः । बालत्वयुवत्वयोः विशेषणभूतशरीरगतत्वेऽपि स्वाश्रयापृथक्सिद्धिरूपपरंपरया आत्मगतत्वात् यथा आत्मपर्यन्तो बालशब्दप्रयोगः युवशब्दप्रयोगश्च, तथा परिणामरूपावस्थायाः शरीरभूतजगद्गतत्वेऽपि उक्तपरंपरया ब्रह्मगतत्वात् ब्रह्मणि उपादानशब्दप्रयोगः कार्यशब्दप्रयोगश्चोपपद्यत इति भावः ।

भूतात्मस्वरूपस्य निर्विकारत्वे, विशेषणे साक्षाद्बालत्वाद्यवस्थायोगेन आत्मपर्यन्तो(न्त) बालयुवशब्दप्रयोगः, तद्वदत्राप्युपादानकार्यशब्दयोः प्रयोग इति न दोषः । एवं विशेष्यस्य निर्विकारत्वं विशिष्टग्रहणशक्तिश्चेत्युक्तं भवति । अन्यथा अष्टवर्षत्व ब्राह्मणत्वादीनामात्मासंबन्धेनोपनयनादिविधीनामप्रवृतिरिति कर्मब्रह्ममीमांसयोरारम्भ एव कापेयकल्पः स्यात् ॥ तथाऽपि कथमवस्थाद्वयरहितस्वरूपे कस्यचिदुपादानोपादेयवाचोयुक्तिश्चित्तमारोहेदिति चेन्न; विशेषणवत् विशेष्येऽप्यवस्थाद्वयपोगात्, तत्तदवस्थतत्तद्वैशिष्ट्यानामागन्तुकत्वेनावस्थात्वात्, मिथो भिन्नत्वाच्च; आत्मनो बालयुवदेहवैशिष्ट्यवत् ।

उपसंहरति - **एवमिति** । **विशिष्टग्रहणशक्तिश्चेति** । विशिष्टस्य उपादानत्वेन ग्रहणमस्माभिःकर्तुं शक्यत इत्यर्थः । यद्वा उपादानशब्दस्य विशिष्टबोधनशक्तिरित्यर्थः । शरीरगतधर्मप्रवृत्तिनिमित्तकानां शब्दानां शरीरविशिष्टात्मपर्यन्तत्वमावश्यकम् । अन्यथा अष्टवर्षत्वब्राह्मणत्वादीनामात्मन्यभावेन ''अष्टवर्षं ब्राह्मणमुपनयीत'' इत्यादिविधीनामप्रवृत्तिरिति कर्मब्रह्ममीमांसयोरारम्भ एव कापेयः कपिकर्म स्यादित्यर्थः । शङ्कते-**तथापीति** । कारणतावच्छेदककार्यतावच्छेदकावस्थाद्वमरहिते ब्रह्मस्वरूपे कथमुपादानशब्दः उपादेयशब्दश्च युज्येते इति न वाच्यम् । विशेषणयोः चिदचितोरिव विशेष्ये ब्रह्मण्यपि तादृशावस्थाद्वयसत्त्वात् । सूक्ष्मत्वं स्थूलत्वं च चिदचिद्गते अवस्थे । सूक्ष्मत्वविशिष्टचिदचिद्वैशिष्ठ्यं स्थूलत्वविशिष्टचिदचिद्वैशिष्ट्यं च ब्रह्मगते अवस्थे । तयोरप्यागन्तुकत्वात् । आगन्तुकापृथक्सिद्धधर्मो हि अवस्थेति भावः । अवस्थाद्वययोगमुपपादयति-**तत्तवस्थेति** । अवस्थाद्वित्वोपपादनार्थं मिथो भिन्नत्वादित्युक्तम् ।

आगन्तुरिति । अवस्थाश्रय उपादानम् । आगन्तुकापृथक्सिद्धधर्मः अवस्था । प्रमेयत्वादिकमादाय शब्दादौ गुणेऽतिव्याप्तिवारणाय आगन्तुकेति । आगन्तुकत्वं स्वाश्रयसमानकालिकप्रागभावप्रतियोगित्वम्, न तु जन्यत्वमात्रम् । शब्दादावपि शक्तिस्वीकारपक्षेऽतिव्याप्तितादवस्थ्यात् । अद्रव्येषु शब्दादिषु शक्तेः सहजत्वमेवेति न

श्लो. आगन्तुरपृथक्सिद्धो धर्मोऽवस्थेति कीर्त्यते।
विशेष्येऽपि च वैशिष्ट्यभेदोऽवस्थान्तरायते ॥

एतेन स्वभावसङ्करादयो दोषा न प्रसङ्गमर्हन्ति । न हि बालस्य युवभावे देहदेहिनोः प्रतिनियताः स्वभावाः सङ्कीर्यन्ते । न च शुक्लकृष्णरक्ततन्त्वारब्धे स्वभावसङ्करः; विभक्तदशायामिव संसर्गदशायामपि शौक्ल्यादीनां यथास्वं प्रतिनियतांशविषयत्वात् । एवमत्रापि विशिष्टकार्ये यथास्वमंशप्रतिनियतत्रिस्वभा

स्वाश्रयसमानकालिकप्रागभावप्रतियोगित्वसंभवः । आधेयतासंबन्धेन गगनादिमत्त्वमादाय शब्दादौ तद्दोषतादवस्थ्यवारणायापृथक्सिद्धत्वनिवेशः । गगनस्यापि हि स्वाश्रयीभूतब्रह्मनिष्ठप्रागभावप्रतियोगितया आगन्तुकत्वसंभवः ।

वैशिष्ट्यभेद इति वैशिष्ट्यविशेष इत्यर्थः । **एतेनेति** । सविकारत्वस्य साक्षाद्विशेषणगतत्वाश्रयणेनेत्यर्थः । **स्वभावसंकरादय** इति । विशेषणगतस्वभावस्य विशेषणे विशेष्यगतस्वभावस्य विशेषणे वा प्रसक्तिर्नास्तीत्यर्थः । आदिशब्देनोत्तीर्णस्वभावत्वेश्वरस्वभावत्वे गृह्येते । तदेवोपपादयति - **न हीति** । बालो यदा युवा भवति तदा बालयुवशरीरयोर्विद्यमानाः स्थूलत्वादयः शरीरविशिष्टे आत्मनि वा, आत्मनि विद्यमानाः स्वभावाः शरीरे वा न संकीर्यन्त इत्यर्थः ।

यत्तु चिदचिदीश्वरैः संभूय जगदारम्भे कार्यजगदन्तर्गतानां सर्वेषां त्रिस्वभावत्वप्रसङ्गः शुक्लकृष्णरक्ततन्त्वारब्धस्य पटस्य शुक्लकृष्णरक्तस्वभावत्ववत् इत्युक्तम् । तत्रोच्यते । विभक्ताः तन्तवः यदा संयुक्ता भवन्ति तदा पट इत्युच्यन्ते । तन्तुभ्योऽतिरिक्तः पटो नास्ति । तथा च तन्तूनां संयोगविशेष एव पटः । शुक्लकृष्टरक्ततन्त्वारब्धः पटोऽपि शुक्लकृष्णरक्तन्तूनां संयोग एव । एवं स्थिते वियुक्तावस्थायां येषु तन्तुषु शौक्ल्यमासीत् येषु च कृष्णत्वमासीत् येषु च रक्तत्वमासीत् तेषां संयुक्तावस्थायामपि तेषु तेष्वेव तन्तुषु शुक्लत्वं कृष्णत्वं रक्तत्वं वा व्यवस्थितम् । न शुक्लत्वस्य रक्ततन्तुषु रक्तत्वस्य शुक्लतन्तुषु वा संकर इति यथादर्शनमङ्गीकार्यम । एवं चिदचिद्विशिष्टे त्रितयसमुदायरूपे कार्येऽपि

वत्वे प्रसज्यप्राने अस्माकमिष्टपसङ्गः । अत एवोतीर्णस्वभावत्व मुद्भूतस्वभावत्व मित्यादिचोद्यमपि परिहृतम्; ब्रह्मस्वरूपस्य निर्विकारत्वात्, जगदात्मकपरिणामदशायामपि व्यवस्थितस्वभावत्वात् । न च दृष्टान्तमात्रेणार्थसिद्धिः, न चात्र व्याप्तिसंभवः, अन्यथा त्वत्पक्षेऽप्यविद्याविशिष्टब्रह्मविवर्ते स्वभावसङ्करादयस्तदवस्थाः ।

यदुक्तं विशिष्टस्योपादानत्वं किं श्रौतम्, उत कल्पितमिति-तत्र क्वचिच्छ्रौतं क्वचित् श्रुतार्थापत्तिकल्पितमिति, वाक्यशेषशाखान्तरनयसिद्धमिति वा विभागः। तथा हि-‘तद्धेदं तर्ह्यव्याकृतमासीत्; तन्नामरूपाभ्यां व्याक्रियत’ इत्यादिषु

तत्तद्वस्तुगताः स्वभावाः तत्तद्वस्तुष्वेव व्यवतिष्ठन्ते नान्यत्र संकीर्यन्त इति नास्माकमनिष्टं किंचिदिति भावः । प्रतिनियतांशविषयत्वात् इत्यत्र विषयशब्दः देशपरः । प्रतिनियतांशस्थत्वादिति फलितोऽर्थः ।

अत एवेति । व्यवस्थितत्रिस्वभावत्वाङ्गीकारादेवेत्यर्थः । अनभिभवनीयेश्वरस्वभात्वप्रसङ्ग इति पूर्वपक्ष्युक्तस्यानुवादः **उद्भूतस्वभावत्वमिति** । उत्तीर्णस्वभावत्वोद्भूतस्वभावत्वानङ्गीकारे हेतुमाह - **ब्रह्मस्वरूपस्येति** । निर्विकारत्वात् स्वस्वभावपरित्यागेन स्वभावान्तरग्रहणं न संभवति । व्यवस्थितस्वभावत्वात् स्वसंसृष्टे स्वस्वभावापत्तिहेतुत्वं च न संभवति इत्यर्थः । शुक्लकृष्णरक्ततन्त्वारब्धे पटे स्वभावसांकर्यं नास्तीत्युक्तम् । इदानीं तदभ्युपम्याह-**न च दृष्टान्तेति** । ननु स्वभावत्वं सांकर्यव्याप्तमित्यत्राह-**न चात्रेति** । बालस्य युवभावे सांकर्यादर्शनादिति भावः । **त्वन्मतेऽपीति** । अविद्याविशिष्टब्रह्मणः जगत्काररत्वेऽपि विशेष्यविशेषणयोः स्वभावसंकरः अपरिहार्य इत्यर्थः ।

यदुक्तमित्यादि । चिदाचिद्विशिष्टस्य ब्रह्मणः उपादानकारणत्वं किं श्रुतिप्रमाणकम् उत युक्त्या कल्पितमिति यत् पृष्टम् । तत्र ब्रूमः । क्वचित् श्रुतौ विशिष्टस्योपादानत्वमुक्तम्, क्वचित् श्रुतौ श्रूयमाणस्योपादानत्वस्यान्यथानुपपत्तिरूपया अर्थापत्त्या कल्पितमिति, वाक्यशेषेण शाखान्तरन्यायेन वा सिद्धमिति विभागः । क्रमशः सर्वमेतदुपपादयिष्यन् आदौ विशिष्टोपादानत्वस्य श्रौतत्वमुपपादयति - **तथाहीत्यादिना** । “तद्धेदं तर्ह्यव्याकृतमासीत्

कारणवाक्येष्वव्याकृतादिशब्देन न ब्रह्मस्वरूपमात्रं प्रतिपाद्यते; ब्रह्मस्वरूपे रूढ्यभावात्; 'तन्नामरूपाभ्यां व्याक्रियत' इत्यनेनैव योगविवक्षायाः स्पष्टत्वाच्च। अतः इदमर्थस्यैव प्रलयकाले नामरूपव्याकरणनिवृत्तिमात्रं विवक्षितम् । इदमर्थश्चिदचिदात्मकः प्रत्यक्षादिसिद्धः । स एव कदाचित् सूक्ष्मावस्थाप्राप्त्या व्यष्टिसमष्टिरूपविकाररहित इत्युक्तं भवति । एवं स्थिते प्रलयदशायामपि सूक्ष्मयोश्चिदचिद्वस्तुनोः सद्भाव उक्तो भवति । तर्हि ब्रह्मणस्तत्र कथं प्रसङ्ग इति

तन्नामरूपाभ्यां व्यक्रियत' इति बृहदारण्यकवाक्यम् । अत्र अव्याकृतशब्दवाच्यस्य कारणत्वमवगम्यते । अत्रत्यः अव्याकृतशब्दः न ब्रह्मस्वरूपपरः । ब्रह्मादिशब्दस्येव अव्याकृतशब्दस्य ब्रह्मस्वरूपे रूढ्यभावात् । न व्याकृतमव्याकृतं न नामरूपव्याकरणकर्म भवतीति हि अव्याकृतशब्दः योगेनार्थबोधकः इति न रूढः । तन्नामरूपाभ्यां व्याक्रियत इति व्याकृतशब्दस्य यौगिकत्वाविष्करणात् । ततश्च इदं परिदृश्यमानं जगत् प्रलयकाले नामरूपविभागरहितमासीत् इति अर्थः । तेन इदमर्थस्य जगतः प्रलयकाले नामरूपविभागनिवृत्तिः अव्याकृतशब्देनोच्यते । इदंशब्दार्थः प्रत्यक्षसिद्धः चिदचिदात्मकः प्रपञ्चः । स एव प्रलयकाले सूक्ष्मावस्थाप्राप्त्या व्यष्टिनामरूपविकाररहित इत्युक्तं भवति । एवं स्थिते प्रलयदशायामपि सूक्ष्मयोश्चिदचिद्वस्तुनोः सद्भावः उक्तो भवति । तथापि तत्र ब्रह्मणः का प्रसक्तिः इति चेत् - उच्यते ।'' तमः परे देव एकीभवति'' इति श्रुत्यन्तरे सूक्ष्मप्रकृतेस्तदा परमात्मनि लय उच्यते । लयो नामापृथग्भावेनावस्थानम् । अपि च तस्य तमसः ''यस्य तमः शरीरम्'' इति वाक्येन परमात्मशरीरत्वावगमात् ''ब्रह्म वा इदमग्र आसीत्'' इत्यादिकारणवाक्यान्तरेषु तदानीं ब्रह्मावस्थानप्रतीतेश्च अव्याकृतचिदचिच्छरीरकब्रह्मपरः अव्याकृतशब्द इति निर्णीयते ।

ननु किमनेन श्रमेण, अव्याकृतशब्देनाव्यक्तं प्रधानमेव तत्र निर्दिश्यताम् । कर्मकर्तरि लकारात् तदेव स्वयं व्यष्टिनामरूपाभ्यां व्याक्रियतेत्येव वाक्यार्थोऽस्तु इति वाच्यम् । उपरि अव्याकृतमनूद्य'' स एष इह प्रविष्ट आनखाग्रेभ्यः'' इति इहाब्दनिर्दिष्टे चेतनाचेतनात्मक-

चेत्–'तम एकीभवति इत्यादिप्रतिपन्नस्य सूक्ष्मतमसोऽपि, 'यस्य तमः शरीरम्' इत्यादिभिः ब्रह्मशरीरत्वप्रतीतेः कारणवाक्यान्तरेषु ब्रह्मावस्थानपतीतेश्च

प्रपञ्चे अनुप्रवेशरूपव्याप्तेः उच्यमानायाः अव्यक्तेऽसंभवात् । तथा ''प्राणन्नेव प्राणो भवति वदन् वाक् पश्यंश्चक्षुः शृण्वन् श्रोत्रं मन्वानो मनः'' इत्याद्युक्तचेतनधर्माणां परमात्मन्येव संभवाच्च । अतोऽव्याकृतचिदचिच्छरीरकं ब्रह्मैवाव्याकृतशब्देनोच्यते । तदेन जगत्कारणम्। अतो विशिष्टस्य ब्रह्मण उपादानत्वे'' तद्धेदं तर्ह्यव्याकृतमासीत्'' इति श्रुतिः प्रमाणमिति घट्टार्थः ।

तम एकीभवतीति । तमसः शरीरत्वोक्तिः तद्वाचकाव्याकृतशब्दस्य ब्रह्मपरत्वसंभवद्योतनार्था । **कारणवाक्यान्तरेष्विति** । ''ब्रह्म वा इदमेक एवाग्र आसीत्'' इति वाक्येन ब्रह्मणोऽप्ययस्थानत्वेनावस्थानप्रतीतेरित्यर्थः । ततश्च वाक्यद्वयेन अव्याकृतब्रह्मणोरुभयोरपि लयस्थानत्वप्रतीतेः अव्याकृतस्य ब्रह्मशरीरतया अव्याकृतशब्दस्य ब्रह्मपर्यन्ताभिधानसामर्थ्याच्चाव्याकृतशब्दस्य विशिष्टपरत्वात् । ततश्च ''तद्धेदं तर्ह्यव्याकृतमासीत्'' इति श्रुतिः विशिष्टोपादानत्वे मानमिति सिद्धम् । इति **चण्डमारुतम्** ।

न चैवमपि अव्याकृतशब्दस्याव्यक्तपरत्वात् अव्यक्तशरीरकस्य ब्रह्मणः कारणत्वे सिद्धेऽपि चिच्छरीरकस्य ब्रह्मणः कारणत्वं नानेन वाक्येन सिध्यतीति वाच्यम् । अत्रत्याव्याकृतशब्दस्य चिदचिदुभयपरत्वात् । उभयपरेदंशब्दसमानाधिकरणत्वात् तस्य । अत एव मूले ''योगविवक्षायाः स्पष्टत्वाच्च । अत इदमर्थस्यैव प्रलयकाले नामरूपनिवृत्तिमात्रं विवक्षितम् । इदमर्थश्चिदचिदात्मकः प्रत्यक्षसिद्धः'' इत्यनुगृहीतम् ।

तथा चायमत्र वाक्यार्थः - इदमित्यस्य चेतनाचेतनमिथुनरूपं जगदित्यर्थः । तस्याभेदेनाव्याकृतेऽन्वयः । तदित्यस्य ''आत्मैवेदमग्र आसीत्'' इति पूर्वप्रस्तुतः आत्मा (परमात्मा) अर्थः । इदम् अव्याकृतम् इत्यनुसारेण तदिति नपुंसकनिर्देशः । पूर्वोक्त आत्मा जगदभिन्नाव्याकृतशरीरक आसीत् । स एव नामरूपाभ्यां व्याक्रियत

अव्याकृतशब्द एवाव्याकृतचिदचिद्विशिष्टब्रह्मपर इति निश्चीयते। एवम्, ‘असद्वा इदमग्र आसीत्’, ‘असदेवेदमग्र आसीत्’ इत्यत्राप्यसच्छब्देन स्थूलाकारप्रध्वंसायमानसूक्ष्माकारविशिष्टचिदचिच्छरीरकं ब्रह्माभिधीयते; न तु केवलं ब्रह्म; असत्त्वविरोधात्। नापि प्रागभावमात्रम्, ‘तदसदेव सन्मनोऽकुरुत स्यामिति’,

व्याकृतनामरूपजगच्छरीरक आसीदिति। अस्मिन् संदर्भे “तत्राप्यव्याकृतशब्देनाव्याकृतशरीरं ब्रह्मैवाभिधीयते।” स एष इह प्रविष्ट आनखाग्रेभ्य: पश्यंश्चक्षु...” इत्यत्र स एष इति तच्छब्देन अव्याकृतशब्दनिर्दिष्टस्य अन्त:प्रविश्य प्रशासिनृत्वेनानुकर्षात्” तत् सृष्ट्वा तदेवानुप्राविशात्” “अनेन जीवेनात्मनानुप्रविश्य नामरूपे व्याकरवाणि” इति स्रष्टु: सर्वज्ञस्य परस्य ब्रह्मण: कार्यानुप्रवेशनामरूपव्याकरणप्रसिद्धेश्च। “अन्त:प्रविष्ट: शास्ता जनानां सर्वात्मा” इति नियमनार्थत्वादनुप्रवेशस्य प्रधानस्याचेतनस्य एवंरूपोऽनुप्रवेशो न संभवति। अत: अव्याकृतम् अव्याकृतशरीरं ब्रह्म “तन्नामरूपाभ्यां व्याक्रियत” इति तदेवाविभक्तनामरूपं ब्रह्म सर्वज्ञं सत्यसंकल्पं स्वेनैव विभक्तनामरूपं स्वयमेव व्याक्रियतेत्युच्यते” इति श्रीभाष्यग्रन्थोऽनुसन्धेय:।

एतावता विशिष्टस्योपादानत्वं श्रौतमित्युपपादितम्। अथ श्रुतार्थापत्त्यादिना काल्पितमित्युपपादयितुमारभते - **एवमित्यादिना**। असद्वा इदमग्र आसीत्। असदेवेदमग्र आसीत् इत्यत्र असच्छब्देन केवलं ब्रह्म नाभिधीयते। तस्य असत्त्वासंभवात्। अग्रे असत् इत्यन्वयात् प्रागभावोऽभिधीयत इत्यपि न वाच्यम्। “तदसदेव सन्मनोऽकुरुत स्यामिति” इति वाक्यशेषोक्तस्य मनस्कारस्य “तदात्मानं स्वयमकुरुत” इत्युक्तकृतेश्च प्रागभावेऽसंभवात्। अपि तु स्थूलाकारप्रध्वंसरूपा या सूक्ष्मावस्था तद्विशिष्टचिदचिच्छरीरकं ब्रह्मोच्यते इति भाव:। **असच्छब्देनेति**। “असद्वा इदमग्र आसीत्” इति वाक्यस्य लयपरत्वात् स्थूलाकारप्रध्वंसायमानेत्युक्तम्। ननु “इदमग्रे असदासीत्” इति प्रागभावमात्रं प्रतीयते न ब्रह्मेत्यत्राह - **नापीति**। एतेन सूक्ष्मावस्थचिदचिन्मात्रमुच्यत इत्यपि निरस्तम्।

‘तदात्मानं स्वयमकुरुत’ इत्यादिवाक्यशेषविरोधात्। सूत्रितं च, ‘असद्व्यपदेशान्नेति चेन्न धर्मान्तरेण वाक्यशेषात् युक्तेः शब्दान्तराच्च’इति। अत एव, ‘तदात्मानँ स्वपमकुरुत’ इत्यत्रापि नात्मशब्दो ब्रह्मस्वरूपमात्रविषयः, (पूर्वं) असच्छब्द-निर्दिष्टसूक्ष्मद्रव्यविशिष्टविषयत्वात्। यथा खल्वव्यतिरेकविवक्षया विशेष्ये स्वशब्दपर्यायोऽयमात्मशब्दः, तथा धर्मविशिष्टेऽपि विशिष्टाव्यतिरेकविवक्षया तत्प्रयोगो युज्यते। अत एव हि शरीरविषयेऽप्यात्मानमवलोकयतीत्यादिरभियुक्तानां

तस्य मनस्कारासंभवात्। मनस्कारः संकल्पः। असद्व्यपदेशादित्यादिसूत्रस्यायमर्थः- ‘‘असद्वा इदमग्र आसीत्’’ इति कार्यस्य प्रागसत्त्वव्यपदेशात् कार्यकारणयोरनन्यत्वं नेति चेन्न। पूर्वं सत एव कार्यस्वरूपस्य स्थूलावस्थाविरोधिसूक्ष्मावस्थारूपधर्मान्तरेण योगात् असत्त्वव्यपदेशः। कुत इदमवगम्यते। ‘‘तदसदेव सन्मनोऽकुरुत स्यामिति’’ ‘‘तदात्मानं स्वयमकुरुत’’ इति वाक्यशेषात्, युक्तेः, पिण्डावस्थायां घटो नास्तीति व्यवहारस्य पिण्डावस्थाविषयस्य दर्शनात्, शब्दान्तरात्’’ तदेव सोम्येदमग्र आसीत्’’ इति शब्दान्तराच्चेति।

अत एवेति। उक्तवक्ष्यमाणहेतोरेवेत्यर्थः। ‘‘तदात्मानं स्वयमकुरुत’’ इत्यत्र तच्छब्दः पूर्वप्रकृतासत्परामर्शी। असच्छब्दश्च सूक्ष्माकारविशिष्टचिदच्छरीरकब्रह्मपर इति पूर्वमुक्तत्वात् सूक्ष्मचिदचिच्छरीरकं ब्रह्मेति तच्छब्दार्थः। आत्मशब्दः स्ववाचीति स्वं स्थूचिदचिद्विशिष्टमकुरुतेति वाक्यार्थः। स्वरूपशब्दवत् आत्मशब्दस्य विशेष्यपरत्वं स्वरसमित्यत्राह - **यथा खल्विति**। अव्यतिरेकविवक्षया=अभेदविवक्षया। यथा विशिष्टं शुद्धान्नातिरिच्यत इति न्यायात् विशिष्टवाचकस्यात्मशब्दस्य विशेष्यपरतया प्रयोगः, तथा विशिष्टेऽपि विशिष्टाभेदविवक्षया स्वपर्यायस्यात्मशब्दस्य प्रयोग उपपद्यते इत्यर्थः। अत एव हि विशिष्टवाचकस्यात्मशब्दस्य=स्वशब्दस्य विशेषणपरतयपि प्रयोगो दृश्यते - यथा चैत्र आत्मानमवलोकयतीत्यत्र आत्मपदं स्वपरं चैत्रदेहविशिष्टात्मवाच्यपि अवलोकनकर्मत्वस्य विशेष्ये आत्मनि बाधात् विशेषणदेहपरम्। किमुत विशेष्यपरत्वेन विशिष्टपरत्वेन वा प्रयोगसाधुत्वे वक्तव्यमस्तीति भावः। **अत एव हीति**। अत्र वाक्ये अवलोकयतीत्यनेन

प्रयोगः । न चात्र भ्रमो निदानम्; परिशुद्धात्मवेदिभिरपि तथा प्रयोगात् । न च त(अ)त्रोपचारः, निमितैक्ये संभवति तत्कल्पनानुपपत्तेः ।

अस्तु वा ब्रह्मस्वरूपवाची तत्राऽऽत्मशब्दः, तथापि वैशिष्ट्यं दुस्त्यजम्, यथा भगवान् श्वेतः इत्यत्र विग्रहद्वारा सिध्यति, तथाऽत्रापि, 'अकुरुत' इत्यादिसामर्थ्याच्छरीरद्वारेति सिध्यत्येव । अतः, 'ब्रह्म वनम्' इत्यादिनोपादानत्वोद्दे(पदे)शोऽपि विशिष्टविषयः । मृतत्कार्यदृष्टान्तादिकं च विशिष्ट-

---

चाक्षुषज्ञानविषयत्वं गम्यते । तच्छरीरस्यैव साक्षादिति तद्द्वारैव शरीरिण: अवलोकनविषयत्वम् । अत: अवलोकनकर्तृपरामर्शी आत्मशब्द: विशिष्टपर एवेति भाव: । **शरीरविषयेऽपीति** । विशेषणीभूतशरीरविषयेऽपीत्यर्थ: । ननु चैत्र आत्मानमवलोकयतीति प्रयोग: शरीरात्मभ्रमनिमित्तक इत्याशङ्क्य शरीरातिरिक्त आत्मेति जानद्भिरपि तथा प्रयोगात् न भ्रम: तादृशप्रयोगस्य निदानमिति परिहरति-**नचात्र भ्रम इति** । ननु ''तदान्मानं स्वयमकुरुत'' इत्यत्र स्वरूपमात्रवाचकस्य विशिष्टे लक्षणेति शङ्कते - **न चतत्रेति** । पूर्वोक्तरीत्या अव्यतिरेकरूपनिमित्तैक्येन विशेष्य इव विशिष्टे मुख्यत्वे संभवति उपचारकल्पनस्यायुक्त-त्वादिति समाधत्ते - **निमित्तैक्य इति** । विशेष्यपरत्वे विशिष्टपरत्वे च अव्यतिरेकरूपं निमित्तमेकमिति भाव: ।

अस्तु वेत्यादि । ''तदात्मानं स्वयमकुरुत'' इत्यत्र आत्मशब्द: ब्रह्मस्वरूपवाची भवतु । तथापि ब्रह्मण: चिदचिद्वैशिष्ट्यं दुस्त्यजम् । यथा भगवान् श्वेत: इत्यत्र विग्रहद्वारा श्वेतत्वं भगवत: सिध्यति, तथा अत्रापि अकुरुत इति सृष्टिवचनस्य स्वरूपेऽसंभवात् शरीरद्वारकसृष्टिरेव आत्मनि अभिप्रेतेति वक्तव्यम् । तथा च चिदचिच्छरीरकत्वं सृष्टे: प्राक् सिध्यतीति भाव: । **अत इति** । ब्रह्मण: विशिष्टवेषेण उपादानतया उपादानत्वविधिवाक्यसिद्धत्वात् ''ब्रह्म वनम्'' इत्यादिवाक्ये विधेयमुपादानत्वं प्रति उद्देश्यतया निर्दिश्यमानं ब्रह्मापि सूक्ष्मचिदचिद्विशिष्टमिति भाव: । ननु ''यथा सोम्यैकेन मृत्पिण्डेन'' इत्यादिना साक्षादवस्थाश्रयमृदाद्युक्त्या दार्ष्टान्तिकेऽपि साक्षादवस्थश्रयत्वेनैव ब्रह्मण: उपादानत्वं प्रतीयते । तत् कथं निशिष्टस्य ब्रह्मण उपादानत्वसिद्धिरित्यत्राह-**मृत्तत्कार्येति** ।

प्रदर्शनार्थमेवेति न ततोऽपि विरोधः। एवं च सति ब्रह्मस्वरूपवाचिब्रह्मात्मादिशब्दैः कारणनिर्देशेऽपि निर्विकारश्रुत्यन्यथानुपपत्त्या विशिष्टस्योपादानत्वं कल्प्यताम्। यद्वा वाक्यशेषशाखान्तरादिसिद्धानुप्रवेश-सर्वशरीरत्वादिवशेनात्रापि इदमिति निर्दिष्टस्य अग्र इति निर्दिश्यमानकालविशेषोपलक्षितसूक्ष्मावस्थस्य तदानीम-

---

दृष्टान्तवाक्यं विशिष्टस्य उपादानत्वमुपपादयितुं लोकप्रसिद्धमुपादानमाह। नैतावता दार्ष्टान्तिके ब्रह्मणि साक्षाद्विकाराश्रयत्वप्रसङ्गः। तदंशे दृष्टान्तविवक्षाविरहात्। एकविज्ञानेन सर्वविज्ञानप्रसिद्ध्यर्थमुपादानोपादेयभावेनैक्यमात्रं हि दृष्टान्तेन साध्यत इति भावः। उपक्रान्तामर्थापत्तिं प्रदर्शयति **एवं च सतीति**। पूर्वोक्तरीत्या विशिष्टस्योपादानत्वे सिद्धे सति ब्रह्मस्वरूपवाचिसद्ब्रह्मात्मादिशब्दैः कारणनिर्देशेऽपि श्रूयमाणस्य निर्विकारत्वस्यानुपपत्त्या चिदचिद्विशिष्टस्यैवोपादानत्वं कल्प्यतामित्यर्थः।

अत्रायं निष्कर्षः – ''ब्रह्म वा इदमग्र आसीत्'' इति श्रुत्या कृत्स्नस्यापि कार्यवर्गस्य ब्रह्मभावः प्रतीयते। अग्र इत्युक्त्या अयं ब्रह्मभावोपदेशः न स्वतः सिद्धशरीरात्मभावनिबन्धनः, किं तूपादानोपादेयभावनिबन्धन इत्यवगम्यते। स्वरूपेण चोपादानत्वं निर्विकारत्वश्रुतिविरुद्धम्। अतोऽद्वारकसाधनत्वस्य सद्वारकसाधनत्वस्य च लोके दर्शनात् साक्षात्साधनत्वस्यासंभवेन यागस्य श्रूयमाणस्वर्गसाधनत्वान्यथानुपपत्त्या अपूर्वद्वारकसाधनत्ववत् ब्रह्मण उपादानत्वस्यापि चिदचिद्द्वारकत्वं कल्प्यते। अद्वारकाश्रयत्वस्य सद्वारकाश्रयत्वस्य च लोके दर्शनात् अवस्थाश्रयत्वं सद्वारकं कल्पयित्वा उपादानत्वं निरुह्यते। देवतत्तधृतघटाश्रितस्योदकस्य देवदत्तोऽप्याश्रय एव। अन्यथा जलरहितघटधारणापेक्षया जलसहितघटधारणेऽनूभूयमानः श्रमो न स्यात्। एवं सद्वारकाश्रयत्वं प्रासादे खड्वायां शेते इत्यादौ प्रसिद्धमेव। एवं च श्रूयमाणं ब्रह्मभावसहितं निर्विकारत्वम् अन्यथानुपपद्यमानं विशिष्टब्रह्मण उपादानत्वकल्पकमिति। शब्दानां विशिष्टवाचित्वमपरिशीलितवद्भिरप्यभ्युपेयं प्रकारमाह– **यद्वेति**। वाक्यशेषः ''अनेन जीवेनानुप्रविश्य नामरूपे व्याकरवाणि'' इति। शाखान्तरम् ''ब्रह्म वा इदमग्रे'' इत्यादिवाक्यम् अन्तर्यामिब्राह्मणा-

ब्रह्मात्मकत्वप्रतिक्षेपाय ब्रह्मात्मकत्वप्रतिपत्तये ब्रह्मादिशब्दसमानाधिकरणनिर्देश इति सिध्यतीति न स्वरूपपरिणामवादस्य विवर्तवादस्य वा कश्चिदवकाशो दृश्यते ।

दि वा वाक्यशेषेण शाखान्तरादिना च सिद्धं यत् सृज्यमानजगदनुप्रवेशः सर्वशरीरकत्वमित्यादि तद्वशेनेत्यर्थः । अस्य उपरितनसूक्ष्मावस्थस्येत्यनेनान्वयः । ''सदेवेदमग्र आसीत्'' इति वाक्ये ''ब्रह्म वा इद''मिति वाक्ये वा इदमिति निर्दिष्टस्य जगतः अग्रे इति निर्दिश्यमानो यः कालनिशेषः तदुपलक्षिता या सूक्ष्मावस्था तद्विशिष्टस्य ब्रह्मशब्दसमानाधिकरणतया निर्देशः तदानीमब्रह्मात्मकत्वप्रतिक्षेपार्थ इति स्वरूपपरिणामवादस्य विवर्तवादस्य वा नावकाश इत्यर्थः ।

एतदुक्तं भवति - ''इदमग्रे एकं सदासीत्'' इत्यनेन इदंशब्दनिर्दिष्टस्य स्थूलावस्थारहितब्रह्मभावः प्रतीयते । बहु स्यामिति वक्ष्यमाणबहुशब्दप्रतिसंबन्धिनः एकशब्दस्य स्थूलावस्थाप्रहाणार्थकत्वात् । स्थूलावस्थाश्रयत्वस्य च साक्षात् परंपरया च संभवस्य पूर्वमुपपादितत्वात् तत्प्रहाणमपि साक्षात्परंपरासाधारणम् । तत्र ब्रह्मणः किं साक्षात् स्थूलावस्थाप्रहाणं परंपरया वा इति जिज्ञासायां ''अनेन जीवेनानुप्रविश्य'' इति तेजःप्रभृतिकार्येष्वनुप्रवेशस्य श्रवणात् अनुप्रवेश्यतेजःप्रभृतेः अनुप्रवेष्टृब्रह्मापेक्षया भेदस्यावश्यंभावात् कार्यस्य तेजआदेः अग्रकाले ब्रह्मातिरिक्तं सूक्ष्मावस्थात्मकरूपान्तरं लब्धमिति तदेव उपस्थितत्वात् अपेक्षितत्वाच्च ब्रह्मविशेषणत्वेन स्वीक्रियते । ''ब्रह्म वा इदमग्र आसीत्'' इति शाखान्तरे तु तेजः प्रभृतिसूक्ष्मावस्थारूपस्य तमसः ''यस्य तमः शरीरम्'' इति श्रुत्या ब्रह्मशरीरत्वप्रतीतेः शरीरत्वेन तदतिरिक्तत्वात् तदेव द्वारतया उपादानभूतब्रह्मविशेषणत्वेन स्वीक्रियते । एवं न्यायात् विशेषणलाभः । एवं च ब्रह्मशब्दसमानाधिकरणतया इदंशब्दस्य निर्देशः न ब्रह्मस्वरूपपरिणामप्रतिपादनार्थः । अपि तु कारणस्य स्थूलावस्थाप्रहाणाश्रयस्य अब्रह्मात्मकत्वप्रतिक्षेपार्थः । इदंशब्दस्य ब्रह्मपर्यन्तत्वात् सामानाधिकरण्योपपत्तिः इति ।

यदपि पूर्वपक्षिणा समस्तभेदरहितस्यैकस्यैव कारणवाक्येऽवधारणात् तद्विरोधि-

यत्तु समस्तभेदरहितस्यैकस्यैव कारणवाक्ये अवधारणात् तद्विरुद्धं विशेषणकल्पनमित्यादि; तदपि स्वपक्षमपरामृश्योक्तम्, प्रलयदशायामपि अविद्यायाः सूक्ष्मोपाधेः शक्तेर्वा ब्रह्मसम्ब(ह्मानुब)न्धित्वेन त्वया त्वदासन्नैश्च स्वीकारात्। वयं तु वाक्यान्तरानुसारेण, निर्विकारनिरवद्यश्रुतिविरोधपरिहारार्थं च प्रपञ्चोपादानभूतब्रह्मविशेषणं तच्छरीर(भूत)मित्यनुमन्यामह इति विशेषः ॥ अविद्यामिथ्यात्वपक्षे अवधारणमसङ्कुचितमिति चेन्न; अग्र इत्यादिवैयर्थ्यस्य सद्विद्यानिरूपणे स्थापनात्।

विशेषणकल्पनं वाक्यतात्पर्यविरुद्धमिति, तदनूद्य दूषयति - **यत्तु इत्यादिना। तदपीत्यत्र** अपिः अवधारणार्थः अपरामृश्येत्यनन्तरमन्वेति । स्वपक्षमपरामृश्यैवोक्तमित्यर्थः । मतान्तरेऽपि हि प्रलयदशायां अविद्याविशिष्टं वा सूक्ष्मोपाधिविशिष्टं वा शक्तिविशिष्टं वा ब्रह्म स्वीकृत्य विशिष्टस्यैव ब्रह्मण उपादानत्वमुक्तम् । अविद्याविशिष्टमिति शंकरमते, सूक्ष्मोपाधिविशिष्टमिति भास्करमते शक्तिविशिष्टमिति यादवप्रकाशमते। एवं च तेषां मतेऽपि ब्रह्मातिरिक्तस्याविद्यादेः प्रलयदशायां सत्त्वात् एकमेवेति श्रुतेः तदतिरिक्तविषयकतया संकोचः आवश्यकः । तथा च एकमेवेत्यवधारणविरुद्धाविद्यादिविशेषणकल्पनं परेषामप्यविशिष्टमिति भावः ।

ननु सर्वमतेऽपि एकमेवेत्यवधारणसंकोचस्यावाश्यकत्वे पराभिहिताविद्यादिविशेषणमेव कुतो नाद्रियत इत्याशङ्कायामाह - **वयं त्विति**। वाक्यान्तरे कृत्स्नस्य ब्रह्मशरीरत्वावगमात् शरीरतया सिद्धस्यैव ब्रह्मविशेषणत्वमस्माभिरङ्गीक्रियते। अविद्यारूपविशेषणाङ्गीकारे ब्रह्मणः सविकारत्वप्रसङ्गः, सावद्यत्वप्रसङ्गात् । शक्त्यङ्गीकारे ब्रह्माभिन्नोपाध्यङ्गीकारे च ब्रह्मणः सविकारत्वप्रसङ्गः, शक्तिविशिष्टे उपाधिविशिष्टे च ब्रह्मण्येव विकाराङ्गीकारात् । अस्मद्रीत्या शरीरस्य विशेषणत्वाङ्गीकारे च न सावद्यत्वम्। विकारस्य शरीरगतत्वेन ब्रह्मस्वरूपगतत्वाभावादिति भावः। ननु अविद्यायाः मिथ्यात्वपक्षे एकमेवेत्यवधारणमसंकुचितमिति शङ्कते-**अविद्येति**। परिहरति-**अग्रे इति**। सर्वदा ब्रह्मण एकस्यैव सद्भावात् इदानीमप्येकमेवेत्यवधारणसंभवात्

किंच, ब्रह्मात्मादिशब्देषु स्वरूपपरेष्वपि वैशिष्ट्यलाभो दर्शितः। सच्छब्दं तु विमृशामः-इदमग्रे सदेवासीदिति इदमर्थ(स्य)सत्ताविधिपरे वाक्ये न तावत् सच्छब्देन ब्रह्मस्वरूपमात्रं प्रतिपाद्यम्; अनन्तरवाक्यविरोधात्; अनन्तरमेव हि, 'तद्धैक आहुः असदेवेदमग्र आसीदिति। कुतस्तु खलु सोम्यैवं स्यात्....कथमसतः सज्जायेत इति। सत्त्वेव सोम्येदमग्र आसीत्' इत्युच्यते। अत्र हि कार्यद्रव्यस्य

अग्रे इति विशेषणस्य वैयर्थ्यमिति भावः। आदिपदेन एवकारस्य अद्वितीयपदस्य च वैयर्थ्यं गृह्यते।

किं चेत्यादि। एतावता ब्रह्म आत्मा इत्यादिभिः ब्रह्मस्वरूपपरैः शब्दैः यत्र जगत्कारणं निर्दिश्यते तत्रापि ब्रह्मात्मादिशब्दानां सूक्ष्मचिदचिद्विशिष्टब्रह्मपरत्वमुपपादितम्। अथ चेतनाचेतनसाधारणसच्छब्देन ''सदेन सोम्येदमग्र आसीत्'' इति वाक्ये विशिष्टब्रह्मलाभप्रकारं वक्तुमारभते – **सच्छब्दं तु इति**। ''सदेव सोम्येदमग्र आसीत्'' इत्यस्य हि इदमर्थः प्रलयदशायां सत् इत्यर्थः। सत् इत्यस्य यदि ब्रह्मस्वरूपमित्यर्थः तदा इदं जगत् सत् ब्रह्मात्मकम् इति वाक्यार्थो भवेत्। तथा सति उपरितनवाक्यविरोधः। उपरिहि'' तद्धैक आहुरसदेवेदमग्र आसीत्'' इति श्रूयते। अनेन वाक्येन प्रलयदशायां कार्यस्य अविद्यमानत्वपक्षः प्रस्तूयते। तदनन्तरं च'' कुतस्तु खलु सोम्यैवं स्यात्... कथमसतः सज्जायेतेति सत्त्वेव सोम्येदमग्र आसीत्'' इत्युच्यते। अनेन कार्यद्रव्यस्य पूर्वमविद्यमानत्वपक्षः प्रतिक्षिप्यते। सच्छब्दस्य ब्रह्मस्वरूपपरत्वे तु उपरि अब्रह्मात्मकत्वपक्षमनूद्य स एव प्रतिक्षेप्यः स्यात्। न चेष्टापत्तिः। तथा सति ''कथमसतः सज्जायेत'' इति व्याप्तिप्रदर्शनायोगात्। यत् सदात्मकं तत् सत एव जायत इति व्याप्त्यभिप्रायेण हि तद्वाक्यम्। सा च व्याप्तिः मृद्घटादौ दृश्यते। न च ''कथमसतः सज्जायेते''त्यस्य अब्रह्मणः ब्रह्मात्मकं कथं जायेतेत्यर्थः। अतो नानुपपत्तिरिति वाच्यम्। तथा सति ब्रह्मात्मकमिदं जगत् ब्रह्मण एव जायेतेति व्याप्तिप्रदर्शनमिति वक्तव्यम्। तादृशी

पूर्वमविद्यमानत्वपक्षः प्रतिक्षिप्यते; न पुनरब्रह्मात्मकत्वपक्षः तथा सति, 'कथमसतः सज्जायेत' इति लोकदृष्ट्या व्याप्तिप्रदर्शनायोगात्(गाच्च)। अतः, 'सदेव' इत्यत्र वाक्ये प्रपञ्चस्यैव 'बहु स्याम्' इति वक्ष्यमाणबहुत्वावच्छिन्नसत्ताप्रतिपक्षभूतैकत्वावच्छिन्नसत्तायोग एव प्रतिपाद्यते। अतो ब्रह्मैवात्र मृग्यम्; न तु सुक्ष्मचिदचिद्वस्तुसद्भावः। ननु सच्छब्दनिर्दिष्टस्यैव, बहु स्यामिति, तदैक्षत बहु स्यामिति बहुभवनसङ्कल्परूपेक्षणश्रवणात्, (तस्य?) अचेतने, प्रतिसंहृतकरणग्रामे चेतनेऽप्ययोगात्, उत्तरत्र सर्वत्र 'सन्मूलाः सोम्येमाः सर्वाः प्रजाः सदायतनाः सत्प्रतिष्ठाः', 'सता सोम्य तदा संपन्नो भवति, सति संपद्य न विदुः' इत्यादिषु

च व्याप्तिः लोके न दृश्यते। तस्मात् ''सदेव'' इत्यत्र ''बहु स्याम्'' इति प्रपञ्चस्य वक्ष्यमाणा या बहुत्वविशिष्टसत्ता तत्प्रतिपक्षभूता या एकत्वविशिष्टा सत्ता तद्योगः प्रपञ्चस्य प्रतिपाद्यते। अतोऽत्र वाक्ये ब्रह्मैव मृग्यं=ब्रह्मण एव प्रसक्तिर्नास्ति, किं पुनः सूक्ष्मचिदचिद्विशिष्टवस्तुसद्भावस्येति समुदायार्थः।

ननु ब्रह्म न मृग्यम्, वक्ष्यमाणेक्षणादिना तस्यैव स्पष्टं प्रतीतेरित्याक्षिपति - **ननु सच्छब्देति**। अचेतने इत्यतः प्राक् तस्येति पूरणीयम्। तस्य बहुभवनसंकल्परूपेक्षणस्य अचेंतने असंभवात् प्रलीनव्यापारेन्द्रिययुक्ते चेतने चासंभवादित्यर्थः। **उत्तरत्रेत्यादि**। ''सन्मूला'' इत्यादिषु सच्छब्दस्य विशेष्यं किमपि न प्रयुक्तम्। अतो विशेष्याकाङ्क्षायां अध्याहृतविशेष्येणान्वये समासाघटकपदसापेक्षत्वेनासमर्थत्वात् सन्मूला इति समासो न स्यादिति समासबलादेव सच्छब्दस्य नामधेयत्वमवगम्यते। एवं बहुत्वावच्छिन्नसत्ताप्रतिपक्षभूता या एकत्वावच्छिन्नसत्ता तदाश्रयत्वस्य ''एकमासीत्'' इति क्रियापदेन प्रतिपादितत्वात् ''सन्मूला'' इत्यादिष्विव ''सदेव'' इत्यत्रापि सच्छब्दः तत्कालिकेक्षणकर्तुः ब्रह्मण एव नाम। न च तदसाधारणप्रवृत्तिनिमित्तासंभव इति वाच्यम्। निरुपाधिकसत्तायोगस्य प्रवृत्तिनिमित्तत्वात्। एवं ''सता सोम्य'' ''सति संपद्य'' इत्यादिषु बहुवारं नामधेयतया प्रयोगाच्च ''सदेव सोम्य'' इत्यत्रापि सच्छब्देन निरुपाधिकसत्ता-विशिष्टब्रह्म-

सच्छब्दस्य नामवत्प्रयोगाच्च 'सदेव सोम्य' इत्यत्रापि सच्छब्देनानवच्छिन्नसत्ताविशिष्टब्रह्मस्वरूपमेव विवक्षितमिति चेत्–सत्यम्, तथापि पूर्वोक्तानुपपत्त्या स्वरूपमात्रविषयत्वासंभवे, अनुपपत्त्यन्तरेण (च) ब्रह्मस्वरूपपरत्वे चावश्यंभाविनि अगत्या श्रुत्यर्थापत्तिबलेन सूक्ष्मचिदचिद्वैशिष्ट्यव्यवहितसत्ता

स्वरूपमेव विवक्षितम् इत्याक्षेपः । **नामवदिति** । नामार्हतीति नामवत् । ''तदर्हम्'' इति सूत्रेण वतिः । नामत्वानुरूपमित्यर्थः । **अनवच्छिन्नसत्तेति** । निरुपाधिकसत्तेत्यर्थः ।

उक्तमाक्षेपमर्धाङ्गीकारेण परिहरति - **सत्यमिति** । सच्छब्दस्य ब्रह्मपरत्वमङ्गीकृतम्। स्वरूपमेव विवक्षितमिति अवधारणलभ्ये चिदचिद्वैशिष्ट्याभावेऽनङ्गीकारः । **पूर्वोक्तानुपपत्त्येति** । लोकदृष्टव्याप्तिप्रदर्शनायोगात् इत्यनुपपत्त्येत्यर्थः । **अनुपपत्त्यन्तरेणेति** । ईक्षणनामधेयाभ्यामित्यर्थः । लोकदृष्टव्याप्तिप्रदर्शनायोगरूपानुपपत्त्या ब्रह्मस्वरूपमात्रपरत्वं न संभवति । ईक्षणनामधेयाभ्यां ब्रह्मस्वरूपपरत्वं चावश्यकम् । तस्मात् उभयविधानुपपत्तिपरिहाराय अगत्या उक्तानुपपत्तिद्वयरूपश्रुतार्थापत्तिवलेन सूक्ष्मचिदचिद्द्वारकसत्तावच्छन्नं ब्रह्म ''सदेव'' इत्यत्र सत्पदेन प्रतिपाद्यत इत्यर्थः । **अगत्येति** । निर्विकारत्वश्रुत्यनुपपत्त्या विशेषणविशिष्टपरत्वमावश्यकम् । लोकदृष्ट्या व्याप्तिप्रदर्शनार्थं च सत्त्वपुरस्कारेण शब्दप्रवृत्तिर्वाच्या । एवं च साक्षात् सत्त्वरूपेणाभिधाने चिदचिद्विशेषणविशिष्टप्रतिपादनासंभवात् अगत्या चिदचिद्द्वारा सत्ताविशिष्टं ब्रह्म सदिति शब्देन प्रतिपाद्यत इति भावः । **चिदचिद्वैशिष्ट्येति** । सूक्ष्मचिदचिद्वैशिष्ट्येन हेतुना व्यवहिता चिदचिद्गतत्वात् व्यवहिता साक्षादवृत्तिः या सत्ता तदवच्छिन्नं स्वाश्रयाश्रयत्वसंबन्धेन सत्ताविशिष्टं ब्रह्मात्र सत्पदेन प्रतिपाद्यतया निश्चीयत इत्यर्थः ।

ननु सच्छब्दस्य अस्तीति सत् इति योगशक्त्या सत्तावदर्थकत्वे विशेष्यसापेक्षतया सन्मूला इत्यादौ समासो न स्यादिति शङ्कायाः किं समाधानमिति चेत् - उच्यते । यौगिकस्य शब्दस्य विशेष्यसाकाङ्क्षत्वमिति नास्ति नियमः । ''प्रोक्षणीरासादय'' इत्यादौ प्रोक्षणीशब्दस्य प्रकृष्टोक्षणसाधनवाचकतया यौगिकत्वेऽपि अप्स्वेव शास्त्रस्थानां

(त्त्वा)वच्छिन्नं ब्रह्मात्र सदिति प्रतिपाद्यत इति निश्चीयते। तथा सति, 'तद्धेदं तर्ह्यव्याकृतमासीत् तन्नामरूपाभ्यां व्याक्रियत', 'आत्मा वा इदमेक एवाग्र आसीत्' इत्यादिश्रुतिभिरपि सङ्गतिः सिध्यति।

अस्तु वा, 'सदेव सोम्येदमग्र आसीत्' इत्यत्र सच्छब्देन ब्रह्मस्वरूपनिर्देशः– तथापि, 'तद्धैक आहुः' इत्यादिना असत्कार्यवादप्रतिक्षेपात्, कार्यद्रव्यस्य पूर्वं विद्यमानत्वप्रतीतेः तद्विशिष्टं ब्रह्मैवात्र सच्छब्दार्थ इति शक्यतेऽवगन्तुम्। अत एव, 'शरीरिभूतपरमात्माभिधायिभिः सद्ब्रह्मादिशब्दैः' इति भाष्यमपि सुघटितम्। न चात्र शक्तिद्वयकल्पनागौरवम्; विशिष्टपरत्वे, अपर्यवसानेन ब्रह्मणि सच्छब्दवृत्तेः; स्वरूपपरत्वे तु श्रुता(त्य)र्थापत्त्या शास्त्रान्तरानुसारेण वा विदचिद्वैशिष्ट्यस्यापि

प्रचुरप्रयोगात् अपां प्रतीत्या विशेष्यनिराकाङ्क्षत्ववत् ''प्रोक्षणीपात्रम्'' इत्यादौ तत एव समासवच्च, विशेष्यनिराकाङ्क्षत्वस्य सन्मूला इत्यादिसमासस्य चोपपत्तेः। ननु अर्थापत्त्या उपादानतावच्छेदकतया चिदचिद्वैशिष्ट्यकल्पनेऽपि न तस्य किंचिच्छब्दवाच्यत्वकल्पकं प्रमाणमस्ति। एवं च साक्षात्सत्ताविशिष्टं सच्छब्दार्थोऽस्तु इत्याशङ्कायामाह –**तथा सतीति**। ''तद्धेदं तर्ह्यव्याकृतमासीत्'' इति विशेषणस्य अव्याकृतस्य ''आत्मा वा इदम्'' इति ततः पूर्वं विशेष्यस्य आत्मनश्च शब्दतः प्रतीतेः तदुभयैकार्थ्याय व्यवहितसत्तायोग एवाश्रयणीय इति भावः। **अस्तु वेति**। **ब्रह्मस्वरूपनिर्देश इति**। ब्रह्मस्वरूपे निरुपाधिकसत्तारूपप्रवृत्तिनिमित्तपुरस्कारेण सच्छब्दस्य मुख्यवृत्तिः अस्तु, तथापि ''तद्धैक आहुः'' इत्यादिनां असत्कार्यवादप्रतिक्षेपात् प्राग्विद्यमानतयावगतस्य कार्यद्रव्यस्यैव परिणामित्वात् सच्छब्दः तद्विशिष्टपर इत्यवगन्तुं शक्यत इत्यर्थः। **अत एवेति**। शरीरविशिष्टस्वरूपे शक्त्यङ्गीकारा-देवेत्यर्थः। ननु पूर्वोक्तपक्षद्वयेऽपि सच्छब्दस्य विशिष्टपरत्वाङ्गीकारात् ब्रह्मणि प्रकृतौ च शक्तिद्वयं स्यादित्याशङ्क्य विशेषणशक्तेः विशेष्यपर्यन्तत्वरूपया अपर्यवसानवृत्त्या सच्छब्दः विशिष्टे प्रवर्तत इति न शक्तिद्वयप्रसङ्ग इत्याह - **न चात्रेति**। **अपर्यवसानम्** = विशेषणशक्तेः विशेष्यपर्यन्तता। **श्रुतार्थापत्त्येति**। श्रुतनिर्विकारत्वादेरनुपपत्त्या ''तद्धेदं

क्रोडीकारोपपत्तेः । न चात्र लक्षणा दोषः; तथापि सर्वशब्दलक्षणापक्षादस्यैवोपादेयतमत्वात्। यः पुनः, 'सर्वपदार्थानुवृत्तसत्तामात्रमेवात्र सच्छब्दार्थः; स एव च ब्रह्म' इत्याह; तत्पक्षे तु सकलश्रुतिस्मृतिन्यायविरोधः, प्रपञ्चमिथ्यात्वप्रसञ्जकाभावेनाप्रकृतत्वात् इदानीं तत्रोदास्महे। तत्रापि हि प्रपञ्चस्यैव सत्त्वं प्रतीयमानं

तर्ह्यव्याकृतमासीत्'' इति शाखान्तरानुसारेण वा तत्समानार्थत्वायेहापि सच्छब्दस्य विशिष्टपरत्वमित्यर्थः । क्रोडीकारः संग्रहः बोधनमिति यावत् । ननु स्वरूपवाचिना शब्देन वैशिष्ट्यक्रोडीकारे लक्षणा स्यादित्यत्राह - **न चात्रेति** । न्यायानुसारिणी लक्षणा न दोषायेति भावः । लक्षणाया दोषत्वमङ्गीकृत्याह-**सर्वशब्देति** ।

यादवप्रकाशमतमनूद्य दूषयति - **यः पुनरिति** । सर्वपदार्थानुवृत्ता सत्तैव सच्छब्दार्थः, स एव च ब्रह्मेति यादवप्रकाशमते सकलश्रुतिस्मृतिन्यायविरोधः । किं च किं प्रपञ्चस्य मिथ्यात्वेन तत्राधिष्ठानतया अनुगता सत्ता सच्छब्दार्थ इत्युच्यते, किं वा सत्यभूत एव प्रपञ्चे व्यापकीभूतं ब्रह्मैव सर्वानुगता सत्ता सैव सच्छब्दार्थ इति । आद्य आह - **प्रपञ्चेति** । सत्यभूतप्रपञ्चात्मकसत्तायाः तदुपादानत्वं हि प्रपञ्चोपदानत्वं हि न प्रपञ्चमिथ्यात्वापादकम्, अतस्तदिह न निराक्रियत इत्यर्थः । न तस्य प्रपञ्चमिथ्यात्व-साधकत्वाभावमात्रम्, प्रत्युतास्मिन् पक्षे कारणवाक्येन कार्यकारणावस्थयोः सत्तामात्रं व्यवस्थाप्यत इत्याह - **तत्रापि हीति** । तस्मिन् पक्ष इत्यर्थः । **प्रतीयमानमिति** । प्रत्यक्षादिनेति शेषः । **सच्छब्दद्वयेनेति** । ''इदं सदेव'' इत्येकः कारणविषयः सच्छब्दः। ''कथमसतः सज्जायेत'' ''ततो वै सदजायत'' इत्यपरः कार्यविषयः । सिद्धान्त इवेत्यपिशब्दस्य भावः । इत्येकं व्याख्यानं चण्डमारुते ।

अथापरं व्याख्यानं तत्रैव, यथा - **यद्वा तत्पक्ष इति** । सत्तैव सच्छब्दार्थः सैव च ब्रह्मेत्ययमर्थः सकलश्रुतिस्मृतिन्यायविरुद्ध इत्यर्थः । ब्रह्मस्वरूपं सच्छब्दार्थ इत्यस्य सिद्धान्तेऽङ्गीकृतत्वात् ततो विशेषद्योतनार्थः तुशब्दः । कथं श्रुत्यादिविरोध इत्यत्राह - **प्रपञ्चेति** । सत्तैव ब्रह्म सच्छब्दार्थश्च इत्येतन्निरासस्याप्रकृतत्वान्न तत् प्रपञ्च्यत इत्यर्थः । सच्छब्दस्यात्र सत्तापरत्वस्य निराकार्यत्वेऽपि सत्तार्थकत्वमात्रस्यानिराकार्यत्वादिति भावः।

कारणदशायां कार्यदशायां च दशाद्वयविषयसच्छब्दद्वयेन प्रतिष्ठितं भवति।

किंच यदिदं विशिष्टस्योपादानत्वं श्रौतं कल्पितं वेति–तत्र भवन्तमपि पृच्छामः, अविद्याविशिष्टस्योपादानत्वं श्रौतं कल्पितं वेति। न प्रथमः; सद्ब्रह्मादिशब्देष्वविद्यासौरभस्याप्यनाघ्राणात्। नाप्युत्तरः; कल्पकाभावादेरविशेषात्।

अप्रकृतत्वं कुत इत्यत्राह-**प्रपञ्चेति**। मिथ्यात्वप्रसञ्जकस्य कस्यापि तेनालाभादित्यर्थः। नन्वग्रे सत्तादात्म्यप्रतिपादनात् उपादानत्वपर्यवसानात् तदेव मिथ्यात्वप्रसञ्जकमित्यत्राह - **तत्रापि हीति**। ब्रह्मस्वरूपं सच्छब्दार्थ इति पक्षे वर्णितया रीत्या अनन्तरवाक्य - पर्यालोचनादिवशेन कार्यकारणावस्थयोः सच्छब्दस्य सत्तायोगिपरत्वान्न सत्तातादात्म्यमिह प्रतिपाद्यम्। एवं च प्रत्यक्षप्रमितसत्तायोगस्य श्रुत्यापि प्रतिपादनात् सत्यत्वमेव प्रतिष्ठितं भवति, न तु मिथ्यात्वप्रसङ्ग इत्यर्थः। ब्रह्मणः सत्तारूपत्वे ब्रह्मणो निराश्रयत्वप्रतिपादकश्रुतिस्मृत्यादिविरोधः, सत्तायाः साश्रयत्वात्। नीरूपस्य चक्षुरादिना सन् घट इत्यादिरूपेण ग्रहणासंभवात् न्यायविरोधः। सत्तार्थकत्वे तु व्याकरणविरोधः। सच्छब्दप्रवृत्तिनिमित्तेऽनुशिष्टतल्प्रत्ययान्तत्वेन सत्सत्ताशब्दयोः भिन्नार्थकत्वात्। घटादिशब्दवत् प्रवृत्तिनिमित्त विशिष्टवाचकत्वस्यावश्यकतया प्रवृत्तिनिमित्तमात्रवाचकत्वमयुक्तम्। यथा अवेष्ट्यधिकरणे राजशब्दार्थसिद्ध्युपजीवनेन राज्यशब्दार्थसिद्धेः न राज्ययोगो राजशब्दार्थ इत्युक्तम्, तथा सच्छब्दार्थसिद्ध्युपजीवनेन सत्ताशब्दार्थसिद्धेः तदधिकरणविरोधश्चेति भावः - इति।

अथ प्रतिबन्दीमाश्रित्य शांकरमतं दूषयति - **किं च यदिद मित्यादिना**। अस्मान् प्रति किं चिदचिद्विशिष्टस्योपादानत्वं श्रौतं कल्पितं वेति भवता पृष्टम्। तत्र च समुचितं समाधानमुक्तमेतावता। अथेदानीं भवन्तं वयं पृच्छामः अविद्याविशिष्टस्य जगदुपादानत्वं किं श्रौतं कल्पितं वेति। न प्रथमः। कारणवाक्यस्थसद्ब्रह्मादिशब्देषु अविद्यागन्धस्याप्यनाघ्राणात्। परिहासार्थः सौरभशब्दप्रयोगः। न द्वितीयः, कल्पकाभावादेरविशेषादिति। आदिशब्देनाविद्यारूपविशेषणकल्पनस्य ''एकमेव'' इत्यवधारणविरुद्धत्वं गृह्यते। ननु ब्रह्मणो

तत्सद्भावेऽपि प्रत्यक्षादिसमस्तप्रमाणप्रत्यनीकदुर्घट (दुर्घटिता)भिमतार्थक्लृप्तेरपि स्वहृदय(सहृदय)संवादिसमीचीन- प्रक्रियाकल्पनस्योपपन्नत्वात्। मृद्घटादिदृष्टान्तेन स्वरूपोपादानत्वप्रतिपादनप्रसङ्गं तु यदि भास्करादयः शृणुयुः, तदा ते प्रथमप्रतीतनिर्विकार (सविकार) तादिमाद्यव्याघाता(दि) रक्षणकल्पितव्याघातक्षतिशतविशरारुणि भवन्मते न नन्देयुः। नन्वविद्याविशिष्टं ब्रह्मास्माकं जगदुपादानम्; भवतां तु सूक्ष्मप्रकृतिपुरुषविशिष्टमिति व्यवहितविकाराश्रयत्वाविशेषादावयोः को विशेष इति ॥ अहो महदिदमवधानम्, यत् प्रत्यक्षादिप्रमाणगणदृढावधारितचिदचिदात्मकप्रपञ्चबाधाबाधाभ्यामावयोर्विशेषः प्रदर्शित इति। नन्वेवमपि

निर्विकारत्वश्रुतिरेव अविद्यावैशिष्ट्यकल्पिकेत्यत्राह **तत्सद्भावेऽपीति**। अविद्याकल्पकसद्भावेऽपीत्यर्थ:। **प्रत्यक्षादीति**। अविद्यारूपस्य विशेषणस्य कल्पने तत्कार्यस्य जगत: मिथ्यात्वं स्यात्। तच्च सर्वप्रमाणविरुद्धम्। अपि च अविद्यायां बहुविधानुपपत्तिपरिहारं कर्तुमशक्नुवद्भि: भवद्भि: अविद्याया: दुर्घटत्वं भूषणमित्युक्तम्। एतादृशप्रमाण-विरुद्धदुर्घटाविद्याकल्पनापेक्षया अस्मदभिमतसहृदयसंवादिसमीचीनप्रक्रियाकल्पनमेव युक्तमित्यर्थ:। यद्वा दुर्घटेत्यस्य यस्मिन्नविद्यारूपेऽर्थे गृहीते सृष्ट्यादिकं दुर्घटम् तस्यार्थस्येत्यर्थ:। **प्रथमप्रतीतेति**। ब्रह्मस्वरूपस्योपादानत्वे निर्विकारत्वसविकारत्वयो: सावद्यत्वनिरवद्यत्वयोश्च यो विरोध: प्रथमं प्रतीत: तस्मात् विरोधात् रक्षणाय विवर्तवाद: त्वया अङ्गीकृत:। स च व्याघातशतविशीर्ण:। ततश्च तद्दर्शनात् तावद्व्याघातरहिते स्वाभिमते स्वरूपपरिणामवादे प्रीतिमन्तो भास्कारादय: संतुष्येयुरिति भाव:। विशरारु: विशरणशील:। प्रसङ्गं वादिना क्रियमाणम्। व्याघातात् रक्षणार्थं कल्पितं यत् व्याघातशतं तेन विशीर्णेत्वन्मते इत्यर्थ: "इति विशरारुणि भवन्मते न नन्देयु:" इति पाठमाश्रित्य व्याख्यानान्तरम्। नन्वविद्येत्यादि स्पष्टार्थम्। **प्रदर्शितमिति**। "वयं तु वाक्यान्तरानुसारेण निर्विकारनिरवद्यश्रुतिविरोधपरिहारार्थं च प्रपञ्चोपादानभूतब्रह्मविशेषणं तच्छरीरमित्यनुमन्यामहे इति विशेष:" इति इति ग्रन्थेन पूर्वमेव प्रदर्शितमित्यर्थ:।

व्यवहितोपादानप्रतिपादनप्रयासमुत्सृज्य प्रपञ्चसत्यत्ववृथाग्रहानुरूपे स्वारसिके स्वरूपोपादानपक्षे स्थीयतामिति चेत्–मैवम्; सर्वतादात्म्ये समस्तविकारावद्याश्रयत्वावश्यंभावेन (भावि) निर्विकारनिरवद्यत्वश्रुतिविरोधस्य दुष्परिहरत्वात्। स्वारस्यमपि मरीचिकासलिलकल्पम्। तथा हि–तत्र भास्करमतं (अधिकृत्य ?) तावत् पृच्छामः–ब्रह्मस्वरूपमेव परिणमतीत्यत्र (१) किमीश्वरो ब्रह्मशब्दवाच्यः, (२) उत तदंशभूतः सूक्ष्मोऽचिदुपाधिः, (३) उत समुदायः, (४) उत तदुभयानुवृत्तसद्द्रव्यमात्रम्, (५) यद्वा ब्रह्मधर्मभूतः(त) शक्तिविशेष एवेति। व्यतिरेकादिपक्षस्तु अत्यन्तदूरस्थतया नोपक्षिप्यते। तत्र तावन्न प्रथमः; ईश्वरांशस्य विकारानभ्युपगमात्। न द्वितीयः; ब्रह्मोपादानत्वप्रहाणप्रसङ्गात्। न तृतीयः;

ननु सिद्धान्तित्वन्मते साक्षादुपादानत्वं श्रूयमाणं परित्यज्य सद्वारकमुपादानत्वं स्वीकृतम्; तत्र मूलकारणं प्रपञ्चसत्यत्वे अग्रहः। तदग्रहानुरूपः स्वरूपस्य साक्षादुपादानत्वपक्षः भवन्मतापेक्षया स्वारसिक इति स एव भास्करादिपक्षः अङ्गीक्रियतामिति शङ्कते **नन्वेवमपीति**। परहरति-**मैवमिति**। स्वरूपपरिणामपक्षे मृद्घटादिवत् उपादानोपादेययोस्तादात्म्यं वाच्यम्। तथा सति उपादेयजगद्गताः सर्वेऽपि विकाराः दोषाश्च उपादाने ब्रह्मणि प्रसजेयुरिति ब्रह्मणो निर्विकारत्वनिरवद्यत्वप्रतिपादकश्रुतिविरोधप्रसङ्गः दुष्परिहरः। अतः स्वरूपोपादानत्वपक्षो नाङ्गीकृतोऽस्माभिरिति भावः। **स्वारस्यमिति**। स्वरूपोपादानत्वपक्षे स्वारस्यं यदुक्तं तन्मरीचिकाजलवत् असत् इत्यर्थः। तदेवोपपादयति-**तथा हीत्यादिना**। सूक्ष्माचिदुपांधिविशिष्टं ब्रह्म जगद्रूपेण परिणमतीति भास्करमतम्। तत्र विकल्प्यते (१) ब्रह्मस्वरूपं परिणमतीत्यत्र किमीश्वरः ब्रह्मशब्देन विवक्षितः (२) उत ईश्वरांशभूतः सूक्ष्मः अचिद्रूपः उपाधिः (३) उत ईश्वरतंदशाचिदुभयसमुदायः (४) अथ तदुभयानुवृत्तसद्द्रव्यमात्रम् (५) यद्वा ब्रह्मधर्मभूतः शक्तिविशेष इति। न प्रथमः। उपाधिवियुक्तस्य ईश्वरस्य भवद्भिः विकारानङ्गीकारात्। न द्वितीयः, अचितः उपादानत्वे ब्रह्मोपादानत्वपरित्यागप्रसङ्गात्। न तृतीयः अचिदीश्वरसमुदायस्य अचिदीश्वराभ्यां भिन्नत्वे ब्रह्मोपादान-

समुदायस्य समुदायिभ्यां भिन्नत्वे सति न ब्रह्मोपादानत्वसिद्धिः, अभिन्नत्वे पक्षद्वयोक्तदूषणस्य पुनरुन्मज्जनम्(मिति ?) । चतुर्थेऽपि पक्षे सन्मात्रस्य सर्वतादात्म्ये चेतनाचेतनात्मकविश्वप्रपञ्चस्थदोषाधारत्वेन तदात्मकस्य ब्रह्मणो निर्दोषत्वश्रुतिविरोधः । पञ्चमस्तु पक्षः परिशिष्यते । तत्रापि शक्तेः ब्रह्माव्यतिरेके पुनः स एव श्रुतिविरोधः । व्यतिरेके ब्रह्मोपादानत्वभङ्गप्रसङ्गः । व्यतिरेकाव्यतिरेकपक्षस्तु दुःस्थत्वादेव दूरपरिहरणीयः । स्वाभाविकभेदा भेदवादश्च सर्वलोकविरुद्धत्वात् दुर्विचारमूल एव । तेन पक्षद्वयप्रतिक्षेपे मृषावादः परिशिष्यते । सोऽपि स्वतः प्रतिक्षेप्य एव, प्रस्फुटदोषसङ्करविघटितत्वात् ।

त्वासिद्धेः । अभिन्नत्वे ईश्वरपक्षे अचित्पक्षे चोक्तस्य दूषणद्वयस्य समावेशप्रसङ्गः । नापि चतुर्थः । ईश्वराचिदुभयानुवृत्तसन्मात्रस्य जगत्कारणत्वे सन्मात्रस्योपादानस्य सर्वजगत्तादात्म्येन चेतनाचेतनात्मकविश्वप्रपञ्चगतदोषाणां प्रसक्त्या सदात्मकस्य ब्रह्मणो निर्दोषत्वप्रतिपादकश्रुतिविरोधः । अतो ब्रह्मशक्तिविशेष उपादानकारणमिति पञ्चमपक्षोऽवशिष्यते । तत्रापि शक्तिः किं ब्रह्माभिन्ना उत ब्रह्मभिन्ना इति विकल्पे नाद्यः, निर्विकारत्वश्रुतिविरोधात्। न द्वितीयः, ब्रह्मोपादानत्वभङ्गप्रसङ्गात् । ब्रह्मभिन्नायाः शक्तेरेवोपादानत्वात् । शक्तेः ब्रह्मापेक्षया भिन्नाभिन्नत्वाङ्गीकारे ब्रह्मस्वरूपाभिन्नायाः शक्तेः भेदः उपाधित इति वक्तव्यम् । तस्यापि भेदः उपाध्यन्तरात् इत्यनवस्था इति समुदायार्थः । अत्र मध्ये पञ्चधा विकल्पप्रदर्शनानन्तरं ''व्यतिरेकादिपक्षस्तु अत्यन्तदूरस्थतया नोपेक्षिष्यते'' इति वाक्यं दृश्यते । तत्तु निष्कासनीयम् । यतः उपरि 'व्यतिरेकाव्यतिरेकपक्षस्तु दुःस्थत्वादेव दूरपरिहरणीयः' इति वाक्यं वर्तते । तेन गतार्थमेतदिति प्रतिभाति ।

दुःस्थत्वादिति । ब्रह्मस्वरूपाव्यतिरिक्तायाः शक्तेः व्यतिरेक उपाधित इति वाच्यम्। तस्यापि तथेत्यनवस्थेत्यर्थः । ननु शक्तिशक्तिमतोः भेदाभेदौ स्वाभाविकाविति यादवप्रकाशपक्षमाशङ्क्याह-**स्वाभाविकेति** । भास्करमतप्रतिक्षेपप्रकारेणैव यादवप्रकाशमतमपि प्रतिक्षिप्तं भवतीत्याशयः । **तेनेति** । भास्करयादव पक्षद्वयप्रतिक्षेपे सति

श्लो. अवस्थान्तरयोगित्वमुपादानत्वमुच्यते ।
मृत्पिण्डघटदृष्टान्तस्तत्रैव ह्युपपद्यते ॥
सर्पभूरन्ध्र-मालादिरूपावस्थान्तरान्वयः ।
रज्जौ न विद्यते तस्मान्नोपादानत्वमिष्यते ॥
इत्थमध्यस्तविश्वस्य ब्रह्मोपादानभाषणम् ।
लोकवेदविरुद्धत्वात् स्वयमेव नि(वि)रुध्यते ॥
अतः उपादानत्वानुपपत्तिरद्वैतवादिन एवेति ॥

इति शतदूषण्यां ब्रह्मोपादनात्वान्यथानुपपत्तिभङ्गवादः त्रिपञ्चाशः ॥ ५३ ॥

मृषावाद: विवर्ततया प्रपञ्चस्य ब्रह्मोपादानकत्ववाद: परिशिष्यते । सोऽपि स्वत: प्रतिक्षेप्य एव । स्वेनैव प्रतिक्षेप्तुं शक्य: स्वव्याघातदूषित इत्यर्थ: । तदेवोपपादयति-**अवस्थान्तरेति**। अवस्थान्तरयोगित्वमुपादानत्वमिति लोकसिद्धम् । मृत्पिण्डघटदृष्टान्तप्रदर्शनेन श्रुतिसिद्धं च तत् । ब्रह्मण: भ्रमाधिष्ठानत्वात् अवस्थान्वय: स्यादित्याशङ्क्याह - **सर्पेति** । सर्पादिभ्रमाधिष्ठाने रज्जौ सर्पाद्यवस्थान्तरयोगो न दृश्यते । अतो भ्रमाधिष्ठानस्य उपादानत्वं न संभवति । इत्थमिति । अवस्थानाश्रयस्योपादानत्वं लोकवेदविरुद्धमिति विश्वस्याध्यस्ततोक्ति: ब्रह्मण उपादानतोक्तिश्च परस्परव्याहते इत्यर्थ: ।

अस्मिन् वादे आचार्यपादै: शांकरभास्करयादवप्रकाशमतनिराकरणपूर्वकं सूक्ष्मचिदचिद्विशिष्टस्य ब्रह्मण उपादानत्वं प्रतिष्ठापितम् । अनन्तरकालिकमाध्वमतरीत्या ब्रह्मण: अनुपादानत्वं तदनुगुणतया श्रुत्यर्थवर्णनादिकं चण्डमारुते निरस्तम्, तत एव वेदितव्यम् ।

इति श्रीशतदूषणीव्याख्यायां तात्पर्यप्रकाशिकायां
ब्रह्मोपादानत्वान्यथानुपपत्तिभङ्गो नाम त्रिपञ्चाशो वादः ॥

।। अथ मायोपादानत्वान्यथानुपपत्तिभङ्गवादः चतुःपञ्चाशः ।। ५४ ।।

श्लो. यत्प्रपत्तिं विना सर्वैर्यस्य माया दुरत्यया ।
धनञ्जयरथोत्तंसं तत् प्रपद्ये परं महः ।।

यदुच्यते–'मायां तु प्रकृतिं विद्यात्' इति विश्वस्य मायोपादानकत्वश्रवणात्, मायाशब्दस्य च मिथ्यार्थत्वात् मिथ्योपादानकस्य च सत्यत्वायोगात् विश्वमिथ्यात्वं सिद्धमिति–तदपि स्तनन्धयरुदितम् (कथितम्) । तत्र तावत् श्रुतौ वचनव्यक्तिर्विपर्यासिता । न हि तत्र प्रकृत्यनुवादेन मिथ्यात्वं विधीयते; अपि तु मायानुवादेन

अथ मायोपादानत्वान्यथानुपपत्तिभङ्गो नाम चतुः पञ्चाशो वादः ।।

यत्प्रपत्तिं विना सर्वैर्यस्य माया दुरत्यया ।
धनञ्जयरथोत्तंसं तत् प्रपद्ये परं महः ।।

अनेन मायायाः भगवत्प्रसादैकनिवर्त्यतया ज्ञाननिवर्त्यत्वाभावप्रतीतेः जगदुपादानभूतायास्तस्याः मिथ्यात्वाभावसिद्ध्या मायायाः मिथ्यात्वाभावरूपो वादार्थः संगृहीतो भवति ।

मास्तु ब्रह्मोपादानत्वान्यथानुपपत्त्या जगतो मिथ्यात्वम्, मायोपादानत्वान्यथानुपपत्त्या तु तत् स्यादिति शङ्कया उत्थानात् संगतिः ।

पूर्वपक्षः

यदुच्यते इति । ''मायां तु प्रकृतिं विद्यात्'' इतिं प्रकृतेः जगदुपादानभूतायाः मायात्वकथनात् मायाशब्दस्य मिथ्यार्थकत्वात् जगदुपादानस्य मिथ्यात्वे सिद्धे मिथ्योपादानकस्य जगतः सत्यत्वायोगात् जगतः मिथ्यात्वं सिध्यतीति यदुच्यतेऽद्वैतिभिः-

सिद्धान्तः

तत् बालभाषितम् । भवद्भिः प्रकृतिशब्देन जगदुपादानं निर्दिश्य तदुद्देशेन मायात्वं विधीयत इति अभिमानेन तथोक्तम् । तत्रैव भवतां विपर्यासो जातः । यतस्तस्मिन् वाक्ये

प्रकृतित्वम्। तुशब्दोऽपि तस्यै(तदै)वानुकूलः। पूर्वस्मिन् वाक्ये, 'अस्मान्मायी सृजते विश्वमेतत् तस्मिंश्चान्यो मायया सन्निरुद्धः' इति प्रसक्तयोर्मायामायिशब्दयोरर्थमविदुषस्तज्ज्ञानोपजननायैव हि, 'मायां तु प्रकृतिं विद्यान्मायिनं तु महेश्वरम्' इत्युच्यते। अतः, 'या मायेति अत्रोक्ता, सा जगदुपादानतयोपनिषत्प्रसिद्धा प्रकृतिरेव। यश्च मायीति निर्दिष्टः, स च प्रकृत्यधिष्ठाता चिदचिच्छरीरको महेश्वर एव' इति वचनव्यक्तिः। स्ववाक्येऽपि यच्छब्दाद्यभावेऽपि प्रथमचरमभावेनोद्देश्योपादेयव्यवस्था सिद्धा। तथा ह्याहुः–'यद्वृत्त (च्छब्द)योगः प्राथम्यमित्याद्युद्देश्यलक्षणम् इति॥

मायामुद्दिश्य प्रकृतित्वं विधीयते न तु प्रकृतिमुद्दिश्य मायात्वम्। कुत इत्यत्राह **तुशब्दोऽपीति**। ''उद्देश्यवचनं पूर्वं विधेयस्य ततः परम्'' इति न्यायात् प्रथमनिर्देशो मायायाः उद्देश्यत्वसाधकः। तुशब्दोऽपि यच्छब्दवत् मायाया उद्देश्यत्वसूचक इति भावेन अपीत्युक्तम्। ननु मायोद्देशेन प्रकृतित्वं किमर्थं विधीयत इत्यत्राह-**पूर्वस्मिन्निति**। ''मायां तु प्रकृतिं विद्यात्'' इत्यतः पूर्वस्मिन् वाक्ये-

''अस्मान्मायी सृजते विश्वमेतत्तस्मिंश्चान्यो मायया संनिरुद्धः'' इति प्रस्तुतयोः मायामायाविशब्दयोरर्थं यो न जानाति तस्य तदर्थज्ञानजननाय हि।

''मायां तु प्रकृतिं विद्यान्मायिनं तु महेश्वरम्'' इति वाक्यं प्रवृतम्। अतः मायेति शब्देन या निर्दिष्टा सा जगदुपादानकारणतया उपनिषत्प्रसिद्धा प्रकृतिरेव। यश्च मायीति निर्दिष्टः स च प्रकृत्यधिष्ठाता चिदचिच्छरीरको महेश्वर इति वाक्यार्थः वचनव्यक्तिः - वचनानुपूर्वीलभ्यार्थः। अथवा वाक्यविन्यासः किं च यच्छब्दतुशब्दाद्यभावेऽपि प्रथमनिर्दिष्टम् उद्देश्यम्, पश्चान्निर्दिष्टं विधेयमित्युत्सर्गः। तथा ह्याहुः-

''यच्छब्दयोगः प्राथम्यमित्याद्युद्देश्यलक्षणम्''

इति। तथा च प्रथमनिर्दिष्टां मायामुद्दिश्य पश्चान्निर्दिष्टं प्रकृतित्वं विधीयत इति भावः। ननु भवत्वेवं वचनव्यक्तिः। तथापि प्रकृतेर्मायाशब्दवाच्यत्वं स्थितम्। मायाशब्दस्य च

अस्त्वेवं वचनव्यक्तिः, तथाऽपि प्रकृतेर्मायाशब्दवाच्यत्वसिद्धेर्मिथ्यात्वमपि सिध्यतीति चेन्न; मायाशब्दस्य मिथ्यार्थपरत्वेऽप्युपचारतोऽपि तत्र तत्प्रयोगसंभवेन वाच्यत्वनिर्णयासिद्धेः । न हि प्रकृतिर्मायाशब्दवाच्येति श्रुत्यर्थः; अपि तु अत्र मायाशब्देन प्रकृतिर्विवक्षितेति ।। तथाऽपि मुख्यार्थे बाधकाभावादुपचारवृत्तिरत्रानुचितेति चेन्न; प्रकृति (कारण) त्वान्यथानुपपत्त्यैव बाधात् । कारणसत्यत्वं च बहुशो मृद्दृष्टान्तादिभिर्निदर्शितम् । 'अचेतना परार्था च नित्या सततविक्रिया',

---

मिथ्यात्वं प्रवृत्तिनिमित्तम् । अतः प्रकृतेर्मिथ्यात्वमवर्जनीयमिति शङ्कते- **अस्त्वेवमिति** । समाधत्ते - **मायाशब्दस्येति** । मायाशब्दस्य न मिथ्यार्थकत्वमिति अनन्तरमेव प्रतिपादयिष्यते । मिथ्यार्थकत्वमभ्युपगम्यापि ब्रूमः - मायाशब्दस्य मिथ्यार्थकत्वेऽपि प्रकृतौ लक्षणयापि मायाशब्दप्रयोगसंभवेन तस्याः मायाशब्दवाच्यत्वनिर्णयो न सिध्यति । मायाशब्दस्यात्र मायाशब्दविवक्षितेति लक्ष्यार्थः । तथा च प्रकृतिः मायाशब्दविवक्षिता इति श्रुत्यर्थः न तु मायाशब्दवाच्येति । तावता प्रकृतेः मायाशब्दवाच्यत्वं न सिध्यति । ननु मायाशब्देन मायाशब्दविवक्षितत्वोक्तौ लक्षणा स्यात्, ततो वरं उद्देश्यविधेयविपर्यास एवेति चेत् - न । अनुवादतात्पर्ये अवगते तात्पर्यानुसारेण लक्षणाया अदोषत्वादिति भावः ।

नन्वस्तु पूर्ववाक्यप्रस्तुतमायामायिशब्दव्याख्यानरूपता ''मायां तु प्रकृतिं विद्यात्'' इति वाक्यस्य । तथापि मायाशब्दः मुख्यवृत्त्यैव प्रकृतौ वर्तते । मुख्यार्थ श्चमिथ्यैवेति शङ्कते- **तथापि इति** । मुख्यार्थे मिथ्यारूपार्थे बाधकाभावात् मायाशब्दस्य लक्षणा न युक्तेति चेन्न । मिथ्याभूतस्य प्रकृतित्वानुपपत्त्यैव मुख्यार्थबाधात् लक्षणा स्वीकरणीयेति भावः । ननु कुतो मिथ्याभूतार्थस्य उपादानत्वं न संभवतीत्यत्राह - **कारणसत्यत्वं चेति** । मृद्घटादि दृष्टान्तप्रदर्शकश्रुत्या कारणस्य सत्यत्वं प्रदर्शितम् । अतः मिथ्यार्थस्योपादानकारणत्वं न संभवतीत्यर्थः । मृत्तिकेत्येव सत्यम् इत्यादेः कारणसत्यत्वप्रतिपादनपरत्वं हि त्वयेष्यते । तद्विरुद्धं कारणमिथ्यात्ववर्णनमिति भावः । किं चोपादानकारणभूतायाः प्रकृतेर्नित्यत्वश्रवणादपि मिथ्यात्वं न संभवतीत्याह - **अचेतना परार्थेति** । मिथ्यात्वे ज्ञाननिवर्त्यत्वं

‘गौरनाद्यन्तवती सा जनित्री भूतभाविनी’ इत्यादिभिः प्रकृतिनित्यत्वसिद्धेश्च तन्मिथ्यात्वं निरस्तम्॥ सत्यत्वेऽपि केन (धर्मेण ?) मिथ्यात्वोपचारः किमर्थश्चेति चेत्; अस्थिरतरभोगप्रसाधकत्वेन स्वप्नार्थतुल्यतया जिहासितत्वज्ञापनार्थ इति मन्वीथाः।

न च मायाशब्दो मिथ्यार्थवाची; विचित्रसृष्ट्युपकरणभूतार्थाभिधायित्वात्। सर्वप्रयोगानुगतनिमित्तसंभवे नानारूपार्थोपादानस्य निरस्तत्वात्। न च मिथ्यार्थेष्वेव तत्प्रयोगः, येन तत्रैव तच्छक्तिः कल्प्येत; अपितु सत्येष्वपि; यथा, ‘यावन्तः

स्यात्। निवर्त्यत्वे च कथं नित्यत्वं स्यादिति भावः। ननु प्रकृतेः सत्यत्वे कं धर्म पुरस्कृत्य तत्र मिथ्यार्थकमायाशब्दस्योपाचारः? उपचारनिमित्तभूतो धर्मः कः इति उपचारस्य प्रयोजनं च किम् इति च पृच्छति - **सत्यत्वेऽपीति**। अस्थिरतरभोगसाधनत्वम् उपचारनिमित्तभूतो धर्मः। जिहासितत्वज्ञापनं प्रयोजनमिति समाधानम्।

एतावता मायाशब्दस्य मिथ्यार्थवाचित्वमभ्युपगम्योक्तम्। इदानीं तदेव नेत्याह - **न चेति**। मायाशब्दस्य मिथ्यात्वं न प्रवृत्तिनिमित्तम्। किं तु विचित्रसृष्ट्युपकरणत्वमिति भावः। मायाशब्दस्य अनेकेष्वर्थेषु प्रयोगदर्शनात् सर्वानुगतं प्रवृत्तिनिमित्तं वाच्यम्। मिथ्यात्वं तु न सर्वप्रयोगानुगतम्, अपि तु विचित्रार्थकरत्वमित्याशयेनाह - **सर्वप्रयोगेति**। ''यज्ञो हि तस्य मायासीत्'' इति यज्ञे मायाशब्दः प्रयुक्तः। स च न मिथ्यार्थकः, यज्ञस्य मिथ्यात्वासिद्धेः। तस्य माया इति सप्रतिसंबन्धिकतया मायाशब्दः प्रयुक्तः। मिथ्यात्वं च न सप्रतिसंबन्धिकम्। अतः ''तस्य मायासीत्'' इति विचित्रसृष्ट्युपकरणत्वेन यज्ञस्यावस्थानमेव तत्र मायाशब्दवाच्यमिति भावः। ननु ऐन्द्रजालिके गजे मायागज इति प्रयुज्यते। तस्य गजस्य मिथ्यात्वात् तत्र च मायाशब्दप्रयोगात मिथ्यात्वमपि मायाशब्दार्थः स्यादित्यत्राह - **सर्वप्रयोगेति**।

ननु अनुगतप्रवृत्तिनिमित्तं न कल्पनीयम्, मायाशब्दस्य सत्ये प्रयोगाभावात्, मिथ्यार्थ एव मायाशब्दः प्रयुज्यत इत्यत्राह-**न चेति**। मायाशब्दस्य मिथ्यार्थेष्वेव प्रयोग इति नास्ति।

पांसवो भूमेः संख्याता देवमायया' इति । न हि मिथ्याभूतस्य कस्यचित् संख्यानकरणत्वं प्रतीमः । 'माया वयुनं ज्ञानम्' इति नैघण्टुकानुसारात् अर्थौचित्याच्च ज्ञानविषयत्वमेव तत्रोचितम् । तथा, 'मायया सततं वेत्ति प्राणिनां तु शुभाशुभम्' इति च । तथा, 'तेन मायासहस्रं तत् शम्बरस्याऽऽशुगामिना । बालस्य रक्षता देहमैकैकश्येन सूदितम् ॥' इति । न हि मिथ्याभूतस्य कस्यचिच्छस्त्रच्छेद्यत्वम्;

सत्येष्वप्यर्थेषु प्रयोगदर्शनात् । तस्योदाहरणम्- ''यावन्तः पांसवो भूमेः संख्याता देवमायया'' इति । इदं च काठकश्रुतिवाक्यम् । अस्य च भूमेः पांसवः देवमायया संख्याता भवन्ति इत्यर्थः । अत्र मायाशब्दस्य मिथ्यार्थैकत्वे तस्य संख्यानकारणत्वं न संभवति । कुत्रापि मिथ्यार्यस्य संख्यान (गणन) साधनत्वादर्शनात् । अतस्तत्र ''माया वयुनं ज्ञानम्'' इति निखण्डुवशात् देवानां मायया ज्ञानेन भूमिपांसवः इयन्तः इति संख्याता भवन्तीत्यर्थः । तथा ''मायाया सततं वेत्ति प्राणिनां तु शुभाशुभम्'' इत्यत्र मायया ज्ञानेन सकलं प्राणिनां शुभमशुभं च सर्वदा जानाति भगवानिति ज्ञानार्थकतया मायाशब्दः प्रयुक्तः । तथा विष्णुपुराणे -

> ''तेन मायासहस्रं तच्छम्बरस्याशुगामिना ।
> बालस्य रक्षता देहमैकैकश्येन सूदितम् ॥'' (वि.पु. १-१९-२०)

इति श्लोकः । हिरण्यकशिपुना प्रेरितः शम्बरासुरः बालस्य प्रह्लादस्य शरीरे बाणसहस्रं क्षिप्तवान् । तदा प्रह्लादः मधुसूदनं सस्मार । भगवता च प्रह्लादरक्षार्थं सुदर्शनचक्रं समाज्ञप्तम्। क्षिप्रगामिना बालस्य देहं रक्षता सुदर्शनेन बाणसहस्रम् एकैकशः भग्नं कृतम् इति श्लोकार्थः। अत्र सत्येषु बाणेषु मायाशब्दः प्रयुक्तः । इतः पूर्वतनः श्लोकः -

> ततो भगवता तस्य रक्षार्थं चक्रमुत्तमम् ।
> आजगाम समाज्ञप्तं ज्वालामलि सुदर्शनम् ॥ (बि.पु. १-१९-१९)

न हीति । मिथ्याभूतस्य शस्त्रच्छेद्यत्वं न संभवति । अतस्तत्र मायाशब्दः न मिथ्यार्थकः मिथ्याभूतस्य तु सपदिः तत्त्वोपदेशादेव निवृत्तिः । न तु मुद्गरादिना ।

अपि तु तत्त्वोपदेशादेव तन्निवृत्तिः । तथाऽप्यनेकशक्तिकल्पनायां गौरवात् तत्रौपचारिकोऽयं प्रयोग इति चेन्न; विपर्यासस्य दुर्वारत्वात् ।। प्रसिद्धिप्रकर्षान्मिथ्यात्वे(र्थे) शक्तिरङ्गीक्रियत इति चेन्न; मिथ्यापर्यायत्वेन मायाशब्दस्य प्रसिद्धेरेवाभावात् । न हि स्वदृग्दोषादिमात्रमूलभ्रमविषयेषु शुक्तिरजत-रज्जुसर्पादिषु मिथ्याशब्दप्रयोगविषयेष्वपि क्वचित् कदाचिदपि मायाशब्दप्रयोगो दृष्टचरः । अतो यत्रेन्द्रजालादिमूलभ्रान्तिविषयेषु मायाशब्दप्रयोगः, तत्रापि मिथ्यात्व-मन्तरेण निबन्धनान्तरमस्तीति निश्चीयते । तच्च किमिति निरूप्यमाणेऽप्यैद्रन्जालि-कवत्

ननु मायाशब्दस्य मिथ्यायामेव शक्तिः । सत्येषु तु लक्षणया प्रयोगः । अनेकेष्वर्थेषु अनेकशक्तिकल्पनायां गौरवादित्याशङ्क्य विपरीतमेव किं न स्यात् सत्ये एव मायाशब्दस्य शिक्तिः मिथ्यायां तु लाक्षणिकः प्रयोग इतीति परिहरति - **तथापीति** । प्रसिद्धिप्रकर्षात् मिथ्यायां मायाशब्दस्य शक्तिरित्याशङ्क्य मिथ्यार्थे मायाशब्दस्य प्रसिद्धिरेव नास्ति, कुतस्तत्प्रकर्ष इति प्रत्याह-**प्रसिद्धीति** । प्रसिद्ध्यभावमुपपादयति - **न हीति** । स्वनयनदोषादिमात्रमूलकभ्रमविषयेषु रज्जुसर्प-शुक्तिरजतादिषु मिथ्या इति शब्दप्रयोगविषयेषु रज्जुसर्पः माया शुक्तिरजतं माया इति मायाशब्दं केऽपि न प्रयुज्जते । मायाशब्दस्य मिथ्यापर्यायत्वे तु तेष्वपि मायाशब्दः प्रयुज्येतेति भावः ।

ननु ऐन्द्रजालिके मिथ्याभूतार्थप्रदर्शयितरि मायाविशब्दं प्रयुञ्जते । तत्र मायाशब्दस्य इन्द्रजालरूपमिथ्यात्वे प्रसिद्धिरस्त्येवेत्यत्राह-**अतो यत्रेति** । शुक्तिरजतादिषु मिथ्यात्वे सत्यपि मायाशब्दप्रयोगाभावात् अन्यत्र मायाशब्दप्रयोगे न मिथ्यात्वं निबन्धनम्, किं त्वन्यदेवेति भावः । **तच्चेति** । अन्यत् निबन्धनं किमिति जिज्ञासायां निपुणं विचारे कृतेऽपि विचित्रार्थकरत्वमेव निबन्धनमिति निर्णीयते । तथाहि - ऐन्द्रजालिके इव रावणपुत्रेन्द्रजिदादिष्वपि मायाविशब्दः प्रयुज्यते । इन्द्रजितो या माया सा मिथ्येति न विवक्षितम् । लौकिकैस्तस्य मिथ्यात्वेनाग्रहणात् । किं तु सत्यस्य वा असत्यस्य वा विचित्रार्थस्य सृष्टौ प्रकाशने वा सामर्थ्यवान् मायविशब्दार्थः । तादृशसामर्थ्यं मायाशब्दार्थः। तञ्च सामर्थ्यं मन्त्रौषंधादिरूपं सत्यम्, न मिथ्या । अथ वा तत्सामर्थ्यं तदनुगुणशक्तिवि

इन्द्रजिदादौ मायाविशब्दप्रयोगात्, तत्र च अलीकत्वस्याविवक्षितत्वात् सत्यस्य वा असत्यस्य (सत्यत्वासत्यत्वस्य) वा विचित्रार्थस्य सृष्टौ प्रकाशने वा सामर्थ्यवानित्येव मायाविशब्दार्थः । तच्च सामर्थ्यं सत्यो मन्त्रौषधादिरेव, तदनुबन्धी(बन्ध्यती) न्द्रियशक्तिविशेषो वा । ततश्च मायाजन्यज्ञानविषयतया मिथ्याभूतेष्वप्यर्थेषु लक्षणया मायाशब्दप्रयोग उपपद्यते ।

श्लो. मायोत्थज्ञानवेद्येऽ(द्या)र्थे युक्ता मायेति लक्षणा ।
मिथ्यासम्बन्धरहिते नास्त्रादौ सत्यकारणे ॥

न हि पर्वतसमुद्रपावकादिहेतुष्वस्त्रविशेषेषु, मिथ्यासम्बन्धगन्धरहितेषु मायाशब्दोपचारः संभवति ॥ मिथ्यार्थसादृश्यात् तत्र गौणोऽयं प्रयोग इति चेन्न; विपरिवर्तप्रसङ्गस्य प्रागेवोक्तत्वात् । लक्षणापेक्षया गौणवृत्तेर्जघन्यत्वाच्च मुख्यलक्षणावृत्तिभ्यां

शेष: । ततश्च उक्तसामर्थ्यरूपमायाजन्यज्ञानविषयतया मिथ्याभूतेष्वर्येषु लक्षणया मायाशब्दप्रयोग इति भाव: ।

अत्र चण्डमारुतम् -

सत्यस्य वा असत्यस्य वेति । सत्यासत्याभ्यां यथासंख्यं सृष्टिप्रकाशनयोरन्वयो न विवक्षिंत: । प्रवृत्तिनिमित्तद्वित्वप्रसङ्गात् । किं तूभयोरुभयत्रान्वय: । सत्यस्य वा असत्यस्य वा सर्गे सामर्थ्यवान् इति परमते । सत्यस्य वा असत्यस्य वा प्रकाशने सामर्थ्यवान् इति सर्वसाधारणम् । क्वचित् प्रकाशने सामर्थ्यमर्थसृष्टिद्वारा । यद्वा यथासंख्येनैवान्वय: । विचित्रसर्गकरत्वविचित्रप्रकाशकत्वान्यतरसामर्थ्यं प्रवृत्तिनिमित्ततया विवक्षितम् । तस्मात् सामर्थ्यविशेषो मायाशब्दप्रवृत्तिनिमित्तमिति भाव: इति । **सत्यकारणे** = सत्यस्य कारणे । **न हीति** । केचन पर्वत-समुद्रपावकादिजनका: अस्त्रविशेषा: सन्ति। तेषु मायाशब्द: प्रयुक्त: पुराणेतिहासादिषु । मिथ्यासंबन्धरहितास्ते । अतस्तेषु मिथ्यार्थक मायाशब्दप्रयोगो न संभवति । मिथ्यार्थसादृश्यात् गौणोऽयं प्रयोग इति वक्तुं न शक्यते । सत्यार्थसादृश्यात् मिथ्यार्थेष्वेव मायाशब्दप्रयोग: गौण इति विपरिवर्तप्रसङ्ग इत्युक्तत्वात् । **लक्षणापेक्षयेति** । ''लक्ष्यमाणगुणैर्योगात् वृत्तेरिष्टा तु गौणता'' इति कुमारिलवार्तिके गौण्यां

प्रयोगनिर्वाहे संभवति, मुख्यगौणवृत्तिभ्यां निर्वाहस्यानुचितत्वात् । अतो विचित्रसृष्ट्युपकरणभूतार्थविशेष एव मायाशब्दशक्तिः ।

नन्वेवमपि सर्वप्रयोगानुगतं निमित्तं न सिध्यति । 'मेघोदयः सागरसन्निवृत्तिः' इत्यारभ्य, 'विष्णोर्विचित्राः प्रभवन्ति मायाः' इति प्रयुज्यते । तथा, 'देवमायेव

मुख्यलाक्षणिकाभ्यामुभाभ्यां व्यवधानस्योक्तत्वात् । लक्षणायां तु मुख्यार्थव्यवधानमात्रम् । अतो गौणी जघन्येति भावः । नन्वेवमपीति । विचित्रसृष्ट्युपकरणभूतार्थविशेष एव मायाशब्दस्य शक्तिः इति स्वीकारेऽपि मायाशब्दप्रयोगविषयेषु सर्वेष्वर्थेषु अनुगतं निमित्तं न संभवति । विचित्रार्थसृष्ट्युपकरणत्वस्य सर्वप्रयोगानुगतत्वाभावात् । तथा हि-

"मेघोदयः सागरसंनिवृत्तिरिन्दोर्विभागः स्फुरितानि वायोः ।
विद्युद्विभङ्गो गतिरुष्णरश्मेर्विष्णोर्विचित्राः प्रभवन्ति मायाः ॥"

इति श्लोको गीताभाष्ये "तथा सर्वाणि भूतानि मत्स्थानीत्युपधारय"
इति गीताव्याख्यानावसरे "यथाहुर्वेदविदः" इत्युपक्रम्योदाहृतः ।

तत्र "विष्णोरनन्यसाधारणानि महाश्चर्याणीत्यर्थः" इति भाष्ये मायाशब्दविवरणम् ।

तत्र तात्पर्यचन्द्रिकायाम् -

"अस्मदाद्यगोचरोपादानोपकरणसंप्रदानादीनां तत्क्षणादेव सकलदिङ्मुखव्यापिनां धराधराणामुत्पत्तिः, सकलभुवनाप्लावनलम्पटस्यैव जलनिधेरम्बरालम्बिनां तरङ्गाणां वेलातले निवृत्तिः, प्रतिनियतकलावृद्धिक्षयशृङ्गोन्नमनादिरूपश्चन्द्रमसो विभागः अशङ्कितागमानामनियतदिग्विशेषाणां तृणगिरितरुषण्डलुण्टाकानां चण्डमारुतादीनां विष्फूर्तयः, प्रशान्तदहनमिहिरहिमकरादिमहसि प्रावृषि निशीथेऽप्यविदितपूर्वोत्तरक्षणानां क्षणरुचीनां विभङ्गः, निरालम्बने विहायसि महीयसो मिहिरमण्डलस्य प्रतिनियतदिनरजनिमासायनसंवत्सरादिवैदेशिकस्संचारः, एवंविधान्यन्ये च परिवेषोपरागेन्द्रचापकरकास्तनिताशनिभूकम्पप्रभञ्जनभ्रमणादयोऽत्यद्भुतप्रकाराः सर्वे सर्वव्यापिनः सर्वशक्तेः विष्णोरेव विचित्रशक्तिमूला भवितुमर्हन्तीति श्लोकार्थः" इति व्याख्यानम् ।

निर्मिता', 'संख्याता देवमायया', 'मायया सततं वेत्ति' इत्यादिषु निर्दिष्टनिमित्तासिद्धेरिति चेन्न; आद्ययोर्मायाकार्यतया लक्षणयाऽपि प्रयोगोपपतेः। मुख्यत्वेऽपि तत्र न दोषः, मेघोदयादीनामपि विचित्रवर्षादिस्रष्टुरीश्वरस्य ततत्सृष्ट्युपकरणत्वाविशेषात्। 'देवमायेव निर्मिता' इत्यत्रापि स्त्रीरूपेण परिणता देवानां मायेत्यर्थः (परिणता माया देवानामाश्चर्यशक्तिरिवेत्यर्थः)। न चात्र कस्यचिदपि शब्दस्य लक्षणा, अभूतोपमामात्रस्य विवक्षिततत्वात्। 'संख्याता देवमायया' इत्यत्र तु निघष्ट्व(र्था)नुसारादर्थौ(रादौ) चित्याच्च ज्ञानमेव विवक्षिरम्। तथाऽपि घटज्ञानमित्यादिषु घटमायेति प्रयोगादर्शनादाश्चर्यावहत्वमात्रेण तत्र मायात्वोक्तिः। नैघण्टुकाश्च शक्तिविषयमनादृत्य प्रयोगविषयमात्रं संगृह्णन्तीति बहुलमुपलभ्यते।

“देवमायेव निर्मिता” इति रामायणे “संख्याता देवमायया” इति काठके।

“मायया सततं वेत्ति प्राणिनां च शुभाशुभम्” इति गीताभाष्ये अभियुक्तश्लोकत्वेनोदाहृतः। अत्र सर्वत्रानुगतं मायाशब्दप्रवृत्तिनिमित्तं वक्तुमशक्यमिति शङ्का। तत्र समाधानमाह-**आद्ययोरिति**।

“विचित्राः प्रभवन्ति माया;” इत्यत्र “देवमायेव निर्मिता” इत्यत्र च मेघोदयादीनां सीतायाश्च मायाकार्यतया लक्षणया मायाशब्दप्रयोगविषयत्वम्। अथवा ईश्वरस्य या विचित्रा वर्षादिसृष्टिः तदुपकरणत्वात् विचित्रसृष्ट्युपकरणत्वरूपं प्रवृत्तिनिमित्तमस्तीति मायाशब्दस्य मेघोदयादौ मुख्यवृत्तिः इत्यर्थः। **स्त्रीरूपेणेति**। स्त्रीरूपेण निर्मिता देवानां विचित्रशक्तिरेव तिष्ठतीत्यर्थः।

बहुलमिति। “अध्वर्यूद्गातृहोतारो यजुस्सामर्ग्विजः क्रमात्। आग्नीध्राद्या धनैर्वार्या ऋत्विजो याजकाश्च ते॥”

इत्यमरकोशे तत्तद्वेदोक्तकार्यकारिषु चतुर्षु चतुर्षु अध्वर्य्वादयः शब्दाः अभिधायकतया उक्ताः। परं तु पूर्वमीमांसायाम् “उद्गातॄणां चमसभक्षः” इत्यत्र उद्गातृशब्दः एकत्रैव मुख्य;, उद्गातृप्रस्तोतृप्रतिहर्तृसुब्रह्मण्येषु प्रवचनान्वयात् रूढिपूर्वकलक्षणेत्युक्तम्।

संभवति चास्मदुक्तं मुख्यार्थनिमित्तमत्रापि; इतराशक्याश्चर्यतरभूमिपांसुसंख्यानसर्वप्राणिशुभाशुभविवेकादिहेतुत्वात्। अस्तु वा ज्ञानपर्यायत्वं क्वचिन्मायाशब्दस्य; तथाऽपि तद्व्यतिरिक्तविषयेषु पूर्वोक्तमेव निमित्तम् । न हि गत्यभावात् क्वचिच्छक्तिभेदकल्पने अत्रापि तथा क्लृप्तिः; गोर्वाहीक(र्बाह्लीक) इत्यत्रापि शक्त्यन्तरकॢप्तिप्रसङ्गात्।

किंच मिथ्यारूपमायोपादानत्वेऽपि तदुत्पन्नमात्रस्य प्रपञ्चस्य मिथ्यात्वं न सिध्यति, नविलक्षणाधिकरणन्यायेन विलक्षणादपि विलक्षणकार्योत्पत्तिसंभवात्। असत्यात्सत्योत्पत्तेर्युष्माभिरेव स्वीकारात् ॥ असत्यस्य सत्यनिमित्तत्वमात्रमुदाह्रियते, न तु सत्योपादानत्वमिति चेन्न; तुल्यन्यायत्वात् । न ह्यस्ति राजशासनं मिथ्याभूतेन, निमितेनैव भाव्यम्; न तूपादानेनेति ॥ उपादानोपादेययोस्तादात्म्यादुपादानस्य मिथ्यात्वे कार्यस्य सत्यत्वे च सत्य(त्व)मिथ्यात्व-

---

एवमध्वर्य्वादिष्वपि । एवममरकोश एव-

''दर्शश्च पूर्णमासश्च यागौ पक्षान्तयो:पृथक्'' इति दर्शपूर्णमासशब्दौ कर्मनामतया उक्तौ। पूर्वमीमांसायां तु दर्शपूर्णमासशब्दाभ्यां कालयुक्तकर्मलक्षणेत्युक्तम् । एवं पृषदाज्यशब्द: नामतया नामपाठे उक्त: । पूर्वतन्त्रे तु पृषच्छब्द:चित्रतावाची । दध्ना चित्रितत्वात् सदध्याज्यं योगवृत्त्या पृषदाज्यमित्युक्तम् । **क्वचिदिति** । 'संख्याता देवमायया'' इत्यादौ । **पूर्वोक्तमेवेति** । आश्चर्यकरत्वमेवेत्यर्थ: । **क्वचिच्छक्तिभेदकल्पनेति** । नानार्थकेषु हर्यादिशब्देषु शक्तिभेदकल्पना । **शक्त्यन्तरेति** ॥ वाहीके गोशब्दस्य शक्त्यन्तरकल्पनम् ।

किं चेति । मिथ्यारूपा या माया तदुपादानकत्वेऽपि प्रपञ्चस्य मायात उत्पत्ति: इत्येतावन्मात्रेण मिथ्यात्वं न सिध्यति । ''न विलक्षणत्वात्'' इत्यधिकरणन्यायेन मिथ्याभूतादपि तद्विलक्षणस्य सत्यस्य प्रपञ्चस्योत्पत्तिसंभवात् । भवन्मते असत्यात् सत्योत्पत्ते: स्वीकारात् । नन्वस्मन्मते असत्यस्य सत्यं प्रति निमित्तकारणत्वमेवोच्यते

योरेकतरप्रसक्तिरिति चेन्न; उपादानत्वोपादेयत्वादिवत् सत्यत्वमिथ्यात्वयोः क्रमेणाविरोधात् ॥ नन्वेकस्य पूर्वापरीभूतावस्थाभेदवत्त्वमुपपन्नम्; एतावता कथं स्वरूपतो मिथ्याभूतमुत्तरस्मिन् काले सत्यं भवेदिति चेन्न–पूर्वस्मिन् काले स्वरूपेणासत एव, द्रव्यस्यावस्थाविशेषवत् उत्तरकाले सत्त्वस्याविरोधात् (वस्थाविशेषस्येवोतरकाले सत्त्ववदविरोधात्) ॥ तयोरुत्तरकालवर्तित्वेन सत्त्वं

नोपादानकारणत्वमिति चेत् न । तुल्यन्यायत्वात् । मिथ्याभूतेन निमित्तकारणेनैव भवितव्यं उपादानकारणेन न भवितव्यमिति न हि राजाज्ञा वर्तते । ननु उपादानोपादेययोः तादात्म्यात् उपादानस्थ मिथ्यात्वे कार्यस्य सत्यत्वे च सत्यमिथ्यार्थयोरेकताप्रसङ्ग इति चेत् - न । यथा एकस्यैव उपादानत्वप्रयोजकधर्मः मृत्पिण्डत्वं पूर्वकाले, उपादेयत्वप्रयोजकधर्मः घटत्वं पश्चात्काल इति कालक्रमेण विरोधपरिहारः, तथा मिथ्यात्वं पूर्वकाले, सत्यत्वं पश्चात्काल इति कालभेदेन विरोधपरिहारसंभवादिति भावः ।

नन्वेकस्येति । एकस्यैव पूर्वापरकालभेदेनावस्थाद्वयवत्त्वं भवितुमर्हति । तावता स्वरूपतो मिथ्याभूतमुत्तरकाले कथं सत्यं भवेदिति चेत्-मैवम् । पूर्वस्मिन् काले स्वरूपेणासत एव द्रव्यस्य अवस्थाविशेषवत् उत्तरकाले सत्त्वस्याविरोधात् । अत्र सत्त्वशब्देन मिथ्यार्थनिष्ठतया परैरुक्तं विद्यमानत्वं विवक्षितम् । कार्यस्य पूर्वं सत्त्वे कार्यत्वानुपपत्तेः असत्त्वे च सत्त्वासत्त्वयोः विरोधेनानन्तरं सत्त्वानुपपत्तेश्च कार्यं मिथ्या । मिथ्यात्वे च व्याघाताभावात् पूर्वमसतोऽपि अनन्तरं विद्यमानत्वं युज्यत इति परैरुच्यते । एवं चासत्त्वमिथ्यात्वयोरिव सत्त्वमिथ्यात्वयोरपि न व्याघातः । अन्यथा असत्त्वमिथ्यात्वयोरपि व्याघातप्रसङ्गात् । किं च कार्यकारणयोर्भेदः परैरङ्गीकृत एव । एवं च भेदाभेद सत्यत्वमिथ्यात्वाभ्यां मिथ्यार्थस्य सत्योपादानत्वं भवन्मते उपपद्यत एवेति भावः । **कथमिति** । स्वरूपेणासतः उत्तरकाले कथं सत्त्वमिति न शङ्कनीयम् । पूर्वकालेऽसत एव द्रव्यावस्थाविशेषस्य उत्तरकाले सत्त्ववदनिरोधात् इत्यर्थः ।

तयोरुत्तरकालवर्तित्वेनेत्यादि । तयोः द्रव्यतदवस्थयोः उत्तरकालवर्तित्वेन रूपेण सत्त्वं पूर्वकालेऽप्यस्तीति शङ्का । तत्र सत्त्वशब्देन प्रामाणिकत्वविवक्षायामिष्टापत्तिः ।

पूर्वकालेऽप्यस्तीति चेन्न; तस्य तत्कालेऽपि प्रामाणिकत्वमात्रस्यात्रापि समानत्वात्। तत्कालसंसर्गविवक्षायां विरोधात् । अतः उपादानमिथ्यात्वे श्रुतिसिद्धेऽपि न कार्यमिथ्यात्वसिद्धिः । उपादानसत्यत्वमेव च सद्विद्यादिष्वसत्कार्यवादनिरासपूर्वकं, 'मृतिकेत्येव सत्यम्' इति, 'सन्मूलास्सोम्येमाः' इत्यादिभिरभिधीयते । एवमुपादानमिथ्यात्वेऽपि कार्यसत्यत्वाविरोधोपपादनन्यायेन कार्यमिथ्यात्वेऽप्युपादानसत्यत्वाविरोधोऽप्युपपादित एवेति मिथ्याभूतस्य मिथ्याभूतमेवोपादानं भवितुमर्हतीत्यनिर्वचनीयाज्ञानकल्पनमपि निरस्तमिति ॥

इति शतदूषण्यां मायोपादानत्वान्यथानुपपत्तिभङ्गवादः चतुःपञ्चाशः ॥ ५४ ॥

पूर्वकालसंसर्गविवक्षायां विरोधः । पूर्वकालेऽसतः पूर्वकालसंसर्गविवक्षायां विरोधः । पूर्वकालेऽसतः पूर्वकालसंसर्गायोगादित्यर्थः भाति ।

ननु अस्मान् प्रति आपादितं मिथ्यार्थस्य सत्यवस्तूपादानत्वं असद्वा इदमग्र आसीत्। ततो वै सदजायत'' इतिश्रुत्पनुसारेण भवद्भिः कुतो नेष्यत इत्यत्राह-**उपादानसत्यत्वमेवेति** । मृद्घटदृष्टान्तेन उपादानोपादेययोः ऐक्यप्रतिपादनात् ''मृत्तिकेत्येव सत्यम्'' इति उपादानस्य सत्यत्वकण्ठोक्तेश्च सत्यस्यैवोपादानत्वम् । असद्वा इत्यत्र स्थूलावस्थाभावो विवक्षित इति भावः । प्रसङ्गादाह - **एवमिति** ।

यद्वा जगत् मिथ्या मिथ्योपादानकत्वात् इत्यनुमाने व्याप्तिभङ्ग उक्तः । अथ मिथ्योपादानकत्वरूपहेत्वसिद्धिमाह-**उपादानसत्यत्वमेवेति** । ''कथमसतः सज्जायेत' इति वाक्यं तु तुच्छस्योपादानत्ववारकमित्याहुः ।

इति श्रीशतदूषणीव्याख्यायां तात्पर्यप्रकाशिकायां
मायोपादानत्वान्यथानुपपत्तिभङ्गवादः चतुःपञ्चाशः ॥

++++++

अथ कार्यान्यथानुपपत्ति(कार्यान्वयानुपपत्ति ?)
भङ्गवादः पञ्चपञ्चाशः ॥ ५५ ॥

बालः क्रीडनकैरिव स्थिरचरैः स्वेनैव निर्वर्तितैः
सङ्कल्पैकवशंबदो विहरति ब्रह्मादिभिर्जन्तुभिः ।
जिज्ञास्याय मुमुक्षतामिह पुनः प्राप्याय मुक्तात्मनां
लक्ष्मीकौस्तुभलक्ष्मणे नम इदं तस्मै परब्रह्मणे ॥

यदाहुः–प्रत्यक्षसिद्धं श्रुत्यादिसिद्धं च सर्वं कार्यं मिथ्यैव, विकल्पासहत्वात् । तथा हि–

अथ कार्यान्यथानुपपत्तिभङ्गवादः पञ्चपञ्चाशः ॥

बालः क्रीडनकैरिव स्थिरचरैः स्वेनैव निर्वर्तितैः
संकल्पैकवशंवदो विहरति ब्रह्मादिभिर्जन्तुभिः ।
जिज्ञास्याय मुमुक्षतामिह पुनः प्राप्याय मुक्तात्मनां
लक्ष्मीकौस्तुभलक्ष्मणे नम इदं तस्मै परब्रह्मणे ॥

यथा बालः क्रीडनकैः विहरति तथा स्वेनैव उत्पादितैः स्थिरचररूपैः ब्रह्मादिभिः प्राणिभिः संकल्पमात्रपरतन्त्रः यः विहरति तस्मै मुमुक्षतां जिज्ञास्याय मुक्तानां प्राप्याय लक्ष्मीकौस्तुभे लक्ष्मणी चिह्ने यस्य तस्मै परब्रह्मणे इदं नमः । स्वेनैव निर्वर्तितैरित्यनेन कार्यानुपपत्तिपरिहाररूपो वादार्थः सूचितः । तथा निर्वर्तितैरित्यनेन विवर्तव्यावृत्तेः संकल्पैकवशंवद इत्यनेन पराभिमताविद्यावशत्वाभावप्रतीतेः मुमुक्षतां प्राप्यायेति सत्ययोरेव मोक्षब्रह्मप्राप्त्यो साध्यत्वप्रतीतेश्च वादार्थः संगृहीतः ।

पूर्वं मायोपादानत्वान्यथानुपपत्त्या प्रपञ्चमिथ्यात्वमाशङ्क्य परिहृतम् । अथ कार्यान्यथानुपपत्त्या प्रपञ्चमिथ्यात्वमाशङ्क्य परिह्रियत इति संगतिः । अत्रस्था विषयाः सर्वेऽपि प्रायः आरम्भणाधिकरणश्रीभाष्ये बौद्धाधिकरणश्रीभाष्ये च स्थिताः ।

पूर्वपक्षः

(१) यदाहुः - प्रत्यक्षसिद्धं श्रुत्यादिसिद्धं च सर्वं कार्यं मिथ्यैव । विकल्पासहत्वात्

किं कारणेन कार्यं सम्बद्धमारभ्यते, उतासम्बद्धम् ? आद्ये सम्बन्धाश्रयतया द्वयोरपि सत्त्वाविशेषात् सव्येतरविषाणयोरिव किं कस्य कारणं कार्यं वा ? असंबद्धत्वे तु असंबन्धाविशेषात् सर्वं सर्वस्य कारणं भवेत्; न वा किंचित् कस्यचित्। तथाऽभिव्यक्तिवादिभिरुक्तम्, 'असत्त्वान्नास्ति सम्बन्धः कारणैः सत्त्वसङ्गिभिः। असंबद्धस्य चोत्पत्तिमिच्छतो न व्यवस्थितिः॥' इति।

(२) तथा कार्यं कारणाद्भिन्नम्, अभिन्नं वा ? पूर्वत्र भिन्नत्वाविशेषात् सर्वं सर्वतः स्यात्; न वा कुतश्चित्। उतरत्राऽऽत्माश्रयप्रसङ्गः (ङ्गात्)। नियतपूर्वसत्कारणं

तथा हि किं कारणेन संबद्धं सत् कार्यमुत्पाद्यते उतासंबद्धम्। आद्ये सबन्धाश्रयतया कार्यकारणयो: द्वयोरपि एककाले सत्त्वात् किं कस्य कारणं स्यात्। यथा सव्यदक्षिणविषाणयोरेककाले सतो: इदं कारणम् इदं कार्यमिति न शक्यते तद्वत्: कार्यकारणभावस्य पौर्वापर्यनियतत्वात्। असंबद्धत्वे तु असंबन्धाविशेषात् सर्वं सर्वस्य कारणं भवेत्, न वा किंचित् कस्यचित् कारणं भवेत्। तथा च पूर्वं सदेव कार्यमभिव्यज्यत इति वादिभिरुक्तम्-

असत्त्वान्नास्ति संबन्ध: कारणै: सत्त्वसङ्गिभि:।
असंबद्धस्य चोत्पत्तिमिच्छतो न व्यवस्थिति:॥

कार्यस्य पूर्वमसत्त्वात् पूर्वं सद्भि: कारणै: सह संबन्धो नास्ति। कारणासंबद्धस्य कार्यस्योत्पत्तौ च इदमस्य कारणमिति व्यवस्था न स्यादिति तदर्थ:।

(२) तथा कार्यमित्यादि। कार्यं किं कारणात् भिन्नमभिन्नं वा। आद्ये भिन्नत्वाविशेषात् सर्वं सर्वत: स्यात् - सर्वं सर्वस्य कारणं स्यादित्यर्थ:। न वा कुतश्चित् किंचित् स्यात्। द्वितीये - कार्यस्य कारणाभिन्नत्वे आत्माश्रय:। स्वस्य स्वाधीनोत्पत्तिकत्वमात्माश्रय:। दोषान्तरमाह- **नियतेति**। कार्यनियतपूर्ववृत्ति कारणम्, कारणनियतोत्तरवृत्ति कार्यम्। पूर्वमसत: कार्यस्य कारणादुत्पत्तौ, कारणाभिन्नं कार्यमित्युक्तौ च परस्परविरोधो भवति। कार्यस्य कारणाभिन्नत्वे कारणकाले तदभिन्नं कार्यमस्तीत्यायाति।

नियतोत्तरसत्कार्यमिति विभजसे। तथा च स्वप्रागभावकाले स्वयमेवास्तीति कथं ब्रूयाः ?

(३) तथा विकृतादविकृताद्वा उपादानात् कार्योत्पत्तिः ? पूर्वत्रा(पि) विकृतिरपि विकृतात् अविकृताद्वेति विकल्पेना(ल्पेऽ)नवस्था । उतरत्राविकृतत्वाविशेषात् यावदुपादानसत्त्वमुपादेयारम्भप्रसङ्गः ।। सहकारिसंबन्धादिति चेन्न; तत्सम्बन्धोत्पत्तिरपि विकृतस्य वा अविकृतस्य वेति विकल्पदुःस्थत्वात्। अस्तु च(वा) विकृतं कार्यारम्भकम् । तत्र किं रुचकादिविकृतिविशिष्टं हेमादि स्वस्तिकारम्भकम्, उत रुचकादिमात्रम् ? अथ हेमादिमात्रमिति । नाऽऽद्यः; स्वस्तिके रुचकादिविकृतिविशिष्टहेमानुपलम्भात् । अत एव न द्वितीयः । हेमानुवृत्तिदर्शनविरोधाच्च । न च तृतीयः; आरम्भकहेमातिरिक्तादर्शनात्,

---

तथा च पूर्वमसत्त्वं कथमिति भाव: । **स्वप्रागभावकाल इति** । स्वोत्पत्ते: पूर्वकाले कार्योत्पत्ते: पूर्वकाल इति यावत्, कारणस्य सत्त्वेन तदभिन्नस्य कार्यस्यापि सत्त्वात् कार्यप्रागभावकाले कार्यं नास्तीति कथं ब्रूया इत्यर्थ: ।

(३) **तथा विकृतादित्यादि**। किं विकृतात् कारणात् कार्यमुत्पद्यते, उताविकृतात्। आद्ये विकृतिरपि विकृताच्चेत् अनवस्था। द्वितीये अविकृतात् कारणात् विकृते: कार्यस्य वा उत्पत्तौ अविकृतत्वाविशेषात् उपादानकारणं यावत्पर्यन्तमस्ति तावत्पर्यन्तं कार्योत्पत्तिप्रसङ्ग: । न च देशकालादिरूपसहकारिसंबन्धात् अविकृतमपि कारणं कार्यमुत्पादयति। अत: न सर्वदोत्पादकत्वप्रसङ्ग इति वाच्यम्। देशकालादिसंबन्धोऽपि किं विकृतस्य अविकृतस्य वेति विकल्पावतारात् । तत्राद्येऽनवस्था । द्वितीये अविकृतत्वाविशेषात् सर्वदा देशकालसंबन्ध: । तद्बलाच्च सर्वदा कार्योत्पत्तिप्रसङ्ग: इति भाव: । **अस्तुचेत्यादि**। अस्तु च विकृतम् उपादानकारणं कार्यजनकम्। तत्रायं प्रश्न:- किं रुचकादिविकारविशिष्टं सुवर्णं स्वस्तिकारम्भकम्, उत रुचकादिमात्रम् अथ सुवर्णमात्रमिति। तत्र नाद्य:, स्वस्तिके रुचकाकृतिविशिष्टस्य सुवर्णस्य अनुपलम्भात्। न

(तत्र)त्यभिज्ञानाच्च । वदन्ति हि स्वस्तिकमपि, तदेवेदं हेमेति । न च व्यवस्थितबुद्धि-शब्द-संख्या-परिमाणकार्य-कारण-कालादिभेदात्, पिण्डघटयोर्नष्टत्वानष्टत्वभेदात् कारकव्यापारवैयर्थ्यप्रसङ्गात्, नित्यानित्यविभागानुपपत्तिप्रसङ्गाच्च कारणातिरिक्तकार्यसिद्धिरिति वाच्यम्; रज्ज्वाद्यधिष्ठानसर्पभूदलनाम्बुधारादिबुद्धिशब्दान्तरादिभिरनैकान्तिकत्वात् । न चाबाधितत्वे सतीति विशेष्टव्यम्;

द्वितीय: स्वस्तिके रुचकानुपलम्भादेव । अपि च रुचकमात्रं यदि स्वस्तिकारम्भकं तदा स्वस्तिके सुवर्णानुवृत्तिदर्शनं न स्यात् । नापि तृतीय: । सुवर्णातिरिक्ततया कार्यस्य अभावात्, स्वं प्रति स्वस्यारम्भकत्वासंभवात् । न च सुवर्णव्यतिरिक्तं स्वस्तिकं दृश्यत इति वाच्यम् । स्वस्तिकस्य सुवर्णव्यतिरिक्तत्वाभावात् । सुवर्णमेवेदं स्वस्तिकमिति सुवर्णत्वप्रत्यभिज्ञानात्, सुवर्णातिरिक्तवस्त्वन्तरानुपलब्धेश्च । वदन्ति हि स्वस्तिकमुद्दिश्य तदेवेदं सुवर्णमिति इति भाव: ।

शङ्कते - **न च व्यवस्थितेति** । व्यवस्थितेति बुद्ध्यादौ सर्वत्रान्वेति । कारणातिरिक्तं कार्यमित्यङ्गीकरणीयम् । कारणे तन्तव इति शब्द: कार्ये पट इति शब्द इति शब्दभेदात्, तन्तुषु बहुत्वं पटे एकत्वमिति संख्याभेदात्, तन्तुषु सूक्ष्मत्वं परे महत्त्वमिति परिमाणभेदात्, तन्तुषु कारणत्वं पटे कार्यत्वमिति कार्यत्वकारणत्वभेदात्, तन्तूनां पूर्वकाले सत्त्वं पटस्योत्तरकाल एव सत्त्वमिति कालभेदात्, मृत्पिण्डस्य नष्टत्वम्, घटस्यानष्टत्वमिति नष्टत्वानष्टत्वभेदात्, कार्यस्य कारणाभिन्नत्वे कारकव्यापारवैयर्थ्यप्रसङ्गात्, कारणं नित्यं कार्यमनित्यमिति नित्यानित्यविभागानुपपत्तिप्रसङ्गाच्च कारणातिरिक्तं कार्यं सिध्यतीति शङ्का। समाधत्ते - **रज्ज्वादीति** । तन्तुपटगोचरबुद्धिशब्दान्तरादय: तत्त्वतो भिन्नविषया: बुद्धिशब्दान्तरत्वात् घटपटगोचरबुद्धिशब्दान्तरवत्; तन्तुपटगतसंख्यापरिमाणे तत्त्वतो भिन्नाश्रिते संख्यापरिमाणान्तरत्वात् इत्याद्यनुमानं भवतां विवक्षितम् । तत्र रज्ज्वाद्यधिष्ठानसर्पादिगोचरबुद्धिशब्दान्तरादिभिरनैकान्त्यमित्यर्थ: । अधिष्ठानाध्यस्तयोस्तादात्म्याभ्युपगमादिति भाव: । ननु हेतौ अबाधितत्वे सतीति विशेषणं दीयते । अतो नानैकान्त्यमित्या-

विशेषणासिद्धेः । प्रत्युत तन्निषेधात्–विगीता बुद्धिशब्दा(न्तरा)दयो भ्रान्तिसिद्धभेदावलम्बनाः, दुर्निरूपबुद्धिशब्दान्तरादित्वात्, कम्बुकलधौत-बुद्धिशब्दान्तरादिवत्; मध्येऽप्यसत् कार्यम्, आद्यन्तयोरसत्त्वात्, शुक्ति(का) रजतवत्; विवादगोचरो भेदव्यवहारः स्वविषयसर्वभेदानुगतैकवस्तुमात्रावलम्बनः भेदव्यवहारत्वात् रज्वादिविषयसर्पभूदलनादिभेदव्यवहारवदित्यादिभिः । न चैषां प्रत्यक्षबाधः, तर्कानुगृहीतानुमानात् तस्य च दुर्बलत्वात् । अन्यथा ज्वालैक्यप्रत्यक्षविजयप्रसङ्गात् ।

(४) किंच यदि कारणे पूर्वं कार्यमसत्, कथं तेन जनयितुं शक्यम् ? न हि

शङ्क्याह - **विशेषणासिद्धेरिति** । अबाधितत्वस्य पक्षे संदिग्धत्वेन संदिग्धासिद्धेरित्यर्थः। **तन्निपेधादिति** । अबाःधितत्वनिषेधमेवानुमानेन प्रदर्शयति-**विगीता** इति । किं बुद्धेः बाधः भ्रमत्वज्ञानम्, उत विषयापहारः इति विकल्पमभिप्रेत्य आद्येऽबाधितत्वाभावं प्रदर्शयति - **विगीता** इति । तत्तुपटगोचर- बुद्धिशब्दान्तरादयः भ्रान्तिसिद्धभेदविषयाः कम्बुकलधौतबुद्धि-शब्दान्तरादिवत् इति । भिद्यत इति भेदः, घटाद्यर्थः । अबाधितत्वाभावः बाधितत्वं; तञ्च भ्रान्तिसिद्धभेदविषयकत्व मित्याशयेनेदमनुमानम् । विषयापहाररूपमबाधितत्वाभावं साधयति-**मध्येऽपीति** । कार्यं मध्येऽप्यसत्, आद्यन्तयोरसत्त्वात् (पूर्वं पश्चाच्चासत्त्वात्) शुक्तिरजतवत् इति । व्यवहारपक्षकमनुमानमाह-**व्यवहारभेद इति** । तन्तुपटादिशब्दभेद इत्यर्थः । ननु तन्तुपटादिभेदस्य प्रत्यक्षसिद्धत्वात् तदभावसाधनं प्रत्यक्षबाधितमित्याशङ्क्य तर्कानुगृहीतानुमानस्य प्रत्यक्षापेक्षया प्रबलत्वात् न दुर्बलेन प्रत्यक्षेण प्रबलस्यानुमानस्य बाध इति समाधत्ते- **न चैषामिति** । पूर्वोक्तसंबन्धासंबन्धविकल्पानुपपत्तिरत्र तर्कत्वेनाभिप्रेता। **अन्यथेति** । प्रत्यक्षत्वजातिमत्त्वमात्रेण प्रत्यक्षस्यानुमानापेक्षया प्रबलत्वे ज्वालैक्यावगाहि प्रत्यक्षमपि ज्वालभेदानुमानापेक्षया प्रबलं भवेदिति भावः ।

(४) **किं च यदीत्यादि** । कारणे पूर्वं यदि कार्यमसत्, कथं कारणेन कार्यं जनयितुं शक्यम् । शिलाखण्डेषु प्रलयजलसिक्तेष्वपि अङ्कुराः न हि प्रोहन्ति । असत उत्पत्तौ तत्रापि

प्रलयोदकावसिक्तेष्वपि प्रस्तरेषु अङ्कुराः प्रोहन्ति । न च पीते विश्वकर्मणाऽपि नीलमुत्कीर्यते(कीर्येत) । अतः पूर्वमेव तत्र सत्, सिद्धत्वादेव न साध्यं स्यात् । तत एव कारकव्यापारनैरर्थ्यं (नैरर्थक्यं) च ॥ व्यङ्ग्यत्वमस्त्विति चेन्न; व्यक्तिसदसद्भावयोरप्यनुयोगावतारात् । व्यक्तेरपि व्यङ्ग्यत्वेऽनवस्थानात्, नित्यव्यक्तत्वे घटादेरपि नित्यव्यक्तिप्रसङ्गात् ।

(५) किंच भावात् अभावाद्वा घटाद्युत्पतिः ? नाऽऽद्यः; अनुपमृदितात्पिण्डादेर्घटाद्युत्पत्त्य(त्तेर)दर्शनात् । न द्वितीयः; घटादेरप्यभावात्मकत्वप्रसङ्गात् । एवमन्येऽपि परश्शता विकल्पाः सुलभाः ।

जलावसेकेन अङ्कुरोत्पत्तिः स्यात् । बीजेष्विव प्रस्तरेष्वपि अङ्कुराणामसत्त्वाविशेषात् । एवं पीतेऽपि नीलमुत्कीर्येत । अथं कार्यं पूर्वमेव सत् इति यद्युच्येत, तदा सिद्धत्वादेव तत् साध्यं न स्यात् । किं च कारणे पूर्वं कार्यस्य सत्त्वे कार्यकारकव्यापाराणां वैयर्थ्यं स्यात् इति भावः । ननु पूर्वमेव कारणे सतोऽपि कार्यस्याभिव्यक्त्यर्थं कारकव्यापार इति न तद्वैयर्थ्यमिति शङ्कते - **व्यङ्ग्यत्वमस्त्विति** । कारकव्यापारेण सत एव कार्यस्याभिव्यङ्ग्यत्वमस्तु इत्यर्थः । समाधत्ते-**व्यक्तीति** । पूर्वमेवाभिव्यक्तेः सत्त्वे कारकव्यापारवैयर्थ्यादिप्रसङ्गः । असत्त्वे सर्वदा असत्त्वम् उत्पत्त्यसंभवश्च प्रसजति । नन्वभिव्यक्तिः प्रागेव सती, सैव कारकव्यापारेणाभिव्यज्यत इत्याशङ्क्य अनवस्थाप्रसङ्गः । नित्यं व्यङ्ग्यत्वे कारकव्यापारवैयर्थ्यम् । घटादेरपि नित्यमभिव्यक्तिप्रसङ्गश्चेति परिहरति **व्यक्तेरपीति** ।

(५) **किं च भावादिति** । किं च घटादीनां कार्याणां किं भावात् उत्पत्तिः उत अभावात् । नाद्यः, अनुपमृदितात् मृत्पिण्डात् घटस्योत्पत्तेरदर्शनात् । मृत्पिण्डविनाशादेव घटोत्पत्तेर्दर्शनात् । न द्वितीयः, अभावादुत्पद्यमानघटादेरभावात्मकत्वप्रसङ्गात् । एवमन्येऽपि विकल्पाः असमाधेयाः सुलभाः । तथा हि - किं घटः स्वत उत्पद्यते, उत परतः । नाद्यः, स्वतः स्वोत्पत्तौ आत्माश्रयप्रसङ्गात् । प्रयोजनाभावाच्च । स्वयं विद्यमानत्वात्

एवं जन्मनि निरस्ते विनाशोऽपि निरस्त एव, तुल्यन्यायत्वात् । (६) सदसद्व्यावृत्तविनाशोपलब्धि (लब्ध्य) योगाच्च तदुभयकोटिविलक्षणतया मिथ्यात्वं स्वध्यवसानम्। (७) स्मरन्ति च, 'अनाशी परमार्थश्च प्राज्ञैरभ्युपगम्यते। तत्तु नाशि न सन्देहो नाशिद्रव्योपपादितम् ॥' इति । 'यच्चान्यथात्वं द्विज याति भूयो न तत् तथा तत्र कुतो हि तत्त्वम् ॥' इति च। श्रुतिश्च तदुपबृंहिता, 'वाचारम्भणं विकारो नामधेयम्' इत्यादिका । न च, 'मृत्तिकेत्येव सत्यम्' इत्यादिना ब्रह्मव्यतिरिक्तस्य कार्यभूतस्यापि मृतिकादिद्रव्यस्य सत्यत्वमिह कण्ठोक्तमिति भ्रमितव्यम्, भिक्षुपादप्रसा(स) रणन्यायेन व्यावहारिकसत्य त्वा(ता)नुपमर्देन घटादिमिथ्यात्वप्रतिपादने तात्पर्यात् । अन्यथा दार्ष्टान्तिकप्रतिकूलत्वप्रसङ्गात् । मृत्तिकातिरेकितद्विकारमिथ्यात्ववत् मूलकारणातिरेकिमृत्तिकादिसमस्तस(त)

तदुत्पत्तिनैरपेक्ष्यम् प्रयोजनाभाव: । स्वसत्ता हि उत्पत्ते: प्रयोजनम् । पूर्वमेव स्वस्य सत्त्वात् नोत्पत्ते: प्रयोजनम् । किं च किं सत उत्पत्ति:, उतासत: । सच्चेन्नोत्पत्त्यपेक्षा । असच्चेच्छशविषाणवन्नोत्पत्तिरिति भाव: । **एवं जन्मनीति** । जन्मनि निरस्ते विनाशस्याप्यभाव: । तुल्यन्यायत्वात् जन्मनिरासकन्यायेनैव विनाशस्यापि निरासात् । तथा हि घट: किमिदानीं सन् उतासन् । आद्ये, सत: पश्चादसत्त्वानुपपत्ते: विनाशानुपपत्ति: । द्वितीये विनाशकव्यापारवैयर्थ्यम्, प्रागेवासत्त्वादिति भाव: ।

(६) एवमसंभावितोत्पत्तिविनाशवत्त्वात् उत्पत्तिविनाशवत्त्वेन भासमानं कार्यं मिथ्येत्युपपादितम् । अथ सदसद्व्यावृत्तविनाशोपलब्धियोगान्यथानुपपत्त्या च मिथ्यात्वमध्यवसीयत इत्याह - **सदसदिति** । विनाश उत्पत्तेरप्युपलक्षणार्थ: । **तदुभयकोटिविलक्षणतया** = सदसद्विलक्षणतया । **लब्धीति** । सदसद्व्यावृत्ते विनाशोपलब्धी तद्योगात् इत्यर्थ: । सदसद्व्यावृत्ते एव विद्यमानयो: विनाशोपलब्ध्योर्योगादिति तदर्थ: । ततश्च यदि कार्यं सत् स्यांत् न नश्येत् । नश्यति, अत: सद्विलक्षणम् । यदि असत् स्यात् नोपलभ्येत । उपलभ्यते, अत: असद्विलक्षणत् इति कार्यस्य सदसद्विलक्षणत्वरूपं मिथ्यात्वं सिध्यतीति भाव: ।

द्विकारमिथ्यात्वे हि वाक्य तात्पर्यम्। एतेन, 'प्राणा वै सत्यम्' इति श्रुत्यन्तरमपि निर्व्यूढम् । तत्रापि हि; 'अथ नामधेयं सत्यस्य सत्यं प्राणा वै सत्यं तेषामेष सत्यम्' इति पूर्वोत्तरवाक्यांशपरामर्शेन मध्यगतप्राणविषयसत्यतोक्तिः व्या(सांव्य)वहारिकीं सत्यतामभिसन्धायेति गम्यते।

तदेवं श्रुतिस्मृत्यनुमानतर्कैः सिद्धं कार्यमिथ्यात्वम्। (८) नश्वरत्वाच्च जगतो मिथ्यात्वं निपुणधियां स्वध्यवसानमिति ॥

---

(७) कार्यानुपपत्तिलक्षणः मिथ्यात्वसाधकस्तर्कः श्रुतिस्मृतिभ्यामप्यनुज्ञात इत्याह **स्मरन्ति चेत्यादिना**। अनाशी परमार्थ इति श्लोके आत्मा अनाशी अत एव परमार्थः; आत्मातिरिक्तं सर्वं नाशिद्रव्योपादानकत्वात् विनाशि अत एवापरमार्थ इत्युच्यते । ''यच्चान्यथात्वम्'' इति श्लोकेऽपि यत् परिणामि न तत् सत्यमित्युच्यते। ''वाचारम्भणं विकारः'' इति श्रुतिः घटादिविकाराणां व्यावहारिकत्वं मिथ्यात्वं च वदति। ''मृत्तिकेत्येव सत्यम्'' इति श्रुतिरपि ब्रह्मव्यतिरिक्तस्य कार्यभूतस्य मृत्तिकाद्रव्यस्य सत्यत्वं वदतीति न भ्रमितव्यम्। यथा मृत्तिकाद्रव्यं व्यावहारिकसत्यं न तु पारमार्थिकं तथा घटादिकमपीत्यत्र श्रुतितात्पर्यात्। मूलकारणस्य ब्रह्मण एकस्यैव पारमार्थिकत्वम् इतरस्य तद्विकारस्य सर्वस्यापि मिथ्यात्वमित्यत्रैव वाक्यतात्पर्यात् तदनुगुणतया दृष्टान्ततात्पर्यस्य वक्तव्यत्वात्। अन्यथा दार्ष्टान्तिकप्रतिकूलता दृष्टान्तस्य स्यादिति भावः।

ननु ''प्राणा वै सत्यम्'' इति श्रुत्या प्राणानां सत्यत्वं प्रतिपाद्यते । न च तद्व्यतिरिक्तकार्यमिथ्यात्वे तात्पर्यमिति निर्वाहः शक्यः। कार्यस्य तत्रानुक्तेः। अतस्तच्छ्रुतिविरोध इत्यत आह-**एतेनेति**। वक्ष्यमाणेनेत्यर्थः। **तत्रापि हीति**। यथा राजराजः, मन्मथमन्मथः, पवित्राणां पवित्रम् इत्यादौ ऐश्वर्यसौन्दर्यपावनत्वानामुत्कर्षापकर्षौ गम्येते, तथात्र सत्यत्वोत्कर्षापकर्षौ गम्येते। तत्रापकृष्टं प्राणगतं सत्यत्वं व्यावहारिकसत्यत्वं उत्कृष्टं ब्रह्मगतं सत्यत्वं पारमार्थिकसत्यत्वमिति श्रुतितात्पर्यमिति भावः। पूर्वपक्षमुपसंहरन् मिथ्यात्वे हेत्वन्तरं चाह-**तदेवमिति**। **नश्वरत्वाच्चेति**। नश्वरत्वमेव बाधितत्वम्। तथा च जगतो मिथ्यात्वं नश्वरत्वेन हेतुनापि सिध्यतीत्यभिमानः।

सिद्धान्तः – तत्र (अत्र) ब्रूमः – (१) यदुक्तं कारणेन कार्यं सम्बद्धमारभ्यते, उतासम्बद्धमिति तत्रासम्बद्धमित्येव पक्षः । न हि कारणानां मिथस्सम्बन्धमन्तरेण कार्येणापि सह सम्बन्धः कार्योत्पत्त्यङ्गतया दृष्टचरः; येन तदङ्गीकुर्मः । यत्तु असंबन्धाविशेषात् सर्वं सर्वस्य कारणं भवेदिति–तत् तदा स्यात्, यद्यसम्बद्धत्वमेव कार्यारम्भप्रयोजकं स्यात् । न च तदस्ति; तत्तद्वस्तूनां प्रतिनियतशक्तीनां प्रतिनियतकार्यारम्भकत्वस्यान्वयव्यतिरेकि(क)सिद्धत्वात् । यदि कारणानां कार्यसंबन्धोऽपि कार्यारम्भेऽङ्गमिष्यते, तदाऽनङ्गाङ्गीकारः । अविषयवृतित्वं वा;

सिद्धान्त:

(१) अथ पूर्वपक्षयुक्तीनां क्रमश: दूषणमाह-तत्र ब्रूम इत्यादिना । यदुक्तं कार्यं कारणेन संबद्धं सदारभ्यते उतासंबद्धमिति । तत्र असंबद्धमित्येव पक्ष: । कार्योत्पत्तौ कारणानां परस्परसंबन्ध एव अपेक्षित:, दण्डचक्रादीनामेकत्र मेलने सति घटाद्युत्पत्तेर्दर्शनात्। न तु कार्येणापि संबन्ध: कार्योत्पत्तिहेतुतया दृष्टचर:, येन तदङ्गीकुर्म: । यत्तु असंबद्धत्वाविशेषात् सर्वं सर्वस्य कारणं भवेदिति, तत् तदा स्यात् यदि असंबद्धत्वमेव कार्योत्पत्तिप्रयोजकं स्यात् । न च तदस्ति = असंबद्धत्वस्य कार्योत्पत्तिप्रयोजकत्वं नास्ति। दण्डचक्रादिवस्तूनां घटोत्पादन एव शक्ति:, तुरीतन्तुवेमादीनां पटोत्पादन एव शक्ति: इति व्यवस्थितकार्यारम्भकत्वस्य व्यवस्थितशक्तिमत्सु अन्वयव्यतिरेकाभ्यां निर्णयात् इति भाव:। किं च कारणानां कार्यसंबन्धस्य कार्योत्पत्त्यङ्गत्वस्वीकारे जातिरूपं दोषमाह - **यदीति** । हेत्वाभासवत् जातिनिग्रहस्थाने अपि दोषतया न्यायदर्शने प्रोक्ते । तत्र न्यायपरिशुद्धावाचार्यपादै: अनुगृहीतम् - अथायमपरो जातिसंग्रह: - मर्यादालङ्घनाभ्युपगमपूर्वकमुत्तरं जाति: । मर्यादा च प्रतिष्ठिता प्रमाणसरणि: । स्वव्याघातकत्वमपि मर्यादालङ्घनाभ्युपगमादेव । मर्यादालङ्घनाभ्युपगम: द्विधा परिकरनियमानभ्युपगम: विषयनियमानभ्युपगमश्चेति । प्रथमो द्विधा युक्ताङ्गत्याग: अयुक्ताङ्गपरिग्रहश्चेति । अयुक्ताङ्गपरिग्रहेऽपि हि अन्यूनानतिरिक्तविषयपरिकरनियमानभ्युपगम एव । द्वितीयोऽपि द्विधा प्राप्तविषयत्वत्याग:, तदन्यविषयत्वाभ्युपगमश्चेति - इति । प्रकृते कारणानां कार्यसंबन्धस्य कार्यारम्भाङ्गत्वे अनङ्गाङ्गीकार: (अयुक्ताङ्गपरिग्रह:) अप्राप्त-

कारणानां परस्पर(दृष्टस्य) संबन्धस्य कार्ये संचारणात् । युक्ताङ्गत्यागो वा; असिद्धत्वेनासंबन्धस्य साध्यतां प्रत्युपयुक्तस्य त्यागादिति ।

(२) एतेन भिन्नत्वाभिन्नत्वविकल्पोऽपि निरस्तः, दण्डचक्रादिविलक्षणस्यैव घटादेस्तत्र(त) उत्पत्तिदर्शनात् । उपादानेऽपि हि कार्यकारणयोः (उपादानकारणकार्यावस्थयोः) अत्यन्तभेद एव (हि) दृश्यते । अवयविवादिनां तु द्रव्ययोरपि । एवमपि चेदभेदोऽभ्युपगम्येत (ऽप्यर्थ्येत), तर्हि युक्ताङ्गत्यागः, कार्यकारणभावोपयुक्तस्यैव भेदस्य परित्यागात् । अयुक्ताङ्गस्वीकारो वा; तद्विरोधिन एवाभेदस्य स्वीकारादिति । अन्यथा स्वव्याघातः सार्वभौमः । एवमुत्तरेष्वपि विवेक्तव्यम् ।

विषयकत्वमिति दोषद्वयरूपा जातिः इत्याशयः । तदाह - **कारणानामिति** । युक्ताङ्गत्यागमुपपादयति - **असिद्धत्वेनेति** । उत्पत्तेः पूर्वं कार्यस्यासत्त्वेन कारणेन कार्यस्यासंबन्धः कार्यतां प्रति उपयुक्तः, तस्य त्यागात् युक्ताङ्गत्याग इत्यर्थः ।

(२) कार्यं कारणात् भिन्नमभिन्नं वेति विकल्प्य यत् दूषणं कृतम्, तत्र परिहारमाह - **एतेनेति** । कार्यं कारणात् भिन्नमित्येव स्वीकुर्मः । दण्डचक्रादिभ्यो भिन्नस्यैव घटादेः तत उत्पत्तिदर्शनात् । न च निमित्तकारणात् कार्यस्य भेदोऽस्तु नाम । उपादानकारणात् कार्यस्य भेदः कथमिति वाच्यम् । उपादानस्थले घटत्वाद्यवस्थाया एव कार्यत्वात् तस्याश्चोपादानमृत्पिण्डापेक्षया भिन्नत्वात् । तदाह - **उपादानेऽपीति** । अवयविवादिनां तु समवायिकारणमुपादानकारणमित्युच्यते । ततो भेदस्तु कार्यस्य घटादेः स्पष्ट एवेत्यर्थः । **एवमपीति** । एवं वस्तुस्थितौ सत्यामपि यदि उपादानोपादेययोरभेदोऽङ्गीक्रियेत, तर्हि युक्ताङ्गत्यागः, कार्यकारणभावोपयुक्तस्य भेदस्य त्यागात् । अयुक्ताङ्गीकारो वा, कार्यकारणभावानुपयुक्तस्याभेदस्याङ्गीकारादिति भावः । **अन्यथा स्वव्याघात इति**।

(३) यत्तु विकृतादविकृताद्वोपादानात् कार्यारम्भ इति; तत्र विकारशब्देन यत्किंचिदागन्तुकधर्म(विशेष) विवक्षायाम्, विकृतादिति ब्रूमः । सहकारिसम्बन्धोऽपि हि विकार एव । अथ कार्यरूपेण विकृतत्वं विवक्ष्यते, तदा त्व(अ)विकृतादिति वदामः; अन्यथा आत्माश्रयप्रसङ्गात् । यत्तु अविकृतत्वाविशेषात् सर्वदोत्पादकत्वप्रसङ्ग इति–तन्न; अविकृतस्यैव सहकारिचक्रसन्निपातेन कालविशेषनियतकार्यारम्भोपपत्तेः । यत्तु सहकारिसम्बन्धोऽपि विकृतस्य वा अविकृतस्य वेति विकल्पितम्, तदपि सह-

---

तर्काभासेन कार्यस्य निरासे मिथ्याभूतमपि कार्यं निरसितुं शक्येत । तत्रापि भिन्नमभिन्नं वेति विकल्पसंभवात् । मिथ्यात्वात् सर्वमुपपद्यत इति चेत् - तथा राजशासनविरहात् । दर्शनादिति चेत् - तर्हि तत एव अस्मत्पक्षेऽपि कारणासंबद्धं ततो भिन्नं च कार्यमिति किं न सेत्स्यति । **एवमुत्तरेष्वपीति** । विकृताविकृतादिविकल्पेष्वपि स्वव्याघातपर्यन्ताः दोषाः ज्ञातव्या उद्भावनीयाश्चेति भावः ।

(३) **यत्तु विकृतादित्यादि** । यत्तु विकृतादविकृताद्वा उपादानात् कार्यारम्भ इति विकल्पितम् - तत्र विकारशब्देन यत्किंचिदागन्तुकधर्मविवक्षायां विकृतादुपादानात् कार्यारम्भ इति ब्रूमः । सहकारिसंबन्धरूपागन्तुकधर्मयुक्तात् उपादानात् कार्योत्पत्तेः । कार्यरूपेण विकृतत्वविवक्षायामविकृतादिति ब्रूमः, तादृशविकारस्य पूर्वमभावात् । कार्यरूपेण विकृतात् कार्योत्पत्तावात्माश्रयप्रसङ्गात् इत्यर्थः । **यत्तु इति** । अविकृतात् कार्योत्पत्तौ अविकृतत्वाविशेषात् सर्वदा कार्योत्पत्तिप्रसङ्ग इति यदुक्तं, तन्न । अविकृतस्यैव सहकारिकारणसंनिपातकाल एव कार्यारम्भकत्वेन सर्वदोत्पादकत्वाप्रसङ्गात् इति भावः । **यत्तु सहकारिसंबन्धोऽपि इति** । यदपि सहकारिसंबन्धोऽपि कारणस्य विकृतस्याविकृतस्य वेति विकल्पितम् । तत्र ब्रूमः सहकार्यन्तरसंबद्धस्यैव सहकारिसंबन्ध इति । न च सहकार्यन्तरसंबन्धेऽप्येवं विकल्पावतारादनवस्थेति वाच्यम् । सिद्धानवस्थारूपत्वेनादोषत्वात् । यथा निश्चितप्रामाण्यस्यैव ज्ञानस्य संशयनिवृत्त्याद्युपयोगित्वे प्रामाण्यस्य

कार्यन्तरसम्बद्धस्यैवेति परिहृतम् । न चात्रानवस्था दोषः; सिद्धानवस्थारूपत्वात्। न हि पूर्वं पूर्वं कारणं नास्तीत्युत्तरो (पूर्वपूर्वकारणमस्तीत्यु)त्तरासिद्धिः । न च पूर्वपूर्वाभावे प्रमाणमस्ति, प्रत्युत कार्यमेव प्रमितं सत् कारणप्रवाहे प्रमाणं भवति। अन्यथा कार्यानुदयप्रसङ्गात् । न च नोपलभ्यते कार्यं उपलभ्यमानमपि वा किं बाध्यते ? सर्वकार्यबाधे स्वप्रवृतिविरोधात् । कतिपयकार्य (र्यान्तर) बाधे त्वबाधितकार्यान्तरसद्भावेन कार्यकारणभावमात्रस्यापलपितुमशक्यत्वात् । अन्ततो बाधस्यापि कार्यत्वेन कर्तुमेवाशक्यत्वप्रसङ्गः (क्यस्त्वत्प्रसंगः ?) । बाधस्यापि बाधे व्याघातः स्यादिति ।

परतस्त्वमते प्रामाण्यज्ञानेऽनवस्था, सा च साध्यत्वात् मूलक्षयकरीति दोषः, न तथेयमनवस्थेति भावः । अनवस्थायाः दोषत्वप्रयोजकं मूलक्षयकरत्वमसिद्धत्वं च प्रकृते नास्तीत्याह-**न हीति** । पूर्वपूर्वं कारणमित्यादिना मूलक्षयकरत्वाभाव उक्तः । न च पूर्वपूर्वाभाव इत्यादिना असिद्धत्वाभाव उक्तः । कार्योपलब्ध्या तदुभयमुन्नीयत इत्याशयेनोक्तं **न च नोपलभ्यते कार्यमिति**। ननूपलभ्यमानं कार्यं बाध्यते, अतस्ते नोन्नेतुं शक्यमित्यत्राह-**उपलभ्यमानमिति** । **सर्वकार्यवाध** इति । अत्र चण्डमारुतम् - असद्विलक्षणकार्यस्वरूपाविरोधिबाधविवक्षायां तादृशेनापि कार्येण कारणप्रवाहस्यानुमातुं शक्यत्वात्, सहकार्यन्तरसंबन्धस्य सहकारिसंबन्धसंभवात् सहकार्यन्तरसंबन्धस्य कार्यारम्भकत्वे दोषाभावात् विकृताविकृतादिविकल्पमूलतर्काप्रवृत्तेः मिथ्यात्वसाधनायोगात्, तथा मिथ्यात्वं साधयता स्वरूपासत्यत्वपर्यवसित एव बाधो वाच्यः । एवं च स्वप्रवृत्तिविरोधः, मिथ्यात्वसाधनलक्षणकार्यस्याप्यसिद्धेरिति भावः इति । ननु न सर्वकार्यबाधः अपि तु कल्पितकार्यस्यैव बाध इत्यत्राह - **कल्पितेति** । कल्पितकार्यबाधे तु अकल्पितकार्यान्तरस्य सत्त्वेन तत्कारणस्यापि सद्भावात् कार्यकारणभावसामान्यापलापः कर्तुमशक्य इति भावः । सर्वकार्यबाधपक्षे दोषान्तरमाह - **अन्तत** इति । **कर्तुमिति** । सर्वकार्यबाधस्येति शेषः । इष्टापत्तिमाशङ्क्य परिहरति - **बाधस्येति** । प्रपञ्चबाधस्य बाधे प्रपञ्चसत्यत्वसिद्धेरिति भावः ।

यतु रुचकादिविकृतिविशिष्टं हेमादि, (हेमातिरिक्त) रुचकादिमात्रं वा, हेमादिमात्रं वा स्वस्तिकारम्भकमिति विकल्पितम्-तत्र आरम्भकमिति किं स्वस्तिकनिर्माणोपयुक्ताकारविशिष्टं विवक्षितम्, उत तदुपयुक्ताकार एव ? अथवा रुच(स्वस्ति) काश्रयमात्रमिति; आद्ये रुचकादिविकृतिविशिष्टमिति ब्रूमः । न च स्वस्तिके रुचकाकारा(कारित) हेमानुपलम्भविरोधः; कार्योपयुक्ताकाराणां कार्येऽप्यनुवृत्तेरनपेक्षितत्वात् । तदपेक्षणे चानङ्गाङ्गीकारप्रसङ्गात् । केचन कारणाकाराः कार्येऽप्यनुवर्तन्ते, केचित्तु निवर्तन्त इति यथादर्शनमङ्गीकार्यत्वात् । द्वितीये तु रुचकादिमात्रमिति वदामः । न च हेमानुवृत्तिदर्शनविरोधः, उक्तो(दत्तो)त्तरत्वात् कारणदशावच्छेदकाकारनिवृत्तावप्याश्रयतयोपयुक्तस्य द्रव्यस्य तदाकारविशेषस्य च नाशकाभावादनुवृत्त(त्व)स्य दुर्निवारत्वात् । तृतीये तु हेममात्रमित्येव तत्त्वम्।

यत्तु इत्यादि । यत्तु रुचकादिविकारविशिष्टं हेमादि वा, रुचकादिमात्रं वा हेमादिमात्रं वा स्वस्तिकारम्भकमिति विकल्पितम्, तत्र विकल्पयामः तत्र आरम्भकमिति शब्देन किं स्वस्तिकनिर्माणोपयुक्ताकारविशिष्टं विवक्षितम्, उत तदुपयुक्ताकारमात्रम्, उत रुचकाश्रयमात्रमिति । तत्र आद्ये रुचकादिविकारविशिष्टं हेमादि स्वस्तिकारम्भकमिति ब्रूमः। न च स्वस्तिके रुचकाकारविशिष्टहेम्नः अनुपलम्भात् तस्य विशिष्टस्य स्वस्तिकारम्भकत्वं न संभवति इति वाच्यम् । कार्योपयुक्ताकारणां पूर्वसत्त्वमेवापेक्षितम्, न तु कार्येऽप्यनुवृत्तिरपेक्षिता । तथात्वे अनङ्गाङ्गीकाराख्यो जातिदोषः कार्यानुपयुक्ताङ्गस्य स्वीकार इत्यर्थः । केचन कारणगताः आकाराः मृत्त्वादयः कार्ये घटादावप्यनुवर्तन्ते, केचन कारणाकाराः रुचकादयः कार्ये स्वस्तिकादौ नानुवर्तन्त इति यथादर्शनमङ्गीकार्यमिति भावः। **द्वितीये त्विति** । आरम्भकपदेन स्वस्तिकनिर्माणोपयुक्ताकारमात्रं विवक्षितमिति द्वितीयकल्पे रुचकादिमात्रं स्वस्तिकारम्भकमिति वदामः । न च स्वस्तिके हेम्नोऽनुवृत्तिदर्शनात् तद्विरोध इति वाच्यम् । कारणतावच्छेदकस्य रुचकाकारस्य निवृत्तावपि स्वस्तिकाश्रयतया उपयुक्तस्य सुवर्णस्य तदाकारविशेषस्य सुवर्णत्वस्य च नाशकाभावादनुवृत्तत्वस्य वारयितुमशक्यत्वात् । **तृतीये त्विति** । स्वस्तिकस्य रुचकस्य

न चारम्भकहेमातिरिक्तं न दृश्यत इति वाच्यम्; स्वहृदयविसंवादात्; अन्यथा आरम्भकमपि न दृश्यत इति वक्तुं शक्यत्वात्। अतिरिक्तं तु दृश्यते, तत् किमवयवि द्रव्यान्तरम्, उत तदारम्भकतयाऽभिमतावस्थान्तरमात्रम्, उत विवर्तविशेष इत्येवमादिको हि विवादः। हेमप्रत्यभिज्ञानं तु न च स्वस्तिकप्रतीत्यपह्नवक्षमम्। हेम्न एव स्वस्तिकविशेषितत्वेन प्रत्यभिज्ञोपपत्तेः। अन्यथा पूर्वानुभूतातिरिक्ताकार-

---

वा आश्रयभूतं हेममात्रमारम्भकशब्देन विवक्षितमिति तृतीयकल्पेऽपि न कश्चित् दोषः। न चारम्भकहेमातिरिक्तस्य कार्यस्यादर्शनात् हेम्नः न कारणत्वमिति वाच्यम्। स्वहृदयविसंवादेनैतत्प्रश्नकरणात्; अतिरिक्तस्य स्वस्तिकस्य दर्शनात्। अन्यथा स्वहृदयनिसंवादेन किमप्युच्यते चेत् आरम्भकं हेमापि न दृश्यत इति वक्तुं शक्यत्वात्। हेम्नः अतिरिक्तं तु किंचित् दृश्यते तत् किं स्वस्तिकारव्यमवयविभूतं हेमातिरिक्तं द्रव्यं उत तद्द्रव्यारम्भकतया अवयविवादिनाप्यभिमतं कारणद्रव्यस्यावस्थान्तरम् उत विवर्तविशेष इत्येव विवादः। स्वस्तिके हेमैवेदमिति प्रत्यभिज्ञा स्वस्तिकप्रतीतिं नापह्नोतुं शक्नोति। हेम्न एव पूर्वाननुभूतस्वस्तिकाकारविशिष्टतया प्रत्यभिज्ञाया उपपत्तेः। अन्यथा = अतिरिक्ताकारयोगस्य प्रत्यभिज्ञाविरोधित्वे प्रत्यभिज्ञास्वरूपमेव विंलुप्येत। पूर्वानुभूताकारविशिष्टस्य वस्तुनः पूर्वाननुभूताकारविशिष्टतया ज्ञानं हि प्रत्यभिज्ञा। यथा तद्देशकाल विशिष्टतयानुभूतस्य देवदत्तस्य एतद्देशकालविशिष्टतया ज्ञानं सोऽयमित्याकारकं प्रत्यभिज्ञा। अन्यथा स इत्येव वा स्यात् अयमित्येन वा स्यात् ज्ञानमिति घट्टार्थः।

अथ पड्क्तिव्याख्यानम् - **न च स्वस्तिक** इति। रुचकादिमात्रस्य आरम्भकत्वे यः पूर्वपक्षे दोष उक्तः स इह नास्तीत्यर्थः। **उक्तोत्तरत्वादिति**। त्वयैव रुचकाकृतिमात्रस्य कार्योपरयुक्ताकारत्वस्योक्तत्वादित्यर्थः। एवं च हेम्नः उपादानत्वस्या निवर्तितवात् तदनुवृत्तौ न विरोध इति भावः। **तदाकारविशेषस्येति**। हेमाकारस्येत्यर्थः। **तदारम्भकतयेति**। स्वस्तिकारम्भकतया अभिमतस्य द्रव्यस्यावस्थान्तरमित्यर्थः। **अन्यथा** = अतिरिक्ताकारयोगस्य प्रत्यभिज्ञाविरोधित्वे। **पूर्वानुभूतेति**। पूर्वानुभूताकार-

मन्तरेण कथं सा प्रत्यभिज्ञा ? न हि यत्किंचिद्देशकालावस्थादिविशेषमन्तरेण सोऽयमित्युल्लेखः। अन्यथा स इत्येव स्यात्, अयमित्येव वा।

यत्तु बुद्धिशब्दान्तरादौ, कारकव्यापारवैयर्थ्यप्रसङ्गे नित्यानित्यविभागानुपपत्तिप्रसङ्गे च रज्ज्वाद्यधिष्ठानसर्पादिकं निदर्शितम्; तदपि देशकालादिप्रतिपन्नोपाधौ बाधाभावादेव परिहृतम्। बाधकतया अभ्युपगताश्च प्रत्येकं परिह्रियन्त एव। अत एव दुर्निरूपबुद्धिशब्दान्तरादित्वादिति हेतुरपि निरस्तः।

यत्तु मध्येऽप्यसत् कार्यम् आद्यन्तयोरसत्त्वादिति प्रयुक्तम्–तदप्यबाधितसत्त्वोपलम्भेन बाधितम् । अन्यथा मध्येऽप्यनारोपितं कार्यम्, आद्यन्त-

---

मतिरिक्ताकारं चान्तरेणेत्यर्थः । **अवस्थादिविशेषः** = अवस्थादिभेदः । कालद्वयदेशद्वयादिविषयीकरणमन्तरेणं प्रत्यभिज्ञा न संभवतीत्यर्थः ।

यत्तु बुद्धिशब्दान्तरादाविति । पूर्वपक्षप्रकरणे 'व्यवस्थितबुद्धिशब्दसंख्यापरिमाणकार्यकारणकालादिभेदात् कारकव्यापरवैयर्थ्यप्रसङ्गात् नित्यावित्यनिभागानुपपत्तिप्रसङ्गाच्च कारणातिरिक्तकार्यसिद्धिरिति शङ्कायाः समाधनतया रज्ज्वाद्यधिष्ठानसर्पभूदलनाम्बुधारादिबुद्धिशब्दान्तरादिभिरनैकान्त्यमुक्तम् । तदपि अबाधितत्वे सतीति हेतुविशेषणादेव परिहृतम्। बाधश्च प्रतिपन्नदेशकालोपाधौ निषेधः, तदभावश्च घटादेः सिद्धः । रज्जुसर्पादौ च नास्तीत्यर्थः । एतदुक्तं भवति - तन्तुपटगोचरबुद्धिशब्दान्तरादयः तत्त्वतो भिन्नविषयाः बुद्धिशब्दान्तरत्वात् इत्यनुमाने शङ्किते भवता रज्ज्वाद्यधिष्ठानसर्पभूदलनाम्बुधारादिबुद्धिशब्दान्तरादावनैकान्त्यमुक्तम् । तत्तु हेतौ अवाधितविषयकत्वे सतीति विशेषणात् परिह्रियत इति भावः । तदुपरि बाधकतया ये दोषा उक्ताः विशेषणासिद्धेः इत्यादिना तेऽपि परिह्रियन्त एवेत्याह-**बाधकतयेति** । परिहारप्रकारमेवाह - **अत एवेति** । अवस्थाभेदविषयकतया बुद्धिशब्दान्तरादीनां सुनिरूपत्वादिति भावः ।

यत्तु मध्येऽप्यसत् इति । कार्यं मध्येऽप्यसत् पूर्वं पश्चाच्चासत्त्वात् शुक्तिरजतवत् इति यदुक्तम्; तदपि मध्यकालेऽबाधितसत्तायाः उपलम्भेन बाधितम् । तथा च

योरनारोपितत्वादिति वक्तुं शक्यत्वात्। अस्य चोपलम्भानुवर्तित्वेन प्रबलत्वादनेन पूर्वस्य बाध एव वा। अपिच कार्यमाद्यन्तयोः सत्, अध्यस्तं वा, मध्ये सत्त्वात्, मध्येऽध्यस्तत्वाद्वे(च्चे)ति सांख्यनयेन त्वन्नयेन वा प्रयोगे किं वक्ष्यसि ? उपलम्भविरोधादिकमिति चेत्-तुल्यम्।

यच्च विवादगोचरो भेदव्यवहारः स्वविषयसर्वभेदानुगतैकवस्तुमात्रा(व)लम्बन इति प्रतिज्ञातम्-तत्र किं मृत्पिण्डाद्येकैकोपादानकघटशरावादिभेदव्यवहारमात्रं पक्षीक्रियते, उत सर्पभूदलनादिभेदव्यहारविलक्षणः सर्वोऽपि ? पूर्वत्र श्रुतिनिदर्शितमृत्पिण्ड-लोहमणि-नखनिकृन्तनादिभेदव्यवाहारैरनैकान्त्यम् (रनैकान्तः)। न हि तत्र मृदादिकमनुवर्तते ।। पृथिव्यादिकमनुवर्तत (इति) चेत्;

तस्मिन्ननुमाने बाधित सत्त्वंबाधितत्वं वा उपाधिरिति भावः। तस्मिन्ननुमाने सत्प्रतिपक्षमाह- अन्यथेति। कार्यं मध्येऽप्यनारोपितम् आद्यन्तयोरनारोपितत्वात् घटादिवत् इत्यपि वक्तुं शक्यत्वादिति भावः। प्रतिरोधमुक्त्वा बाधमप्याह - **अस्य चेति**। **अपि चेति**। कार्यम् आद्यन्तयोः सत् मध्ये सत्त्वात् इति सांख्यमतानुसारेण वा, कार्यं आद्यन्तयोरध्यस्तं मध्येऽध्यस्तत्वात् इति त्वदङ्गीकृतहेतुना वा अनुमानप्रयोगे किं समाधानं वक्ष्यसि। उपलम्भविरोधादिकमिति चेत्, तत् कार्यं मध्येऽप्यसत् आद्यन्तयोरसत्त्वात् इत्यनुमानेऽपि तुल्यमिति भावः।

यच्चेत्यादि। यच्चोक्तम् (तन्तुः पटः, मृत् घटः शरावः इत्यादिः) भेदव्यवहारः भिन्नवस्तुविषयकः व्यवहारः स्वविषयेषु भेदेषु भिन्नवस्तुषु अनुगतं यदेकं वक्तु तन्तुमृदादिकं तन्मात्रविषयकः भेदव्यवहारत्वात् रज्ज्वादिविषयकसर्पभूदलनादिभेदव्यवहारवत् इत्युक्तं, तन्न। विकल्पासहत्वात्। तथा हि - तत्र किं भेदव्यवहारपदेन मृत्पिण्डाद्येकैकोपादानकघटशरावादिभेदव्यवहारमात्रं पक्षीक्रियते उत सर्पभूदलनादिभेदव्यवहारविलक्षणः सर्वोऽपि भेदव्यवहारः। आद्ये श्रुतिनिदर्शितमृत्पिण्डलोहमणिनखनिकृन्तनादिभेदव्यवहारेषु व्यभिचारः। स्वविषयभेदानुगतैकवस्तुविषयकत्वरूपसाध्यवाभावात् भेदव्यवहारत्वरूपहेतुसत्त्वाच्च। तदाह - **न हि तत्र मृदादिकमनुवर्तत** इति। ननु तत्रापि अनुगतपृथिव्यादिकमनुवर्तत इत्याशङ्क्य

तदाऽस्तु पृथिव्यादिभेदव्यवहारैः । अथ तत्रापि प्रकृतिभूताविद्यानुवृत्तिं पश्यसि, तथापि ब्रह्माविद्ययोः भेदव्यवहारेणानैकान्त्यं दुस्त्यजम् । न हि ब्रह्माविद्यानुगतं वस्त्वन्तरमिष्यते । न च ब्रह्मैवोभयत्रा(वोभयोर) नुवर्तते, ब्रह्मणि ब्रह्माध्यासानभ्युपगमात्, ब्रह्मभेदानभ्युपगमाच्च । अभ्युपगमे च तद्भेदव्यवहारेण तदेव स्यात्। एतेनोत्तरः कल्पोऽपि दत्तोत्तरः । ब्रह्माविद्याभेद(व्यवहार) स्यापि पक्षीकारे

तथापि पृथिवीजलादिभेदव्यवहारैरनैकान्त्यमित्याह - **पृथिव्यादिकमिति** । शङ्कते - **अथेति**। पृथिव्यादिभेदेषु प्रकृतिभूतायाः अविद्यायाः अनुवृत्तेः पृथिव्यादिभेदव्यवहारेषु अनुगतैकवस्त्वालम्बनत्वमस्तीति न व्यभिचार इति शङ्का । तथापि ब्रह्माविद्याभेदव्यवहारे व्यभिचारः, ब्रह्माविद्योभयानुगतवस्त्वन्तराभावात् अनुगतवस्तुविषयकत्वरूपसाध्याभावात् भेदव्यवहारत्वरूपहेतुसत्त्वाच्चेति समाधानम् । तदाह - **न हीति** । ननु ब्रह्मैव ब्रह्माविद्ययोरुभयोरनुवर्तत इति शङ्कते - **न चेति** । अध्यस्यमानेषु वस्तुषु अधिष्ठानानुवृत्तिर्भवति । ब्रह्मणि ब्रह्माध्यासानुपगमात् ब्रह्मणि ब्रह्मानुवृत्तिर्न भवतीति समाधत्ते-**ब्रह्मणीति** । यदि ब्रह्मद्वयं स्यात् तदैकस्मिन् ब्रह्मणि ब्रह्मान्तराध्यासो भवेत् । ब्रह्मद्वयं तु नाङ्गीक्रियते भवतेत्याशयेन ब्रह्मभेदानभ्युपगमाच्चेत्युक्तम् । स्वस्मिंश्च स्वाध्यासोऽनुपपन्न इति भावः । तथा च ब्रह्माविद्ययोः भेदव्यवहारेणानैकान्त्यं सुस्थिरम् । **अभ्युपगमे चेति** । ब्रह्मद्वयाङ्गीकारे च । **तद्भेदव्यवहारेण** = ब्रह्मद्वयात्मकभेदव्यवहारेण । **तदेव** = अनैकान्त्यमेव स्यात् । ब्रह्मद्वयात्मके भेदे एकवस्त्वनुवृत्त्यभावादिति भावः । सर्पभूदलनादिभेदव्यवहारविलक्षणः सर्वोऽपि भेदव्यवहारः पक्षीक्रियत इति द्वितीयकल्पे पूर्वोक्तव्यभिचारस्थलानां पक्षान्तर्गतत्वात् यद्यपि न व्यभिचारो दोषः; तथापि बाधः । ब्रह्माविद्याभेदव्यवहारस्यापि पक्षत्वात् तत्र उभयानुगतवस्त्वालम्बनत्वाभावात् इत्याह - **एतेनोत्तरः कल्पोऽपीति** । **एतेन** = वक्ष्यमाणदोषात् । ननु ब्रह्माविद्याभेदव्यतिरिक्तत्वं पक्षविशेषणं, अतो न बाधः इत्याशङ्क्य, तर्हि साध्याभाववति ब्रह्माविद्याभेदव्यवहारे हेतुसत्त्वात् व्यभिचार इत्याह -

बाधात्, तद्बहिष्कारे तु तेनैवानैकान्त्यादिति। किं च वस्तुशब्देन परमार्थविवक्षायां दृष्टान्तासिद्धिः न हि रज्ज्वादेः सत्यत्वमिच्छसि। अथ प्रतीयमानमात्रविवक्षा, तदा वस्तुमात्रावलम्बन इति वक्तुं न शक्यते। आरोपितस्यापि घटादेरालम्बनत्वस्यावर्जनीयत्वादिति। यत्तु तर्कानुगृहीतानुमानात् प्रत्यक्षस्य दौर्बल्यं ज्वालैक्यप्रत्यक्षे निदर्शितम्, तदप्यसत्; अनुग्राहकतयाऽभिमतानां तर्काणामपाकृतत्वात्। ज्वालैक्यप्रत्यक्षं तु सादृश्यादिदोषसंभवात् निर्वापितारोपितेऽपि तथैव

तद्बहिष्कारे तु इति। ब्रह्माविद्याभेदव्यवहारस्य पक्षानन्तर्भावे इत्यर्थः। **तेनैव** = ब्रह्माविद्याभेदव्यवहारेणैव।

किं च वस्तुशब्देनेति। विवादगोचरो भेदव्यवहारः स्वविषयसर्वभेदानुगतैकवस्तुमात्रालम्बनः इति प्रतिज्ञायां साध्यघटकवस्तुपदेन परमार्थ इत्यर्थनिवक्षायां अनुगतवस्तुमात्रालम्बन इत्यस्य अनुगतैकपरमार्थालम्बनत्वे सति अनुगतैकपरमार्थातिरिक्तपरमार्थानालम्बन इत्यर्थो भवति। तथा च वक्तुं न शक्यते। घटादेः अतिरिक्तपदग्राह्यस्य परमार्थत्वाभावात्। प्रतीयमान इत्यर्थविवक्षायाम् अनुगतैकार्थालम्बनत्वे सति तदन्यार्थानालम्बन इति साध्यं भवति। तच्च पक्षे बाधितम्। घटादेरपि आलम्बनत्वादिति चण्डमारुतम्। मूले तु वस्तुशब्देन परमार्थविवक्षायां दृष्टान्तासिद्धिः दृष्टान्ते साध्यवैकल्यम्। रज्ज्वादेः परमार्थत्वाभावात् इत्युक्तम्। एतदपि चण्डमारुतेऽभिप्रेतमेव।

यत्तु इत्यादि। बुद्धिशब्दान्तरादीनां भ्रान्तिसिद्धभेदविषयकत्वादिसाधकानामनुमानानां तर्कानुगृहीतत्वात् प्राबल्यं, भेदग्रहिप्रत्यक्षस्य तु दुर्बलत्वम्, यथा ज्वालैक्यप्रत्यक्षस्य तर्कानुगृहीतज्वालभेदानुमानापेक्षया दुर्बलत्वमिति यदुक्तम्। तदपि न। अनुमानानुग्राहकतया भवदुक्ततर्काणां दूषितत्वात् इत्यर्थः। एतत्तु प्रत्यक्षात् तर्कसहकृतानुमानस्य प्राबल्यमङ्गीकृत्योक्तम्। वस्तुतस्तु प्रत्यक्षस्य न तादृशानुमानप्राबल्यात् तेन बाध्यत्वम्, अपितु दोषवत्त्वेन दृष्टज्ञानसजातीयत्वेनाप्रामाण्यशङ्काग्रस्तत्वादित्याह - **ज्वालैक्येति**। सादृश्यादिदोषवशादपि सेयं दीपज्वालेति ऐक्यज्ञानं भवितुमर्हति। यथा दीप आदौ निर्वापितः अनन्तरमारोपितश्च, तत्र दीपज्वालायाः भिन्नत्वे सत्यपि सेयं दीपज्वालेति प्रत्यक्षं **सादृश्य-**

प्रत्यभिज्ञानदर्शनात्, अनन्यथासिद्धसामग्र्यनुवृत्त्यादिहेतुबलात् तत्र च स्वोपजीव्यविरोधादिप्रसङ्गाभावाच्च बाध्यतामनुभवतीति युक्तम्; इह तु विपरीतमिति विशेषः ।

(४) यत्पुनः कारणे कार्यं (पूर्वं) सदसद्वेति–तस्य कोऽर्थः ? किं कार्यद्रव्यं कारणावस्थायां द्रव्यरूपेण विद्यते, न वेति ? तदा सदित्यङ्गीकुर्मः । तथाऽपि न साध्यत्वविरोधः, अवस्थापत्तिरूपेण तदुपपत्तेः । तत एव कारकव्यापारसाफल्यं

मूलकत्वात् भ्रमरूपं जायते । एवं वर्तितैलादिसामग्र्यनुवृत्तिबलाच्च ज्वालैक्यप्रत्यक्षं जायते। तच्चानुमानेन ज्वालभेदग्राहिणा बाध्यते अप्रमाणत्वेन निश्चीयते । तत्र स्वोपजीव्यप्रमाणविरोधादिदोषाभावाच्च बाध्यते । प्रकृतभेदग्राहिप्रत्यक्षस्य तु तादृशा अप्रामाण्यशङ्कावहा दोषा न सन्तीति अनुमानापेक्षया प्रबलत्वात् न तेन बाध्यत्वमिति भाव: ।

(४) **यत्पुन:** इत्यादि । कारणे कार्यं पूर्वं सद्वा असद्वा इति यत् पृष्टम्, तस्य कोऽर्थ:। कार्यद्रव्यं कारणावस्थायां द्रव्यरूपेण वर्तते न वेत्यर्थश्चेत्, द्रव्यरूपेण वर्तत इत्यङ्गीकुर्म:। तथापि कार्यस्य न साध्यत्वानुपपत्ति: द्रव्यरूपेण स्थितस्यापि अवस्थारूपेण साध्यत्वोपपत्ते:। अवस्थारूपेण साध्यत्वादेव कारकव्यापारसार्थक्यम् । द्रव्यरूपेण सत: अवस्थारूपेण कार्यत्वमित्येतावानेवास्मदभिमत: सत्कार्यवाद: । तथा च मृद्द्रव्यरूपेण सत एव घटत्वावस्थावत्त्वं भवति, तदेव कार्यत्वम् । कार्यत्वेनाभिमता अवस्था पूर्वमस्ति वा न वेति पृच्छ्यते चेत् पूर्वं सा नास्तीत्येव ब्रूम: । ननु कथमसती अवस्था जनयितुं शक्यते। न हि प्रलयोदकावसिक्तेष्वपि प्रस्तरेषु अङ्कुरा: प्ररोहन्तीति चेत् मैवम् । पूर्वम् असत्या एव अवस्थाया: उत्पद्यमानतया प्रत्यक्षेण उपलम्भात्, पूर्वं सत्या: अवस्थाया उत्पत्तेरदर्शनात् यथादर्शनमङ्गीकार्यत्वात् । तथा चायुक्ताङ्गस्त्रीकाराख्यो दोष: प्रसजति । जन्यत्वविरोधिन: अवस्थासत्त्वस्याङ्गीकारात् । ननु पूर्वमसत उत्पत्तौ प्रस्तरादिष्वपि अङ्कुरोत्पत्ति: स्यात् शशादयोऽपि शृङ्गवन्त: स्युरिति चेत् - किमियं राजाज्ञा, उत शाप: । केषुचित् कारणेषु देशविशेषे कालविशेषे च प्रतिनियतकार्यविशेषोत्पादनशक्तिरस्ति इति पश्याम: । तावता

च। एतावानेव च नः सत्कार्यवादः ॥ अथ कार्यावस्था कारणदशायामस्ति, न वेति पृच्छसि, तदा नास्त्येव ॥ (इति प्रतीमः) सा कथमसती तेन जनयितुं शक्येतेति चेत्–किं पूर्वं सतीमेव दशां पश्चादुत्पद्यमानां पश्यसि, येनैवं विरोधमाशङ्कसे ? तथा चायुक्ताङ्गस्वीकारः; अवस्थासत्त्वस्य जन्यत्वविरोधिनः स्वीकारात्। असत(असदु) उत्पतौ प्रस्तरादयोऽप्यङ्कुरेयुः, शशादयोऽपि शृङ्गादिम(शृङ्गव)न्तः स्युरिति चेत्-किमियं राजाज्ञा, उत शापः ? न हि नियतशक्तिकेषु कारणेषु देशकालस्वरूपप्रतिनियतकार्यविशेषारम्भकेषु परिदृश्यमानेषु तच्छक्तिविधुरादपि तदुत्पत्तिराशङ्कितुमपि शक्यते ॥ प्रागसतीं दशां पश्चात्सतीमिच्छतोऽवयविद्रव्ये कः प्रद्वेष इति चेत्– न कश्चित्। (न, कस्यचित्) अदर्शनादेव तु नाङ्गीकुर्मः।

(५) यत्तु भावात् अभावाद्वा घटाद्युत्पतिरिति–तत्र किं विद्यमाने द्रव्ये घटाद्यवस्था जायते, उताविद्यमान इति प्रश्नार्थः ? तदा विद्यमान एवेति मन्वीथाः। न हि घटाद्यवस्थोत्पत्तौ मृदादिकं नास्ति। उपमर्दिते(मृदिते)ऽपि हि पिण्डे(ऽपि) पिण्डत्वमेव निवृतम्, न तु द्रव्यम्। अनुपमृदितेभ्यश्च तन्त्वादिभ्यः पटाद्युत्पतिरपि

तादृशशक्तिरहितेष्वपि कार्यं जायतामिति कथमाशङ्क्यते। ननु प्रागसत्याः अवस्थायाः पश्चात् उत्पत्त्या सत्त्वाङ्गीकारे प्रागसतः अवयविद्रव्यस्यैवोत्पत्तिः अङ्गीक्रियताम्, कुतस्तेऽतिरिक्तावयविनि द्वेष इति चेत् - न कश्चिदस्माकं द्वेषः। अवस्थातिरिक्तावयविनमदर्शनादेव नाङ्गीकुर्म इति। **दशाम्** = अवस्थाम्। **किमियमिति**। किं राजाज्ञया एवं शङ्क्यते उत शापवशादित्यर्थः। **प्रागसतीमिति**। भवता असत्याः अवस्थायाः उत्पत्त्यङ्गीकारात् न हि सांख्यवत् असत उत्पत्त्यनुपपत्तेः अवयविनि द्वेषस्तव संभवतीति प्रष्टुरभिप्रायः।

(५) यत्तु भावादिति। यत्तु भावात् अभावाद्वा घटाद्युत्पत्तिरिति पृष्टम्, तत्र किं विद्यमाने द्रव्ये घटाद्यवस्था जायते उताविद्यमाने इति प्रश्नार्थः, तदा विद्यमाने एवेति जानीयाः। मृदादिद्रव्ये विद्यमाने हि घटाद्यवस्था जायन्ते। न हि घटाद्यवस्थोत्पत्तौ मृदादि-

दृश्यते। अथासतो घटाद्युत्पत्तिः, सतो वेति पृच्छसि, तदा सत एवेत्युतरम्। पूर्वं सतः पिण्डात् तदानीं सत एव वा मृदादेः घटाद्युत्पत्तिदर्शनात्। अथ कारणविशेषावच्छेदकावस्था कार्योत्पत्तिदशायां निवृत्ता, न वेति पृच्छसि (पृच्छयते)? तदा पिण्डादौ निवृत्ता, तन्त्वादौ त्वनुवृत्तेति सान्दृष्टिकमिदम्। नचाभावादुत्पत्तौ कार्यस्याभावात्मकत्वप्रसङ्गः; कार्यकारणयोरत्यन्तसालक्षण्यस्य नविलक्षणत्वाधिकरणे निरस्तत्वात्। भावान्तराभाववादिन इष्टप्रसङ्गाच्च।

द्रव्यं नास्ति। न चोपमर्दिते मृत्पिण्ड एव घटादिकं जायते, उपमर्दे च पिण्डमविद्यमानमिति वाच्यम्। उपमर्दितेऽपि पिण्डे पिण्डत्वमेव निवर्तते न तु मृद्द्रव्यम्। अपि च तन्तुभ्यः पटोत्पत्तिस्थले अनुपमृदितेभ्य एव तन्त्वादिभ्यः पटाद्युत्पत्तेः दर्शनात् उपमर्दितादेव कारणात् कार्योत्पत्तिरिति नास्ति नियमः। अथ असतो घटाद्युत्पत्तिः उत सत इति प्रश्नार्थ इति चेत् - तदा सत एव उत्पद्यत इत्युत्तरम्। पूर्वं सतः मृत्पिण्डात् तदानीं सत एव मृदो वा घटाद्युत्पत्तेः दर्शनात्। अथ कारणतावच्छेदकीभूता अवस्था कार्योत्पत्तिदशायां निवृत्ता। न वेति यदि पृच्छसि, तदा मृत्पिण्डात् घटाद्युत्पत्तिस्थले पिण्डत्वरूपा कारणतावच्छेदकावस्था निवृत्ता इति तन्तुभ्यः पटोत्पत्तिस्थले कारणतावच्छेदकतन्त्ववस्था न निवृत्ता परं तु अनुवृत्तेति समाधानम्। यथादर्शनं कारणतावच्छेदकावस्थायाः कार्योत्पत्तिदशायां क्वचिन्निवृत्तिः क्वचिदनुवृत्तिरिति अङ्गीकरणीयत्वात् इति घट्टार्थः।

ननु अभावपदेन प्रसिद्धमभावं गृहीत्वैव भावादभावाद्वेति विकल्प्य दूषितमित्याशङ्क्याह - **न चाभावादिति**। कारणस्याभावरूपत्वे कार्येणाप्यभावरूपेण भवितव्यमिति नियमाभावात्। न विलक्षणत्वाधिकरणे कार्यकारणयोरत्यन्तसालक्षण्यस्य निरस्त्वादिति भावः। भवन्मते भावरूपाज्ञानपरिणामस्य घटादिध्वंसस्याभावरूपत्वेन भावोपादानकस्याभावत्ववत् अभावोपादानकस्य भावत्वमपि न विरुद्धमिति भाव इति चण्डमारुते। अपि चाभावादुत्पन्नस्याभावरूपत्वापादनमिष्टप्रसञ्जनत्वान्न दोषायेत्याह-**भावान्तरेति**। मृत्पिण्डोपमर्दरूपात् मृत्पिण्डनाशरूपात् जायमानं हि घटत्वाद्येव। तच्च

घटत्वादिकमपि हि पिण्डाद्यपेक्षया प्रध्वंसकोटिघटितम्, कपालाद्यपेक्षया तु प्रागभावपक्षनिक्षिप्तम्, कुड्याद्यपेक्षया त्वन्योन्याभावायत इति। ये चान्ये(ऽपि) पश्यतोहराणां प्रलापाः, ''न चेदुत्पत्तिरुत्पत्तेर्नित्यत्वमनवस्थितिः। उत्पत्तावप्यतः कार्यं कारणं वा निरूप्यताम् (च निरूपितम्)॥'' इत्येवमादयः, तेऽप्यनयैव दिशा प्रशमनीया इति।

श्लो. सिद्धानवस्थितिः सामग्र्यात्मकोत्पत्तिसंग्रहे।
अन्यथा स्वपरत्राणान्न काचिदनवस्थितिः॥ इति।

(६) यत्तु सदसद्व्यावृत्तविनाशोपलब्धि(ब्ध्य)योगात् तदुभयकोटिविलक्षणतया मिथ्यात्वमिति, तदपि मन्दम्; उपलब्धिविनाशाभ्यामपि कादाचित्कत्वमात्रसिद्धेः।

भावरूपमप्यभावात्मकमित्यर्थः। तदुपपादयति-**घटत्वादिकमिति**। घटत्वं मृत्पिण्डध्वंसरूपं कपालादिप्रागभावरूपं कुड्याद्यन्योन्याभावरूपमिति भावः। **पिण्डाद्यपेक्षयेत्यादि**। पिण्डादिप्रतियोगिकध्वंसान्तर्भूतं, कपालादिप्रतियोगिकप्रागभावान्तर्गतं, कुड्यादिप्रतियोगिकान्योन्याभावरूपं चेत्यर्थः। **पश्यतोहराणां** = पश्यन्तमनादृत्य द्रव्यापहर्तॄणां चोराणामिति यावत्। **न चेदुत्पत्तिरितिश्लोकः**। उत्पत्तेरुत्पत्तिरस्ति नवेति विकल्प्य उत्पत्तिदूषणार्थःश्लोकः। उत्पत्तावनवस्थितिरित्यन्वयः। उत्पत्तेः उत्पत्तिः नास्ति चेत् उत्पत्तेः नित्यत्वप्रसङ्गः। उत्पत्तेः उत्पत्तिः अस्ति चेत् उत्पत्त्युत्पत्तेरप्युत्पत्तिः तस्या अप्युत्पत्तिरित्येवमनवस्था। अतः कार्यं कारणं वा कथं निरूप्यतामिति भावः। अथवा पक्षद्वयेऽपि दोषसद्भावात् निर्दोषः कार्यकारणभावः भवता निरूप्यतामित्यर्थः। **तेऽप्यनयैव दिशेति**। तामेव दिशमाह-**सिद्धेति**। उत्पत्तिर्नाम समग्रकारणसंपत्तिरिति पक्षे पूर्वपूर्वसामग्रीस्वीकारात् सिद्धा सर्वेष्टा इयमनवस्था न दोषाय। अन्यथा आद्यक्षणसंबन्ध उत्पत्तिरिति पक्षे उत्पत्तिर्नाम अवस्थैव। राहोः शिर इतिवत् भेदव्यवहार इति नानवस्थेति श्लोकार्थः। **स्वपरत्राणात्** इति। अवस्थैव अवस्थावतः स्वस्याश्चोत्पत्तिरिति भावः।

(६) यत्तु सदसदित्यादि। उपलब्धियोगादिति पाठः। सदसद्व्यावृत्ते एव

न ह्युत्तरकालीनो विनाशः, स्वकालेऽप्यसत्त्वं साधयितुमलम् । अथ नित्यमेव सच्छब्दार्थतया परिगृह्य तद्वैलक्षण्यान्मिथ्यात्वमिष्यते, तथाऽप्यनित्यत्वमेव मिथ्यात्वमिति विवक्षितं स्यात्, तथा(दा) (च) वस्तुनो न काचित् क्षतिः । अत एव 'अनाशी परमार्थश्च' इत्यादिस्मृतिरपि निर्व्यूढा । 'वाचारम्भणं विकारो नामधेयम्' इत्यादिका तु श्रुतिरवयविद्रव्यान्तरनिरासपरेति सद्विद्यानिरूपणे व्यक्तमनुसन्धेयम् । अत एव, 'मृतिकेत्येव सत्यम्' इत्यादावपि परमार्थसत्यत्वमेव विवक्षितमिति सिद्धम् ।

वर्तमानयो:विनाशोपलब्ध्यो: योगात् कार्यस्य संदसद्विलक्षणतया मिथ्यात्वं सिध्यति । तथा हि कार्यं यदि सत् विनाशो न स्यात् । विनाशो भवति, अत: सद्विलक्षणम् । कार्यं यद्यसत् नोपलभ्येत । उपलभ्यते, अत: असद्विलक्षणम् । एवंरीत्या सदसद्विलक्षणत्वात् कार्यस्य मिथ्यात्वं यदुक्तं । तदपि मन्दम् । उपलब्धिविनाशाभ्यामपि कादाचित्कत्वमेव कार्यस्य सिध्यति, न मिथ्यात्वम् । तथाहि कार्यस्य उत्तरकाले यो विनाश: स पूर्वकालेऽप्यसत्त्वं साधयितुं न शक्नोति । अथ सत् इत्यस्य नित्यमित्यर्थ: । कार्यस्य विनाशेन हेतुना नित्यविलक्षणत्वं सिध्यति । अतो मिथ्यात्वमिति चेत् न । तथापि अनित्यत्वमेव सिध्येत् । मिथ्यात्वमित्यनेनानित्यत्वं विवक्षितं चेत् न काचित् क्षति: । अनित्यत्वस्यास्माभिरप्यङ्गीकारादिति भाव: । **निर्मूलेति** । सदसद्व्यावृत्तविनाशयोगान्मिथ्येति त्वदुक्तन्यायमूला नेत्यर्थ: । “अनाशी परमार्थश्च” इति स्मृतिश्च प्राज्ञानां परमार्थशब्दप्रयोगनिमित्तप्रदर्शनपरा । तत्प्रदर्शनं च श्रेयसामल्पकालतया तदभावकालस्यैव भूयस्त्वात् मध्याल्पकालसत्त्वं तिरस्कृत्य तस्यासत्कल्पतया हेयत्वं परमात्मन: सर्वदा सत्यतया उपादेयत्वं च प्रदर्शयितुम् । अयं चार्थस्तत्प्रकरणे स्पष्ट: ।

“तत्तु नाशि न संदेहो नाशिद्रव्योपपादितम्” इत्यस्यायमर्थ: । नाश्युपपादितस्य नाशित्वे उपासनस्यापि नाशित्वात् तदुपपादितस्य मोक्षस्यापि नाशिता स्यादित्यत उक्तम् द्रव्येति । द्रव्यशब्दो देयद्रव्यपर: । नश्वरद्रव्यप्रदानेन देवताभ्य: प्राप्यमानं फलं

अतः प्रत्यक्षादिशरणैः श्रुतिशरणैरपि कार्यजातस्य सर्वस्य सत्यत्वमेष्टव्यम्। अन्यथा प्रागुक्ततर्काभासैः कारणमपि किं न खण्ड्यते ? प्रत्यक्षश्रुत्यादिबलादिति तु समानम् । अथ यदि कारणस्यापि भङ्ग इष्ट इत्याशयः, तथा सति कारणसत्यत्वमत्यादरेण प्रतिपादयन्ती श्रुतिर्बाध्येत(बाध्यते) । एतेन कारणसामान्यं तद्विशेषांश्च खण्डयतां वेदबाह्यत्वं तावत् सुव्यक्तम्। विशेषदूषणानि तु स्वावसरे ग्राह्याणि।

स्वप्रदत्तद्रव्यानुगुण्येन नश्वरमेव भवति । उपासनस्य नश्वरत्वेऽपि तस्य स्नेहरूपत्वात् तेन स्निग्धेन परमपुरुषेण अत्युदारेण सर्वशक्तेन दीयमानस्य पुरुषार्थस्य तादृशक्त्यानुगुण्यमेव भवतीति नित्यपुरुषार्थदानमुपपद्यत इति ।

"वाचारम्भणम्" इत्यत: प्राक् "अत एव" इत्यधिकपाठ: इति व्याख्यानादवगम्यते। घटादे: मृत्तिकात्वेनैव सत्यता, न तु तद्व्यतिरेकेणेति अवयविनिराकरणपरत्वेन प्रपञ्चमिथ्यात्वे तात्पर्याभावात् प्रपञ्चस्य पारमार्थिकसत्यत्वमेवोच्यत इति भाव: । "इत्यादिका" इति आदिशब्देन" प्राणा वै सत्यं तेषामेष सत्यम्" इत्यादि वाक्यं विवक्षितम् । प्राणशब्देन प्राणसाहचर्यात् जीवा उच्यन्ते । ते सत्यम्, स्वरूपविकाराभावात् । इदं जीवब्रह्मसाधारणम्। जीववत् कर्मकृतस्वभावविकाराभावात् परमात्मा ततोऽपि सत्य इत्युच्यते । कर्मकृतविकारो हि साक्षाज्जीवे स्वनिष्ठत्वभ्रमयोग्य: । परमात्मनस्तु स्वभावविकारो न तथेतीदं वैषम्यमाश्रित्य "सत्यस्य सत्यम्" इत्युक्तम् इति भाव: । **अत इति** । प्रत्यक्षादिप्रमाणानां श्रुतीनां च कार्यजातस्य सर्वस्य मिथ्यात्वे न तात्पर्यं सत्यत्वे एव तात्पर्यमितीयता ग्रन्थेन निरूपितत्वात् प्रत्यक्षादिप्रमाणशरणै: श्रुतिशरणैश्च कार्यस्य सर्वस्यापि जगत: सत्यत्वमङ्गीकरणीयम् । अन्यथा भवदुक्तैरेव तर्काभासै: मृदादिकं कारणमपि मिथ्येति कुतो नेष्यते । यदि च कारणस्यापि खण्डनं मिथ्यात्वं इष्यते तर्हि "मृत्तिकेत्येव सत्यम्" "कार्ष्णायसमित्येव सत्यम्" "लोह इत्येव सत्यम्" इति बहुवारं कथनेन कारणसत्यत्वे अत्यादरं प्रदर्शयन्ती श्रुतिर्बाध्येतेति भाव: । **खण्डयतामिति** । खण्डनकारादीनामिति शेष:।

(८) यश्चासौ व्यामोहः– नश्वरत्वादेव विश्व(स्य) मिथ्यात्वमिति-स किं नाशबाधविवेकाभावात्, उत तयोर्व्याप्यव्यापकभावाभिमानात् ? न प्रथमः; उभयोरपि विवेकस्य सुप्रसिद्धत्वात्। स्वकाले सत एव(थिस्य) स्वोत्तरकालासत्त्वं नाशः, बाध्यत्वं तु स्वप्रतीतिकालेऽप्यसत्त्वलक्षणमिति ॥ असत्त्वमेव नाश इत्येतावता पर्याप्तौ किं विशेष्यत इति चेन्न; प्रागभावेऽपि विनाशशब्दप्रयोगप्रसङ्गात्। तत्राऽप्युत्तरकालासत्त्वमित्येतावताऽलमिति चेत्(न); गगनकुसुमादावपि प्रसङ्गात्। स्वकाले सत एवार्थस्यान्यापेक्षयोत्तरकाले स्वप्रागभावकालेऽप्यसत्त्वसंभवात् तद्व्यवच्छेदार्थं स्वोत्तरकालासत्त्वमिति विशेष्यते । एतावदेव

यश्चासौ व्यामोह इत्यादि । यच्च नश्वरत्वादेव जगतो मिथ्यात्वं निपुणधियां स्वध्यवसानमिति व्यामोहगर्भं भवतां वचनम् । तत् नाशबाधविवेकाभावात् उत तयो: नाशबाधयो: व्याप्यव्यापकभावाभिमानात् । नाद्य: । नाशबाधयोरुभयोरुपि विवेकस्य सुप्रसिद्धत्वात्। तथा च बाध एव मिथ्यात्वसाधक: न तु नाश: । तथा हि - नाशो नाम स्वकाले सत एवार्थस्य स्वोतरकालेऽसत्त्वम् । बाध्यत्वं तु स्वप्रतीतिकालेऽप्यसत्त्वम् इति भाव: । शङ्कते **असत्त्वमेवेति** । असत्त्वमेव अभाव एव नाश इत्येतावतैव पर्याप्तत्वात् स्वोत्तरकाले इति विशेषणं किमर्थमिति शङ्का । समाधत्ते - **प्रागभावेऽपीति** । अभाव एव नाश इत्युक्तौ प्रागभावेऽतिव्याप्ति: स्यात् । तद्वारणाय नाशलक्षणे स्वोतरकाले इति विशेषणमिति भाव: । शङ्कते-उत्तरकालेऽसत्त्वं नाश इत्येवास्तु स्वकाले सत एवार्थस्य इति विशेषणं किमर्थम् इति शङ्का । गगनकुसुमादौ उत्तरकाले असत्त्वात् नाशलक्षणातिव्याप्ति: स्यात् । तद्वारणाय स्वकाले सत एवार्थस्येत्युक्तम् इति भाव: । स्वोत्तरकाले इत्यत्र स्वपदस्य प्रयोजनमाहस्वकाले इति । **स्वकाले** सत एवार्थस्य अन्यापेक्षया उत्तरकालरूपे स्वप्रागभावकालेऽप्यसत्त्वसंभवात् तादृशप्रागभावेऽतिव्याप्तिवारणाय स्वपदमिति भाव: । तर्हि स्वोत्तरकाल इत्यनेनैव गगनकुसुमादावतिव्याप्तिवारणसंभवात् स्वकाले सत एवेति किमर्थमित्याशङ्कायामाह-**एतावदेवेति** । स्वोत्तरकालेऽसत्त्वं नाश इत्येव निष्कृष्टं लक्षणम्। पूर्वं तु = स्वकाले सत एवेत्येतत्तु वैशद्यार्थमिति भाव: ।

Puranattukara.P.O., Thrissur-680551
Acc.No. 39370
Acc.Date 27/02/2026

निष्कृष्ट(निष्कर्ष)लक्षणम्, पूर्वं तु वैशद्यार्थम् । यदि वस्तुनो यथाकथञ्चिदसत्त्वं(त्त्वमात्रं) मिथ्यात्वमिति विवक्षितम्, तदाऽ(तद)स्माकमिष्टापादनम्। परस्पराभावादिमत्तया(रूपताया) केनचिदाकारेण सर्वेषामसत्त्वाभ्युपगमात्, कार्याणां च विनाशाभ्युपगमात् । तावन्मात्रमेव मिथ्यात्वशब्देनोपचर्य(नोच्चार्य) माणमपि नास्माकमनिष्टमापादयति । नापि द्वितीयः व्याप्तेरभावात् ॥ रज्जुसर्पादिषु व्याप्तिस्सिध्यतीति चेन्न; तत्र विनाशस्यानभ्युपगमात् । अर्थबाध एव हि तत्र व्यक्तः । गन्धर्वनगरादिषु विनाशोऽपि प्रत्यक्षसिद्ध इति चेन्न; तत्रापि मिथ्यात्वपक्षे

यदीत्यादि । यदि वस्तुनः यथाकथंचिदसत्त्वं मिथ्यात्वमिति विवक्षितम् । तदा अस्माकमिष्टापत्तिः । कथमित्यत्राह - **परस्पराभावादिमत्तयेति** । परस्परं भिन्नतयेत्यर्थः। तथा च घटः पटत्वेन असन् पटभिन्नत्वात्, एवं पटः घटत्वेनासन् घटभिन्नत्वात् इत्येवंरूपेण सर्वेषामसत्त्वस्यास्माभिरङ्गीकारात् । तथा च सत्यस्यैव येन केनचिदाकारेणासत्त्वरूपं मिथ्यात्वं संभवतीति न सत्यत्वविरोध इति भावः । **कार्याणां चेति** । किं च कार्याणां विनाशाङ्गीकारात् उत्तरकालेऽसत्त्वमस्तीति तादृशासत्त्वात्मकं मिथ्यात्वं नानिष्टमिति भावः। तदाह - **तावन्मात्रमेव चेति** ।

एतावता नाशबाधविवेकाभावात् इति प्रथमकल्पो निरस्तः । अथ तयोर्व्याप्यव्यापकभावाभिमानादिति द्वितीयकल्पं निरस्यति - **नापि द्वितीय इति** । यत्र यत्र विनाशः तत्र तत्र बाध इति व्याप्तिर्नास्ति इति भावः । न च रज्जुसर्पादिषु नाशबाधयोः व्याप्तिरस्तीति वाच्यम् । रज्जुसर्पादेः बाधसत्त्वेऽपि नाशस्याभावात् । अर्थबाधो नाम स्वप्रकारकप्रतीतिविशेष्यनिष्ठोऽत्यन्ताभावः । न तु नाशः । न च गन्धर्वनगरादिषु बाधोऽपि दृश्यते, नाशोऽपि दृश्यते इति नाशबाधयोर्व्याप्तिस्तत्र गृह्यत इति वाच्यम् । तत्रापि

बाध एव । विनाशभ्रमस्तु स्यात्, सत्यत्वभ्रमवत् । तत्सत्यत्वपक्षे तु कथं तत्र विनाशमिथ्यात्वयोः व्याप्तिर्ग्राह्या ? अतः उत्पत्तिविनाशयोरपि (उत्पातिविनाशयोगि ?) (सर्वं) कार्यं स्वकाले सदेवेति सिद्धम् ॥

॥ इति शतदूषण्यां कार्यानुपपत्तिभङ्गवादः पञ्चपञ्चाशः ॥ ५५ ॥

गन्धर्वनगरादीनां मिथ्यात्वपक्षे बाध एव । विनाशभ्रमस्तु स्यात् सत्यत्वभ्रमवत्, न तु वास्तवो विनाश: । तेषां सत्यत्वपक्षे तु कथं तत्र विनाशमिथ्यात्वयो: व्याप्तिर्ग्रहीतुं शक्यते, मिथ्यात्वाभावात् इति भाव: ।

वादार्थं निगमयति - **अत इति** । उत्पत्तिविनाशयोरिति सप्तमीद्विवचनम् । उत्पत्तौ विनाशे च सत्यपीत्यर्थ: । **सदेवेति** । सत्यमेवेत्यर्थ: ।

इति श्रीशतदूषणीव्याख्यायां तात्पर्यप्रकाशिकायां
कार्यानुपपत्तिभङ्गो नाम पञ्चपञ्चाशो वाद: ॥

* * *

अथ आनन्त्यनिरूपणवादः षट्पञ्चाशः ॥ ५६ ॥

देशानामपि देशतामुपगतं स्वाभाविकात् वैभवात्
कालस्यापि कलाद्युपाधिकलनात् काल्यत्वहेतुं स्तुमः ।
निश्शेषेऽपि विभूतिकोटिघटिते निम्नोन्नते वस्तुनि
स्वाच्छन्द्येन जहत्समाधिककथासंभावनं तन्महः ॥

अथ आनन्त्यनिरूपणवादः षट्पञ्चाशः ॥

देशानामपि देशतामुपगतं स्वाभाविकाद्वैभवात्
कालस्यापि कलाद्युपाधिकलनात् काल्यत्वहेतुं स्तुमः ।
निश्शेषेऽपि विभूतिकोटिघटिते निम्नोन्नते वस्तुनि
स्वाच्छन्द्येन जहत्समाधिककथासंभावनं तन्महः ॥

परमात्मनः देशपरिच्छेदाभावः प्रथमपादेन, कालपरिच्छेदाभावः द्वितीयपादेन, वस्तुपरिच्छेदाभावः तृतीयपादेन च प्रतिपाद्यते । परिच्छेदत्रयराहित्यात् समाधिकराहित्यं चतुर्थपादेन प्रतिपाद्यते । स्वाभाविकात् स्वतस्सिद्धात् वैभवात् विभुत्वात् देशानामपि देशतामुपगतं, कलामुहूर्ताद्युपाधिसंयोजनात् कालस्यापि काल्यत्वहेतुं परिणामहेतुम्, नियाम्यकोट्यन्तर्भूते निम्नोन्नते उच्चनीचभावमापन्ने निश्शेषे वस्तुनि-वस्तुमध्ये स्वाच्छन्द्येन हेतुना समाधिकसंभावनारहितं तत् श्रुतिप्रसिद्धं महः स्तुमः । जहती समाधिकसंभावना यत् तत् इति द्वितीयाबहुव्रीहिः । सर्वेष्वपि विभूत्यन्तर्गतवस्तुषु यत्प्रतियोगिकसाम्याधिक्यसंभावनास्पदं किमपि वस्तु नास्ति तत् महः स्तुम इति यावत् । वस्तुनीति निर्धारणे सप्तमी।

समाधिकवस्तुनी निर्धार्ये । विभूतिकोटिघटित इति हेतुगर्भविशेषणम् । विभूत्यन्तर्गतत्वात् नियाम्यत्वात् हेतोः किमपि वस्तु सममिति वा अधिकमिति वा संभावयितुमशक्यमित्यर्थः । निम्नोन्नत इति । यथा निम्नं स्तम्बादि समाधिकसंभावनानर्हं तथा उन्नतमपि हिरण्यगर्भादिकमपि सर्वेश्वरापेक्षया तत्संभावनानर्हमिति तात्पर्यम् ।

कार्यान्यथानुपपत्त्या प्रपञ्चमिथ्यात्वासिद्धावपि श्रूयमाणानन्त्यानुपपत्त्या मिथ्यात्वं भवतु इत्याक्षेपात् संगतिः ।

यत्पुनः परिभाषन्ते—अनन्तपदसामर्थ्यादेव ब्रह्मव्यतिरिक्तानन्तवस्तुमिथ्यात्वं सिध्यति। तथा हि—अनन्तशब्देन असङ्कोचात् सर्वविधपरिच्छेदाभावोऽप्युच्यते; परिच्छेदश्चतुर्धा—देशतः, कालतः, वस्तुतः, स्वरूपतश्चेति। तत्र गगनकुसुमादिवत् स्वरूपपरिच्छेदः सद्रूपत्वेन प्रतिक्षिप्यते। तच्च सत्यपदेनैव सिद्धमित्यनन्तपदेन तद्विवक्षा भवतु वा, मा; वा त्रिविधपरिच्छेदाभावस्तावद्विवक्षित एव। तत्र सर्वदेशसर्वकालव्यापित्वात्, अत्र देशे नास्ति, अत्र काले नास्तीत्येवं-रूपयोर्देशकालपरिच्छेदयोरभावः सिद्धः। वस्तुपरिच्छेदस्तु इदमिदं न भवतीत्येवंरूपः। आश्रयप्रतियोगिविशिष्टस्य भेदस्याभावो (भवन्) भेदतत्प्रति योगितदाश्रयाणां सर्वेषाभावाद्वा, अन्यतमाभावाद्वा ? आद्ये शून्यवादावतारः। द्वितीयेऽपि सर्ववस्तुतादात्म्याद्वा, स्वव्यतिरिक्तसमस्तमिथ्यात्वाद्वा, स्वस्य तुच्छत्वाद्वा संभवति; तत्राद्यः पक्षोऽभ्यर्हितविरोधानामर्हन्मतार्हाणां भास्करादीनामेव युज्यते। अन्तिमस्त्वर्थो लोकायतिकानां निरीश्वरमीमांसकादीनाम्। अतो मध्यमः पक्षः

पूर्वपक्षः

परिभाषन्ते इति। तेषां परिभाषामात्रम्, न तु युक्तियुक्तत्वमिति भावः। अनन्तपदेति। अनन्तपदार्थान्तर्भूतो वस्त्वपरिच्छेदः वस्त्वन्तरभेदाभावः, अयं च वस्त्वन्तरमिथ्यात्वेनैव निर्वहतीति भावः। परिच्छेदः चतुर्धा देशतः परिच्छेदः कालतः परिच्छेदः वस्तुतः परिच्छेदःस्वरूपतः परिच्छेद इति। तत्र स्वरूपतः परिच्छेदो नाम गगनकुसुमादिवदसत्त्वम्। तदभावः ब्रह्मणः सद्रूपत्वादेव ज्ञायते। सोऽपि सत्यपदेनैव लभ्यत इति अनन्तपदेन तद्विवक्षा अनावश्यकी। आवश्यकत्वेऽपि त्रिविधपरिच्छेदराहित्यमप्यवश्यमनन्तमदेन विवक्षितम्। तत्र ब्रह्मणः सर्वदेशसर्वकालवृत्तित्वात् अत्र देशे नास्ति अत्र काले नास्तीत्येवंरूपयोर्देशकालपरिच्छेदयोरभावः सिद्धः। देशनिष्ठात्यन्ताभावप्रतियोगित्वं देशपरिच्छेदः तदभावः, कालनिष्ठात्यन्ताभावप्रतियोगित्वं कालपरिच्छेदः तदभावश्च सिद्ध इति यावत्। वस्तुपरिच्छेदस्तु इदमिदं न भवतीत्येवं रूपः = इत्येवं प्रतीयमानो भेदः

परिशिष्यते। न च वाच्यं वस्त्वन्तराभावे तन्निरूपितपरिच्छेदाभावेन तन्निरूपणीयवस्तुपरिछेदाभावो दुर्वच इति; वस्तुपरिच्छेदाभावेन वस्तुपरिच्छेदाभावो दुर्वच इति स्ववचनव्याघातात्।

ननु प्रत्यक्षाद्यविरोधेन वस्तुपरिच्छेदाभावो वर्णनीयः; अन्यथा

तदभावः आश्रयप्रतियोगिविशिष्टस्य भेदस्याभावः ब्रह्मणि, तादृशप्रतीतिविषयाणां भेदतत्प्रतियोगितदाश्रयाणां सर्वेषामभावाद्वा तदन्यतमाभावाद्वेति पर्यालोचनीयम्। आद्ये शून्यवादप्रसङ्गः। द्वितीयेऽपि ब्रह्मणः सर्ववस्तुतादात्म्यात् सर्ववस्तुप्रतियोगिकभेदाभावप्रयुक्तः आश्रयप्रतियोगिविशिष्टस्य भेदस्याभावः इत्युच्यते वा, स्वव्यतिरिक्तस्य समस्तस्य मिथ्यात्वाद्वा स्वस्य तुच्छत्वाद्वा भवितुमर्हति इत्युच्यते वा तत्र आद्यः पक्षः सर्ववस्तुतादात्म्यप्रयुक्तः सर्ववस्तुभेदाभावः अर्हन्मतार्हाणां भास्करादीनामेव मते युज्यते। तादात्म्यं हि भेदसहिष्णुरभेदः। स च सप्तभङ्गीवादवत् विरोधं बहुमन्यमानानां भास्करादीनामेव युज्यते। भावाभावसमावेशप्रसङ्गो विरोधः।

स च तैरिष्टप्रसङ्गत्वेन स्वीक्रियत इति भेदसहिष्णोरभेदस्य बहुमानपात्रत्वम्। स्वस्य ब्रह्मणः तुच्छत्वात् इति तृतीयः पक्षोऽपि ईश्वरानङ्गीकर्तॄणां चार्वाकाणां निरीश्वरमीमांसकादीनां च पक्षे। अतः स्वव्यतिरिक्तसमस्तमिथ्यात्वादिति द्वितीयः पक्षः परिशियते। अतस्तदेव वस्तुपरिच्छेदराहित्यमिति घट्टार्थः।

न च वाच्यमित्यादि। यदि ब्रह्मातिरिक्तं वस्त्वन्तरं मिथ्या तर्हि वस्त्वन्तरस्याभावात् तन्निरूपितपरिच्छेदाभावात् तादृशपरिच्छेदनिरूपणीयः परिच्छेदाभावो दुर्वचः। परिच्छेदस्य किंचिद्वस्तुनिरूप्यत्वात् अभावस्य प्रतियोगिनिरूपणीयत्वाच्चेति शङ्का, वस्तुपरिच्छेदाभावात् वस्तुपरिच्छेदाभाव इति स्ववचनव्याघातः। अतः वस्त्वन्तरस्य मिथ्यात्वेऽपि तस्य असद्व्यावृत्तं स्वरूपमङ्गीक्रियते, तत एव च परिच्छेदतदभावौ सुनिरूपौ इति परिहारः। **ननु इत्यादि**। सति संभवे प्रत्यक्षाद्यविरोधेन वस्तुपरिच्छेदाभावो वर्णनीयः। अन्यथा प्रागुक्ताद्यान्तिमपक्षयोरपि निरासायोगात्। प्रत्यक्षादिविरोधाद्धि तौ निरस्तौ।

प्रागुक्तपक्षयोरपि प्रतिक्षेपायोगात् । शक्यते चाविरोधेन निर्वहणम्; तथा हि– वस्तुना परिच्छेदो वस्तुपरिच्छेदः, यथा कुड्यादिभिरालोकादेः । स चास्य नास्तीति वस्तुपरिच्छेदरहितं ब्रह्मेति ॥ तदसत्; देशपरिच्छेदात् ईदृशस्य वस्तुपरिच्छेदस्य विशेषाभावात् ॥ स्वतः परिमितदेशा घटादयः । आलोकादयस्तु प्रसृमरतया स्वतोऽनेकदेशव्यापिनोऽपि कुड्यादिभिरुपाधिभिः परिच्छिद्यन्ते । इह तु कथं परिच्छेद इति चेन्न– तथाऽप्यदूरविप्रकर्षेण पृथक्प्रतिपादनप्रयोजनाभावात् । एतेन वस्तुपरिच्छेदो वस्तुनः परिमाणम्, देशपरिच्छेदस्तु तत्कार्यम् इति विभागोऽपि प्रत्युक्तः।

शक्यते च वस्तुसत्ताग्राहिप्रत्यक्षाद्यविरोधेन ब्रह्मणि वस्तुपरिच्छेदाभावः निर्वोढुम् यथा सर्वत्र प्रसृमरस्य आलोकादेः कुड्यादिना परिच्छेदो भवति । तद्वत् सर्वव्यापिब्रह्मणः केनापि वस्तुना परिच्छेदो नास्तीति श्रुतितात्पर्यम्, न तु वस्त्वन्तरमिथ्यात्वे इति शङ्का । परिहरति **तदसदित्यादिना** । देशपरिच्छेदापेक्षया ईदृशस्य वस्तुपरिच्छेदस्य विशेषाभावात् । विशेषोऽस्तीति शङ्कते - **स्वत इत्यादिना** । घटादयस्तावत् स्वतः परिमितदेशवर्तिनः, आलोकादयस्तु प्रसृमरतया स्वतोऽनेकदेशव्यापिनः कुड्यादिभिरुपाधिभिः परिच्छिद्यन्ते इति विशेषः अस्ति । इह तु ब्रह्मणि तु कथं परिच्छेदो भवेत् स्तोऽपरिमितत्वात् उपाधितोऽपि परिच्छेदाभावात् इति भावः । परिहरति - **तथापीति** ।

भवद्वर्णितदेशपरिच्छेदवस्तुपरिच्छेदयोः नाधिकं वैलक्षण्यम् । परिच्छिन्नत्वाविशेषात् । तथा च तयोः पृथक्प्रतिपादने प्रयोजनाभावात् देशपरिच्छेदातिरिक्तो वस्तुपरिच्छेदो वाच्यः । स च वस्तुमिथ्यात्वमेवेति भावः । **एतेनेति** । वस्तुपरिच्छेदः वस्तुनः परिमाणम्, देशपरिच्छेदस्तु वस्तुपरिमाणकार्यभूतः । यतो वस्तु परिमितम् अतः देशतः परिच्छिन्नं भवतीति । ईदृशं भेदमादाय पृथक्कीर्तनमित्यपि न युक्तम् । उभयोः परिच्छिन्नत्वाविशेषेण पृथक्कीर्तनायोगादिति भावः । एवं च द्रव्यस्य परिमाणभाव एव विभुत्वम् । तदेव च देशापरिच्छेदशब्दविवक्षितम् । वस्त्वन्तरमिथ्यात्वं वस्त्वपरिच्छेद इत्युक्तं भवति ।

न च वाच्यम्, इदमिदं न भवतीति प्रतिषेधो (परिच्छेदो) वस्तुपरिच्छेदः; स च सर्वशरीरिणो न संभवतीति–'अस्थूलमनण्वह्रस्वम्' इत्यादिनिषेधशतश्रवणात्। अन्यथा चिदचिदीश्वरस्वरूपविवेकाद्यनुपपत्तेश्च । न च सर्ववस्तुसामानाधिकरण्ययोग्यत्वेन इदमिदं न भवतीति निषेधैकान्त्याभावात् वस्तु-परिच्छेदाभाव इति वाच्यम्; अमुख्यसामानाधिकरण्यस्यान्यत्रापि संभवात्, 'आपो वा इदँ सर्वम्'

सिद्धान्तिच्छायया शङ्कते - न च वाच्यमिति । ''इदं इदं न भवति'' इति प्रतिषेधः वस्तुपरिच्छेदः, तदभावः वस्त्वपरिच्छेदः । घटः पटो न भवति इत्यादिप्रतिषेधात् घटादेः वस्तुपरिच्छेदवत्त्वम् । ब्रह्मणस्तु ''ब्रह्म जगन्न भवति'' इति प्रतिषेधो न भवति । सर्वशरीरकस्य तस्य इतरवस्तुसामानाधिकरण्ययोग्यतया जगन्न भवतीति प्रतिषेधायोग्यत्वादिति शङ्का । ''अस्थूलमनण्वह्रस्वम्'' इत्यादिश्रुत्या ब्रह्म स्थूलं न, अणु न, ह्रस्वं न इत्यादिनिषेधयोग्यत्वप्रतिपादनात् तादृशनिषेधयोग्यत्वाभावरूपस्य वस्त्वपरिच्छेदस्य श्रुतिबाधितत्वादिति समाधानम् । अन्यथा सिद्धान्तरीत्यां ईश्वरः चिन्न, अचिन्न इति निषेधयोग्यत्वमीश्वरस्य नास्ति चेत् चिदचिदीश्वरभेदस्यैवानुपपत्तेः । ननु इदमिदं न भवतीति निषेधैकान्त्यं वस्तुपरिच्छेदः । तदभावः वस्त्वपरिच्छेदः । निषेधैकान्त्यं नाम इदमिदं भवतीति निर्देशायोग्यत्वे सति इदमिदं न भवतीति निर्देशयोग्यत्वम् । घटः पटो भवतीति निर्देशायोग्यत्वे सति घटः पटो न भवतीति निर्देशयोग्यत्वात् घटादेः वस्तुपरिच्छेदवत्त्वम्। ब्रह्मणस्तु स्वरूपविवेकवशात् इदमिदं न भवतीति निर्देशयोग्यत्वसत्त्वेऽपि सर्वशरीरकतया इदमिदं भवतीति निर्देशयोग्यत्वस्यापि सत्त्वात् तदभावरूपविशेषणाभावप्रयुक्तविशिष्टाभावरूपः वस्त्वपरिच्छेदः संभवतीति प्रश्नाशयः । एवं च इदमिदं भवतीति निर्देशयोग्यत्वाभावविशिष्टस्य इदमिदं न भवतीति निर्देशयोग्यत्वस्याभावः वस्त्वपरिच्छेद इत्युक्तं भवति। समाधत्ते अमुख्येति । भवता सत्यन्तेन सामानाधिकरण्यायोग्यत्वमभिप्रेतम् । तत्र किं मुख्यं सामानाधिकरण्यं विवक्षितम् उतामुख्यम् । द्वितीये अमुख्यसामानाधिकरण्यं ब्रह्मणोऽन्यस्मिन्नपि दृश्यते । यथा ''आपो वा इदं सर्वम्'' इति । तथा चाप्स्वपि सामानाधि

इत्यादिवत् । मुख्यसामानाधिकरण्यस्य तु ब्रह्मणोऽपि सर्वत्रासंभवात् । न हि शरीरं ब्रह्मेत्यादिसामानधिकरण्यं दृष्टमिष्टं श्रुतं वा । एवमूहान्तरेष्वपि दूषणमूहनीयम् । ततश्च स्वव्यतिरिक्तसमस्तवस्तुमिथ्यात्वादेव ब्रह्मणो वस्तुपरिच्छेदाभाव इति ॥

सिद्धान्तः-अत्रोच्यते । शास्त्रप्रत्यक्षयोर्विरोधे प्रत्यक्षप्राबल्यं तावत् (स्थितमन्यत्र (29) । अत एव अनन्तपदश्रुत्यन्यथानुपपत्त्याऽपि न प्रत्यक्षादिविरुद्धं प्रपञ्चमिथ्यात्वं सुसाधम् । अतो भवदभिमतवस्तुप्ररिच्छेदाभावो दुरुपपादः । भास्करादिपक्षेऽपि

करण्यायोग्यत्वरूपविशेषणाभावप्रयुक्तविशिष्टाभावस्य सत्त्वेन वस्त्वपरिच्छेदप्रसङ्गः । आद्ये मुख्यसामानाधिकरण्यं ब्रह्मणोऽपि सर्वत्र न संभवति । शरीरं ब्रह्मेति सामानाधि- करण्यस्य भवताप्यनङ्गीकारात् । एवं च सत्यन्तस्य विशेष्यस्य च सत्त्वेन विशिष्टाभावरूपो वस्त्वपरिच्छेदो ब्रह्मण्यपि न संभवति इति भावः । **एवमूहान्तरेष्वपीति** । वस्त्वपरिच्छेदो नाम स्वतन्त्रवस्त्वन्तराभावः, उत्कृष्टवस्त्वन्तराभावः, असंख्यातगुणवत्त्वमित्यादिषु ऊहेषु अपि दूषणमूहनीयमित्यर्थः । लाघवात् वस्त्वन्तरसद्भाव एव वस्तुपरिच्छेद इति आद्ययोर्निरासः । असंख्यातत्वं तु गुणगतमिति न ब्रह्मणोऽनन्तत्वसिद्धिः । तावतैव ब्रह्मणोऽनन्तत्वव्यपदेशे तस्यौपचारिकत्वप्रसङ्ग इति भावः । पूर्वपक्षमुपसंहरति-ततश्चेति ।

सिद्धान्तः

अत्रोच्यत इत्यादि । शास्त्रप्रत्यक्षयोर्विरोधे प्रत्यक्षप्राबल्यं तावत् एकोनत्रिंशे वादे निरूपितम् । अतः प्रत्यक्षेण जगत्सत्यत्वावगमात् तद्विरुद्धतया अनन्तपदश्रुत्यन्यथानुपपत्त्यापि प्रपञ्चमिथ्यात्वपरतया वस्त्वपरिच्छेदवर्णनमयुक्तम् इति भावः । अपिना पूर्ववादोक्तकार्यान्यथानुपपत्तिः समुच्चीयते । **अत इति** । प्रपञ्चमिथ्यात्वस्य प्रत्यक्षबाधितत्वात् न त्वदभिमतवस्तुपरिच्छेदाभावोपपादनं शक्यमित्यर्थः । ननु भास्करादिमते प्रपञ्चस्य मिथ्यात्वाभावात् प्रत्यक्षविरोध इति शङ्कायामाह- **भास्करादिपक्षेऽपीति** । तत्पक्षे सर्ववस्त्वैक्ये सत्यपि ब्रह्मणि सर्ववस्तुभेदस्याप्यङ्गीकारात्

सर्ववस्त्वैक्ये सत्यपि भेदस्यापि विंद्यमानत्वात् परिच्छेदनिषेधोऽनुपपन्नः; अन्यथा भेदाभेदस्यापि विलयप्रसङ्गात् । केवलाभेदपक्षस्तु सर्वव्यवहारविलोपप्रसङ्गेन यौक्तिकाभासैरपि नाभ्युपगम्यते । अभेदमात्रमस्तीत्येतावता वस्तुपरिच्छेदाभाववचनं त्वमुख्यम् । यत्तूक्तं परिच्छेद इति पक्षे वस्तुपरिमाणपक्षे च देशपरिच्छेदात् पृथग्व्यपदेशप्रयोजनं नास्तीति । तदयुक्तम् । विरुद्धार्थप्रतिपादनात् अल्पप्रयोजनार्थप्रतिपादनस्यैव वरिष्ठत्वात् (वरीयस्त्वात् ?) । भवत्पक्षेऽथि वस्तुपरिच्छेदात्

भेदरूपपरिच्छेदनिषेधोऽनुपपन्नः । **अन्यथा** = भेदस्याभावे भेदाभेदस्यापि भेदसमुच्चितस्याभेदस्यापि विलयप्रसङ्गात् । ननु आनन्त्यसिद्ध्यर्थं भेदविलयोऽप्यस्तु, तत्राह - **केवलेति**। भेदानङ्गीकारे केवलाभेदपक्ष एव स्यात् । तथा सति सर्वव्यवहारविलोपप्रसङ्गभिया यौक्तिकाभासैरपि स पक्षो नाङ्गीक्रियत इत्यर्थः । एवदुक्तं भवति केवलाभेदपक्षे नित्यब्रह्माभिन्नतया सर्वस्यापि नित्यत्वात् किंचित्प्रयोजनोद्देशेन प्रवृत्तिर्न स्यादिति । यौक्तिकाभासैरप्यस्वीकृतं कथं वैदिकाभासैः स्वीकार्यम् । आमुष्मिकप्रवृत्तेरपि विरोधात् इत्याशयेन **अपिशब्दः** । ननु सत्यपि भेदे तदभावात्मकाभेदस्य सत्त्वात् वस्तुपरिच्छेदाभाव इत्यत आह **अभेदमात्रम्** इति । भेदाभावमात्रान्नापरिच्छेदः । अन्यथा अपरिच्छिन्नब्रह्माभेदात् घटादेरप्यनन्तत्वप्रसङ्गात् । न च तत्र पटभेदसहचरितत्वात् विद्यमानोऽप्यभेदः नापरिच्छेदरूपः, भेदाग्रहसहचरितस्यैवाभेदस्यापरिच्छेदशब्दार्थत्वादिति वाच्यम् । तथा सति अभेदमात्रे परिच्छेदाभाववचनममुख्यमिति भावः ।

यदुक्तमित्यादि । यदुक्तं पूर्वपक्षिणा वस्तुना परिच्छेदः वस्तुपरिच्छेदः, वस्तुनः परिमाणं वस्तुपरिच्छेद इति पक्षे च देशपरिच्छेदापेक्षया विशेषाभावेन देशपरिच्छेदात् पृथग्वस्तुपरिच्छेदव्यपदेशे प्रयोजनं नास्ति इति । तदयुक्तम् । भवदुक्तं प्रत्यक्षविरुद्धार्थप्रतिपादनमपेक्ष्य तदविरुद्धस्य अल्पप्रयोजनकार्थप्रतिपादनस्यैव श्रेष्ठत्वात् । भवत्पक्षेऽपि वस्तुपरिच्छेदात् देशकालपरिच्छेदयोरनतिभेदाभावेन पृथग्व्यपदेशे प्रयोजनाभावप्रसङ्गः ।

देशकालपरिच्छेदयोरनतिभेदेन पृथग्व्यपदेशप्रयोजनाभावप्रसङ्गः; यदा हि स्वव्यतिरिक्तसमस्तवस्तु- मिथ्यात्वेन वस्तुपरिच्छेदाभावः, तदा देशकालयोरेवाभावात् तदधीनपरिच्छेदस्याप्रसक्तत्वेन तन्निषेधो निरर्थकः। यदि पुनः त्रयाणां परिच्छेदानां स्वरूपभेदात्, घटादिषु च दृष्टेरत्र तन्निषेध इति, तत् परोक्तयोरप्यर्थयोः समानमेव।

यच्चोक्तं सर्ववस्तुसामनाधिकरण्ये मुख्यामुख्यविकल्पेन दूषणम्—तदपि मन्दम्; स्वव्यतिरिक्तसमस्तद्रव्यशरीरिणः तद्द्रव्यवाचिभिरनिष्कर्षकैः शब्दैः

तमुपपादयति - **यदा हीति**। यदा हि स्वव्यतिरिक्तसमस्तमिथ्यात्वेन ब्रह्मणो वस्तुपरिच्छेदाभावः उपपाद्यते, तदा ब्रह्मव्यतिरिक्तयोः देशकालयोरेव अभावेन तदधीनपरिच्छेदयोरप्रसक्तत्वेन तन्निषेधो निरर्थकः। यदि पुनः त्रयाणामपि परिच्छेदानां स्वरूपभेदात् घटादिषु च तेषां दर्शनात् ब्रह्मणि तन्निषेध इति मन्यसे, तदा परमतोक्तयोरप्यर्थयोः समानमेवेति भावः।

यच्चोक्तमित्यादि। सर्ववस्तुसमानाधिकरण्ययोग्यत्वं वस्त्वपरिच्छेद इत्यस्मन्मतमनूद्य तन्मुख्यममुख्यं वेति विकल्प्य दूषणमुक्तम्। तदपि मन्दम्। ब्रह्म तावत् स्वव्यतिरिक्तसमस्तद्रव्यशरीरकम्। शरीरवाचकानां शब्दानां च शरीरिपर्यन्तत्वं व्युत्पत्तिसिद्धम्। अतः स्वेतरसमस्तवस्तुशरीरकाभेदाभिप्रायेण ब्रह्मणः जगद्वाचकशब्दैः समानाधिकरणतया निर्देशः उपपन्नः। निष्कर्षकातिरिक्तानामेव शब्दानां ब्रह्मपर्यन्तत्वव्युत्पत्तिः। अतः शरीरं ब्रह्मेति प्रयोगस्य नापत्तिः। तथा च मुख्यसर्ववस्तुसामानाधिकरण्यार्हत्वं वस्त्वपरिच्छेदः। ''यस्य पृथिवी शरीरम्'' इत्यारभ्य ''यस्यात्मा शरीरम्'' इत्यादिभिः श्रुतिवाक्यैः सर्वस्यापि ब्रह्मशरीरत्वेन ब्रह्मप्रकारत्वावगमात् प्रकारवाचिनां च शब्दानाम् प्रकारिपर्यन्तत्वस्य आकृत्यधिकरणसिद्धत्वाच्च ब्रह्मणः मुख्यं सर्ववस्तुसामानाधिकरण्यार्हत्वं संभवति। न च कैश्चित् शरीरादिशब्दैः असामानाधिकरण्यात्तदभावः इति वाच्यम्। अनिष्कर्षकैः प्रकारवाचकैः शब्दैः सामानाधिकरण्यमिति स्वीकारादिति भावः। सामानाधिकरण्यार्हत्वं च

प्रतिपादने विवक्षिते दोषकथाऽभावात्। ततश्चात्र वस्तुपरिच्छेदो नाम स्वस्मात्पृथक्सिद्धाद्वस्तुनो भेदः। स च सर्वप्रकारस्य ब्रह्मणो न संभवतीति, 'स्वरूपभेदमात्रस्य निषेधो निषेधशतदुःस्थत्वादविवक्षित एव' इति विवेकानुपपत्तिचोद्यं नावतरति। अयं त्वर्थः प्रत्यक्षाद्यविरुद्धः श्रुतिस्मृतिसूत्रानुगृहीतश्चेत्ययमेव आरम्भणाधिकरणभाष्ये प्रदर्शितः। यथा, 'भेदवादिनस्तु सर्वचिदचिद्वस्तुशरीरत्वेन ब्रह्मणः सर्वप्रकारत्वात् स्वतः परतः परिच्छेदोऽपि न विद्यत' इति। नन्वेवमपि सर्वविधपरिच्छेदनिवृत्तिर्न सिध्यति, स्वरूपविवेकदशायामिदं इदं न भवतीति परिच्छेदस्य

स्वतन्त्रवस्तुभेदाभाव इत्याशयेन परिच्छेदस्वरूपमाह-**ततश्चात्रेति**। **सर्वप्रकारस्येति**। सर्वं प्रकारः अपृथक्सिद्धविशेषणं यस्य तस्येत्यर्थः। स्वपृथक्सिद्धवस्तुन एवाभावात् स्वपृथक्सिद्धवस्तुप्रतियोगिकभेदरूपः वस्तुपरिच्छेदः ब्रह्मणो न संभवतीत्यर्थः। एतत्प्रसङ्गे यदुक्तं पूर्वपक्षिणा चिदचिदीश्वरस्वरूपविवेकानुपपत्तेश्चेति तत्र समाधानमाह - **स्वरूपभेदमात्रस्येति**। चिदचिदीश्वराणां स्वरूपतो भेदः वर्तत एव। तस्य निषेधः नात्र विवक्षितः। स्वरूपभेदनिषेधनिषेधकप्रमाणशतदुस्थत्वात्। तथा च स्वरूपभेदाविरोधेनैव पूर्वोक्तरीत्या वस्त्वपरिच्छेदस्य प्रतिपादयितुं शक्यत्वात् स्वरूपनिवेकानुपपत्तिचोद्यं नावतरतीति भावः। भाष्यमुदाहरति - **भेदवादिनस्तु इति**। स्वत इति वस्तुपरिच्छेदाभावो विवक्षितः, तत्र हेतुः सर्वप्रकारत्वादिति। अस्य हेतुत्वेनाभिधानात् पृथक्सिद्धवस्तुभेदो वस्तुपरिच्छेद इत्युक्तं भवति। परत इति तत्कार्यभूतदेशकालपरिच्छेदाभावो विवक्षितः इति चण्डमारुतम्। श्रुतप्रकाशिकायां तु स्वत इति स्वतः परिमितत्वाभाव उक्तः। अयं वस्त्वपरिच्छेदः। तत्कार्यपरिमितदेशकालसंबन्धभाव उक्तः परत इति व्याख्यातम्। स्वरूपभेदमात्रस्य निषेधो न शक्य इति पूर्वोक्तं शङ्कासमाधानाभ्यां द्रढयति- **नन्वेवमपीति**। उक्तरीत्या वस्त्वपरिच्छेदस्योपपादनेऽपि सर्वविधपरिच्छेदाभावो न सिध्यति, चिदचिदीश्वरस्वरूपविवेकदशायाम् ''इदमिदं न भवति'' इति परिच्छेदस्य विद्यमानत्वादिति चेत - सत्यम। तथाविधस्वरूपभेदात्मकस्य वस्तुपरिच्छेदस्य श्रुतिभिरेव प्रतिपादनात्

विद्यमानत्वादिति चेत्–सत्यम्; तथाविधवस्तुपरिच्छेदस्य श्रुतिभिरेव प्रतिपाद्यमानत्वात्। विश्वमिथ्यात्वपक्षेऽपि ततः परिच्छेदोक्तेः त्वयाऽभ्युपेतत्वाच्च तन्निषेधो न शक्यः। यदि च वस्त्वन्तराभावात् वस्तुपरिच्छेदाभाव उच्यते, तर्हि भवत्पक्षे घटादेरपि वस्त्वन्तराभावात् तत्सिद्धिः स्यात्॥ ब्रह्माख्यं वस्त्वन्तरं तस्य विद्यत इति चेन्न; तत्स्वरूपसद्भावेऽपि तयोर्भेदस्य मिथ्यात्वेन तस्य वस्त्वन्तरत्वायोगात्। व्यावहारिकं वस्त्वन्तरत्वं तस्य विद्यत इति चेत्–तत् ब्रह्मापेक्षया घटादेरपि

तदभावो नात्र विवक्षितः। विश्वमिथ्यात्वपक्षेऽपि ब्रह्मणः अनृतजडपरिच्छिन्नेभ्यो विवेकस्याङ्गीकृतत्वात् इत्यर्थः। **ततः परिच्छेदोक्तेरिति**। अनृतजडपरिच्छिन्नेभ्यो भेदस्योक्तत्वादित्यर्थः।

दोषान्तरमाह - **यदि चेति**। ब्रह्मव्यतिरिक्तवस्त्वन्तराभावेन ब्रह्मणः वस्तुपरिच्छेदाभाव उच्यते चेत् -घटादेरपि वस्त्वन्तराभावात् वस्त्वपरिच्छेद स्यात्। न च पटादिकमस्तीति वाच्यम्। पटादीनामपि मिथ्यात्वेन तदभावात्। न च ब्रह्मरूपं वस्त्वन्तरमस्तीति तदभावो न संभवतीति वाच्यम्। ब्रह्मस्वरूपसद्भावेऽपि ब्रह्मघटयोः भेदस्य मिथ्यात्वेन ब्रह्मणः वस्त्वन्तरत्वाभावात्। वस्त्वन्तरत्वं नाम भिन्नवस्तुत्वम्। भेदस्य मिथ्यात्वेन अभावात् स्वप्रतियोगिकभेदविशिष्टवस्तुत्वरूपं घटभिन्नवस्तुत्वं ब्रह्मणि नास्ति। तथा च घटादेरपि स्वव्यतिरिक्तवस्त्वभावरूपो वस्त्वपरिच्छेदो भवेदिति भावः। ननु व्यावहारिकं वस्त्वन्तरत्वं ब्रह्मणोऽस्तीति वस्त्वन्तराभावरूपो वस्त्वपरिच्छेदो घटादेर्न भवतीत्याशङ्क्य ब्रह्मापेक्षया घटादेरपि व्यावहारिकं वस्त्वन्तरत्वमस्तीति वस्त्वन्तराभावरूपो वस्त्वपरिच्छेदो ब्रह्मणोऽपि न स्यादित्याह- **व्यावहारिकमिति**। ननु वस्त्वन्तरशब्देन घटादेः ग्रहणेऽपि ततः परिच्छेदोऽपि मिथ्याभूत इति तदभावो ब्रह्मणः संभवतीत्याशङ्क्य घटादेरप्येतत्तुल्यमिति जडाजडैक्यप्रसङ्ग इत्याह-**न चेति**। ननु स्वसजातीयवस्त्वन्तरसद्भावः वस्तुपरिच्छेदः। घटादेः स्वसजातीयवस्त्वन्तरं पटादिकमस्तीति वस्तुपरिच्छेदवत्त्वम्। ब्रह्मणस्तु स्वसजातीयं

समानम् । न च तदपेक्षया ब्रह्मणः परिच्छेदोऽपि मिथ्याभूतः; जडाजडैक्यप्रसङ्गादेरन्यत्रोक्तेः ॥ स्वसजातीयवस्त्वन्तरसद्भावो वस्तुपरिच्छेद इति विशेष इति चेन्न; यथाकथञ्चित्सजातीयत्वविवक्षायां प्रकाशमानत्वादिरूपेण ब्रह्मणः सजातीयस्याविद्यादेर्विद्यमानत्वात् । न चाविद्यादेरवस्तुत्वेन परिहारः घटादेरपि समानत्वस्योक्तत्वात् । न हि घटाद्यापेक्षया वस्तुतः सजातीयत्वादिकं ब्रह्मणः ॥

वस्त्वन्तरं नास्तीति वस्तुपरिच्छेदाभाव इति शङ्कते - **स्वसजातीयेति** । येन केन चिद्रूपेण सजातीयत्वविवक्षायां प्रकाशमानत्वेन रूपेण ब्रह्मसजातीयस्य अविद्यादेः सद्भावात् ब्रह्मणः वस्तुपरिच्छेदप्रसङ्ग इति परिहरति - **यथाकथंचिदिति** । ननु अविद्यादेः प्रकाशमानत्वेन रूपेण ब्रह्मसजातीयत्वेऽपि वस्तुत्वं नास्ति । अतः सजतीयवस्त्वभावरूपः वस्त्वपरिच्छेदः ब्रह्मणः संभवतीत्याशङ्क्य घादेरप्येतत्तुल्यम् । ब्रह्मणः सत्त्वेऽपि तस्य वस्तुत्वाभावात् स्वसजातीयवस्त्वभावस्य घटादावपि सत्त्वादिति समाधत्ते-**न चाविद्यादेरिति** । ननु ब्रह्मणः कथं वस्तुत्वाभाव इत्यत्राह - **न हि घटाद्यपेक्षयेति** । वस्तुतः घटादिसजातीयत्वं ब्रह्मणो नास्तीति घटादिसजातीयत्वविशिष्टवेषेण ब्रह्मणोऽपि वस्तुत्वं नास्ति । अतः स्वसजातीयत्वविशिष्टवस्त्वभावः घटादावपि तुल्य इति भावः ।

ननु वस्तुपरिच्छेदः मिथ्या, तदभावः ब्रह्मणि भवितुमर्हति । ब्रह्मणः मिथ्याभूतपदार्थाधिष्ठानत्वात् । मिथ्याभूतस्य हि अधिष्ठाने एवाभावः । घटे तु मिथ्याभूतस्यापि वस्तुपरिच्छेदस्याभावो न संभवति । घटस्यापि मिथ्यात्वेनाधिष्ठानत्वाभावात् इत्याशयेन शङ्कते-**घटादिस्वरूपस्यापीति** । वस्तुपरिच्छेदवत् इत्यर्थः । यथा घटस्य मिथ्यात्वेऽपि तत्र पटत्वाभावः, तथा घटस्य मिथ्यात्वेऽपि तत्र मिथ्याभूतस्य वस्तुपरिच्छेदस्याभावो भवितुमर्हनीति भावः ।

चण्डमारुते त्वेवं सावतरणं व्याख्यानम् - ननु सजातीयवस्तुनिष्ठभेदप्रतियोगित्वरूपं सजातीयवस्त्वन्तरवत्त्वं वस्तुपरिच्छेदः । तस्य मिथ्यात्वात् ब्रह्मणः सत्यत्वात् ब्रह्मणि तदभावोऽस्ति । घटे तु, तादृशप्रतियोगिमिथ्यात्वेऽपि घटस्यापि मिथ्यात्वान्न तत्र तदभावः। मिथ्याभूतस्य हि अधिष्ठाने एवाभावः, न तु स्वसमानसत्ताके स्वाश्रयेऽपीति शङ्कते -

घटादिस्वरूपस्यापि मिथ्यात्वाद्विशेष इति चेत्, किमतः ? मिथ्यात्वेऽपि घटादेः पटत्वाद्यभाववत् वस्तुपरिच्छेदाभावस्यापि सिद्धेः ।। अस्त्वेवम्, तथाऽपि सत्यस्य ब्रह्मणोऽपि तत्सिद्धिरस्त्येवेति चेन्न–इतरवैलक्षण्यार्थानि सत्यज्ञानानन्तपदानीति स्वसिद्धान्तभङ्गप्रसङ्गात् । सर्वथा, ‘सजातीयवस्त्वन्तरसद्भावो वस्तुपरिच्छेदः’ इति तदभावविवक्षायां प्रपञ्चसत्यत्वेऽपि न कश्चिद्दोषः । ब्रह्मणस्तद्विभूतिप्रपञ्चेन अत्यन्तसाजात्याभावस्य ब्रह्मलक्षणादिवशादेव सिद्धेः ।

किंच देशकालपरिच्छेदाभावोऽपि न घटादिव्यावर्तकः, सत्यदेशकालपरिच्छेदस्य घटादावप्यभावात्; मिथ्यादेशकालपरिच्छेदस्य ब्रह्मण्यपि विद्यमानत्वस्य

घटादीति । **स्वरूपस्यापीति** । भेदप्रतियोगित्ववदिति भावः । **मिथ्यात्वेऽपीति** । मिथ्यात्वेऽपि घटस्य तत्र पटत्वाभावः तत्र विरोध्यसंनिधानादेव । ततश्च सजातीयवस्तुनिष्ठभेदप्रतियोगित्वस्य मिथ्यात्वेन तत्र पारमार्थिकाभावं प्रत्यविरोधित्वात्, अभावाधिकरणत्वे च विरोध्यसंनिधानस्यैव प्रयोजकत्वात् पटत्वाभाववत् परिच्छेदाभावोऽपि स्यादिति भावः - इति ।

ननु घटादेर्भवतु भवदुक्तरीत्या वस्त्वपरिच्छेदः तथापि ब्रह्मणोऽपि वस्त्वपरिच्छेदसिद्धिरस्त्येवेति शङ्कते-**अस्त्वेवमिति** । यद्यपि त्वदुक्तरीत्या अधिष्ठानसत्यत्वमभाववत्त्वे न प्रयोजकम्, तथापि सत्यत्वमभाववत्त्वाविरोधीत्यभिप्रायेण सत्यस्येत्युक्तम् । यदि घटादीनामपि वस्त्वपरिच्छेदवत्त्वादनन्तपदवाच्यत्वमङ्गीक्रियते, तदा इतरवैलक्षण्यार्थानि सत्यज्ञानानन्तपदानीति त्वत्सिद्धान्तभङ्गप्रसङ्ग इति समाधत्ते-**इतरेति** । **सर्वथेति** । यदि तु अत्यन्तसजातीयवस्त्वन्तरसद्भावः वस्तुपरिच्छेदः तदभावः वस्त्वपरिच्छेदः इत्युच्यते, तदा प्रपञ्चस्य सत्यत्वेऽपि ब्रह्मात्यन्तसजातीयत्वाभावात् अत्यन्तसजातीयवस्त्वन्तराभावरूपः वस्त्वपरिच्छेदः ब्रह्मणि घटते । ब्रह्मणः तद्विभूतिभूतप्रपञ्चनेन साकमत्यन्तसजातीयत्वाभावस्य ब्रह्मणलक्षणवशादेव सिद्धेरिति भावः । सर्वथा सजातीयत्वम् असाधारणाकारेण सजातीयत्वम् । अत्यन्तसजातीयत्वमपि तदेव । **किं चेत्यादि** ।

भवतैव स्वीकारात् । किंच देशकालपरिच्छेदाभावो न देशकालयोः स्वरूपनिषेधगर्भः; वस्तुपरिच्छदाभावेनैव तत्सिद्धेः । तद्वत् वस्त्वन्तरस्वरूपे सत्येव तत्प्रयुक्तपरिच्छेदाभावो वर्णनीयः । अन्यथा वैरूप्यात् । संभवतश्चैकरूपस्य परित्यागायोगात् । संभवति तदस्मत्पक्षे; सर्वेषु वस्तुषु यथाप्रमाणमवस्थितेष्वेव प्रतिघातपरिणामपृथक् सिद्ध्यादिलक्षणपरिच्छेदस्य प्रतिक्षेपात् ।

किंच अनन्यथासिद्धानेकश्रुतिगणप्रतिपन्नस्य ब्रह्मविभूत्यादेरनेकार्थसाधारणैकानन्तपदस्वारस्यानुरोधाय(धेन) बाधो न युक्तः । तदनुरोधेनैव त्वेकानन्तपदस्वारस्यं सङ्कोचनीयम् । ततश्च प्रत्यक्षाद्यविरुद्धत्रि(वि) विधपरिच्छेदाभाव एवात्र

किं च देशकालपरिच्छेदाभावोऽपि भवन्मते ब्रह्मण: न घटादिभ्यो व्यावर्तक: । सत्यस्य देशकालपरिच्छेदस्य घटादावप्यभावात्, मिथाभूतस्य देशकालपरिच्छेदस्य ब्रह्मण्यपि विद्यमानत्वस्य भवतैव स्वीकारात् ।

किं च देशकालेत्यादि । अत्रेदं भवता अवधातव्यम् अनन्तपदेन तावत् देशपरिच्छेदाभाव: कालपरिच्छेदाभाव: वस्तुपरिच्छेदाभावश्चोच्यते । तत्र देशकालपरिच्छेदाभाव: देशकालयोर्मिथ्यात्वादिति भवतापि नोच्यते । भवन्मते देशकालस्वरूपाभावस्य वस्तुपरिच्छेदाभावेनैव सिद्धे: देशकालौ विद्यमानावुपगम्य तत्कृतपरिच्छेदाभावमात्रमित्युच्यते । एवं स्थिते तद्वैरूप्याभावाय वस्त्वन्तरसत्तामुपगम्य तत्कृतपरिच्छेदाभाव एव वस्त्वपरिच्छेद इति वक्तव्यम् । न तु वस्त्वन्तरमिथ्याकृत: तत्कृतपरिच्छेदाभाव एव वस्त्वपरिच्छेद इति वक्तव्यम् । न तु वस्त्वन्तरमिथ्याकृत: वस्तुपरिच्छेदाभाव इति । तथा सति वैरूप्यप्रसङ्गात् । ऐकरूप्ये संभवति तत्परित्यागस्यानु- चितत्वात् । अस्मत्पक्षे तु ऐकरूप्यं संभवति । सर्वेषु वस्तुषु यथाप्रमाणं स्थितेष्वेव प्रतिघात- परिणाम-पृथक्सिद्ध्यादिरूपस्य परिच्छेदस्याभाव: ब्रह्मणि वस्तुपरिच्छेदाभावपदेन विवक्षित इति भाव: ।

किं चेत्यादि । **स्वारस्यानुरोधेनेति** । वस्त्वन्तरभेदमात्रं वस्तुपरिच्छेद इत्यभ्युपगम्यैवमुक्तम् । **विविधपरिच्छेदाभाव इति** । त्रिविधपरिच्छेदाभाव इति पाठ:

विवक्षित इत्यङ्गीक्रियताम्। अन्यथाऽनन्तपदश्रुत्यसङ्कोचाय संख्यातोऽपि परिच्छेदाभावस्वीकारेण ब्रह्मबहुत्वप्रसङ्गात्। एकत्वश्रुतिवशात् वस्तुपरिच्छेदाभावेनान्योन्यव्याघाताच्च तत्परित्याग इति चेत्—तर्हि प्रपञ्चसत्यत्वप्रतिपादकप्रत्यक्षश्रुत्यादिवशात् तत एव व्याघाताच्चेदृशवस्तुपरिच्छेदाभावोऽपि परित्याज्य एव। यदि च त्रिविधपरिच्छेदाभावो(वे ?) ऽवश्यमभिसन्धिः, तर्ह्यविरुद्धः परिच्छेदाभावोऽत्र स्वीक्रियताम्। संभवन्ति चान्येऽपि व्यवच्छेदभेदाः वस्त्वन्तरप्रतिधात-वस्तुपरिमाण-स्वतन्त्रवस्त्वन्तरसद्भावादयः। एवं वाऽस्तु वस्तुपरिच्छेदाभावः। उत्कृष्टेन वस्तुना उत्तरावधिभूतेन परिच्छन्नं ह्यपकृष्टं वस्तु। तथाविधोऽपकर्षो ब्रह्मणो नास्तीति। अस्मिंश्चार्थे विवक्षिते तस्य सर्ववस्तुशरीरित्वेन सर्वात्मकत्वमप्यन्तर्गतं भवति। एवं सति, 'उल्लङ्घितत्रिविधसीमसमातिशायिसंभावनं तव परिब्रढिम स्वभावम्''

साधीयान्। **अन्यथेति**। अनन्तपदेन परिच्छेदसामान्याभाव उच्यते। तदसंकोचाय उक्तत्रिविधपरिच्छेदाभाववत् संख्याकृतपरिच्छेदाभावस्यापि स्वीकरणीयत्वात् ब्रह्मणः बहुत्वप्रसङ्गः। यदितु एकत्वश्रुतिवशात् संख्याकृतपरिच्छेदाभावः त्यज्यते, तथा ब्रह्मबहुत्वे स्वातिरिक्तवस्त्वभावरूपेण वस्तुपरिच्छेदाभावेन विरोधाच्च संख्याकृतपरिच्छेदाभावः त्यज्यत इत्युच्यते, तर्हि प्रपञ्चसत्यत्वप्रतिपादकप्रत्यक्षश्रुत्यादिवशात् ततो विरोधाच्च वस्त्वन्तराभावरूपः वस्तुपरिच्छेदाभावोऽपि त्यज्यतामिति भावः। **वस्त्वन्तरप्रतिघातेति।** यथा मूर्तस्य मूर्तान्तरेण कात्स्र्येन संयोगाभावरूपः प्रतिघातः, तथा ब्रह्मणः स्वातिरिक्तद्रव्येषु कात्स्न्र्येन संयोगाभावरूपः प्रतिघातो नास्ति। एवं वस्तुसंयोगकृतं परिमाणं नास्ति, स्वतन्त्रवस्त्वन्तरं नास्तीत्येवंरूपः वस्तुपरिच्छेदानामभावः प्रमाणान्तराविरोधाय वक्तुं शक्या इति भावः। **अस्मिंश्च पक्ष इति**। वस्त्वन्तरप्रतियोगिकापकर्षः वस्तुपरिच्छेदः, तदभावश्चोत्कर्षः, अभावस्य भावान्तरत्वात्। स चोत्कर्षः सर्ववस्तुशरीरकत्वादि। तदपि वस्त्वपरिच्छेदान्तर्गतमित्यर्थः। ननु स्वेतरसर्वापेक्षया उत्कर्षस्य वस्त्वपरिच्छेदरूपत्वे स्तोत्ररत्नश्रीसूक्तिविरोधः ''उल्लङ्घितत्रिविधसीमसमातिशायि संभावनं तव परिब्रढिमस्वभावम्'

इति भगवद्यामुनाचार्यवचनं गोबलीवर्दन्यायेन, फलफलिनिर्देशेन वा नेतव्यम्।

इति सा श्रीसूक्तिः। तस्या अयमर्थः आचार्यपादैः स्तोत्ररत्नभाष्येऽनुगृहीतः - सीमा परिच्छित्तिः। सा चात्र देशतः कालतो विषयतश्च त्रिविधा। समश्चातिशायी च समातिशायिनौ त्रिविधसीम्नः समातिशायिनोश्च संभावना उल्लङ्घिता येन तथोक्तः। परिब्रढिमस्वभावं = प्रभुत्वम्। अन्येषां प्रभुत्वं देशादिभिः परिच्छिन्नम्। अत एव समाधिकसंभावनायुक्तम्। तव "सत्यं ज्ञानमनन्तं ब्रह्म" "न समोऽनेन कश्चन" "न तत्समश्चाभ्यधिकश्च दृश्यते" "न त्वत्समोऽस्त्यभ्यधिकः कुतोऽन्यः" "नास्ति नारायणसमः" इत्यादिप्रसिद्धस्य" इति। तत्र त्रिविधसीमेत्यत्र वस्त्वपरिच्छेदेनैव समातिशायि संभावनाराहित्यस्यापि लाभात् पौनरुक्त्यं भवेत्। अत उत्कर्षः वस्त्वपरिच्छेदे न विवक्षणीयः इति शङ्का। समाधानं तु यथा गां बलीवर्दं चानयेत्यत्र गोशब्देनैव बलीवर्दस्यापि लाभात् पुनः बलीवर्दग्रहणस्य वैयर्थ्यं स्यादिति तत्परिहाराय तत्र साधारणः गोशब्दः बलीवर्दव्यतिरिक्तगोपरः इति निर्णीयते, तेन न्यायेन उल्लङ्घितत्रिविधसीमेत्यनेनैव समातिशायिसंभावनाराहित्यस्यापि लाभात् पुनस्तत्कथनस्य वैयर्थ्यं स्यादिति तत्परिहाराय अनेकार्थसाधारणवस्तुपरिच्छेदाभाववाचिशब्दस्य समातिशायिराहित्यव्यतिरिक्तवस्त्व-परिच्छेदपरत्वमिति वा त्रिविधपरिच्छेदोल्लङ्घनस्य फलं समाधिकसंभावनोल्लङ्घनमित्यभि-प्रायकत्वं वा आश्रयणीयम् इति।

आरम्भणाधिकरणेति। "ब्रह्मणः सर्वप्रकारत्वात् स्वतः परतः परिच्छेदोऽपि न विद्यते" इति पूर्वोदाहृतं भाष्यम्। तत्र स्वत इति स्वरूपसंबन्धिपरिच्छेदः। स च देशकालाभ्याम्। परत इति गुणविभूतिभ्यां परिच्छेदः। तदभाव एव वस्त्वपरिच्छेद इति

आरम्भणाधिकरणभाष्यमप्येतत्परमेव योजनीयम् । अतः सिद्धं सत्यैरेव देशकालवस्तुभिरपरिच्छिन्नं सर्वदेशकालव्यापि सर्वान्तरात्मभूतं सर्वैर्मङ्गलगुणैः समस्तहेयप्रतिभटतया च सर्वस्मात्परं ब्रह्म अनन्तपदनिर्दिष्टमिति नातः प्रपञ्चमिथ्यात्वसिद्धिरिति ॥

इति शतदूषण्याम् आनन्त्यनिरूपणवादः षट्पञ्चाशः ॥ ५६ ॥

भावः । वादार्थं संगृह्णाति - **अत** इति । **सत्यैरेवे**ति । सत्यैरेवापरिच्छेदः उपपादयितुं शक्यः नासत्यैः । घटस्य सत्यात् पटादिव शुक्तिरजतादेरपि भेदस्य परिच्छेदरूपत्वात् । अधिकं चण्डमारुते द्रष्टव्यम् ।

इति श्रीशतदूषणीव्याख्यायां तात्पर्यप्रकाशिकायां आनन्त्यनिरूपणवादः षट्पञ्चाशः ॥

* * *

।। अथ निर्विशेषब्रह्मणः आनन्दत्वभङ्गवादः सप्तपञ्चाशः ।। ५७ ।।

ब्रह्मण्यानन्दशब्देन दर्शितां गुडजिह्विकाम् ।
निर्विशेष(षाऽऽ?)गृहीतानां वादिनां विलुनाम्यहम् ।।

श्रूयते हि-, 'विज्ञानमानन्दं ब्रह्म', 'आनन्दो ब्रह्म', 'कं ब्रह्म खं ब्रह्म' इत्यादि । तत्र किमिदं ब्रह्मण आनन्दत्वं नाम ? सुखत्वमिति चेत्, तदपि किमिति विचारयामः । (१) किमनुकूलवेदनीयत्वम् ? (२) उतानुकूलवेदनत्वम् ? (३) अथानुकूलत्वमात्रम् ? (४) यद्वा दुःखनिवृतिरूपतामात्रम् ? (५) उत ज्ञानात्मकत्वमेव ? (६) किञ्चिद्धर्मान्तरं वा ?

न प्रथमः, वेदनीयत्वस्यानभ्युपगमात् ।। व्यावहारिकं तदस्त्विति चेत्, तर्हि

अथ निर्विशेषब्रह्मण: आनन्दत्वभङ्गवाद: सप्तपञ्चाश: ।।

ब्रह्मण्यानन्दशब्देन दर्शितां गुडजिह्विकाम् ।
निर्विशेषगृहीतानां वादिनां विलुनाम्यहम् ।।

अथ ब्रह्मस्वरूपातिरिक्तसर्वमिथ्यात्वे आनन्दत्वादिभङ्ग: स्यादिति प्रतितर्कविवक्षया वादत्रयं प्रवर्तते ।

श्रूयते हीत्यादि ''विज्ञानमानन्दं ब्रह्म'' ''आनन्दो ब्रह्म'' ''कं ब्रह्म खं ब्रह्म'' इत्यादिश्रुतिभि: ब्रह्मण आनन्दत्वं प्रतिपाद्यते । तत् निर्विशेषब्रह्मवादिनां मते न घटत इति निरूप्यते । तथा हि -किमिदं ब्रह्मण आनन्दत्वं नाम । सुखत्वमिति चेत् -तदपि विचारयाम:। तत् किम् (१) अनुकूलवेदनीयत्वम् (२) उत अनुकूलवेदनत्वम् (३) अथानुकूलत्वमात्रम् (४) यद्वा दु:खनिवृत्तिरूपतामात्रम् (५) उत ज्ञानात्मकत्वमेव (६) किंचिध्दर्मान्तरं वेति। **न प्रथम:** । वेदनीयत्वानभ्युपगमादिति । अनुकूलवेदनीयत्वं हि अनुकूलत्वप्रकारकज्ञानविषयत्वम्। तस्य ब्रह्मणि भवतानङ्गीकारादिति भाव:। ननु व्यावहारिकमनुकूलवेदनीयत्वं ब्रह्मण:। न च निर्धर्मकत्वविरोधः। धर्मिसमसत्ताक धर्माभाव: निर्धर्मकत्वम्। वेदनीयत्वस्य घटादाविव ब्रह्मणि धर्मिसमसत्ताकत्वाभावेन विरोधाभावादिति शङ्क ते -**व्यावहारिकं तदिति**। परिहरति-**तर्हीति** । ब्रह्मण आनन्दत्वस्य व्यावहारिकतया वास्तवत्वाभावात् अनानन्दत्वमेव

ब्रह्मण आनन्दत्वं व्यावहारिकमिति ब्रह्मणोऽनानन्दत्वमेव परमार्थः स्यात्। ततश्च व्यावहारिकदशायामनुकूलत्वम्, तन्निवृत्तिदशायां तन्निवृत्तिरपीति संसारस्यैव ग्राह्यत्वं मोक्षस्य दूरपरिहरणीयत्वमिति स्यात् ।। यदा कदाचिदनुकूलवेदनीयत्वं यावद्द्रव्यभाविन आनन्दत्वस्योपलक्षणमिति चेत्, तर्हि सांसारिकस्य सर्वस्यापि वस्तुजातस्य, ‘वस्त्वेकमेव दुःखाय’, ‘तदेव प्रीतये भूत्वा’ इति श्लोकद्वयोक्तप्रकारेण कदाचिदनुकूलवेदनीयत्वस्य सद्भावात् यावद्द्रव्यमानन्दत्वं स्यात् । ततश्च सप्रपञ्चतयैवानुभव उपादेयः स्यात्; सहस्रवतः पञ्चशतं किमधिकमिति न्यायात्।।

परमार्थ: स्यात् इत्यर्थ:। अपि च **व्यावहारिकदशायां**=संसारदशायामनुकूलत्वं **तन्निवृत्तिदशायां** संसारनिवृत्तिदशायां तन्निवृत्ति: अनुकूलत्वनिवृत्तिरिति संसारस्यैव ग्रह्यत्वं मोक्षस्य परिहरणीयत्वं च स्यात्। यथा प्रपञ्चस्य कल्पितत्वात् निष्प्रपञ्चत्वं ब्रह्मण: परमार्थ: तथा आनन्दत्वस्य कल्पितत्वे तद्विपरीतं अनानन्दत्वमेव परमार्थ: स्यादिति भाव:।

ननु आनन्दत्वं ब्रह्मण: यावदात्मभावि। तस्य कदाचिदनुकूलवेदनीयत्वमुपलक्षणमिति शङ्कते -**यदा कदाचिदिति**। **आनन्दत्वस्येति**। आनन्दात्मकस्वरूपस्येत्यर्थ:। समाधत्ते **तर्हीति**। सांसारिकं सर्वमपि वस्तुजातं कदाचित् कस्यचित् सुखाय भवति, कदाचित् दु:खाय भवतीत्यनुभवसिध्दम्। भगवता पराशरेणाप्युक्तम् -

वस्त्वेकमेव दु:खाय सुखायेर्ष्यागमाय च ।
कोपाय च यतस्तस्मात् वस्तु वस्त्वात्मकं कुत:।।

तदेव प्रीतये भूत्वा पुनर्दु:खाय जायते।
तदेव कोपाय यत: प्रसादाय च जायते ।।

ततश्च यदा सुखाय भवति तदानुकूलतया वेदनीयं भवतीति कदाचिदनुकूलतया वेदनीयत्वस्य सांसारिकद्रव्येषु सद्भावात् यावद्द्रव्यमुपादेयत्वं स्यात् इति भाव:। **आनन्दत्वं स्यादिति**। उपादेयस्वरूपं स्यादित्यर्य:। तत: किमित्यत्राह--**ततश्चेति**। **अनुभव:**=ब्रह्मानुभव:। ननु अपरिच्छिन्नब्रह्मानन्दलाभात् क्षुद्रसुखरूपप्रपञ्चस्य नोपादेयतेत्यत्राह-**सहस्रवत** इति।

विषयानुकूल्यानुभवदशायां ब्रह्मानन्दानुभवो न सिध्येदिति चेन्न; तस्य नित्यस्वयंप्रकाशत्वाभ्युपगमात्। वैशद्यावैशद्यादिदूषणं त्वन्यत्रैव (...)। एवं वेदितुरभावादपि वेदनीयत्वासिद्धेः व्यावहारिकदशायां तत्सद्भावमात्रमपि दत्तोतरमेव।

नापि द्वितीयः; वेदनरूपत्वातिरिक्तानुकूलत्वाभ्युपगमे निर्विशेषवादापक्रमात्। तदनभ्युपगमे व्यर्थविशेषणत्वात्, पर्यायत्वादिप्रसङ्गाच्च। भिन्नार्थत्वे विशेषणत्वाभावे च घटः पट इतिवत् अनन्वयात्।

सहस्ररूप्यवत: पुरुषस्य पञ्चशतमधिकं लभ्यते चेत् तत् किमनुपादेयं भवेदिति भाव:। **अधिकम्=** अपेक्षितादधिकम् अनपेक्षितमित्यर्थ:। ननु अधिकब्रह्मानन्दानुभवविरोधित्वात् विषयानन्दानुभवो नोपादेय इति शङ्कते -**विषयेति**। **तस्येति**। ब्रह्मानन्दस्येत्यर्थ:। उक्तं हिं युष्माभि: ''भासत एव परमप्रेमास्पदत्वलक्षणं सुखम्'' इति। संसारदशायामप्यात्मनि परमप्रेमास्पदत्वप्रयोजकं सुखासाधारणं भासत इति हि तदर्थ:। ननु संसारदशायामविशदब्रह्मानन्दानुभवेऽपि विशदानुभवाभावात् अस्त्येव विरोध इत्यत्राह-**वैशद्येति**।अतिरिक्ताकारप्रकाश एव वैशद्यम्। तस्मिन्नप्याकारे स एव सत्यत्वमिथ्यात्वविकल्प इत्यादिना जिज्ञासानुपपत्तिवादे दूषणमित्यर्थ:। दूषणान्तरमाह-**एवमिति**।मोक्षदशायां वेदितुरभावादेव वेदनीयत्वं न सिध्यतीति।संसारदशायां वेदितु: सद्भावेऽपि मोक्षदशायां वेदितुरभावेन ब्रह्मण: अनानन्दत्वं स्यादिति भाव:। **न द्वितीय** इति। अनुकूलवेदनत्वं अनुकूलं च तत् वेदनं चानुकूलवेदनं तत्त्वं सुखत्वमिति द्वितीय: कल्पोऽपि न। ब्रह्मण: ज्ञानस्वरूपत्वातिरिक्तस्यानुकूलत्वस्याभ्युपगमे निर्विशेषवादभङ्गप्रसङ्गात्। **तदनभ्युपगमे=** अनुकूलत्वस्यानङ्गीकारे। **व्यर्थविशेषणत्वात्** इति। विशेषणवाचित्वेनाभिमतमनुकूलपदं अनुकूलत्वरूपविशेषणस्य ब्रह्मण्यभावात् व्यर्थं स्यादित्यर्थ:। **पर्यायत्वादीति**। अनुकूलपदवेदनपदयोरुभयोरपि स्वरूपप्रवृत्तिनिमित्तकत्वे पर्यायत्वम्। अन्यथा नु प्रवृत्तिनिमित्तान्तरस्याप्यभावात् अबोधकत्वमेव स्यादिति भाव:। ननु वेदनानुकूलपदयो: भिन्नार्थत्वान्न पर्यायत्वम्। न चैवं सविशेषत्वम्। तद्गतविशेषणवाचित्वाभावादित्यत्राह - **न भिन्नार्थत्व** इति। विशेषणवाचित्वाभावे विशेष्यतो भिन्नार्थत्वं वाच्यम्। तथा च सामानाधिकरण्येनान्वय: घट:पट: इतिवदिति भाव:।

न तृतीयः, आनुकूल्यस्याऽऽपेक्षिकत्वेन किञ्चिदपेक्ष्येत्यभ्युपगम्यत्वात् भवतश्च तदयोगात् ।। स्वात्मानं प्रति इदमानुकूल्यमिति चेन्न; प्रतिसंबन्धित्वलक्षणस्वभावविशेषाभ्युपगमेऽपसिद्धान्तात्, अनभ्युपगमे तदुपाधिकानुकूलत्वस्यापि विनिवृत्तेः ।। अविद्याशबलितं स्वात्मानं प्रतीति चेत्–तर्हि तन्निवृत्तिप्रसङ्गः प्राग्वदेव ।

नापि चतुर्थः, औपनिषदमर्यादाबहिष्कारात् । अभावात्मकत्वप्रसङ्गाच्च ।। ब्रह्मणो दुःखनिवृत्तिरेव सुखशब्दवाच्यं भावान्तरमिति चेन्न; उदासीनावस्थायाः

न तृतीय इति । अनुकूलत्वमात्रं सुखत्वमिति तृतीयकल्पोऽपि न युक्तः । कस्यचित् वस्तुनः कंचित् प्रति अनुकूलत्वमिति दर्शनात् अनुकूलत्वमापेक्षिकम्, पुरुषविशेषसापेक्षम्। भवन्मते पुरुषविशेषानङ्गीकारात् तत्सापेक्षमनुकूलत्वं ब्रह्मणो न संभवतीति भावः । किंचिदपेक्ष्येत्यस्य स्थाने कंचिदपेक्ष्येति पाठः साधीयान् । ननु ब्रह्मणः स्वात्मानं प्रति अनुकूलत्वमित्याशङ्क्य स्वप्रतिसंबन्धिकमनुकूलत्वं स्वस्य प्रतिसंबन्धित्वं विना न संभवतीति प्रतिसंबन्धित्वाङ्गीकारेऽपसिध्दान्तः । तदनङ्गीकारे च स्वनिष्ठप्रतिसंबन्धितानिरूपकानुकूलत्वस्याभाव इति समाधत्ते-**स्वात्मानं प्रतीत्यादिना** ।ननु अविद्याविशिष्टं स्वात्मानं प्रति स्वस्यानुकूलत्वमिति न दोषः । शुध्दे ब्रह्मणि प्रतिसंबन्धित्वरूपधर्माभावेऽपि अविद्याविशिष्टे तत्संभवादिति शङ्कते-**अविद्येति** । तर्हि अविद्यानिवृत्तिरूपमुक्तिदशायां अविद्याशबलितब्रह्मणोऽभावात् तत्प्रतिसंबन्धिकमनुकूलत्वं न स्यात् इति समाधत्ते-**तर्हीति**। **तन्निवृत्तिदशायामिति**। अविद्यानिवृत्तिदशायामित्यर्थः ।

नापि चतुर्थ इति । सुखत्वं नाम दुःखनिवृत्तिरूपता इति चतुर्थः पक्षोऽपि न कल्पते।औपनिषदमर्यादाबहिष्कारात् । वेदान्तेषु दुःखनिवृत्तिमात्रस्य पुरुषार्थत्वानाङ्गीकारात्। वैशेषिकादिभिरेव दुःखनिवृत्तिमात्रस्य पुरुषार्थत्वाङ्गीकारात् । अपि च मुक्तेरभावरूपत्वं स्यादिति भावः । ननु दुःखनिवृत्तिः सुखरूपं भावान्तरं, अतो नाभावात्मकत्वप्रसङ्ग इति शङ्कते-**ब्रह्मण** इति । परिहरति- **उदासीनेति** । कदाचित् दुःखावस्था कदाचित् सुखावस्था कदाचित्

सर्वसम्मतत्वात्। पूर्वं निर्दुःखस्यापि शर्करादिरसास्वादजन्यसुखानुभवदर्शनाच्च। अन्यथा सुखनिवृत्तिरेव दुःखमिति वदन्तं प्रति किमुत्तरं भवेत् ? अभ्युपगम एवोत्तरमिति चेन्न; द्वयोरपि भावरूपत्वासिद्धिप्रसङ्गात्॥ भावान्तराभाववादिना नैवं चोदनीयमिति चेन्न; भिन्नोपाधिक्रोडीकारेणोदासीनावस्थासङ्ग्रहसिद्धेः, स्वरूपत एव निरूपण(णा) सिद्धेश्च। किंच, समस्तदुःखनिवृत्तिरूपां सुषुप्त्यवस्थामुद्दिश्य, 'नाहमत्र भोग्यं पश्यामि' इति वदन्तं प्रति भोग्यात्मस्वरूपोपदेशदर्शनात् दुःखनिवृत्त्यतिरिक्तसुखस्वरूपमात्मस्वरूपमिति ज्ञायते।

तदुभयरहिता उदासीनावस्थेति अवस्थात्रयं प्रसिध्दम्।दुःखनिवृत्तेः सुखरूपत्वे तु कदाचित् दुःखावस्था अन्यदा तु दुःखनिवृत्तिरूपसुखावस्थेति अवस्थाद्वयमेव स्यात् नोदासीनावस्थेति भावः। दुःखनिवृत्तिः न सुखरूपेत्यत्र हेत्वन्तरमाह– **पूर्वमिति**।पूर्वं निर्दुःखस्यापि दुःखाभावातिरिक्तस्य शर्करादिरसास्वादजन्यानुभवस्य दर्शनादित्यर्थः। **अन्यथेति**। उदासीनावस्थानङ्गीकारे इत्यर्थः। यदि दुःखनिवृत्तिः सुखम्,तर्हि सुखनिवृत्तिरेव दुःखं भवेत्। न चेष्टापत्तिः सुखदुःखयोर्भावरूपत्वासिध्दिप्रसङ्गात्। सुखस्य दुःखाभावरूपत्वात् दुःखस्य सुखाभावरूपत्वाच्च प्रतियोगिनिरूपणनियतनिरूपणकतया भावत्वासिध्दिप्रसङ्गादिति भावः। शङ्कते - **भावान्तरेति**। भावान्तराभावनादिना भावयोरेव सुखदुःखयोः परस्पराभावात्मकत्वस्य वक्तव्यत्वात् उदासीनावस्थासंग्रहाभावतौल्यात्। "अन्यथा सुखनिवृत्तिरेव" इत्यादिचोदना "द्वयोरपि" इत्यादिचोदना च न संभवतीति भावः। समाधत्ते-**भिन्नोपाधीति** न वयं सुखत्वेन दुःखाभावत्वं दुःखत्वेन सुखाभावत्वं च ब्रूमः। किं तु तत्तद्देशकालविशिष्टभावान्तरत्वेन। अत उदासीनावस्था सिध्यतीत्यर्थः। एवम् उदासीनावस्थासंग्रहाभावप्रतिबन्दी पराकृता। द्वयोरपि भावरूपत्वासिध्दि -प्रसङ्गप्रतिबन्दीमप्युध्दरति-**स्वरूपत** इति। दुःखनिवृत्तिरूपतां सुखनिवृत्तिरूपतां च विना सुखदुःखयोर्निरूपणसिध्देरित्यर्थः।

किंचेत्यादि। "नाहमत्र भोग्यं पश्यामि" इत्यत्र "अत्र" शब्देन सुषुप्त्यवस्था परामृश्यते। सा च ज्ञानेच्छादुःखादिसकलवृत्तिनिवृत्तिरूपा। तदानीं दुःखाभावे ज्ञायमानेऽपि

नापि पञ्चमः, 'विज्ञानमानन्दं ब्रह्म' इति सहप्रयोगेण व्यतिरेकसिद्धेः; न हीदं निघण्टुवत् पर्यायबोधनोपक्षीणं सङ्कीर्तनरूपं वा वाक्यम्, येन सहप्रयोगः सह्येत। यावता च विज्ञानत्वं ब्रह्मणः समर्थितम्, तावतैव हि भवताऽप्युपरन्तव्यम्। किमानन्दत्वोपपादनप्रयासेन ॥ अपर्यायताबोधनिवृत्त्यर्थोऽयं प्रयास इति चेन्न; तथाविधविवादाभावात् । तत्सद्भावेऽपि महता प्रयासेनापि सर्वलोकप्रसिद्धस्यापर्यायत्वस्यापि दुरपह्नवत्वात्। दुःखरूपाणि च कानिचित् विज्ञानान्युप-

---

''नाहमत्र भोग्यम्'' इत्युक्तेः दुःखाभावस्य भोग्यत्वाभाव उक्तः । उत्तरे च वाक्ये आत्मनो भोग्यत्वमुक्तम्। अतो भोग्यत्वेनोक्तस्यात्मनः अभोग्यत्वेनोक्तदुःखनिवृत्तिमात्रत्वं दुर्वचमिति दुःखनिवृत्त्यतिरिक्त-सुखस्वरूपमात्मस्वरूपमिति ज्ञायत इति भावः ।

नापि पञ्चम इति। ज्ञानात्मकत्वं सुखत्वमिति पञ्चमः कल्पोऽपि न युक्तः । ''विज्ञानमानन्दं ब्रह्म'' इति विज्ञानानन्दशब्दयोः सहप्रयोगेण आनन्दस्य ज्ञानातिरिक्तत्वसिध्देः। नहि पर्यायशव्दानां सहप्रयोगो भवतीति भावः । ननु निघण्डुषु पर्यायाणां सहप्रयोगो दृश्यते इत्यत्राह - **न हीदमिति** । नामसंकीर्तनरूपत्वे राम रामेतिवत् सहप्रयोगः स्यादपि । न हीदं नामसंकीर्तनमित्याह - **संकीर्तनरूपं वेति**।किं च ज्ञानत्वस्यैव आनन्दत्वरूपत्वे ज्ञानत्वं प्रसाध्यापि पुनः आनन्दरूपत्वसाधनप्रयासात्मकस्वप्रवृत्तिव्याघात इत्याह - **यावता चेति** । ननु ज्ञानानन्दशब्दयोरपर्यायत्वज्ञाननिरासायैव ज्ञानस्यानन्दत्वसाधनार्थः प्रयास इत्याशङ्कते-**अपर्यायतेति**। ज्ञानस्यानन्दशब्दवाच्यत्वमेव साध्यत इत्याशयः । समाधत्ते **तथाविधेति**। आनन्दस्य आनन्दशब्दवाच्यत्वे यथा न विप्रतिपतिः,तथा ज्ञानानन्दयोः ज्ञानत्वानन्दत्वयोश्चाभेदे सति ज्ञानेऽप्यानन्दशब्दवाच्यत्वे विप्रतिपत्यभावात् ज्ञानस्य आनन्दशब्दवाच्यत्वसाधनप्रयासो मुधेति भावः । **तत्सद्भावेऽपीति** । ज्ञानस्यानन्दशब्दवाच्यत्वे विप्रतिपत्तिसद्भावेऽपि महति प्रयासे कृतेऽपि ज्ञानानन्दशब्दयोः लोकप्रसिद्धस्य अपर्यायत्वस्यापह्नोतुमशक्यत्वादित्यर्थः । किं च न ज्ञानत्वमानन्दत्त्वम् । आनन्दत्वाभाववति दुःखेऽपि ज्ञानत्वसद्भावात् इत्याह— **दुःखरूपाणीति** दुःखादिकमपि

लभ्यन्ते, तदपि ज्ञानमात्रस्य सुखरूपत्वे विरुद्धम् ॥ भ्रान्त्या तदुपलम्भ इति चेन्न; विरोधिनि विज्ञानात्मकत्वे प्रकाशमाने तद्विरोधिनो दुःखरूपत्वस्यारोपासंभवात्। न हि सुखरूपतया प्रकाशमाने दुःखरूपत्वं कदाचिदध्यस्यति । नापि षष्ठः; बहिष्कृतानुकूल्यस्य तस्याऽऽनन्दशब्दवाच्यत्वायोगात् । तत्प्रतीकारे उक्तदूषणानुवृत्तेरेव दुष्टत्वात् । ज्ञानात्मकत्वातिरेकविकल्पेनापि दत्तमेवोत्तरं मन्तव्यमिति । अतो न कथञ्चिदपि निर्विशेषचिन्मात्रवादिनस्तदानन्दत्वसिद्धिरिति ॥

इति शतदूषण्यां निर्विशेषब्रह्मण आनन्दत्वभङ्गवादः सप्तपञ्चाशः ॥ ५७ ॥

ज्ञानविशेष इति स्वमतानुसारेणेदमुक्तम् । ननु ज्ञाने दु:खत्वोपलम्भो भ्रम इति शङ्कते– **भ्रान्त्येति। तदुपलम्भ** इति । ज्ञाने दु:खत्वोपलम्भ इत्यर्थ: । भ्रान्त्येति अभेदे तृतीया । भ्रान्तिरूप उपलम्भ इत्यर्थ: । समाधत्ते - **विरोधिनीति।** ज्ञाने दु:खत्वोपलम्भ: भ्रम इति शङ्कितुस्तव ज्ञानत्वं दु:खत्वविरोधीत्यभिप्रेतम् । तथा च ज्ञानत्वे दु:खत्वविरोधिनि प्रकाशमाने कथं तत्र दु:खत्वभ्रम: संभवति । न हि रजतत्वविरोधिनि शुक्तित्वे प्रकाशमाने सति शुक्तौ रजतत्वारोप: भवति इति भाव: । ननु ज्ञानत्वस्य दु:खत्वविरोधित्वाभावात् ज्ञाने दु:खत्वारोपसंभव इत्यत्राह - **न हीति।**ज्ञानत्वमेव सुखत्वमिति भवतोक्तत्वात् ज्ञानत्वात्मके सुखत्वे दु:खत्वविरोधिनि प्रकाशमाने दु:खत्वारोपो न संभवतीति भाव: । सुखत्वं किंचित् धर्मान्तरमिति षष्ठपक्षं दूषयति– **नापि षष्ठ** इति । अस्तु नाम आनन्दत्वं यत्किंचित् । आनन्दत्वेनाभिमतस्य अनुकूलत्वमस्ति वा न वेति निकल्प्य द्वितीये दोषमाह–**बहिष्कृतेति** । अनुकूलत्वरहितस्यानन्दशब्दवाच्यत्वं न संभवतीत्यर्थ: । आद्ये दोषमाह **तत्प्रतीकार** इति । अनुकूलत्वमङ्गीकृत्य आनन्दबाच्यत्वायोगपरिहारे अनुकूलत्व-मानन्दत्वमिति तृतीयपक्षे उक्तानां दूषणानामनुवृत्तिरेव दोष इति भाव: । **ज्ञानात्मकत्वेति।**किं च तत् आनुकूल्यं ज्ञानात्मकत्वमेव वा अतिरिक्तं वा। आद्ये सहप्रयोगानुपपत्त्यादि : पञ्चमपक्षोक्तदोष: प्रसजेत् । द्वितीये निर्विशेषवादापक्रमादि: द्वितीयपक्षोक्तदोष:प्रसजेदिति भाव: । निगमयति-अत इति । तदानन्दत्वसिद्धिरिति । निर्विशेषचिन्मात्रस्य आनन्दत्वसिद्धिरित्यर्थ: ।

इति श्रीशतदूषणीव्याख्यायां तात्पर्यप्रकाशिकायां निर्विशेषब्रह्मण:
आनन्दत्वभङ्गवाद: सप्तपञ्चाश: ॥

अथ निर्विशेषब्रह्मणो नित्यत्वभङ्गवादः अष्टपञ्चाशः ॥ ५८ ॥

श्लो. पूर्ववृत्तचतुष्केऽपि पूर्वत्वेनोपवर्णिते ।
नित्यानित्यविवेकेऽत्र नित्यत्वं वो निरस्यते ॥

श्रूयते हि-, 'नित्यं विभुं सर्वगतम्', 'नित्यो नित्यानाम्', इत्यादिभिरात्मतत्त्वनित्यत्वम् । तत् भवत्पक्षे नोपपद्यते; ब्रह्मव्यतिरिक्तमविद्याकालादिकं स्वरूपतोऽपि सर्वमनित्यं ब्रह्मैकमेव नित्यमिति हि वः सिद्धान्तः । तदेतत् ब्रह्मासाधारणनित्यत्वं (१) किं सर्वकालसत्तारूपम्, (२) उत कालावच्छेदनिवृत्तिरूपम्, (३) अथवा प्रध्वंसरहितत्वम्, (४) आहोस्विदबाधितत्वम्, (५) उत निर्विकारत्वम्, (६) यद्वा उभयावधिरहितत्वम्, (७) किञ्चिद्धर्मान्तरं वा ?

अथ निर्विशेषनित्यत्वभङ्गवादः अष्टपञ्चाशः ॥

पूर्ववृत्तचतुष्केऽपि पूर्वत्वेनोपवर्णिते ।
नित्यानित्याविवेकेऽत्र नित्यत्वं वो निरस्यते ॥

ब्रह्मजिज्ञासायाः यत् पूर्ववृत्तचतुष्कं नित्यानित्वस्तुविवेकः शमदमादिसाधनसंपत् इहामुत्रफलभोगविरागः मुमुक्षुत्वं चेति साधनचतुष्टयं तत्र पूर्वत्वेन प्रथमत्वेन उपवर्णिते नित्यानित्याविवेके वः युष्माकं युष्मदभिमतं नित्यत्वम् अत्र अस्मिन् वादे निरस्यते निराक्रियते।

मुमुक्षापर्यन्तं हि साधनचतुष्टयान्तर्गतं सर्व नित्यानित्यानित्य-वस्तुविवेकसाध्यम्। अतः नित्यत्वसिध्दावेव नित्यानित्यवस्तु विवेकपूर्वकं पूर्ववृत्तचतुष्कं सिध्यति । तच्च नित्यत्वं त्वन्मते न संभवतीति शास्त्रारम्भ एवोच्छिद्येतेति भावः ।

श्रूयते हीत्यादि । ''नित्यं बिभुं सर्वगतम्'' ''नित्यो नित्यानां चेतनश्चेतनानाम्''इत्यादिभिः आत्मतात्त्वं नित्यमिति श्रूयते । तथा च भवन्मते आत्मनः नित्यत्वानुपपत्तौ अस्माभिरुद्भावितायां इष्टापत्तिरिति भवता वक्तुं न शक्यते , आत्मनः नित्यत्वस्य श्रुतिसिध्दत्वादिति भावः । तत् आत्मनित्यत्वं भवत्पक्षे नोपपद्यते । कुत इत्यत्राह **ब्रह्मव्यतिरिक्तमिति** ।ब्रह्मणोऽपि तत्तद्वृत्त्यवच्छिन्नचैतन्य- रूपेणानित्यत्वात् तद्व्यावृत्त्यर्थमाह-**स्वरूपतोऽपि** इति । नित्यानित्यवस्तुविवेकस्य पूर्ववृत्तत्ववादिनां

नाऽऽद्यः; अविद्याया अपि नित्यत्वप्रसङ्गात् । साऽपि हि सर्वेण कालेन सम्बध्यत एव । सर्वस्यापि कालस्य तत्कार्यत्वाभ्युपगमेन तदसम्बन्धानुपपत्तेः ॥ साऽपि कदाचिन्निवर्तिष्यत इति चेत्; किमनेन, तन्निवृत्तौ तदुपादानककालावस्थानायोगात् तदसम्बद्धकालासिद्धेः ॥ सर्वकालसम्बन्धे सत्यपि सर्वकालसत्ता नास्तीति विशेष इति चेत्-तर्हि नित्यत्वलक्षणे सर्वकालपदवैयर्थ्यम्; सत्तैव

युष्माकं ब्रह्मैकमेव नित्यमन्यत् सर्वमनित्यमिति सिद्धान्तः। तदिदं ब्रह्मणोऽसाधारणं नित्यत्वं किंरूपम्। (१) किं सर्वकालसत्तारूपम् (२) उत कालावच्छेदनिवृत्तिरूपम् (३) अथवा प्रध्वंसरहितत्वम् (४) आहोस्वित् अबाधितत्वम् (५) उत निर्विकारत्वम् (६) यद्वा उभयावधिराहित्यम्= पूर्वोत्तरावधिराहित्यम् (७) किंचित् धर्मान्तरं वेति सप्तधा विकल्पः।

तत्र प्रथमविकल्पं दूषयति --**नाद्य** इत्यादिना । सर्वकालसत्तारूपं नित्यत्वमविद्यायामस्तीति तत्रातिव्याप्तिः। तथा हि- अविद्यायाः सर्वेण कालेन संबन्धः एष्टव्यः। अविद्यायाः सर्वोपादानत्वेन कालं प्रत्यपि उपादानत्वेन उपादानस्य चोपादेयेन संबन्धस्यावश्यकत्वात् सर्वकालसंबन्धोऽविद्यायामस्तीति। **तत्कार्यत्वाभ्युपगमेन** =अविद्योपादेयत्वाङ्गीकारेण। **तदसंबन्धानुपपत्तेः** सर्वकालासंबन्धस्याविद्यायामनुपपत्तेः। ननु अविद्यानिवृत्तिरपि कदाचित् भविष्यति। तत्काले च नाविद्येति न तस्याः सर्वकालसंबन्धित्वमिति शङ्कते - **सापीति**। **किमनेनेति**। अविद्या कदाचित् निवर्तिष्यत इति वचनमपार्थकम्। अविद्यायाः निवृत्तौ तत्कार्यभूतकालस्यापि निवृत्त्या अविद्यासंबन्धरहितकालस्यैवाभावात् कदाचित् अविद्या न भविष्यतीति वक्तुं न शक्यत इति भावः। **तदुपादानेति**। सा अविद्या उपादानं यस्य तस्य कालस्यावस्थित्यसंभवादित्यर्थः। **तदसंबध्देति**। अविद्यासंबन्धरहितकालस्य असिध्देरित्यर्थः। ननु अविद्यायाः सर्वकालसंबन्धोऽस्ति; सर्वकालसत्ता नास्ति, सत्ता सत्यत्वं। अतो न नित्यत्वं तस्याः, सर्वकालसत्यत्वस्यैव नित्यत्वरूपत्वात् इति शङ्कते -। **सर्वकालेति**। **तर्हीति**। सत्ता नित्यत्वमित्येतावतैव सत्यत्वरूपसत्ताविरहात् अविद्यायामतिव्याप्तिवारणसंभवेन

नित्यत्वमित्येतावतैव ब्रह्मव्यतिरिक्तसर्वव्यवच्छेदात्। न चैवमस्त्विति वाच्यम्; सच्छब्दनित्यशब्दयोरपर्यायत्वेनैव प्रसिद्धेः । अतः सर्वस्मिन् काले स्वरूपलाभमात्रमेव नित्यत्वं वक्तव्यम्, तच्चाविद्यायामपि समानमिति न ततो विवेकः।

न द्वितीयः, कालस्यापि तत्सद्भावेन ततो विवेकासिद्धेः । न कालः कालान्तरेणावच्छिद्यते, तथा सति अनवस्थानात्। नापि स्वेन; कर्मकर्तृविरोधात्।

नित्यत्वलक्षणे सर्वकालेति पदस्य वैयर्थ्यमिति भावः। नित्यत्वलक्षणे इत्यस्य नित्यत्वात्मके ब्रह्मासाधारणधर्मे इत्यर्थः। **न चैवमिति** ।सत्तैव नित्यत्वमित्यस्तु सर्वकालेति पदं मास्तु इति न च वक्तुं शक्यम् । सच्छब्दनित्यशब्दयोः अपर्यायत्वेनैव प्रसिध्देः इत्यर्थः। ननु सत्तामात्रविवक्षायां नित्यशब्दप्रयोगाभावात् सच्छब्दनित्यशब्दयोःपर्यायत्वप्रसङ्गाच्च सत्वं न नित्यशब्दार्थः। किं तु सर्वकालसत्त्वमेव नित्यशब्दार्थः। अतो न सर्वकालपदवैयर्थ्यमपीत्यत्राह- **अत** इति। उक्तरीत्या सत्तामात्रे विवक्षिते नित्यशब्दप्रयोगाभावात् सन्नित्यशब्दयोरपर्यायत्वाच्च सर्वकालपदनिवेशे आवश्यके सत्यत्वांशो नित्यत्वलक्षणे न प्रवेश्यः, गौरवात् । सत्यत्वांशाप्रतिसन्धानेऽपि नित्यत्वव्यवहाराच्चेति सर्वस्मिन् काले स्वरूपलाभमात्रं नित्यत्वम्। तच्च पूर्वोक्तरीत्या अविद्यायामपि समानमिति अविद्यायाः नित्यत्वप्रसङ्गो दुर्वार इति अविद्यापेक्षया ब्रह्मणो विवेको न संभवतीति भावः।

नित्यत्वं कालावच्छेदनिवृत्तिरूपमिति द्वितीयपक्षं निरस्यति-**न द्वितीय** इत्यादिना। यथा ब्रह्मणः कालावच्छेदो नास्ति तथा कालस्यापि कालावच्छेदो नास्तीति कालावच्छेदाभावरूपं नित्यत्वं कालेऽप्यस्तीति नेदृशं नित्यत्वं ब्रह्मासाधारणमिति भावः। **तत्सद्भावेन**=कालावच्छेदाभावसद्भावेन। **ततः**=कालात्। विवेकासिद्धेः, ब्रह्मण इति शेषः। कालस्य कालावच्छेदः कुतो नास्तीत्यत्राह - **न हीति**। किं कालस्य कालान्तरेणावच्छेदः, स्वेन वा। नाद्यः, अनवस्थानात् स्वस्य कालान्तरेणेव कालान्तरस्यापि तद्भिन्नेन कालेनावच्छेद इति रीत्या अनवस्थाप्रसङ्गात् । न द्वितीयः, स्वस्य स्वकर्तृकावच्छेदकर्मत्वमित्यायाति,

न च स्वतः पूर्वापरभावेनावस्थितैः स्वांशैरवच्छिद्यत इति वाच्यम्; तथा सति वस्तूनामिव कालस्यापि क्षणिकत्वादिप्रसङ्गात् ॥ समस्तस्वांशसमुदायावच्छेदान्न दोष इति चेत्–तत्र कोऽयमवच्छेदो नाम ? किं तत्सम्बन्धित्वमात्रम्, किं वा तत्पूर्वोत्तरकालयोरविद्यमानत्वम्, उत तत्समकालभावित्वम् यद्वा तदात्मकत्वमेवेति।

तथा सति एकस्यैव कालस्य अवच्छेदरूपक्रियायां कर्तृत्वं कर्मत्वं च प्रसजतीति भावः। ननु कालस्तावत् सावयवः। तस्यावयवाः पूर्वापरीभावमापन्नाः। तादृशैरवयवैः कालोऽवच्छिद्यते। ते चावयवाः स्वत एव पौर्वापर्यमापन्ना इति नानवस्थेति शङ्कते - **न च स्वत** इति। परिहरति - **तथा सतीति**। कालावयवावच्छेदेन कालसंबन्धात् यथा वस्तूनां क्षणिकत्वं, तथा कालस्यापि क्षणिकत्वप्रसङ्गादित्यर्थः। क्षणलवादिरूपाणां सूक्ष्मस्थूलतरादिकालानां प्रत्येकमवच्छेदकत्वे तत्तत्सूक्ष्मकालमात्र-स्थायित्वं स्यादिति भावः। ननु प्रत्येकं स्वांशानामवच्छेदकत्वे ह्ययं दोषः, सकलांशसमुदायस्यावच्छेदकत्वे तु नायं दोष इति शङ्कते - **समस्तेति**। विकल्पपूर्वकमिमां शङ्कां परिहरति - **तत्र कोऽयमिति**। कालावच्छेदनिवृत्तिरूपं नित्यत्वमित्यत्र कालावच्छेदशब्दस्य कोऽर्थः। (१) किं कालसंबन्धित्वमात्रम् (२) किं वा तत्पूर्वोत्तरकालयोरविद्यमानत्वम् (३) उत तत्समकालभावित्वम् (४) उत तदात्मकत्वमेवेति। कालात्मकत्वमेवेति तदर्थः। **आद्ये** इति। कालसंबन्धोऽनित्यत्वम्, तदभावः नित्यत्वमित्युक्तं भवति। तथा सति ब्रह्मणोऽपि कालसंबन्धस्यावर्जनीयत्वेनानित्यत्वापत्तिः। तत्संबन्धस्येत्यस्य पूर्वोक्तसमस्तकालांशसंबन्धस्येत्यर्थ :। ब्रह्मणः सर्वदा सत्त्वादिति भावः। ननु पारमार्थिककालसंबन्धस्याभावो नित्यत्वम्। ब्रह्मणि कालसंबन्धस्य मिथ्यात्वात् पारमार्थिककालसंबन्धाभावोऽस्तीति नित्यत्वोपपत्तिरित्यशङ्क्य घटादावपि पारमार्थिकस्य कालसंबन्धस्याभावात् नित्यत्वापत्तिरित्याह - **तन्मिथ्यात्वादिति**। न च पारमार्थिकस्य कालसंबन्धस्याप्रसिद्धत्वात् कथं शङ्काया उत्थितिरिति वाच्यम्। पारर्थिकत्वेन कालसंबन्धस्य अभावो नित्यत्वमित्याशयेन शङ्कोत्थानात्। कालसंबन्धनिष्ठ पारमार्थिकत्वावच्छिन्न-

आद्ये ब्रह्मणोऽप्यनित्यत्वप्रसङ्गः, तत्सम्बन्धस्यावर्जनीयत्वात्; तन्मिथ्यात्वात् तत्परिहारे घटादेरपि नित्यत्वप्रसङ्गात्। द्वितीये पूर्वोत्तरकालशब्दार्थासिद्धिः। न हि कालात्पूर्वं पश्चाच्च 'कालोऽस्ति' इति बालिशोऽपि ब्रूयात्। एवं नास्तीति न ब्रूयादेव, स्ववचनविरोधप्रसङ्गात्। अत एव च कालस्यानाद्यन्तत्वसिद्धिरिति कुतस्ततो विवेकः ? तृतीयेऽपि कालान्तराभावेन समकालशब्दार्थासिद्धिः। चतुर्थे तु घटादेर्नित्यत्वप्रसङ्गः, कालांशतादात्म्यलक्षणकालावच्छेदाभावात्।

प्रतियोगिताकाभावः नित्यत्वमिति यावत्। **तन्मिथ्यात्वात्**=कालसंबन्धस्य मिथ्यात्वात्। **तत्परिहारे** =अनित्यत्वपरिहारे। **नित्यत्वप्रसङ्गादिति**। पारमार्थिकत्वेन कालसंबन्धाभावस्य घटादावपि सत्त्वादिति भावः। **द्वितीये** इति। पूर्वोत्तरकालावच्छेदो नाम पूर्वोत्तरकालयोरविद्यमानत्वम् इति पक्षे कालांशसमुदायापेक्षया पूर्वोत्तरकालयोरप्रसिद्धेः, पूर्वोत्तरत्वेनाभिमतकालांशानां कालांशसमुदायान्तर्गतत्वादिति भावः। तदेवोपपादयति – **न हीति**। अंशापेक्षया पूर्वोत्तरकालौ हि अंश्यपेक्षयापीति वक्तव्यम्। अंशी चात्र कालः। तदपेक्षया च पूर्वोत्तरकालौ न संभवतः, कालान्तराभावात्। स्वाभेदे तु पूर्वापरीभावो न संभवतीति भावः। कालांशसमुदायेनावच्छेदो नाम तत्पूर्वोत्तरकालयोः कालस्याविद्यमानत्वम्। तत्र तत्पूर्वोत्तरकालयोरुक्त्यसंभव उक्तः। अथ तत्र कालस्याविद्यमानत्वोक्तेरप्यसंभवमाह **एवमिति**। कालात् पूर्वं पश्चाच्च कालो नास्तीति न ब्रूयात्, स्ववचनविरोधात्। पूर्वं पश्चादिति कालद्वयं निर्दिशन्नेव तन्नास्तीति यदि वदति तदा पूर्वं पश्चादिति वचनेन नास्तीति वचनस्य विरोध इति भावः। **अत एवेति**।पूर्वोत्तरकालौ तयोरविद्यमानत्वं च यतो व्याघातान्न भवति अत एव कालस्य आद्यन्ताभावः त्वया वक्तव्य इति कालस्यापि नित्यत्वात् तद्विवेको ब्रह्मणो न सिध्यतीति भावः। **तृतीयेऽपीति**। कालावच्छेदो नाम कालसमकालत्वमिति पक्षे कालद्वयाभावेन कालसमकालशब्दार्थस्यासिद्धिः। **चतुर्थे त्विति**। कालावच्छेदो नाम कालांशात्मकत्वम्,तदभावःनित्यत्वमिति चतुर्थपक्षे घटादीनामपि कालांशात्मकत्वाभावान्नित्यत्वप्रसङ्ग इति भावः।

न च तृतीयः, प्रध्वंसस्य प्रध्वंसाभावेन नित्यत्वप्रसङ्गात् । ततः किमिति चेत्–ब्रह्मव्यतिरिक्तानन्तप्रध्वंसनित्यत्वेन ब्रह्मैकमेव नित्यमिति निर्बन्धानुपपत्तिः। नापि चतुर्थः, अबाधिततया लोकाभिमतेषु सत्यर(म्यग्र)जतादिषु नित्यशब्दप्रयोगादर्शनात् । न च लोकमन्तरेण शब्दार्थसम्बन्धसिद्धिः । न च बाधबुद्ध्या

तदेवम् आरम्भे प्रस्तुतेषु सप्तसु नित्यत्वविकल्पेषु कालावच्छेदनिवृत्तिरूपं द्वितीयकल्पं चतुर्धाविकल्प्य दूषणमभ्यधायि ।अथ तेषु सप्तसु कल्पेषु प्रध्वंसरहितत्वं नित्यत्वमिति तृतीयकल्पं दूषयति -**न च तृतीय** इति। प्रध्वंसरहितत्वं नित्यत्वमिति वक्तुं न शक्यते। प्रध्वंसस्य प्रध्वंसाभावेन नित्यत्वप्रसङ्गात् ।ततः का हानिरिति चेत्-अनन्तानां घटपटादिध्वंसानां ध्वंसाभावेन नित्यत्वे सति ब्रह्मैकमेव नित्यमिति निर्बन्धानुपपत्ति :।

अत्र चण्डमारुतम् - ननु प्रध्वंसस्यापि प्रध्वंसः तत्त्वज्ञानात् भवति । अनवस्था तु ब्रह्मण एव प्रध्वंसप्रध्वंसरूपत्वात् परिहृता । अत एव मुक्तावपि प्रध्वंसप्रवाहानन्त्यकल्पनादपि प्राथमिकध्वंस एवानन्तोऽस्तु इति शङ्का च परिहृतेति चेत् - तर्हीदानींतनघटादिध्वंसोऽपि ब्रह्मैव स्यादिति ध्वंसोच्छेदः । न च मुद्गरपाताद्यनन्तरभावित्वान्न तथेति वाच्यम् । तत्त्वज्ञानाविद्यानिवृत्त्यनन्तरभावित्वेन ध्वंसध्वंसस्यापि ब्रह्मातिरिक्तत्वात् - इति । **अनन्तप्रध्वंसेति**। अनन्तपदमसंख्यपरम्।

अबाधितत्वं ब्रह्मासाधारणं नित्यत्वमिति चतुर्थपक्षं दूषयति- **नापि चतुर्थ** इति । अबाधितत्वेन लोकप्रसिद्धेषु सत्यरजतादिषु नित्यशब्दप्रयोगादर्शनात् नित्यत्वं नाबाधितत्वमित्यर्थः । सम्यग्रजतादिषु अनित्येषु अतिव्याप्तिरित्युक्तं भवति । परमते सम्यग्रजतादीनामबाधितत्वासंप्रतिपत्तेरुक्तं- **लोकाभिमतेष्विति** । शब्दार्थसंबन्धस्य लोकव्यवहारानुसारेणैव निर्णेयत्वादित्याह - **न च लोकमिति**। किं च यदि अबाधितत्वं नित्यत्वं तदा बाधितत्वमनित्यत्वमित्युक्तं भवति। तथा सति घटादेरनित्यत्वं न स्यात्। न हि घटादिर्बाधित इति बुध्द्या घटादिरनित्य इति व्यवह्रियते लोके। ''ब्रह्मव्यतिरिक्तं सर्वं मिथ्या, तत्त्वज्ञानबाध्यम्'' इति भवदीयमुपदेशं ये न जानन्ति तेषां लौकिकानां घटादिषु

घटादिष्वनित्यशब्दप्रयोगो दृश्यते, भवदीयमुपदेशमविदुषां लौकिकानां तेषु तद्बुद्ध्यभावात्। नापि पञ्चमः, विकाराणां निर्विकारत्वेन नित्यत्वप्रसङ्गात्। तेषामपि सविकारत्वेऽनवस्थानात्। विकारान्तरोपादानत्वे च तेषां द्रव्यत्वप्रसङ्गाच्च। ततश्च द्रव्याणामनित्यत्वं तद्विकाराणां नित्यत्वमिति सर्वलोकविरोधादिप्रसङ्गः। ब्रह्मणश्च निर्विकारत्वानुपपत्तिः स्वावसरे द्रष्टव्या। नापि षष्ठः, व्यावहारिकोभयान्त-

---

बाधबुद्ध्यभावात् इत्याह – **न चेति**। निर्विकारत्वं नित्यत्वमिति पञ्चमपक्षं दूषयति – **नापि पञ्चम** इति। विकारशब्देन किं परिणामो विवक्षितः उत कादाचित्कापृथक्सिद्धधर्म इति विकल्पमभिप्रेत्य प्रथमं दूषयति – **विकाराणा** मिति। विकाराणां परिणामरूपविकाराभावेन निष्परिणामत्वमस्तीति नित्यत्वप्रसङ्गः। तेषामपि परिणामाङ्गीकारेऽनवस्था प्रसजति। द्वितीये विकाराणां कादाचित्कापृथक्सिद्धधर्माङ्गीकारे तेषां द्रव्यत्वप्रसङ्गः। ततश्च द्रव्याणामनित्यत्वं तद्विकाराणां नित्यत्वमिति सर्वलोकविरोधादिप्रसङ्गः। पूर्वेद्युः पिण्डात्मनावस्थिता मृदादयो घटीभूय तिष्ठन्तीति द्रव्यस्थैर्यं विकारास्थैर्यं च लोकसिद्धं तद्विरोधप्रसङ्ग इति भावः। अव्याप्तिमप्याह **ब्रह्मणश्चेति**। स्थूलचिदचिद्वैशिष्ट्यं मूर्तद्रव्यसंयोग इत्यादयो विकारा ब्रह्मणि सन्तीति निर्विकारत्वं ब्रह्मणि नास्तीति तस्य नित्यत्वं न स्यादिति भावः।

पूर्वोत्तरोभयावधिरहितत्वं नित्यत्वमिति षष्ठपक्षं निराकरोति – **नापि षष्ठ** इति। किं व्यावहारिकोभयावधिराहित्यं विवक्षितम्, उत पारमार्थिकोभयावधिराहित्यम्। नाद्यः, तत्तद्वृत्त्यवच्छिन्नस्य व्यावहारिकभेदवत् कादाचित्कतया उत्पत्तिरप्यस्त्येवेति ब्रह्मणोऽनित्यत्वं स्यात्। न द्वितीयः, पारमार्थिकोभयावधिमत्त्वस्य प्रपञ्चेऽप्यभावेन प्रपञ्चस्यापि नित्यत्वप्रसङ्गादिति भावः। ननु स्वसमानसत्ताकयोरुभयावध्योरभावः नित्यत्वम्। ब्रह्मणि स्वगतपारमार्थिकसत्तासमानसत्ताकावध्योरभावान्नित्यत्वोपपत्तिः। प्रपञ्चे स्वसमानव्यावहारिकसत्ताकावधिमत्त्वादनित्यत्वोपपत्तिरिति चेन्न। अविद्याया अपि नित्यत्वापत्तेः, तस्या अप्यवधिद्वयाभावात्, पूर्वावध्यभावेऽपि उत्तरावधिसत्त्वेन अवधिद्वयरहितत्वादिति।

वत्त्वस्य संविदात्मके ब्रह्मण्यपि समानत्वात्। पारमार्थिकस्य तस्य प्रपञ्चेऽप्यभावेन तस्यापि नित्यत्वप्रसङ्गात्। अत एवाबाधितमुभयान्तराहित्यमित्यपि निरस्तम्ः प्रपञ्चगतोभयान्तराहित्यस्याप्यबाधितत्वात्। नापि सप्तमः, तत् किं नित्यशब्दप्रवृत्तिनिमिततया लोकव्युत्पतिसिद्धम्, उत नेति विचारणीयम्। आद्ये लोक एव प्रतिपक्षः। द्वितीये तु ब्रह्मण औपचारिकनित्यत्वमेव वा पारिभाषिकं वा नित्यत्वमिति अनित्यतायामेव पर्यवसानम्। तथा च कुतो नित्यानित्यवस्तुविवेकः ?

किंच संविदनित्येति वदतः सौगतादीन् प्रति किं लोकोपलम्भसिद्धाया विषय-

---

ननु पारमार्थिकत्वं राहित्यविशेषणम्, नावधिरूपप्रतियोगिविशेषणम्। घटादौ च स्वरूपस्य मिथ्यात्वात् राहित्यमपि मिथ्येति नातिव्याप्तिरिति शङ्कां निराकरोति-**अत एवेति**। **अबाधितमिति**। पारमार्थिकमित्यर्थ:। घटादिप्रपञ्चे हि पूर्वोत्तरोभयावधिमत्त्वं व्यावहारिकम्। तद्राहित्यं च न प्रातिभासिकम्, तस्याप्रतीते:। नापि व्यावहारिकम्, स्वसमानसत्ताकप्रतियोगिविरोधात्। अत: परिशेषात् परमार्थ इति अबाधितस्य उभयावधिराहित्यस्य सद्भावात् घटादे: नित्यत्वप्रसङ्ग इति भाव:। न च घटादौ तद्राहित्यमेव नास्तीति वाच्यम्। तदभावे अबाधितत्वविशेषणवैयर्थ्यादिति। ननुमा भूदबाधितत्वविशेषणमिति चेत् - न। प्रतियोगिनोऽपरमार्थत्वे प्रपञ्चे उभयावधिमत्त्वाभावस्यावश्यंभावात्।

किंचिद्धर्मान्तरं वेति सप्तमकल्पं निरस्यति - **नापि सप्तम इति**। तत् धर्मान्तरं किमपि भवतु। तत् किं नित्यशब्दप्रवृत्तिनिमित्ततया लोकव्युत्पत्तिसिद्धम् उत नेति विचारणीयम्। आद्ये लोक एव भवतां प्रतिपक्ष:। लोके सर्वकालसंबन्धित्वमेव नित्यशब्दप्रवृत्तिनिमित्ततया गृहीतम्। तथा अविद्यादेरपि नित्यत्वापत्तिरिति प्रथमकल्पोक्तदोषा जागरूका भवन्ति। द्वितीये लोकाप्रसिद्धम् औपचारिकं पारिभाषिकं वा नित्यत्वं ब्रह्मण इति अनित्यतायामेव पर्यवासनमिति कुतो नित्यानित्यविवेक: इति भाव:।

किं चेत्यादि। संवित् अनित्येति सौगता वदन्ति। तान् प्रति संवित् नित्येति

ग्राहिण्या एव संविदस्त्वया नित्यत्वं साध्यते ? उत लोकोत्तीर्णायाः कस्याश्चित्? आद्ये प्रत्यक्षादिविरोधः, विषयनित्यत्वप्रसङ्गश्च । अस्मदादिप्रत्यक्षज्ञानं तावत् घटादिकं स्वसत्ताकाले सन्तं साधयति; न पुनः पूर्वोतरकालसत्तां विद्यमानामपि गृह्णाति । तत् कस्य हेतोः ? स्वकालाकलितवस्त्ववभासित्वनियमात् । ततश्च यदि स्वयं कालानवच्छिन्ना संवित् स्यात्, विषयस्यापि कालानवच्छेदेन प्रकाशप्रसङ्गः। तेनैवाबाधितेन तन्नित्यत्वमवर्जनीयम् ।

अनुमानेन साध्यते भवता। तत्र पृच्छाम: किं लोकानुभवसिद्धाया: विषयग्राहिण्या : संविद: नित्यत्वं साध्यते, उत लोकोत्तीर्णाया: कस्याश्चित् संविद: । आद्ये प्रत्यक्षादिविरोध: । विषयग्राहिण्या: संविद: मम घटज्ञानमुत्पन्नं घटज्ञानं नष्टमिति अनित्यत्वेनैव अनुभवात् इति भाव:। **विषयनित्यत्वप्रसङ्गश्चेति।** यदि विषयग्राहकस्य ज्ञानस्य नित्यत्वं साध्यते, तदा विषयस्यापि नित्यत्वप्रसङ्ग :। तथा हि अयं घट इति घटमहं पश्यामीति वा यत् प्रत्यक्षं तत् स्वसत्ताकाले घटादिकं सन्तं साधयति, न तु घटादे: पूर्वोत्तरकालसत्तां विद्यमानामपि गृह्णाति। तत् कस्य हेतो: ? प्रत्यक्षस्य स्वसमकालिकवस्तुग्राहकत्वमिति नियमात्। तथा च घटादिसंवित् यदि स्वयं कालानवच्छिन्ना नित्या स्यात् विषयस्यापि तत्समकालिकत्वस्यावश्यकतया कालविशेषसंबन्धं विना प्रकाशप्रसङ्ग:। ततश्च घटादे: कालानवच्छेदात् नित्यत्वमवर्जनीयमिति भाव:। **अस्मदादीति**। परोक्षज्ञाने स्वकालीनत्वेन विषयग्राहकत्वनियमाभावात् प्रत्यक्षेत्युक्तम्। **तेनैवेति** ।कालानवच्छेदेनैवेत्यर्थ:।

अत्र चण्डमारुतव्याख्यानम् - लौकिकप्रत्यक्षं हि स्वाधिकरणतया यावान् काल उभयसंप्रतिपन्न: तावत्कालीनतया विषयं गृह्णाति। तत्कालपूर्वोत्तरकालीनत्वं विषयस्य विद्यमानमपि न गृह्णाति। तत्र किंचित् प्रयोजकं वक्तव्यम् । न चान्यदुपलभामहे। अतोऽस्य यावत्स्वकालमात्रावच्छिन्नवस्त्ववभासकत्वस्वभाव: तत्प्रयोजक: कल्पनीय:। ईदृशस्वभावकं ज्ञानं चेत् नित्यं भवेत्, तदा यावत्पूर्वोत्तरकालावच्छिन्नतया विषयमवभासयेत्, तावत्कालीनत्वं चाबाधितमिति विषयोऽपि नित्य: स्यात्। न च पूर्वोत्तरकालयो: घटो नास्तीति प्रतीत्या

यदि पुनर्विषयिकालानवच्छेदेन विषयो गृह्यत इति मन्यसे, तथाऽप्येकयैव अस्मदाद्यैन्द्रियकसंविदा विषयस्य यावत्सत्त्वं प्रकाशप्रसङ्गो दुर्वारः। एवं वर्तमानतया वस्तु गृह्णन्तीष्वनुमानादिसंवित्स्वपि विषय-नियत्वप्रसङ्गः समानः। याश्चातीततयाऽनागततया च स्वसंवेद्यं गृह्णन्ति, ता अपि स्वकालापेक्षयाऽतीततयाऽनागततया च वस्तु गृह्णन्तीति स्वयं कालानवच्छेदे स्वविषयाणामप्यतीतत्वागामित्वलक्षणकालावच्छेदो न स्यात्। द्वितीये त्वश्रयासिद्धिंः॥ शास्त्रसिद्धा सेति चेन्न; नित्यतया तत्सिद्धौ अनुमाननैरपेक्ष्यात्, अनित्यतया तत्सिद्धौ तु बाधात्। संविन्मात्रस्य च लोकसिद्धत्वेन शास्त्रागोचत्त्वात्।

बाधस्त्वया सुवचः। त्वया ज्ञानभेदानङ्गीकारात्।स्वेनैव स्वस्य बाधायोगात्। बाधकत्वाभिमतज्ञानान्तरस्याऽपि नित्यत्वेन परस्परविरोधेन द्वयोरप्येकत्रासंभवाच्चेति भावः। **यदि पुनरिंत्यादि**। ज्ञानेन तत्कालावच्छिन्नतया विषयो न गृह्यते, किं तु स्वरूपतः न चैवमपि नित्यप्रकाशप्रसङ्गः। विद्यमानस्यैव वस्तुनः प्रत्यक्षे भाननियमादिति यद्युच्यते, तथापि भासकज्ञानस्य नित्यत्वेन यावत्सत्त्वं विषयः प्रकाशेतेति भावः। **विषयिकालः**=ज्ञानकालः। क्वचित् पुरुषान्तरसंविदा धारावाहिकादिसंविदा च विषयस्य यावत्सत्त्वं प्रकाशेन इष्टापादनव्यावृत्त्यर्थम् **एकयैवेति**। **एवमिति**। वर्तमानत्वेन विषयग्राहिणी अनुमितिः नित्या चेत् तत्तत्स्वकालावच्छिन्नतयैव विषयं गृह्णीयादिति विषयस्य नित्यत्वं स्यादित्यर्थः। **याश्चातीततयेति**। याश्चातीततया अनागततया च विषयं गृह्णन्ति संविदः ता अपि वस्तुनः स्वकालापेक्षया अतीततया अनागततया च वस्तु गृह्णन्तीति स्थितिः। ता यदि नित्याः स्वयं कालानवच्छिन्नाः स्युः तदा तद्विषयाणामपि अतीतत्वागामित्व-रूपकालावच्छेदो न स्यादिति नित्यत्वं प्रसज्येत इति भावः।

एतावता लोकानुभवसिद्धायाः विषयग्राहिण्या : संविदः नित्यत्वसाधने दोषा उक्ताः। अथ लोकोत्तीर्णायाः संविदः नित्यत्वसाधने दोषमाह - **द्वितीये त्वाश्रयासिद्धिः इति**। तादृशी संविदेव नास्तीति तां पक्षीकृत्य नित्यत्वसाधने आश्रयासिध्दिः दोष इति भावः।

किञ्च नित्यत्वं किं स्वरूपम्, उत धर्मः ? पूर्वत्र स्वप्रकाशेनैव नित्यमित्युपलम्भप्रसङ्गः । धर्मत्वेऽपि किं स्वप्रकाशैकवेद्यम्, उत ज्ञानान्तरवेद्यम् ? पूर्वत्र स एव प्रसङ्गः । उत्तरत्रापि किं सविन्निष्ठतया ग्राह्यम्, उतान्यथा ? आद्ये संविदोऽपि ज्ञानान्तरवेद्यत्वसधर्मत्वादिप्रसङ्गः । अन्तिमे संविन्नित्यत्वासिद्धिः । न हि नित्यत्वं

ननु शास्त्रेण लोकोत्तीर्णा संवित् सिद्धेति नाश्रयासिध्दिरित्याशङ्क्य सा संवित् नित्यत्वेन शास्त्रसिद्धा वा अनित्यत्वेन शास्त्रसिद्धा वा । आद्ये शास्त्रेणैव नित्यत्वेन तत्सिद्धौ नित्यत्वानुमानस्य वैयर्थ्यम् । अनित्यत्वेन तत्सिद्धौ तु शास्त्रत: अनित्यत्वेन सिद्धां संविदं पक्षीकृत्य नित्यत्वस्य साधने बाध: । यदि तु नित्यत्वानित्यत्वाभ्यां विना संविन्मात्रं शास्त्रत: सिद्धम् इत्युच्यते, तदा संविन्मात्रस्य लोकसिद्धत्वात् न तस्य शास्त्रविषयत्वम् । अप्राप्ते हि शास्त्रमर्थवदिति भाव: । **किं चेत्यादि** । नित्यत्वं किं ब्रह्मस्वरूपम् उत स्वरूपातिरिक्तो धर्म: । आद्ये ब्रह्मप्रकाशेनैव नित्यमित्युपलम्भप्रसङ्ग : । द्वितीये तत् नित्यत्वं स्वप्रकाशैकवेद्यं वा ज्ञानान्तरवेद्यं वा । आद्ये स एव प्रसङ्ग : । स्वरूपातिरिक्तस्य धर्मस्य स्वप्रकाशवेद्यत्वे तद्धर्मत्वमेव वक्तव्यम् । अतो नित्यमित्युपलम्भप्रसङ्ग : । द्वितीयेऽपि स धर्म: ज्ञानान्तरेण संविन्निष्ठतया गृह्यते वा, अन्यनिष्ठतया वा । आद्ये संविदोऽपि ज्ञानान्तरवेद्यत्वप्रसङ्ग: । तथा तस्य धर्मस्य संविन्निष्ठतया ग्राहकं ज्ञानान्तरं यदि अबाधितं तदा तस्य धर्मस्य सत्यतया तद्वत्तया संविद: सधर्मत्वप्रसङ्ग : । बाधितत्वेऽनित्यत्वप्रसङ्ग: । द्वितीये नित्यत्वरूपधर्मस्य संविदन्यनिष्ठतया ग्रहणे संविद: नित्यत्वं न सिध्येत् । न हि नित्यत्वं कस्यचित् धर्म इत्येतावता संविद: नित्यत्वं सिध्येत् । तथा सति अन्यनिष्ठतया गृहीतस्य धर्मस्यान्यनिष्ठत्वे सर्वेषामपि नित्यत्वं प्रसजेत् । नित्यत्वं यथा विकल्प्य दूषितं तथा आनन्दत्वादिकमपि विकल्प्य दूषणीयमिति घट्टार्थ : । **धर्मत्व** इति । स्वरूपातिरिक्तत्व इत्यर्थ: । **स एव प्रसङ्ग** इति । स्वरूपातिरिक्तस्य स्वप्रकाशवेद्यत्वे तद्धर्मत्वमेव वक्तव्यम् । अतो नित्यमित्युपलम्भप्रसङ्ग इत्यर्थ: । नित्यत्वग्राहिज्ञानस्य अबाधितत्वे नित्यत्वस्य सत्यत्वात् ब्रह्मण: सधर्मत्वं स्यात् इत्याह - **सधर्मत्वादीति** । बाधितत्वेऽनित्यत्व-प्रसङ्ग आदिशब्दार्थ : ।

कस्यचित्सिद्धमित्येतावता सविदो नित्यता सिध्येत् । तथासति अविशेषेण सर्वेषामपि नित्यत्वप्रसङ्गः । एवमानन्दत्वादिधर्मेष्वपि विकल्पदूषणानि निपुणैरनुसन्धेयानि ।

एवंच सति संविन्नित्या अनुत्पन्नत्वात्, यदनित्यं तदुत्पन्नं यथा घट इत्यनुमानमपि निरस्तम्; प्रागभावेनानैकान्त्यात् । भावत्वे सतीति विशेषणेऽपि भवदभिमताविद्यायामनैकान्त्यं दुर्वारम् । सा ह्यनादिरन्तवती च भवन्मते ।

किंच संविच्छब्देन किम् अहमिति प्रत्यक्त्वेन प्रतीयमानमात्मस्वरूपं पक्षीक्रियते, उत सकललोकप्रसिद्धा विषयग्राहिणी वित्तिः, उत सैव सकलविषयाश्रयविरक्ता भवद्भिः सह प्रव्रज्यां गतेति । न प्रथमः, सिद्धसाधनात् । न द्वितीयः, सकललोकविरोधात्; हेतोश्च स्वरूपासिद्धेः करणानां चेन्द्रियादीनाम्,

---

एवं चेति । संविदो ज्ञानान्तरावेद्यत्वात् नित्यत्वानिरूपणाच्चेत्यर्थः । दोषान्तरमाह **प्रागभावेनेति** । नित्यत्वरूपसाध्याभाववति प्रागभावेऽनुत्पन्नत्वरूपहेतुसत्त्वात् व्यभिचार इति भावः । ननु भावत्वे सतीति हेतौ विशेषणं दीयते । अतो न प्रागभावे व्यभिचारः, तस्य भावत्वाभावादित्याशङ्क्य तथाप्यविद्यायां व्यभिचारः । अनादिंत्वेन तस्या अनुत्पन्नत्वात् भावत्वाच्चेत्याह -**भावत्वे सतीति** । **सा ह्यनादिरिति** । यतः सा अनादिः अतः तस्याम् अनुत्पन्नत्वरूपहेतुरस्ति । यतश्चान्तवती ततः नित्यत्वरूपसाध्याभाववती, अतोऽनैकान्त्यं तस्यामिति भावः ।

किं चेत्यादि । किं च संविच्छब्देन अहमिति प्रत्यत्त्वेन प्रतीयमानमात्मस्वरूपं पक्षीक्रियते वा, उत सकललोकप्रसिद्धं विषयग्राहकं ज्ञानम्, उत सकलविषयाश्रयविरक्ता संवित् । न प्रथमः, सिद्धसाधनात् । न द्वितीयः, सकललोकविरोधात् । सर्वोऽपि लोकः विषयग्राहकं ज्ञानमनित्यमिति हि अनुभवति । तस्य नित्यत्वसाधने लोकानुभवविरोधः । किं च लोकप्रसिद्धे ज्ञाने अनुत्पन्नत्वरूपहेत्वभावात् स्वरूपासिद्धिः । लोकप्रसिद्धज्ञानस्य नित्यत्वे इन्द्रियलिङ्गशब्दादिरूपकरणानां प्रयोजनशून्यत्वप्रसङ्गः

एतस्य चानुमानप्रयोगप्रयासस्य निष्प्रयोजनत्वप्रसङ्गात् ॥ तदभिव्यक्तयर्थं तदपेक्षेति चेत्, नित्यमभिव्यक्तत्वाभ्युपगमे तदभिव्यक्तेस्तदनपेक्षणात्; अन्यथाऽस्मन्मतप्रसङ्गात् ॥ भवदभिमतनित्यस्वयंप्रकाशात्मस्वरूपस्यैव संविद्वैशद्यार्थं तदपेक्षेति चेन्न; वैशद्यासंभवात्; ( ) स्थलान्तरे तस्यानुसन्धेयत्वात् । न च तृतीयः, आश्रयासिद्ध्यादेः प्रागेवोक्तत्वात् ॥ अनेनैवानुमानेन तत्सिद्धिरिति चेन्न; अन्योन्याश्रयणात्– तादृशसंवित्सिद्धौ तत्पक्षीकारेणैतदनुमानप्रवृतिः, तत्प्रवृत्तौ च तादृशसंवित्सिद्धिरिति । अनेनैव न्यायेन, ‘अनुत्पन्नत्वात् निर्विकारा’ इत्यादिसाध्यप्रयोगो दूषणीयः ।

नित्यत्वानुमानप्रयोगप्रयासस्य च निष्फलत्वं स्यात्। इन्द्रियलिङ्गादिजन्यतयाभिमतस्य ज्ञानस्य नित्यसिद्धत्वात् इति भाव:।

ननु अभिव्यक्ता वित्ति : विषयग्राहिका। अभिव्यक्तिश्चावरणाभिभव:। स च वृत्त्या, तदर्थमिन्द्रियादिकरणापेक्षेति शङ्कते -**अभिव्यक्त्यर्थमिति**। आवरणस्य निरासात् अभिव्यक्ति: स्वरूपमेवेति वाच्यम्। तस्य च नित्यत्वान्न करणापेक्षेत्यर्थ :। **अन्यथेति**। अभिव्यक्तेरनित्यत्वे स्वरूपस्य तदभिव्यक्तित्वासंभवात् विषयग्रहणात्मकावस्थाविशेषस्यैव तदभिव्यक्तित्वं वाच्यम्। तथा चास्मन्मतप्रवेशप्रसङ्ग इति भाव:। ननु भवदभिमतनित्यस्वयं-प्रकाशात्मस्वरूपस्यैव संविद्वैशद्यार्थं करणापेक्षेति शङ्कते-**भवदभिमतेति**। परिहरति - **वैशद्यासंभवादिति**। अधिकाकारविशेषभानरूपं वैशद्यमस्मन्मते संभवति, न तु त्वन्मते इति भाव:।

संवित् नित्या इत्यनुमाने सकलविषयाश्रयविरक्ता संवित् पक्ष इति तृतीयकल्पं दूषयति **न च तृतीय इति**। तादृश्या: संविद: असिद्ध्या आश्रयासिद्ध्यादिदोषस्य प्रागेवोक्तत्वात्। न चानेनैवानुमानेन तत्सिद्धिरिति वाच्यम्। अन्योन्याश्रयणात्। तादृशसंवित्सिद्धौ तत्पक्षीकारेण एतदनुमानप्रवृत्ति:, एतदनुमानप्रवृत्तौ च तत्सिद्धिरिति। संवित् निर्विकारा अनुत्पन्नत्वात् इत्याद्यनुमानान्यपि प्रागभावाविद्याभ्यामनैकान्त्यमित्यादिन्यायेन दूषणीयानीति।

तदेवं ब्रह्मासाधारणनित्यत्वासिद्धेर्न नित्यानित्यवस्तुविवेकः । नित्यमुपादेयमिति सामान्यविवेकमात्रमपि निपुणनिरूपणेन निष्फलमापन्नमिति ॥

श्लो. आनन्त्यानन्दनित्यत्वप्रभृतीनां स्वरूपतः ।
विभागे सविशेषत्वमविभागे त्वसत्यता ॥
सौगतोक्तेऽपि विज्ञाने स्वरूपं विद्यते ततः ।
नित्यत्वादिविवेकस्ते नैरर्थक्येन जायते ॥

इति शतदूषण्यां निर्विशेषनित्यत्वभङ्गवादः अष्टपञ्चाशः ॥ ५८ ॥

उपसंहरति - **तदेवमिति**। **आनन्त्येत्यादि**।अनन्तत्वानन्दत्वनित्यत्वादीनां स्वरूपत: विभागे संविदपेक्षया भेदे सति संविद: सविशेषत्वप्रसङ्ग :। अविभागे अभेदे सति तु असत्यता स्यात्। कुत:, भवन्मते धर्माणां मिथ्यात्वात् तदभिन्नब्रह्मणोऽपि मिथ्यात्वं स्यादिति। किं च सौगतान् प्रति संविद: नित्यत्वसाधनं निरर्थकम्। नित्यत्वस्य स्वरूपाभेदे स्वरूपस्य सिद्धतया सिद्धसाधनात् इति भाव:।

इति श्रीशतदूषणीव्याख्यायां तात्पर्यप्रकाशिकायां
निर्विशेषनित्यत्वभङ्गवाद: अष्टपञ्चाश: ।

***

अथ परमते अद्वितीयश्रुतिविसंवादवादः एकोनषष्टितमः ।। ५९ ।।

स्वतस्सर्वजगत्सूतेः संवित्सिद्ध्यादिभिः स्फुटम् ।
अद्वितीयपदोक्त्यैव साधिता सविशेषता ।।

अत्र हि अनन्तपदवत् अद्वितीयपदेनापि सविशेषतैव । तथा हि–अद्वितीयपदे किं तत्पुरुषः, उत बहुव्रीहिः ? यदा तत्पुरुषः, तदाऽपि किं (१) द्वितीयादन्यत्वम्,

---

अथ अद्वितीयश्रुतिविसंवादो नाम एकोनषष्टितमो वाद: ।।

स्वत: सर्वजगत्सूते: संवित्सिद्ध्यादिभि : स्फुटम् ।
अद्वितीयपदोक्त्यैव साधिता सविशेषता ।।

स्वत: स्वेनैव कर्त्रन्तराधिष्ठानं विनैवेति यावत् । अनेन '' एकमेवाद्वितीयम्'' इत्यत्र एकपदेन अविभक्तनामरूपत्ववाचकेन उपादानत्वमुच्यते । अद्वितीयपदेन कर्त्रन्तरनिषेध इति सूच्यते । अनेन भगवत एव सृष्टिकर्तृत्वे तदुपयोगिज्ञानादिसिद्ध्या सविशेषत्वसिध्दिरिति भाव: । परमाचार्याणां यामुनाचार्यपादानां निर्वाहमभिप्रेत्याह - **संवित्सिद्ध्यादिभिरिति।** संवित्सिद्ध्यादिभि: ग्रन्थै: अद्वितीयपदोक्त्यैव सविशेषता स्फुटं जगत्स्रष्टु : साधितेत्यन्वय: ।

पूर्वस्मिन् वादेऽनन्तपदेन सविशेषता साधिता । अस्मिन् वादे अद्वितीयपदेनापि सविशेषता सिध्यतीति निरूप्यते । तदाह **अत्र हीति** ।**अनन्तपदवदिति** । अनन्तपदेनेवेत्यर्थ:। ''बृहद्गुणत्वाद्यमनन्तमाहु :'' इत्यादिप्रमाणानि विवक्षितानि ।

तथा हीत्यादि । अद्वितीयपदेन यथा सविशेषत्वं सिध्येत् तथा निरूप्यत इत्यर्थ:। अद्वितीयपदे किं न द्वितीयमद्वितीयमिति तत्पुरुष:, उत न द्वितीयं यस्य तदिति बहुव्रीहि: । तत्पुरुषपक्षेऽपि नञ: तदन्यतद्विरुद्धतदभाववाचकतया किं द्वितीयादन्यदित्यर्थ:,उत द्वितीयविरुध्दमित्यर्थ:, अथवा द्वितीयाभाव इत्यर्थ: इति विकल्प: । द्वितीयादन्यदित्यनेनापि किं द्वितीयभिन्नत्वमात्रं विवक्षितम्, किं वा द्वितीयभिन्नत्वे सति द्वितीयसदृशत्वम् इति

(२) तद्विरुद्धत्वम्, (३) तदभावमात्रं वा स्यात्। (१) पूर्वत्र द्वितीयादन्योन्याभावमात्रं वा विवक्षितम्, उत अब्राह्मणादिनयात् तत्सादृश्यपरत्वम्? द्विधाऽपि न द्वितीयहानिः; नतरां ब्रह्मणो निर्विशेषत्वम्। द्वितीयत्वाभावे प्रथमत्वादिमात्रं स्यात्; विशेषनिषेधे शेषाभ्यनुज्ञानसिद्धेः। अन्यथा प्रथमत्वादेरपि सामान्यतो विशेषतो वा निषेधे निर्विशेषत्वस्य निषेध्यत्वात्। तथा च न किञ्चिदित्युक्तं स्यात्। (२) अनन्तरेऽपि विरोधः किं भावाभावात्मकतया, सहानवस्थित्या, वध्यघातुकभावेन वा? न प्रथमः, द्वितीयस्य ब्रह्माभावरूपत्वे तत्प्रतियोगितया ब्रह्मण एव

विकल्पः। **अन्योन्याभावमात्रमिति**। मात्रपदेन सादृश्यव्यवच्छेदः। **अब्राह्मणादिनयादिति**। अब्राह्मणमानयेत्यादौ नञःब्रह्मणभिन्नब्राह्मणसदृशमनुष्यपरत्ववदित्यर्थः। **द्विधापीति**। द्वितीयभिन्नं द्वितीयसदृशमित्यर्थद्वयेऽपि भेदप्रतियोगितया सादृश्यप्रतियोगितया च द्वितीयसत्त्वं वाच्यमिति द्वितीयाभावो न सिध्यतीति भावः। न तरामित्येतदुपपादयति-**द्वितीयत्वाभावे** इति। द्वितीयभिन्नत्व इत्यर्थः। ब्रह्म द्वितीयभिन्नमित्युक्ते प्रथमं तृतीयादीति वा स्यात्, न निर्विशेषत्वं स्यात् इत्यर्थः। **विशेषनिषेध** इति।अशिशिरः पावक इत्युक्ते यथा शैत्यातिरिक्तस्पर्शः सामान्यतः स्पर्शत्वेन विशेषतश्च औष्ण्यादिरूपेण न निषिध्यते; तथा अद्वितीयमित्युक्तेऽपि प्रथमत्वतृतीयत्वादिकोट्यन्तरं सामान्यरूपेण विशेषरूपेण च न निषिध्यत इत्यर्थः। **अन्यथेति**। यद्येकविशेषनिषेधे शेषाभ्यनुज्ञानं न स्यात् तर्हि निर्विशेषत्वमपि निषेध्यं स्यादित्यर्थः। "अन्यथा प्रथमत्वादेरपि सामान्यतो वा विशेषतो वा निषेध्यत्वात्" इति पाठः सुगम इति व्याख्याने। इष्टापत्तिमाशङ्क्याह-**तथा चेति**। **अनन्तरेऽपीति**। अद्वितीयपदस्य द्वितीयविरुध्दमित्यर्थेऽपि विरोधः किं ब्रह्मणः द्वितीयस्य च भावाभावरूपतया, उत द्वयोः सहानवस्थानात्, उत वध्यघातुकभावात्। आद्येऽपि किं द्वितीयं ब्रह्माभावरूपम्, उत ब्रह्म द्वितीयाभावरूपं इति विकल्प्य तत्र आद्यं दूषयति-**न प्रथम इति**।यदि द्वितीयं भावरूपब्रह्माभावरूपं तद्विरुध्दत्वं भावात्मकस्य ब्रह्मणः अभावप्रतियोगित्वरूपम्। तथा च ब्रह्मणः अभावप्रतियोगित्वात् तुच्छत्वं प्रसजतीति भावः।

तुच्छत्वापातात्। अभावप्रतियोगित्वमेव हि सर्वत्र तुच्छत्वम्॥ देशकालादिभेदात् सदपि स्यादिति चेन्न; अदेशकालव्यवच्छेदनीयत्वोपगमात् । प्राक्प्रध्वंसादिविकल्पेनापि ब्रह्मणः कार्यत्वानित्यत्वतुच्छत्वप्रपञ्चान्तरसद्भावादिदोषो द्रष्टव्यः । अयमेव ब्रह्मण एव द्वितीयाभावरूपत्वेऽपि । किंच स्वाभावे ब्रह्मणि

ननु सर्वदेशसर्वकालवृत्त्यभावप्रतियोगित्वं हि तुच्छत्वम्। अत:अभावप्रतियोगित्वमात्रान्न ब्रह्मण: तुच्छत्वप्रसङ्ग:, देशकालान्तरे असत्त्वेऽपि देशकालान्तरे सत्त्वस्यापि संभवात् इत्याशङ्कते **देशकालादिति** ।परिहरति--**अदेशकालेति**। ब्रह्म देशेन कालेन वा न व्यवच्छिद्यते, किंचिद्देशे किंचित्काले वा नास्तीति न, किं तु सर्वस्मिन् देशे सर्वस्मिन् काले चास्तीति भवद्भिरङ्गीकारात् देशकालान्तरे ऽसत्त्वेऽपि देशकालान्तरे सत्त्वस्यापि सम्भवादिति भवद्भिर्वक्तुं न शक्यत इति भाव:। किं च द्वितीयपदस्य ब्रह्माभावपरत्वे अभाव:किं प्रागभाव: उत प्रध्वंस: उतात्यन्ताभाव: उतान्योन्याभाव: । आद्ये ब्रह्मण:प्रागभावप्रतियोगित्वेन कार्यत्वप्रसङ्ग: । द्वितीये ध्वंसप्रतियोगित्वेन अनित्यत्वप्रसङ्ग:। तृतीये अत्यन्ताभावप्रतियोगित्वेन तुच्छत्वप्रसङ्ग:। चतुर्थे ब्रह्मान्यप्रपञ्चसद्भावप्रसङ्ग: इति दोषान्तरमाह-**प्रागिति**। प्राक्शब्द: प्राक्कालीनपर: । अभावविकल्पगतप्रध्वंससमभिव्याहारात् प्रागभावलाभ: । **तुच्छत्वेति** । यद्यपि प्रागपीदं दूषणमुक्तं तथाप्यभावत्वेन सामान्यरूपेणोपस्थितस्यात्यन्ताभावस्य पूर्वं दूषणमुक्तम्, इह त्वत्यन्ताभावत्वेन विशिष्योपस्थितस्य तस्य दूषणमुच्यत इति भेद: । एतदपि, विकल्प्य दूषणे अत्यन्ताभावो न दूषित इति न्यूनत्वशङ्का कस्यचिन्मन्दधियो मा भूदिति ।अन्योन्याभावपक्षे दोष: **प्रपञ्चान्तरेति**। वियदादिप्रपञ्चान्तरसद्भाव: । अत: प्रपञ्चान्तरमेव ब्रह्मान्यद्वक्तव्यमित्यर्थ: । आदिशब्देन सत्यत्वाविरोधो विवक्षित: । विरोधो भावाभावरूपतयेत्यत्र द्वितीयं भावरूपं, ब्रह्म तदभावरूपमिति द्वितीयकल्पं दूषयति- **अयमेवेति**। अयमेव कार्यत्वादिदोषो द्रष्टव्य इत्यर्थ: । ब्रह्मण: कार्यत्वं विनाशित्वं तुच्छत्वं प्रपञ्चान्यब्रह्माश्रयसद्भावादिश्च दोष: स्यादित्यर्थ:।

ब्रह्म द्वितीयाभाव इति पक्षे एव दोषान्तरमाह -किं च **स्वभाव** इति। द्वितीयाभावरूपे

द्वितीयं कथमध्यस्येत ? तद्भानाभानयोस्तदयोगात् । अविशदभाने सविशेषत्वभानावश्यं (सविशेषत्वावश्यं ?) भावात् ॥ दोषवैचित्र्यात् सर्वमुपपन्नमिति चेन्न; विरुद्धाकाराग्रहणमन्तरेण क्वचिदप्यध्यासादृष्टेः । तद्ग्रहेऽप्यध्यासे नित्यमध्यासप्रसङ्गात् ॥ सहानवस्थानविरोधे सतः परिच्छिन्नत्वापत्तेः । शीतोष्णादिवत् भिन्नाश्रयत्वनियमविवक्षायां धर्मधर्मिणोरेकाश्रयत्वाभावात् ब्रह्मणः सधर्मकत्वाविरोधः; स्वनिष्ठताभङ्गश्च । एकाश्रयत्वाभावमात्रे वक्तव्ये सर्वस्य

ब्रह्मणि द्वितीयं कथमध्यस्येत । प्रपञ्चाभावभाने सति प्रपञ्चाध्यासासंभवात् । प्रपञ्चाभावस्य प्रपञ्चविरोधित्वात् । प्रपञ्चाभावाभानेऽपि तदध्यासो न संभवति । अध्यासं प्रति अधिष्ठानभानस्यापेक्षितत्वादित्यर्थः । ननु प्रपञ्चाभावस्याविशदतया भानात् तत्र प्रपञ्चाध्यासः संभवतीत्याशङ्क्याह - **अविशदभानेऽपि** इति । कतिपयाकारभानस्याविशदभानरूपत्वादिति भावः । शङ्कते -**दोषवैचित्र्यादिति । सर्वमिति** । विरुद्धाकारभानमध्यासश्चेत्यर्थः । अध्यासस्य विरुद्धाकाराग्रहणं हेतुरिति विरुद्धाकारग्रहणमध्यसश्चोभयं न संभवतीत्यर्थः । अपि च विरुद्धाकारग्रहेऽप्यध्यासे सर्वदा अध्यासप्रसङ्ग इत्याह - **तद्ग्रहेऽपीति**। विरुद्धाकारग्रहेऽपीत्यर्थः। ननु विरुद्धाकारग्रहेऽप्यौपाधिकाध्यासः संभवति । प्रपञ्चाध्यासश्चौपाधिक इति चेत् न । विरोधिब्रह्मस्वरूपे भासमाने उपाध्यध्यासस्यैवासंभवात् ।

ब्रह्मद्वितीययोः सहानवस्थानात् विरोध इति द्वितीयपक्षं दूषयति -**सहानवस्थानेति**। सहानवस्थानं नाम किं भिन्नाश्रयत्वनियमः, उत एकाश्रयकत्वाभावः । आद्ये आह - **सत इति**। सतो ब्रह्मणः द्वितीयवस्तुना सह शीतोष्णस्पर्शयोरिव भिन्नाश्रयकत्वनियमविवक्षायां परिच्छिन्नत्वापत्तेरित्यन्वयः । तत्रैव दूषणान्तरमाह - **धर्मधर्मिणोरिति** । **एकाश्रयत्वाभावादिति** भिन्नाश्रयत्वस्याप्युपलक्षणम् । भिन्नाश्रयकत्वे सत्यपि लोके घटघटत्वादौ धर्मधर्मिभावदर्शनात् ब्रह्मणः सधर्मकत्वं न विरुध्यते, ब्रह्म धर्मि, द्वितीयं धर्म इति स्वीकारात् इति भावः । दूषणान्तरमाह - **स्वनिष्ठताभङ्गश्चेति** ।ब्रह्मणः द्वितीयस्य च भिन्नाश्रयकत्व- रूपविरोधाङ्गीकारे ब्रह्मणो निराश्रयत्वतात्पर्यकस्वनिष्ठताश्रुतिः ''स्वे महिम्नि

ब्रह्माश्रयत्वं श्रुत्यन्तरसिद्धं सिध्यत्येव ।। न तृतीयः, द्वितीयस्य घातुकत्वे सदनित्यत्वादिप्रसङ्गात् । सतो घातुकत्वेऽपि न द्वितीयात्यन्ताभावः, हन्तव्यस्याऽऽदौ स्वरूपलाभावश्यम्भावात् ।। अध्यासनिवर्तकत्वमेव अस्मदिष्टं घातुकत्वमिति चेत्; अस्तु सत् अध्यासघाति । अनध्यस्तात्मना द्वितीयस्थितेर्न क्षतिः ।। तथा तस्य न प्राप्तिरिति चेन्न; सगुणादिश्रुत्यैव तत्प्राप्तेः ।। कल्पितविषया सेति चेन्न; अद्यापि

प्रतिष्ठितः" इत्यादिः विरुध्दश्चेतेत्यर्थः । उक्तस्य परिच्छिन्नत्वप्रसङ्गः स्वनिष्ठताभङ्गश्चेति दोषद्वयस्योद्धाराय एकाश्रयकत्वाभावः विरोध इति द्वितीयपक्षमुत्थाप्य निरस्यति- **एकाश्रयत्वेति** । एकाश्रयकत्वाभावमात्रे विवक्षिते सर्वस्य प्रपञ्चस्य ब्रह्माश्रयकत्वं सिध्यत्येवेतीष्टापत्तिरिति भावः । तच्च त्वदनिष्टमिति तात्पर्यम् । ब्रह्मणः द्वितीयस्य च वध्यघातुकभावो विरोध इति तृतीयपक्षं दूषयति- **न तृतीय इति** । किं ब्रह्म वध्यं द्वितीयं घातुकमिति विवक्षितम्, उत द्वितीयं वध्यं ब्रह्म घातुकमिति। आद्ये सतः ब्रह्मणः अनित्यत्वप्रसङ्गः । द्वितीये सतः ब्रह्मणः द्वितीयवस्तुघरातुकत्वेऽपि द्वितीयात्यन्ताभावो न संभवति। वध्यस्य हन्तव्यस्य आदौ स्वरूपलाभावश्यंभावादिति भावः। **सदनित्यत्वादीत्यत्र आदिपदेन** प्रपञ्चसत्यत्वाविरोध - मुमुक्ष्वनुपादेयत्वादि गृह्यते । शङ्कते - **अध्यासेति** । सत्यत्वप्रयुक्तस्वरूपलाभः प्रपञ्चस्य कुत इति शङ्कितुर्भावः। समाधत्ते - **अस्त्विति**। सतः ब्रह्मणः अध्यासनिवर्तक्त्वे प्रागिव तत एव स्वरूपसिद्ध्यभावेऽपि द्वितीयस्य न सत्यत्वक्षतिरिति भावः । ननु सत्यत्वेन प्राप्तं द्वितीयमध्यस्तमिति नोच्यते । अतः शुक्तिरजतादिष्विव अध्यासनिवृत्तौ विषयनिवृत्तेरपि सिद्धे : ज्ञाननिवर्त्यतया द्वितीयस्य मिथ्यात्वं स्यादिति शङ्कते - **तथेति । तथा=सत्यतया, तस्य** =प्रपञ्चस्य । समाधत्ते **सगुणेति** । सगुणत्वबोधकश्रुत्या द्वितीयस्य गुणादेः सत्यतया प्राप्तेः इत्यर्थः। सगुणश्रुतिः कल्पितगुणादिविषया, न सत्यगुणविषयेति शङ्कते - **कल्पितेति**। परिहरति-**अद्यापीति**। गुणस्य कल्पितत्त्वं बाधश्च अद्वितीयश्रुत्या वक्तव्यम् । अद्वितीयश्रुतेश्च द्वितीयबाधकत्वं नैतावत्पर्यन्तं सिद्धमिति भावः । किं च सतः अध्यासनिवर्तकत्वे तस्याध्यासेन

तद्बाधादृष्टेः । सतोऽध्यासविरोधित्वे च अविद्यासहस्रैरपि न स्यादध्यासः; सति आदित्ये सन्तमसवत् ॥ अध्यस्यति हन्ति चेति चेन्न; नैरपेक्ष्य(क्ष्ये ?) विरोधात् । अन्यथाऽन्यस्यैवान्ततो धातुकत्वात् ॥ साधारणहेतुत्वे सिद्धे विशेषोक्तिरियमिति चेन्न; तस्यैव त्वदभिमतस्येतः पूर्वमसिद्धेः । प्रथमतृतीयादिभावमात्रेण द्वितीयविरोधवाचोयुक्त्या सुस्थं द्वितीयम् ॥

सहानवस्थानलक्षणा विरोधिता वाच्या । व्यापारमन्तरेणापि स्वरूपत एव निवर्तकत्त्वात्, तमोनिवर्तकालोकवत् । ततश्चालोकविरहदशाया अपि सत्त्वात् तमःस्वरूपसंभवः । इह तु सतः नित्यसिध्दत्वात् तद्विरहदशाया अभावात् नाध्याससंभव इत्याह –**सतोऽध्यासविरोधित्वे चेति**। आदित्ये सति यथा तमः न भवति तद्वदित्यर्थः ।

नन्वालोकस्य संतमसं प्रति हेतुत्वाभावात् आलोकः सन्तमसं क्षणमपि न सहते । सद्रूपं ब्रह्म तु अध्यासं प्रति अधिष्ठानतया हेतुत्वात् प्रपञ्चमध्यस्य निवर्तयतीति शङ्कते – **अध्यस्यतीति**। सदिति कर्तृवाचकं पदमध्याहार्यम् । **हन्ति**=निवर्तयति । परिहरति- **नैरपेक्ष्यविरोधादिति** । सत् इतरनिरपेक्षमिति भवन्मतम् । सतः अधिष्ठानत्वे तु उत्पादकस्य तस्य इतरनिरपेक्षनिवर्तकत्वासंभवात् अन्यदेव निरपेक्षनिवर्तकं स्यादिति भावः । ननु सतः कार्यसामान्यं प्रति साधारणकारणत्वे सिध्दे कार्यविशेषरूपनिवृत्तिहेतुत्वमद्वितीयपदेनानूद्यते । अतः प्रवृत्तिनिवृत्ती उभे प्रति सतो हेतुत्त्वस्य प्रमाणसिध्दत्वात् उभयत्र तस्य हेतुत्वमेष्टव्यम् । प्रतियोगिनं प्रति हेतुत्वं चाध्यासाधिष्टानत्वमेवेति अध्यस्य निवर्तकत्वमुपपद्यत एवेति शङ्कते **साधारणेति** । **इयम्**=अद्वितीयश्रुतिः । **तस्यैवेति**। साधारण हेतुत्वस्यैवेत्यर्थः । अध्यस्य निवर्तकत्वे तु निवर्त्यातिरिक्तानपेक्षेण सता निवर्त्यस्य द्वितीयस्य क्षणिकत्वप्रसङ्ग इत्यपि दूषणं द्रष्टव्यम् । द्वितीयत्वविरोध्याकाराश्रयत्वं द्वितीयविरुध्दमिति शङ्कां निराकरोति-**प्रथमेति** । द्वितीयत्वविरोध्याकारो हि प्रथमत्वतृतीयत्वादिकम् । तदाश्रयत्वमात्रेण द्वितीयाभावो न सिध्यतीति द्वितीयं वस्तु सुस्थितमित्यर्थः । न द्वितीयमद्वितीयमिति तत्पुरुषपक्षे द्वितीयादन्यत्वं, द्वितीयविरुध्दत्वं द्वितीयाभाव इति कल्पत्रये एतावता कल्पद्वयं दूषितम् ।

(३) तदभावमात्रपरे तु समासे न सदादिशब्दैः सामानाधिकरण्यं स्यात्, नञर्थस्य स्वतन्त्रत्वात्। तस्य तदात्मकत्वविवक्षायोगस्योक्तत्वाच्च। न च संभवन्त्यां गतौ वाक्यभेदाध्याहारादिर्न्याय्यः।

नापि बहुव्रीहिः। तत्र द्वितीयं यस्य नास्तीति किं प्रथमादिविधिकटाक्षेण, सर्वनिषेधाभिप्रायेण वा ? न पूर्वः, सर्वनिषेधासिद्धेः। नोत्तरः, बहुव्रीहिविरोधात्। ''अनेकमन्यपदार्थे'' इति हि सः। किंच, द्वितीयनिषेधवत्त्वं च धर्मं

अथ द्वितीयाभाव इति तृतीयकल्पं दूषयति- **तदभावमात्रपरे** त्विति। अद्वितीयपदस्य यदि द्वितीयाभावोऽर्थः तदा सच्छब्देन सामानाधिकरण्यं न स्यात्। तयोः पदयोरेकार्थकत्वाभावात्। द्वितीयाभावस्य सच्छब्दार्थधर्मत्वादिति भावः। **स्वतन्त्रत्वात्**=सदर्थभिन्नत्वात्। धर्मधर्मिणोः भेदादिति भावः। ननु द्वितीयाभावः सदात्मक एवेत्यत्राह **तस्येति**। नञर्थस्याभावस्येत्यर्थः। **उक्तत्वादिति**। तद्भानाभानयोः अध्यासायोगस्योक्तत्वादित्यर्थः। ननु अद्वितीयमिति न सच्छब्दार्थ विशेषणम्। किं तु द्वितीयाभाव प्रदिपादकं वाक्यान्तरम्। यद्वा यत्र अद्वितीयं= द्वितीयाभावः तत् सदेवाग्र आसीदिति योजना। अतो न दोष इत्यत्राह - **न च संभवन्त्यामिति**। सदृशद्वितीयनिषेधाधिष्ठात्रन्तरशङ्का निवारणरूपगत्यन्तरसंभवे वाक्यभेदस्य ''यत्र तत्'' इति अध्याहारस्य चान्याय्यत्वादिति भावः। एतावता अद्वितीयपदे किं तत्पुरुस्ष : उत बहुव्रीहिः इति विकल्पे तत्पुरुषकल्पोऽवान्तरविकल्पपूर्वकं दूषितः। अथ बहुव्रीहिरिति द्वितीयपक्षं दूषयति - **नापि बहुव्रीहिरिति**। द्वितीयं यस्य नास्तीत्यनेन प्रथमतृतीयादिकमस्तीत्यर्थविवक्षायां ब्रह्मभिन्नसर्वनिषेधो न सिध्यति। तेषु किंचिदपेक्षया द्वितीयस्य निषेधेऽपि प्रथमतृतीयादेरनिषेधादित्यर्थः। **नोत्तर इति**।अद्वितीयपदेन बहुव्रीहिणा सर्वनिषेधनिवक्षायां बहुव्रीहिसमास एव न स्यात्। अन्यपदार्थस्याभावात्। ''अनेकमन्यपदार्थे'' इति सूत्रेणान्यपदार्थे विद्यमानानामनेकसुबन्तानां बहुव्रीहिविधानादिति भावः। तथा च बहुव्रीहिबलात् द्वितीयतदभावान्यपदार्थानां सिद्धिरिति सर्वनिषेधो न स्यादिति तात्पर्यम्। **किं चेत्यादि**।

ब्रह्मण उपस्थापयन्त्यां वृत्तौ कथं निर्विशेषत्वसिद्धिः ? अनुपस्थापयन्त्यां च कथंतरां नास्त्यर्थ(र्था ?) संबन्धे यस्येति विग्रहः ? न च स्वरूपमेवात्र नास्तिशब्दार्थः । अन्यपदार्थत्वायोगात्, स्वस्य स्वसंबन्धायोगाच्च ॥ भेदक्लृप्त्युपचार इति चेत् तथापि द्वितीयाभाव एव ब्रह्मेति निष्कर्षः स्यात् । तत्र चोक्तमध्यासानुपपत्त्यादि । अपि च अविद्यातद्विकाराणां ब्रह्मव्यतिरेके कथमद्वितीयत्वम् ? तन्मिथ्यात्वेऽपि तेषां द्वितीयत्वस्य दुस्त्यजत्वात् । सत्यमिथ्यार्थयोरव्यतिरेके विरोधात् । न च यूयं

बहुव्रीहिणा हि द्वितीयाभाववत्त्वं ब्रह्मणो बोध्यते । तथा च कथं निर्विशेषत्वं ब्रह्मणः सिध्येत् । द्वितीयाभाववत्त्वरूपविशेषबोधनात् इत्यर्थः । **वृत्तौ** - समासे। यदि द्वितीयनिषेधवत्त्वं न बोध्यते तदा द्वितीयं यस्य नास्तीति नास्त्यर्थसंबन्धबोधकं विग्रहवाक्यं कथं घटेत । ननु ज्ञानस्वरूपमिति बहुव्रीहौ यत्पदार्थस्य स्वरूपस्य च भेदकल्पनवत् प्रकृतेऽपि यत्पदार्थनिषेधयोः भेदकल्पनात् बहुव्रीहिः स्यादिति शङ्कते - **भेदक्लृप्तीति** । भेदक्लृप्त्या उपचार इत्यर्थः । तथापि द्वितीयाभाव एव ब्रह्मेति निष्कर्षः स्यात् । तत्र चाध्यासानुपपत्त्यादिकमुक्तमेवेत्यर्थः। **अपि चेति** । अपि च अविद्यायाः तद्विकाराणां च ब्रह्मव्यतिरिक्तत्वमस्ति वा न वा । आद्ये ब्रह्मणः अद्वितीयत्वं कथम् । अविद्यादिद्वितीयसत्त्वात् । न चाविद्यादीनां मिथ्यात्वमिति वाच्यम् । तथापि तेषां द्वितीयत्वानपायात् । द्वितीये सत्यस्य ब्रह्मणः मिथ्याभूताविद्यादेश्च अनतिरिक्तत्वं कथं स्यात् इति भावः । **तन्मिथ्यात्वेऽपीति** । न च मिथ्यात्वेन द्वितीयाभावस्यापि तत्र सत्त्वात् बहुव्रीहिः संभवतीति वाच्यम् । स्वनिरूपितद्वितीयस्वरूपे विद्यमाने तदभावमात्रेण तथा निर्देशानुपपत्तेः । न हि घटे सदृशद्वितीयासत्त्वेऽपि अद्वितीयः सवितेतिवत् अद्वितीयो घट इति प्रयोगोऽस्ति । न वा गवाभाववत्यपि गवये असदृशो गवय इति प्रयोगोऽस्ति । अविद्यादीनां ब्रह्मव्यतिरेकपक्षं दूषयति -**सत्येति** । अव्यतिरेके सत्यत्वमिथ्यात्वयोर्विरुद्धयोरेकत्र समावेशः स्यात्, ब्रह्मणि मिथ्यात्वस्य अविद्यादौ सत्यत्वस्य च प्रसङ्गात् इत्याशयः । **न च यूयमिति** । जैनमतनिष्ठाः परस्परविरुद्धधर्मानेकत्र स्वीकुर्वन्ति । तन्निष्ठाश्च तत्तामिव तद्भिन्नतामपि वस्तुनि स्वीकुर्वन्ति। भवन्तस्तु न जैनमतनिष्ठाः कथमेकत्र

जैननयनिष्ठाः । तन्निष्ठाश्च तत्तामिव द्वितीयतां वाञ्छन्ति । ब्रह्मणो निर्विशेषत्वविवक्षायां च न किञ्चिदपि लक्षणं तत्र स्यादिति तदुदाहरणविरोधः । व्यवच्छेद्यायोगाच्चेति ॥

अस्मत्पक्षे तु वृत्तिद्वयमपि सम्यक् द्वितीयव्यतिरेकोक्त्या सतः स्यादग्रगण्यता। द्वितीयशून्यतोक्त्या च तत्समाननिषेधनम् ॥

न ह्यपरं कुतश्चित् सर्वकारणं ब्रह्म, येन तस्य द्वितीयता स्यात् । न चास्य किञ्चिदैश्वर्येण समम्, येन द्वितीयगणनां सहेत । 'न तत्समश्चाभ्यधिकश्च दृश्यते' इत्यादिश्रवणात् । तेनात्र सदृशद्वितीयनिषेधपरं वचः । आहुश्च–'यथैक एव सविता

विरुद्धधर्मद्वयं स्वीकुर्युरिति भावः । **ब्रह्मण इति** । अद्वितीयपदेन ब्रह्मणः निर्विशेषत्वविवक्षायां जगत्कारणत्वसत्यत्वज्ञानत्वादिलक्षणमपि तत्र न स्यादिति लक्षणवाक्योदाहरणमपि भवतां न संगच्छते । अपि च लक्षणेन लक्ष्ये लक्ष्येतरव्यावृत्तिः क्रियते । लक्ष्यमत्र ब्रह्म । तदितरस्यैवाभावात् तद्व्यावृत्तिप्रयोजनकलक्षणवाक्यप्रदर्शनमपि भवतां विरुध्यत इत्याशयः ।

अस्मत्पक्षे त्विति । **वृत्तिद्वयमपीति** । तत्पुरुषबहुव्रीहिसमासा त्मकवृत्तिद्वयमपीत्यर्थः। सम्यत्त्वमेव कारिकयोपपादयति - **द्वितीयेति** । तत्पुरुषसमासे ब्रह्मणः द्वितीयभिन्नत्वोक्त्या सकलेतरविलक्षणतया अग्रगण्यता सिध्यति । बहुव्रीहौ द्वितीयशून्यतोक्त्या ब्रह्मसमानस्य निषेध : फलति । उभयमप्यस्स्मन्मते सम्यगिति भावः । उत्तरार्ध विवृणोति- **न ह्यपरमिति**। यदि एतद्ब्रह्मपेक्षया अन्यत् सर्वकारणं ब्रह्म स्यात् तदा अस्य ब्रह्मणः तेन सद्वितीयतया अद्वितीयत्वं न घटेनापि । अन्यत्तु सर्वकारणं ब्रह्म नास्तीत्यर्थः । तथा च सर्वकारणत्वेन समानं द्वितीयं नास्तीत्येकोऽर्थः । तथा ऐश्वर्येण समानमपि अन्यन्नास्तीति अद्वितीयत्वमित्यन्योऽर्थः । तदाह - **न चास्येति** । तथा च बहुव्रीहिपक्षे अद्वितीयपदस्य सदृशद्वितीयरहितमित्यर्थः इत्याह - **तेनात्रेति** । **यथैक एवेति** । यथा आकाशे एक एव सविता न द्वितीय इत्युक्ते अन्यः सूर्यो नास्तीत्येवार्थः, न तु सूर्यस्य

न द्वितीयो नभस्स्थले। इत्युक्त्या न हि सावित्रा निषिध्यन्तेऽत्र रश्मयः ॥ तथाच, 'यथा चोलनृपः सम्राडद्वितीयोऽत्र भूतले। इति त्रत्तुल्यनृपतिनिवारणपरं वचः। न तु तत्पुत्रतद्भृत्यकलत्रादिनिवारणम् ॥' इति। भाष्ये तु प्रकरणस्थमृत्पिण्डादिष्विव एकशब्देनाविभक्तनामरूपावस्थाविशेषविशिष्टबोधनादुपादानत्वसिद्धौ पिण्डादिष्विवाधिष्ठात्रन्तरशङ्कायां तन्निषेधपरोऽयमद्वितीयशब्द इति स्थापितम्। एतदेव 'बहु स्याम्' इति बहुभवनतत्सङ्कल्पयोराश्रयतया अनन्तरमेव स्थाप्यते। 'सोऽकामयत, बहु स्याम्' इति श्रुत्यन्तरैश्च। एतदर्थमेव प्रकृत्यधिकरणम्। अतोऽद्वितीयश्रुतिरेव विश्वातिशायित्ववाचिनी गुणविभूतिश्रुतिशतविदितबहुविधविशेषजातातिशयितविशेषान्तरतत्परा निर्विशेषवादिनां विसंवादिनीति नीतिविदः।

इति शतदूषण्यां परमते अद्वितीयश्रुतिविसंवादवादः एकोनषष्टितमः ॥ ५९ ॥

रश्मयोऽपि न सन्तीति। तद्वत् एकमेव ब्रह्म न द्वितीयमित्युक्ते अन्यत् ब्रह्म नास्तीत्येवार्थः न तु तस्य गुणा अपि न सन्तीति। अनेन स्वगतभेदराहित्यं नाद्वितीयपदलभ्यमित्युक्तं भवति। यथा चोलनृपः इति कारिकया सदृशवस्त्वन्तरराहित्यमेवाद्वितीयपदार्थः न तु द्वितीयसामान्यराहित्यमित्युपपादितं भवति।

ननु भाष्ये अद्वितीयपदस्य निमित्तकारणाभावपरतयाव्याख्यानात् तद्विरोध इत्यत्राह **भाष्ये तु इत्यादिना**। निर्विशेषपरम् अद्वितीयपदमिति शांकरानुयाय्यभिमतार्थखण्डनेन संवित्सिद्धौ समाभ्यधिकनिषेधपरत्वं स्थापितम्। शांकरभाष्येऽस्मद्भाष्ये च निमित्तान्तरनिषेधपरत्वमिष्टम्। शास्त्रैकगम्यस्य ब्रह्मणः द्वितीयानुक्त्यैवाद्वितीयत्वसिद्ध्या तदुक्तिः कुत इति शङ्कायां तदुक्तेः प्रसक्ताधिष्ठात्रन्तरनिवारण एव तात्पर्यं प्रकृतसंदर्भे युक्तमिति भाष्यद्वयाशय इति संवित्सिद्धावप्येतदर्थतात्पर्ये एतदानयनायैव तथोक्तिरिति भाव इति उत्तमूरुस्वामिनः।

इति शतदूषणीव्याख्यायां तात्पर्यप्रकाशिकायाम्
अद्वितीयश्रुतिविसंवादो नाम एकोनषष्टितमो वादः ॥

* * *

अथ सत्त्वासत्त्वविवेकवादः षष्टितमः ॥ ६० ॥

अस्ति नास्तीति बोधाभ्यामभिव्याप्तेषु वस्तुषु ।
सदेव सदसद्बुद्धिनिमित्तत्वेन साध्यते ॥

यदेव हि प्रामाणिकत्वेन सदिति प्रतीतिगोचरतां भजते, तदेव रूपान्तरेण नास्तीत्यपि प्रतिक्षेपं भजते । तत्र (१) असत्त्वमेव तत्त्वमिति सौगतोपदेशिनः, (२) सदा सत्त्वमिति सांख्याः, (३) सत्त्वासत्त्वसमुच्चय इति जैनाः, (४) अभयप्रहाणमित्यद्वैतिनः । (५) उपाधिभेदादुभयव्यवस्थेत्यपरे, (६) तत्रैव नास्तीति व्यपदेशोऽपि भावान्तरनिमित इति निष्कर्षकाः ।

अथ सत्त्वासत्त्वविवेकनादः षष्टितमः ॥

अस्ति नास्तीति बोधाभ्यामभिव्याप्तेषु वस्तुषु ।
सदेव सदसद्बुद्धिनिमित्तत्वेन साध्यते ॥

सर्वाण्यपि वस्तूनि अस्ति नास्ति इति बोधाभ्यां व्याप्तानि विषयीकृतानि । तथापि सदेन वस्तु सद्बुद्धेः असद्बुद्धेश्च विषयतया निमित्तमिति अत्र वादे साध्यते ।

पूर्वेषु वादेषु मिथ्यात्वसाधकतयाभिमतानामनेकासां आभासयुक्तीनां भङ्गः कृतः । अथ मिथ्यात्वा संभवविवक्षया सत्त्वादिकं विमृशत्यत्र वादे । यद्वा असत्त्व - सदासत्व - सत्त्वासत्त्वसमुच्चयरूपपक्षत्रयायोगो मिथ्यात्वसाधक इति मतस्य भङ्ग इह वादे । आदौ वस्तुस्थितिमाह- **यदेव हीति** । प्रामाणिकत्वेन हेतुना सदिति यत् वस्तु प्रतीयते, तदेवावस्थान्तरेण नास्तीत्यपि प्रतीयते । इयं वस्तुस्थिति : । प्रामाणिकत्वमेव सत्त्वम् । तत्र बौद्धमतोपदेशिनः असत्त्वमेव तत्त्वमिति वदन्ति । सांख्याः सदा सत्त्वमेव तत्त्वमित्याचक्षते। सर्वेष्वपि वस्तुषु सत्त्वासत्त्वसमुच्चय इति जैनाः । सत्त्वासत्त्वोभयाभाव इत्यद्वैतिनः । उपाधिभेदेन सत्त्वासत्त्वोभयव्यवस्थेत्यपरे नैयायिकादयः । अत्र उपाधिभेदो नाम देशकालभेदः । एकस्यैव वस्तुनः अस्मिन् देशे काले च सत्त्वम्, अन्यस्मिन् देशे काले चासत्त्वमिति व्यवस्थेति यावत् । तत्रैव=उपाधिभेदात् इति पक्षे एव भावान्तरनिमित्त : नास्तीति व्यपदेश इति निष्कर्षकाः।

(१) नन्वसत्त्वमेव सर्वत्र युक्तम्, असतोऽपि शुक्तिरजत-खरविषाणादेः भ्रान्तिहेतुवैचित्र्यात् अस्तीति धीविषयत्वदृष्टेरिति चेन्न; बाधाभावात् ॥ नास्तिधीरेव बाध इति चेन्न; उपाधिभेदेन विरोधाभावात् ॥ मध्येऽप्यसत् कार्यम् आद्यन्तयोरसत्त्वात्, खपुष्पवदिति चेन्न; धर्मिहेतुग्राहकाभ्यां विरोधात्; स्ववाग्व्याघाताच्च ॥

तत्र असत्त्वमेव तत्त्वमिति बौद्धमतमाशङ्क्य निराकरोति- **नन्वसत्त्वमेवेत्यादिना।** सर्वेषु वस्तुषु असत्त्वमेव युक्तम्। असतोऽपि शुक्तिरजतगर्दभविषाणादेः भ्रान्तिहेतुवैचित्र्यात् अस्तीति धीविषयत्वदर्शनात् इति शङ्का। समाधानं तु शुक्तिरजतादेः प्रतीत्यनन्तरं नेदं रजतमिति बाधदर्शनात् असत्त्वम्। प्रतीयमानस्य घटपटादिप्रपञ्चस्य तु बाधाभावात् नासत्त्वमिति। ननु नास्तीति धीरेव बाधः। घटादेरपि नास्तीति धीविषयत्वरूपबाधोऽस्त्येवेति कुतो नासत्त्वमिति शङ्कते - **नास्तिधीरेवेति।** यस्मिन् देशे यस्मिन् काले यत् प्रतीयते तस्मिन्नेव देशे काले च तस्य नास्तीति धीरेव बाधः। शुक्तिरजतादेस्तु तादृशधीरस्ति घटादेस्तु नास्ति। न हि घटादिः यत्र काले देशे चास्तीति प्रतीयते तत्रैन नास्तीति धीरस्ति अतो न बाध्यत्वम्, अत एव नासत्त्वमिति समाधत्ते- **उपाधिभेदेनेति**। देशकालभेदेन अस्तिनास्तिधियोर्विरोधाभावादित्यर्थः। ननु घटादिकं पूर्वोत्तरमध्यकालेऽप्यसत् पूर्वोत्तरकालयोरसत्त्वात् आकाशपुष्पवत् इत्यनुमानेन घटादेरसत्त्वं सिध्यतीति शङ्कते- **मध्येऽपीति**। हेतुघटकं पूर्वत्वमुत्तरत्वं च घटादिसत्तावच्छेदककालापेक्षयेति वक्तव्यम्। तथा च सत्तावच्छेदककालावधिकपूर्वत्वोत्तरत्वाश्रयकालवृत्तित्वं हेतुः। तादृशहेतुग्राहकप्रमाणेन मध्यकालिकसत्तायाः गृहीतत्वात् तादृशसत्ताभावसाधने बाधः। एवं घटरूपधर्मिग्राहकं प्रमाणं सत्त्वेनैव घटादिकं गृह्णातीति तद्विरोधादपि असत्त्वं बाधितम् इति समाधत्ते- **धर्मिहेत्विति।** धर्मिग्राहकहेतुग्राहकप्रमाणाभ्यां विरोधात् प्रकृतसाध्यस्य बाधादित्यर्थः। **स्ववागिति**। सत्तावच्छेदककालापेक्षया पूर्वोत्तरकालयोरसत्त्वादिति हेतूक्ति- मध्येऽपि असदिति-साध्योक्त्योर्व्याघातादित्यर्थः। सत्तावच्छेदककालो हि मध्यकालः। तेन मध्यकालसत्ता भवता उक्ता भवति, मध्येऽप्यसदिति तु असत्ता उक्ता भवतीति साध्यहेतुवाचकभवद्वचनयोरेव परस्परं व्याघात इति भावः।

अस्तिबुद्धेर्नास्तिबुद्धिरपच्छेदनयेन बलीयसी, प्रतिषेधस्य प्राप्तिसापेक्षतया परत्वात्, 'पूर्वाबाधेन नोत्पत्तिरुतरस्य हि सिध्यति' इति मीमांसकैरेवोच्यत इति चेन्न; दुष्टहेतुजन्यत्वाविशेषे बलाबलविभागायोगात्। हेतुवैचित्र्ये पौर्वापर्यानियमाच्च। परत्वमात्रेण निषेधे त्वन्मतं नास्तीत्युक्तिमात्रेण तद्विरुद्धानां सर्वेषां विजयप्रसङ्गात्। तदुपरि जल्पेऽप्यव्यवस्थितिप्रसङ्गात्॥

(२) नन्वस्तु तर्हि सर्वस्य सदा सत्त्वम्; असद्धियः सत्त्वप्राप्तिसापेक्षत्वात्, प्राप्तस्य च निर्बाधत्वादिति चेन्न–उपाध्यन्तरेण बाधाबाधविवेकस्य वक्तुं शक्यत्वात्।

ननु अनुमानमेव धर्मिग्राहकात् हेतुग्राहकाच्च वलीयः। तदुभयानन्तरभवत्वात्। अनुमानं हि नास्तीति बुद्धिः। सा च प्रतिषेधरूपत्वात् अस्तीति प्रतियोगिबुद्ध्यनन्तरकालिकी। पूर्वापेक्षया परस्य बलीयस्त्वं च अपच्छेदन्यायसिद्धम् इति शङ्कते- **अस्तिबुद्धेरिति। समाधत्ते दुष्टेति।** भवन्मते अस्तिबुद्धिनास्तिबुद्ध्योरुभयोरपि भेदवासनारूपदोषजन्यत्वाविशेषात् प्राबल्यदौर्बल्यविभागस्यैवाभावादित्यर्थ :।

हेतुवैचित्र्य इति। यदि दुष्टकारणरूपहेतुवैचित्र्यमङ्गीक्रियते, तदा पौर्वापर्यकृतं बाध्यत्वं बाध्यकत्वं चेति नियमो न स्यात्। अदुष्टकारणजन्यत्वेनैव हेतुना अन्यस्य बाधप्रसङ्गात्। ततश्चापच्छेदन्यायोपन्यासो व्यर्थ इति भावः। यदि च दुष्टकारणजन्यत्वेन पूर्वापरयोः अविशेषमुपगम्य अपच्छेदन्यायप्रवृत्तिरित्युच्यते तदा परत्वमात्रेण नास्तिवुद्ध्या प्रपञ्चनिषेध इति स्यात् तदा दोषमाह- **परत्वेति।** मात्रशब्देन दुष्टकारणजन्यत्वाभावो व्यवच्छिद्यते। त्वन्मतं नास्तीति वचनेन परेण त्वद्विरुद्धानां सर्वेषां विजयप्रसङ्गात् इति भावः। **तदुपरीति** त्वदुक्तनास्तीतित्येतन्नास्तीति उक्तवप्यनवस्था स्यादित्यर्थः। सांख्यसंमतं सर्वस्य सर्वदा सत्त्वमिति पक्षमनुवदति - **नन्वस्तु इत्यादिना।** कार्ये सत्त्वबुद्धिरस्ति वा न वा। न चेत् असत्त्वबुद्धेः सत्त्वप्राप्तिसापेक्षत्वात् उत्पत्तिर्न स्यात्। सत्त्वबुद्धिरस्ति चेत् तया प्रतिबन्धात् असत्त्वबुद्ध्युत्पत्तेरसंभवात् प्राप्तस्य सत्त्वस्य तया बाधो न संभवतीति भावः। तन्मतं निराकरोति- **उपाध्यन्तरेणेति।** देशकालादिभेदेन अस्तिनास्तिबुद्धिरूप-

अन्यथा घटादिषु असद्व्यवहारस्य निर्विषयत्वप्रसङ्गात् ॥ अनभिव्यक्त्या सविषयत्वमिति चेन्न; अभिव्यक्तेरपि सदा सत्त्वेन तत्रापि नञर्थासिद्धेः । तत्कार्यत्वे तद्वत् सर्वत्र सत्कार्यवादविलयात् । अभिव्यक्त्यन्तरस्वीकारेऽनवस्थादिदोषात् । उक्तं च ''अभिव्यक्तेरनादित्वे कारणानामनर्थता । तदागन्तुकतामिच्छन् किं नान्यत्रैव-

---

बाधाबाधव्यवस्थायाः वक्तुं शक्यत्वादिति भावः । **अन्यथेति** । देशकालादिभेदात् अस्तिनास्तिबुद्ध्योरविरोधानुपपादने असत्त्वधीर्निर्विषया स्यात् । सत्त्वाभावादतिरिक्तस्य विषयस्य वक्तुमशक्यत्वात् भवन्मते सत्त्वाभावस्याभावात् असत्त्वधीश्च अनुभवसिद्धेति भावः। नास्तीति बुद्धेः अनभिव्यक्तिः विषय इति शङ्कते - **अनभिव्यक्त्येति** । तृतीयार्थोऽभेदः अनभिव्यक्तिविषयकत्वमिति भावः । भवन्मतेऽभिव्यक्तेरपि सदा सत्त्वेन तदभावस्यासिध्द्देः तद्विषयकत्वं नास्तिबुध्देर्न संभवतीति समाधत्ते-**अभिव्यक्तेरपीति**। **तत्कार्यत्त्वे** इति। अभिव्यक्तेः कार्यत्वाङ्गीकारेण तदभावाङ्गीकारे घटादेरपि कार्यत्वाङ्गीकार उचित इति सत्कार्यवादविलयप्रसङ्ग इति भावः। अभिव्यक्तेः कार्यत्वमनङ्गीकृत्य अभिव्यक्त्यन्तराङ्गीकारे अनवस्थेत्याह-**अभिव्यक्त्यन्तरेति । अभिव्यक्तेरिति** । यद्यभिव्यक्तिः अनादिः तर्हि सा कारणानां प्रयोजनं न स्यात् ।तथा च कारणानां नैष्फल्यम् ।अभिव्यक्तेरागन्तुकत्वाङ्गीकारे च घटादीनामेवागन्तुकत्वमिष्यताम्। किमभिव्यक्तिं स्वीकृत्य तस्या आगन्तुकत्वाभ्युपगमेनेति कारिकार्थः। अत्र-अर्थः प्रयोजनं न भवतीत्यनर्थः तस्य भावः अनर्थता प्रयोजनभिन्नता - प्रयोजनत्वाभाव इति यावत् । कारणानां अभिव्यक्तिः प्रयोजनं न भवतीत्यर्थः। कारणानां प्रयोजनशून्यत्वं तु फलितोऽर्थः। न अर्थः येषां तानि अनर्थानि तेषां भावः अनर्थतेति बहुव्रीहिसमासोपरि तल्प्रत्यय इति न भ्रमितव्यम्। तथा सति ''उरः प्रभृतिभ्यः कप्''(पा.सू.५-४-१५१) इति सूत्रेण उरः प्रभृत्यन्तात् बहुव्रीहेः नित्यं कप्प्रत्ययविधानात् उरः प्रभृतिषु च ''अर्थान्नञः'' इति पाठात् अनर्थकता इत्येव स्यात् न तु अनर्थतेति । अतः अनर्थ इति नञ्तत्पुरुषात् भावे तल्प्रत्यये अनर्थतेति साधु। स्पष्टं चेदं चण्डमारुते।

मिच्छति ।।'' इति ।। पूर्वोत्तरकालाद्युपाधिद्वयसंबन्धेन सत्त्वासत्त्ववर्णने संबन्धिन उभयानुवृत्तेः सदातनत्वम्, असतः शशभृङ्गादेर्देशकालभेदेन सत्त्वाभावाच्चेति चेन्न; स्वस्य स्वप्रतियोगिनश्चाधारतया पूर्वोत्तरकालसंबन्धव्यपदेशात्, नित्यासद्वस्तुनः क्वचिदपि कथञ्चिदभावात् ।। 'आदावन्ते च यन्नास्ति नास्ति मध्येऽपि तत्तथा' इति चेन्न; शशभृङ्गादाविष्टत्वात्, घटादौ बाधात् तत्प्रसङ्गेऽपि तत्तत्कार्योपाधिंकाद्यन्तग्राहकैरेव व्याप्तिग्रहणनिरोधात् । तद्विपर्यये च हेत्वात्मनि बाधादेव ।। असतः कथं

बालत्वयुवत्वादिवत् एकस्यैव देशकालसंबन्धिभेदेन सत्त्वासत्त्वे उक्ते इत्यभिमानेन शङ्कते-**पूर्वोत्तरेति** । यदि एकस्यैव वस्तुनः पूर्वोत्तरदेश -पूर्वोत्तरकालरूपसंबन्धिभेदेन सत्त्वमसत्त्वं चोच्यते तदा पूर्वोत्तरदेशसंबन्धस्य पूर्वोत्तरकालसंबन्धस्य च संबन्धिनि सत्त्वात् सदातनत्वं स्यात् । तथा असतः शशशृङ्गादे : कदापि सत्त्वासंभवात् सतः असत्त्वं च न भवति इति शङ्कितु : भावः । समाधत्ते -**स्वस्येति** । **स्वस्य**=कार्यप्राग्भावस्य, **स्वप्रतियोगिनः**=कार्यप्राग्भावप्रतियोगिनः कार्यस्य च पूर्वकालसंबन्धः उत्तरकालसंबन्धश्च उच्यते । तावता कार्यस्य सदातनत्वप्रसङ्गो वा असतः सत्त्वं वा न प्रसजतीति भावः । शङ्कते **आदाविति** । किं मध्येऽप्यसत्त्वं साध्यते, किं वा पूर्वोत्तरकालयोरपि सत्त्वपर्यवसानाय मध्येऽप्यसत्त्वमापाद्यते । यदि पूर्वोत्तरकालयोरसत् तर्हि मध्येऽप्यसत् स्यात् । यतो मध्ये सत् ततः पूर्वोत्तरकालयोरपि सदिति पर्यवसानप्रकारः । तत्र नाद्यः, शशशृङ्गादौ पूर्वोत्तरकालयोरसति मध्येऽप्यसत्त्वस्येष्टत्वात् । घटादौ तु पूर्वोत्तरकालयोरसति मध्येऽसत्त्वसाधने बाधः । न द्वितीयः इत्याह - **तत्प्रसङ्ग इति** । यत्किंचिद्वस्त्वधिकरणकालापेक्षया पूर्वोत्तरत्वं कालस्य गृहीत्वा गृहीतस्य खपुष्पादौ पूर्वोत्तरकालयोरसत्त्वस्य मध्येऽप्यसत्त्वव्याप्तिर्ग्राह्या। तत्र तद्वस्तुन : तत्काले सत्त्वग्रहात् तत्रैव व्यभिचारात् व्याप्तिग्रहो नोपपद्यत इति प्रसङ्गे मूलशैथिल्यमिति भावः । **तद्विपर्यये चेति** । तस्य=प्रसञ्जनीयस्य मध्येऽप्यसत्त्वस्य विपर्ययो मध्ये सत्त्वम्, प्रसञ्जकस्य पूर्वोत्तरकालयोरसत्त्वस्य विपर्यये साध्ये उक्तप्रसङ्गानुग्राह्यो हेतुर्वाच्य :। स च पूर्वोत्तरकालयोरसत्त्वस्य कार्ये प्रत्यक्षादिना निश्चयात् बाधित इति भावः ।

शङ्कते - **असतः इति**। असतः कथं जन्मेति शङ्का। परिहरति- **सतो वेति**। सत्वेन

जन्म ।। सतो वा कथम् ।। अभिमानमात्रमिति चेत्; दूषणमप्युक्तमेव । प्रागसत्त्वं च जन्मोपकारीति न तत्र विरोधचोद्यावकाशः ।। प्रागसतः स्वपुष्पस्य कथमनुत्पत्तिः? प्राक् सतो वा प्रत्यगात्मनः कथम् । नित्यव्यक्ति(क्ते ?)रिति चेत्-खपुष्पे नित्यासत्त्वादेवेति निपुणं पश्य । नित्यविशेषणं प्रयुञ्जनेन च स्वीकृतमनित्यमिति स्ववाग्विरोधः । ननु प्रागसतः उत्पत्तिकालेऽपि कारणादुत्पत्तिर्न घटत इत्युक्तम्, 'असत्त्वान्नास्ति सम्बन्धः कारकैः सत्त्वसङ्गिभिः । असम्बद्धस्य चोत्पत्तिमिच्छतो

सिद्धस्य उत्पत्त्यसंभवात् सत उत्पत्तिरेव न स्यादित्यर्थः। इष्टापत्त्या परिहारं शङ्कते **अभिमानमात्रमिति** अभिव्यक्तिमात्रमित्यर्थः। **दूषणमप्युक्तमिति**। अभिव्यक्तेरनादित्वे इत्यादिना उक्तमित्यर्थः। असतः कथं जन्मेत्युक्तानुपपत्तिं परिहरति-**प्रागिति**। सर्वदा असत्त्वं हि जन्मविरुद्धम्। जन्मात्मकसत्त्वकाले तदसत्त्वविरोधात्। प्रागसत्त्वं तु तदवच्छिन्नोत्तरकालसत्त्वात्मक -जन्मन्युपकारकमेवेति भावः। ननु प्रागसतो जन्माङ्गीकारे खपुष्पस्यापि जन्म कुतो न स्यादिति शङ्कते – **प्रागसत** इति। प्राक्सतो वा जन्माङ्गीकारे नित्यस्यात्मनः जन्म घटादिवत् कुतो न स्यादिति प्रतिबन्ध्या परिहरति - **प्राक् सत** इति। कथम् अनुत्पत्तिरित्यनुषङ्गः। ननु मन्मते कादाचित्काभिव्यक्तिरुत्पत्तिः, स नित्याभिव्यक्तस्वभावे आत्मनि न संभवतीति शङ्कते - **नित्यव्यक्तिरिति**। नित्यासत्स्वभावत्वात् खपुष्पादावपि आगन्तुकसत्त्वात्मकजन्म विरुद्धमिति परिहरति - **खपुष्पेति**। **नित्यविशेषणमिति**। नित्यव्यक्तिरिति व्यक्तौ नित्येति विशेषणं प्रयुञ्जानेन अनित्यं किंचित् स्वीकृतमिति स्ववचनविरोधः। अनित्यव्यक्त्यभावे तद्व्यावर्तकनित्यत्वविशेषणायोगादिति भावः।

शङ्कते-**ननु प्रागसत** इति। प्राक् उत्पत्तेः यन्नास्ति,तस्य उत्पत्तिकालेऽप्युत्पत्तिर्न संभवति इत्युक्तम् -

"असत्त्वान्नस्ति संबन्धः कारकैः सत्त्वसङ्गिभिः।
असंबद्धस्य चोत्पत्तिमिच्छतो न व्यवस्थितिः॥"

इति सांख्यवृद्धकारिकायाम्। तस्या अयमर्थः-कार्यस्य पूर्वमसत्त्वात् सत्तावद्भिः कारणैः

न व्यवस्थितिः ॥ इतीति चेत्; अत्रोत्तरं दत्तमाक्ष(मक्ष ?) पादैः, 'घटादिनिष्पत्ति-

---

दण्डचक्रादिभि: संबन्धो नास्ति । तथा च कारणासंबद्धस्यैव कार्यस्योत्पत्तिर्वक्तव्या । तदा असंबद्धत्वाविशेषात् दण्डचक्रादिभि: घटवत् पटादिकमप्युत्पद्येत । ततश्च अमुककारणकलापात् अमुककार्यमेवोत्पद्यत इति व्यवस्था न स्यादिति । अस्या: शङ्काया: समाधानं न्यायदर्शने उक्तमित्याह-**अत्रोत्तरमिति** । न्यायदर्शने पञ्चमाध्याये प्रथमाह्निके जातिनिरूपणपरे सूत्रद्वयम्

''प्राप्य साध्यमप्राप्य वा हेतो: प्राप्त्या अविशिष्टत्वात् ।
अप्राप्त्या असाधकत्वाच्च प्राप्त्यप्राप्तिसमौ'' ॥ (न्या .सू.५-१-७)

''घटादिनिष्पत्तिदर्शनात् पीडने चाभिचारात् अप्रतिषेध:'' (न्या.सू.५-१-८)

इति ।तत्र प्रथमसूत्रभाष्यम्–

''हेतु: प्राप्य वा साध्यं साधयेत् अप्राप्य वा । न तावत् प्राप्य । प्राप्त्यामविशिष्टत्वात् असाधक: । द्वयोर्विद्यमानयो: प्राप्तौ सत्यां किं कस्य साध्यं साधकं वा । अप्राप्य साधकं न भवति । नाप्राप्त: प्रदीप: प्रकाशयतीति । प्राप्त्या प्रत्यवस्थानं प्राप्तिसम: । अप्राप्त्या प्रत्यवस्थानमप्राप्तिसम: । ''

इति । तत्र वृत्ति:–

''हेतोरिति । साधकत्वमिति शेष: । प्राप्तिपक्षे दोषमाह - प्राप्त्या अविशिष्टत्वादिति । द्वयोरपि प्राप्तत्वाविशेषात् किं कस्य साधकम् । अप्राप्तिपक्षे दोषमाह - **अप्राप्त्येति**। अप्राप्तस्य साधकत्वेऽतिप्रसङ्गात् साधकत्वं चात्र कारकज्ञापकसाधारणम् ।''

इति । द्वितीयसूत्रभाष्यम् –

''उभयथा खल्वयुक्त: प्रतिषेध: । कर्तृकरणाधिकरणानि प्राप्य मृदं घटादिकार्यं निष्पादयन्ति । अभिचाराच्च पीडने सति दृष्टम् ।

दर्शनात् पीडने चाभिचारादप्रतिषेधः’ (न्यायदर्शने-) इति। अस्यान्यत्र विस्तरो द्रष्टव्यः। अतोऽसतो नित्यसत्त्वमिति सांख्यवादः सुहृद्भिर्द्रव्यविषये योज्यः।

(३) यत् पुनः सत्त्वासत्त्वसमुच्चय इत्युच्यते, तत् देशकालादिभेदेन चेत्; वयमनुमन्यामहे। अन्यथा चेत्, अत्यन्तविरोधान्नाद्रियामहे। तथाच दूषण-भूषणादिव्यवस्थाविलयेन व्यवहार एव निष्फलः स्यात्। तेन परस्परविरुद्धोऽयं पक्षः।

अप्राप्य साधकत्वमिति’’ इति। तत्र वृत्तिः—

‘‘दण्डादितो घटादिनिष्पत्तेः दर्शनात् सर्वलोकप्रत्यक्षसिद्धत्वात् अभिचारात् श्येनयागादितः शत्रुपीडने च व्यभिचारात् न त्वदुक्तः प्रतिषेधः संभवति। न हि कारणं दण्डादि प्रागेव घटादिना संबद्धम्, अपि तु मृदादिना। श्येनादिरपि उद्देश्यतया पीडां जनयति। अन्यथा लोकवेदसिद्धकार्यकारणभावोच्छेदे त्वदुक्तो हेतुरप्यसाधकः स्यादिति’’ इति। सर्वमिदमभिप्रेत्याह - अस्यान्यत्र विस्तरो द्रष्टव्य इति। **द्रव्यविषय** इति। सिद्धान्ते द्रव्यस्य सत्त्वम्, अवस्थानामेव कदाचित् सत्त्वमसत्त्वं चेति स्वीकारात्, असतः शशविषाणादेः नित्यासत्त्वमिति स्वीकारात्।

अथ सत्त्वासत्त्वसमुच्चयस्तत्त्वमिति जैनपक्षं दूषयति-**यत्पुनरिति**। कस्मिंश्चिद्देशे काले च वस्तुनः सत्त्वं देशान्तरे कालान्तरे च तस्यासत्त्वमित्येवं सत्त्वासत्त्वसमुच्चय उच्यते चेत् अस्माकं तत् संमतमेव। अन्यथा चेत् एककाल एव एकत्र सत्त्वासत्त्वसमुच्चयश्चेत् विरोधात् तन्नाद्रियामहे इत्यर्थः। **दूषणेति**। अन्यथेत्येतदेवोपपाद्यते। दूषणस्य स्वपक्षेऽसत्त्वं परपक्षे सत्त्वं, भूषणस्य स्वपक्षे सत्त्वं परपक्षेऽसत्त्वं चेति व्यवस्था न स्यादिति भावः। **तेनेति**। उक्तव्यवहारोच्छेदप्रसङ्गेन सत्त्वासत्त्वविरोधस्यावश्यकत्वात् परस्परविरुद्धार्थकोऽयं सत्त्वासत्त्वसमुच्चयपक्षः स्वेनैव बाधित इति बाधितः।

(४) ये पुनरुभयप्रहाणवादिनः, तेषामेव पक्षं परिशोधयामः । परस्परविरुद्धोभयाङ्गीकारवत् तदुभयप्रहाणस्यापि विरोधकुक्षिनिक्षेपमेवोपलभामहे । न हि घटत्वाघटत्वसमुच्चयवत् घटाघटविलक्षणयोरपि समुच्चयः संभवति, विरोधस्याविशेषात् । उपलम्भ एव विरोधोपशमने प्रभवति । स तु घटत्वाघटत्वसमाहरवत् तदुभयवैलक्षण्येऽपि परिपन्थी । न हि घटाघटविलक्षणं किञ्चित् पश्यामः । घटविलक्षणस्याघटत्वात्, अघटविलक्षणस्य च घटत्वात् । उभयविलक्षणं पुनर्न किञ्चिदुपलभामहे ।

(५) उपाधिभेदादुभयव्यवस्थेति पक्षमदूरविप्रकर्षात् परिगृह्णीमहे । उपाधिभेदस्तु स्वात्मना सत्त्वमन्यात्मना पुनरसत्त्वम्, स्वकाले सत्त्वमन्यकाले पुनरसत्त्वम्,

---

अथ उभयप्रहाणमित्यद्वैतिमतं शोधयति - **ये पुनरिति** । **उभयप्रहाणम्**=सत्त्वासत्त्वयोः द्वयोः अभावः । सर्वस्यापि जगतः सत्त्वाभावासत्त्वाभावोभयं तत्त्वमिति मते यथा सत्त्वमसत्त्वं चोभयम् विरोधादेकत्र न संभवति, तथा सत्त्वाभावासत्त्वाभावयोरपि विरोधादेकत्रासंभवः । सत्त्वाभावेऽसत्त्वस्य, असत्त्वाभावे सत्त्वस्य च नियमात् इति भावः । एतदेव दृष्टान्तमुखेनोपपादयति- **न हीति** । यथा घटत्वघटभिन्नत्वयोरेकत्र समावेशो न संभवति, विरोधात् ; तथा घटभिन्नत्वाघटभिन्नत्वयोरपि समुच्चयो न संभवति । घटभिन्नत्वे अघटत्वस्य, अघटभिन्नत्वे घटत्वस्य च नियमात् इति भावः । ननु भावाभावयोर्विरुद्धत्वस्यौत्सर्गिकत्वेऽपि संयोगतदभावयोरविरोधवत् घटवैलक्षण्याघटवैलक्षण्ययोरपि क्वचिदविरोधोऽस्तु इत्याशङ्कायामाह - **उपलम्भेति** । **संयोग** तदभावयोः एकत्रोपलम्भादविरोधेऽपि घटाघटवैलक्षण्योः एकत्रानुपलम्भात् विरोध एवेत्यर्थः । **स तु**=उपलम्भस्तु । **उपाधिभेदादिति**। देशकालादिभेदादित्यर्थः । **अदूरविप्रकर्षादिति**। अभावस्य भावातिरिक्तत्वाङ्गीकारमात्रं विप्रकर्ष इति भावः । **उपाधिभेदस्तु इति** । उपाधिभेदाधीना व्यवस्था तु इत्यर्थः । घटस्य स्वात्मना घटात्मना सत्त्वम्, अन्यात्मना

तथा स्वदेशे सत्त्वमन्यदेशे पुनरसत्त्वमिति। इह तादात्म्यं संसर्गो वा सत्त्वमिति व्यपदिश्यते। तद्विरुद्धवेषेण वस्तुन्येवासद्व्यपदेशः।

(६) षष्ठे तु पक्षे विरुद्धधर्मयोग एव वस्तुन्यसद्व्यवहारहेतुतया व्यपदिश्यते, घटो हि घटात्मना सन् पटात्मना पुनरसन्निति निर्दिश्यते। सन्नेव स्वदेशकालयोः स्वविरोधिदेशकालयोरसन्निति। उपलम्भानुकूलत्वाल्लाघवाच्चेद(च्चेप्र ?) मेवाद्रियन्ते वृद्धाः इति॥

इति शतदूषण्यां सत्त्वासत्त्वविवेकवादः षष्टितमः ॥ ६० ॥

पटाद्यात्मना असत्त्वम् ।तथा स्वकाले सत्त्वम्, स्वाभावकालेऽसत्त्वम्, स्वदेशे सत्त्वम्, स्वानधिकरणदेशे असत्त्वम् इत्येवमुपाधिभेदाधीना सत्त्वासत्त्वव्यवस्था, तां स्वीकुर्म : अविरोधादिति भाव:।

ननु किं नाम सत्त्वमसत्त्वं चेत्यत्राह - **इहेति**। घटस्य सत्त्वं नाम तादात्म्यं देशकालसंबन्धो वा। असत्त्वं नाम तादात्म्यादिविरुद्धवेषेण स्वभिन्नत्वाभाव: स्वानधिकरणदेशकालसंबन्धाभावश्च असत्त्वमिति यावत्।

षष्ठे तु पक्षे इति। तत्रैव नास्तीति व्यपदेशोऽपि भावान्तरनिमित्त इति निष्कर्षका इति पक्षे इत्यर्थ:। घट: पटात्मना असन् इति व्यवहारस्य पटत्वविरोधि घटत्वं निमित्तम्। स्वदेशकालयो: सत: घटस्य स्वविरोधिदेशकालयो :असन्निति व्यवहारस्य स्वानधिकरणदेशकालावेव निमित्तम्। अत्र पक्षे अतिरिक्ताभावाकल्पनाल्लाघवम्। उपलम्भानुकूलत्वं च।

इति श्रीशतदूषणीव्याख्यायां तात्पर्यप्रकाशिकायां
सत्त्वासत्त्वविवेको नाम षष्टितमो वाद: ॥

* * *

अथ जीवैक्यभङ्गवादः एकषष्टितमः ॥ ६१ ॥

श्लो. पयोधितनयान्वितं परमधाम्नि यद् वर्तते
सदा यदवलोकनं विदधते फणीन्द्रादयः ।
अकृत्रिमसरस्वतीवदनसन्ततास्वादितै
र्गुणैरधिगुणं महः स्वयमनन्तमालक्ष्यते ॥

‘विगीतं मदविद्याकल्पितम्’, ‘विवादाध्यासितं चेतनजातमहम्’ इत्यादिषु किं सर्वत्राहमर्थैवयं सिषाधयिषितम्, उत तद्धर्मसंविदैक्यम्, यद्वा तदुपलक्षित-

---

अथ जीवैक्यभङ्गो नाम एकषष्टितमो वादः ॥

पयोधितनयान्वितं परमधाम्नि यद्वर्तते
सदा यदवलोकनं विदधते फणीन्द्रादयः ।
अकृत्रिमसरस्वतीवदनसंततास्वादितैः
गुणैरधिगुणं महः स्वयमनन्तमालक्ष्यते ॥

पयोधितनयया क्षीराब्धिसंभवया लक्ष्या सुघटितं यत् महः परमे व्योम्नि वर्तते, फणीन्द्रायः आदिशेषादयो नित्यसूरयः सदा यस्य महसः अवलोकनं कुर्वन्ति ‘‘सदा पश्यन्ति सूरयः’’ इति श्रुतेः अकृत्रिमसरस्वत्याः अपौरुषेयवाचः वेदस्य वदनं मुखं वेदान्तः तेन संततमास्वादितैः गुणैः अधिगुणं अनन्तं तत् महः आलक्ष्यते समन्तात् दृश्यते । यद्वा अकृत्रिमसरस्वती वदने येषां तैः वेदविद्भिः आस्वादितैः गुणैः अधिगुणं अतिशयितम् ।

अत्र मदविद्याकल्पितत्वानुमानेन मिथ्यात्वं प्रपञ्चस्य सिध्यतीति मतं निरस्यते । यद्यपि एतादृशानि अनुमानानि पूर्वं षट्त्रिंशे आत्माद्वैतभङ्गवादेऽनूद्य दूषितानि । तथापि तत्र आत्मा एक एवेति मतं खण्डितम् । अत्र जीव एक एवेति मतनिरासः ।

विगीतमित्यादि । विगीतं मदविद्याकल्पितम्, विवादाध्यासितं चेतनजातमहमेव इत्यादिभिरनुमानैः किं सर्वत्र अहमर्थः एक एवेति साधयितुमिष्टम्, उत अहमर्थधर्मस्य ज्ञानस्यैकत्वम् उत अहमर्थोपलक्षितसन्मात्रैक्यम् इति त्रेधा विकल्पः । तत्र प्रथमकल्पं

सन्मात्रैक्यम् ? न प्रथमः; अपसिद्धान्तप्रत्यक्षादिविरोधप्रसङ्गात् । न ह्यहमर्थं सत्यमात्मानमनुमन्यसे । न चाहङ्काराणां स्वरूपैक्यम् । न च परदुःखादेः स्वदुःखादित्वमभिमन्यसे । 'एको बहूनाम्' इत्यादि च न स्मरसि । अत एव न द्वितीयः; सर्वेषां सर्वदा सर्वज्ञत्वस्यासर्वज्ञत्वस्य वा प्रसङ्गाच्च । न तृतीयः; सर्वानुयायिसदैक्येऽप्यात्मैक्यासिद्धेः । न हि कस्यचित्सद्बुद्धिविषयमात्रे स्वात्माभिमांनः, आत्माभिमानमात्रं वा; तथा सति देहात्मभ्रमादेर्विशेषतः परिहारे निदानाभावात् ।। आत्मनः सत्त्वं त्वयापीष्यत इति चेत्–सत्यमेतत्; न तु सतः

दूषयति - **न प्रथम** इत्यादिना । भवन्मते अहमर्थस्यानात्मत्वात् अनेकत्वाच्च तस्यैकत्वात्मत्वसाधने स्वसिद्धान्तविरोधः, प्रत्यक्षादिविरोधश्च । तदाह - **न हीति** । किं चाहमर्थस्यात्मत्वे एकत्वे च परदुःखादिकमपि स्वदुःरवादित्वेन अनुभूयेत । न चैवमनुभूयते। किं च "एको बहूनां यो विदधाति कामान्" इति श्रुतिविरोधः । तया जीवात्मबहुत्वस्य तदतिरिक्तस्य ईश्वरस्य च प्रतिपादनात् । **अत एवेति** । प्रत्यक्षादिविरोधादेव अहमर्थधर्मभूतसंविदामैक्यं च न भवति । अहमर्थधर्मभूतसंविदामेकत्वे कस्यचित् अहमर्थस्य सर्वज्ञत्वे सर्वेषां सर्वज्ञत्वं, कस्यचिदसर्वज्ञत्वे सर्वेषामसर्वज्ञत्वं वा स्यादित्यर्थः । **न तृतीय इति** । सर्वेषु अहमर्थेषु अनुयायिनः सतः ऐक्येऽप्यात्मैक्यासिद्धेः । सच्छब्दार्थः आत्मैवेत्यत्र प्रमाणाभावात् । न हि कोऽपि, सदितिबुद्धिविषयः स्वात्मा, इत्यभिमन्यते आत्मा इति वा मन्यते । तथा सति देहात्मभ्रमादेर्निवर्तकाभावप्रसङ्गात् । आत्मनः देहातिरिक्तत्वज्ञाने सति हि देहात्मभ्रमो निवर्तेत। आत्मनः सद्रूपत्वे देहादिष्वपि सन्निति बुद्धेः सत्त्वेन सद्बुद्धेः देहातिरिक्तात्मविषयकत्वाभावात् सद्बुद्धेः देहात्मभ्रमनिवर्तकत्वं न संभवति इति भावः । शङ्कते- **आत्मनः सत्त्वमिति** । आत्मनः सद्रूपत्वं सिद्धान्तिना त्वयापीष्यते । अतः सद्बुद्धि : देहात्मभ्रमनिवर्तिकेति न शङ्कनीयम् । आत्मा सन् इति सत्यमेतत्, तथापि सतः सर्वस्य नात्मत्वम् । आत्मातिरिक्तस्य देहादेरपि सत्त्वात् तस्यात्मत्वाभावात् । तथा च सद्बुद्धिः नात्ममात्रविषयिणीति भावः । ननु आत्मातिरिक्तस्य सत्त्वं नास्तीति आशङ्क्य "सच्च

सर्वस्यात्मत्वम् ॥ आत्मव्यतिरिक्तस्य न सत्त्वमिति चेन्न; 'तदनुप्रविश्य, सच्च त्यच्चाभवत्', 'कथमसतः सज्जायेत' इत्यादिविरोधात् । किंच सतामैक्यं तु जात्यैक्य- मात्रं स्यात् । सत्तैव महानात्मेति चेन्न; तस्यान्यधर्मत्वायोगात् । सतां हि भावः सत्ता; न तु सा स्वतन्त्रा । उक्तं च संवित्सिद्धौ, 'स्वैःस्वैर्व्यवस्थितैः रूपैः पदार्थानां तु या स्थितिः । सा सत्ता न स्वतन्त्रा स्यात् तत्राद्वैतकथा कथम् ॥'' इति । पारतन्त्र्यभ्रमोऽयमिति चेत् – स किं सत्ताया, उत सतः ? आद्ये विरोधः, सतां हि भावः सत्ता । द्वितीयेऽपि विरोधः । न हि सतां स्वधर्मभूता धीरस्ति । न चैतावता तेषामैक्यसिद्धिः ।

अपि च जीवैक्यं सत्यम्, मिथ्या वा ? पूर्वत्रापसिद्धान्तः; अविद्यातत्संबन्धि-

---

त्यच्चाभवत्'' ''कथमसतः सज्जायेत'' इत्यादिश्रुतौ आत्मातिरिक्तस्यापि सच्छब्देन निर्देशात् आत्मातिरिक्तस्य सत्त्वं नेत्येतत् श्रुतिविरुद्धमिति परिहरति - **आत्मव्यतिरिक्तस्येति** ।**किंचेत्यादि** । सच्छब्द-वाच्यानामनेकत्वात् अहमर्थोपलक्षितसन्मात्रैक्यं न संभवति । यद्यपि सदर्थानुयायिनी सत्ता जातिरेका, तथापि नात्मैक्यं सिध्यति । आत्मनः सत्ताजातिरूपत्वाभावादिति भावः । ननु सर्वानुगता सत्तैव आत्मेति शङ्कते - **सत्तैवेति**। **समाधत्ते - तस्यान्येति** । आत्मनः स्वतन्त्रत्वेन अन्यधर्मत्वं नास्ति । सत्तायास्तु धर्मत्वमस्ति।अतः सत्ता नात्मा धर्मत्वात् घटत्वादिवत्। सतां भावो हि सत्ता, न स्वतन्त्रा धर्मत्वरहिता। **स्वैः स्वैरिति** । स्वैः स्वैः असाधारणैः धर्मैः पदार्थानां या स्थितिः सा सत्ता । न सा स्वतन्त्रा । सा कथं स्वतन्त्रात्मरूपा स्यादिति भावः । ननु वस्तुतः सत्ता स्वतन्त्रैव किं तु पारतन्त्र्यमिति भ्रम इति शङ्कते- **पारतन्त्र्येति** । स भ्रमः किं सत्तायाः उत सतः । नाद्यः, सत्तायाः सद्धर्मत्वेन तस्याः भ्रमाश्रयत्वासंभवात् । अत्र विरोधशब्देनासंभवो विवक्षितः । न द्वितीयः, विरोधादेव । न हि सतां सर्वेषां घटादीनां ज्ञानमस्तीति सुतरां भ्रमायोगात् । किं च पारतन्त्र्यभ्रममात्रेण तेषामैक्यं न सिध्यतीति भावः ।

अपि चेत्यादि । भवतां सिषाधयिषितं जीवानामैक्यं किं सत्यम् उत मिथ्या । पूर्वत्र

जीवभावतदेकत्वादीनां मिथ्यात्वाभ्युपगमात् । उत्तरत्र जीवबहुत्वमपि तथैवेति किमन्यतरपक्षपातेन तत्साधनेन वा ? प्रतीत्यनुसारेण जीवभेदपक्षे वा किं न पतसि ? न च जीवैक्यं प्रातिभासिकम्; सर्वधीव्यवहारविरोधात् । नापि यौक्तिकम्; (विरुद्ध ?) धर्मधीविरोधात् । प्रवृत्त्यादिभेदैर्हि परानुमानम् । न च स्वात्म (स्वाप्न?)

अपसिद्धान्तः । अविद्या - तदाश्रयजीव -तदैक्यादीनां भवद्भिः मिथ्यात्वाङ्गीकारेण सत्यत्वासंभवात्। उत्तरत्र जीवैक्यवत् जीवबहुत्वमपि मिथ्यैवेति अन्यतरस्मिन् जीवैक्ये पक्षपातो वा तत्साधनं वा कुतः ? जीवबहुत्वमेव कुतो न साध्यते । प्रत्युत लोकानुभवः जीवभेद एवास्तीति तदनुसारेण जीवभेदपक्ष एव कुतो नाश्रीयते । किं च लोके यथा जीवभेदः प्रतीयते न तथा जीवैक्यं प्रतीयते । सर्वलोकानुभवव्यवहारविरोधात् । नापि जीवैक्यं यौक्तिकम् । **धर्मधीविरोधादिति** । विरुद्धधर्मज्ञानविरोधादित्यर्थः । एकस्य जीवस्य सुखवत्त्वे अन्यस्य दुःखित्वम्, एकस्य जन्मनि अन्यस्य मरणमित्येवं सुखदुःख-जननमरणादिरूपविरुद्धधर्मानुभवविरोधात् जीवैक्यं न संभवति । जीवभेद एव तादृशानुभव उपपद्यत इति भावः । उक्तं हि -

''जननमरणकरणानां प्रतिनियमादयुगपत् प्रवृत्तेश्च ।
पुरुषबहुत्वं सिद्धं त्रैगुण्यविपर्ययाच्चैव ॥''

इति सांख्यकारिकायाम् । अत्र कणाददर्शनमपि प्रमाणयति -
प्रवृत्त्यादीति । ''प्रवृत्तिनिवृत्ती हि प्रत्यगात्मनि दृष्टे परत्र लिङ्गम्''

इति वैशेषिकसूत्रम् । तस्यायमर्थः - प्रत्यागात्मा स्वात्मा । प्रवृत्तिनिवृत्ती हि स्वात्मसाधकत्वेन स्वशरीरे दृष्टे, परशरीरे परात्मसद्भावविषये लिङ्गं भवतः । स्वकीयप्रवृत्तिनिवृत्तिसजातीयप्रवृत्तिनिवृत्तिभ्यां स्वात्मदृष्टान्तेन परात्मानुमानमिति । **न च स्वात्मपरात्मधीन्याय इति** । अत्र **स्वाप्नपरात्मधीन्याय** इति पाठः साधुः । यथा स्वप्ने दृश्यमानः परात्मा मिथ्या तथा जाग्रत्यपि अन्ये आत्मानः मिथ्येति न शङ्कनीयमित्यर्थः । अत्र अन्ये आत्मानः मिथ्या परात्मत्वात् स्वाप्नपरात्मवदित्यनुमानमभिप्रेतम् । कुतो न

परात्मधीन्यायः; ‘वैधर्म्याच्च न स्वप्नादिवत्’ इति सूत्रोक्तन्यायविरोधात्। स्वात्मनश्च ते तथैव प्रसङ्गात्। स्वात्मनश्च परं प्रति परात्मत्वात्। न हि दृश्यवत् द्रष्टाऽपि ते मिथ्याभूतः ॥ व्यावहारिकं सत्यत्वं तस्यास्तीति चेत्– स्वीकृतं तर्हि

शङ्कनीयमित्यत्राह - **वैधर्म्याच्चेति**। स्वप्नज्ञानवैधर्म्यात् जागरितज्ञानानामर्थशून्यत्वं न युज्यते वक्तुम्। स्वप्नज्ञानानि हि निद्रादिदोषदुष्टकरणजन्यानि, बाधितानि च। जागारितज्ञानानि तु तद्विपरीतानीति न तेषां तत्साम्यमिति भाष्यम् । अपि च स्वाप्नपरात्मदृष्टान्तेन जाग्रत्कालिकपरात्मनः मिथ्यात्वे स्वात्मनोऽपि तेनैव दृष्टान्तेन मिथ्यात्वं स्यात्। स्वात्मनोऽपि परं प्रति परात्मत्वात् । तथा च स्वात्मा मिथ्या परात्मत्वात् स्वाप्नपरात्मवदिति प्रयोगः स्यादिति भावः। स्वात्मनः परात्मत्वमुपपादयति - **स्वात्मनश्चेति**। ननु स्वात्मनः परात्मनश्च मिथ्यात्व-मिष्टमेवेत्याशङ्क्याह - **न हि दृश्यवदिति** । दृश्यस्य प्रपञ्चस्य मिथ्यात्ववत् द्रष्टुरात्मनः मिथ्यात्वं न त्वदभिमतमित्यर्थ :। ननु व्यवहारदशायां द्रष्टुरात्मनः सत्यत्वमिष्यत इत्याशङ्क्य तर्हि व्यावहारिकं जीवबहुत्वमपि सत्यं स्वीक्रियताम्, व्यावहारिकैक्यवत् इत्याह - **व्यावहारिकेति**। प्रतिबन्द्या दोषान्तरमाह - **यथेति**। महानसादौ दृष्टो वह्निर्येन तस्य पुरुषस्य धूमरूपलिङ्गात् पर्वतादौ पूर्वदृष्टवह्न्यतिरिक्तवह्न्यनुमिति : भवति, तथैव पूर्वोदाहृतकणादसूत्रानुसारेण प्रवृत्तिनिवृत्तिभ्यामवगतस्वात्मनः पुरुषस्य ताभ्यां लिङ्गाभ्यां परात्मानुमितिर्भवति । यदि तत्र आत्मैक्यं साध्यते तर्हि वह्न्यैक्यमपि कुतो न साध्यत इत्यर्थः। यदि वह्न्योः भिन्नसामग्रीजन्यत्वादिविरुद्धधर्मसमावेशात् वह्न्यैक्यं बाधितम् इत्युच्यते तर्हि स्वात्मपरात्मनोरपि सुखदुःखादिविरुद्धर्मसमावेशात् ऐक्यं बाधितमिति भावः। ननु सुखदुःखादीनामेकात्माश्रयकत्वात् विरोध एव नास्तीत्याशङ्क्य तथा सति परदुःखमपि स्वाश्रिततया प्रतिसन्धीयेतेति समाधत्ते - **न चैकाश्रयतयेति** ।

व्यावहारिकजीवबहुत्वं तदैक्यं चेति नैकत्र पक्षपातो युक्तः । यथा दृष्टवह्नेर्लिङ्गतो वह्न्यन्तरानुमितिः तथैव ह्यत्र आत्मान्तरानुमितिः । यदि अत्रैक्यं साध्यते, तर्हि वह्न्याद्यैक्यमपि किं न साध्यते ॥ विरुद्धधर्मविहतेरिति चेत्, तुल्यम् । न चैकाश्रयतया सर्वदुःखादीनां प्रतिसन्धानमस्ति ॥ अन्तःकरणाद्युपाधिभेदादप्रतिसन्धानमिति चेन्न; देहावयवबाह्येन्द्रियादिभेदेऽपि प्रसङ्गात् । स्वेच्छया विशेषवर्णनेऽ प्यतिप्रसंगात् । महाप्रलयान्तर(लयानन्तर ?) भाविनां महात्मनां केषाञ्चिदन्तःकरणभेदेऽपि

नन्वात्मैक्येऽपि अन्तःकरणरूपोपाधिभेदात् अन्तःकरणान्तरावच्छिन्नेन स्वेन अनुभूतम् अन्तःकरणान्तरावच्छिन्नेन स्वेन नानुसन्धीयते इत्याशङ्क्य तथा सति एकस्मिन्नेव शरीरेऽवयवान्तरावच्छेदेन वा इन्द्रियान्तरेण वा अनुभूतस्य अवयवान्तरावच्छेदेन वा इन्द्रियमन्तरेण वा प्रतिसंधानं न स्यात् । भवति च प्रतिसन्धानं पादे मे वेदना दृष्टमेव स्पृशामीति इति समाधत्ते-**अन्तः करणादीति** । **प्रसङ्गादिति** । अप्रतिसन्धानस्येति शेषः । नन्वेकशरीरस्थावयवेन्द्रियादिभेदः न अप्रतिसन्धानापादकः, भिन्नशरीरस्थान्तःकरणाद्युपाधिभेदः अप्रतिसंधानप्रयोजक इत्याशङ्क्याह- **स्वेच्छयेति** । **विशेषवर्णनि** उपाधौ विशेषकथने इत्यर्थः । एकशरीरावयवादिष्वपि अवान्तरभेदसंभवेन अप्रतिसन्धानापत्तेरिति भावः । अन्तःकरणभेदात् प्रतिसन्धानाभाव इत्यत्र दोषान्तरमाह- **महाप्रलयेति**। महाप्रलयान्तरभाविनामिति पाठोऽसाधुः । महाप्रलयानन्तरभाविनामिति पाठः साधुः । महाप्रलयानन्तरमुत्पन्नानां केषांचिन्महात्मनामन्तःकरणभेदेऽपि महाप्रलयात् पूर्वमन्तः करणान्तरावच्छिन्नस्वानुभूतसुखादिप्रतिसन्धानं भवतीति प्रमाणतोऽवगम्यते । यदि तूपाधिभेदोऽप्रतिसन्धानप्रयोजकः तर्हि तेषां महात्मनां तत्प्रतिसन्धानं न स्यादिति भावः । ननु भवतु महात्मनां केषांचित् अन्तःकरणरूपोपाधिभेदेऽपि प्रतिसन्धानम् । तथापि सर्वेषामनुसन्धानं नापादयितुं शक्यते । महात्मभिन्नानामद्यतनानां केषांचित् प्राग्जन्मानुभूताननुसन्धनमस्ति । तथा अत्रैव जन्मनि शरीरान्तरान्तरान्तः करणान्तराद्यवच्छिन्नेनाननुसन्धानं संभवतीत्यत्राह - वच्छिन्नानुभूतस्य अन्तः करणान्तराद्यवच्छिन्नेनाननुसन्धानं संभवतीत्यत्राह -

पूर्वकल्पानुभूतप्रतिसन्धानदर्शनाच्च ॥ अद्यतनानां प्राग्भवीयाननुसन्धानवत् स्यादिति चेन्न; प्रायेण(प्रायण ?) नरकक्लेश-प्रसूतिव्यसन-कालविप्रकर्षादिभिः संस्कारविलयात्। न चेह तथा; स्वस्याप्यस्मरणापातादिति ॥

इदि शतदूषण्यां जीवैक्यभङ्गवादः एकषष्टितमः ॥ ६१ ॥

अद्यतनानामिति। प्रायेण नरकेति। प्रायणनरकेति पाठः साधुः।

"प्रायणान्नरकक्लेशात् प्रसूतिव्यसनादपि।"

इति संवित्सिद्धिकारिका अत्रानुसंहिता। प्रायाणत् मरणात् नरकक्लेशात् प्रसववेदनया कालविप्रकर्षादिना च अनुभवजन्यस्य संस्कारस्य नाशात् अनुभूतस्यास्मरणं भवति। प्रकृते तु द्वयोः शरीरयोः संस्कारनाशकं तादृशं किमपि न दृश्यते। अतः अस्मरणं नोपपद्यते। अन्यथा स्वस्याप्यस्मरणप्रसङ्गादिति भावः।

इति श्रीशतदूषणीव्याख्यायां तात्पर्यप्रकाशिकायां
"जीवैक्यभङ्गवादः एकषष्टितमः" ॥

* * *

अथ परमते अपशूद्राधिकरणविरोधवादःद्विषष्टितमः ॥ ६२ ॥

स्वे स्वे कर्मणि युञ्जानो मुखबाहूरुपादजान् ।
स्वयं नस्संप्रकाशेत स्वान्ते स्वच्छन्दसारथिः ॥

यत्तु भगवता बादगयणेन सूत्रितं शूद्रस्य ब्रह्मविद्यायामनधिकारित्वम्, तत् भवन्तः कथं निर्वहन्ति ? किं शूद्रैर्निर्विशेषज्ञानस्य दुःसम्पादत्त्वात्, तत्सम्पत्तिसद्भावेऽपि वा ततः तेषामविद्यानिवृत्त्यसंभवादिति । न प्रथमः । स हि, (१) तथाविधस्य ज्ञानस्य वेदैकजन्यत्वाद्वा, (२) अवेदजन्यत्वेऽपि वेदसापेक्षत्वाद्वा, (३) वेदावेदयोः शूद्रादिषु ज्ञानजनकत्वाशक्तेर्वेति ?

अपशूद्राधिकरणविरोधवादः द्विषष्टितमः ॥

स्वे स्वे कर्मणि युञ्जानो मुखबाहूरुपादजान् ।
स्वयं न ः संप्रकाशेत स्वान्ते स्वच्छन्दसारथिः ॥

मुखबाहूरुपादजान् ब्राह्मणक्षत्रियवैश्यशूद्रान् स्वकीये स्वकीये कर्मणि प्रेरयन् स्वतन्त्रसारथिः भगवान् श्रीकृष्णः अस्माकं चेतसि स्वयमेव प्रकाशेतेत्यर्थ ः । प्रार्थनायां लिङ् । स्वे स्वे इत्यनेन ब्राह्मणाद्यधिकारिभेदेन कर्मणां व्यवस्था सूच्यते । अनेन परमते स्वे स्वे कर्मणि नियोजनं न संभवति, शूद्रस्याप्युपासनप्रसङ्गादिति सूच्यते । **सूत्रितमिति** । "शुगस्य तदनादरश्रवणात् तदाद्रवणात् सूच्यते हि" इत्यादिसूत्रैरित्यर्थः । सूत्रकारोक्तं ब्रह्मविद्यायां शूद्रस्यानधिकारं भवन्तः कथं निर्वहन्ति ? किं शूद्रेण निर्विशेषब्रह्मज्ञानस्य संपादयितुमशक्यत्वात्, निर्विशेषज्ञानसंपत्तावपि तादृशज्ञानात् अविद्यानिवृत्तेरसंभवात् इति विकल्पः । **न प्रथम** इत्यादि । निर्विशेषज्ञानस्य शूद्रेण संपादयितुमशक्यत्वं किं तादृशज्ञानस्य वेदैकसंपाद्यत्वेन शूद्रस्य वेदेऽनधिकारात्, वेदातिरिक्तजन्यत्वेऽपि वेदसापेक्षत्वाद्वा, वेदावेदयोः शूद्रादिषु ज्ञानजनकत्वशक्त्यभावाद्वा ।आद्यपक्षःअधिगतत्वत्सिद्धान्तेन त्वया नाङ्गीकर्तुं शक्यः । तर्कानुगृहीतानुमानादिनापि निर्विशेषत्वस्य प्रपञ्चमिथ्यात्वस्य च भवद्भिः संपादयितुं शक्यत्वेन तस्य साध्यमानत्वात् अनुमानादिनापि निर्विशेषज्ञानस्य संपादयितुं शक्यत्वेन तस्य साध्यमानत्वात्

आद्यस्तावत् अधिगतत्वत्सिद्धान्तेन त्वया नाङ्गीकर्तव्यः; आत्मघातुकतर्कानुगृहीतानुमानादिनाऽपि निर्विशेषत्वस्य प्रपञ्चमिथ्यात्वादेश्च भवद्भिः साध्यमानत्वात् । न च निर्विशेषे श्रुतिसमधिगम्यं विशेषान्तरं संभवति । श्रुतेरपि भवद्भिरध्यस्तातद्रूपनिवृत्तिमात्रपरत्ववर्णनात् । आनन्दत्वादेरपि स्वरूपानुप्रवेशनिर्णयात् । न चानुमानादिषु सर्वत्र शूद्रस्यानधिकारः शंक्यः; लोकसिद्धान्वयव्यतिरेकमूलेषु त्वदुक्तेष्वाचण्डालमधिकारात् । यत्र च तिरश्चामप्यधिकारः, तत्र द्विपदां कः परिपन्थी । अन्यथा तेषां

वेदैकजन्यत्वाभावादित्यर्थः। **अनुमानादिना** इति आदिशब्देन प्रत्यक्षं विवक्षितम्। तस्य तर्कसहकृतस्य सन्मात्रे प्रामाण्यस्य भवद्भिः अभिधानात्। ननु निर्विशेषज्ञानमात्रं सुसंपादं भवतु, तथापि निर्विशेषस्य आकारविशेषेण ज्ञानं मोक्षहेतुः। स चाकारः श्रुत्येकसमधिगम्य इत्यत्राह **न चेति**। विशेषसामान्यशून्ये ब्रह्मणि श्रुतिसमधिगम्यस्य अनुमानानधिगम्यस्य आकारस्याभावात् इति भावः। श्रुत्या विशेषप्रतिपत्तिश्च भवता नाङ्गीकृता। स्वरूपाभिन्ना या अनृतजडादिव्यावृत्तिः तत्परत्ववर्णनात् श्रुतेरित्याह– **श्रुतेरपीति**। अध्यस्तं यत् अतद्रूपं सत्यभिन्नमनृतं ज्ञानभिन्नं जडं च तद्व्यावृत्तिपरत्वप्रतिपादनादित्यर्थः। नन्वानन्दत्वादिरूपः विशेषः श्रुतिसमधिगम्य इत्याशङ्क्य सोऽपि भवन्मते निर्विशेषस्वरूपान्तर्गतो न धर्म इत्याह - **आनन्दत्वादेरपीति**। आदिना सत्यत्वज्ञानत्वादिपरिग्रहः। ननु मा भून्निर्विशेषज्ञानं वेदैकजन्यम्। तथापि शूद्रैः तज्ज्ञानं संपादयितुमशक्यम्। अनुमानेऽपि तेषामनधिकारादित्याशङ्क्याह-**न चानुमानादिष्विति**। लोकसिध्दान्वयव्यतिरेकव्याप्तिमूलकेषु अन्वयव्यतिरेकसहचारमूलकेषु वा अनुमानादिषु चण्डालपर्यन्तानां सर्वेषामधिकारात्। यत्र च अनुमानादिषु तिर्यग्जन्तूनामप्यधि-कारोऽस्ति, तत्र कुतो द्विपदां शूद्राणामधिकाराभावः। **अन्यथा**-अनुमाने तिर्यग्जन्तूनामनधिकारे। **तेषां**-तिरश्चाम्। सार्वलौकिकव्यवहारः=सर्वलोकप्रसिध्दः भीत्या अपसर्पणादिः, तस्य अभावप्रसङ्गादित्यर्थः।

सार्वलौकिकव्यवहारोच्छेदप्रसङ्गात् । निर्विशेषं तत्त्वमित्यादिलौकिकवाक्येन च तेषां तत्त्वज्ञानं सुलभमेव । न च ततस्तेषां निवर्तकं ज्ञानं नोपलभ्यत इति वाच्यम्; त्रैवर्णिकानां वैदिकवाक्येनापि तुल्यत्वात् । श्रवणमनननिदिध्यासनजनितविकल्पवैमुख्यानां दृश्यत इति चेत्–एवं लौकिकवाक्येऽपि तान्येव सहकारीकृत्य तत्सिद्धिं पश्य । न च सामग्र्यां सत्याम्, क्वचित् ज्ञानम् क्वचिन्नेति नियन्तुं शक्यम्; अनीश्वरेच्छया तन्नियमासिद्धेः । भवतु वा वेदैकमूलत्वम्; तथापि न शूद्रादेस्तत्रानधिकारः; व्युत्पन्नपदपदार्थानां तेषां ततोऽपि ज्ञानसंभवात् । उत्पन्नेऽपि

ननु शूद्रदीनां लोकतः सविशेषस्यैव ज्ञानात् निर्विशेषत्वव्याप्तिग्रहाभावात् सविशेषत्वभ्रमादेव व्यतिरेकिणोऽप्यनुदयात् नानुमानं संभवतीत्यत आह -**निर्विशेषमिति** । माभूत् अनुमानम्, अथापि निर्विशेषं तत्त्वमित्यादिलौकिकवाक्येन तेषां तत्त्वज्ञानं सुलभमेव । ननु अद्वैततत्त्वसाक्षत्कार एव भ्रमविरोधी । स च शूद्रादीनां तादृशवाक्यान्न जायते । वाक्यश्रवणेऽप्यविद्यानिवृत्त्यदर्शनादित्यत आह-**न च तत** इति । त्रैवर्णकानामपि वैदिकवाक्येनापि तत्त्वसाक्षात्कारानुत्पादस्य तुल्यत्वादित्यर्थः । ननु श्रवणमनननिदिध्यासनैर्निरस्तभेदवासनानां त्रैवर्णिकानां अद्वैततत्त्वसाक्षात्कारो दृश्यत इत्याशङ्क्य शूद्राणामपि श्रवणमनननिदिध्यासनसहकृतेन निर्विशेषं तत्त्वमिति लौकिकवाक्येन तत्त्वज्ञानं सेत्स्यतीत्याह -**श्रवणेत्यादिना** । किं सामग्रीसत्त्वे क्वचित् ज्ञानं क्वचिन्नेति नियमः अनीश्वरेच्छया कृतः, उत ईश्वरेच्छया । नाद्यः, अनीश्वरेण तथानियन्तुमशक्यत्वात् । ईश्वरस्य तु तादृशनियमेच्छा न संभवतीति भावः । ननु "श्रोतव्यः श्रुतिवाक्येभ्यः मन्तव्यश्चोपपत्तिभिः" इति श्रुतिवाक्यैरेव श्रवणमिति नियमात् सामग्र्यभावादेव शूद्रस्य तत्त्वज्ञानानुत्पाद इत्यत आह -**भवतु वेति** । **वेदैकमूलत्वं**, तत्त्वज्ञानस्येति शेषः । **तत्रानधिकार**:= वेदेऽनधिकार : । शूद्रादिनां वेदेऽनधिकारः किं तेषां ततो ज्ञानस्यैवानुत्पत्तेः, उत प्रत्यवाययोगाद्वा । नाद्य इत्याह - व्युत्पन्नेति । तेषां=शूद्रादीनाम्, ततोऽपि=वेदादपि । अतो न प्रत्यवायेन मोक्षप्रतिबन्ध इति भावः । न द्वितीय इत्याह-**उत्पन्ने** इति ।

तत्त्वज्ञाने वेदश्रवणतदर्थानुसन्धानादिमूलप्रत्यवायस्य भवन्मते प्रसङ्गाभावात् । यदा विश्वभ्रमोन्मूलनं ज्ञानमुदेष्यति, तदा तदन्तःपातिनः कस्यचित् प्रत्यवायभ्रमस्य का वार्ता ? न चानुपनीतस्यानधीतवेदस्याश्रुतवेदान्तवाक्यस्य, 'न शूद्राय मतिं दद्यात्' इति वचनबलान्निषिद्धाचार्यलाभस्य शूद्रादेः कथं ततो ज्ञानमिति वाच्यम्; दग्धाधिकारतया वेदशिरसि वर्तमानैर्भवद्भिर्वेदान्तानां तदर्थस्य च तेभ्योऽपि यथावदुपदेशसंभवात् । न हि वो विधिनिषेधकिङ्करता । यथा ब्रूथ-, 'दग्धाखिलाधिकारत्वात् ब्रह्मज्ञानाग्निना मुनिः । वर्तमानः श्रुतेर्मूर्ध्नि नैव स्यात् वेदकिङ्करः ॥' इति । यद्यपि, 'त्यज धर्ममधर्मं च' इत्यादिबलात् दुर्बल-बुद्धिभिर्युष्मत्सयूथ्यैर्निषिद्धवर्जनमनुज्ञायते, तथाऽप्यन्यैः कैश्चिदुन्मर्यादैरर्थादिलिप्सया

प्रत्यवायप्रसङ्गाभावमेवोपपादयति **यदेति** । मिथ्याभूतविश्वान्तर्गतस्य प्रत्यवायस्यापि तत्त्वज्ञानेनोन्मूलनं भविष्यतीत्यर्थः । विश्वस्य प्रत्यवायस्य च मिथ्यात्वसूचनाय उभयत्र भ्रमपदप्रयोगः ।

ननु वेदेऽनधिकृतानामपि शूद्रादीनां वेदात् जायमानं ज्ञानं स्वीकुर्मः । तथापि अनुपनीतस्य अत एव अनधीतवेदस्य अत एव चाश्रुतवेदान्तवाक्यस्य आचार्यो न लभ्येत यतः ''न शूद्राय मतिं दद्यात्'' इति निषेधोऽस्ति । तथा च कथं वेदात् ज्ञानलाभस्तेषामिति शङ्कते - **न चेति** । ये तत्त्वविद आचार्याः तेषां विधिनिषेधवश्यता नास्ति यतस्ते वेदशिरसि वर्तन्त इति भवद्भिरेव ग्रन्थेषूक्तत्वात् ते आचार्या निषिद्धमप्युपदेशं कर्तुं शक्नुवन्तीति ततः शूद्रादीनारमपि तत्त्वज्ञानं ततो मोक्षश्च सुलभमिति समाधत्ते - **दग्धाधिकारतयेति** । ब्रह्मज्ञानरूपेणाग्निना दग्धः विधिनिषेधाधिकारः यस्य तत्त्वात् श्रुतेर्मूर्ध्नि वर्तमानो मुनिः वेदस्य किंकरो वश्यो न भवेदिति कारिकार्थः । **यद्यपि इत्यादि** ।'' त्यज धर्ममधर्मं च'' इति वाक्यं धर्मं मा कुरु अधर्मं निषिद्धं च मा कुरु इति तत्त्वविदमाचार्यं प्रति निषिद्धवर्जनमुपदिशति । तथा च कथमाचार्यः शूद्राय निषिद्धमुपदेशं कुर्यात् इति यद्यपि शङ्का भवति, तथापि अर्थलाभेच्छया केचिदाचार्याः शास्त्रमर्यादामुल्लङ्घ्य उपदेशं कर्तुं शक्नुवन्तीति भावः । सिद्धान्ते

तेभ्यस्तदुपदेशः संभवत्येव। न चैवमस्मन्मते प्रसङ्गः; वक्तुरिव श्रोतुरपि प्रत्यवायेन तन्मूलोपासनादेः तेष्वसंभवात्। उपासनविधीनां च उपनयनाद्यङ्गकाध्ययनविधिसिद्धस्वाध्यायसंपन्न- ज्ञानत्रैवर्णिकाधिकारिलाभेन कर्मविधीनामिव तदितरेषु स्वसिद्ध्यर्थं ज्ञानान्तरकल्पनौदासीन्यात्। तत एवोपबृंहणभूतेतिहासपुराणजन्यज्ञानस्यापि विधिभिरनादृतत्वात्। तच्छ्रवणानुज्ञानस्य पापक्षयादिमात्रफलत्वात्। उपास्यस्य च ब्रह्मणोऽनन्तविशेषस्यानुमानाद्यगोचरत्वात्। उपासनस्यैव वाक्यार्थ-

---

एवं प्रसङ्गो नास्तीत्याह - **न चैवमिति**।

ननु निषेधोल्लङ्घनेन अर्थलोभादिना उपदेशसंभवात् श्रोतुश्च प्रायश्चित्तेन प्रत्यवायपरिहारसंभवात् त्वन्मतेऽपि शूद्रस्य तत्त्वज्ञानं मोक्षश्च स्यात्। अपि च लौकिकवाक्येनानुमानेन वा तत्त्वज्ञानं संभवतीत्याशङ्क्याह - **उपासनविधीनां चेति**। पूर्वकाण्डे हि अपशूद्राधिकरणे क्रतुविधयो हि अन्यथानुपपत्त्या विद्यार्जनमाक्षिपन्ति ॥ यदा तु स्वाध्यायविधिविहिताध्ययनोपात्तविद्यान् द्विजन्मनो लभन्ते तदा तैरेव लब्धात्मानः अनुपपत्तिक्षयात् न चतुर्थस्य विद्यामाक्षिपन्तीति शूद्रस्यानधिकारो निर्णीतः। तेनैव न्यायेन इहापि तादृशाधिकारलाभात् न शूद्रस्य स्वच्छन्दार्जितज्ञानस्याप्यधिकार इति न तत्कृतोपासनस्य मोक्षसाधनत्वमिति भावः। **तदितरेषु**=त्रैवर्णिकितरेषु। **स्वसिद्ध्यर्थं**=विधिस्वरूपलाभार्थम्। **ज्ञानान्तर-कल्पनम्**=लौकिकवाक्यादिजन्यज्ञानकल्पनम्। **तत एवेति**। स्वाध्यायाध्ययनविधिविहिताध्यनोपात्तविद्यानां द्विजन्मनां लाभादेवेत्यर्थः।

ननु यद्युपासनविधिभि: इतिहासपुराणादिजन्यज्ञानं नापेक्षितं तर्हि ''श्रावयेच्चतुरो वर्णान् कृत्वा ब्राह्मणमग्रतः'' इति शूद्रादीनामपीतिहासपुराणश्रवणानुज्ञानं किमर्थमिति शङ्कायामाह - **तच्छ्रवणेति**। पापक्षयार्थं श्रवणानुज्ञानं नोपासनार्थमित्यर्थः। अनुमानादिना तेषां ज्ञानं न संभवतीत्यत्र हेत्वन्तरमाह - **उपास्यस्येति**। अनन्तविशेषणविशिष्टतया ब्रह्मण उपासनं विहितम्। तादृशस्य ब्रह्मणः अनुमानेन ज्ञातुमशक्यत्वादित्यर्थः।

ज्ञानातिरिक्तस्य बन्धनिवर्तकत्वात्। बन्धस्य च सत्यत्वेनादृष्टद्वारा तन्निवृत्त्युपपत्तेरिति।

एतेन द्वितीयोऽपि पक्षो निरस्तः; वेदसापेक्षत्वेऽपि तेषां तदधिगमोपायस्योक्तत्वात्। कथं वा अनुमानादेर्वेदसापेक्षता ? न तावत् तदङ्गतया तर्कादिवत्; कैश्चिदपि तथाऽनभ्युपगमात्। नापि करणतया; वेदस्यैव व्युत्पत्त्यादावनुमानादिसापेक्षत्वेन वैपरीत्यात्। नापि नैसर्गिकलोकव्यवहारमूलतया तत्त्वबुभुत्साशून्यानां तद्भ्रान्तत्वसमर्पणमूलतत्त्वबुभुत्सोत्पादनद्वारेण; सांख्यसौगतादिभिः प्रत्याक्षादिवृत्तपरीक्षाप्रवृत्तैस्तदुत्पत्त्युपपत्तेः। उत्पन्नायां च तस्यां भवदभिमतप्रत्यक्षानुमानादिभिर्निर्विशेषज्ञानसम्पादनोपपत्तेः। तिष्ठन्तु सांख्यादयः; त्वदभिमततत्त्ववित्संप्रदायागतलौकिकवाक्यादपि तद्बुभुत्सा जायत एव। पश्यामश्चैतदद्यतनेषु। न च वेदानुवचनस्य विविदिषासाधनत्वश्रुत्या तत्सापेक्षता; यज्ञादेरिव जन्मान्तरानुष्ठितस्यापि तस्यादृष्टद्वारा तद्धेतुत्वोपपत्तेः।

अवेदजन्यत्वेऽपि वेदसापेक्षत्वाद्वेति द्वितीयकल्पं निराकरोति - **एतेनेति**। **उक्तत्वादिति**। भवतु वा वेदैकमूलत्वमित्यादिना पूर्वमुक्तत्वादित्यर्थः। दूषणान्तरमाह - **कथं वेति**। अनुमानादेः वेदसापेक्षत्वं कथम्। न तावत् अनुमानाद्यङ्गतया। तर्कादेः यथा अनुमानाङ्गत्वं, तथा वेदस्य अनुमानाङ्गतया कैरप्यनङ्गीकारात्। नापि करणतया वेदस्यानुमानेऽपेक्षा। वेदस्यैव शक्तिग्रहादावनुमानसापेक्षत्वेन अनुमानस्य वेदसापेक्षत्वाभावात्। अनुमानादिना गृहीतशक्तिकस्यैव वैदिकपदस्य वाक्यार्थज्ञाने करणत्वादिति भावः। ननु तत्त्वबुभुत्सायां हि अनुमानादौ प्रवृत्तिः। सा चानादिसिद्धलौकिकव्यवहारजनितभेद सत्यत्वभ्रमस्य पुरुषस्य लोकव्यवहारभ्रान्तत्वबोधनात् भवतीति भेदमिथ्यात्वं बोधयन् वेदः तत्त्ववुभुत्सां जनयति। अतोऽनुमानादिकं वेदसापेक्षमित्याशङ्क्य निराकरोति- **नापि नैसर्गिकिति**। **द्वारेण** इत्यस्यानन्तरं वेदस्योपयोग इति शेषः। **सांख्येति**। सांख्यसौगतादीनां प्रत्यक्षादिषु परमार्थविषयकत्वापरमार्थविषयकत्वविप्रतिपत्तेः संशयात् बुभुत्सा भवतीति न वेदस्योपयोग इति भावः। **तस्यां**=बुभुत्सायाम्। **तद्बुभुत्सा**=तत्त्वबुभुत्सा। **यज्ञादेरिवेति**।

अत एव न तृतीयः; व्युत्पत्त्यन्वयव्यतिरेकादिशालिषु त्रैवर्णिकेषु शूद्रादिषु च प्रमाणानां पक्षपातविरहात् ॥ भवतु वा शूद्रादीनां यतःकुतश्चित् तत्त्वज्ञानम्, त्रैवर्णिकानां तु वेदत एवेति नियमार्थमधिकरणमिति चेन्न; नियामकाभावात् ॥ अधीवेदत्वमेव नियामकमिति चेत्; त्यज तर्हि अध्ययनक्लेशम्, शूद्रादिवत् लधीयसैवोपायेन तत्प्रयोजनसिद्धेः । अत एव चान्ततो वेदान्तोच्छेदः प्रसज्येत ।

यथा त्रैवर्णिकस्य वेदाध्ययने सति कस्यचित् तत्त्वबुभुत्सोत्पत्तिः विविदिषासाधनत्वेन श्रुतैः जन्मान्तरानुष्ठितयज्ञादिभिरेवादृष्टद्वारा भवतीत्युच्यते, तथा शूद्रस्यापि जन्मान्तरीयवेदानुवचनात् बुभुत्सा सुवचेति भावः। वेदावेदयो : शूद्रादिषु ज्ञानजनकत्वाशक्तेर्वेति तृतीयकल्पं निरस्यति- **अत एव न तृतीय इति**। वेदस्य अवेदस्य च शक्तिग्रहादिसहकृतस्य यथा त्रैवर्णिकेषु ज्ञानजनकत्वमस्ति तथा शूद्रादिष्वपि भविष्यति । न हि प्रमाणानि त्रैवर्णिकानामेव ज्ञानं जनयन्ति न अत्रैवर्णिकानामिति क्वचित् पक्षपातः प्रमाणानामस्ति इति भावः। ''दुर्ज्ञानजनकत्वं हि, वेदनसाधनत्वं यज्ञादीनामाश्रित्य शूद्रे तद्विरहाद्वाच्यम् । न च तत् संभवति । जन्मान्तरीययज्ञादीनामपि अदृष्टद्वारा विविदिषायामिवोपयोगादित्यर्थः। ननु स्वभावादेव शूद्रे दुर्ज्ञानजनकत्वं, न सहकारिविरहात् इत्यत्राह- **व्युत्पत्तीति**।' इति **चण्डमारुते**।

शङ्कते - **भवतु वेति**। शूद्रादिनां यतः कुतश्चित् तत्त्वज्ञानं भवतु। त्रैवर्णिकानां तु वेदादेव तत्त्वज्ञानमिति नियमार्थमपशूद्राधिकरणमिति शङ्का। **नियामकाभावादिति** समाधानम्। त्रैवर्णिकानां वेदादेवेति नियमे हेत्वभावान्न तत्परमधिकरणमित्यर्थः। सूत्राक्षरानुगुण्याभावश्च विवक्षितः। त्रैवर्णिकानां वेदादेव ज्ञानमिति नियमे अधीतवेदत्वमेव हेतुरिति शङ्कते - **अधीतवेदत्वमिति**। अधीतस्य वेदस्य सप्रयोजनत्वार्थं वेदादेव ज्ञानमिति नियमस्य वाच्यत्वात् इत्यर्थः। समाधत्ते - **त्यज तर्हीति**। कृते हि अध्ययने तस्य सप्रयोजनत्वाय अन्यतो ज्ञानं न भवेत्। अध्ययनाभावे तु ज्ञानस्य अन्यतः संभवात् लाघवार्थमध्ययनमेव त्याज्यमिति भावः। न चेष्टापत्तिः। तथा सति त्वयेव अन्येनापि लाघवात् वेदान्तानध्ययने वेदान्तस्वरूपमेवोच्छिद्येतेत्याह - **अत एवेति**। किं च

न चाधीतवेदैरन्यतस्तदर्थो ज्ञातुं न शक्यः (जातमपि वा ज्ञानं न कार्यक्षममिति । नाद्यः?) तस्य तत्प्रतिबन्धकत्वाभावात् । नापि तेऽन्यतो न जानीयुरिति निषेधः । न च निषेधोल्लंधनेऽपि वः प्रत्यवाय इत्युक्तम् । नापि द्वितीयः, अन्यूनानतिरिक्तविषयत्वे कस्यचिद्बाधकत्वं कस्यचिन्नेति नियामकाभावात् । न च दृष्टद्वारा वैषम्यम्,

---

अधीतवेदान्तानामन्यतो ज्ञानाभाव: किमध्ययनप्रतिबद्धत्वात्, किं वा उपायान्तरस्य तान् प्रति निषिद्धत्वेन तत्र तेषामप्रवृत्ते: इति विकल्प्य नाद्य इत्याह - **न चाधीतेति** । **तस्य**=अध्ययनस्य । **तत्प्रतिबन्धकत्वाभावात्**=अन्योपायजन्यज्ञानप्रतिबन्धकत्वाभात् । न द्वितीय इत्याह - **नापीति** । **न च निषेधेति** । यदि ज्ञानार्थमुपायान्तरप्रवृत्ति : प्रत्यवायहेतु:, यदि च तज्जन्यं ज्ञानं दुरितहेतु:, उभयथापि विश्वभ्रमनिवर्तकज्ञानेन प्रत्यवायस्यापि निवृत्तिर्भवतीति '' यदा विश्वभ्रमोन्मूलनम्'' इत्यादिना पूर्वमुक्तमिति भाव: ।

एतावता वादस्यादौ विकल्पितयो: द्वयो: पक्षयो: ''शूद्रै: निर्विशेषज्ञानस्य दुस्संपादत्वात्'' इति प्रथम: पक्ष: अवान्तरबहुविकल्पपूर्वकं दूषित: । अथ ''तत्संपत्तिसद्भावेऽपि वा तत: तेषामविद्यानिवृत्त्यसंभवात्''इति द्वितीयकल्पं दूषयति - **नापि द्वितीय:** इत्यादिना । शूद्रादे: यत् निर्विशेषज्ञानं तत् त्रैवर्णिकानां यत् निर्विशेषज्ञानं तदन्यूनानतिरिक्तविषयकमिति शूद्रादे: कुत: तत् अविद्यानिवर्तकं न भवति, कुतो वा त्रैवार्णिकानां तत् ज्ञानम् अविद्यानिवर्तकमिति नियम: इत्यर्थ: । **बाधकत्वम्**= अविद्यानिवर्तकत्वम् । ननु यथा भवन्मते शूद्राद्यनुष्ठितमुपासनं त्रैवर्णिकानुष्ठितोपासनान्यूनानतिरिक्तविषयकमपि न बन्धनिवर्तकं तथास्माकमपि मते भविष्यतीत्यत्राह- **न चादृष्टेति** । अस्माभिरदृष्टद्वारा उपासनस्य बन्धनिवर्तकत्वमुच्यते ; भवद्भिस्तु न तथेति वैषम्यात् इति भाव: । नन्वस्माभिरपि तत्त्वज्ञानमदृष्टद्वारा बन्धनिवर्तकमिति स्वीक्रियत इत्याशङ्क्याह - **न च बाधे इति** । शुक्तितत्त्वज्ञानस्य रजतभ्रमनिवर्तकत्वे यथा अदृष्टं नापेक्षितं तथा तत्त्वज्ञानस्य प्रपञ्चभ्रमनिवर्तकत्वे अदृष्टापेक्षा नास्तीत्यर्थ: । यदि तु बाधातिरिक्ता निवृत्तिरिष्यते, तदा मन्त्रादे : विषादिनिवर्तकत्वे अदृष्टसापेक्षत्ववत्

भवद्भिस्तथाऽनभ्युपगमात्। न च बाधे तत्त्वज्ञानातिरिक्तमपेक्ष्यते। नापि बाधातिरिक्ता निवृत्तिरिष्यते, यद्वारादृष्टादिसापेक्षता स्यात्। अत एव हि ध्याननियोगवादिनोऽपि भवद्भिर्दूरीकृताः। न च प्रत्यक्षानुमानपुंवाक्यानां बाधकत्वमेव नास्ति; रज्जुसर्पादिभ्रमानुच्छेदप्रसङ्गात्। न च, तानि ब्राह्मणादेरेव रज्जुसर्पादिभ्रमबाधकानि, न पुनः शूद्रादेरिति नियमं पश्यामः। न च विश्वबाधकैस्तदन्यबाधकैरपि न दृश्यत

अत्रापि अदृष्टापेक्षा स्यादपि। न चैवम्, बाधस्यैव निवृत्तित्वादित्याह - **नापीति**। **अत एवेति**। अदृष्टद्वारा तत्त्वज्ञानस्य भ्रमनिवर्तकत्वाभावादेव ध्यानमदृष्टद्वारा प्रपञ्चनिवर्तकमिति मतं भवद्भिर्दूरीकृतमित्यर्थः। **न चेत्यादि**। प्रत्यक्षस्यानुमानस्य पौरुषेयवाक्यस्य च भ्रमनिवर्तकज्ञानजनकत्वं नास्तीति भवद्भिर्वक्तुं न शक्यते। रज्जुतत्त्वप्रत्यक्षादिना तत्र सर्पभ्रमस्य निवृत्तेः दर्शनात्। नापि प्रत्यक्षानुमानपौरुषेयवाक्यानि त्रैवर्णिकानामेव रज्जुसर्पादिभ्रमं निवर्तयन्ति न तु शुद्रादीनामिति नियमो दृयते। अस्तु वा क्वचित् अदृष्टद्वारत्वम्। तदपि वैदिकज्ञानस्यैव, न तु अन्यस्यांपि प्रत्यक्षादेः। प्रत्यक्षादिकं च भ्रमनिवर्तकम्। अन्यथा अनुभवविरोधात्। तच्च शूद्रस्यापि निवर्तकम्। अतो निर्विशेषानुमानादिना शूद्रस्यापि अविद्यानिवृत्तिः संभवतीति घट्टार्थः।

ननु निर्विशेषानुमानादि : शूद्रस्य न विश्वबाधकः=प्रपञ्चभ्रमनिवर्तकः, अनुमानानन्तरमपि प्रपञ्चभ्रमदर्शनादित्याशङ्क्य त्रैवर्णिकस्य वेदजन्यज्ञानमपि न विश्वबाधकम्; अनन्तरमपि भ्रमोपलम्भादिति तुल्यमिति समाधत्ते - **न च विश्वेति**। **न दृश्यत इति**। **भ्रमनिवृत्तिरिति शेषः**। **वैदिकेति**। वेदवाक्यजन्यज्ञाने सत्यपि भ्रमनिवृत्त्यभावस्यान्यत्र बाधितानुवृत्तिभङ्गवादादौ दर्शितत्वादित्यर्थः। ननु तत्त्वज्ञानतत्फलभ्रमनिवृत्त्योः संभवात् शूद्रादीनामपि ब्रह्मविद्याधिकारो भवतु। तथापि तस्याधिकारस्य मिथ्यात्वमात्रेण अनधिकार इति वदाम इत्याशङ्क्य, भवन्मते त्रैवर्णिकानामधिकारस्यापि मिथ्यात्वात् उभयो : साम्ये

इति वाच्यम्, वैदिकवाक्येष्वपि तथा प्रदर्शितत्वात् ।। भवत्वेवं तत्त्वज्ञानतत्फलयोः संभवाच्छूद्राणामपि ब्रह्मविद्याधिकारः; तस्य मिथ्यात्वमात्रेण त्वनधिकारवाचोयुक्तिरिति चेत्–हन्तैवं त्रैवर्णिकानामप्यसौ मिथ्येति किं विशिष्याभिधीयत इति । तदेतत् सर्वं तत्रैवाधिकरणे प्रपञ्चितम् । शास्त्रोपक्रमेऽपि सन्मात्रस्य ब्रह्मणः प्रमाणान्तरगोचरत्वे तद्विषयस्यागमस्यानुवादत्वं प्रसञ्जयता सूचितम् ।

इति शतदूषण्याम् अपशूद्राधिकरणविरोधवादः द्विषष्टितमः ।। ६२ ।।

सति शूद्रादीनामेवानधिकार इति कुतो विशिष्योच्यत इति समाधत्ते - **भवत्वेवमित्यादिना**। **तत्रैवाधिकरण** इति । अपशूद्राधिकरण इत्यर्थ : । **शास्त्ररोपक्रमेऽपीति** । प्रथमसूत्रे प्रत्यक्षस्य सन्मात्राग्राहित्वेन सन्मात्रज्ञापकवेदान्तानां प्रमाणान्तरसिद्धार्थानुवादकत्वं स्यादिति प्रसञ्जयता भगवता भाष्यकारेण, वेदान्तश्रवणात् पूर्वं समानविषयकप्रत्यक्षस्य सत्त्वात् तस्य च शूद्रादावप्यविशेषात् शूद्रस्यापि ब्रह्मविद्याधिकारात् अपशूद्राधिकरणविरोध सूचित इति भावः । एवं वदद्भिः आचार्यैः श्रीभाष्ये साक्षात् सूचनया वा ज्ञापित एवार्थ : वादरूपेण ग्रन्थेऽस्मिन् विस्तृतः, न स्वकपोलकल्पितं किंचिदुच्यत इति सूच्यते ।

इति श्रीशतदूषणीव्याख्यायां तात्पर्यप्रकाशिकायां
अपशूद्राधिकरणविरोधो नाम द्विषष्टितमो वाद : ।।

* * *

अथ अधिकारिविवेकवादः त्रिषष्टितमः ।। ६३ ।।

श्लो. कर्मज्ञानादिनिष्ठासु कर्तृत्वं योगिनां यतः ।
स सर्वकर्ता स्वमतं नित्यं कारयिताऽस्तु नः ।।

अपशूदाधिकरणप्रसङ्गात्, उत्पन्नतत्त्वज्ञानस्य कर्मयोगानधिकारो भगद्गीतादीन् व्याचक्षाणैः परैः जल्पितः प्रतिक्षिप्यते । तत्र तावत् सम्यगात्मदर्शनेन निरस्तमिथ्याज्ञानस्य प्रव्रज्यां प्रविष्टस्यापि सांख्यसंज्ञस्य त्वदुक्ताधिकारिणः, 'शारीरं केवलं कर्म कुर्वन् नाप्नोति किल्बिषम्' इत्यादिभिः लौकिकवैदिकसमस्तकर्मसंन्यासो

अथ अधिकारिविवेको नाम त्रिषष्टितमो वाद: ।।

कर्मज्ञानादिनिष्ठासु कर्तृत्वं योगिनां यत: ।
स सर्वकर्ता स्वमतं नित्यं कारयितास्तु न: ।।

आदिपदेन भक्तिर्गृह्यते । कर्मयोगज्ञानयोगभक्तियोगेषु कर्तृत्वं योगिनां यत: यस्मात् परमपुरुषात् भवति स सर्वकर्ता स्वमतं कर्म न: अस्मान् नित्यं कारयिता भवतु-कारयतु इत्यर्थ: । स्वमतमित्यनेन-

ये मे मतमिदं नित्यमनुतिष्ठन्ति मानवा: ।
श्रद्धावन्तोऽ नसूयन्त:मुच्यन्ते सर्वकिल्बिषै: ।।

इति गीतास्थं भगवद्वचनं स्मारितम् । न: इत्यनेन ज्ञानिनामुपलक्षणात् ज्ञानिनामपि कर्मयोगेऽधिकारोऽस्तीति वादार्थ: सूच्यते । अनेन च -

ये त्वेतदभ्यसूयन्तो नानुतिष्ठन्ति मे मतम् ।
सर्वज्ञानविमूढांस्तान् विद्धि नष्टानचेतस: ।।

इति तदनन्तरभगवद्वचननिन्दितत्वं कर्मत्यागिनां सूचितम् । सांख्यसंज्ञस्य=ज्ञानयोगिन: । त्वदुक्तवाक्यैरपीति। '' शारीरं केवलं कर्म'' इति गीताश्लोकव्याख्याने शंकरभाष्ये-

''शरीरस्थितिमात्रप्रयोजनं केवलं कर्म तत्राप्यभिमानवर्जितं
कर्म कुर्वन् न प्राप्नोति किल्बिषमनिष्टरूपं पापम्''

नास्तीति त्वदुक्तवाक्यैरपि सुव्यक्तम् । अथापि ब्रूमः–उत्पन्नतत्त्वज्ञानस्य कर्मयोगेऽनधिकारः (१) किं तस्य कर्मयोगवेदनाभावात्; (२) तत्संभवेऽपि सामग्र्यसंभवात्; (३) तत्संभवेऽपि वा तस्य निष्फलत्वात्, (४) उत तत्सफलत्वेऽपि तत्फलनैरपेक्ष्यात्, (५) तत्सापेक्षत्वेऽपि वा अन्यतस्तत्सिद्धेः, (६) अन्यस्माद्वा कुतश्चिदिति ।

न प्रथमः; दीर्घकालनैरन्तर्याऽऽदरसेवितकर्मयोगलब्धज्ञानस्य प्रबलसन्निपाताद्यभावे झडिति तत्प्रमोषासंभवात् ।। तीव्रतरात्मानुभवसुखसन्दोहेन स्यादिति

इत्याद्युक्तमत्रानुसंहितम् । **अथापीत्यादि** । यस्य तत्त्वज्ञानमुत्पन्नं तस्य कर्मयोगेऽनधिकारः १.किं तस्य कर्मयोगज्ञानाभावात्, २. तज्ज्ञानसत्त्वेऽपि कर्मयोगानुष्ठानसामग्र्यसंभवात्, ३. तत्सामग्रीसंभवेऽपि कर्मयोगस्य निष्फलत्वात्, ४. उत तस्य सफलत्वेऽपि तत्फलेच्छाविरहात्, ५. अथ तत्फलापेक्षायां सत्यामपि कर्मयोगादन्यतः तत्सिद्धेः, ६. अन्यस्माद्वा कस्माच्चित् इति षोढा विकल्पः । तत्र प्रथमकल्पं दूषयति - **न प्रथम इति** । दीर्घकालम् अविच्छेदेन आदरेण चानुष्ठितात् कर्मयोगात् लब्धज्ञानस्य प्रबलकारणं विना विस्मरणासंभवात् कर्मयोगज्ञानाभावात् अनधिकार इति वक्तुं न शक्यत इति भावः । **प्रबलसंनिपाताद्यभाव इति** ।

“निखिलसंस्कार तिरस्कृतिकरदेहवियोगादिप्रवलहेतुविरहेऽप्यस्मरणनियमः अनुभवाभावमेव साधयति”इति श्रीभाष्यसूक्तिः “प्रायणान्नरकक्लेशात् प्रसूतिव्यसनादपि” इति यामुनाचार्यसूक्तिश्चात्राभिप्रेता । तत्प्रमोषः स्मृतिभ्रंशः विस्मरणमिति यावत् संस्कारनाशो वा ननु प्राप्तस्यापि कर्मयोगज्ञानस्य तीव्रतरात्मानुभवजन्यसुखसमूहेन प्रमोषः भवितुमर्हतीति शङ्कते - **तीव्रतरेति** । निषिद्धपरिहारविषयक ज्ञानजन्यसंस्कारस्यापि तीव्रतरात्मानुभवसुखसंदोहेन नाशप्रसङ्गेन निषिद्धपरिहारोऽपि त्याज्यः स्यात् । ततश्च निषिद्धानुष्ठानं स्यात् । न चेष्टापत्तिः । विहितनिषिद्धत्यागसमुच्चयस्य भवदभिमतस्य विरोधप्रसङ्गात् । भवन्तो हि “त्यज धर्ममधर्मं च” इत्याद्यनुसारेण धर्मत्यागमधर्मत्यागं च वाञ्छन्ति इत्याशयेन समाधत्ते

चेन्न; निषिद्धपरिहारसंस्कारस्याप्युच्छेदप्रसङ्गेन त्वदुक्तधर्माधर्मत्यागसमुच्चयविरोधप्रसङ्गात् ॥ आगमिकसंस्कारप्रध्वंसेऽपि स्वात्मानुभवानन्दमग्नतया निषिद्धेषु न कटाक्षोऽपि विक्षिप्यत इति चेत्–हन्तैवं तर्हि शारीरकर्मस्वपि न विक्षिप्येत; न चैवमिच्छसि । यस्तु तथाविधात्मानुभवेन शारीरस्यापि कर्मणः प्रस्मरति, न तस्य वयमपि सुषुप्तस्येव तदानीं कर्मानुष्ठानं ब्रूमः । न चासौ यावच्छरीरं तथाऽवतिष्ठत इति दृष्टं श्रुतमिष्टं वा ।

न द्वितीयः; दृष्टादृष्टविकल्पानुपपत्तेः; न ह्यन्धपङ्ग्वादिवत्दृष्टसामग्र्यां किं(कं?) चिदस्योपघातं पश्यामः । न च तस्यां सत्यामदृष्टवैकल्यादशक्तिः शङ्क्या; दृष्टसामाग्र्युपनयनार्थत्वात् सामान्यतोऽदृष्टस्य । अन्यथा सैव निष्फला स्यात् । सम्यक् प्रयुक्ता च सा तत्फलं नोत्पादयेत् ॥ इष्ट एवायं क्वचिदर्थः, ‘सुरक्षितं

निषिद्धेति। ननु शास्त्रजन्यनिषिद्धवर्जनसंस्कारस्य नाशेऽपि स्वात्मानन्दानुभवमग्नतया निषिद्धं न करोति उत्पन्नतत्त्वज्ञान इति शङ्कते – **आगमिकेति** । **विक्षिप्यते**=क्रियते अथवा पात्यते । एवं तर्हि शरीरसंबन्धिकार्येष्वपि कटाक्षो न विक्षिप्येत । न चेष्टापत्तिः । ‘‘शारीरं केवलं कर्म कुर्वन्नाप्नोति किल्विषम्’’ इति भवदभिमतत्वात् इति समाधत्ते - **हन्तैवमिति** । ननु आत्मानुभवानन्दमग्नत्वादेव शारीरं कर्मापि विस्मरतीत्याशङ्क्य तादृशोऽनुभवो यस्य वर्तते तस्य वयमपि सुषुप्तस्येव कर्मानुष्ठानं न ब्रूमः । वस्तुतः यावच्छरीरं आत्मानुभवानन्दतृप्त : कोऽपि नास्ति । मध्ये विच्छेदसंभवादिति समाधत्ते - **यस्तु** इत्यादिना। कर्मणः प्रस्मरति विस्मरति। ‘‘अधीगर्थदयेशां कर्मणि’’ इति सूत्रेण षष्ठी ।

तत्सत्त्वेऽपि सामग्र्यसंभवादिति द्वितीयकल्पं दूषयति - **न द्वितीय** इत्यादिना । सामग्रीशब्देन दृष्टसामग्री विवक्ष्यते अदृष्टं वा। नाद्य :। शरीरेन्द्रियादिस्वास्थ्यरूपदृष्टसामग्र्याः अविकलत्वात् । न द्वितीयः । अदृष्टस्य दृष्टसामग्रीघटनमात्रार्थत्वात् दृष्टसामग्रीसत्त्वेऽदृष्टमप्यविकलमेवेति अदृष्टवैकल्यात् कर्मानुष्ठानाशक्ति : इति वक्तुं न शक्यत इति भावः । **उपघातं**=वैकल्यम् । शङ्कते - **सम्यगिति** । सम्यक् प्रयुक्तापि सा

दैवहतं विनश्यति' इत्यादिस्मरणादिति चेन्न; तत्रापि यत्किञ्चिद्वैकल्यमुत्पाद्यैव तथात्वस्थितेः । अन्यथाऽतिप्रसङ्गात् । ननु कर्तृत्वाभिमानमन्तरेण कर्मणि नाधिकारः; स चास्य निश्शेषविनष्ट इति कथं सामर्थ्य मिति चेन्न; शारीरकर्मप्रतिबन्द्यैव दत्तोतरत्वात् ।। तत्रापि नासौ कर्ता निष्क्रियत्वादात्मस्वरूपस्येति चेत्; कः कर्ता? प्रकृतिर्रेवेति चेत् कः सांख्यावस्थस्य विशेषः ? अभिमाननिरोध इति चेत्, एवं कर्मयोगेऽपि किं न स्यात् ? तथैव हि फलसङ्गकर्तृत्त्वादित्यागेन तदनुष्ठानमनुशिष्यते ।

दृष्टसामग्री क्वचित् फलं नोत्पादयतीति क्वचित् विषये दृश्यते । दृष्टसामग्र्या अवैकल्येऽपि अदृष्टवैकल्यात् फलं न भवतीत्ययमर्थ : ''सुरक्षितं दैवहतं विनश्यति'' इति स्मृतावप्युक्त इति शङ्का । तादृशस्थलेऽपि अदृष्टं दृष्टसामग्र्यां किंचिद्वैकल्यमुत्पाद्यैव फलं विहन्ति । अन्यथा दृढदण्डनुन्नचक्रस्य कदाचित् भ्रमणाभावप्रसङ्गादिति समाधानम् । **तथात्वस्थिते:** = कार्यविघटकत्वनिश्चयात् ।

ननु कर्मानुष्ठानं प्रति कर्तृत्वाभिमान : कारणम् । उत्पन्नतत्त्वज्ञानस्य तु कर्तृत्वाभिमानो नास्ति । अतो न तस्य कर्मयोगाधिकार इति शङ्कते —**ननु कर्तृत्वेति** । यदि कर्तृत्वाभिमानस्तस्य नष्ट: तर्हि कथं शारीरकर्मसु प्रवर्तते । तत्रापि कर्तृत्वाभिमानस्य कारणत्वात् इति समाधत्ते - **शारीरेति** । ननु शारीरकर्मस्वपि नायं कर्तेति शङ्कते - **तत्रापीति**। आत्मन : निष्क्रियत्वात् आत्मा शारीरकर्मकर्ता न भवति चेत् कस्तर्हि शारीरकर्मकर्तेति प्रश्न उदेति । प्रकृति: कर्त्री चेत् ज्ञानावस्थस्य ज्ञानशून्यावस्थस्य च आत्मन: को विशेष: । उभयदशायामपि प्रकृते : कर्तृत्वेऽपि ज्ञानदशायामात्मन: कर्तृत्वाभिमानाभाव: ज्ञानशून्यावस्थायां कर्तृत्वाभिमान इति विशेष इति चेत् तर्हि शारीरकर्मस्विव कर्तृत्वाभिमानं विना कर्मयोगेऽपि आत्मन: कर्तृत्वमस्तु, किं प्रकृते : कर्तृत्वेन ।उक्तं हि भगवता —

कार्यमित्येव यत् कर्म नियतं क्रियतेऽर्जुन ।
सङ्गं त्यक्त्वा फलं चैव स त्याग : सात्त्विको मत: ।। इति ।।

यत्र चायमधिकरोति ज्ञानयोगे, स किंरूपः ? किं निष्क्रियात्मस्वरूपमात्रावस्थानलक्षणः, उत तस्मिन्नस्य सम्यग्दर्शनरूपवृत्तिज्ञानेनावस्थानमिति । पूर्वत्र ज्ञानयोगस्य सदातनत्वप्रसङ्गः । उत्तरत्र ज्ञानयोगेऽप्यनधिकारः; द्रष्टृत्वस्यापि कर्तृत्वविशेषत्वात् । दृशिक्रियाकर्तृत्वमेव द्रष्टृत्वमिति ज्ञातुरनात्मत्वं प्रतिपादयता त्वयाऽपीष्यते ॥ द्रष्टृत्वमप्यन्तःकरणधर्मत्वेन मिथ्यात्वेनैवानुसन्धीयमानमात्मविदं न लिम्पतीति चेत्—यज्ञादिकर्तृत्वेऽपि तथात्वे किं वैषम्यम् ॥ वाह्याभ्यन्तरत्वाभ्यां वैषम्यमिति चेन्न; वैषम्यमात्रस्याप्रयोजकत्वात् । यागादेरपि च द्रव्यत्यागात्मक-

---

इति भावः । प्रतिबन्दीं वक्तुं विकल्पयति - यत्र चेति । यत्र ज्ञानयोगे अयमात्मा अधिकरोति स किंरूपः । किं निष्क्रियात्मस्वरूपमात्रावस्थानरूपः उत तस्मिन् आत्मस्वरूपे विषये सम्यग्दर्शनरूपवृत्तिज्ञानेन अवस्थानम् । आद्ये ज्ञानयोगस्य सदातनत्वप्रसङ्गः । आत्मस्वरूपस्य सदा निष्क्रियत्वात् । उत्तरत्र ज्ञानयोगेऽप्यनधिकारः । द्रष्टृत्वस्यापि कर्तृत्वविशेषरूपत्वात्। दृशिक्रियाकर्तृत्वं द्रष्टृत्वमिति ज्ञातु : अनात्मत्वं वदद्भिः भवद्भिरुक्तमिति भावः । **ज्ञातुरिति** । ज्ञातुः ज्ञानक्रियाकर्तृत्वेन सविकारत्वाद्धि निर्विकारादात्मनोऽन्यत्वमहमर्थस्य भवद्भिरुच्यत इति भावः ।

ननु ज्ञानयोगनिष्ठस्य कर्तृत्वाभिमानो न निःशेषं विनष्ट : । अतो ज्ञानयोगकर्तृत्वोपपत्तिः। न च तदभिमानवत्त्वे कर्तृत्वलेपप्रसङ्ग इति वाच्यम् । अन्तःकरणधर्मत्वेन मिथ्यात्वेन च तत्त्वतो ज्ञातस्य तस्य लेपायोगात् । तत्त्वज्ञाने सत्यपि अभिमानस्तु वासनायाः प्राबल्यात्, विदुषामपि देहात्मभ्रमाभासवदिति शङ्कते - **द्रष्टृत्वमपीति** । समाधत्ते - **यज्ञादीति** । यथा ज्ञानयोगकर्तृत्वोपपत्तिः तथैव कर्मयोगकर्तृत्वमपि कुतो नोपपद्यते इत्यर्थः । ननु ज्ञानयोगस्य आन्तरत्वम् यज्ञादेः बाह्यत्वमिति वैषम्यात् कर्तृत्वे वैषम्यमित्याशङ्क्याह - **बाह्यत्वेति** । यागादेरपि न बाह्यत्वमित्याह - **यागादेरपीति**। यागादेरपि द्रव्यत्यागात्मकबुद्धिविशेषरूपत्वादान्तरत्वम् । इन्द्रायेदं न ममेत्याद्याकारकःज्ञानविशेषो हि यागः । येषु च बाह्यत्वं होमस्नानादिषु, तेष्वपि आन्तरप्रयत्नात्मके पुरुषव्यापारे कर्तृत्वम् । तत्रैव

बुद्धिवृत्तिविशेषत्वात् । शरीरक्रियादिरूपेष्वपि कर्मसु प्रसन्नस्यैवाऽऽन्तरस्य पुरुषव्यापारत्वात् । तत्रैव तत्पर्यन्ते स्वव्यापारे तस्य नियोगात् । ननु न ज्ञानयोगः स्वेच्छयाऽनुष्ठीयते, अपितूच्छ्वासनिमेषोन्मेषादिवत् सांख्यस्यासौ स्वरसवाहीति चेन्न; युष्मद्गुरुवंशस्य सर्वकर्मपरित्यागरूपज्ञानस्य विधेयत्ववाचोयुक्तेरनर्थकरत्वप्रसङ्गात् । शास्त्रजन्यज्ञानमात्रस्य अविधेयत्वात् । तथा चाभ्युपगमात् । तन्मूले तु सर्वकर्मसंन्यासलक्षणे ज्ञानयोगे कर्तव्ये विधेरवकाशात् । स्वरसवाहिस्वात्मदर्शनरूपमहाजागरस्य सुषुप्तावपि नाधिकारः । प्रबुद्धस्यापि न बहिर्मुखी दृष्टिरिति शारीरकर्मस्वपि नावकाशः ॥ तथापि निष्क्रियमात्मानमात्मत्वेनाभिमन्यमानस्य कर्तृत्वाभिमानपुरस्सरक्रियात्मस्वरूपावस्थानरूपकर्मयोगे कथमधिकारः; कथं च

पुरुषस्य नियोगात् । तत्र च बाह्यक्रियापर्यन्ते नियोगात् बाह्यक्रियापि सिध्यतीत्याह -**शरीरेति** । **तत्पर्यन्ते**=शरीरक्रियापर्यन्ते । **स्वव्यापारे**=स्वप्रयत्ने । **नन्विति** । ज्ञानयोगः सांख्येन न स्वेच्छया अनुष्ठीयते, येन कर्मयोगोऽप्यनुष्ठीयतामिति प्रश्नः स्यात् । अपि तूच्छ्वासनिश्वासनिमेषोन्मेषवत् स्वरसवाही ज्ञानयोगः सांख्यस्येति शङ्का । युष्मद्गुरुवंशस्य सर्वकर्मपरित्यागोऽपि न विधेयः स्यात् । सर्वकर्मपरित्यागस्यापि ज्ञानरूपत्वेन स्वरसवाहितया विधेयत्वायोगादिति परिहारः ।

ननु शास्त्रजन्यज्ञानमेव विधेयं, न ज्ञानयोग इत्यत्राह -**शास्त्रेति** । संन्यासलक्षणज्ञानस्य तु विधियोग्यत्वात् विधेयता । ज्ञानयोगस्य तु स्वरसवाहितया न विधेयतेत्याशयेनाह - **तन्मूले** इति। ननु कर्मसंन्यासलक्षणज्ञानस्य विधेयत्वेऽपि स न ज्ञानयोगः किं तु आत्मदर्शनप्रवाह : ज्ञानयोगः । तथा च न गुरुवंश्यवाचोयुक्तिविरोध इत्यत्राह **स्वरसेति**।स्वरसवाही स्वात्मदर्शनरूपमहाजागरो यस्येति बहुव्रीहिः । आत्मदर्शनस्य स्वरसवाहित्वे सुषुप्तिरपि न स्यादित्यर्थः । तत्संभवेऽपि प्रबोधे विषयान्तरसंचारो ०न स्यादित्याह **प्रबुद्धस्येति**। पुनः शङ्कते - **तथापीति** । आत्मा निष्क्रियः इति ज्ञाने सति सक्रियत्वकल्पनमयुक्तम् । अपि च कर्म मिथ्येतिज्ञानवान् कथं कर्मणि प्रवर्तेत इति भावः ।

विदितकर्ममिथ्यात्वस्तत्र प्रवर्तते इति चेन्न–उक्तोतरत्वात् । ज्ञानयोगो हि क्रियाविशेष एवेति दर्शितम् । न च तस्य मिथ्यात्वमविदितम् । सोऽपि स्वरूपभूतसंवित्तिमात्रादन्यः । तस्य च मिथ्यात्वम्, संवित्स्वरूपादन्यन्मिथ्यैवेति संमतप्रयोजकश्रवणवेलायामेव सिद्धम् । न चात्यन्तनिष्क्रियत्वमात्मनो वयमिच्छामः; आत्मन एव कर्तृत्वस्य, 'कर्ता शास्त्रार्थवत्त्वात्' इत्यादिभिः स्थापनात् । उत्पत्तिनाशादिलक्षणक्रियानिवृत्तेश्च सम्यज्ज्ञानशरीरप्रेरणादिक्रियावत्त्वेन सह विरोधाभावात् । भावेऽपि वा ज्ञानयोगेऽपि समत्वात् ॥ भ्रान्तिलेशसुपजीव्यैव ज्ञानयोगेऽपि प्रवृत्तिरिष्यत इति चेत्; तथाऽन्यत्रापि किं नेष्यते ? ननु

उक्तोत्तरत्वादिति । ज्ञानयोगोऽपि क्रियाविशेष एवेति कथं निष्क्रियस्यात्मनस्तत्राधिकार इत्यर्थः । कर्मयोगवत् ज्ञानयोगस्यापि क्रियाविशेषत्वेन मिथ्यात्वात् कथं तत्र प्रवर्तेतेति भावः । ननु ज्ञानयोगस्य मिथ्यात्वं न ज्ञातम्, अतस्तत्र प्रवर्तत इत्याशङ्क्य, वृत्तिरूपस्य ज्ञानयोगस्य स्वरूपभूतसंवित्तिमात्रादन्यत्वेन तस्य मिथ्यात्वं "संवित्स्वरूपादन्यत् मिथ्यैव" इति श्रवणवेलायामेव ज्ञातमिति समाधत्ते – न च तस्येत्यादिना । संमतेति । मोक्षं प्रति प्रयोजकत्वेन संमतं यत् श्रवणं तत्समय एवेत्यर्थः । किं च निष्क्रियत्वं नाम किं सर्वक्रियाराहित्यमुच्यते उत उत्पत्तिनाशवृद्धिक्षयादिराहित्यमिति विकल्पमभिप्रेत्य नाद्य इत्याह – न चात्यन्तेति । "कर्ता शास्त्रार्थवत्त्वात्" इति सूत्रेण प्रयत्नरूपक्रियाश्रयत्वस्योक्तत्वादित्यर्थः । न द्वितीय इत्याह - उत्पत्तीति। न जायते न म्रियत इति उत्पत्तिनाशरूपक्रियाराहित्यमिष्टं, न तु सर्वक्रियाराहित्यम् । ननु सक्रियत्वभ्रान्तिमानेव ज्ञानयोगे प्रवर्तत इत्याशङ्क्य तस्य सक्रि यत्वभ्रान्तिमतः कर्मयोगेऽपि प्रवृत्तिः कुतो नेष्यत इति समाधत्ते –भ्रान्तिलेशमिति । शङ्कते - ननु इति । यद्यपि कर्मयोगज्ञानयोगयोः अधिकारे आत्मनः सक्रियत्वभ्रान्त्यादियुक्तिः समाना तथापि ज्ञानयोगनिष्ठस्य कर्मयोगः शास्त्रेण निषिद्ध इति न तत्र प्रवृत्तिरिति शङ्का । स्ववर्णाश्रमोचितकर्मानुष्ठानस्य शास्त्रेण निषिद्धत्वाभावात् तत्र प्रवृत्ति : अवर्जनीया । प्रत्युत वर्णाश्रमधर्मानुष्ठानस्य शास्त्रोक्तत्वाच्चेति समाधानम् ।

भवत्वेवमधिकारे युक्तिसाम्यम्; तथाऽपि शास्त्रेण पर्युदस्तत्वान्न सांख्यः कर्मयोगेऽधिकरोतीति चेत्—स्ववर्णाश्रमोचितेषु कर्मसु शास्त्रेण पर्युदासाभावात्; प्रत्युत तत्संग्रहणस्योक्तत्वात्। अत एव प्रव्रजितस्यापि यज्ञादिनिरपेक्षेषु प्राणायामादिकर्मयोगेष्वधिकारः संभवति, आदिश्यते च। अन्यथा, 'कुर्याद्विद्वांस्तथाऽसक्तश्चिकीर्षुर्लोकसंग्रहम्' इत्युक्तलोकसंग्रहार्थकर्मण्यपि प्रवृत्तिर्निषिद्धानुष्ठानं स्यात्। अतो न कथंचित् ज्ञानयोगे शक्तस्य कर्मयोगे सामर्थ्यासंभवः।

न च तृतीयः परित्यक्तस्वर्गादिफलस्यापि पापक्षयादिफलसद्भावात्, नित्यकाम्यज्योतिष्टोमादिवत् एकस्यैव विनियोगपृथक्त्वेन फलभेदोपपत्तेः। अन्यथा सुमुक्षुविषयकर्मयोगस्यैव अननुष्ठानप्रसङ्गात्।

तत्संग्रहणस्य= वर्णाश्रमधर्मानुष्ठानस्य। **अत एवेति**। वर्णाश्रमोचितकर्मानुष्ठानस्य शास्त्रोदितत्वादेव संन्यासिनोऽपि यज्ञादिव्यतिरिक्तेषु प्राणायामादिकर्मस्वधिकारः संभवति, उपदिश्यते च गीतादिषु तथा। अन्यथा ज्ञानयोगिनः सर्वकर्मस्वनधिकारे

''कुर्याद्विद्वांस्तथासक्तः चिकीर्षुर्लोकसंग्रहम्''

इति लोकसंग्रहार्थकर्मस्वपि प्रवृत्तिर्निषिद्धानुष्ठानं स्यात्। तस्मात् केनापि प्रकारेण ज्ञानयोगे शक्तस्य कर्मयोगेऽशक्तिर्न वक्तुं शक्येति भावः।

अथ ''तत्संभवेऽपि वा तस्य निष्फलत्वात् न कर्मयोगेऽधिकारः ''इति तृतीयकल्पं निराकरोति-**न च तृतीय इति**। ज्ञानयोगी यद्यपि स्वर्गादिफलं त्यक्तवान् तथापि पापक्षयादिफलसद्भावात् कर्मानुष्ठानमुचितम्। न च स्वर्गादिफलसाधनतया चोदितस्य कर्मणः कथं पापक्षयादिफलसाधनत्वमित्याशङ्कनीयम्। एकस्यैव कर्मणः विनियोगपृथक्त्वेन फलद्वयसाधनत्वसंभवादिति भावः। एकस्यैव फलद्वये निनियोगः विनियोगपृथत्त्वम्। **अन्यथेति**। ज्ञनयोगनिष्ठस्य कर्मयोगेऽधिकाराभावे मुमुक्षुं ज्ञानयोगनिष्ठमधिकृत्य विहितस्य कर्मयोगस्याननुष्ठानप्रसङ्गात्।

नापि चतुर्थ; कल्मषनिवृत्तेः सर्वदाऽपेक्षितत्वात् ॥ कर्मयोगफलभूतस्थिरप्रज्ञतासिद्धौ कर्मयोगादभ्युत्थानं त्वयाऽपीष्यत इति चेत्–सत्यम्; तथाऽपि तत्रानधिकारं न ब्रूमः । अत एव हि ज्ञानयोगयोग्यस्यापि अनुविधेयानुष्ठानस्य शिष्टतया व्यपदेश्यस्य सुकरनिष्प्रमादोपायशक्तस्य च कर्मनिष्ठैव श्रेयस्त्वेनानुशिष्यते । न च कर्मयोगाभ्युत्थितस्यापि ज्ञानयोगिनः स्ववर्णाश्रम-कर्मनिवृत्तिं ब्रूमः । वर्णाश्रमधर्मा हि निष्ठासु इतिकर्तव्यतात्वेनावतिष्ठन्ते; न तु स्वयमेव कर्मयोगादिरूपाः । अत एव हि भक्तियोगावस्थस्यापि तदनुवृत्तिः । न च पूर्वकृतैः कर्मभिर्मृदितकषायस्य किमिदानीन्तनैरिति वाच्यम्; अमुक्तस्यात्यन्तमृदितकषायत्वाभावात् ॥ आत्मदर्शनसिद्धौ किं तदर्थेनेति चेन्न; अनिश्चितासद्भावपूर्वोत्तरज्ञानावरणहेतुविनिवारणाय तदुपादानोपपत्तेः । न ह्यसंभवदावरणं सांख्यस्य ज्ञानम्; तथा सति तमःप्रयुक्तसुष्वापाद्यसंभवप्रसङ्गात् । न च नास्ति

अथ "उत तत्सफलत्वेऽपि तत्फलनैरपेक्ष्यात्" इति चतुर्थकल्पं दूषयति –**नापि चतुर्थ** इत्यादिना । ज्ञानयोगनिष्ठस्यापि प्रतिबन्धकपापनिवृत्त्यर्थं कर्मानुष्ठानस्यावश्यापेक्षितत्वात् । शङ्कते- **कर्मयोगेति** ।कर्मयोगफलभूतायाः स्थितप्रज्ञतायाः : निष्पत्तौ सत्यां कर्मयोगान्निवृत्ति : त्वयापीष्यत इति चेत् - सत्यमिष्यते । तथापि तदा कर्मयोगानधिकारं न वयं ब्रूमः । कर्मयोगाधिकारस्य निवृत्त्यभावादेव यःज्ञानयोगयोग्यः यस्य च अनुष्ठानमितरैरनुसरणीयं भवति, लोके च शिष्टतया प्रसिद्ध : तस्य ज्ञानयोगापेक्षया सुकरत्वात् निष्प्रमादत्वाच्च कर्मनिष्ठैव श्रेयस्त्त्वेन अनुशिष्यते गीताचार्येण भगवता "कर्म ज्यायो ह्यकर्मणः" इत्यादिनेति भावः । **न चेति** । किं च न वयं कर्मयोगान्निवृत्तस्यापि ज्ञानयोगिनः स्ववर्णाश्रमकर्मनिवृत्तिं ब्रूमः । यद्यपि वर्णश्रमधर्माः न कर्मयोगरूपा : तथापि ते सर्वास्वपि कर्भयोगज्ञानयोगभक्तियोगनिष्ठासु इतिकर्तव्यतात्वेन=उपकारकत्वेन अवतिष्ठन्ते इत्यर्थः । **अथ एवेति** । सर्वास्वपि निष्ठासु वर्णाश्रमधर्माणामितिकर्तव्यतात्वेनावस्थितेरेव भक्तियोगनिष्ठस्यापि वर्णाश्रमधर्मानुवृत्ति : । न च ज्ञानयोगनिष्पत्ते : पूर्वं कृतैरेव वर्णाश्रमधर्मैः निवृत्तपापस्य

सुष्वापः; 'युक्तस्वप्नावबोधस्य'इति वचनात् । अतः आत्मज्ञाने सिद्धेऽपि उत्तरोपचयसिद्ध्यर्थमपचयपरिहारार्थं वा ज्ञाननिष्ठैरपि स्ववर्णाश्रमोचितं कर्मोपसंहर्तव्यम् ।

न च पञ्चमः; इतिकर्तव्यताभूतनित्यनैमितिकांशेषु तावत् अकरण-निमित्त-प्रत्यवायपरिहारादेः करणमन्तरेणान्यतोऽसंभवात् ।। पवित्रतमं ज्ञानमेव तमपि प्रत्यवायं निरुन्ध्यादिति चेत्-इदमपि 'नाविरतो दुश्चरितात्' इत्यादिभिः प्रागेव दूषितम् । 'यत् सांख्यैः प्राप्यते स्थानं तद्योगैरपि गम्यते' इत्यादिभिः ज्ञानयोगशक्तस्यापि तदेकफलत्वेन विकल्पिते कर्मयोगेऽपि सुकरोपायसङ्गादिवशादधिकारोपपत्तेश्च ।

इदानीमनुष्ठानं किमर्थमिति वाच्यम् । मुक्ते : प्राक् अत्यन्तनिरस्तपापत्वाभावात् । न च मुक्तेः प्राक् आत्मदर्शनसिद्धौ किं कर्मणेति वाच्यम् । ज्ञानावरणहेतुपापनिवृत्तये तदावश्यकत्वात्। न हि आवरणं न संभवतीति वक्तुं शक्यते । तमोगुणप्रयुक्तसुषुप्त्याद्यसंभवप्रसङ्गात् । न च ज्ञानयोगिनः सुषुप्तिरेव नास्तीति वक्तुं शक्यते ।''युक्तस्वप्नावबोधस्य'' इति गीतावचनविरोधात् इति भावः । **अत इति** । आत्मज्ञाने निष्पन्नेऽपि उत्तरकाले आत्मज्ञानस्य उपचयार्थम् अपचयपरिहारार्थं च ज्ञाननिष्ठैरपि स्वर्णाश्रमोचितं कर्मावश्यमनुष्ठेयमिति ।

तत्सापेक्षत्वेऽपि वा अन्यतस्तत्सिद्धेरिति पञ्चमकल्पं निरस्यति- **न पञ्चम** इत्यादिना । नित्यनैमित्तिककर्माणि ज्ञानयोगेतिकर्तव्यताभूतानि । तेषामकरणे प्रत्यवायः स्यात् । तत्परिहारार्थं चावश्यं कर्तव्यानि तानि । ततश्च प्रत्यवायपरिहाररूपं फलं नित्यनैमित्तिककर्मानुष्ठानं विना अन्येन उपायेन न सिध्यतीति भावः । **अकरणम्**=अननुष्ठानम्। **करणम्**=अनुष्ठानम् । ननु ''न हि ज्ञानेन सदृशं पवित्रमिह विद्यते''इति वचनात् पवित्रतमं ज्ञानमेन प्रत्यवायं निवर्तयिष्यति, किं कर्मणेति शङ्कते-पवित्रतममिति । परिहरति-**नाविरत** इति । शिष्टं स्पष्टम् ।

षष्ठे तु चार्वाकादिसम्मतविस्रंमान् शिष्यान् एकान्ते शिक्षयत। तदेतदपि वर्णाश्रमधर्माणां यावज्जीवानुष्ठेयत्वप्रतिपादकेन भाष्येण व्यञ्जितम्।

श्लो. आशरीरं प्रवृत्तत्वात् स्वभावप्राप्तकर्मणाम्।
किमर्थं क्रियते द्वेषः शास्त्रप्राप्तेषु कर्मसु ॥ इति।

इति शतदूषण्याम् अधिकारिविवेकवादः त्रिषष्टितमः ॥ ६३ ॥

आशरीरमिति ॥

''न हि कश्चित् क्षणमपि जातु तिष्ठत्यकर्मकृत्।
कार्यते ह्यवशः कर्म सर्वः प्रकृतिजैर्गुणैः ॥

इति वचनमत्राभिप्रेतम्।

इति श्रीशतदूषणीव्याख्यायां तात्पर्यप्रकाशिकायां
अधिकारिविवेको नाम त्रिषष्टितमो वादः ॥

* * *

अथ यतिलिङ्गभेदभङ्गवादः चतुःषष्टितमः ॥ ६४ ॥

श्लो. श्रितान् परमहंसतां परमहं स इत्युक्तितः
त्रयीपथमसौ गतान् कपटपौगतान् खण्डयन् ।
मुनिर्जयति लक्ष्मणो मुदसुदञ्चयन्नञ्चतां मुकुन्दगुणमौकितकप्रकरशुक्तिभिः सूक्तिभिः ॥

ये पुनः शङ्करादयोऽर्वाचीनपरमहंसाः, ते बाह्यवेषपरिग्रहमधिकृत्य पृच्छयन्ते–किमिति परमहंसैः ब्रह्मसूत्रमुत्सृज्यते, (१) किं तेषु तत्प्रापकाभावात्, (२) उत सामान्यतः प्राप्तस्यापि विशेषतो बाधात्, (३) यद्वा वैकल्पिकतया परित्यागेऽपि प्रत्यवायविरहात्, (४) उताङ्गिनिवृतेरेवार्थात् तदङ्गस्यापि निवृत्तेः, (५) अथवा पूर्वानुष्ठानमात्रादिति ।

न प्रथमः; श्रुतिस्मृतिभिः सामान्यतो विशेषतश्च तत्प्राप्तेः । द्विजसामान्यतः प्राप्तिस्तावत् सहजा निर्विवादैव । परिव्राजकसामान्यतः प्राप्तिस्तावदभिधीयते–यथाऽऽह वसिष्ठः, 'यज्ञोपवीत्युदककमण्डलुहस्तः' इति । अङ्गिराः, 'यतीनां त्रीणि

अथ यतिलिङ्गभेदभङ्गवाद: चतुषष्टितम: ॥

श्रितां परमहंसतां परमहं इत्युक्तित:
त्रयीपथमसौ गतान् कपटसौगतान् खण्डयन् ।
मुनिर्जयति लक्ष्मणो मुदमुदञ्चयन्नञ्चतां
मुकुन्दगुणमौक्तिकप्रकरशुक्तिभि: सूक्तिभि:" ॥

उक्तित इति । उक्तित एव पारमहंस्यं न त्वर्थत इति भाव: । अनेन वादार्थसूचनं कृतम् । अञ्चताम्=उपसेवमानानाम् । मुदमुदञ्चयन्=उद्गमयन् । अयमपि वाद: भाष्यव्याख्यानात्मनैव प्रवृत्त इति अन्ते दर्शयिष्यति । **अधिकृत्य**=विषयीकृत्य । तान् प्रति तदीयबाह्यवेषपरिग्रहविषयक: प्रश्न: क्रियत इत्यर्थ: । **विशेषतो बाधादिति ।** परमहंसरूपविशेषे बाधादित्यर्थ: । **सामान्यतो विशेषतश्चेति ।** द्विजसामान्ये तद्विशेपरिव्राजके

शुक्लानि भवन्त्येतानि नित्यशः । यज्ञोपवीतं दन्ताश्च तथा जन्तुनिवारणम् ॥' इति। शौनकः, 'अथ युवा सुवासा इति काषायवासः, सखा मे गोपयेति त्रिदण्डं गृह्णाति, तच्छंयोरावृणीमह इति यज्ञोपवीतम् ॥' इति । दत्तात्रेयः, 'मोक्षाश्रमे स्मृतं वस्त्रं रक्तं यद्धातुरञ्जितम् । कार्यं यज्ञोपवीतं तु सितं नवगुणान्वितम् ॥' इति ।

सामान्यतः यज्ञोपवीतत्यागं निषेधन्ति–यथाऽऽह मेधातिथिः, 'गृहीतं यत् त्रिदण्डादेरविनष्टं तु न त्यजेत् । समुद्रं गच्छ स्वाहेति विनष्टं प्रक्षिपेज्जले ॥ प्रक्षिप्य चान्यदादद्याद्गायत्र्य; प्रणवेन वा । तच्छंयोरित्युपवीतमब्लिङ्गाभिः कमण्डलुम् ॥' इति । अङ्गिराश्च, 'यतेर्लिङ्गं प्रवक्ष्यामि येनासौ लक्ष्यते यतिः । ब्रह्मसूत्रं त्रिदण्डं च वस्त्रं जन्तुनिवारणम् ॥ शिक्यं पात्रं ब्रुसीं चैव कौपीनं कटिवेष्टनम् । यस्यैतत् विद्यते लिङ्गं स यतिर्नेतरो यतिः ॥' इति ।

उपवीतपरित्यागे प्रत्यवायं स्मरन्ति च । यथाऽऽह अत्रिः, 'ब्रह्मसूत्रं त्रिदेवत्यं ब्रह्मविष्णुशिवात्मकम् । परित्यजन्ति विप्रा ये मोहात् तर्कोपजीविनः ॥ स्वर्गापवर्गमार्गाभ्यां प्रच्युतास्ते न संशयः' इति । यद्यप्यत्र विप्रशब्दः सामान्यवचनः, तथाऽपि पारिव्राज्यमेवाधिकृत्य प्रवृत्तत्वात् विशेषार्थ एव । सामान्यतो निर्देशस्तु सर्वेषां प्रत्यवायसाम्यात् । तथा हि उशनास्तत्परित्यागे सर्वेषामाश्रमिणां पतनमेवाऽऽह, 'ब्रह्मसूत्रपरित्यागाद् ब्रह्मचारी गृही वनी । परिव्राट् चापि पतति

चेत्यर्थः । **मोक्षाश्रम इति** । मोक्षाश्रमे वस्त्रं रक्तं स्मृतम् । कौसुम्भादिव्यावृत्त्यर्थं यद्धातुरञ्जितमित्युक्तम्। **निषेधन्तीति**। यज्ञोपवीतत्यागनिषेधादपियज्ञोपवीतधारणं सिद्धमिति भावः । **त्रिदण्डादे :** इत्यादिशब्देन यज्ञोपवीतं गृह्यते । तत्सूचनायैव " समुद्रं गच्छ स्वाहा'' इत्याद्युत्तरवचनोपादानम् । तत्र विनष्टोपवीतपुनर्धारणस्योक्तत्वात् अविनष्टत्यागनिषेधवचनस्य यज्ञोपवीतविषयत्वमवगम्यते । **प्रत्यवायमिति** । अतोऽपि यज्ञोपवीतधारणं सिद्धमिति भावः । **तर्कोपजीविन इति** । अङ्गिभूतकर्मनिवृत्तेः

तस्मात् तन्न परित्यजेत् ॥' इति ॥ तत्परित्यागे बहूनि प्रायश्चित्तानि सस्मरुः—यथा अत्रिरेव—त्यक्त्वा यज्ञोपवीतं तु षट् कृच्छ्राणि समाचरेत् ॥ इति । वृद्धजाबालिश्च हीनो यज्ञोपवीतेन यदि स्यात् ध्यानभिक्षुकः । तस्य क्रिया निष्फलाः स्युः प्रायश्चित्तं विधीयते ॥ गायत्रीसहितानेव प्राजापत्यान् षडाचरेत् । पुनः संस्कारमाहृत्य धार्यं यज्ञोपवीतकम् ॥ इति । हारीतः—विना यज्ञोपवीतेन यत्कृतं भोजनादिकम् । तत्पापप्रशमायालं प्रायश्चितं ब्रवीमि वः ॥ तेषां तु भोजनादीनां प्रत्यहं सुसमाधिभिः। सहस्राद्यैरसुयमैर्विधिपूर्वकृतैः शुचिः ॥' इति । असमीक्षितदशापरित्यक्तब्रह्मसूत्रैश्च यादवप्रकाशैः समीक्ष्य संजातानुशयैः सप्रमाणमनुयुक्ताः वासुदेवयात्रोत्सवसमागताः नानादिगन्तवास्तव्याः शिष्टाश्च प्रायश्चितमेवोत्तरं ददुः ॥ भ्रष्टस्तर्ह्यसाविति चेन्न; प्रायश्चित्तात्पूर्वमेव तथात्वस्य प्राचीनैर्निश्चितत्वात् । तत्समुचितस्यैव यतिधर्मस्याद्यापि मानवादिवत् अविगीतशिष्टपरिग्रहात् ।

एवं परिव्राजकानां सामान्यतः प्राप्तं ब्रह्मसूत्रम् । परमहंसेष्वेव विशेषतोऽपि प्राप्तिर्दृश्यते । तथा हि शाठ्यायनकोपनिषदि समाम्नायते, “अथ ह यद्ब्रह्म परमं सनातनं ये श्रोत्रिया अकामहता अधीयुः शान्तो दान्त उपरतस्तितिक्षुर्योऽनूचानो ह्यमि(पि ?) जिज्ञास्य(स ?)मानः । त्यक्तैषणो ह्यनृणस्तद्विदित्वा मौनी वसन् आश्रमे यत्रतत्र । अथाऽऽश्रमं चरमं संप्रविश्य स च द्वितीयममृतं संप्रयाति ।

तदङ्गभूतयज्ञोपवीतस्यापि निवृत्तिः इत्याद्यद्वैत्यभिमततर्कोपजीविन इत्यर्थ : । **प्रायश्चित्तानीति** । ततोऽपि यज्ञोपवीतधारणं सिद्धमिति भावः । **ध्यानभिक्षुकः** = परिव्राट् । **असमीक्षितेति** । यादवप्रकाशाः अविचारितदशायां यज्ञोपवीतं त्यक्तवन्त : । पश्चात् विचारे कृते यज्ञोपवीतत्यागो न युक्त इति तेषां निर्णयो जातः । परं तु पूर्वकृतत्यागजन्यं पापमधिकृत्य संजातानुशयाः सन्तः श्रीवरदराजस्वामिब्रह्मोत्सवसमये नानाप्रान्तेभ्यः समागतान् शिष्टान् सप्रमाणं पर्यपृच्छन् । ते च शिष्टा : प्रायश्चित्तमेव कर्तव्यमित्युत्तरं ददुः । **तत्समुच्चितस्येति** । यादवप्रकाशकृतस्य यतिधर्मसमुच्चयाख्यग्रन्थस्येत्यर्थः ।

अखिलं विश्वं ब्रह्मभावनया निचाथ्य चरेत् पृथिव्यां विष्णुलिङ्गी निगूढः । परमहंसमाश्रमं संप्रविश्य यथोपपत्ति पञ्चमात्रां दधानः । तदत्र श्लोकौ भवतः – त्रिदण्डमुपवीतं च वासः कौपीनवेष्टनम् । शिक्यं कवचमित्येतत् विभृयाद्यावदायुषम्। त्रिदण्डं वैष्णवं लिङ्गं विप्राणां मुक्तिसाधनम् । निर्वाणं सर्वधर्माणामिति वेदानुशासनम् ।। इति । अथ खलु सौम्य कुटीचको बहूदको हंसः परमहंस इत्येते चतुर्विधाः परिव्राजका भवन्ति । सर्वे विष्णुलिङ्गिनः सदा स्वात्मानमात्मना ब्रह्मभावं भावयन्तः सुशीलिनः पुण्यश्लोका भवन्ति ।'' इति ।

इमामेवोपनिषदमुपबृंहयन् भगवान् पराशरः स्मरति, ''तत्र परिव्राजकाश्चतुर्विधा भवन्ति, कुटीचको बहूदको हंसः परमहंसश्चेति । तत्र कुटीचका नाम– पुत्रादिभिः कुटीं कारयित्वा कामक्रोधलोभमदमात्सर्यादीन् परित्यज्य विधिवत् सन्न्यासं कृत्वा त्रिदण्डजलपवित्रकाषायवस्त्रोपवीतधारिणः स्नानशौचाचमनजपस्वाध्यायब्रह्मचर्यज्ञानतत्पराः पुत्रादेरेव भिक्षाकालेऽन्नं देहयात्रामात्रमुपयुञ्जनाः तस्यां कुटौ नित्यं वसन्त आत्मानं मोक्षयन्ते । बहूदका नाम–त्रिदण्डकमण्डलुजलपवित्रशिक्ययज्ञोपवीतिनो वेदान्तार्थावबोधकाः साधुवृत्तेषु ब्राह्मणकुलेषु भैक्षचर्यां चरन्त आत्मानं मोक्षयन्ते । हंसा नाम-त्रिदण्डजलपवित्रशिक्ययज्ञोपवीतरक्तकाषायवाससो गोमूत्रगोमयाहारा एकरात्र-त्रिरात्र-षड्रात्र-मासोपवास-पक्षोपवास-कृच्छ्रातिकृच्छ्र-चान्द्रायण-सान्तपन-पराक-तुलापुरुषादीनि व्रतानि चरन्तो गोद्विजाढ्येषु पुण्येषु देशेषु वसन्त आत्मानं मोक्षयन्ते । परमहंसा नाम– त्रिदण्डजलपवित्रशिक्ययज्ञोपवीतिनोऽन्तर्वासबहिर्वासधारिणो ग्रामैकरात्रवासिनो नगर-तीर्थ-जनपदेषु पञ्चरात्रं षड्रात्रम्, क्षारलवणवर्जं भिक्षाकाले शीर्णपर्णपुटं कृत्वा ब्राह्मणकुलादेव भैक्षं गृहीत्वा अष्टौ ग्रासानेव भुञ्जानाः सन्ध्योपासनतत्पराः

कौपीनवेष्टितमिति वाससो विशेषणम् ।ननु यथा ''न हिंस्यात् सर्वा भूतानि'' इति निषेध : विहिताग्नीषोमीयपश्वालम्भात् व्यावर्तते, तथा त्यागविधिविषयात् तन्निषेधो

नित्यं वृक्षमूले वसन्त आत्मानं मोक्षयन्ते'' इति । एवं शाट्यायनकश्रुत्या पराशरस्मृत्या च सुप्रसिद्धमर्थम् अत्रिप्रभृतयोऽपि वृत्तिभेदभिदुराणां चतुर्णां परिव्राजकानां लिङ्गभेदनिषेधद्वारा सामान्यतो दर्शयन्ति, यथा, ''चतुर्विधा भिक्षवस्तु स्मृताः सामान्यलिङ्गिनः ॥ तेषां पृथक्पृथङ्नाम वृत्तिभेदात् कृतं श्रुतौ । कुटीचको बंहूदश्च हंसश्चैव तृतीयकः ॥ चतुर्थः परमो हंसो यो यः पश्चात् स उतमः । लिङ्गं तु वैष्णवं तेषां त्रिदण्डं सपवित्रकम् ॥'' इति । वृत्तिभेदश्च पराशरस्मृत्या प्रागेव दर्शितः ।

एवं परमहंसानां विशेषत एव प्राप्तेः, तत्परित्यागनिषेधाच्च द्वितीयः पक्षो निरस्तः ।

यद्यपि सामान्यमात्रं विशेषबलात् सङ्कोचमाप्नोति, तत्राऽपि न विशेषात् विशेषः पराभवमर्हति; अविशेषात् । विपरिवर्तप्रसङ्गाच्च । दृष्टश्चास्मदुक्तो विशेषः । त्वदभिमतस्त्वद्यापि न दृश्यते ॥ ननु, 'नखानि निकृत्य यज्ञोपवीतं विसृजेत्' इति दृश्यत इति चेन्न । ''नखानि निकृत्य पुराणवस्त्रयज्ञोपवीतकमण्डलून् त्यक्त्वा नवान् प्रगृह्याऽऽश्रमं प्रविशेत्' इति श्रुत्यैव त्यागग्रहणयोः पुराणनूतनविषयत्वस्य न्यायनिरपेक्षमेव व्यवस्थापनेन विरोधप्रशमनात् सामान्ययज्ञोपवीतस्य पुराणत्व-

---

व्यावर्त्यतामित्यत्राह - **यद्यपीति** । अत्यन्तबाधस्तावत् वचनस्य न युक्तः । तत्र अग्नीषोमीयात् हिंसानिषेधस्य व्यावृत्तौ निषेधस्याग्नीषोमीय-हिंसाव्यतिरिक्तविषयकतया संकोचमात्रं, नात्यन्तबाध : । निषेधस्य सामान्यत्वात् । इह पुनः उभयोरेकविषयकत्वात् त्यागनिषेधस्य त्यागविषयात् व्यावृत्तौ विषयान्तराभावात् अत्यन्तबाधात्मा पराभव एव स्यात् । स चायुक्त इति भावः । त्यागविशेषविधिमभ्युपगम्येदमुक्तम्, वस्तुतः स एव नास्तीत्याह - **दृष्टश्चेति** । पुरातनयज्ञोपवीतत्यागः त्यागविधिविषयः । **न्यायनिरपेक्षमिति** । अनेन ''नखानि निकृत्त्य यज्ञोपवीतं च विसृजेत्'' इत्यत्रापि नखसाहचर्यात् पुरातनयज्ञोपवीतप्रतीतेः न्यायपरामर्शे पुराणयज्ञोपवीतविषयकत्वमेव गम्यत इति सूचितम् । उक्तश्रुतिबलादपि संकोच इत्याह - **सामान्ययज्ञोपवीतस्येति** ।अनेन सामान्यशास्त्रस्य विशेषे पर्यवसानरूपः सामान्यविशेषन्याय

विशेषिते पर्यवसातुमुचितत्वात् सामान्यनिषेधस्य नूतनविशेषविधिना स्पर्धितुमशक्तेः; 'न हिंस्यात्' इत्यादिवत्। न च, विसृजेदित्यस्य न गृह्णीयादित्यर्थः; येन नूतनग्रहणपरतया विषयव्यवस्था दुःस्थिता स्यात्। नच तद्युक्तम्, उपचारप्रसङ्गात्। यद्यपि गृहीतागृहीतविषयं विसर्जनं कथंचित् पश्यसि, तथाऽपि पूर्वधृतविषयत्वमेव स्वारसिकम्। नवान् प्रगृह्येत्यस्यानादरे च दण्डादेरसंग्रहसिद्धिः। अन्यथा पूर्वोदा

उक्त:। यज्ञोपवीतं विसृजेत् इति सामान्यशास्त्रस्य पुराणत्वविशिष्टयज्ञोपवीतत्यागरूपे विशेषे पर्यवसानमिति यावत्। अथ उत्सर्गापवादन्यायमप्याह-**सामान्यनिषेधस्येति**। यज्ञोपवीतसामान्यनिषेधस्य विहितनूतनयज्ञोपवीतव्यतिरिक्तयज्ञोपवीतविषयकन्वमिति भाव:।

ननु "यज्ञोपवीतं विसृजेत्" इत्यस्य यज्ञोपवीतं न गृह्णीयादित्यर्थ:। पुराणस्य च यज्ञोपवीतस्य पूर्वमेव गृहीतस्य ग्रहणनिषेधो न शस्क्य इति नूतनयज्ञोपवीतविषयको निषेध:। तथा च नूतनविषयकत्वात् ग्रहणनिषेधयो: विकल्प इत्याशङ्क्याह-**न चेति**। अस्तु स एवार्थ इत्यत्राह-**न च तदिति**।**उपचारेति**। विसृजते: प्राग्गृहीतहानमेवार्थ:, न त्वग्रहणम्। एवं च सामान्यविशेषन्यायादिकमपि हानाग्रहणसाधारण्यमभ्युपेत्योक्तमिति भाव:।

ननु "योगिन: कर्म कुर्वन्ति सङ्गं त्यक्त्वात्मशुध्दये" इत्यादौ कर्तृत्वाभिमानसंपादनपूर्वकं तत्त्यागो विधीयत इत्याशङ्क्याह-**यद्यपीत्यादिना**। यद्यपीत्यनेन हानाग्रहणयो: शक्तिद्वयकल्पनागौरवात् अनुगतप्रवृत्तिनिमित्ताभावाच्च हानमेवार्थ:, अभ्युपगम्य तूच्यत इति सूचयति। ननु "नखानि निकृत्य पुराणवस्त्रयज्ञोपवीतकमण्डलून् त्यक्त्वा नवान् प्रगृह्याश्रमं प्रविशेत्" इत्यत्र आश्रमप्रवेशोद्देशेन न पुराणवस्त्रादित्यागस्य नवग्रहणस्य चाङ्गतया विधि: संभवति, नखानि निकृत्येत्यनुवाद इति संभवति। नवग्रहणेन पुराणत्यागस्यार्थसिद्धत्वाभावात्। पुराणत्यागविधौ तु नवान् प्रगृह्येत्यनुवाद:। काषायवस्त्रादिधारणस्य वचनान्तरसिद्धत्वेन नवत्वस्य तत्रार्थप्राप्ते:। एवं च येषां ग्रहणमन्यत: सिद्धम्, तेषु नवत्वस्यायमनुवाद इति नानेनोपवीतधारणसिद्धिरित्यत्राह-**नवानिति**। "नवान् प्रगृह्य" इत्यस्यानादरे वस्त्रादेरप्यसंग्रह: स्यात्। न च पूर्वोदाहृतशाट्यायनश्रुत्या वासस:

हृतविशेषश्रुतिविरोधश्च । अत एव, 'बहिस्सूत्रं त्यजेद् बुध' इत्येतदपि पुराणब्रह्मसूत्रत्यागविषयं मन्तव्यम् । ननु, 'ब्रह्मचर्यादेव प्रव्रजेत् गृहाद्वा वनाद्वा' इति ब्रह्मचारिणोऽपि पारिव्राज्यं विधीयते; न च तस्य द्वितीयं ब्रह्मसूत्रमस्ति; ततश्च कथं तद्विषये, 'बहिः सूत्रं त्यजेत्' इति वचनं योजनीयमिति चेत्; कथं वा छन्दोगब्रह्मचारिणां परिव्रज्यायाम्, 'सशिखं वपनं कृत्वा' इति शिखावपनं योजयिष्यसि ? संभवद्विषयं शिखावपनमिति चेत्–तर्हि संभवद्विषयोऽयं बहिस्सूत्रत्यागविधिरपीति किं न पश्यसि ?

किंच, प्रमाणान्तरविरोधपरिहारार्थं बहिस्सूत्रमित्यर्थान्तरं वर्णयन्ति– 'बहिस्सूत्रमित्यव्ययीभावः । तेन सूत्राद्बहिर्भूतं समस्तमपि परित्यजेदित्यर्थः । सन्न्यस्यतो ब्रह्मसूत्रातिरिक्तं सर्वमपि परित्याज्यमित्यनेन सन्न्यासानुगुणं ससस्तनैरपेक्ष्यमुच्यते; तेन न ब्रह्मसूत्रपरित्यागसिद्धिः । 'सशिखं वपनं कृत्वा' इत्यपि, 'सविष्टरमन्नं भुञ्जीत' इत्यादिवत् कर्तव्यसाहित्येनान्वयः । तेन शिखासहित एव शेषवपनं कुर्यादित्यर्थः । न पुनः, 'सघृतमन्नं भुञ्जीत' इत्यादिवत्; बहुप्रमाणविरोधात् । ननु, 'यदक्षरं परं ब्रह्म तत् सूत्रमिति कल्पयेत् । यमिनो ज्ञानशिखिनः शिखायज्ञोपवीतिनः ॥' इत्यादिवचनबलात् सामान्यतः पुराणनूतनसमस्तप्रतिषेध एवाभिप्रेत इति गम्यत इति चेत्–मैवम्; अन्यपरत्वादस्य वाक्यस्य । तथा हि–इदं वाक्यं विद्वद्विषयं वा, विविदिषुविषयं वा, परमहंसविषयं वा ? पूर्वत्र विद्यास्तुत्यर्थता

सिद्धिः, तस्या : यावदायुषं बिभृयादिति विधेयान्तरयोगात् । सिद्धावपि उपवीतमपि तेनैव सिध्यति । एवं च नखानि निकृत्येति पुराणत्यागनूतनग्रहणविशिष्टाश्रमविधिरिति भावः । ''नवान् प्रगृह्य'' इत्यस्यानादरे ''त्रिदण्डमुपवीतम्'' इति श्रुत्या ''यावदायुषम्'' इति धारणविधेः अप्राप्ते यज्ञोपवीतादिधारणे असंभवाद्विरोध इत्याह - **अन्यथेति** । शिखाया अपि ब्रह्मसूत्रातिरिक्तायाः त्यागः स्यात्, अत आह - **संन्यस्यत इति** ।

पूर्वत्रेति । नात्र शिखाकार्यं ज्ञानेनैवेत्युच्यते, बर्हिःकार्यं शरैरेवेतिवत् । किं तु

युक्ता। तथाच, 'कुर्वन्नेवेह कर्माणि जिजीविषेच्छतँ समाः... न कर्म लिप्यते नरे' इति वाक्यमधिकृत्य सूत्रितं भगवता बादरायणेन, 'स्तुतयेऽनुमतिर्वा' इति। तेन ब्रह्मविदां शिरसि हृदि च यावदायुषं धार्यं शिखायज्ञोपवीतं ज्ञानान्वितमत्यन्तं प्रशस्तमित्यर्थः। द्वितीये तु अवधानविधिपरतैव, 'यदक्षरम्' इत्यादिना व्यक्ता, दृष्टोपकारे संभवति अदृष्टोपकारकल्पनायोगाच्च। अनयोश्च पक्षयोरस्यार्थस्य नाश्रमविशेषाङ्गत्वसिद्धिरपि। तृतीयस्तु स्यादपि, यद्याश्रमकर्मोक्तिः स्यात्। न च तत्र तत् पश्यामः। सत्यप्याश्रमप्रसङ्गे गृहस्थावस्थागतद्वितीयसूत्रत्यागमुपदिश्य विहितत्यागजातानुशयं प्रति अर्थवाद इति युक्तम्, अर्थवादलिङ्गभूयस्त्वात्। न ह्यत्र विधिरनुश्रूयते। अन्यथा पूर्वोक्तश्रुत्यादिविरोधस्य दुष्परिहरत्वादिति। भवतु वा एतद्वाक्यमनन्यपरम्; तथापि प्रागुक्तश्रुत्यादिबलात् विकल्प एव स्यात्; न त्वेकान्ततो निषेधः, अन्यथा कुटीचकादीनामपि एकान्ततस्तन्निषेधप्रसङ्गात्। न चैतद्वचनं परमहंसमेवाधिकृत्य प्रवृत्तम्; नियामकाभावात्।

ब्रह्मविदां ज्ञानान्वितत्वात् शिखापि प्रशस्ता, किं पुनः ज्ञानमिति ज्ञानप्रशंसार्थमिदं वाक्यम्; यथा ''कुर्वन्नेवेह कर्माणि जिजीविषेत्'' ''न कर्म लिप्यत'' इति न कर्मविधिः, किं तु विद्यास्तुत्यर्थमनुमतिः इति भावः। **द्वितीये त्वित्यादि**। यदि ब्रह्मस्वरूपातिरिक्तं सूत्रं त्यजेदिति सूत्रत्यागावधिपरत्वं कल्प्यते तदा अदृष्टोपकार्यार्थत्वप्रसङ्गः। यदि तु ब्रह्मस्वरूपातिरिक्तसूत्रशिखादिषु अत्यन्तप्रसक्तो न भवेत् ब्रह्मज्ञानसंपादनेऽवहितो भवेदित्यर्थः स्वीक्रियते तदा दृष्टोपकार्यर्थपरत्वम्। अत एतदेव युक्तमित्यर्थः। दोषान्तरमाह **-अनयोरिति**। विद्वन्मात्रस्य विविदिषुमात्रस्य च त्यागप्रसङ्ग इत्यर्थः। **लिङ्गभूयस्त्वादिति**। शिखादेः ब्रह्मसामानाधिकरण्यज्ञानसामानाधिकरण्यादि लिङ्गम्। **न हीति**। ''ज्ञानशिखा'' इत्यत्र विधिरेव नास्ति। ''यदक्षरम्'' इत्यत्र तत्सत्त्वेऽपि विधेयसमर्पकपदानन्तर्येण तत्समभिव्याहारेण श्रवणं नास्तीत्यर्थः।

ननु यदि परमहंसमेवाधिकृत्य काचिच्छ्रुतिः स्मृतिर्वा ब्रह्मसूत्रपरित्यागमेवान्ततो विदधीत, तदा पूर्वोक्तश्रुतिस्मृत्यादिकं सर्वं यथाकथंचित् कुटीचकादिव्रयान्तर्भूतव्यक्तिविशेषविषयं योजनीयमिति चेत्– अहो महर्षित्वं देवानांप्रियस्य ! यतस्त्वम्, आप्ततमबहुतरस्मृत्येक- कण्ठप्रत्यक्षश्रुतिविरुद्धार्थाम्, क्वचित् कैश्चिदप्यनधीयमानाम्, त्वत्पक्षपातिना विकल्पवादिना विज्ञानेश्वरेणानाघ्राताम्, तत्पक्षं विस्तरेण प्रतिक्षिपद्भिः भास्कराचार्य-यादवप्रकाश-मस्करिप्रभृतिभिरुद्धृत्यापरिहृतामन्यादृशीं श्रुतिं द्रष्टुमिच्छसि । यदि च साऽपि स्यात्, कथं सर्वस्मर्तॄणां ब्रह्मसूत्रधारणविधानैककण्ठ्यम् ? यच्च त्यागार्थं व्यासादिवचनमिति कैश्चित् पठ्यते, तदपि तत्तत्कोशेषु न पश्यामः; न चोदाहरन्ति पूर्वे निरूपकाः । न च प्रत्यक्षश्रुतिविरोधे वैदिकपरिगृहीतबहुस्मृतिमात्रस्य जीवितमस्ति । लब्धजीवितत्वेऽपि आन्यपर्यमलेपकमतभङ्गे प्रपञ्चयिष्यते । अतः तद्वचनकारिषु व्यासादिसमाख्यां सङ्केतेन प्रक्षिप्य धर्मसूनुरिव सत्यवादी भव । एतेन पञ्चरात्रादिमूलः परमहंसस्य ब्रह्मसूत्रपरित्याग इति निरस्तम्; प्रमाणभूतेषु तेषु तथाविधवचनादेरसंभवात् । संभवे चान्यपरत्वस्य ग्रहीतुं युक्तत्वात् । परब्रह्मभूतभगवत्प्रीणनतत्तदर्थविशेषप्रपञ्चने हि पञ्चरात्रस्यैदम्पर्यम्; न सदाचारेषु । तत्र तु औदासीन्यमेव तस्येति न श्रुत्यादिविरोधे तत्र प्रगल्भतेति मध्यस्थदृष्ट्या पश्यामः । न च पञ्चरात्रमूलत्वेन भागवतपरिगृहीते नैरुक्तेऽपि वेदभागे परिव्राजकप्रकरणे भवदभिमतं यज्ञोपवीतादिप्रहाणं दृश्यते । न च शाण्डिल्यः सूत्रयति । न च सात्त्वतादिषु सुरक्षितकोशासु संहितासु तथाविधवचनप्रसङ्गः । अतो युष्मत्कूटस्थपक्षपातिनां प्रक्षेपस्तथा स्याद्वा न वेति समीचीनदृष्ट्या भावय । अतः परमहंसेष्वपि द्विजसामान्यतः परिव्राजकसामान्यतस्तदवान्तरविशेषतश्च प्राप्तं ब्रह्मसूत्रं न विशेषतो बाधमर्हतीति सिद्धम् ।

एतावता “अन्यपरत्वादस्य वाक्यस्य” इति पूर्वोक्तमुपपादितम् । अथ अनन्यपरत्वं तस्याभ्युपेत्याह – भवतु वेति ।

नापि तृतीयः; विषयव्यवस्थापनयोग्यानां वाक्यानां विरोधाभावादेवाष्टदोषदुष्टविकल्पपर्यवसानायोगात्। अन्यपरतया निश्चितानां तु दुर्बलत्वादेव। विरोधे बलसाम्ये च सति हि गत्यन्तराभावाद्विकल्पः स्वीक्रियते। न च गुरुलघुनोर्विकल्पः संभवति; गुरुविधायकस्य शास्त्रस्याननुष्ठानलक्षणाप्रामाण्यप्रसङ्गात्। न हि लघौ सति गुरौ कश्चिदपि प्रवर्तते। मुख्यामुख्यतया तु विभागः संभवेदपि, यदि अनन्यथासिद्धो लघुविधिः सिध्येत्। न च तदस्तीत्युक्तम्। न चामुख्यं(ख्ये ?) भवद्विशेषमङ्गीकरोषि। न च मुख्यकल्पशक्तानाममुख्यकल्पस्वीकारो युक्तः। न च तेषां प्रत्यगात्मप्राबण्येन बाह्येष्वौदासीन्यादमुख्यकल्पपरिग्रह इति युक्तम्;

विकल्पवादिनेति। यदि परमहंसस्य उपवीतादिबाधिका काचित् श्रुतिः दृश्येत तदा बाध एवाभिधीयेत न विकल्प इति भावः। **धर्मसूनुरिवेति।** कुञ्जरे अश्वत्थामसमाख्यां प्रक्षिप्य ''अश्वत्थामा हतः'' इति वाक्यं सत्यं कृतवान् युधिष्ठिर इवेत्यर्थः।

वैकल्पिकतया परित्यागेऽपि प्रत्यवायविरहादिति तृतीयकल्पं निराकरोति -- **नापि तृतीय** इत्यादिना। **विषयव्यवस्थापनेति।** पुराणद्वितीयविषयकतया "**नखानि निकृत्य** यज्ञोपवीतं विसृजेत्'' ''बहिः सूत्रं त्यजेत् बुधः'' इत्यादीनां व्यवस्था संभवतीति भावः। **अन्यपरतयेति।** ''ज्ञानशिखिनः'' इत्यादीनां वाक्यानामित्यर्थः। **दुर्बलत्वादेवेति।** विकल्पायोगादित्यनुषङ्गः। **न च गुरुलघुनोरिति।** यज्ञोपवीतधारणं गुरु, यज्ञोपवीतत्यागः लघुः। अनयोः विकल्पो न संभवति। लघौ उपाये सति गुरौ उपाये कस्यापि प्रवृत्त्यसंभवात् गुरूपायविधायकशास्त्रस्याननुष्ठानलक्षणमप्रामाण्यं स्यादिति भावः। गुरुः मुख्यः लघुः अमुख्यः इति विभागस्तु संभवेदपि। परं तु भवद्भिः यज्ञोपवीतादित्यागात्मकः लघुः अमुख्यत्वेन न स्वीक्रियत इत्याह – **मुरव्यामुरव्यतयेति। भवद्विशेषमिति।** भवदङ्गीकृतं सूत्रादित्यागात्मकं विशेषं अमुख्यत्वेन भवान्नाङ्गीकरोतीत्यर्थः। किं च यो मुख्येऽशक्तः तस्यैव अमुख्ये अधिकारः। यस्तु मुख्यकल्पे शक्तः तस्यामुख्यकल्पाधिकारो न वक्तुं शक्यः।

''प्रभुत्वे सति मुरव्यस्य योऽनुकल्पेन वर्तते। न सांपरायिकं तस्य फलं भवति दुर्मते'' इति निषेधादित्याह - **न च मुरव्येति।** ननु प्रत्यगात्मनि प्रावण्यातिशयात् बाह्येषु यज्ञोपवीतधारणादिकर्मस्वौदासीन्यात् तत्त्यागरूपामुरव्यकल्पपरिग्रह इत्याशङ्क्याह- **न च तेषामिति।**परमहंसानामित्यर्थः।

शक्तस्यौदासीन्ये प्रत्यवायात्। न च वः कांचिदशक्तिं भास्करीयादयः सूक्ष्मनिरूपणेऽपि पश्यन्ति। यथाऽऽहुः–'कन्थां वहसि दुर्बुद्धे गर्दभेनापि (भैरपि) दुर्भराम्। शिखायज्ञोपवीताभ्यां कस्ते भारः प्रसज्यते(भारो भविष्यति) ॥ सन्ध्यावन्दनवेलायां मुक्तोऽहमिति मन्यसे। खण्डलड्डुकवेलायां दण्डमादाय धावसि ॥' इति। यत्तु न्यायविदाऽपि विज्ञानेश्वरेणाऽप्युक्तम्–''यज्ञोपवीतधारणं वैकल्पिकम्, 'यज्ञोपवीतं विसृजेत्' इति श्रुतेः'' इति; तदपि विकल्पासंभवस्योक्तत्वात् स्वपक्षसंरक्षणाभिनिवेशकारितमित्यनादरणीयम्।

नापि चतुर्थः; ब्रह्मविदामप्यत्यन्तकर्मनिवृत्तेर्दूषितत्वात्; युष्माभिरपि प्रणवजपाचमनादिकर्मणामद्यापि क्रियमाणत्वात्। 'तस्माद्यज्ञोपवीत्येवाधीयीत' इत्यादेर्दुर्लङ्घत्वात्। अर्थप्राप्तभोजनादिकर्मणां च अयज्ञोपवीतिनाऽनुष्ठाने प्रायश्चितविधानात्।

नापि पञ्चमः; श्रुत्यादिविरुद्धस्याचारमात्रस्यानुपादेयत्वात्। पञ्चशिखदुर्वासः प्रभृतिपरिगृहीतपरिव्राजकस्तोमेषु ब्रह्मसूत्रपरित्यागस्य पुराणेष्वदर्शनात्।

अङ्गिनिवृत्तेरेवार्थात्तदङ्गस्यापि निवृत्तेरिति चतुर्थकल्पं दूषयति–**नापि चतुर्थ** इत्यादिना। ''नाविरतो दुश्चरितात्'' '' क्रियावानेष ब्रह्मविदां वरिष्ठः'' इत्यादिना कर्मनिवृत्तेः दूषितत्वात्, युष्माभिरपि प्रणवजप-आचमनादिकर्मणामद्यापि क्रियमाणत्वात् ''तस्माद्यज्ञोपवीत्येवाधीयीत'' इत्यादिशास्त्रस्योल्लङ्घनायोगात् भवद्भिः कियमाणानां भोजनादिकर्मणां यज्ञोपवीतरहितेनानुष्ठाने प्रत्यवायश्रवणाच्च अङ्गिनिवृन्तिर्नास्तीत्यर्थः।

पूर्वानुष्ठानाभावादिति पञ्चमकल्पं दूषयति–**नापि पञ्चम** इति। पूर्वेत्यनेन किं भवदीयाचार्या गृह्यन्ते उत पुराणप्रसिद्धाः परिव्राजकाः। नाद्यः, श्रुतिस्मृत्यादि-विरुद्धस्याचारस्यानुपादेयत्वात्। पुराणप्रसिद्धेषु परिव्राजकेषु ब्रह्मसूत्रपरित्यागस्य पुराणेषु अदर्शनात्। विराटनगरे परिव्राजकवेषधारिधनञ्जयादिषु यज्ञोपरीतत्यागादेः अश्रबणाच्च भवत्सयूथ्यैः भास्कराचार्ययादवप्रकाशादिभिः यज्ञोपवीतत्यागरूपरंपरायाः विघटितत्वात्

परिब्राजकानुकारिधनञ्जयादिषु ब्रह्मसूत्रपरित्यागाश्रवणात् । भवदीयसयूथ्यभास्कराचार्ययादवप्रकाशभगवन्नाथमुनि पारम्पर्यविघटितत्वात् भवत्पक्षप्रवेशितविसंवादैक्याच्चानुविधेयाचारत्वासंभवादिति । अतः सिद्धं परमहंसैरपि यज्ञोपवीतमवश्यं धार्यमिति ।

एवमुपवीतोक्तन्यायेन परिव्रजकसामान्यतः प्राप्तेः, तथा परमहंसमेवाधिकृत्य त्रिदण्डविधानात्, चतुर्णामपि लिङ्गभेदनिषेधाच्च तस्यैकदण्डधारणे नियमोऽपि निरस्तः । अथ स्यात्–'न चात ऊर्ध्वं शुक्लमम्बरं बिभृयात् एकदण्डी त्रिदण्डी वा' इति बोधायनादि-वचनात् त्रिदण्डैकदण्डधारणयोर्विकल्प इति ॥ भवत्वेवम्, तथाऽपि परमहंसस्य एकदण्डधारणमेव, इतरेषां त्रिदण्डधारणमेवेति नास्ति नियमः, अविशेषेण तेषां प्रसक्तेः ॥ भवत्वेवं का नो हानिरिति चेत्–नियमाभिमानहानिः। गुरुलधुनोस्तुल्यविकल्पानुपपतिं चात्र यादवप्रकाशादयः प्राहुः । अतो मुख्या-

---

भवत्पक्षप्रवेशितैः सह विसंवादस्य समानत्वाच्च भवदीयाचारस्य अनुसरणीयत्वासंभवाच्चेत्यर्थः । अत्र भास्कराचार्यादिभिःसह कूटस्थतया नाथमुनेर्निर्देशमात्रेण तस्य यतित्वं दुस्साधम् । नाथमुनिविघटितत्त्वं तच्छिष्यपरंपरायां यतिभिः सूत्रादिधारणात् सिद्धम् । **लिङ्गभेदेति।** त्रिदण्डसूत्रादिलिङ्गभेदस्य निषेधादित्यर्थः ।

अथ स्यादित्यादि । बोधायनादिवचनात् परमहंसस्य त्रिदण्डधारणं वा एकदण्डधारणं वेति विकल्प इति प्रतीताबपि परमहंसस्य एकदण्डधारणमेव कुटीचकादीनां त्रिदण्डधारणमेवेति व्यवस्थितविकल्पो न ततोऽवगम्यते।परमहंसादिविशेषस्य तत्रानुपादानात् सामान्यतः चतुर्णामपि विकल्पस्य प्रसक्तेः । भवत्वेवम्, का नो हानिः इति चेत् परमहंसस्य एकदण्डः अन्येषां त्रिदण्डः इति नियमस्य हानिः । गुरुलघुनोः त्रिदण्डैकदण्डधारणयोः तुल्यविकल्पो न भवतीति यादवप्रकाशादयः प्राहुः । अतः त्रिदण्डधारणममुरव्यमिति एवंरूप एव विकल्पः भवितुमर्हति । भगवान् व्यासोऽपि स्पष्टयति "त्रिदण्डधारणं शस्तम्" इति । किं च बोधायनादिभिः"एकदण्डी त्रिदण्डी वा" इति सामान्येन विकल्पितस्य एकदण्डधारणस्य

मुख्यतयैवायं विकल्पः स्यात् । तदेतत् भगवान् व्यासः स्पष्टयति, 'त्रिदण्डधारणं शस्तम्' इति । बोधायनादिसामान्यवचनविकल्पितैकदण्डधारणस्य त्रिदण्डालाभरूपापद्विषयता हारीतमेधातिथिभ्यां (च ?) व्यवस्थापिता । 'त्रिदण्डं वैणवं सौम्यं सत्वचं समपर्वकम् । वेष्टितं कृष्णगोवालरज्ज्वा तु चतुरङ्गुलम् ॥ नष्टे जलपवित्रे च त्रिदण्डे वा प्रमादतः । एकं तु वैणवं दण्डं पालाशं बैल्वमेव वा ॥ गृहीत्वा विचरेत् तावत् यावल्लभ्यं त्रिदण्डकम् । यत्नेनान्वेषयेन्नित्यम् अप्रमत्तः समाहितः ॥' इति हारीतः । मेधातिथिस्तु, 'यावन्न स्युस्त्रयो दण्डाः तावदेकेन पर्यटेत्' इति । न चैतत्प्रकान्तत्रिदण्डधारणपुरुषविशेषविषयमिति नियन्तुं शक्यम्, 'एकदण्डी त्रिदण्डी वा' इत्यस्याद्यापि तुल्यत्वनिश्चयाभावात् । यद्यपि च प्रथममेव कस्यचित् त्रिदण्डालाभादेकदण्डग्रहणं संभवति, तथाऽपि न तत्र प्रक्रमपरिनियतिरङ्गीकर्तुं शक्या, अमुख्यत्वात् । 'यावन्न स्युस्त्रयो दष्डास्तावदेकेन पर्यटेत्' इत्यस्य चाविशेषेण प्रक्रमेऽपि प्रवृत्तेः ।

किंच, प्रत्यक्षश्रुतिसिद्धं त्रिदण्डधारणम्; स्मार्तस्तु विकल्पः । पूर्वं तु श्रुतिस्मृत्युभयसिद्धम्; उतरत्र तु स्मृतिरेव । 'यद्वै किंच मनुरवदत् तद्भेषजम्', 'मन्वर्थविपरीता तु या स्मृतिस्सा न शस्यते' इत्यादिश्रुतिस्मृतिभिराप्ततमत्वेन

आपद्विषयकत्वं हारीतेन मेधातिथिना च व्यवस्थापितम् इति। **चतुरङ्गुलमिति** । चतुरङ्गलं यथा स्यात् तथा वेष्टितमित्यन्वयः ।

ननु ''यावन्न स्युस्त्रयो दण्डाः तावदेकेन पर्यटेत्''इति वचनम् प्रक्रान्तः यः त्रिदण्ड धारकपुरुषः तद्विषयकम् इत्याशङ्क्याह - **नचेति**।**तुल्यत्वेति**।तुल्यबलयोरेव एकस्मिन्नाधिकारिणि विकल्पात् तयो :तुल्यबलत्वनिश्चयाभावात् इत्यर्थः ।

प्रत्यक्षश्रुतिसिद्धमिति। पूर्वोदाहतशाट्यायनकोपनिषत्सिद्धमित्यर्थः । **स्मार्त इति** ''एकदण्डी त्रिदण्डी वा'' इति बोघायनादिवचनसिद्ध इत्यर्थ : । **पूर्वं तु**=त्रिदण्डधारणं तु । उत्तरत्रतु=विकल्पे तु ।

Sanskrit University
Ministry of Education, Govt. of India
Guruvayoor Campus Library
Puranattukara.P.O., Thrissur-686551
Acc.No. 39370
Acc.Date 27/02/2026

परिगृहीतमन्वादिस्मृतिसिद्धं त्रिदण्डधारणम्; विकल्पस्तु यत्किंचित्स्मृतिसिद्धः। भूयस्यः स्मृतयस्त्रिदण्डधारणे पूर्वोपात्ता उपादास्यमानाश्च; विकल्पे तु द्वे तिस्रः सन्ति न वेति न जानीमः। तथा हि दक्षबृहस्पती–'मेखलाजिनदण्डेन ब्रह्मचारीति लक्ष्यते। गृहस्थो यष्टिवेदाद्यैर्नखरोमैर्वनाश्रितः॥ त्रिदण्डेन यतिश्चेति लक्षणानि पृथक् पृथक्॥' इति। शाण्डिल्यः–'दण्डानि त्रीणि संगृह्य धारयेत् विधिपूर्वकम्।' अत्रिः-'लिङ्गं तु वैष्णवं तेषां त्रिदण्डं सपवित्रकम्। त्रिदण्डेन यतिश्चेति लक्षणं वै श्रुतं स्मृतौ॥' दत्तात्रेयः-, 'त्रिदण्डिरूपधृग्विप्रः साक्षान्नारायणः स्मृतः। त्रिदण्डी पूज्यते येन विष्णुस्तेन प्रपूजितः॥ अष्टाक्षरेण मन्त्रेण नित्यं नारायणात्मना। नमस्यो भक्तिभावेन विष्णुरूपी त्रिदण्डधृक्॥ त्रिदण्डं लिङ्गमाश्रित्य जीवन्ति बहवो द्विजाः। यो हि ब्रह्म न जानाति त्रिदण्डार्हो न स स्मृतः॥ अत्रिदत्तात्रेयौ-, 'काणादशाक्यपाषण्डैस्त्रयीधर्मो विलोपितः। त्रिदण्डधारिणा पूर्वं विष्णुना रक्षिता त्रयी॥' हारीतः-, 'विष्णुरूपं त्रिदण्डाख्यं सर्वदा धारयेत् यतिः। कुर्यात् त्रिदण्ड ग्रहणं कालक्षेपं न कारयेत्॥' वृद्धदक्षः-, 'केशमात्रान् समग्रन्थीन् त्रिदण्डान् वैणवान् यतिः' इति। धारयेदिति शेषः। इत्थं परश्शताः स्मृतयः। विस्तरभयान्न लिख्यन्ते। अतो (१) गुरुलघुविकल्पानुपपत्तेः, (२) शस्ताशस्तत्वकण्ठोक्तेः, (३) त्रिदण्डालाभदशाविषयत्वप्रतिष्ठापनात्, (४) त्रिदण्डधारणस्य प्रत्यक्ष श्रुतिसिद्धत्वात्, (५) आप्ततमबहुस्मृत्युपबृंहितत्वात्(च ?), त्रिदण्डधारणमेव चतुर्णां परिव्राजकानाम् अविशेषेण मुख्यम्; एकदण्डधारणं तु अमुख्यम्; तच्च आपद्दशायां चतुर्णामपि संभवतीति सिद्धम्।

अनेनैव न्यायेन परमहंसस्य शिखावर्जनमप्यनुपपन्नम्; चतुर्णामपि लिङ्गभेद-

---

विस्तरेण उक्तमर्थं संगृह्णाति - अत इत्यादिना ।शस्ताशस्तत्वेति। प्रशस्तत्वाप्रशस्तत्वेत्यर्थ : । चतुर्णामिति ।कुटीचकबहूदकहंसपरमहंसानामित्यर्थः । लिङ्गभेदेति परमहंसस्य एकदण्डादिकं चिह्नम् इतरेषां त्रिदण्डादिकमिति यो भेदः तन्निषेधस्य

निषेधस्य दर्शितत्वात्, विशेषविधायकासिद्धेः । 'मुण्डः शिखी वा' इत्यादिविकल्पस्यापि त्रिदण्डैकदण्डधारणविकल्पवत् मुख्यामुख्यतयैव निर्वाह्यत्वात् । संभवति हि केषांचित् शिरसि व्याध्यादिवशात् केशानुत्पत्तिः । शौनकलिखितगालवात्रिप्रभृतिभिः शिखाधारणस्यैव स्मरणाच्च । गालवेन तु, 'त्रिस्थानलोमवपनं कृत्वा प्राजापत्यं कृत्वा प्राणायामशतं चरेत्' इति शिखावपने प्रायश्चित्तविधानात् विकल्पवाक्यस्य मुण्डनवाक्यस्य च यथाकथंञ्चिद्योजनीयतया समुच्चयार्थतां शिखाव्यतिरिक्तमुण्डनविषयतां शिखासम्बन्धमात्रविषयतां च यतिलिङ्गसमर्थने परमाचार्याः प्राहुः । शिखावपनमन्तरेण वपनेऽपि मुण्डशब्दस्तत्रैव दर्शितः । यथाह लिखितः–, 'पौर्णमास्यां शिखावर्जं मुण्डयेत शिरो यतिः । अलाभे व्याधिपीडायां राजचोराद्युपद्रवे ॥ वापयेत् पौर्णमास्यादि यावत् स्यात् कृष्णपञ्चमी ।' इति । मेधातिथिः– 'कक्षोपस्थशिखावर्जं मुण्डयेत शिरो यतिः ।' इति एवमन्यैरपि, 'कक्षोपस्थशिखावर्जम् ऋतुसन्धिषु वापयेत् । न त्रैमुण्ड्यमतिक्रामेत् भिक्षुस्संवत्सरे क्वचित् ॥' इत्यादिषु शिखाव्यतिरिक्तांशवपनेऽपि मुण्डशब्दस्य प्रयोगान्मुण्डनवपनशब्दयोः पर्यायवत् अविशेषत्वोपपादनाच्च सामान्यो मुण्डशब्दः शिखाव्यतिरिक्त-

---

दर्शितत्वादित्यर्थः। **विशेषविधायकेति** ।परमहंसस्य शिखावर्जनमिति विशेषविधायकप्रमाणाभावादित्यर्थ :। **त्रिस्थानवपनमिति** ।कक्षोपस्थशिरवावपनमित्यर्थः। **समुच्चयार्थतामित्यादि** पक्षत्रयं विकत्ल्पवाक्यस्येत्यादिभिः त्रिभिः क्रमात् संबध्यते।मुण्डः शिखी वेति वाशब्दश्चार्थः । अंशभेदेन तयोः समुच्चयः । **शिरवेति**।" सशिरवं वपनं कृत्वा" इत्यत्र कर्तव्ये साहित्येन शिरवासंबन्धस्यान्वय इत्यर्थः।

नन्वेवं सति " मुण्डः शिरवी वा" इत्यादिषु मुण्डशब्दानुपपत्तिः। तस्य सर्वकेशाभावविषयत्वात । "मुण्डाः काषायवासिनः"इत्यादौ जिनभिक्षुषु सर्वकेशाभावविषयतया मुण्डशब्दप्रयोगात् इत्यत आह- **शिरवावपनमिति**।"अलाभे" इत्यादिश्लोकोपादानं "पौर्णमास्यां मुण्डयेत, तत्रालाभे आपञ्चमीं मुण्डयेत" इति वक्तव्ये वापयेदिति प्रयोगः अत्र मुण्डनशब्दो वपनशब्दसमानार्थ इति दर्शयितुम् । पर्यायत्वं=समानार्थत्वम् ।

विषय इति स्वारसिकम्, विकल्पाङ्गीकारे त्वमुख्यत्वं दर्शितमस्माभिः वाशब्दश्चार्थ इति परमाचार्या व्याचख्युः। अतः परमहंसैरप्येकमुपवीतमवश्यं धार्यम्, त्रिदण्डशिखे च मुख्यतया परिग्राह्ये इति सिद्धम्। तदेतत्, 'वर्णाश्रमोचित' इत्युचितशब्देन भाष्यकारैरपि सूचितमिति॥

इति शतदूषण्यां यतिलिङ्गभेदभङ्गवादः चतुःषष्टितमः ॥ ६४ ॥

अत्रत्यमुण्डनशब्दो वपनार्थक इत्यर्थः। **स्वारसिक** मिति। वाशब्दस्य विकल्पस्वरसत्वात् '' मुण्ड : शिरवी वा'' इत्यादिषु तदङ्गीकारे मुण्डत्वस्यामुरव्यत्वं दर्शितमित्यर्थः। **सिद्धमिति**।ननु संन्यासिनो विविदिषायां जातायां कर्मणां त्याज्यत्वात् संन्यासाश्रभधर्मभूतत्रिदण्डधारणादिकमपि उपेक्ष्यते। परमहंसश्चेद्दृश इति चेत्एवं तर्हि मुण्डनकाषायैकदण्डधारणादिनियमोऽ पि त्यज्यताम्। तद्विधिवाक्यकिंकरत्वमिष्टमिति चेत् तदन्यसंन्यासिगृहस्थादिविघिवश्यत्वमपि विनिदिषायां जातायामप्यविरुद्धमितीष्यतामिति भावः।

इति श्रीशतदूषणीव्यारव्यायां तात्पर्यप्रकाशिकायां
यतिलिङ्गभेदभङ्गवादः चतुःषष्टितमः॥

* * *

अथ अलेपकमतभङ्गवादः पञ्चषष्टितमः ॥ ६५ ॥

अशेषाश्रमबाह्यानामीश्वराज्ञाभरश्रमात्।
अलेपकदशाभाजामवलेपोऽत्र लुप्यते ॥

इह जगति केचित् अवधूतसकलवर्णाश्रमधर्माश्चार्वाकसधर्माण आचण्डालमेकराशीभूय विधिनिषेधयन्त्रणामतन्त्रयन्तः पारिभाषिकब्रह्मविदो विश्वमाविलयन्ति। तैस्सहवादरूपसंभाषणादिकमपि निरयपातनमिति मन्वानाः तद्दर्शनेऽपि सर्वलोकलोचनमवलोकयन्तो दूरीभवन्ति सन्तः । उक्तं हि महर्षिभिः- ‘पुसां जटाभरणमौण्डचवतां वृथैव मोधाशिनामखिलशौचबहिष्कृतानाम् (निराकृतानाम्) । तोयप्रदान पितृपिण्डविवर्जितानां संभाषणादपि नरा नरकं प्रयान्ति ॥’ इति। तत्र यद्यपि तदभिमतशूद्रादि (वि) जातीयब्रह्मविदां त्रैवर्णिकब्रह्मविदामिव तथाविधपतनं न संभवति, तथाऽपि तत्त्वमस्यादिवाक्यश्रवणोपदेशधर्मोपप्लवादिभिः तेषामप्यसंभाष्यता । स्मर्यते हि-, ‘कपिलाक्षीरपानेन ब्राह्मणीगमनेन च। शूद्रे वेदाक्षरेणैव निष्कृतिर्न विधीयते ॥’ इत्यादि। तथाऽपि धर्मोपप्लवप्रशमनाशया युगमात्रविप्रकृष्टा वदामः । आचार्यवचनादिभिरीदृशमप्यनुमतम्, ‘यत्किञ्चिदपि कुर्वाणो विद्धद्गुरुनियोगतः। तेषां वचनसामर्थ्यात् प्रायश्चित्तीयते न च’’ इति।

अथ अलेपकमतभङ्गवादः पञ्चषष्टितमः ॥

अशेषाश्रमबाह्यानामीश्वराज्ञाभरश्रमात्।
अलेपकदशाभाजामवलेपोऽत्र लुप्यते ॥

श्रुतिस्मृतिरूपेश्वराज्ञाभरप्रयुक्तश्रमात् श्रुतिस्मृत्युक्तसकलाश्रमधर्मत्यागेन ततः बहिर्भूतानाम् अलेपकदशावतां योऽवलेपः गर्वः सोऽत्र वादे निरस्यते । **अवधूतेति** । परित्यक्तेत्यर्थः । **चार्वाकसधर्माणः**=चार्वाकसदृशाः । **विधिनिषेधयन्त्रणाम्**= विधिनिषेधरूपशासनम् । अतन्त्रयन्तः=उपेक्षमाणाः । आविलयन्ति=कलुषीकुर्वन्ति ।

सर्वशिष्टबहिष्कृतेयं युष्मदवस्थितिः आश्रमरूपा, अनाश्रमरूपा वा ? पूर्वत्र चतुर्भ्योऽन्या, अनन्या वा ? न तावदन्या, श्रुतिस्मृतीतिहासपुराणादिषु पञ्चमाश्रमविधानादर्शनात्। 'अथाश्रमं चरमं सम्प्रविश्य' इत्यादिरपि पारिव्राज्यविषयः प्रसिद्धः। अन्तिममात्रं हि चरमशब्दार्थः, न पुनः प्रसिद्धव्यतिरिक्तः ॥ षोडशविधाश्रमप्रतिपादनं तर्हि कथमिति चेन्न; चतुर्णामेव चतुर्धा विभागेन तथा विधानात् ॥ नाप्यनन्या; प्रथमं तावत् अनभ्युपगमात्, श्रुतिकिङ्करत्वप्रसङ्गाच्च। श्रुत्या ज्ञानविधानेन वयमप्याश्रमविशेषनिष्ठा भवामेति चेत्; श्रोत्रियाणां पुरतो मन्दं प्रभाषेथाः, न ह्यकृतप्रायश्चित्तानां भवतामाश्रमप्रवेशमनुमन्यन्ते धार्मिकाः । न च युष्माभिरनेककालानुवृत्तदुर्वचस्वैरोचितप्रायश्चितं कर्तुं शक्यम् । स्वैररूपमेव किञ्चिदाश्रमविशेषनियतमिदमस्माकं महद्व्रतमिति चेन्न; तथाविधविध्यदर्शनात्। किञ्चास्मिन् महति सर्वलोकस्वरससिद्धे व्रते सति किमर्थमपुरुषार्थैरनन्तैर्नियमैः परिक्लेशयन्त्यागमाः । कश्चायमाश्रमो भवता वाङ्मात्रेणापि स्वीक्रियते ॥ परमहंसाभिधानः पारिव्रज्यविशेष इति चेन्न; परमहंसादिविशेषमपि विविच्य प्रतिपादयन्तीषु शाटचायनकाद्युपनिषत्सु पाराशर्यदत्तात्रेयादिस्मृतिषु भवत्परिगृहीतवेषाचारविपरीतोपदेशात् । अत एव मन्वादिषु त्रिविष्टब्धपात्रपवित्रकमण्डलुशिखायज्ञोपवीतदण्डानां सामान्येन विधानं न व्यवस्थितविषयमिति वक्तुं शक्यम् । ततश्च परित्यक्तयज्ञोपवीतादिकेष्वेकदण्डिष्वप्यद्यापि आयुष्मती विप्रतिपतिर्भास्करयादवप्रकाशादिग्रन्थरसायनसेवया निवर्तते। किं पुनर्विशेषतोऽपि वेदबाह्यसाम्यमङ्गीकुर्वत्सु भवादृशेषु ? त्रिदण्डैकदण्डादिष्वपि च मुख्यामुख्यतया विकल्प इत्यपि स्मृतिभिरेव सिद्धमिति प्रागेवोक्तम्।

निरयपातनम्=नरकपातहेतुः । सर्वलोकलोचनम् =सर्वजगच्चक्षुर्भूतं सूर्यम् । प्रथमं तावदनभ्युपगमादिति। सर्वशिष्टबहिष्कृतायाः युष्मदवस्थितेःचतुर्विधाश्रमानन्यत्वं न संभवति इत्यत्र अनभ्युपगमादिति प्रथमो हेतुरित्यर्थः । श्रुतिकिंकरत्वप्रसङ्गः द्वितीयो हेतुः । अनेककालेति । अनेककालात् अनुवृत्तं दुर्वचं च यत् स्वैरं यथेष्टाचरणं तदुचितं

ननु द्विविधाः परमहंसाः, विवृतवेषाचाराः गूढवेषाचाराश्चेति; तत्र जाबालिकौषीतकादिश्रुतिषु तन्मूलबोधायनशौनकक्रतुकापिलविश्वामित्रादिस्मृतिषु महाभारते ब्राह्मादिषु च पुराणेषु परमहंसस्य दण्डादिविधानात् विवृतवेषाचारास्सिद्धाः, वाजसनेयतैतिरीयकाथर्वणबाष्कलादिश्रुतिषु तन्मूलभगवद्गीतादिस्मृस्तीतिहासभागवतादिपुराणादिषु च सर्वत्यागमात्रविधानात् गूढवेषाचारास्सिद्धा इति चेन्न; त्यागोक्त्यादीनां फलसङ्गकर्तृत्वादित्यागविषयत्वस्य वक्ष्यमाणत्वात्।

ननु मैत्रायणीयब्राह्मणे तन्मूललो(लौ ?) काक्षि (लौगाक्षि ?) गृह्ये च परमहंसस्य दण्डग्रहणाग्रहणयोर्विकल्पो दृश्यते, तथाहि, ''परिव्राडेकशाटीपरिहितो मुण्डोदरपाती अरण्यनित्यो भिक्षार्थी ग्रामं प्रविशेदासायं प्रदक्षिणेन अविचिकित्सं सार्ववर्णिकं भैक्षाचरणमभिशस्तपतितवर्जम्। अयज्ञोपवीती शौचनिष्ठः काममेकं वैणवं दण्डभाधीत (दधीत ?)'' इति मैत्रायणीयब्राह्मणम्। अत्र कामशब्दात् दण्डग्रहणे विकल्पो दर्शितः; लोकाक्षिगृह्ये च, 'अथातः परमहंसपरिव्रज्याविधिं व्याख्यास्यामः' इत्युपक्रम्य, 'सशिखान् केशान् निकृत्य विसृज्य यज्ञोपवीतम्' इत्याद्युक्त्वा, पुनरप्याह–'मौनीं जातरूपधरः प्राचीमुदीचीं वा दिशं व्रजेत् तिष्ठ भगवन् दण्डं गृहाणेत्यध्वर्युणा दत्तं मस्तकप्रमाणं सत्वचमृजुं सौम्यमेकं वैणवं दण्डम्', 'इन्द्रस्य वज्रोऽसि', 'सखा मे गोपायेति यदीच्छेदादधीत' इति; अत्रापि यद्युपबन्धेनेच्छाश्रवणात् विकल्पसिद्धिः। तथा वैखानससूत्रे चतुर्विधचतुराश्रमवर्णनावसरे, 'परमहंसा नाम वृक्षैकमूले शून्यागारे श्मशाने वा आसीना वा साम्बरा दिगम्बरा वा न तेषां धर्माधर्मौ सत्यानृते शुद्ध्यशुद्ध्यादि द्वैतं सर्वसमाः सर्वात्मानः समलोष्ठाश्मकाञ्चनाः। सर्ववर्णेषु भैक्षाचरणम्' इत्यादि अत्र, 'साम्बरा दिगम्बरा वा' इति विकल्पो विवृतगूढाचारभेदाभिप्रायेण। परमहंसोपनिषदि तु काष्ठदण्डनिन्दनेन परमहंसानां ज्ञानदण्डत्वं विधीयते।

प्रयाश्चित्तमित्यर्थः। जातरूपधरः=जातमात्रस्य यद्रूपं तद्रूपधरः। शिखाधारिण इति।

तस्माद्दण्डधारणं न मुख्यम्।। तर्हि को मुख्य इति चेत्; अयं मुख्यः, 'न दण्डं न शिखां न यज्ञोपवीतं नाच्छादनं चरति परमहंसः।' 'ज्ञानदण्डो धृतो येन एकदण्डी स उच्यते।। काष्ठदण्डो धृतो येन सर्वाशी ज्ञानवर्जितः। स याति नरकान् घोरान् महारौरवसंज्ञकान्।।' इत्यादि। आह च विष्णुः-, 'अन्नार्थं लिङ्गमुद्दिष्टं न मोक्षार्थं विधीयते 'इति। मोक्षधर्मे च' 'यतेः सत्यपि लिङ्गेऽस्मिन् ज्ञानमेव हि कारणम्। निर्मोक्षायेह दुःखस्य लिङ्गग्रामो निरर्थकः।। काषायधारणं मौण्ड्यं त्रिविष्टब्धं कमण्डलुः। लिङ्गान्यन्नार्थमेतानि न मोक्षायेति मे मतिः।।' अन्यत्र च–'लिङ्गाभावात्तु कैवल्यमिति ब्रह्मानुशासनम्।' एवमन्यान्यपि लिङ्गनिन्दापराणि वाक्यानि द्रष्टव्यानि। 'अव्यक्तलिङ्गोऽव्यक्ताचारः' इत्यादीन्यपि लिङ्गपरित्यागाभिप्रायाण्येव। तदेवमस्ति परमहंसद्वैविध्यमिति।

तदिदमपेशलम्, गन्धर्वभाषितप्रायैराप्तत्वेऽप्यनिदम्परैः वाक्यैः परमहंसस्य न त्वदिष्टभिदासिद्धिः। इह तावत् त्वत्पक्षपातिविज्ञानेश्वराद्यनुदाहृतत्वात्, त्वत्पक्षप्रतिक्षेपकैर्यादवाचार्यभास्करप्रभृतिभिर्बहुश्रुतीरुपन्यस्य दूषितत्वाभावाच्च सन्दिग्धश्रुतित्वादिषु केषुचित् वचनेषु अप्रत्ययादेव परिहारः। अन्येषु त्वन्यपरतयेति संग्रहः। तत्र यदुक्तं मैत्रायणीयब्राह्मणे तन्मूललोकाक्षिगृह्ये च परमहंसस्य दण्डग्रहणाग्रहणयोर्विकल्पो दृश्यत इति–तदसत्; तत्रापि स्मृत्यन्तरादिसम्प्रतिपन्नस्यैकदण्डत्रिदण्डविकल्पस्यैव विवक्षितत्वात्। काममेकं वैणवं दण्डमाददीत यद्वा त्रिदण्डमिति हि तत्राभिप्रायः। एवं, 'यदीच्छेदाददीत' इत्यत्रापि, यद्येकं दण्डं ग्रहीतुमिच्छेत् तदैकम्, अन्यथा त्रिदण्डमिति। अन्यथा कथं जातरूपधरस्यैव दण्डग्रहणाग्रहणविकल्पः।। विद्वदविद्वद्विषयसन्न्यासभेदसिद्धावविद्वद्विषयं दण्डग्रहणं विद्वद्विषयं तदग्रहणमिति चेत्; किमिदं कर्णे स्पृष्टः कटिं चालयसि? जातरूपधरस्य कथं तद्ग्रहणमित्येतदेव ह्यनुयोगास्पदम्। न हि वैणवं दण्डं धारयन् कश्चिज्जायते, न च दिगम्बरो विकीर्णमूर्धज एकदण्डधारी

कश्चिद्भवतामपीष्टो दृष्टो वा ।। दण्डग्रहणकाले, काषायमपि गृह्णीयादिति चेत्– किमत्र प्रमाणम् ? । स्मृत्यन्तरादिकमिति चेत्, तर्हि तदनुसारादस्मत्प्रदर्शितमेवार्थमङ्गीकुरुष्व । अतस्तत्र सन्न्यसनवेलायां प्रागुदग्गमनावसर एव तथा वेषः, अनन्तरं तु यथालाभं यथेच्छं वा त्रिदण्डैकदण्डयोरन्यतरस्य काषायादेर्ग्रहणमेवाभिमतमिति भावय । यच्चाविद्वद्विषयं दण्डग्रहणमिति, तदपि साहसिकप्रलपितम्; विद्वांसमधिकृत्यैव तद्विधानात् कथं चातिशयितविद्येन भवता– इतिहासपुराणादिपठितकाषायदण्डशिखाधारिणः कपिल-पञ्चशिख- दुर्वासःप्रभृतयो महर्षयः, शङ्करादयश्च भवत्सिद्धान्तप्रतिष्ठापकाः, भगवन्नाथमुनिमिश्रभास्करयादवप्रकाशादयश्चाविद्वांसः इत्युन्नीतम् ? तदेतदवैदिकसिद्धान्तसारस्यमन्तरेण न कस्मै(स्य) चिद्रोचेत ।

यत्तु विखनस्सूत्रे, 'साम्बरा दिगम्बरा वेति विकल्पो विवृतगूढाचारभिप्रायेण' इति, तदपि न; तदसिद्धेरेव तद्विषयत्वासिद्धे । तत्र हि निस्सङ्गत्वप्रतिपादनाय तथातथा व्यपदेशः, यथा, ''वृक्षमूले शून्यागारे श्मशाने वा वासिन'' इत्यत्र न व्यवस्थितविषयो विकल्पः तद्वदत्रापि । 'न तेषां धर्माधर्मौ सत्यानृते शुद्ध्यशुद्ध्यादि द्वैतं सर्वसमा' इत्यत्रापि न ह्यधर्मासत्याद्यनुमतिः क्रियते । तथासति तेषामित्यविशेषेण परामृष्टानां विवृतवेषाणामपि तदनुमतिप्रसङ्गात् । न च तदिच्छसि । अतस्तत्राप्यधर्मासत्यादेः स्वाश्रमाङ्गभूतकतिपयधर्मव्यतिरिक्तधर्मादीनां च स्वरूपतः प्रहाणमुच्यते ।

शिखाधारिण इति विशेषणस्य शंकरादौ बाधात् कपिलादिमहर्षिमात्रेऽन्वयः । भवत्सिद्धान्तप्रतिष्ठापका इति विशेषणस्य शंकरादिमात्रेऽन्वयः । त्रिदण्डिसंन्यासाचारस्थापकत्वमात्रेण नाथमुनिग्रहणम् । अनुष्ठातारः अनुष्ठानस्थापकाश्च कथमविद्वांस इति प्रश्नाशयः । तदसिद्धेरेवेति । विवृताचारः गूढाचार इति विभागस्यासिद्धेरेव विकल्पस्य विवृतगूढाचारविषयकत्वासिद्धेरित्यर्थः । लिङ्गमात्रवतां दण्डादिलिङ्गमात्रवतां

यत्तु परमहंसोपनिषदि काष्ठदण्डनिन्दनेन ज्ञानदण्डविधानमित्युक्तम्, तदपि, ‘न हि निन्दा निन्द्यं निन्दितुं प्रवर्तते, अपि तु निन्दितादितरत्प्रशंसितुम्’ इति न्यायेन ज्ञानदण्डविधानादरादेव । यथा अनुदितहोमनिन्दा उदितहोमप्रशंसार्था तथेहापि। अन्यथा काष्ठदण्डधारिणः कथं महारौरवादिप्राप्त्यभिधानम् ? तथा च सति काष्ठदण्डधारणस्य महापातकत्वप्रसङ्गेन तद्धारिणां दूरपरिहारणीयत्वप्रसङ्गात्। तत्र शिखायज्ञोपवीताच्छादनपरित्यागोक्तिरपि तत एवान्यपरेति सिद्धम् । विवृतवेषादिविषयतया च वक्ष्यमाणप्रकारेण यथासभवं तन्निर्वाहस्सर्वत्र । एवं लिङ्गनिन्दापराण्यपि सर्वाणि स्मृतिवचनानि लिङ्गमात्रवतां तत्तद्धर्मविकलानां निन्दापराणीति तत्रतत्रैव पूर्वापरपरामर्शेन सुव्यक्तम्। ‘अव्यक्तलिङ्गोऽव्यक्ताचारः’ इति वाक्यं तु लिङ्गाचारयोर्गोपनमवमन्तव्यतार्थं विदधातीति प्रतीयते । न ह्यलिङ्गोऽनाचार इत्युच्यते । अतो नास्ति भवदभिमतं परमहंसद्वैविध्यम् । त्रिदण्डैकदण्डादिविकल्पास्तु संभवन्ति।

ननु श्रीभागवते, ‘न्यासे कुटीचकः पूर्वं बहूदो हंसनिष्क्रियौ इति परमहंसस्य निष्क्रियत्वमुक्तमिति चेत्; किमतः ? गूढाचारसिद्धिरिति चेत्; कुटीचकादित्रयेण सह परमहंसावान्तरविशेषस्य निर्देशायोगात्। न हि पृथिव्यादिद्रव्यवर्गपरिगणने घटः पट इत्यपि परिगण्यते। परमहंसमात्रोपादाने तु न त्वदभिमतसिद्धिः। तस्य

संन्यासिधर्मविकलानां निन्दापराणीत्यर्थः । **अव्यक्तलिङ्ग इति** । इदं वचनं लिङ्गाचारयोर्गोपनपरम्। गोपनमप्यवमन्तव्यतार्थम्। न तु लिङ्गाचारत्यागपरम्, तथा सति अलिङ्गोऽनाचार इति श्रूयेत, न तु अव्यक्तलिङ्गोऽव्यक्ताचार इतीति भावः । **परमहंसद्वैविध्यमिति।** विवृतवेषाचाराः गूढवेषाचारा इति परमहंसद्वैविध्यमित्यर्थः । **परमहंसाबान्तरविशेषस्येति** । निष्क्रियः सक्रियश्चेति द्वौ परमहंसौ भवदभिमतौ । तदवान्तरविशेषःनिष्क्रियः तस्य परिव्राजकावान्तरविशेषस्य कुटीचकादिपरिव्राजकैः सह गणनायोगात्। अयोगमेव सोदाहरणमुपपादयति-**न हि पृथिव्यादीति**। **परमहंसमात्रेति।**

निष्क्रियत्वोक्तिस्तु पूर्वपूर्ववत्कर्मप्राचुर्याभावात्; अल्पधने पुरुषे दरिद्रशब्दवत्। न च संर्वे परमहंसाः सर्वक्रियाशून्या इति त्वयापि स्वीकृतम्। विवृतगूढवेषाचार-विभागाभावप्रसङ्गात्।

ननु करतलामलकीकृतसकलनिगमस्मृतीतिहासपुराणार्थैः समस्तन्यायसार्थवाहैः परमहंसपरिव्राजकपरिबृढैर्भगवच्छङ्कराचार्यैरशेषोपनिषत्स्मृतिजलधिसुधायामुपदेशसाहस्रिकायां सर्ववर्णाश्रमधर्मत्यागरूपो गूढाचारधर्मः स्वपक्षतयाऽभीक्ष्णं सयुक्तिकं प्रदर्शित इति चेत्; अहो भबान् महीयोभिराचार्यवर्णनादृष्टैरनिष्टान् विजिगीषते। ये पुनर्यत्प्रतिपादिते निर्विशेषात्माद्वैते प्रपञ्चवञ्चनादौ च प्रमाणसरणिमनुसरन्तो विवदन्ते, ते कथं तत्समर्थितेऽप्यन्यस्मिन्नपार्थे चरितार्थधियो भवेयुः। ये चात्र अशरीरत्वादयो युक्त्याभासा वर्णाश्रम-धर्मत्यागाय वर्णिताः, तेऽपि जीवन्मुक्तिजीवधातेन (३१) विनिहता वेदितव्याः। शरीरतत्प्रयुक्तसुखदुःखाद्यनुषङ्गस्य प्रत्यक्षादिसिद्धत्वेन तन्निषेधस्य तद्बाधितत्वात्। स्वरूपेण वर्णाश्रमरहितस्याप्यात्मनः शरीरविशिष्टाकारेण तद्वत्तामुपजीव्य प्रवृत्तैः शास्त्रैरेव तत्प्रयुक्तानुष्ठानसिद्धेः। न हि देहात्मभ्रमोपजीवनेन पारलौकिकशास्त्रोदयः। अतो न कथंचिदपि युष्मदनुष्ठीयमानं स्वैरकर्मसहं पारमहंस्यं नाम किमपि दृश्यते।

ननु ये बहिर्विषयविमुखतया निषिद्धनिवृत्तविरक्तलिङ्गधारिणः, त एव साक्षात्परमहंसाभिधानब्रह्मविदः, वयं तु नाममात्रधारिण इति चेन्न—तैरप्याश्रम-

---

यदि निष्क्रियपदेन परमहंसस्यैवोपादानं न तु तदवान्तरस्येत्युच्यते, तर्हि त्वदभिमतगूढाचारस्योक्तवचनात् न सिद्धिरित्यर्थः। ननु भवन्मते सक्रियस्य परमहंसस्य कथं निष्क्रियत्वकथनमित्याशङ्क्य पूर्वपूर्ववत् कुटीचकबहूदकादिवत् क्रियाप्राचुर्याभावात् तदुक्तिरित्याह - **तस्य निष्क्रियत्वोक्तिरिति**।

ननु ये इति। ये बाह्यविषयेषु विमुखतया निषिद्धकर्मभ्यो निवृत्ताः विरक्तस्य यानि लिङ्गानि तद्धारिणः त एव साक्षात् परमहंसनामकाः ब्रह्मविदः। वयं तु परमहंस इति

विशेषनियतलिङ्गविशेषस्य धर्मविशेषस्य च अपरित्यागात्। यच्च तेषां विषयवैमुख्यं निषिद्धनिवृत्तिकारणमुक्तम्, तदपि किं निश्शेषशब्दस्पर्शादिवदमुख्यरूपम्, उत कतिपयवैमुख्यरूपमिति । नाद्यः; कबलग्रहणादौ कस्यचिदप्यंशस्य न्यूनत्वादर्शनात् ॥ मिथ्यैतदिति चेत्; शान्तं पापम्। कृतघ्नोऽसि। ये भवत्सु ब्रह्मवित्त्वेन ब्रम्भ्रम्यमाणाः प्रतिदिनमग्रासने कृत्वा यथाभिलाषं चतुर्विधमन्नमुपहरन्ति, ते पुनरेवंविधं वाक्यमाकर्ण्य कथं न परिदूयेरन् ? येन च प्रमाणेन ब्रह्मविद्भोगानां मिथ्यात्वापादनं तेनैवाब्रह्मविद्भोगानामपीति सर्वेषामनायासेन विषयवैमुख्यं समर्थितम् । द्वितीयेऽपि, यत्किंचिद्विषयवैमुख्यमात्ररूपम्, उत निषिद्धवैमुख्यरूपमिति। पूर्वत्र, अन्येषामपि तत्संभवेन पुनरप्यविशेषः। उत्तरत्रापि तन्निषिद्धवैमुख्यं किमनिष्टत्वमात्रात्, उत शास्त्रसिद्धानर्थहेतुत्वाध्यवसायेन ? नाद्यः, विकल्पासहत्वात् । अनिष्टत्वमपि शस्त्राग्निकण्टकादिवत् सर्वप्रतिकूलत्वोपलम्भाद्वा, ब्रह्मवित्प्रतिकूलत्वोपलम्भाद्वा, आनुकूल्यानुपलम्भमात्राद्वा ? न प्रथमः, सर्वलोकोपलम्भविरोधात्। अत एव नापरः, ब्रह्मविदां स्वात्मप्रत्यक्षविरोधात्। न

नाममात्रधरिणः इति शङ्का । परिहारस्तु - बहिर्विषयविमुखैस्तैरपि परमहंसपरिव्राजकरूपाश्रमविशेषनियतस्य लिङ्गविशेषस्य एकदण्डधारणादे ;धर्मविशेषस्य जपादेश्च अपरित्यागात् इति। **यच्च तेषामिति**। साक्षात्परमहंसानां निषिद्धकर्मभ्यो निवृत्तौ विषयवैमुख्यं कारणमित्युक्तम्।, तदपि विषयवैमुख्यं किं शब्दस्पर्शादिविषयेषु सर्वेषु वैमुख्यरूपम्, उत कतिपयविषयवैमुख्यरूपम्। नाद्यः, भवतां भोजनादौ कस्यचिदप्यंशस्य न्यूनत्वादर्शनात्। न च भोजनादिकं मिथ्येति वाच्यम्। शान्तं पापम्। भवानत्यन्तं कृतघ्नः। ये भवन्तं ब्रह्मवित्त्वेन भ्राम्यन्तः प्रतिदिनमग्रासने उपवेश्य भक्ष्यभोज्यलेह्यचोष्यरूपं चतुर्विधमन्नमुपहरन्ति, ते पुनरेवंविधं वाक्यं श्रुत्वा अवश्यं परिदूयेरन् ।अपि च येन प्रमाणेन ब्रह्मविद्भोगानां मिष्टान्नभोजनादीनां मिथ्यात्वमापाद्यते तेनैव अब्रह्मविद्भोगानामपि मिथ्यात्वमापद्यत इति तेषामपि विषयवैमुख्यमनायासेन समर्थितं भवतीत्यर्थः। **द्वितीयेऽपीत्यादि**। परमहंसानां

हि मांसादिषु संस्कृतेषु ब्रह्मविदामपि निम्बादिवत् प्रातिकूल्यादिबुद्धिः । परेषां तु चेष्टाकारलिङ्गकानुमानविरोधात्(धः) । शैलूषादिचेष्टादिवदिहापीति चेन्न; परविप्रलम्भ-परानन्दजननादिप्रयोजनायोगेन तथाविधबुद्धिपूर्वकत्वानुपपत्तेः । स्वार्थताबुद्धिपूर्वकत्वे तु वैमुख्यासिद्धेः, भक्षणाद्यर्थप्रवृत्तेरबुद्धिपूर्वकत्वायोगात् ॥ निषिद्धार्थप्रवृत्तिरेव तेषां नास्तीति हेत्वसिद्धिरिति चेत्; प्रामादिकनिषिद्धप्रवृत्तेर्ब्रह्मविदामपि संभवात् । बुद्धिपूर्वकनिषिद्धप्रवृत्त्यभावस्तु शास्त्रसिद्धानर्थहेतुत्वाध्यवसायेनैवेति द्वितीयः कल्पः स्यात् । तथा च निषेधशास्त्रकिङ्करत्वेनाविशेषात् विधिशास्त्रमप्यनुबध्नातीति दुरन्तता । न चैतदुभयं भवतामिष्टम् । यदाहुः, 'दग्धाखिलाधिकारत्वात् ब्रह्मज्ञानाग्निना मुनिः । वर्तमानः

विषयवैमुख्यं कतिपयविषयवैमुख्यरूप- मिति द्वितीयकल्पेऽपि तत् किं यत्किंचिद्विषयमात्रवैमुख्यरूपम्, उत निषिद्धवैमुख्यरूपम् । आद्ये परमहंसातिरिक्तानामपि यत्किंचिद्विषयवैमुख्यसंभवेन परमहंसानां तदितरेषां च विशेषो न स्यात् । उत्तरत्रापि तत् निषिद्धवैमुख्यं किम् अनिष्टत्वमात्रात्, शास्त्रसिद्धानर्थहेतुत्वनिश्चयात् । तत्र नाद्यः, विकल्पासहत्वात् । तथाहि-अनिष्टत्वमपि शस्त्राग्निकण्टकादिवत् सर्वेषां प्रतिकूलत्वोपलम्भाद्वा, ब्रह्मविदां प्रतिकूलत्वोपलम्भाद्वा, आनुकूल्यानुपलम्भमात्राद्वा । नाद्यः, सर्वलोकानुभवविरोधात्ः। न हि निषिद्धं सर्वेषां प्रतिकूलत्वेनोपलभ्यते,येन तत् अनिष्टं स्यात् । न द्वितीयः,ब्रह्मविदां निषिद्धं संस्कृतमांसादिकं प्रतिकूलत्वेन न ह्युपलभ्यते । चेष्टा आकार इत्यादिभिःलिङ्गैः परे निषिद्धं ब्रह्मवित्प्रतिकूलं न भवतीति अनुमिन्वते, तद्विरोधश्च स्यात् । न च ब्रह्मविदां निषिद्धसेवनादिरूपा या चेष्टा सा नटादिचेष्टावत् इति वाच्यम् । परविप्रलम्भ-परानन्दजननादिरूपप्रयोजनाभावेन तथाविधप्रयोजनबुद्धिपूर्वकत्वानुपपत्तेः । यदि तु स्वार्थ ब्रह्मविदः निषिद्धकर्मसु चेष्टन्ते तदा विषयवैमुख्यासिद्धिः । न चाबुद्धिपूर्वकं भक्षणादौ प्रवृत्तिरिति वाच्यम् । तथा कस्यापि प्रवृत्त्यभावात् । न च ब्रह्मविदां निषिद्धविषये प्रवृत्तिरेव न संभवतीति वाच्यम् ।अनवधानेन निषिद्धेषु प्रवृत्तेःब्रह्मविदामपि संभवात् । वुद्धिपूर्वकं निषिद्धे प्रवृत्त्यभावस्तु

श्रुतेर्मूर्ध्नि नैव स्यात् विधि(वेद)किङ्करः ॥' इति ॥ अत्याश्रमपक्षोऽयम्, आश्रमपक्षे तूभयमपीष्टमिति चेत्; तर्हि यथाविधि लिङ्गाचारावनुवर्तस्व। तदा तु न विवदामहे। शास्त्रवश्यत्वाभावेऽपि ज्ञानिनोऽत्यर्थनिषिद्धनिरोधवासनाबलादेव बुद्धिपूर्वनिषिद्धनिवृत्तिरिति चेन्न; निषिद्धनिरोधवासना हि निषिद्धे प्रवृत्तिं निवर्तयति। न चाब्रह्मविदो निषिद्धं ब्रह्मविदोऽपि निषिद्धं भवति, अतिप्रसङ्गात्। अतश्चानिषिद्धत्वात् प्रवृत्तिरेव स्यात्। अन्यथा ब्रह्मचर्यावस्थानिषिद्धतत्सन्निरोधवासनया उत्तरेंषामाश्रमाणामनारम्भप्रसङ्गात्॥ विधिवशात् तत्र पुनः प्रवृत्तिरिति चेन्न; ब्रह्मचारिनिषिद्धेषु गृहस्थादीनामविहिताप्रतिषिद्धेषु केषुचिदन्तर्माल्यादिष्वप्यप्रवृत्तिप्रसङ्गात्। यदि च प्राङ्निषिद्धत्वमात्रेण तदानीमनिषिद्धेऽपि वासना निरोधिका, तदा ब्रह्मविदो न काचिदपि प्रवृत्तिः स्यात्; सर्वेषामपि कर्मणामधिकारिभेदेन देशकालादिभेदेन वा निषिद्धत्वात्॥ अस्तु तादृशो निरीहोऽस्माकं ब्रह्मविदिति चेन्न; समाधिं स्वापादिकं वाऽन्तरेण तादृगवस्थत्वासिद्धेः। न च समाधिस्थं तथाविधं प्रतिक्षिपामः।

शास्त्रसिद्धानर्थहेतुत्व-निश्चयेनेति द्वितीयः कल्पः स्यादपि। तथा च सति निषेधशास्त्रकिंकरत्ववत् विधिशास्त्रकिंकरत्वमपि प्रसजतीति भवदनिष्टपर्यवसानम् इति घट्टार्थः।

अत्याश्रमपक्षोऽयमित्यादि। अतिः पूजायाम्। पूज्याश्रमयुक्तः यः परमहंससंन्यासी तस्य पक्षः अथवा आश्रमातीतस्य पक्षः विधिनिषेधकिंकरत्वाभावः। आश्रमपक्षे तु विधिवश्यत्वं निषेधवश्यत्वं चोभयमपीष्टमिति चेत् - तर्हि यथाविधि लिङ्गाचारावनुवर्तस्व। तव अत्याश्रमित्वाभावादिति भावः। यद्यपि परमहंसस्य ज्ञानिनः शास्त्रवश्यत्वं नास्ति। तथापि अतिशयेन निषिद्धकर्मनिरोधवासनाबलात् बुद्धिपूर्वकं निषिद्धकर्मभ्यो निवृत्तिरिति शङ्कते- **शास्त्रवश्यत्वाभावेऽपीति**। निषिद्धनिरोधसंस्कारः निषिद्धे प्रवृत्तिं निवर्तयति। न च अब्रह्मबिदः यत् निषिद्धं तत् ब्रह्मविदोऽपि निषिद्धमिति नियमोऽस्ति। अतश्चानिषिद्धत्वात् प्रवृत्तिरेव स्यात्। अन्यथा ब्रह्मचर्यावस्थायां निषिद्धनिरोधवासनाबलात् गृहस्थाद्युत्तराश्रमाणामनारम्भप्रसङ्गात्। यदि विधिवशात् तत्र पुनः प्रवृत्तिरित्युच्यते तदा ब्रह्मचारिणां निषिद्धानि इतरेषाम् अविहितानि

तस्याप्युत्थानकाले विधिनिषेधौ गलग्राहिणावेव ।। अस्तु तर्हि लोकसंग्रहार्थं निषिद्धवैमुख्यमिति; तर्हि न वैमुख्यम्; अपि तु बलान्निरोधः । तथाच विहिताभिमुख्यमप्यभिमुखीभवति लोकसङ्ग्रहोऽपि लोकक्षोभजन्यपापभयादेवेति तदेव शास्त्रवश्यत्वम् ।। ब्रह्मानुभवरसवशादेव निषिद्धक्षुद्ररसवैमुख्यमस्त्विति चेन्न; अविहिताप्रतिषिद्धेऽप्यप्रवृत्तिप्रसङ्गात् । सा च सत्यपि समाधिदशैवेति प्रागेवोक्तम्। एतेन जरठवत् भोक्तृत्वशक्तिवैकल्यात् ब्रह्मविदो भोगवैमुख्यमिति च प्रत्युक्तम्। अलाभात्, निवारकराजादिभयाद्वा तद्वैमुख्यमिति तु स्यात् । तदेतत् तुरङ्ग(म) ब्रह्मचर्यम् । निर्विघ्नलाभदशायां तु स्वैरमेव ह्यायातम् ।

अप्रतिषिद्धानि च यानि कर्माणि तेषु तेषामप्रवृत्तिप्रसङ्गात् । यदि च पूर्वाश्रमावस्थायां निषिद्धत्वमात्रेण उत्तराश्रमावस्थायामनिषिद्धेऽपि कर्मणि पूर्ववासना प्रतिबन्धिका, तदा ब्रह्मविदो न काचिदपि प्रवृत्तिः स्यात् । सर्वेषामपि कर्मणामधिकारिभेदेन देशकालादिभेदेन वा निषिद्धत्वात् । अस्तु तर्हि अस्मन्मतानुसारी ब्रह्मवित् कुत्रापि प्रवृत्तिरहितो भवतु इति चेत् - न । समाधिदशां स्वापादिदशां वा विहाय अन्यास्ववस्थासु तेषां निश्चेष्टावस्थानासिद्धेः । यश्च समाधिस्थः स तु निश्चेष्ट इति वयमप्यङ्गीकुर्मः । अपि च समाधिस्थस्य व्युत्थानकाले विधिनिषेधवश्यता अवर्जनीया, निश्चेष्टताविरहात् ।

अस्तु तर्हीति । लोकाःनिषिद्धं नानुतिष्ठेयुरित्येतदर्थं ब्रह्मवित् निषिद्धं वर्जयतीति वक्तुं न शक्यते । तदानीं स्वतो न निषिद्धवर्जनम् अपि तु बलादिति वक्तव्यम् । तथा च लोकसंग्रहार्थमेव तस्य विहितकर्माभिमुख्यमावश्यकम् । अन्यथा लोकक्षोभजन्यपापप्रसक्तेः तद्भयादेव शास्त्रवश्यत्वमापतति । ननु तस्य ब्रह्मानुभवरसवशादेव निषिद्धक्षुद्ररसवैमुख्यमस्त्विति चेन्न । तर्हि तद्वशादेव अविहितेऽप्रतिषिद्धे च भोजनादिकर्मण्यपि अप्रवृत्तिप्रसङ्गात् । अतश्च समाधिदशायामेव प्रवृत्तिशून्यत्वम्, नेतरदशासु इति सिद्धमिति भावः । **सा च सत्यपीति।** अप्रवृत्तिर्विद्यमानापीत्यर्थः ।

एतेनेति । जरठवत्= वृद्धस्येव भोक्तृत्वशक्तिवैकल्यात् ब्रह्मविदो भोगवैमुख्यमित्यप्य

एतेनात्याश्रमपक्षेऽपि निषिद्धवैमुख्यं दूषितम्। अनाश्रमित्वावस्था च किं विधायकशास्त्रबलादङ्गीक्रियते, लिङ्गदर्शनमात्राद्वा, तदशक्त्या वा, अन्यतो वा कुतश्चिदिति । न प्रथमः; विधायकादर्शनात्; प्रत्युत, 'अनाश्रमी न तिष्ठेत्तु दिनमेकमपि द्विजः' इत्यादिस्मृतिशतैर्निषेधात्। न चैतदविद्वद्विषयं मन्तव्यम्, सङ्कोचकाभावात्। अनाश्रमित्वविधिदर्शने हि तत्सङ्कोचः। ज्ञानिनामपि नाश्रमो निषिध्यते, अपितु स्वैराचारः। यथा, 'नाविरतो दुश्चरितान्नाशान्तो नासमाहितः। नाशान्तमानसो वापि प्रज्ञानेनैनमाप्नुयात्॥' इति। ननु, 'तत् यथा पुष्करपलाश

पास्तम्। भोक्तृत्वशक्तिसद्भावेऽपि भोगवैमुख्यस्यावश्यकत्वात्। अतः भोगोपकरणालाभात् भोगनिवारकराजादितो भयाद्वा भोगवैमुख्यमिति स्यात्। इदं तु भोगवैमुख्यम् अश्वब्रह्मचर्यतुल्यम्। भोगोपकरणलाभे राजादिभयाभावे च यथेष्टभोगानुभव इति हि तदा स्यात् इतिभावः। आश्रममतीत्य वर्तमानस्य ब्रह्मविदःनिषिद्धवैमुख्यं न दोषायेत्यपि निरस्तमित्याह-**एतेनेति**। अनाश्रमित्वावस्था किमनाश्रमित्वविधायकशास्त्रबलादङ्गी-क्रियते,किं वा अनाश्रमित्वलिङ्गदर्शनात् अथ वा आश्रमकर्माशत्तया वा, अन्यतोवा कुतश्चित्। तत्राद्यकल्पं विस्तरेण दूषयति-**न प्रथमः विधायकादर्शनादिति**। अनाश्रमित्वविधायकशास्त्रस्यादर्शनादित्यर्थः। प्रत्युत अनाश्रमित्वनिषेधकप्रमाणमेवास्तीति। ननु ''अनाश्रमी न तिष्ठेत्तु'' इत्यादिवचनमब्रह्मविद्विषयकम् ब्रह्मविदस्त्वनाश्रमित्वं न बाधत इत्याशङ्क्य तादृशानाश्रमित्वनिषेधकवचनस्याविद्वद्विषयकतया संकोचे कारणं नास्तीत्याह - **न चैतदिति**। अनाश्रमित्वविधायकं वाक्यं यदि दृश्येत तदा अनाश्रमित्वनिषेधकवचनस्य संकोचः शक्यः। न हि तादृशविधिवाक्यं दृश्यत इत्याह - **अनाश्रमित्वेति**। **ज्ञानिनामपीति**। ब्रह्मज्ञानिनामपि नाश्रमो निषिध्यते, अपि तु स्वैराचारो निषिध्यत इत्याह **नाविरत इति** श्रुतिः। दुश्चरितात् निषिद्धकर्मणः अविरतो न स्यात् अपि तु विरतः स्यात् इत्यर्थः। शङ्कते - **नन्विति**। यथा पद्मपत्रे जलं न श्लिष्यते एवं ब्रह्मविदि पापं कर्म न श्लिष्यते इति श्रुत्यर्थः। अत्यागिनां संन्यासिव्यतिरिक्तानाम् अनिष्टम् इष्टम् अनिष्टमिश्रमिष्टं चेति त्रिविधं

आपो न श्लिष्यन्ते', 'अनिष्टमिष्टं मिश्रं च त्रिविधं कर्मणः फलम्। भवत्यत्यागिनां प्रेत्य न तु सन्न्यासिनां क्वचित् ॥' इति श्रुतिस्मृतिभ्यां ज्ञानिन उत्तराघाश्लेषः श्रूयत इति चेन्न–दुश्चरितविरतिपरश्रुतिबलादेवाश्लेषश्रुत्यादेरबुद्धिपूर्वविषयत्वात्, आपद्विषयत्वाच्च। सूत्रितं च, 'सर्वान्नानुमतिश्च प्राणात्यते तद्दर्शनात्' इति, 'शब्दश्चातोऽकामकारे' इति च, कुर्वन्नेवेह कर्माणि जिजीविषेच्छतं समाः', इत्युक्त्वा, कर्म लिप्यते नरे' इति वचनात् बुद्धिपूर्वकर्मणाऽप्यश्लेषः श्रुत इति चेन्न; तस्य वाक्यस्य विद्याङ्गभूतासङ्गकर्मविषयत्वात्।

कर्मणः फलं देहवियोगानन्तरं भवति, संन्यासिनां तु न भवतीति गीताश्लोकार्थः। **उत्तराघाश्लेष** इति। ब्रह्मज्ञानलाभानन्तरं क्रियमाणस्य पापस्याश्लेष इत्यर्थः। समाधत्ते - **दुश्चरितेति**। दुश्चरितविरतितात्पर्यकश्रुतिबलात् पापाश्लेषश्रुतेः अबुद्धिपूर्वकपापाश्लेषविषयकत्वमापद्विषयकत्वं चेत्यर्थः। सूचितं चेति उक्तार्थे सूत्रं प्रमाणयति -

"सर्वान्नानुमतिश्च प्राणात्यये तद्दर्शनात्" (सू. ३-४-२८)

चशब्दोऽवधारणे। प्राणविद्यानिष्ठस्य सर्वान्नानुमतिः प्राणात्ययापत्तावेवेत्यर्थः। तद्दर्शनात्। दृश्यते ह्यन्यत्र ब्रह्मविदामपि प्राणात्ययापत्तावेव सर्वान्नाभ्यनुज्ञा, किंपुनः प्राणविद इत्यर्थः।

शब्दश्चातो ऽ कामकारे (सू. ३-४-३१)

यतो ब्रह्मविदामन्येषां च सर्वान्नीनत्वमापद्विषयमेव, अत एव सर्वेषामकामकारे शब्दः "तस्मात् ब्राह्मणः सुरां न पिबति पाप्मना नोत्सृजा" इति। पाप्मना संस्पृष्टो न भवानीति मत्वा ब्राह्मणः सुरां न पिबतीत्यर्थः।

शङ्कते-**कुर्वन्नेवेति**। ईशावास्ये इह कर्माणि कुर्वन्नेव शतं वर्षाणि जीवितुमिच्छेत् इत्युक्त्वा अनन्तरमेन न कर्म लिप्यते नरे इति श्रवणात् ब्रह्मविदः बुद्धिपूर्वककर्मणापि श्लेषो नास्तीति प्रतीयत इति शङ्का। न कर्म लिप्यते नरे इति वाक्यस्य विद्याङ्गतया फलसङ्गकर्तृत्वाभिसन्धित्यागपूर्वकं क्रियमाणं यत् कर्म तत्फलं न श्लिष्यत इत्यर्थे तात्पर्यं, न पापादिकर्म न श्लिष्यत इत्यर्थे इति विद्यास्तुत्यर्थत्वम् इति च समाधानम्।

विद्यास्तुत्यर्थत्वाद्वा। तथा चासूत्रयत्, 'नाविशेषात्' इति, 'स्तुतयेऽनुमतिर्वा' इति च। अन्यथा पूर्वोक्तविरोधात्॥ दुश्चरितविरतिश्रुतिरेव किमन्यपरतया न निरूप्यत इति चेन्न; तस्यास्तात्पर्यविषयस्यान्यस्यादर्शनात्॥ विज्ञानविरोधादेव तत्रापि तात्पर्यमिति चेन्न; ज्ञानस्य दुश्चरितविरामाद्यभावे स्वसाध्यसाधकत्वाभावलक्षणवैकल्यप्रतिपादनमुखेन दुश्चरितादिनिन्दारूपतया तदभावविशिष्टत्वेन विशेष(षण ?) एव वाक्यस्य तात्पर्यात्। ज्ञाननिष्पत्त्यर्थं दुश्चरितादिनिवृत्तिः, निष्पन्नज्ञानस्य तु निरपेक्षतया स्वैरानुमतिरिति चेन्न; दुश्चरितप्रभृतीनां

यथसंख्यमुक्तार्थद्वयप्रदर्शकं सूत्रद्वयमुदाहरति - **तथाचासूत्रयदिति**।

नाविशेषात् (सू.३-४-२३)

यच्चोक्तम् - " कुर्वन्नेवेह कर्माणि" इति आत्मविदं ज्ञानात् व्यावर्त्य यावज्जीवं कर्मानुष्ठाने नियमयतीति, तन्नोपपद्यते। अविशेषात्। न ह्ययं फलसाधनभूतस्वतन्त्रकर्मविषयः इति विशेषहेतुरस्ति विद्याङ्गभूतकर्मविषयतयाप्युपपत्तेः। " कर्मणैव हि संसिद्धिमास्थिता जनकादयः" इति च विदुषस्त्वाप्रयाणात् उपासनस्यानुवर्तमानत्वात्।

एवमर्थस्वाभाव्येन चोद्यं परिहृत्य " कुर्वन्नेवेह कर्माणि" इत्यस्य वाक्यस्यार्थमाह-

स्तुतयेऽनुमतिर्वा (सू.३-४-१४)

वाशब्दोऽवधारणर्थः। " ईशावास्यमिदं सर्वम्" इति विद्याप्रकरणात् विद्यास्तुतये सर्वदा कर्मानुष्ठानानुमतिरियम्। विद्यामाहात्म्यात् सर्वदा कर्म कुर्वन्नपि न लिप्यते कर्मभिरिति हि विद्या स्तुता भवति। **अन्यथेति**। एवं तात्पर्याकथने पूर्वोक्तविरोधात् - नाविरतो दुश्चरितात् इति श्रुतिविरोधात् इत्यर्थः। शङ्कते - **दुश्चरितेति**। समाधत्ते - **तस्या इति**। ननु कर्मणो ब्रह्मज्ञानेन विरोधादेव कर्मनिवृत्तावपि तात्पर्यमिति शङ्कते - **विज्ञानेति**। दुश्चरिताद्विरत्यभावे ज्ञानस्य स्वसाध्यसाधकत्वाभावप्रतिपादनद्वारा दुश्चरितनिन्दारूपतया वाक्यस्य, ज्ञानस्य दुश्चरिताभावविशिष्टत्वेन प्रतिपादन एव तात्पर्यमिति समाधत्ते - **ज्ञानस्येति**। पुनः शङ्कते - **ज्ञाननिष्पत्त्यर्थमिति**। दुश्चरितान्निवृत्तिः ज्ञाननिष्पत्त्यर्था।

ब्रह्मप्राप्तिविरोधित्वेन, 'नैनमाप्नुयात्' इति प्रतिपादनात्। न ह्यत्र, 'नाविरतो दुश्चरितात्, प्रज्ञानमाप्नुयात्' इत्युच्यते। 'नागुः सम्पन्नमश्नाति' इत्यत्र क्षीरादिसम्पद्रूपविशेषनिषेधवत् प्रज्ञाननिषेधे तात्पर्यमिति चेन्न; पूर्वापरभावसहकृतकरणश्रुतिबलादेव सिद्धत्वप्रतीतेः साध्यत्वविवक्षायास्तद्विरुद्धत्वात्, स्वारस्याभावाच्च। अत एव, 'नागुः क्षीरेण भुङ्क्ते' इतिवदिति प्रत्युक्तम्,

---

ज्ञाने निष्पन्ने यथेष्टं दुश्चरितानुमतिः इति शङ्का। ज्ञाननिष्पत्तावपि दुश्चरितादीनां ब्रह्मप्राप्तिविरोधित्वमिति हि ''प्रज्ञानेनैनमाप्नुयात्'' इत्युच्यते। प्रज्ञानेनापि दुश्चरितादविरतः एनं परमात्मानं नाप्नुयादिति हि वाक्यार्थः। तदाह - **न ह्यत्रेति**। नाविरतो दुश्चरितादिति वाक्ये दुश्चरितादविरतः प्रज्ञानं नाप्नुयात् इति नोच्यते किं तु एनं परमात्मानं नाप्नुयादिति हि उच्यते। शङ्कते - **नागुरित्यादिना**। अगुः=धेनुहीनः संपन्नं नाश्नाति इत्यत्र क्षीरादिसंपद्रूपविशेषविशिष्टं नाश्नाति इत्यर्थेन क्षीरादिसंपद्रूपविशेषनिषेधो यथा अवगम्यते तथा नाविरत इत्यत्रापि दुश्चरिताचरितुः प्रज्ञानरूपविशेषाभावे तात्पर्यमिति शङ्का। समाधते - **पूर्वापरेति**। प्रज्ञानस्य पूर्वत्वं परमात्मप्राप्तेः पश्चात्त्वमित्येवंरूपो यः पूर्वापरभावः तत्सहकृता या करणार्थिका प्रज्ञानेनेति तृतियाविभक्तिरूपा श्रुतिः तद्बलात् प्रज्ञानस्य सिद्धत्वावगतेः तस्य साध्यत्वविवक्षायाः विरुद्धत्वादित्यर्थः। अत्र ''भूतं भव्याय कल्पते'' इति न्यायोऽप्यनुसंहितः।

ननु यथा ''नागुः क्षीरेण भुङ्क्ते'' इत्यत्र करणार्थकतृतीयाश्रवणेऽपि धेनुरहितस्य पुंसः क्षीरकरणकभोजननिषेधे क्षीरनिषेधोऽपि पर्यवस्यति तथा प्रकृतेऽपि दुश्चरितादविरतस्य प्रज्ञानकरणकब्रह्मप्राप्तिनिषेधे प्रज्ञाननिषेधोऽपि सिध्यतीति शङ्कां समाधत्ते - **अत एवेति**। तत्र हि भोजनस्यान्यतः प्राप्तत्वात् क्षीरनिषेध एव पर्यवसानम्। प्रकृते तु ब्रह्मप्राप्तेः अन्यतः प्राप्त्यभावात् दुश्चरितस्य प्रज्ञानकरणकब्रह्मप्राप्तेरेव निषेधः इति भाव :। अभ्युपेत्य प्रज्ञानसाध्यत्वमाह- **साध्यत्वेति**। ब्रह्मज्ञानस्य दुश्चरितविरतिसाध्यत्वविवक्षायामपि अहरहरभ्यासाधेयातिशयध्यानरूप ज्ञानस्य आप्रयाणमनुवर्तनीयत्वात्

भोजनवत् ब्रह्मप्राप्तेरन्यतः प्राप्त्यभावाच्च । साध्यत्वविवक्षायामपि ज्ञानस्याप्रयाणादनुवर्तनीयत्वस्य प्रतिपादितत्वात् प्रतिदिवसमुपचीयमानानुवृत्तज्ञानसिद्ध्यर्थं दुश्चरितविरामादेरष्यामोक्षादनुवर्तनीयत्वस्य प्रतिपादितत्वात्। अतो यावज्जीवं स्वैरनिषेधे अनन्यथासिद्धे सति, 'कुर्वन्नेव' इत्यादिकं ज्ञानाङ्गकर्मविधिपरं ज्ञानस्तुत्यर्थं वेति नेतव्यम् ।

अत एव, ''अपि चेदसि पापेभ्यः सर्वेभ्यः पापकृत्तमः । सर्व ज्ञानप्लवेनैव वृजिनं संतरिष्यसि ॥'' ''यथैधांसि समिद्धोऽग्निर्भस्मसात् कुरुतेऽर्जुन । ज्ञानाग्निः सर्वकर्माणि भस्मसात्कुरुते तथा ॥'', ''ब्रह्मण्याधाय कर्माणि सङ्गं त्यक्त्वा करोति यः । लिप्यते न स पापेन पद्मपत्रमिवाम्भसा ॥'', ''यस्य नाहङ्कृतो भावो मुद्धिर्यस्य न लिप्यते । हत्वापि स इमाँल्लोकान्न हन्ति न निहन्यते ॥'' इत्यादीन्यपि क्रियमाणे कर्मणि फलसङ्गकर्तृत्वादिप्रतिषेधपरतया ज्ञानविशेषमाहात्म्यप्रतिपादनादिपरतया (वा ?) न स्वैरानुमतिलिङ्गानि । अत एव, 'अपि चेत् सुदुराचारो भजते मामनन्यभाक् । साधुरेव स मन्तव्यः सम्यग्व्यव-

---

प्रतिदिनमुपचीयमानानुवृत्तज्ञानसिद्ध्यर्थं दुश्चरितविरामस्याप्यनुवर्तनीयत्वात् ज्ञानानन्तरं दुश्चरितकरणेऽपि न दोष इति वक्तुं न शक्यते । ततश्च यावज्जीवं यथेष्टदुश्चरितनिषेधस्य आवश्यकत्वे सिद्धे सति कुर्वन्नेवेति वाक्यं ज्ञानाङ्गकर्मविषयकं ज्ञानस्तुत्यर्थं वेति नेतव्यमिति भाव: ।

अत एवेत्यादि निगदव्याख्यातम् । तत्रोद्धृतगीताश्लोकानां यथाभाष्यमर्थो लिख्यते पठितृसौकर्यार्थम् -

अपि चेदसि पापेभ्य: सर्वेभ्य: पापकृत्तम: ।
सर्वं ज्ञानप्लवेनैव वृजिनं संतरिष्यसि ॥ (गी. ४-३६)

यद्यपि सर्वेभ्य: पापिभ्य: पापकृत्तमोऽसि, तथापि सर्वं पूर्वार्जितं वृजिनरूपं समुद्रमात्मविषयज्ञानरूपप्लवेनैव संतरिष्यसि ।

सितो हि सः ॥' इत्युक्त्वा, अनन्तरमेव, 'क्षिप्रं भवति धर्मात्मा शश्वच्छान्तिं स गच्छति' इत्यादिना समाधीयते ॥ ''तस्मात् ब्राह्मणः पाण्डित्यं निर्विद्य बाल्येन तिष्ठासेत्' इति विदुषो बाल्यविधिबलात् कामचारवादकामभक्षत्वादिप्राप्तिरिति चेत् – न हि तत्र बाल्यशब्दो बालभावपरः । स हि वयोवस्थाविशेषरूप उपादातुं न शक्यते । अतः स्वमाहात्म्यानाविष्काररूपं बालकर्म उपादातुं शक्यत इति तद्वियोऽयं विधिः; अन्यथा प्रागुक्तविरोधात् । सूत्रितं च, 'अनाविष्कुर्वन्नन्वयात्' इति । योगिनां च स्वमाहात्म्यानाविष्कारेण जडवदाचरणं योगोपकारकतया स्मर्यते। यथा – 'जानन्नपि हि मेधावी जडवल्लोकमाचरेत् । सम्माननना परां हानिं योगर्धेः कुरुते यतः ॥' इत्यादि । सनत्सुजातोऽपि– 'य इमं सर्वदा भूतेष्वात्मानमनुपश्यति। अन्यत्रान्यत्र युक्तेषु किं नु (स) शोचेत् ततः परम् ॥ अहमेवास्मि वो माता पिता पुत्रोऽस्म्यहं पुनः । आत्माऽहमस्य सर्वस्य यच्च नास्ति यदस्ति च । पितामहोऽस्मि

यथैधांसि समिद्धोऽग्निर्भस्मसात्कुरुतेऽर्जुन ।
ज्ञानाग्नि: सर्वकर्माणि भस्मसात्कुरुते तथा ॥ (गी . ४-३७)

सम्यक्प्रवृद्धोऽग्निरिन्धसंचयमिव आत्मयाथात्म्ययज्ञानरूपोऽग्नि: जीवात्मगत-मनादिकाल-प्रवृत्तानन्तकर्मसञ्चयं भस्मीकरोति ।

ब्रह्मण्याधाय कर्माणि सङ्गं त्यक्त्वा करोति य: ।
लिप्यते न स पापेन पद्मपत्रमिवाम्भसा ॥ (गी. ५-१०)

ब्रह्मशब्देन प्रकृतिरिहोच्यते। इन्द्रियाणां प्रकृतिपरिणामविशेषरूपत्वेन इन्द्रियाकारेणावस्थितायां प्रकृतौ ''पश्यन् शृण्वन्'' इत्याद्युक्तप्रकारेण कर्माण्याधाय फलसङ्गं त्यक्त्वा नैव किंचित् करोमीति य: कर्माणि करोति स प्रकृतिसंसृष्टतया वर्तमानोऽपि प्रकृत्यात्माभिमानरूपेण बन्धहेतुना पापेन न लिप्यते यथा पद्मपत्रमम्भसा संसृष्टमपि न लिप्यते ।

''यस्य नाहंकृतो भावो बुद्धिर्यस्य न लिप्यते ।
हत्वापि स इमांलोकान् न हन्ति न निहन्यते''(गी १८-,१७)

स्थविरः पिता पुत्रश्च भारत ।। ममैव यूयमात्माऽथ न मे यूयं च नाप्यहम् । आत्मैव स्थानं मम जन्म चात्मा ।।' इत्यादिना सर्वान्तरात्मभूतब्रह्मसाक्षात्कारिणं सर्वजननिरुपाधिकसुहृदं ब्रह्मनिष्ठं प्रस्तुत्य, 'तस्य सम्यक् समाचारमाहुर्वेदविदो जनाः । नैवं मन्येत भूयिष्ठं बाह्यमाभ्यन्तरं जनम् ।।' इत्यादिना तस्य स्वाकारगोपनं विधाय, 'यर्ह्येवमन्तरात्मानं ब्रह्मणो हन्तुमर्हति । निर्लिङ्गमचलं सिद्धं सर्वद्वन्द्वविवर्जितम् ।।' इत्यादिना परिशुद्धात्मस्वरूपानुसन्धानं च विधाय, 'योऽन्यथा सन्तमात्मानमन्यथा प्रतिपद्यते । किं तेन न कृतं पापं चोरेणात्मापहारिणा ।।' इत्ययथाभूतात्मवेदिनं विनिन्द्य, 'अश्रान्तस्यावनावात्मा सम्मतो निरुपद्रवः । शिष्टो नशिष्टवत् स स्यात् ब्रह्मणो ब्रह्मवित् कविः ।।' इति विशिष्टस्यैव सतस्तस्यावमानसिद्ध्यर्थमविशिष्टवदभिनय एवाभिधीयते । व्यज्यते हि तत्रैव– 'सम्मानपरिहारार्थं स्ववीर्यस्य हि गोपनम् । ये यथा वान्तमश्नन्ति बाला नित्यमभुक्तये ।। एवं ते वान्तमश्नन्ति स्ववीर्यस्योपभोजनात् । न वै मानं च मौनं च सहितौ चरतस्सदा । अयं मानस्य विषयो ह्यसौ मौनस्य तद्विदुः ।।' इति । उक्तं हि तैत्तिरीयके–'तस्मादेवं विद्वान् । वीव नृत्येत् । प्रेव चलेत् । व्यस्येवाक्ष्यौ

परमपुरुषकर्तृत्वानुसन्धानेन यस्य भाव: कर्तृत्वविषयो मनोवृत्तिविशेष: नाहंकृत: नाहमभिमानकृत:, अहं करोमीति ज्ञानं यस्य न विद्यत इत्यर्थ: । बुद्धिर्यस्य न लिप्यते - अस्मिन् कर्मणि कर्तृत्वाभावात् एतत् फलं न मया संबध्यते न च मदीयं कर्मेति यस्य बुद्धिर्जायत इत्यर्थ: । स इमान् लोकान् युद्धे हत्वापि तान् न निहन्ति, न केवलं भीष्मादीनित्यर्थ: । ततस्तेन युद्धाख्येन कर्मणा न निबध्यते तत्फलं नानुभवतीत्यर्थ: ।

अपि चेत् सुदुराचारो भजते मामनन्यभाक् ।
साधुरेव स मन्तव्य: सम्यग्व्यवसितो हि स: ।।" (गी-९.३०)

तत्र तत्र जातिविशेषे जातानां य: समाचार: उपादेय: परिहरणीयश्च तस्मादतिवृत्तोऽपि उक्तप्रकारेण मामनन्यभाक् भजनैकप्रयोजनो भजते चेत् साधुरेव वैष्णवाग्रेसर एव स मन्तव्य:

भाषेत। मण्डयेदिव। क्राथयेदिव। शृङ्गायेतेव। उत्तमेऽपवदेयुः। उत्तमे पाप्मानं हन्युरिति' इति। अत्रापि पापनिवृत्त्यर्थं परिभवनीयत्वसिद्ध्यर्थमुन्मत्तत्वादिसमानव्यापार एव हि विधीयते; न पुनः परमहंसानां परदारादिगमनरूपनिषिद्धकरणम्; नापि नित्यनैमितिकत्यागः। उक्तं च मनुना–'सम्मानात् ब्राह्मणो नित्यमुद्विजेत विषादिव। अमृतस्येव चाकाङ्क्षेदवमानस्य सर्वदा॥' इति। अयमेवार्थः स्मृत्यन्तरेष्वप्युच्यते– 'यन्न सन्तं नचासन्तं न श्रुतं न बहु-श्रुतम्। न सुवृत्तं न दुर्वृत्तं वेद कश्चित् स वै द्विजः॥ गूढं समाश्रितो विद्वान् अज्ञातश्चरितं चरेत्। अन्धवज्जडवच्चापि मूकवच्च महीं चरेत्॥ स्वाचारस्यापरित्यागः स्वप्रभावस्य गोपनम्। अपरिग्रहशीलत्वं पावनानि प्रचक्षते॥' इत्यादिभिः।

एतेन द्वितीयोऽपि हेतुः प्रत्युक्तः, प्रत्यक्षश्रुतिविरोधे प्राप्त्यभावे च लिङ्गदर्शनमकिञ्चित्करमेव। न च तदस्ति। आदिभरतोऽपि हि योगसिद्ध्यर्थं जडवदाचारमात्रे प्रवृत्त इति तत्रैव व्यक्तम्। तथा हि श्रीविष्णुपुराणे आदिभरतोपाख्याने–, ''तत्र चोत्सृष्टदेहोऽसौ जज्ञे जातिस्मरो द्विजः। सदाचारवतां शुद्धे योगिनां प्रवरे कुले॥ सर्वविज्ञानसम्पन्नः सर्वशास्त्रार्थतत्त्ववित्। अपश्यत् स च मैत्रेय आत्मानं प्रकृतेः परम्॥ आत्मनोऽधिगतज्ञानो देवादीनि महामुने।

बहुमन्तव्यः। यतोऽस्य व्यवसायः सुसमीचीनः। भगवान् निखिलजगदेककारणभूतः परं ब्रह्म नारायणः चराचरपतिः अस्मत्स्वामी मम गुरुः मम सुहृत् मम परमं भोग्यमिति सर्वैः दुष्प्रापोऽयं व्यवसायः तेन कृतः।

''क्षिप्रं भवति धर्मात्मा शश्वच्छान्तिं निगच्छति।
कौन्तेय प्रतिजानीहि न मे भक्तः प्रणश्यति॥''(गी.९-३१)

क्षिप्रं धर्मात्मा भवति - क्षिप्रमेव विरोधिरहितसपरिकरमद्भजनैकमना भवति, शश्वच्छान्तिं निगच्छति शाश्वतीमपुनशवर्तिनीं मत्प्राप्तिविरोध्याचारनिवृत्तिं गच्छति। अथ अनाश्रमित्वावस्था लिङ्गदर्शनमात्रादिति द्वितीयकल्पं दूषयति - एतेन द्वितीयोऽपीति।

सर्वभूतान्यभेदेन स ददर्श सदाऽऽत्मनः ॥ न पपाठ गुरुप्रोक्तां कृतोपनयनः श्रुतिम्। न ददर्श च कर्माणि शास्त्राणि जगृहे न च॥ उक्तोऽपि बहुशः किञ्चित् जडवाक्यमभाषत। तदप्यसंस्कारगुणं ग्राम्यवाक्योक्तिसंश्रितम्॥ अपध्वस्तवपुः सोऽथ मलिनाम्बरधृक् जटी। क्लिन्नदन्तान्तरः सभ्यैः परिभूतस्स नागरैः॥ सम्मानना परां हानिं योगर्धेः कुरुते यतः। जनेनावमतो योगी योगसिद्धिं च विन्दति॥ तस्माच्चरेत वै योगी सतां वर्त्म न दूषयेत्। जना यथाऽवमन्येरन् गच्छेयुर्नैव सङ्गतिम्॥ हिरण्यगर्भवचनं विचिन्त्येत्थं महामतिः। आत्मानं दर्शयामास जडोन्मत्ताकृतिं जने॥ भुङ्क्ते कुल्माषवाट्यादि शाकं वन्यफलान् कणान्। यद्यदाप्नोति ? सुबहु तदत्ते कालसंयमम्॥ पितर्युपरते सोऽथ भ्रातृभ्रातृव्यबान्धवैः। कारितः क्षेत्रकर्माणि कदन्नाहारतोषितः॥ स रूक्षपीनावयवो जडकारी च कर्मणि। सर्वलोकोपकरणं बभूवाहारवेतनः॥ तं तादृशमसंस्कारं विप्राकृतिविचेष्टितम्। क्षत्ता सौवीरराजस्य विष्टियोग्यममन्यत॥'' इति। तथोत्तरत्र, ''योगिनो विविधै रूपैर्नराणामुपकारिणः। भ्रमन्ति पृथिवीमेतामभि (वि ?) ज्ञातस्वरूपिणः॥'' इति। न ह्यत्राधर्मानुष्ठानं किंचिदुक्तम्, न च धर्मोपप्लवः। कर्माणि तु यज्ञादीनि ब्रह्मचारित्वादेव नाग्रहीत्। अत एव तत्र, 'सतां वर्त्म न दूषयन्' इत्यप्युक्तम्। भागवते च तस्य यज्ञोपवीतादिधारणादिकथनादाश्रमित्वमेव प्रतीयते। यथोक्तम्, ''कस्त्वं निगूढश्चरसि द्विजानां बिभर्षि सूत्रं कतमोऽवधूतः'' इति। अत्र निगूढश्चरसीति स्वमाहात्म्यानाविष्कारो व्यक्तः। अत एव, 'न पपाठ गुरुप्रोक्तां कृतोपनयनः श्रुतिम्' इत्यत्रापि कृतोपनयनत्वं न निषिध्यते। अनूच्चारणपरित्यागोऽपि जन्मान्तरसंस्कारोद्बोधनादिना वेदानां स्वतःप्रकाशात्। अथवा एकवारश्रवणमात्रेण वेदधारणात्। दुर्वासःप्रभृतीनामुन्मत्तव्रतादिकमपि कादाचित्कमाश्रमधर्मनिष्ठानामेव लोकोपहास्यतादिफलावसितम्; न पुनः सर्वाश्रमत्यागात्मकम्। अत एव दुर्वाससः पश्चात्सन्न्यासानुप्रवेशः

काषायदण्डादिमत्त्वं च स्मर्यते ॥ ऋभुशुकसंवर्तादिषु नग्नचर्यादिदर्शनादनाश्रमित्वमवगम्यत इति चेन्न; नग्नचर्याया अपि वर्षवातातपादितितिक्षालक्षणकबलकबलिताशेषविशेषाकारपुरातनाधिकारिविशेषविषयव्रतविशेषरूपत्वात् । आश्रमित्वाभावे कथं वाताशतस्यैव संवर्तस्य महीभृता ऋत्विक्त्वेन वरणम् ? अतस्सर्ववर्णाश्रमसाधारणव्रतविशेष एव नग्नचर्या । गृहस्थस्यैव ह्यार्त्विज्यादिकम् । पूर्वं विधुरस्यापि कार्यार्थं दारक्रियादिपूर्वकमार्त्विज्यं युज्यते ।

ननु 'पुरः पञ्चशतं नार्यो वारमुख्याः समाद्रवन्' इत्यादिना, 'तस्य भुक्तवतस्तात तदन्तःपुरकाननम् । सुरम्यं दर्शयामासुरैकैकश्येन भारत ॥' इति तस्य ब्रह्मविदो महर्षेः शुकस्य वारमुख्यासु भोजनमप्युक्तमिति चेन्न; ब्राह्मणादिपरिपक्वोपनीतान्नभोजनेन तासां परिजनतया भोजनानन्तरं तालवृन्तादिग्रहणादिमुखेनावस्थानेऽपि तद्व्यपदेशोपपत्तेः । शुकस्य ब्रह्मचर्यादिपरीक्षणमात्रे हि तत्र तात्पर्यमिति सुव्यक्तम् । नैतन्निषिद्धान्नभोजनलिङ्गम् । उत्तरत्र च—"विज्ञाते तु परे तत्त्वे प्रत्यक्षे हृदि शाश्वते । किमवश्यं हि वस्तव्यमाश्रमेषु वनेषु च । एतद्भवन्तं पृच्छामि तत् भवान् प्रब्रवीतु मे ॥" इति शुकेन पृष्टे, जनकेन तेषामेवाश्रमधर्माणां सङ्गत्यागपूर्वकमनुष्ठानमेव ह्युक्तम् ।

यच्च तत्र, 'न विना ज्ञानविज्ञानान्मोक्षस्याधिगमो भवेत् । न विना गुरुसम्बन्धात् ज्ञानस्याधिगमः स्मृतः ॥ आचार्यः प्लाविता तस्य ज्ञानं प्लव इहोच्यते । विज्ञाय कृतकृत्यस्तु तीर्णस्तदुभयं त्यजेत् ॥ त्यज धर्ममधर्मं च त्यज सत्यानृते अपि । उभे सत्यानृते त्यक्त्वा येन त्यजसि तं त्यज ॥' इत्युक्तम् ॥ तत्र, 'तीर्णस्तदुभयं त्यजेत्' इत्यनेन आमोक्षात्तदुपायभूतज्ञानाचारयोरनुवर्तनीयत्वमेवोक्तम् । 'त्यज धर्ममधर्मं च' इति श्लोकस्तु', त्यज धर्ममसङ्कल्पात् त्यजाधर्ममहिंसया । उभे सत्यानृते बुद्ध्वा बुद्धिं परमनिश्चयात्(म्) ॥ इत्यनेन श्लोकेन व्याख्यातार्थत्वात् नासौ त्वदनुगुणः । यत् पुनः श्रीभागवते शुकस्य

परमहंसस्य वेषानुक्त्वा, ''तत्रागमत् भगवान् व्यासपुत्रो यदृच्छया गामटमानोऽनपेक्षः । अलक्ष्यलिङ्गो निजलाभतुष्टो वृतश्च बालैरवधूतवेषः ॥ तं व्यष्टवर्षं सुकुमारपादकरोरुबाह्वंसकपोलगात्रम् । चार्वारुणाक्षोन्नसतुल्यकर्णसुभ्र्वाननं कम्बुसुजातकण्ठम् ॥ निगूढजत्रुं पुथुतुङ्गवक्षसं सावर्तनाभिं वलिवल्गूदरं च । दिगम्बरं वक्रविकीर्णकेशं श्यामं सदापिञ्चिलयाऽङ्गलक्ष्म्या ॥ स्त्रीणां मनोज्ञं रुचिरस्मितेन प्रलम्बबाहुं सुकुमारोत्तमाङ्गम् । प्रत्युत्थिता मुनयस्स्वासनेभ्यः'' इत्यादि–अत्र नग्नचर्यापरत्वाल्लिङ्गस्य निगूहनमलक्ष्यलिङ्ग इत्युक्तम् । यत् पुनराश्वमेधिके प्रोक्तम्, 'राजन् आङ्गिरसः पुत्रस्संवर्तो नाम धार्मिकः । दिशश्चङ्क्रमते सर्वा दिग्वासा मोहयन् प्रजाः ॥ उन्मत्तवेषं बिभ्रत् स चरन् वै तु यथासुखम् । वाराणसीं तु नगरीमभीक्ष्णमुपसेवते ॥ नैव धर्मी न चाधर्मी नचापि हि शुभाशुभी ॥' इत्यादि–तत्रापि 'धार्मिक' इत्युपक्रमात् पुण्यक्षेत्रनिरन्तरसेवनरूपधर्मविशेषनिष्ठत्वस्य चाभिधानात् उन्मत्तवेषधारणमात्रमेवोच्यते ।

यत् पुनः अजगरोपाख्यानं स्वैरानुरूपमुपवर्णयन्ति–तदप्यसत् । तथा हि-, 'केन वृत्तेन वृत्तज्ञ वीतशोकश्चरेन्महीम् । किञ्च कुर्वन् नरो लोके प्राप्नोति परमां गतिम् ॥' इति युधिष्ठिरेण पृष्टो भीष्मः प्रत्याह- ''अत्राप्युदाहरन्तीममितिहासं पुरातनम् । प्रह्लादस्य च संवादं मुनेरजगरस्य च । चरन्तं ब्राह्मणं कञ्चित्तुल्यचित्तमनामयम् ॥ पप्रच्छ राजन् प्रह्लादो बुद्धिमान् प्राज्ञसत्तमः । प्रहादः– 'स्वस्थः शुक्लो मृदुर्दान्तः निर्विवित्सोऽनसूयकः । सुवाक् बहुमतो लोके प्राज्ञश्चरसि बालवत् ॥'' इत्यादिना पूर्वं प्रह्लादप्रश्नेन ब्राह्मणस्य मुमुक्षूपादेया गुणाः प्रदर्शिताः। यत् पुनः तत्रोक्तम् ''धर्मार्थकामकार्येषु कूटस्थ इव लक्ष्यसे । नानुतिष्ठसि धर्मार्थौ न कामे चापि वर्तसे ॥'' इति–तदपि काम्यकर्मादिविषयमेव, अन्यथा उत्तरत्र धर्मोपभोगप्रतिग्रहवचनविरोधात् । प्रह्लादानुयुक्तो हि ब्राह्मणस्तत्र सर्वपदार्थानामनित्यत्वमुक्त्वाऽऽह–'उत्पत्तिनिधनज्ञस्य किं कार्यमवशिष्यते ।

सर्वभूतानि संपश्यन्ननुरक्तानि मृत्युना । सर्वं सामान्यतो विद्वान् कृतकृत्यः सुखं स्वपे ॥ सुमहान्तमपि ग्रासं ग्रसे लब्धं यदृच्छया । शये पुनरभुञ्जानो दिवसानि बहून्यपि ॥ आस्रवत्यपि मामन्नं पुनर्बहुगुणं बहु । पुनरल्पं नः स्तोकं पुनर्नैवोपपद्यते ॥ कणान् कदाचित् खादामि पिण्याकमपि च ग्रसे । भक्षये शालिमांसानि भक्ष्यांश्चोच्चावचान् पुनः ॥ धारयामि च चीराणि शाणक्षौमाजिनानि च । महार्हाण्यपि वासांसि धारयाम्यहमेकदा ॥ शये कदाचित् पर्यङ्के भूमावपि पुनः शये । प्रासादे वापि मे शय्या कदाचिदुपपद्यते ॥ न सन्निपतितं धर्म्यमुपभोगं यदृच्छया । प्रत्याचक्षे न चाप्येनमनुरुन्धे सुदुर्लभम् ॥ अनियतफलभक्ष्यभोज्यपेयं विधिपरिणामविभक्तदेशकालम् । हृदयसुखमसेवितं कदर्यैर्व्रतमिदमाजगरं शुचिश्चरामि ॥ सुखमसुखमनर्थमर्थलाभं रतिमरतिं मरणं च जीवितं च । विधिनियतमवेक्ष्य तत्त्वबुद्ध्या व्रतमिदमाजगरं शुचिश्चरामि ॥ 'अनियतशयनासनप्रकृत्या' इत्यादि । अत्र यथालब्धवृत्तित्वेऽपि प्रपञ्चयमाने धर्म्यमिति धर्मादनपेतत्वमेव सावधानेनोक्तम्; उतरत्रापि निरपेक्षत्वमात्रेण यथालब्धवृत्तित्वं सम्माननपरिहरणमात्रं चोपदिश्यते । 'निस्तुतिर्निर्नमस्कारो निर्द्वन्द्वो निष्प्रतिग्रहः । अरण्ये विचरैकाकी येन केनचिदाश्रितः ॥ येन केनचिदाच्छन्नो येन केनचिदाशितः । यत्र क्वचन शायी स्यात् तं देवा ब्राह्मणं विदुः ॥ निराशिषमनारम्भं निर्नमस्कारमस्तुतिम् । अक्षीणं क्षीणकर्माणं तं देवा ब्राह्मणं विदुः ॥ येन पूर्णमिवाकाशं भवत्येकेन सर्वदा । शून्यं यस्य जनाकीर्णं तं देवा ब्राह्मणं विदुः ॥ यस्मिन् वाचः प्रणश्यन्ति कूपे प्रास्ताः शिला इव । वक्तारं न पुनर्यान्ति तं देवा ब्राह्मणं विदुः ॥ अनुत्तरीयवसनमनुपस्तीर्यशायिनम् । बाहूपधानं शाम्यन्तं तं देवा ब्राह्मणं विदुः ॥ योऽहेरिव गणाद्भीतः सम्मानान्मरणादिव । कुणपादिव च स्त्रीभ्यस्तं देवा ब्राह्मणं विदुः ॥ इत्यादि । 'गृहीतमौनव्रतस्तूष्णींबभूवेत्यादिना जडादिवद्भावनामात्रमभिधीयत इति सुव्यक्तम् ।

यच्च तत्र विपरीतमिव किंचिदुक्तम्, 'यर्हि वा व स भगवान् लोकमिमं

योगस्युत्था(व्युत्थः ?) प्रतीपमिह चक्षाणस्तत्प्रकृतकर्म बीभत्सितमाजगरं नामावस्थितः शयान एवाश्नाति पिबति खादत्यवमेहति' इत्यादि, यच्चैव गोमृगकाकचर्यया व्रजंस्तिष्ठन्नासीनः काकमृगगोवच्चरति पिबत्यवगेहतीत्यादि, तदप्यखिलमजगरगोमृगचर्यारूपलोकावज्ञाहेतुभूतयोगोपकारकव्रतविशेषविषयम्। तत एव च तथाविधस्यैव ऋषभस्य विधिनिषेधकिङ्करत्वमेव ज्ञापितमिति न विरोधः। अत एव हि भक्तिज्ञानवैराग्यलक्षणं पारमहंस्यं' 'धर्ममुपशिक्षमाण' इत्युपक्रमेऽप्युक्तम्। यच्चोतरत्र–'अवधूतं द्विजं कञ्चिच्चरन्तमकुतोभयम्। कविं निरीक्ष्य रमणं यदुः पप्रच्छ धर्मवित्॥ कुतो बुद्धिरियं ब्रह्मन् अकर्तुस्सुविशारदा। यामासाद्य भवांल्लोकं विद्वांश्चरति बालवत्॥ प्रायो धर्मार्थकामेषु विवित्सायां च मानवाः। हेतुनेह समीहन्ते आयुषो यशसःश्रियः॥ त्वं तु कल्पः कविर्दक्षस्सुभगो मितभाषणः। न कर्तुमीहसे किंचित् जडोन्मत्तपिशाचवत्॥ जनेषु मुह्यमानेषु कामलोभदवाग्निना। न तप्यसेऽग्निना मुक्तो गङ्गाम्भस्स्थ इव द्विषः॥ त्वं हि नः पृच्छता ब्रह्मन् आत्मन्यानन्दकारणम्। ब्रूहि स्पर्शविहीनस्य भवतः केवलात्मनः॥'' इति पृष्टेनावधूतेन ब्राह्मणेन-, 'सन्ति मे गुरवो राजन् बहवो बुद्ध्युपाश्रिताः। यतो बुद्धिमुपादाय मुक्तोऽहमिह तान् शृणु॥ पृथिवी वायुराकाश आपोऽग्निश्चन्द्रमा रविः।' इत्युपक्रम्य, 'एते मे गुरवो राजन् चतुर्विंशतिराश्रिताः।' इति गुरुवर्गमुक्त्वा, 'विषयेष्वाविशन् योगी नानाधर्मेषु सर्वतः। गुणदोषव्यपेतात्मा न विषज्येत वायुवत्॥ तेजस्वी तपसा दीप्तो दुर्धर्षोदरभाजनः। सर्वभक्षोऽपि युक्तात्मा नाधत्ते मलमग्निवत्। क्वचिच्छन्न; क्वचित् स्पष्ट उपास्यः श्रेय इच्छताम्। भुङ्क्ते सर्वत्र दातॄणां दहन् प्रागुत्त राशुभम्॥' इत्याद्युक्तम्, तदप्युक्तेनैव न्यायेन योगनिष्ठप्रशंसारूपातिवादात्मकमिति अपिशब्दादिभिरेव लिङ्गैर्व्यक्तम्। उपक्रमे प्रश्नवाक्येनापि निष्परिग्रहत्वनिरभिमानत्वादिकं हि दर्शितम्। तदेव ह्युत्तरेणाप्यभिप्रेतम्। अतो यादृच्छिकसगुणविगुणान्नविवेकत्यागे

सर्वभक्षोक्तेस्तात्पर्यम् । यच्च यादृच्छिकान्नव्यतिरेकेणापि पाणिपात्रभोजनमपि दृष्टमित्युच्यते, यथा–, 'स्तोंक स्तोकं ग्रसेत् ग्रासान् देहो वर्तेत यावता । गृहान् अहिंसन् आतिष्ठेद् वृत्तिं माधुकरीं मुनिः ।। सायन्तनं श्वस्तनं वा न संगृह्णीत भिक्षितम्। पाणिपात्रोदरामा(म)त्रो मक्षिकेव न संग्रही ।। गुणैर्गुणानुपादत्ते यथाकालं विमुञ्चति । न तेषु सज्जते योगी गोभिर्गा इव गोपतिः ।।' इत्यादि; तदपि स्थास्नुपात्रपरित्यागादौ तत्परम्। परिव्राजां भिक्षाकाले शीर्णपर्णपुटेनापि भिक्षणस्य कैश्चिदनुमतेः । यच्च तदुत्तरत्रेत्युपात्तम्-, 'ज्ञाननिष्ठो विरक्तो वा मद्भक्तो वाऽनपेक्षकः । सलिङ्गान् आश्रमांस्त्यक्त्वा चरेदविधिगोचरः ।। बुधो बालकवत् क्रीडेत् कुशलो जडवच्चरेत् । वदेदुन्मत्तवद्विद्वान् गोचर्यां नैगमश्चरेत् ।। यदृच्छयोपपन्नान्नमद्याच्छ्रेष्ठमुतावरम् । तथा वासस्तथा शय्यां प्राप्तं प्राप्तं भजेन्मुनिः ।।' इत्यादि; तदपि क्रियमाणेष्वेवाकर्तृत्वानुसन्धानविधौ तत्परमिति प्रागुक्तनयेन नेतव्यम् । अन्यथा तत्रैव कथम्, अविधिगोचरश्चरेदित्यादिविधिर्घटेत ?

यत्तु वाररुचे स्वरूपग्रन्थ इत्युपात्तम्–'देहजात्यादिसम्बान्धान् वर्णाश्रमसमन्वितान्। भावानेतान् परित्यज्य स्वं भावं भावयेद् बुधः ।। सर्वोपाधिविनिर्मुक्तं चैतन्यं यन्निरन्तरम्। तत् ब्राह्मणमिति ज्ञात्वा कथं वर्णाश्रमी भवेत् ।।' इति । तदपि वररुचेः ऋषिभावनयोपदेशपरं चेत्– परिगृहीततमऋष्यन्तरस्मृत्यन्तरादिवचनाविरोधेन यथावस्थितपरिशुद्धात्मस्वरूपानुसन्धानपूर्वकवर्णाश्रमधर्मविशेषविधिपरतया योज्यम्। उपपत्तिपरं चेत्–सर्वधर्मोपप्लवमूलकुतर्ककल्ककल्पितत्वेन प्रामाणिकैर्बीभत्सनीयम्; बृहस्पतिप्रणीतलोकायतादिग्रन्थवत्। विदुरवृत्तान्तोऽपि प्रागुक्तन्यायेन व्याख्यातः।

यद्यपि, 'जपस्तपस्तीर्थयात्रा प्रव्रज्या मन्त्रसाधनम् । देवताराधनं चेति स्त्रीशूद्रपतनानि षट् ।।' इत्यादि स्त्रीशूद्रादिषु भर्तृत्रैवर्णिकशुश्रूषाबहिर्भूतजपतपः-

प्रभृतिषु पतनस्मृतिः, तथाऽपि क्षत्रियविशेषस्य सन्न्यासाभ्यनुज्ञानवत् शूद्रादेरपि केषुचित् व्रतेष्वनुज्ञानमस्ति। न च तस्य यज्ञोपवीतादिपरित्यागलक्षणदोषावकाशः, प्रागेव तदभावात्। ये च नग्नचर्यामातिष्ठन्ते महात्मानः, ते हि ब्रह्मचर्यकाष्ठामधिष्ठाय तथा भवन्ति । ‘ऋषयो वातरशनाः’, ‘वातरशना ह वा ऋषयश्श्रमणा ऊर्ध्वमन्थिनः’ इति हि श्रूयते। न पुनर्भवन्त इव पट्टांशुकादिभाण्डागारशालिनः क्षितिसुरचण्डालक्षीरसुरादिभेदत्यजः परकलत्रशरणाः पशुमृगसधर्माणः प्रजननसन्तताः श्रूयन्ते। सनत्कुमारादीनां नग्नता निरयबाल्यावस्थतया, केवलब्रह्मभावनाभावितात्मानः कुमारा हि ते महात्मानः श्रूयन्ते । पशुपतेर्नग्नचर्या तु पाशुपतव्रतविशेषाङ्गरूपत्वात् तत्र धर्मत्वसदसद्भावयोरपि त्रयीधर्मनिष्ठैरनुपादेयैव। यत्पुनर्मुग्धेन्दुशेखरस्य मुनिधर्मदारमोहनादिकमवैदिकाचारजालम्, तत्र वैराग्यशालिनस्तस्य मोहनाभिसन्धिविरहः प्रस्पष्टं पठितः । अन्यथाऽपि तस्येश्वरत्वमभ्युपगच्छतामीश्वरत्वादेव परिहृतम्। ‘न देवचरितं चरेत्’ इति ह्याहुः। लोकवेदविरुद्धयोरप्यलेपः स्वतन्त्रश्चेति हि महापाशुपताः प्राहुः । अनीश्वरत्वपक्षे तु तेजोविशेषेणैव सोढव्यम्। स्मरन्ति हि, ‘दृष्टो धर्मव्यतिक्रमः साहसं च पूर्वेषाम्। तेषां तेजोविशेषेण प्रत्यवायो न विद्यते । तदन्वीक्ष्य प्रयुञ्जानः सीदत्यवरजः’ इत्यादि।

एतेन सर्वेश्वरस्य भगवतो वसुदेवनन्दनस्य स्वच्छन्दलीलया गोपवधूदर्शन(?) व्याकुलीकरणं व्याख्यातम् । परिहृतं चैतदकर्मवश्यतया भगवत्पराशरादिभिः; कामाद्गोप्य’ इति भगवत्यनुरागानुवृत्तिरपवर्गायैव जायत इति चोक्तम्। ननु धर्मसंस्थापनार्थाय संभवस्तत्क्षोभकरणं चेति कथमिदमुपपद्यते॥ न, उक्तोत्तरत्वात्। नन्दगोपनन्दनत्वाभिमान- मभिनयतस्तस्य न तावत् तदानीं वर्णाश्रमाचारानुवृत्तिनियमः। आभीरकन्यका अपि भगवन्तमेव भर्तारमभ्यर्थ्य जन्मान्तरचरितव्रता दिव्यप्रकृतय एवेति तास्वप्सरःसमाधिरनुसन्धेयः । तत्तदभिमतफलप्रदानं

चेश्वरस्यादोषायेति। यदा तु भगवान् वसुदेवतनयतया प्रतिबोधमभिनयन् यदुवंशोदितं क्षत्रधर्ममनुप्राविशत्, तदा सावधान एव सर्वदा सर्वान् धर्मानन्वपालयत्। तथा हि सर्वत्र कथ्यते–'न मे पार्थास्ति कर्तव्यं त्रिषु लोकेषु किञ्चन। नानवाप्तमवाप्तव्यं वर्त एव च कर्मणि॥' इति। तथा, 'कृतोदकः कृतजपो हुताग्निः समलंकृतः। तत उद्यन्तमादित्यमुपातिष्ठत माधवः॥' इति। तथा अश्वत्थामास्त्रपावकप्लुष्टविराटतनयागर्भसञ्जीवनावसरे साधिकषोडशस्त्रीसहस्ररसिको बृन्दावनविहारी वल्लवीबृन्दनिवि(र्वि) ष्टयौवनारम्भो भगवान् स्वयमेवावोचत्, ''यदि मे ब्रह्मचर्यं स्यात् सत्यं च मयि तिष्ठति। अव्याहतं ममैश्वर्यं तेन जीवतु बालकः॥'' इति।

ननु श्वेताश्वतरोपनिषदुपसंहारे तदधिकारितया अत्याश्रमित्वोपपादनादप्राप्तार्थत्वेन तद्विधिरिति चेन्न; अतिशयिताश्रमविशेषनिष्ठ इति वा, ब्रह्मचर्यादित्रयातिक्रान्ताश्रमविशेषनिष्ठ इति वा, अन्येन वा केनचिदविरुद्धेन निमित्तेन तन्निर्वाहात्। अन्यथा स्फुटतरार्थश्रुतिस्मृतीतिहासादिशतकोपप्रसङ्गः॥ 'शारीरं केवलं कर्म कुर्वन्', 'सर्वारम्भपरित्यागी', 'सर्वधर्मान् परित्यज्य' इत्यादिभिः सर्वधर्मपरित्यागोक्त्या चानाश्रमित्वसिद्धिरिति चेन्न; फलसङ्गकर्तृत्वादिविषयतया वा विधीयमानधर्मव्यतिरिक्तविषयतया वा यथासंभवं तद्व्यवस्थापनस्य तत्रतत्रैवोपक्रमादिभिर्व्यक्तत्वात्। 'सन्न्यासस्य महाबाहो तत्त्वमिच्छामि वेदितुम्'' इति सान्यासत्यागतत्त्वबुभुत्सयोपसेदुषे धनञ्जयायोक्तं भगवता, 'एतान्यपि तु कर्माणि सङ्गं त्यक्त्वा फलानि च। कर्तव्यानीति मे पार्थ निश्चितं मतमुत्तमम्॥ नियतस्य तु संन्यासः कर्मणो नोपपद्यते। मोहात् तस्य परित्यागस्तामसः परिकीर्तितः॥' इति। एतेन, 'यस्त्वात्मरतिरेव स्यादात्मतृप्तश्च मानवः। आत्मन्येव च सन्तुष्टः तस्य कार्यं न विद्यते॥ नैव तस्य कृतेनार्थो नाकृतेनेह कश्चन। न चास्य सर्वभूतेषु कश्चिदर्थव्यपाश्रयः॥' इत्यादीन्यपि वाक्यानि सर्वकार्यस्वरूपनिषेधपराण्यपि मुक्तदशां समाधिदशां वाऽऽश्रिस्य निर्वाह्याणि। अतो यथायथ-

माश्रमविशेषविषयो वा, फलसङ्गकर्तृत्वादिविषयो वा सन्न्यासपरित्यागादिवादः, न पुनः स्वैरपर्यवसित इति सिद्धम्।

एतेन, ‘न कर्मणा न प्रजया धनेन त्यागेनैके अमृतत्वमानशुः’, ‘न्यास एवात्यरेचयत्’, ‘तस्मान्न्यासमेषां तपसामतिरिक्तमाहुः’ इत्यादि, ‘किमर्था वयमध्येष्यामहे किमर्था वयं यक्ष्यामहे किं प्रजया करिष्यामः येषां नो अयमात्मा ब्रह्म(अयं)लोक इत्यादिकमपि धर्मविशेषादिविषयतया तत्रत्यात्मसमर्पणादिविषयतया वा यथायथं निर्वोढव्यम्। अतः सर्वाश्रमपरित्यागोक्तिसंभवेऽपि प्रागुक्त एव न्यायः। न च तथाऽस्ति। अपितु, ‘त्रयो धर्मस्कन्धाः इत्याश्रमान् विधाय’ ‘ब्रह्मसंस्थोऽमृतत्वमेतीत्याश्रमनिष्ठानामेव ब्रह्मविदाममृतत्वं श्रूयते।’ ‘स खल्वेवं वर्तयन् यावदायुषं ब्रह्मलोकमभिसंपद्यते न च पुनरावर्तते न च पुनरावर्तते इति यावज्जीवं गृहस्थधर्मनिष्ठस्य ब्रह्मविदोऽपुनरावृत्तिराम्नाता।’ ‘यो वा एतदक्षरं गार्गि’ इत्यादौ च ज्ञानरहितकर्मणामन्तवत्फल- साधनत्वं ज्ञानपूर्वककर्मणां स्थिरफलसाधनत्वं चोक्तम्। अतो न कदाचिदपि यावज्जीवं स्ववर्णाश्रमोचितधर्मस्वरूपत्यागसंभवः। यानि चान्यानि वाक्यानि सम्प्रतिपन्नश्रुतिस्मृतिष्वदृश्यमानानि स्वाचारानुरूपमतपरिचर्यया केषुचिदप्रसिद्धेषु वा नष्टकोशेषु वा अनिरूपितमूलाग्रेषु वा पुराणेषु प्रक्षिप्य पठन्ति पापिष्ठाः, तानि प्रत्यक्षश्रुत्यादिपरिशीलनशाल़िनीषु गरिष्ठगोष्ठीषु नावकाशं लभन्ते। तत्प्रामाण्येऽपि, ‘‘प्रसिद्धाविरोधेन नेतव्यम्’’ इत्यत एवै(व ?) तान्यपि निर्व्यूढानि।

न च तृतीयः; अनाश्रमित्वाक्षेपकवचनादर्शनात्॥ जीवन्मुक्ते श्रुत्यर्थापत्त्यैवानाश्रमित्वसिद्धिरिति चेन्न; तद्दूषणादेव तदसिद्धेः॥ अस्तु नित्यमुक्तिवशात् सर्वाश्रमत्याग इति चेन्न; तस्या अपि मोक्षोपायोपदेशकशास्त्रादेव विस्तरतस्तत्प्रकरणे निषेधात्।

चतुर्थस्तु विपरीत एव। अथ गौडपाद-हरिप्रभृतिभिराचरितत्वात्

सर्वाश्रमपरित्यागोऽस्माभिः स्वीकृत इति चेत्; हन्त! सदाचारनिदर्शनतया महान्त इमे दुर्ब्राह्मण-शूद्रसन्तानादयः शिष्टा निर्दिष्टाः, यदनुविधायिनोऽपि यूयं शिष्टैर्बहिष्क्रियध्वे । हन्तैवं सति धर्मकीर्तिप्रभृतिभिः परिगृहीतत्वात् सौगत लोकायतिकादिसमय एव किं न स्वीक्रियते ? न च वस्तत्तत्परिग्रहेऽपि मुक्तिः प्रतिबध्यते । सत्यम्, तथापि येनाकारेण यावत् जीवं जीवनाय लोको रञ्जयितु शक्यः, तेन यथायथं वर्तामह इति चेत्, सत्यमिदमन्तर्गतमुद्गीर्णं भवता । तदेव चार्वाकसमयरहस्यमिति तत्प्रहारेण प्रहृतमिदम् । न हि चार्वाकान् भवन्तोऽपि गोष्ठीषु व्यक्तमन्तर्भावयन्ति । भजन्तु वा प्रकाशं चार्वाकाभिख्याम् । ननु ब्रह्मविच्छब्दोऽस्मासु प्रयुज्यमानो दुरपह्नव इति चेत्—सत्यम्; भ्रान्तिमूलतया निरर्थकोऽयमिति ब्रूमः । दिगम्बरादिष्विदानीमृष्यादिशब्दप्रयोगवत् । तत्त्वविद इति भवता स्वयं स्थानेषु समाहूयामह इति चेत्—किमतः ? ।। तत्त्ववित्त्वमेवेति चेन्न; तस्य विडम्बनपरत्वात्, भवदधीनकार्यलाभकालप्रतीक्षणाद्वेति ।

नापि पञ्चमः; अधर्मत्वप्रसङ्गात् । यद्यपि स्वाश्रमधर्मानुष्ठानक्लेशादात्मानुसन्धानविच्छेदभयेन सर्वधर्मपरित्याग इति तु यथाहृदयं सत्यं वचः, तथापि श्रुतिस्मृत्यादयः शक्तानां धर्मलोपे प्रकुप्येयुरि(रन्नि)ति प्रायश्चितेन प्रतिसन्धानं वा निरयपतनं वाऽवश्यंभावीति निश्चीयताम्। अयं हि राजसस्त्यागः। यथोक्तम्, 'दुःखमित्येव यः कर्म कायक्लेशभयात् त्यजेत् । स कृत्वा राजसं त्यागं नैव त्यागफलं लभेत् ।।' इति ।

षष्ठस्तु हेतुस्तदा शोभते, यदि अशक्तिरनाहार्या परमार्थभूता स्यात् । न ह्यशक्तमधिकृत्य शास्त्राणि प्रवर्तन्ते। न च तत्त्वतोऽशक्तिः, अन्येभ्यः शक्तेभ्योऽनुतिष्ठद्भ्यो विशेषादर्शनात्। स्वहृदयविसंवादाच्च। सन्ति च धर्मसाक्षिणोऽन्येऽपि, "आदित्यचन्द्रावनिलोऽनलश्च द्यौर्भूमिरापो हृदयं यमश्च। अहश्च रात्रिश्च उभे च सन्ध्ये धर्मश्च जानाति नरस्य वृतम् ।।" इति । विधुरत्वादिदशास्वपि

सर्वसामान्यधर्मादेरनुवर्तनीयत्वं तच्चलने च प्रायश्चित्तं तदकरणे प्रत्यवायश्चेति।

नापि सप्तमः; सामान्यनिर्देशमात्रेण तदसिद्धं विशेषतस्तदनिरूपणादिति न कदाचिदपि बुद्धिपूर्वपापानामलेपसंभव इति।

ननु भवन्तोऽप्यन्त्यजपर्यन्तान् भगवद्भक्ता इति धावन्तः समाचारविप्लवाय जायन्त इति समोऽयम्; अस्माकं पुनः को विशेष इति चेत्-मैवम्; किं त्वया मुक्तानां तेषां प्रतिष्ठार्चनादिरूप- संभावनमुपप्लवकारणतयोपन्यस्तम्, उत जीवतामेवावज्ञादिपरिहारेणान्येभ्य उत्कर्षभावनमिति । न प्रथमः; तेषां भगवदुपासनप्रभावविशेषनिश्शेषिताविद्याकर्मवासनादेहसंबन्धादीनामाविर्भूतभगवत्साम्यानां जातिविशेषसंबन्धाभावेऽपि भक्तप्रतिष्ठार्चनशास्त्रैः पुरुषान्तरव्यावर्तनाय पूर्वाकारमुपलक्षणीकृत्य तत्समाने बिम्बे सन्निधाप्य सभाजनविषयतया प्रतिपादितानां ततच्छास्त्रप्रामाण्यानुसारेण ततदुचितसभाजनं विधीयमानं कथं पुनरुपप्लवकारणमुन्नीतं भवता ? मुक्तौ अनन्तगरुडविष्वक्सेनतुल्याः, 'इमाँल्लोकान्' इति श्रुत्या भगवदनुसञ्चरणादिकं कुर्वन्तीति सिद्धम् । नापि द्वितीयः; अनेनैव शरीरेण विद्यमानेषूपप्लवपर्यन्तसंभावनस्य तेष्वभावात् । तथाविधेभ्योऽन्येभ्यस्तेषु भगवद्भक्त्या संजातमतिशयमाद्रियामहे; न पुनर्जात्यादिभेदमेव भवन्त इव स्वरूपतो निह्नवामहे, येनाऽऽचारविप्लवः स्यात्। न च जात्याद्यनुरूपसंबन्धादिवर्जनात् भगवद्भक्तेष्वपि तेष्ववज्ञादिप्रसङ्ग इति वाच्यम्; तत्कालोचितस्पर्शवर्जनेऽपि स्त्रीधर्मिण्यामात्मजनन्यामिव मानसिकवाचिकसंभावनासामर्थ्यवैभवेन पुराणेतिहासभगवद्वाक्यशतनिर्णीतेन शास्त्रानुसारिणामवज्ञाप्रसङ्गाभावात् । उक्तं च भगवता, 'मद्भक्तान् शूद्रसामान्यान्नावमन्येत बुद्धिमान्' इति। यथा मतङ्गज-तुरङ्गम-विहङ्गम-गो-मृगादिषु पुरोहितामात्यसामन्तान्तःपुरकुब्जकिरात-वामनबधिरादिषु च महीपतिसमाश्रयणमहनीयतां गतेषु विशेषादनवमन्तव्येषु तत्तज्जातिगुणवैषम्यं

व्यवस्थितमेवानुपाल्यते– तथा भगवत्समाश्रितेष्वपीति न कश्चिद्दोषः; राजाधिराजम्य भगवतो राजवदुपचार इति न्यायात्। आदिभक्तानामनन्तगरुडादीनामिच्छावतारभेदा इति (इमे इति च ?) पुराणप्रसिद्धम् । तेन तेषां प्रतिष्ठार्चनादिकं रामकृष्णादिभगवदवतारादीनामिवेति भक्तप्रतिष्ठाशास्त्रानुसारेण निर्णेतव्यमिति ॥

इति शतदूषण्याम् अलेपकमतभङ्गवादः पञ्चषष्टितमः ॥ ६५ ॥

अत्र सर्वत्र विष्णुपुराणादिश्लोका उद्धृता ब्रह्मज्ञानिनामपि निषिद्धाचरणं वर्ज्यमिति प्रतिपादयन्तीति स्पष्टार्थत्वात् मूलादेव सर्वमवगम्यते। अवशिष्टभागोऽपि स्पष्टार्थ:।

इति श्रीशतदूषणी व्याख्यायां तात्पर्यप्रकाशिकायां
अलेपकमतभङ्गवाद: पञ्चषष्टितम: ॥

* * *

अथ परमते सूत्रस्वारस्यभङ्गवादः षट्षष्टितमः ॥ ६६ ॥

श्लो. नमोऽस्तु ब्रह्मणे तस्मै बादरायणरूपिणे।
यस्यैव ब्रह्ममूत्राणां रचना सगुणायते॥
अद्वैतमतनिष्ठानामनुष्ठानमपाकृतम्।
ब्रह्मसूत्रार्थवैरूप्यं तेषामथ निरूप्यते॥

यदाहुः—आपादचूडं ब्रह्मसूत्रेषु निर्विशेषं ब्रह्मैवार्थः प्रपञ्चमिथ्यात्वं च स्पष्टमुपपाद्यते। तथा हि—यद्ब्रह्म जिज्ञास्यतया प्रकान्तम्, तदेव हि, 'नाना नास्ति' इति श्रुतिप्रामाण्यप्रागल्भ्यात् तदनुसारिसूत्रस्वारस्याच्च निर्विशेषमिति निश्चिन्वन्ति महान्तः। तत(त्र) बहुषु सूत्रेषु तद्विषयभूतासु श्रुतिषु च एकवचनान्तनिर्देशादात्मैवयं स्वरसतः प्रतीयते। स चाऽऽत्मा पुनः, 'न स्थानतोऽपि परस्योभयलिङ्गं सर्वत्र हि' इत्यादिभिः सूत्रकलापैर्निर्गुणत्वेन निर्णीतः। 'भेदादिति चेन्न प्रत्येकमतद्वचनात्', 'अरूपवदेव हि तत्प्रधानत्वात्', 'आह च तन्मात्रम्' इत्यादिभिरनेकेष्वधिकरणेषु भेदप्रसङ्गो निराकृतः। ब्रह्मव्यतिरिक्तानां पदार्थानां कात्स्न्र्येनानभिव्यक्तस्वरूपत्वम्, 'मायामात्रं तु कात्स्न्र्येनानभिव्यक्तस्वरूपत्वात्' इत्यादिभिर्निपुणतरमुपपादितम्। (एवं मोक्षोपायोपदेशदशायाम्, 'आत्मेति तु' इति ब्रह्मात्मैक्यानुसधानं सूत्रितम्। तथा ?) 'संपद्याविर्भावः स्वेन शब्दात्' इति मुक्तस्य स्वरूपाविर्भावमुपपाद्य, 'अविभागेन दृष्टत्वात्' इति ब्रह्मस्वरूपाविभाग एव फलतया निर्दिष्टः। इत्थमापादचूडं शरीरकशास्त्रे बहुषु सूत्रेषु निष्प्रपञ्चनिर्विशेषब्रह्मात्मैक्यस्य प्रतिपन्नत्वादुपात्तकतिपयसूत्रव्यतिरिक्तानि सूत्राण्यपि निर्विशेषमेव परं ब्रह्मोपपादयन्तीति नीतिविदां निर्णयः। यानि पुनः सगुणब्रह्मप्रतिपादकानि वाक्यानि, 'तानि गरुडमात्मानं जानीयात्' इत्यादिष्विव तत्तदुपासनार्थकल्पिताकारविशिष्टब्रह्मपराणि क्रममुक्तिन्यायेन परम्परया मोक्षविश्रान्तानि। क्वचित्तु कल्पितेनाऽऽकारेण शाखाचन्द्रोपदेशन्यायेन

उपलक्षणतया दर्शनेन ब्रह्मस्वरूपोपदेशपराणि । व्यास एवास्माकमादिगुरुरुपनिषदनुसारिभिः सर्वैरेवास्माभिरनुसर्तव्यः । न च प्रमाणविरोधात् ब्रह्मसूत्राणामप्रामाण्यम्, अन्यपरत्वं वा; तद्विरुद्धानामेव प्रमाणानामप्रमाणत्वात् अन्योन्यतस्तेषामाभिमानिक(?)- प्रमाणानां विरोधाच्च । अभिमानप्रतिष्ठितं हि तत्तत्सिद्धान्तपरिगृहीतानां प्रमाणानां प्रामाण्यम्; अन्यथा स्वसिद्धान्तविरोधप्रसङ्गात् ततश्च प्रमाणविरोधेऽप्यविरोधेऽपि सूत्रस्वारस्यानुरोधेन बादरायणसिद्धान्तोऽयमिति निश्चिते, तिष्ठ वा तत्र हृदयाक्रोशेन, तत्परित्यागेन वा हृदि विन्यस्तहस्तः पक्षान्तराण्यधिशेष्वेति ॥

अथ परमते सूत्रस्वारस्यभङ्गवादः षट्षष्टितमः ॥

यदाहुरित्यादि । ब्रह्मसूत्राणि आदित आरभ्य अन्तपर्यन्तं निर्विशेषं ब्रह्म प्रपञ्चमिथ्यात्वं च प्रतिपादयन्ति । तथा हि - “अथातो ब्रह्मजिज्ञासा” इति यत् ब्रह्म जिज्ञास्यतया प्रक्रान्तं तदेव निर्विशेषम् इति “नेह नानास्ति किंचन” इति श्रुतिप्रामाण्यात् तादृशश्रुत्यनुसारिसूत्रस्वारस्याच्च निश्चिन्वन्ति महान्तः । तत्र “आनन्दमयोऽभ्यासात्” “आकाशस्तल्लिङ्गात्” इत्यादिषु बहुषु सूत्रेषु तद्विषयभूतासु “आत्मा वा इदमेक एव” “आत्मा जनानां सर्वात्मा” “आकाशादेव समुत्पद्यन्ते” “आत्मन आकाशः संभूतः” इत्यादिश्रुतिषु च आत्मनः एकवचनान्तेन निर्देशाच्च आत्मैक्यं तावत् स्वरसतः प्रतीयते । स चात्मा निर्गुण इति “न स्थानतोऽपि परस्योभयलिङ्गं सर्वत्र हि” “भेदादिति चेन्न प्रत्येकमतद्वचनात्” “अरूपवदेव तत् प्रधानत्वात्” “आह च तन्मात्रम्” इत्यादिभिः सूत्रैः अवगम्यते । तत्र शांकरं भाष्यम् - सन्त्युभयलिङ्गाः श्रुतयः ब्रह्मविषयाः “सर्वकर्मा सर्वकमः सर्वगन्धः सर्वरसः” इत्येवमाद्याः सविशेषलिङ्गाः । “अस्थूलमनण्वह्रस्वमदीर्घम्” इत्येवमाद्याश्च निर्विशेषलिङ्गाः । किमासु श्रुतिषूभयविधं ब्रह्म प्रतिपत्तव्यमुतान्यतरलिङ्गम्” यदाप्यन्यतरलिङ्गं तदापि किं सविशेषमुत निर्विशेषमिति मीमांस्यते । तत्रोभयलिङ्गश्रुत्यनुग्रहादुभयलिङ्गमेव ब्रह्मेत्येवं

प्राप्ते ब्रूमः - न तावत् स्वत एव परस्य ब्रह्मणः उभयलिङ्गत्वमुपपद्यते । न ह्येकं वस्तु स्वत एव रूपादिविशेषोपेतं तद्विपरीतं चेत्यवधारयितुं शक्यं, विरोधात् । अस्तु तर्हि स्थानतः पृथिव्याद्युपाधिसंयोगात् इति ; तदपि नोपपद्यते । न ह्युपाधियोगादपि अन्यादृशस्य वस्तुनः अन्यादृशः स्वभावः संभवति । न हि स्वच्छः सन् स्फटिकः अलक्तकाद्युपाधियोगात् अस्वच्छो भवति । भ्रममात्रत्वात् अस्वच्छताभिनिवेशस्य । उपाधीनां चाविद्याप्रत्युपस्थापितत्वात् । अतश्च अन्यतरलिङ्गपरिग्रहेऽपि समस्तविशेषरहितं निर्विकल्पकमेव ब्रह्म प्रतिपत्तव्यम्, न तद्विपरीतम् । सर्वत्र हि ब्रह्मस्वरूपप्रतिपादनपरेषु वाक्येषु ''अशब्दमस्पर्शमरूपमव्ययम्'' इत्येवमादिषु अपास्तसमस्तविशेषमेव ब्रह्मोपदिश्यते ।

न भेदादिति चेन्न प्रत्येकमतद्वचनात्

यदुक्तं निर्विकल्पकमेकलिङ्गकमेव ब्रह्म,नास्य स्वतः स्थानतो वा उभयलिङ्गत्वमस्तीति, तन्नोपपद्यते । कस्मात् भेदात् । भिन्ना हि प्रतिविद्यं ब्रह्मण आकारा उपदिश्यन्ते। चतुष्पात् ब्रह्म,षोडशकलं ब्रह्म,वामनीत्वादिलक्षणं ब्रह्म इत्येवंजातीयकाः । तस्मात् सविशेषत्वमपि ब्रह्मणोऽभ्युपगन्तव्यमिति चेत् - न । प्रत्येकम् अतद्वचनात् ।प्रत्युपाधिभेदं हि अभेदमेव ब्रह्मणः श्रावयति शास्त्रम् - '' यश्चायमस्यां पृथिव्यां तेजोमयोऽमृतमयः पुरुषः'' इत्यादि । अतश्च न भिन्नाकारयोगो ब्रह्मणः शास्त्रीय इति शक्यते वक्तुम् । भेदस्योपासनार्थत्वात् अभेदे तात्पर्यात् ।

अरूपवदेव हि तत् प्रधानत्वात्

रूपाद्याकाररहितमेव ब्रह्मावधारयितव्यं न रूपादिमत् । कस्मात् । तत्प्रधानत्वात् ''अस्थूलमनणु'' इत्येवमादिवाक्यानि निष्प्रपञ्चब्रह्मात्मतत्त्वप्रधानानि नार्थान्तरप्रधानानीत्येतत् प्रतिष्ठापितं '' तत्तु समन्वयात्'' इत्यत्र । तस्मादेवंजातीयकेषु वाक्येषु यथाश्रुतं निराकारमेव ब्रह्म अवधारयितव्यम् । इतराणि तु आकारवद्ब्रह्मविषयाणि वाक्यानि न तत्प्रधानानि । उपासनविधिप्रधानानि हि तानि ।

आह च तन्मात्रम्

आह च श्रुतिः चैतन्यमात्रं विलक्षणरूपान्तररहितं निर्विशेषं ब्रह्म '' प्रज्ञानघन एव'' इति ।ब्रह्मव्यतिरिक्तानामित्यादि । '' मायामात्रं तु'' इति सूत्रं शांकरभाष्ये इत्थं व्याख्यातम्

अत्रोच्यते, 'अथातो ब्रह्मजिज्ञासा' इति सूत्रमेव तावत् अद्वैतिनां न घटते; चिन्मात्रस्य स्वप्रकाशत्वेन ज्ञानाविषयतया जिज्ञास्यत्वायोगात्। आरोपितगुणविग्रहादिविशिष्टस्याविद्यापरिणतिरूपत्वेन सुतरां जिज्ञास्यत्वायोगात्; ब्रह्मशब्दार्थानुपपत्तेः प्रागेव प्रपञ्चितत्वाच्च। तथा, 'जन्माद्यस्य यतः' इति सूत्रमपि ब्रह्मस्वरूपलक्षणोपदेशपरम्। लक्षणं चासाधारणधर्मः। स कथं निर्विशेषे

“ तुशब्दः पक्षं व्यावर्तयति। नैतदस्ति यदुक्तं सन्ध्ये सृष्टिः पारमार्थिकीति। मायैव सन्ध्ये सृष्टिः न परमार्थगन्धोऽप्यस्ति। कुतः, कात्स्न्र्येनानभिव्यक्तस्वरूपत्वात्। न हि कात्स्न्र्येन परमार्थवस्तुधर्मेणाभिव्यक्तस्वरूपःस्वप्नः।”- इति। यद्यपि मायामात्रमिति सूत्रं स्वाप्नपदार्थमिथ्यात्वपरतयैव शंकराचार्यैः भाषितं न जाग्रत्पदार्थानां मिथ्यात्वपरतया, तथापि स्वाप्नपदार्थदृष्टान्तेन जाग्रत्पदार्थमिथ्यात्वमपि तदभिमतमित्याशयेन आचार्यैः ब्रह्मव्यतिरिक्तानां पदार्थानामिति सामान्यत उक्तम्। **आत्मेति तु** इति। तत्सूत्रमित्थं व्याख्यातम् - आत्मेत्येव परमेश्वरः प्रतिपत्तव्यः........ तस्मादात्मेत्येवेश्वरे मनो दधीत” - इति। **अविभागेनेति**। अविभक्त एव परेणात्मना अवतिष्ठते मुक्तः, कुतः दृष्टत्वात्। “तत्त्वमसि” “ अहं ब्रह्मास्मि” इत्येवमादिनि वाक्यानि अविभागेनैव परमात्मानं दर्शयन्ति इति सूत्रार्थः।

सिद्धान्तः

अत्रोच्यत इत्यादि। आदिमम् “ अथातो ब्रह्मजिज्ञासा” इति सूत्रमेव अद्वैतिनां मते न घटते। ब्रह्मणः चिन्मात्रस्वरूपस्य स्वयंप्रकाशस्य ज्ञानविषयत्वाभावेन ब्रह्मविषयकज्ञानविषयकेच्छारूपायाः जिज्ञासायाः असंभवात्। अत एव जिज्ञास्यत्वमपि तस्य न संभवति। जिज्ञास्यत्वस्येच्छाविषयीभूतज्ञानविषयत्वरूपत्वात्। किं च चैतन्यमात्रस्वरूपस्य ब्रह्मशब्दवाच्यत्वं न संभवतीति प्रथमवाद एव निरूपितत्वादिति भावः। अथ तन्मते द्वितीयसूत्रं न घटत इत्याह - **तथेति**। “जन्माद्यस्य यतः” इति सूत्रेण हि जगज्जन्मादिहेतुत्वं ब्रह्मणो लक्षणमित्युच्यते। निर्विशेषे ब्रह्मणि जगज्जन्मादिकारणत्वाभावात् लक्षणस्यासंभव इति भावः। असाधारणधर्मस्यैव लक्षणत्वात्। ननु जगज्जन्मादिहेतुत्वं ब्रह्मणः उपलक्षणलक्षणम्। लक्ष्यावृत्तित्वे सति लक्ष्यव्यावर्तकं हि उपलक्षणम्। तत्तु

संघटते ? उपलक्षणत्वेऽपि सुतरां सविशेषत्वमेव । उपलक्षणाकारोपलक्ष्याकारपूर्वप्रतिपन्नाकारविभागविरहात् निर्विशेषस्योपलक्ष्यत्वमपि न संभवतीति प्रागेव प्रपञ्चितम् । सामानाधिकरण्यस्य सविशेषार्थनिष्ठत्वस्य न्यायप्राप्तत्वात् सत्यज्ञानादिवाक्ये स्वरूपलक्षणवर्णनापटाटोपोऽप्युत्पाटनीय इत्युक्तंप्रागेव । शास्त्रयोन्यधिकरणमपि शास्त्रगम्यत्वाभावादेव निरस्तम् । गम्यत्वे वा प्रमाणविषयत्वात् दृश्यत्वमेव पार्ष्णिं गृह्णाति । व्यावहारिकशास्त्रगम्यत्वं तु

ब्रह्मणः संभवतीत्यत आह - **उपलक्षणत्वेऽपीति** । जगज्जन्मादिहेतुत्वस्येति शेषः । उपलक्षणाकारः उपलक्ष्याकारः पूर्वप्रतिपन्नाकारः इति आकारत्रयं लक्ष्ये यद्यस्ति तदैव लक्षणस्योपलक्षणत्वं संभवति । यथा यत्रायं सारसः स देवदत्तकेदार इत्यत्र लक्ष्ये देवदत्तकेदारे सारससंबन्धः उपलक्षणाकारः । देवदत्तीयत्वमुपलक्ष्याकारः । केदारत्वं पूर्वप्रतिपन्नाकारः। एतादृशाकारत्रयरहिते निर्विशेषे ब्रह्मणि उपलक्षणलक्षणमपि न संभवतीति भावः ।

ननु ब्रह्मणः जगज्जन्मादिकारणत्वरूपं तटस्थलक्षणं मा भूत् । सत्यत्वज्ञानत्वादिरूपं स्वरूपलक्षणं तु भवितुमर्हति । तथा हि - समानाधिकरणवाक्यस्य विशेषणत्यागेन विशेष्यमात्रपरतया सत्यज्ञानादिसमानाधिकरणवाक्येन सत्यादिस्वरूपलक्षणप्रतिपादनादित्यत आह - **सामानाधिकरण्यस्येति**।**प्रागेवेति**।अखण्डार्थभङ्गवाद एवेत्यर्थः। **शास्त्रेति**। शास्त्रयोन्यधिकरणमपि ब्रह्मणः शास्त्रप्रमाणकत्वं प्रतिपादयति । शास्त्रप्रमाणकत्वं च शास्त्रजन्यप्रमितिविषयत्वम् । भवद्भिः ब्रह्मणः ज्ञानविषयत्वानङ्गीकारात् शास्त्रजन्यप्रमितिविषयत्वं कथं संभवति । यदि तु शास्त्रगम्यत्वमङ्गीक्रियते तर्हि दृश्यत्वात् ब्रह्मणः मिथ्यात्वं प्रसजतीति भावः ।

ननु पारमार्थिकस्य शास्त्रगम्यत्वस्यानङ्गीकारेऽपि व्यावहारिकं शास्त्रगम्यत्वमङ्गीक्रियत इत्याशङ्क्य तर्हि व्यावहारिकम् अनुमानगम्यत्वमप्यङ्गीक्रियताम् । तथा च शास्त्रैकप्रमाणकत्वं भग्नमित्याह - **व्यावहारिकेति**। किं च भवन्मतानुसारिणा खण्डनकारेण प्रमाणानां प्रमेयाणां

व्यावहारिकानुमानगम्यत्ववत् अपध्वस्तम् । भवता च प्रमाणप्रमेयखण्डनात् शास्त्रप्रामाण्यमपि पाषण्डवादैः सपिण्डीकृतमेव । वेदान्तशास्त्रस्यापि तर्कात्मकत्वात् तर्काणां स्वरूपलक्षणादिखण्डनप्राचण्ड्यमेव शरणयतां कस्तर्कः, किं वा तदधीनार्थतत्त्वव्यवस्थापनम्, कथं च तत्त्वाऽऽवेदकता तत्त्वमस्यादिवाक्यानामिति परिपश्य । तथाच सर्वशास्त्रकुक्षिंभरिमाध्यमिकोक्तिरेव विजयते । समन्वयसूत्रं च समन्वयमेव हेतुत्वेनोपादत्ते । अन्वयस्तु भेदस्य प्राणबन्धुरिति सर्वलोकविदितमेतत् । ईक्षत्यधिकरणेऽपि तदेवानुविदधाति, ईक्षणादिगुणयोगस्य मुख्यतयाऽभिधानात् । आनन्दमयाधिकरणे प्राचुर्यार्थमयट्प्रयोगादानन्दाभ्यासस्य हेतुत्वेनोपादानाच्च भेदवाद एव साम्राज्यमाटीकते । आकाशप्राणाधिकरणयोरपि ब्रह्मलिङ्गमेव पुरस्क्रियते । लिङ्गं पुनरसाधारणधर्मः । निर्विशेषे किं लिङ्गं किं च वा साध्यमिति

च खण्डनात् शास्त्ररूपं प्रमाणमपि खण्डितमिति क्व वेदान्तशास्त्रप्रामाण्यम् । वेदान्तसूत्राणामपि तर्कात्मकत्वात् तर्काणां स्वरूपमेव लक्षणाद्यसंभवात् खण्डयता तेन वेदान्तसूत्रप्रामाण्यमपि खण्डितम् इति वेदान्तसूत्राधीनस्तत्त्वनिर्णयः कथं भवेत् । तत्त्वमस्यादिवाक्यानामप्यप्रमाणत्वात् तत्त्वावेदकत्वं तेषां कथं भवेत् । ततश्च सर्वशून्यवादिमतमेव विजयत इति भावः ।

समन्वयसूत्रं चेति । "तत्तु समन्वयात्" इति सूत्रं वेदान्तानां ब्रह्मणि तात्पर्येणान्वयं ब्रूते । अन्वयश्च अन्वयिनोर्भेदव्याप्य इति निर्भेदार्थपरत्वं कथं वेदान्तानां स्यादित्यर्थः । **ईक्षत्यधिकरण** इति । सच्छब्दवाच्यं ब्रह्म, न प्रधानम्, ईक्षणादिगुणवत्त्वात् इति ईक्षत्यधिकरणे प्रतिपाद्यते । निर्गुणब्रह्मपक्षे कथमिदमधिकरणं संगच्छत इत्यर्थः । **आनन्दमयाधिकरण** इति । आनन्दमयाधिकरणे आनन्दमयशब्दवाच्यत्वं परमात्मनःउच्यते । आनन्दमयशब्दश्च प्राचुर्यार्थकमयडन्तः प्रचुरानन्दवत्त्ववाचकः । निर्गुणस्य परमात्मनः प्रचुरानन्दगुणाभावात् कथं परमात्मनः आनन्दमयशब्दवाच्यत्वं भवेत् । अपि चाभ्यस्यमान आनन्दः तत्र हेतुः । तस्य जीवात्मन्यसत्त्वे परमात्मनि सत्त्वे च हेतुत्वं भवितुमर्हति । अन्यथा जीवे व्यभिचारात् । तथा चायं हेतुः जीवपरयोर्भेदमेव साधयेदिति भावः । **आकाशेति** ।

स्वयमेव विचारय । ज्योतिरधिकरणे चरणाभिधानं मरणायते मृषावादस्य । निर्विशेषस्य कश्चरणः, का वा दीप्तिरनुत्तमेषु लोकेषु ? इन्द्रप्राणाधिकरणेऽपि, 'प्राणस्तथानुगमात्' इत्युपक्रमोपसंहारादिषड्विधतात्पर्यलिङ्गोपेतमहावाक्यसामर्थ्यादिन्द्रान्तर्यामिणो महापुरुषस्यैव प्रसाधनात् सविशेषपरत्वमेव । वाक्यं तावत् अन्विताभिधानेऽपि, अभिहितान्वयेऽपि सविशेषपरमेवेति तत्रतत्र क्रियासमभिहारेण साधितम् । वाक्यार्थोऽपि प्राणेन्द्रादिवैशिष्ट्यात्मकत्वात् सविशेषरूप एवेति(ह ?) निरूपितः ।

एवं शारीरोपक्रमसूत्राणां सगुणब्रह्मैदम्पर्ये समर्थिते त्रिपाद्यामपि अनेनैव न्यायेनार्थतत्त्वं निर्णेतव्यमधिगुणैरन्तेवासिभिः; स्थालीपुलाकन्यायानुसारस्य न्याय्यत्वात् । अविरोधाध्यायसूत्राणामादिमाध्यायशेषत्वान्न पृथगभिधेयं तात्पर्यमवशिष्यते । वैराग्योभयलिङ्गपादयोः संसरतो जीवस्य संसारनिवर्तकस्य च परमात्मनो मिथो वैषम्यमुच्यते । स एव भेदवादः । गुणोपसंहारपादस्य नामैव

आकाशाधिकरणे प्राणाधिकरणे च लिङ्गेन आकाशप्राणशब्दयोः परमात्मपरत्वं साध्यते । लिङ्गं चासाधारणधर्मः । निर्विशेषे किं लिङ्गं किं वा साध्यं भवेदिति भवानेव विचारयतु । ज्योतिरधिकरण इति । **ज्योतिरधिकरणे** "अथ यदतः परो दिवो ज्योतिर्दीप्यते" इति ज्योतिः पदेन परमात्मैवाभिधीयते । पादाभिधानादित्युक्तम्। निर्विशेषस्य ब्रह्मणः पादवत्त्वं दीप्तिश्च कथं संभवतीत्यर्थः । **क्रियासमभिहारेणेति** । पौनः पुन्येनेत्यर्थः ।

शारीरकोपक्रमसूत्राणामिति । शारीरकमीमांसाप्रथमपादस्थसूत्राणामित्यर्थः **अनेनैव न्यायेन** = प्रथमपादोक्तन्यायेन । **अधिगुणैः**=**अधिकगुणवद्भिः** । **अविरोधेति** प्रथमाध्यायोक्तचेतनाचेतनविलक्षणब्रह्मणः जगत्कारणत्वे स्मृतितर्काभ्यां विरोधो नास्तीति प्रतिपादनपरः द्वितीयाध्यायः अविरोधाध्यायः । तत्रत्यसूत्राणां प्रथमाध्यायशेषत्वात् पृथग्वक्तव्यं प्रमेयतात्पर्यं नावशिष्यते । तृतीयाध्यायप्रथमद्वितीयपादौ प्राप्यतृष्णाजननार्थं प्राप्यव्यतिरिक्ते वैराग्यजननार्थं च संसरतो जीवस्य दोषाः परमात्मनः निर्दोषत्वं

निर्गुणवादस्य हृदयशूलम् । अङ्गाङ्गिभाववादोऽपि तस्यैव कर्णज्वरः । तेन त्रिभिरध्यायैः सगुणमेव निर्णीयते । फलाध्याये तु फलनिर्देश एव निर्गुणवादिनां निष्फलं प्रलापमाविष्करोति । परमात्मसेविनो जीवस्यैव सांसारिकफलसाधनपुण्यपापरूपकर्माश्लेषविनाशौ देहादुत्क्रमणमर्चिरादिना देवयानेन गमनं परं ज्योतिरुपसम्पद्य स्वेन रूपेणाभिनिष्पत्तिरपुनरावृत्तिश्चेति । शारीरकपञ्चमाध्याये निर्गुणमशरीरमलक्ष्मिकमपरिवारक मविभूतिकं चिन्मात्रमिति पारिभाषिकं ब्रह्म प्रतिपाद्यताम् ।

यदुक्तं जिज्ञास्यतया प्रक्रान्तं ब्रह्मैव, 'नात्मा श्रुतेः' इत्यादावपि प्रतिपाद्यत

कल्याणगुणाकारत्वं चोत्तवा तेन जीवपरयोर्भेद एव स्थिरीकृत इति न तयोरभेदवादस्य प्रसक्तिः ।·तृतीयाध्यायतृतीयपादस्तु गुणोपसंहारपादनामा उपास्यस्य परमात्मनो गुणानां विद्यान्तरोपात्तगुणानां विद्यान्तरे उपसंहारमनुपसंहारं च ब्रुवन् निर्गुणवादस्य प्रतिकूलः । तृतीयाध्यायचतुर्थपादोऽपि अङ्गपादनामा सगुणोपासनानामङ्गानि प्रतिपादयन् निर्गुणवादस्य विरोधी। एवं च त्रिभिरध्यायैः सगुणमेव ब्रह्म निर्णीयते । चतुर्थे विद्याफलप्रतिपादके यत् फलं विद्यायाः प्रतिपादितं तस्य परामर्शे सति सगुणब्रह्मप्राप्तेरेव फलत्वावगमात् निर्गुणवादिनां प्रलापो निष्फल इति ज्ञायते । तत्र हि परमात्मोपासकस्य जीवस्य सांसारिकफलसाधनपुण्यपापरूपकर्मणामश्लेषविनाशौ शरीरादुत्क्रमणम्, अर्चिरादिना देवयानमार्गेण गमनं परब्रह्मप्राप्तिः स्वस्वरूपाविर्भावः अपुनरावृत्तिश्च क्रमशः प्रतिपाद्यन्ते । एतत् सर्व सगुणवादस्यानुकूलं निर्गुणवादस्य प्रतिकूलम् । तथा च आपादचूडं शारीरकचतुरध्यायी निर्गुणवादस्य कण्ठेगडुः इति । **शारीरकपञ्चमाध्याय** इति परिहासोक्तिः ।

अथ निर्विशेषवादानुकूलतया शारीरकमिमांसायाः यद्वर्णनं कृत्तं तत् क्रमशोऽनूद्य दूषयति - **यदुक्तमित्यादिना** । नात्मा श्रुतेः इत्यादौ एकवचनान्तात्मशब्देन आत्मनः ऐक्यं निर्दिश्यमानं जीवपररूपेणात्मभेदं निरस्यति । एकस्यैव परमात्मनः उत्पत्त्याद्यभावं

इति, तदसत्; 'ज्ञोऽत एव', 'कर्ता शास्त्रार्थवत्त्वात्', 'परात्तु तच्छ्रुतेः' इत्यादिभिस्तत्रत्यैस्सूत्रैरात्मशब्दनिर्दिष्टस्य तस्य ज्ञातृत्वकर्तृत्वपरमात्मायत्तत्वादि-प्रतिपादनात्, तस्य च सर्वस्य त्वदभिमतेऽस्मदभिमते वा ब्रह्मण्यसंभवात् ॥ भ्रान्त्या संभवतीति चेन्न; परिशुद्धस्वरूपोपदेशदशायां प्रतिपक्षप्रतिक्षेपपूर्वकस्य भ्रान्तिसिद्धाकारसमर्थनस्य विरुद्धत्वात्। अन्यथा, 'नात्मा श्रुतेः' इत्यधिकरणेऽपि यथालोकमुत्पत्तिविनाशयोरेव समर्थनप्रसङ्गात्। यदि तत्र लोकसिद्धाकारप्रतिषेध उपचिक्रंसितः, तदा लोकसिद्धं कर्तृत्वादिकमपि नास्तीत्येवोपदेष्टुं युक्तम्। यदि तत्रैव सूत्राणां तात्पर्यमिति मनुषे, तदा प्रारब्धं त्वयैव सूत्रान्यथाकरणम् ॥ अप्रस्तुत मात्मान्तरमिह कथं परीक्ष्यत इति चेन्न; 'अथातो ब्रह्मजिज्ञासा' इत्यत्रैव विषयतया ब्रह्मण इव अधिकारितया मुमुक्षोः प्रकृतत्वात्, तस्य च स्वरूपज्ञानावश्यम्भावित्वेन क्वचित्स्वरूपस्यावश्योपदेष्टव्यत्वात्। व्यवच्छेद्यतया प्रधानमिव जीवोऽपि प्रथमाध्याये सर्वत्र प्रकृतः। यदि विषयत्वेनाप्रकृतत्वादपरीक्षणीयता, तदा वियत्प्राणादेरप्यपरीक्षणप्रसङ्गः।

प्रतिपादयतीति यदुक्तं, तदसत् तत्सूत्रस्थस्य आत्मपदस्य जीवात्मपरत्वेन परमात्मपरत्वाभावात्। तेन सूत्रेण आत्मनः नित्यत्वं प्रतिपाद्य उपरितनैः सूत्रैः तस्य ज्ञातृत्वं कर्तृत्वं परमात्मायत्तत्वम् अंशत्वमित्यादीनां प्रतिपादनात् तेषां च जीवात्मन्येव संभवात्। भवद्भिः परमात्मनः ज्ञातृत्वकर्तृत्वाद्यनङ्गीकारात्। अस्माभिरपि तदनङ्गीकाराच्च। न च ब्रह्मणः भ्रान्त्या ज्ञातृत्वकर्तृत्वादिकं संभवतीति वाच्यम्। परपक्षप्रतिक्षेपपूर्वकं परिशुद्धात्मस्वरूपोपदेशप्रकरणे भ्रान्तिसिद्धाकारसमर्थनस्य विरुद्धत्वात्। अन्यथा "नात्मा श्रुतेः" इत्याधिकरणेऽपि लोकप्रतीत्यनुसारेण आत्मनः उत्पत्तिविनाशयोरेव समर्थनप्रसङ्गात्। यदि उपक्रमे तस्मिन्नधिकरणे लोकप्रतीताकारप्रतिषेधः प्रतिपादयितुमिष्टः तदा लोकसिद्धज्ञातृत्वकर्तृत्वाद्याकारोऽपि नास्तीत्येवं प्रतिपादनं युक्तम्। यदि च लोकसिद्धानां सर्वेषामाकाराणां प्रतिषेधे एव सूत्राणां तात्पर्यमितीष्यते भवद्भिः, तदा सूत्राणामन्यथाकरणं प्रारब्धं स्यात् भवद्भिः।

श्लो-धर्मं जिज्ञासमानस्य तत्सम्बन्धिनिरूपणम्। यथैवं ब्रह्मजिज्ञासेत्युक्तं जीवनिरूपणम्॥

किंच, 'असंभवस्तु सतोऽनुपपत्तेः' इत्यत्रैव सच्छब्दवाच्यस्य परस्य ब्रह्मण उत्पत्त्यादिप्रतिषेधात्, ''नात्मा श्रुतेः'' इति निरर्थकः पुनरारम्भः। अतो नात्र जिज्ञास्यतया प्रक्रान्तं ब्रह्म आत्मशब्दनिर्दिष्टम्। अपि तु जिज्ञासाकर्तृतया प्रस्तुतो जीवः। यत् पुनः उक्तं एकवचनान्तनिर्देशादात्माद्वैतस्वारस्यमिति, तदपि न; 'श्रेष्ठश्च' इत्यादिसूत्रेष्विव जात्यैक्यविवक्षया तत्प्रयोगसंभवात्।

ननु '' अथातो ब्रह्मजिज्ञासा'' इति आदौ ब्रह्मण एव विचार्यत्वेन प्रस्तुतत्वात् तस्यैव विचार: उपर्यपि कर्तव्य:। तत्राप्रस्तुतस्य जीवात्मन: परीक्षणं कथं संगच्छत इति चेत् - न। तत्र न केवलं ब्रह्मण एव प्रस्ताव:। विषयतया ब्रह्मण इव अधिकारितया मुमुक्षो: जीवात्मनोऽपि तत्र प्रकृतत्वात्, तस्य च स्वरूपज्ञानमवश्यं भावीति जीवात्मस्वरूपस्यापि यथावसरं अवश्यमुपदेष्टव्यत्वात्। यथा प्रथमाध्याये तत्र तत्र व्यवच्छेद्यतया सांख्यसंमतप्रधानस्य प्रस्ताव:, तथा जीवोऽपि व्यवच्छेद्यतया तत्र प्रकृत:। यदि जीवात्मन: विषयत्वेनाप्रकृतत्वात् अपरीक्षणीयता तदा वियत्पादे आकाशादेरप्यविचार्यत्वप्रसङ्ग:। उक्तं हि शांकरे प्रथमसूत्रभाष्ये- '' प्रधानपरिग्रहे तदपेक्षितानामर्थाक्षिप्तत्वात्। ब्रह्म हि ज्ञानेनाप्तुमिष्टतमत्वात् प्रधानम्। तस्मिन् प्रधाने जिज्ञासाकर्मणि परिगृहीते यैर्जिज्ञासितैर्विना ब्रह्म जिज्ञासितं न भवति तान्यर्थाक्षिप्तान्येवेति न पृथक् सूत्रयितव्यानि'' इति घट्टार्थ:।

पूर्वमीमांसाप्रथमसूत्रेऽपि धर्मवत् धर्मानुबन्धिनामपि जिज्ञास्यत्वं प्रस्तुतमित्युक्तमिति तद्भाष्यकारेणोक्तं स्मारयति- **धर्मं जिज्ञासमानस्येति** । '' स कथं जिज्ञासितव्य:। को धर्म: कथंलक्षण: कान्यस्य साधनानि कान्यस्य साधानाभासानि किंपरश्चेति'' इति शाबरभाष्यमत्रानुसंहितम्।

किं चेत्यादि । '' नात्मा श्रुते:'' इति सूत्रं न परमात्मन: उत्पत्तिविनाशाभावप्रतिपादकम्। इत: पूर्वमेव '' असंभवस्तु सतोऽनुपपत्ते:'' इति सूत्रेण तस्योत्पत्त्यभावस्य

तदुक्तमंशाधिकरणे, 'नात्मा श्रुतेरित्यत्राप्येकवचनं जात्यभिप्रायम्' इति। याश्च तत्सूत्रविषयतया, 'नित्यो नित्यानां चेतनश्चेतनानाम्' इत्यादिश्रुतय उपादीयन्ते, ताभिरपि सौत्रस्यैकवचनस्य जात्यभिप्रायत्वं व्यक्तम्। यदि उद्देश्यगतत्वेन बहुत्वमविवक्षितम्, य एक इति निर्दिष्टमेकत्वं किं विवक्ष्यते॥ अत एव, 'अजो नित्यः' इत्यादिश्रुत्यन्तरमपि निर्व्यूढम्।

यत्तूभयलिङ्गाधिकरणे समस्तविशेषशून्यत्वं प्रत्यपादीति–तदप्यसत्; तत्र हेयगुणनिषेधेन समस्तमङ्गलगुणविशिष्टस्यैव प्रतिपिपादयिषितत्वात्, तदाह-, 'सविशेषं ब्रह्मेत्येव हि तत्र वक्ष्यति' इति॥ वाक्यस्थोभयलिङ्गशब्दानादरेणासन्नि-

---

प्रतिपादितत्वेन पौनरुक्त्यापत्तेः। ततश्च'' नात्मा श्रुतेः''इत्यत्र आत्मशब्देन शास्त्रारम्भसूत्रे जिज्ञास्यतया प्रक्रान्तं ब्रह्म न निर्दिश्यते। अपि तु जिज्ञासाकर्तृतया प्रस्तुतो जीवः। तत्र यदुक्तम् एकवचनान्तनिर्देशात् आत्माद्वैतस्वारस्यमिति। तन्न। आत्मबहुत्वाविरोधेन जात्यैक्यविवक्षया एकवचनप्रयोगत्। यथा श्रेष्ठस्य प्राणस्य पञ्चविधत्वेऽपि श्रेष्ठत्वजात्यैक्यव्विवक्षया एकवचनप्रयोगःतद्वत्। **तदुक्तमिति**। श्रीभाष्ये इति शेषः। **याश्चेति**"नात्मा श्रुतेः'' इति सूत्रविषयतया उदाहृतायां '' नित्यो नित्यानां चेतनश्चेतनानाम्'' इति श्रुतौ आत्मबहुत्वप्रतिपादनात् सूत्रे विद्यमानमेकवचनम् आत्मत्वजातिगतैकत्वाभिप्रायकं न त्वात्त्मैक्याभिप्रायकमित्यर्थः। ननु चेतनानामित्युद्देश्यवाचकत्वात् उद्देश्यगतं बहुत्वमविवक्षितम्, इत्याशङ्क्य तस्मिन्नेव '' एको बहूनां यो विदधाति कामान्'' इति य एक इति उद्दिश्य कामान् विदधातीति अभीष्टदातृत्वविधानात् उद्देश्यपरमात्मगतमेकत्वमप्यविवक्षितं स्यात् इति समाधत्ते- **यदीति**। **अत एवेति**। एकवचनस्य जात्यभिप्रायकत्वादेवेत्यर्थः।

यत्तु इत्यादि।उभयलिङ्गाधिकरणे ब्रह्मणः समस्तविशेषशून्यत्वं प्रतिपाद्यत इति यदुक्तं, तदपि न। निर्दोषत्वकल्याणगुणाकरत्वरूपोभयलिङ्गवत्त्वमेव ब्रह्मणस्तत्र प्रतिपाद्यते इति श्रीभाष्यकारैर्निर्णीतत्वादित्यर्थः। **तदाहेति**। जिज्ञासाधिकरणे श्रीभाष्ये इति शेषः।

हितदोषाख्यनिषेध्याध्याहारो न युक्त इति चेन्न-स्ववाक्यस्थस्यापि गुणस्य स्वरूपत एव निषेधानुपपत्तेः । न हि गुणो गुणत्वादेव निषेध्यः; वैपरीत्यात् । न च दोषकोटिनिक्षेपेण तन्निषेधः, सर्वज्ञत्वादेर्दोषत्वस्य प्रमाणाभावात् । अतः पारिशेष्यात् दोष एव निषेध्य इति स्थिते, जागरितस्वप्नाद्यवस्थासु जीवस्य ये दोषाः पूर्वेष्वधिकरणेषु प्रकृताः त एवात्र निषेध्यतया सूत्रकृदभिप्रेता इति स्पष्टमेव ज्ञातुः । ततश्च, 'भेदादिति चेन्न प्रत्येकमतद्वचनात्' इत्यादिसूत्रेष्वपि नाप्रस्तुतानुपयुक्तत्वदभि-

---

ननु " न स्थानतोऽपि परस्योभयलिङ्गं" इति सूत्रे नशब्दोक्तस्य निषेधस्य विषयः दोष इति श्रीभाष्ये व्याख्यातम् । तत्तु न युक्तम् । सूत्रेऽश्रूयमाणस्य दोषस्य निषेध्यत्वापेक्षया श्रूयमाणस्य उभयलिङ्गस्यैव निषेध्यत्वौचित्यात् । तथा च स्थानतोऽपि उपधितोऽपि ब्रह्मणः नोभयलिङ्गं सविशेषत्वनिर्विशेषत्वरूपोभयलिङ्गं न भवतीति व्याख्यानमेवोचितम्, न तु स्थानतोऽपि न दोष इति व्याख्यानम् दोषपदाध्याहारापत्तेः इत्याशङ्कते - **वाक्यस्थेति** । समाधत्ते - **स्ववाक्यस्थस्यापीति** । भवन्मते उभयलिङ्गपदेन सगुणत्वं निर्गुणत्वं चोभयं गृहीत्वा तदुभयं ब्रह्मणो न भवति, किं तु निर्गुणत्वमेव भवतीति व्याख्यानम् । तत्र पृच्छामः ब्रह्मणः गुणो नास्तीति गुणः कुतो निषिध्यते ? किं गुणत्वात् निषिध्यते उत गुणस्यापि दोषकोट्यन्तर्भावात् । नाद्यः, वैपरीत्यात् । गुणत्वादुपादेयत्वमेव हि भवति न निषेध्यत्वम् । न द्वितीयः, सर्वज्ञत्वादिगुणानां दोषत्वे प्रमाणाभावात् । अतश्च पारिशेष्यात् दोष एव निषेध्य इति स्थिते जागरितस्वप्नसुषुप्त्याद्यवस्थासु ये दोषाः जीवस्य पूर्वाधिकरणेषु प्रतिपादिताः त एव बुध्दिस्था दोषाः अत्र सूत्रे परमात्मनि निषिध्यन्त इति सूत्रकाराभिप्रायः ।

ततश्चेत्यादि । " भेदादिति चेत्" इत्यादिसूत्राणि भेदनिषेधपराणीति यदुक्तं, तदपि न । तत्र भेदनिषेधस्याप्रकृतत्वात् अनुपयुक्तत्वाच्च । अपि तु प्रकृतोपयुक्तार्थपरतया भाष्यकारैः व्याख्यातम् । तथा हि - यथा जीवस्य प्रजापतिवाक्यावगतापहतपाप्मत्वाद्युभयलिङ्गस्यापि देवादिदेहयोगरूपावस्थाभेदात् अपुरुषार्थयोगः, तथा अन्तर्यामिणः परस्यापि स्वतोऽपहतपाप्मत्वाद्युभयलिङ्गस्य तत्तद्देवादिशरीरयोगरूपावस्थाभेदात्

मतार्थसिद्धिः । अन्यथा, 'प्रकृतैतावत्त्वं हि प्रतिषेधति ततो ब्रवीति च भूयः' इति समनन्तरसूत्रविरोधः । न हि तत्र प्रकृतं प्रतिषेधतीत्युक्तम्, अपितु प्रकृतैतावत्त्वमिति । एतेन निषेधानां सर्वेषां विहितानुरोधेन विषयव्यवस्था कर्तव्येति दर्शयति।

श्लो. सामान्यस्य निषेधस्य विहितव्यतिरेकतः ।
निर्वाहः सुप्रसिद्धश्च निगमेष्ववगम्यते ॥

अत एव सन्ध्याधिकरणेऽपि, 'मायामात्रं तु' इत्यादिना न प्रपञ्चमिथ्यात्वं

अपुरुषार्थयोगोऽवर्जनीय इति चेत् तन्न । प्रत्येकमतद्वचनात् । '' यः पृथिव्यां तिष्ठन्'' इत्यादिना अन्तर्यामिणः अमृतत्ववचनेन तत्र तत्र स्वेच्छया'' नियमनं कुर्वतः तत्तत्संबन्ध प्रयुक्तापुरुषार्थप्रतिषेधात्'' इति। यदि '' भेदादिति चेत्'' इति सूत्रस्य प्रपञ्चरूपभेदनिषेधपरत्वं स्यात् तर्हि तत्रैव समनन्तरसूत्रविरोध इत्याह - **अन्यथेति** ।यद्यपि ''प्रकृतैतावत्त्वम्'' इति सूत्रं शांकरभाष्ये प्रकृतमूर्तामूर्तात्मकप्रपञ्चनिषेधपरतया व्याख्यातम्। तथापि तत्र सूत्रस्वारस्यं नास्तीत्याह - **न हि तत्रेति** । मूर्तामूर्तात्मकप्रपञ्चवत्तया या इयत्ता '' द्वे वा ब्रह्मणो रूपे'' इत्यादिना प्रकृता सैव '' अथात आदेशो नेति नेति'' इत्यादिना निषिध्यते न तु मूर्तामूर्तात्मकप्रपञ्चः। यतो हि प्रकृतं प्रतिषेधतीति नोक्तं, किं तु प्रकृतैतावत्त्वमितीति भावः। तथा सति स्वयमेव रूपत्वेनोपदिश्य स्वयमेव निषेधतीति उन्मत्तवचनवत् स्यात् । श्रुतप्रकाशिकायां च- '' ये तु प्रकारनिषेधं सूत्रार्थमाहुः तत्पक्षे त्वप्रत्ययो न घटते । एतावदित्येव वक्तव्यम्'' इति। आचार्यास्तु एतावत्पदमप्यनावश्यकम्। प्रकृत्तं प्रतिषेधतीत्येव तन्मते सूत्रेण भाव्यमिति प्रतिपादयन्ति। **एतेनेति** ।प्रकृतैतावत्त्वमिति सूत्रस्य उक्तरीत्या व्याख्यानकरणेन निषेधवाक्यानां सर्वेषामपि विहिताविरोधेनार्थो वर्णनीय इति सूत्रकारो दर्शयतीत्यर्थः। तदेव कारिकया विवृणोति-- **सामान्यस्येति**। '' न हिंस्यात् सर्वा भूतानि'' इति हिंसासामान्यनिषेधस्य '' अग्नीषोमीयं पशुमालभेत'' इति विहितहिंसातिरिक्तविषयकतया निर्वाहः। तद्वत् इतरत्रापि इति भावः। यदुक्तं सन्ध्याधिकरणे ''मायामात्रं तु''इत्यादिसूत्रेण प्रपञ्चमिथ्यात्वं प्रतिपाद्यत इति तत्र समाधानमाह **अत एवेत्यादिना**। तत्र मायाशब्दस्य मिथ्यावाचकत्वं नास्तीति अन्यत्र वादान्तरे विशदतया

विवक्षितमिति गम्यते । मायाशब्दस्य च न मिथ्यात्ववाचित्वमिति स्थलान्तरे (१२) विशदं द्रष्टव्यम् । आह च- 'मायामात्रं त्विति च स्वाप्नानामप्यर्थानां जागरितावस्थानुभूतपदार्थवैधर्म्यमात्रेण मायामात्रत्वमुच्यते' इत्यादि । 'मेघोदयस्सागरसन्निवृत्तिः(वेशः)', इत्यारभ्य, 'विष्णोर्विचित्राः प्रभवन्ति मायाः' इत्यादिषु मायाशब्दस्य विचित्रसृष्टि(कर ?) विशेषपरत्वमेवेति सुव्यक्तमुपपादितम् । अस्तु वाऽस्य मिथ्यार्थवाचित्वम्, तथाऽप्यस्मिन् सूत्रे स्वाप्नार्थानामेव मिथ्यात्वमुच्यते, 'सन्ध्ये सृष्टिराह हि', 'निर्मातारं चैके पुत्रादयश्च' इति पूर्वपक्षसूत्राभ्यां स्वाप्नार्थानामेव प्रकृतत्वस्य भवद्भिरपि व्याख्यातत्वात् ॥ सत्यं स्वाप्नार्थमिथ्यात्वमधिकरणसाध्यम्; तत्र कैमुत्यलाभाय जागरितांनामपि मिथ्यात्वम्, 'कात्स्न्येनभिव्यक्तस्वरूपत्वात्' इत्यनेन प्रदर्श्यत इति चेन्न; विश्वमिथ्यात्वसिद्धौ

निरूपितमेव । भाष्यकारेणापि - ''मायामात्रं त्विति स्वाप्नानामप्यर्थानां जागरितावस्थानुभूतपदार्थवैधर्म्यमात्रेण मायामात्रत्वमुच्यते'' इत्यन्वग्राहि । तथा-

मेघोदयः सागरसंनिवृत्तिः इन्दोर्विभागः स्फुरितानि वायोः ।
विद्युद्विभङ्गो गतिरुष्णरश्मेः विष्णोर्विचित्राः प्रभवन्ति मायाः ॥

इत्यादिषु पुराणेषु मायाशब्दः विचित्रसृष्टिकरत्वेन प्रयुक्तः । अस्तु वा मायाशब्दस्य मिथ्यावाचित्वम् । तथापि '' मायामात्रं तु'' इति सूत्रे स्वाप्नपदार्थानामेव मिथ्यात्वमुच्यते । '' सन्ध्ये सृष्टिराह हि'' ''निर्मातारं चैके पुत्रादयश्च'' इति पूर्वपक्षसूत्राभ्यां स्वाप्नानामेव प्रकृतत्वात् इति भवद्भिरेव व्याख्यातत्वात् इत्यर्थः ।

ननु सत्यं स्वाप्नपदार्थमिथ्यात्वमेवाधिकरणसाध्यम् । तथापि जागरितानामपि पदार्थानां मिथ्यात्वं '' कात्स्न्येनानभिव्यक्तस्वरूपत्वात्'' इति सूत्रखण्डेन प्रदर्श्यते । जागरितानामपि मिथ्यात्वे किमु वक्तव्यं स्वाप्नार्थमिथ्यात्व इति कैमुत्यन्यायसूचनार्थम् । '' पारमार्थिकस्तु नायं सन्ध्याश्रयः सर्गो वियदादिसर्गवत् इत्येतावत् प्रतिपाद्यते । न च वियदादिसर्गस्यापि आत्यन्तिकं सत्यत्वमस्ति । प्रतिपादितं हि ''तदनन्यत्वम्'' इत्यत्र समस्तस्य प्रपञ्चस्य मायामात्रत्वम्''इति शांकरं भाष्यम् इति शङ्कते - **अस्तु वेत्यादिना** ।

स्वाप्नार्थसत्यत्वपूर्वपक्षानुत्थानात् । अथ विश्वमिथ्यात्वमेव स्वाप्नार्थमिथ्यात्वप्रदर्शनद्वारा अत्रैव प्रसाध्यत इति मन्यसे; तदप्यसत्, प्रपञ्चमिथ्यात्वं प्रस्तुत्य स्वाप्नार्थनिदर्शनस्योचितत्वात्। प्रथमसूत्र एव विश्वमिथ्यात्वप्रसाधनमुखेन विश्वस्य ज्ञानबाध्यतया ज्ञानप्रधानं शास्त्रमारम्भणीयमिति भवद्भिस्समर्थनाच्च ॥ अथ वक्ष्यमाणोपजीवनेन शास्त्रारम्भमात्रं तत्र समर्थ्यत इति पश्यसि; तदा नीतिनिबन्धनात्मकस्य सूत्रस्य व्युत्पाद्यमतिमन्दं स्यात्। किंच, 'कात्स्न्र्येनानभिव्यक्तस्वरूपत्वात्' इत्यत्र न जागरगन्धं पश्यामः । कात्स्न्र्यशब्देन तस्यापि संग्रह इति चेन्न; प्रकृतैकदेशाबहिष्कारे तस्य व्युत्पत्तेः । ततश्च स्वाप्नार्थानां सर्वेषामेव मिथ्यात्वं विवक्षितं स्यात्; अन्यथा स्वाप्नार्थमिथ्यात्वं प्रतिज्ञाय जागरितार्थानामनभिव्यक्तस्वरूपत्वहेतुरुच्यत इति व्यधिकरणं स्यात् । अतः स्वाप्नार्थमिथ्यात्वसाधनाय तन्निष्ठमेवानभिव्यक्तस्वरूपत्वं हेतुतया सूत्र्यत इति नात्रापि विश्वमिथ्यात्वप्रतिपादनकथाऽपि ।

समाधत्ते - **विश्वमिथ्यात्वे त्यादिना**। यदि आरम्भणाधिकरण एव विश्वमिथ्यात्वं सिध्दम् तर्हि स्वाप्नार्थ: सत्य इति पूर्वपक्षस्यानुत्थिति:। यदि तु अस्मिन्नेवाधिकरणे स्वाप्नार्थ मिथ्यात्वप्रदर्शनद्वारा विश्वमिथ्यात्वं प्रसाध्यत.इत्युच्यते, तर्हि अत्र प्रपञ्चमिथ्यात्वं प्रस्तुत्य तत्र स्वाप्नपदार्थमिथ्यात्वं दृष्टान्ततया प्रदर्शनीयम् । न तथा सूत्रकारेण कृतम् । अपि च अत्रैव प्रपञ्चमिथ्यात्वं साध्यत इत्येतत् भवदीयप्रथमसूत्रव्याख्यानविरुद्धम् । तत्र हि विश्वमिथ्यात्वप्रसाधनमुखेन विश्वस्य ज्ञानबाध्यतया ज्ञानप्रधानं शास्त्रमारम्भणीयमिति भवद्भिः समर्थितम् इति। अपि च कात्स्न्र्येनानभिव्यक्तस्वरूपत्वादिति सूत्रखण्ड: न जागरविषयक:। कात्स्न्र्यशब्दस्य प्रकृतैकदेशापरित्यागे व्युत्पत्ते: । ततश्च प्रकृतस्वाप्नार्थानां सर्वेषामनभिव्यक्तस्वरूपत्वात् मिथ्यात्वं विवक्षितं स्यात् न तु जागरमिथ्यात्वम् । अन्यथा स्वाप्नार्थमिथ्यात्वं प्रतिज्ञाय जागरितार्थानामनभिव्यक्तस्वरूपत्वस्य हेतुत्वमुच्यत इति

यत्पुनः मोक्षोपायोपदेशदशायाम्, ‘आत्मेति तूपगच्छन्ति’ इति ब्रह्मात्मैक्यानुसन्धानं सूत्रितमिति, तदपि न पश्यामः, आत्मशब्दस्य नानार्थरूढत्वात्, शरीरप्रतिसंबन्धिनि रूढिप्रकर्षाच्च । ततः शरीरीत्यनुसन्धानं सूत्रितं स्यात् । युक्तं चैतत्; ब्रह्मणः सर्वशरीरित्वेनान्तर्यामिब्राह्मणादिषु प्रपञ्चितत्वात् । यद्यपि स्वपर्यायोऽयमात्मशब्दो भाष्येऽन्वारूढः, तथाऽप्यन्ततोऽयमेवार्थः प्रपञ्चयिष्यते । अत्राप्यधिकरणे वक्ष्यति, ‘इदमेव शरीगत्मभावलक्षणं तादात्म्यम्, आत्मेति तूपगच्छन्तीति वक्ष्यति’ इति । विपरीतश्चायं व्यपदेश आयुष्मतः; ‘अहं ब्रह्मास्मि’

साध्यहेत्वोर्वैयधिकरण्यं स्यात् । अत: स्वप्नार्थमिथ्यात्वसाधनाय तन्निष्ठमेवानभिव्यक्तस्वरूपत्वं हेतुतया सूच्यत इति न सन्ध्याधिकरणे विश्वमिथ्यात्वप्रतिपादनकथेति समुदायार्थ: ।

यत् पुनरित्यादि । मोक्षोपायोपदेशप्रकरणे ‘‘आत्मेति तूपगच्छन्ति’’ इति ब्रह्मात्मैक्यानुसन्धानं सूत्रितमिति । तन्न । सूत्रेण तदलाभात् । आत्मशब्दस्यानेकेष्वर्थेषु शक्तत्वात् शरीरप्रतिसंबन्धिनि प्रचुरप्रयोगाच्च मम शरीरीत्यनुसन्धानमेव सूत्रितं भवितुमर्हति । अन्तर्यामिब्राह्मणादिषु ब्रह्मण: सर्वशरीरकत्वश्रवणात् मच्छरीरकं ब्रह्मेत्यनुसन्धानमेव तत्र प्रतिपाद्यते । यद्यपि सूत्रस्थात्मशब्द:स्वपर्याय:, ममायमात्मेत्यनुसन्धानं विहाय अहं ब्रह्मेत्यनुसन्धानस्य श्रीभाष्ये प्रतिपादितत्वात् सूत्रस्थ आत्मशब्द: स्वपर्यायतया भाष्याभिप्रेत इति ज्ञायते । तथापि अन्तत: अयमेवार्थ: तस्मिन् सूत्रे प्रपञ्चयिष्यते । तथा हि तत्र भाष्यम् ‘‘ यथा हि प्रत्यगात्मन: स्वशरीरं प्रति आत्मत्वात् देवोऽहं मनुष्योऽहमित्यनुसन्धानं, तथा प्रत्यगात्मनोऽप्यात्मत्वात् परमात्मन: तस्याप्यहमित्येवानुसन्धानं युक्तम् - इति । अत्रापि जिज्ञासाधिकरणे सिद्धान्तोपन्यासघट्टात् पूर्वं वक्ष्यति - ‘‘इदमेव शरीरात्मभावलक्षणं तादात्म्यं, आत्मेति तूपगच्छन्तीति वक्ष्यति’’ इति भाव: । अत्राचार्यै: ‘‘ अत्रापि वक्ष्यति इत्यनेन एतदन्ता: शतदूषणीवादा: जिज्ञासाधिकरणे स्थित्वैवेति ज्ञायते । तेनोपरितना वादा: जन्माद्यधिकरणमारभ्य चतुर्थाध्यायान्तभागेऽपि अद्वैतदूषणपरा वादा: आचार्यै रचिता: अस्मद्दौर्भाग्यात्तु लुप्ता इति उत्तमूरुस्वामिन: प्राहु: ।

दोषान्तरमाह - **विपरीतश्चायमिति** । किं च भवन्मतरीत्या आत्मेत्युपासनव्यपदेश:

इत्यनुसन्धानं ह्यत्र व्याख्यायते। तच्च भ्रान्तिरूपमिति भवता एष्टव्यम्; विलुप्ताहंभावादिविप्लवसंविन्मात्ररूपत्वाभ्युपगमात् ब्रह्मणः। ततश्च मोक्षोपायतया भ्रान्तिरेव सूत्रितेत्यायातम्। शालामालादिन्यायेन विवक्षितपर्यवस्थापनं तु सूत्र स्वारस्योपन्यास -दशाविरुद्धम्। किंच, इतिकरणस्वारस्यादत्र दृष्टिविधिसूचनमेव स्वरसम्। तथैव हि श्रुतिरपि, 'आत्मेत्येवोपासीत' इति। वाक्यं च, 'आत्मेत्येव तु गृह्णीयात्' इति। प्रसिद्धश्चायमर्थः स्मृतिष्वपि, 'ब्रह्माहमिति भावयेत्' इत्यादाविव दृष्टिविधित्वमात्रसिद्धौ उपास्यस्य दृष्टिविशेषणस्य चात्यन्तभेदस्य सार्वत्रिकत्वात् अत्रापि जीवब्रह्मणोर्भेद एवान्ततस्सूत्रितस्स्यादिति नात्र भवतः कश्चिदवकाशः।

यत्तु फलदशायाम्, 'अविभागेन दृष्टत्वात्' इत्यविभागानुभवस्सूत्रित इति,

---

विपरीतः। तथा हि ''अहं ब्रह्मास्मि'' इत्यनुसन्धानं हि अत्र व्याख्यायते। इदमनुसन्धानं भवद्रीत्या भ्रमरूपं भवति। ब्रह्मणः अहंत्वरहितसंविन्मात्रस्वरूपत्वं भवदङ्गीकृतम्। अहंत्वरहिते ब्रह्मणि अहंत्वानुसन्धानं हि भ्रम एव। ततश्च मोक्षोपायतया भ्रान्तिरेव सूत्रितेत्यायाति।

शालामालादिन्यायेनेति। अस्यार्थो न ज्ञायते।

किं चेति। ''आत्मेति तूपगच्छन्ति'' इति सूत्रें आत्मशब्दोत्तरम् इतिशब्दप्रयोगात् आत्मत्वदृष्टिविधिरेवात्र सूच्यते। श्रुतिरपि ''आत्मेत्येवोपासीत'' इति इतिशब्दघटिता। वाक्यकारोऽपि ''आत्मेत्येव तु गृह्णीयात्'' इत्याह। स्मृतिष्वपि प्रसिध्दोऽयमर्थः ''ब्रह्माहमिति भावयेत्'' इत्यादिषु। तन्त्रग्रन्थेष्वपि ''देवोऽहमिति भावयेत्''इति। अतोऽत्र सूत्रे इतिकरणस्वारस्यात् ''मनो ब्रह्मेत्युपासीत'' इत्यादाविव दृष्टिविधित्वमात्रसिद्धौ उपास्यस्य दृष्टिविशेषणस्य चात्यन्तभेद एव सर्वत्र दृश्यत इति अत्रापि जीवब्रह्मणोः भेद एव सूत्रितः स्यादिति भवन्मतस्याभेदस्य नात्रावसर इति। यद्यपि अयमर्थः स्वस्याननुमतः, तथापि इतिशव्दयोगात् जीवे सर्वत्र आमदृष्टिरेव स्वरसार्थः स्यात्। एवं च साक्षान्मोक्षोपायोपदेशता मा भूत्। एतत्फलं च सर्वत्र स्वस्मिन्नानुकूल्येन वर्तनम्, शमादिसिद्धिश्चेति टिप्पणीकाराः।

यत्तु फलदशायामिति। मोक्षदशायां जीवस्य ब्रह्मैक्यम् ''अविभागेन दृष्टत्वात्''

तदपि मन्दम्; अविभागशब्दस्य स्वरूपैक्यनियतत्वाभावात् । विभागो हि परस्परसम्बन्धपरिपन्थिधर्मविशेष इति विदुषां प्रसिद्धिः, तेनाविभागोऽप्यपृथक्सिद्धिरेवेति सिध्यति; न पुनः स्वरूपैक्यम्, तत्र तद्व्यवहारश्चौपचारिकः । अस्तु वा मुख्यः, तथाऽप्यनियतत्वादन्यथासिद्धः, वाङ्मनःप्रभृतिसंपत्तिवदवस्थाविशेषमात्रविवक्षया, 'अविभागो वचनात्' इत्यसूत्रयत्, अत्र तु

इति सूत्रेणोक्तम् इति यदुक्तम् ; तदपि मन्दम् । अविभागशब्दस्य अपृथग्भाववाचकत्वेन नियमेन स्वरूपैक्यपरत्वाभावात् । परस्परविश्लेषानर्हधर्मविशेषः अविभाग इत्येव विद्वत्समाजे प्रसिद्धिः । संयोगविरोधी गुणः विभाग इति चाहुः । तथा च अविभागोऽप्यपृथक्सिद्धिरेवेति सिध्यति न पुनः स्वरूपैक्यम् । स्वरूपैक्ये अविभागशब्दप्रयोगः औपचारिकः । मुख्य इति स्वीकारेऽपि स्वरूपैक्यनियतत्वाभावात् अन्यथासिद्धः अपृथक्सिद्धिमादायापि निर्वोढुं शक्यः । तर्हि " अविभागो वचनात्" इति सूत्रे अविभागशब्दस्य कोऽर्थ इति चेत् - उच्यते । जीवपरिष्वक्तानि भूतसूक्ष्माणि परमात्मनि संपद्यन्त इति "तानि परे तथा ह्याह"इति सूत्रे उक्तम् । तदुपरि सा संपत्तिः किं प्राकृतलयवत् कारणापत्तिरूपा "वाङ्मनसि" इत्यादिवत् अविभागरूपेति चिन्तायामविभागरूपेति " अविभागो वचनात्" इति सूत्रेण प्रतिपाद्यते । तत्राविभागः संयोगविशेष इति सिद्धान्तः । नित्यान्तरवस्थितेऽपि परमात्मनि तदानीं संसर्गविशेषः शास्त्रैकगम्य इति श्रुतप्रकाशिका । प्रकृतमूलेऽपि **अवस्थाविशेषमात्रविवक्षयेत्यस्यापि** संसर्गविशेषविवक्षयेत्यर्थः । **अत्र तु इति** । "अविभागेन दृष्टत्वात्" इत्यत्र तु इत्यर्थः । तुशब्देन "अविभागो वचनात्" इत्यत्र भूतसूक्ष्मसंपरिष्वक्तस्य जीवस्य परिमितकालं परमात्मापृथक्सिद्धत्वमुच्यते । " अविभागेन दृष्टत्वात्" इत्यत्र तु मुक्तस्य शाश्वतं परमात्मापृथक्सिद्धत्वमुच्यते इति विशेषः । एतदुक्तं भवति - मुक्तः स्वात्मानं परमात्मापृथक्सिद्धतया अनुभवतीति सूत्रार्थःइति।**यथाप्रमाणमिति**। जीवपरमात्मभेदप्रतिपादकप्रमाणमनतिक्रम्य तादृशप्रमाणाविरोधि अपृथक्सिद्धत्वमविभागशब्देनोच्यते। न तु तद्विरोधि

यथाप्रमाणमपृथक्सिद्धत्वविवक्षयाऽयमविभागशब्दः, अन्यथा प्रमाणविरोधादुपपत्तिविरोधाच्च । प्रयुञ्जते च मध्यस्था दण्डो देवदत्ताद्विभक्तः जातिगुणादिकं त्वविभक्तमिति च । यद्वा विभागो भेद एवास्तु, अविभागश्च भेदनिवृत्तिः, तथापि स्वरूपभेदोऽत्र निषिध्यत इत्यत्र न प्रमाणं पश्यामः । प्रत्युत पूर्वापरसूत्रशतपरामर्शात्, 'भोगमात्रसाम्यलिङ्गाच्च' इति उपान्त्यसूत्रसंवादाच्च किंचिज्ज्ञत्वसर्वज्ञत्वपरिमितसुखत्वनिरतिशयानन्दत्वादिवैधर्म्यलक्षणभेद एव निषिध्यत इति स्वरसतः प्रतीयते । तत्क्रतुन्पायोऽपि कृशोदरीनीडनिहितकीटवत् आदिभरतमृगत्वादिवच्च

स्वरूपैक्यमुच्यत इत्यर्थः। तदाह- **अन्यथेति । प्रमाणविरोधादिति** । जीवपरमात्मभेदप्रतिपादकप्रमाणविरोधादित्यर्थः। तथा च विभागशब्दः पृथक्सिद्धिवाचकः, अविभागशब्दश्च अपृथक्सिद्धिवाचक इति भावः। तत्र प्रयोगं प्रमाणयति - **प्रयुञ्जते चेति । विभक्तः=पृथग्भूतः अविभक्तम्=अपृथग्भूतम्।**

यद्वेत्यादि। विभागः भेदः, अविभागः भेदनिवृत्तिः इत्येवास्तु। तथापि ''अविभागेन दृष्टत्वात्'' इति सूत्रे जीवपरयोः स्वरूपभेदाभावो नोच्यते, अपि तु वैधर्म्यरूपभेदाभावः। जीवपरयोः किंचिज्ज्ञत्वसर्वज्ञत्वपरिमितसुखवत्त्वापरिमितानन्दवत्त्वादिरूपवैधर्म्यात्मकः भेदः नास्तीति प्रतिपाद्यते। तयोः स्वरूपभेदप्रतिपादकपूर्वापरसूत्रशतपरामर्शात् ''भोगमात्रसाम्यलिङ्गाच्च'' इति उपान्त्यसूत्रसंवादाच्चेति भावः। साम्यशब्देन वैधर्म्याभावः सूच्यते। **न प्रमाणं पश्याम इति।** '' अन्यत् द्रव्यं हि नैति तद्द्रव्यतां यतः'' इति वचनादिति भावः।

ननु ''यथाक्रतुरस्मिंल्लोके पुरुषो भवति तथेतः प्रेत्य भवति'' इति श्रुत्या परमात्मानं यथोपास्ते तथा भवति उपासक इति कथनात् मुक्तौ जीवस्य परमात्मभावः परमात्मैक्यं भवतीत्याशङ्क्य सा श्रुतिः परमात्मसाम्यमेव बोधयति, भवतीत्यस्य प्राप्त्यर्थकस्यानुभवार्थकत्वात् इति सदृष्टान्तोपन्यासं समाधत्ते - **तत्क्रतुन्यायोऽपीति ।** यथा कृशोदरीनीडनिहितः कीटः कृशोदरीसमानाकारो भवति न तु यस्याः कृशोदर्याः नीडे निहितः सैव कृशोदरी भवति, यथा च आदिभरतः यं मृगं स्मरन् मृतः स एव मृगो नाजायत,

साम्यापत्त्यैव समञ्जसयितुं शक्यः । अन्यथा दृष्टान्त एव तत्र प्रतिदृष्टान्तताम‍श्नुते ।

तदेवं भूयसांन्यायमसन्तमिव कृत्वा त्वदुपन्यस्तानि कतिपयानि सूत्राणि त्वदभिमतप्रतीपानि निदर्शितानि । ततश्चान्यपरानन्यपरविभागोऽपि विलीनः । अत एवान्येषां भूयसां सूत्राणां कल्पिताकारपरत्वमुपलक्षणपरत्वं वा नोत्प्रेक्षितुं शक्यम् । अन्यानि तु सूत्राणि सगुणं सविभूतिकं च ब्रह्म प्रतिपादयन्तीत्ययमर्थस्त्वयाऽपि दुरपह्नवः ।

श्लो. अर्थवत्त्वेऽपि सूत्राणामन्योन्यार्थविभागतः ।
सगुणं ब्रह्म वेद्यं स्यान्न चेत् सूत्रकथा मुधा ।।

आह च जन्माद्यधिकरणे– 'ये तु निर्विशेषं वस्तु जिज्ञास्यमिति वदन्ति, तन्मते, 'ब्रह्मजिज्ञासा', 'जन्माद्यस्य यतः' इत्यसङ्गतं स्यात्, निरतिशयबृहत्

किं तु तन्मृगसमानाकारो मृगोऽजायत तद्वत् परमात्मानमुपासीनः परमात्मसमानगुणको भवतीति तत्क्रतुन्यायार्थः । **अन्यथा**=ऐक्यापत्त्यभिप्रायकत्वे भवद्भिः प्रदर्श्यमानमिदं दृष्टान्तद्वयं भवन्मतप्रतिकूलदृष्टान्तद्वयमेव भवेदित्यर्थः । **प्रतिदृष्टान्तताम्**= प्रतिकूलदृष्टन्तताम् । **तदेवमिति**। भवद्भिः निर्विशेषब्रह्मपरतया यानि कतिपयानि सूत्राणि उदाहृतानि तदतिरिक्तानि सर्वाणि सूत्राणि सविशेषमेव ब्रह्म प्रतिपादयन्तींति भूयसां न्यायानुसारेणैव सूत्राणां सविशेषपरत्वं सिध्यति, तथापि भूयसांन्यायमसन्तमिव कृत्वा भवत्प्रदर्शितानि सूत्राणि भवन्मतप्रतिकूलानीति एतावता निरूपितम् इति भावः । **ततश्चेति**। सूत्राणां भवदभिमतनिर्विशेषवादप्रतिकूलत्वात् कानिचित् सूत्राणि निर्विशेषपराणि अन्यानि तु अन्यपराणि उपासनार्थ विशेषबोधकानीति विभागोऽपि निरस्तः। सर्वेषां सूत्राणां सविशेषपरत्वादिति भावः। तदाह - **अत एवेत्यादिना**। **अर्थवत्त्वेऽपि** इति। ब्रह्मसूत्राणां परस्परभिन्नापुनरुक्तार्थविभागेनार्थवत्त्वेऽपि सर्वत्र सगुणमेव ब्रह्म वेद्यं भवेत्। अन्यथा सूत्रमेव व्यर्थम्। संग्रहेण बोधनार्थानि हि सूत्राणि। निर्विशेषस्य बोधाविषयतया तद्बोधनार्थता तेषां न भवतीति व्यर्थान्येव स्युरिति भावः।

सगुणस्यैव ब्रह्मणः सूत्रप्रतिपाद्यत्वं भाष्यप्रदर्शनपूर्वकं विशदयति - **आह चेत्यादिना**। भाष्ये आद्यसूत्रासंगतिमुपपादयति - **निरतिशयेति**। न निर्विशेषं ब्रह्मेति निरुक्तमिति

बृंहणं च ब्रह्मेति निर्वचनात् । तच्च ब्रह्म जगज्जन्मादिकारणमिति वचनाच्च; एवमुत्तरेष्वपि सूत्रगणेषु सूत्रोदाहृतश्रुतिगणेषु च ईक्षणाद्यन्वयदर्शनात् सूत्राणि सूत्रोदाहृताः श्रुतयश्च न तत्र प्रमाणम्' इत्यादि । अयमभिप्रायः–प्रथमाध्याये सर्वत्र, 'ईक्षतेर्नाशब्दम्' 'आनन्दमयोऽभ्यासात्', 'अन्तस्तद्धर्मोपदेशात्' इत्यादिषु ब्रह्मणस्तद्धर्मविशेषैर्वैशिष्ट्यं प्रतिपाद्यते; एवं जीवादिभ्यो भेदश्च प्रतिपाद्यते । 'भेदव्यपदेशाच्चान्यः', 'कर्मकर्तृव्यपदेशाच्च', 'उभयेऽपि हि भेदेनैनमधीयते', 'विशेषणभेदव्यपदेशाभ्यां च नेतरौ', 'भेदव्यपदेशात्', 'आकाशोऽर्थान्तरत्वादिव्यपदेशात्', 'सुषुप्त्युत्क्रान्त्योर्भेदेन' इत्यादिषु सूत्रेषु तत्तच्छ्रुतिगतो भेदनिर्देश एव स्वशब्देन सूत्र्यते । 'जीवमुख्यप्राणलिङ्गान्नेति चेन्नोपासात्रैविध्यादाश्रितत्वादिह तद्योगात्', 'न च स्मार्तमतद्धर्माभिलापाच्छारीरश्च', 'नानुमानमतच्छब्दात् प्राणभृच्च', 'जीवमुख्यप्राणलिङ्गान्नेति चेत् तद्व्याख्यातम्', इत्यादिषु प्रधानादिवत् जीवः स्वशब्देनोपादाय व्यवच्छिद्यते 'गुहां प्रविष्टावात्मानौ हि तद्दर्शनात्' इत्यादिषु (च भेदः ?) स्फुटः । अतः प्रथमाध्याये सर्वत्र जिज्ञास्यतया प्रक्रान्तं ब्रह्म आनन्दगुण- विशिष्टं प्रकृतेरिव पुरुषादपि विलक्षणं च प्रत्यपादि । अयमेवार्थः- स्थूणानिखननन्यायेन द्वितीयाध्याये स्थिरीकृत इति सोऽपि तद्विषय एवेत्युक्तम् । तत्र च, 'इतरव्यपदेशाद्धिताकरणादिदोषप्रसक्तिः' इति जीवैक्यव्यपदेशमूलानेकदोषान् आशङ्क्य ''अधिकं तु भेदनिर्देशात्'' ''अश्मादिवच्च तदनुपपत्तिः'' इति

भावः । द्वितीयसूत्रासंगतिं विवृणोति - **तच्चेति** । न हि जगतोऽध्यासो यत इति लिलक्षयिषितमिति भावः । एवं सूत्रासंगतिकथनेन तद्विषयवाक्यासंगतिरपि फलिता । उत्तरेषामपि सूत्राणां तत्तद्विषयवाक्यानां च निर्विशेषपक्षाननुगुणत्वमाह - **एवमिति** । **सूत्रगणेष्विति** । नैकैकं सूत्रं वाक्यं वा विरुद्धम् । अपि तु तत्तदधिकरणशरीरं तत्तद्विषयवाक्यजातं च विरुद्धमिति भावः । उत्तरेष्वित्यादिभाष्यं व्याख्याति- **अयमभिप्राय इत्यादिना** । **भेदश्चेति** । **स्वशब्देनेति** भेदवाचकशब्देनेत्यर्थः । **स्वशब्देनोपादायेति**। जीववाचकशारीर-

प्राणभृदादिशब्देनोपादायेत्यर्थः । **भेदः स्फुट** इति । आत्मानाविति द्विवचननिर्देशादिति भावः । **तद्विषय एवेति** । भेदविषयक एवेत्यर्थः ।

अथात्र ''अयमभिप्रायः'' इत्यारभ्य उद्धृतानां सूत्राणं यथाभाष्यमर्थो लिख्यते -

ईक्षतेर्नाशब्दम्

यस्मिन् शब्द एव प्रमाणं न भवति तत् अशब्दम्आनुमानिकं प्रधानं न जगत्कारणवादिवाक्यप्रतिपाद्यं सच्छब्दवाच्यसंबन्धिव्यापारवाचिनः ईक्षतेर्धातोः श्रवणात् ''तदैक्षत बहु स्यां प्रजायेय'' इति ।

आनन्दमयोऽभ्यासात् ।

आनन्दमयः परमात्मा । कुतः । अभ्यासात् अभ्यस्यमानानन्दवत्त्वात् ।

अन्तस्तद्धर्मोपदेशात् ।

अन्तरादित्ये अन्तरक्षिणि च यः पुरुषः प्रतीयते स जीवादन्यः परमात्मैव । कुतः । तद्धर्मोपदेशात् जीवेष्वसंभवतां अपहतपाप्मत्वादीनां धर्माणामुपदेशात् ।

भेदव्यपदेशाच्चान्यः ।

आदित्यादिजीवेभ्यः भेदव्यपदेशाच्च परमात्मा हिरण्यगर्भादिजीवेभ्योऽन्यः ।

कर्मकर्तृव्यपदेशाच्च ।

''एतमितः प्रेत्याभिसंभवितास्मि'' इति प्राप्यतया परं ब्रह्म व्यपदिश्यते, प्राप्तृतया च जीवः । अतः प्राप्ता जीव उपासकः, प्राप्यं परं ब्रह्मोपास्यमिति प्राप्तुरन्यदेवेदमिति विज्ञायते।

उभयेऽपि हि भेदेनैनमधीयते ।

उभये माध्यंदिनाः काण्वाश्च अन्तर्यामिणः नियाम्यत्वेन वागादिभिरचेतनैः समं एनं

शारीरमपि विभज्याधीयते।

विशेषणभेदव्यपदेशाभ्यां च नेतरौ

विशेषणात् भेदव्यपदेशाच्च भूतयोन्यक्षरं न प्रधानपुरुषौ।

भेदव्यपदेशात्। (१-३-४)

''जुष्टं यदा पश्यत्यन्यमीशम्'' इत्यादिभिः जीवाद्विलक्षणत्वेन द्युभ्वाद्यायतनस्य व्यपदेशात्।

आकाशोऽर्थान्तरत्वादिव्यपदेशात्। (१-३-४२)

'' आकाशो ह वै नामरूपयोर्निर्वहिता'' इत्यत्र श्रूयमाणः आकाशः परं ब्रह्म न प्रत्यगात्मा। प्रत्यगात्मभिन्नत्वोपपादकनामरूपनिर्वोढृत्वादि धर्मोपदेशात्।

सुषुप्त्युत्क्रान्त्योर्भेदेन। (१-३-४३)

सुषुप्त्युत्क्रान्त्योः प्रत्यगात्मनोऽर्थान्तरत्वेन परमात्मनो व्यपदेशात् प्रत्यगात्मनोऽर्थान्तरभूतः परमात्मा अस्त्येव। सुषुप्तौ '' प्राज्ञेनात्मना संपरिष्वक्तो न बाह्यं किंचन वेद नान्तरम्'' इति। उत्क्रान्तौ''प्राज्ञेनात्मना अन्वारूढःउत्सर्जन् याति''इति। **जीवमुख्यप्राणलिङ्गान्नेति चेन्नोपासात्रैविध्यादाश्रितत्वादिह तद्योगात्॥ (सू १-१-३२)**

जीवलिङ्गात् मुख्यप्राणलिङ्गाच्च नाध्यात्मसंबन्धभूमेति चेत् - न। उपासात्रैविध्याद्धेतोः। उपासनात्रैविध्यमुपदेष्टुं तत्तच्छब्देनाभिधानम्। ब्रह्मणः स्वरूपेणानुसन्धानं भोक्तृवर्गशरीरकत्वानुसन्धानं भोगोपकरणशरीरकत्वानुसन्धानं चेति त्रिविधमनुसन्धानमुपदेष्टुमित्यर्थः। तदिदं त्रिविधमुपासनं प्रकरणान्तरेष्वप्याश्रितम्। इहापि प्रकरणे तत् त्रिविधमनुसन्धानं युज्यत एवेत्यर्थः।

न च स्मार्तमतद्धर्माभिलापाच्छारीरश्च। (१-२-२०)

स्मार्तं प्रधानं, शारीरः जीवः। स्मार्तं च शारीरं च नान्तर्यामी। अतद्धर्माभिलापात् तयोरसंभावितधर्माभिलापात्। यथा स्मार्तमचेतनं सर्वज्ञत्वनियन्तृत्वसर्वात्मत्वादिकं नार्हति, तथा जीवोऽपि, अतद्धर्मत्वादिति।

नानुमानमतच्छब्दात् प्राणभृच्च। (१-३-३)

यथास्मिन् प्रकरणे प्रधानप्रतिपादकशब्दाभावात् प्रधानं न प्रतिपाद्यं, एवं प्राणभृदपीत्यर्थः। अनुमीयत इत्यनुमानं परोक्तं प्रधानमुच्यते। अनुमानप्रमितत्वात् आनुमानमिति वा। **अतच्छब्दात्**= तद्वाचिशब्दाभावादित्यर्थः। अर्थाभावेऽव्ययीभावः।

जीवमुख्यप्राणलिङ्गान्नेति चेत्तद्व्याख्यातम्। (१-४-१७)

यदुक्तं जीवलिङ्गात् मुख्यप्राणसंकीर्तनाच्च लिङ्गात् भोक्तैवास्मिन् प्रकरणे प्रतिपाद्यते न परमात्मेति तत् व्याख्यातम्- तस्य निर्वाहः प्रतर्दनविद्यायामभिहितः।

गुहां प्रविष्टावात्मानौ हि तद्दर्शनात्। (१-२-११)

न प्राणजीवौ बुद्धिजीवौ वा गुहां प्रविष्टौ ऋतं पिबन्तावित्युच्येते, अपि तु जीवपरमात्मानौ हि तथा व्यपदिश्येते। कुतः। तद्दर्शनात्। अस्मिन् प्रकरणे जीवपरयोरेव हृदयगुहाप्रवेशव्यपदेशदर्शनात्।

इतरव्यपदेशाद्धिताकरणादिदोषप्रसक्तिः। (२-१-२१)

यदि इतरस्य जीवस्य "तत्त्वमसि" "अयमात्मा ब्रह्म" इत्यादिभिर्वाक्यैः ब्रह्मभावो व्यपदिश्यते तदा ब्रह्मणः सर्वज्ञस्य सर्वशक्तस्य स्वस्य हितरूपजगदकरणमहितरूपजगत्करणमित्यादयो दोषाःप्रसज्येरन्।

अधिकं तु भेदनिर्देशात्। (२-१-२२)

तुशब्दः पक्षं व्यावर्तयति। आध्यात्मिकादिदुःखयोगार्हात् प्रत्यगात्मनः अधिकम् अर्थान्तरभूतं ब्रह्म। कुतः, भेदनिर्देशात्। प्रत्यगात्मनो भेदेन निर्दिश्यते परं ब्रह्म। "य

सूत्राभ्यां पर्यहार्षीत्। तत्र चाभाष्यत–''ये पुनरस्यैव जीवस्याविद्यावियुक्तावस्थामभिप्रेत्य इमं भेदं वर्णयन्ति, तेषामिदं सर्वमसङ्गतं स्यात्। न हि तदवस्थस्य सर्वज्ञत्वं सर्वेश्वरत्वं समस्तकारणत्वं सर्वात्मत्वं सर्वनियन्तृत्व मित्यादीनि सन्ति। अनेनैव रूपेण ह्याभिः श्रुतिभिः प्रत्यगात्मनो भेदः प्रतिपाद्यते, तत् सर्वं ह्यविद्यापरिकल्पितं त्वन्मते। न चाविद्यापरिकल्पितस्याविद्यावस्थायां शुक्तिकारजतमरीचिकाजलादिभेदवत् परस्परभेदोऽत्र सूत्रकारेण, 'अधिकं तु भेदनिर्देशात्' इत्यादिषु प्रतिपाद्यते। ब्रह्मजिज्ञासा कर्तव्येति जिज्ञास्यतया प्रक्रान्तस्य ब्रह्मणो जगज्जन्मादिकारणस्य वेदान्तवेद्यत्वं तस्य च स्मृतिन्यायविरोधपरिहारश्च क्रियते' इति स्पष्टम्। अतोऽध्यायद्वयं विशिष्टपरमिति स्थितम्।

तृतीयाध्यायेऽपि वैराग्यपादे तावत् प्रतिनियतकर्मफलभोक्तॄणामनन्तानां

आत्मनि तिष्ठन्'' ''पृथगात्मानं प्रेरितारं च'' इत्यादिना।

अश्मादिवच्च तदनुपपत्तिः। (२-१-२३)

अश्मकाष्ठतृणादीनामत्यन्तहेयानां ब्रह्मस्वरूपैक्यं यथा नोपपद्यते, तथा चेतनस्यापि अनन्तदुःखयोगार्हस्य ब्रह्मभावानुपपत्तिः।

तत्र चाभाष्यतेति। इतरव्यपदेशाधिकरणे अश्मादिवच्चेति सूत्रे इत्यर्थः। अविद्यावियुक्तस्य ब्रह्मणः जीवात् भेदः उच्यते वा, उत अविद्यासंसृष्टस्येश्वरस्येति विकल्पमभिप्रेत्य प्रथमं पक्षं दूषयति - **तेषामिति**। ततः किमित्यत्राह- **अनेनैवेति**। तेषां तदानीमभावः कथमित्यत्राह - **तत्सर्वमिति**। अविद्यापरिकल्पितस्येश्वरस्य भेद उच्यत इति पक्षं दूषयति – **न चाविद्येति**। कल्पितभेदो न प्रतिपाद्यते, अकल्पितजीवस्वरूपज्ञानस्य प्रक्रान्तत्वादित्यर्थः। वेदान्तवेद्यमिति समन्वयाध्यायार्थः। स्मृतिन्यायविरोध इति द्वितीयाध्यायार्थः इति **श्रुतप्रकाशिका**।

तदाह - **अतोऽध्यायद्वयमिति**।

कर्मिणां गमनागमनप्रकारचिन्तनादात्मभेदोऽर्थलब्धः । उभयलिङ्गपादे तु शोध्यं शोधितम् । शिष्टमपि विशिष्टानुगुणमेव । गुणोपसंहारपादस्तु तत्तद्विद्यानियतानियतगुणोपाधिकविद्याभेदाभेदचिन्तनात् कार्त्स्न्येन गुणविशिष्टपर इति स्वरूपतोऽपि सुप्रसिद्धम् न केवलं नाममात्रेण । पुरुषार्थपादोऽपि विद्याया वर्णाश्रमधर्मेतिकर्तव्यताकत्वप्रतिपादनान्निर्विशेषात्माद्वैतवाक्यार्थविज्ञानपक्ष-प्रतिपक्षः । तद्वत् आवृत्तिपादोऽपि; असकृदावृत्तोपासनादिप्रतिपादनेन फलाङ्कुरस्यैवोपपादनात् । उत्क्रान्तिपादेऽपि स्थूलदेहादुत्क्रान्तिरूपफलप्रादुर्भाव-प्रपञ्चनम् । अर्चिरादिपादेऽपि तथेति सगुणब्रह्मोपासकानां तत्प्राप्त्यर्थमिति भवद्भिरेव व्याख्यातम् । फलपादेऽपि स्वरूपाविर्भावपूर्वकं परब्रह्मसमानस्वच्छन्दभोगप्रपञ्चनं व्यक्तमिति न बादरायणस्य क्वचिदपि त्वदभिमतानुपपन्नार्थविवक्षां प्रत्यक्षयामहे ।

तृतीयाध्याये प्रतिपादम् आत्मभेदः सविशेषब्रह्म च प्रतिपाद्यत इत्याह - **तृतीयाध्यायेऽपीत्यादिना**। जीवात्मनां संसारे वैराग्योत्पादनार्थं प्रवृत्ते वैरग्यपादात्मके प्रथमपादे पुण्यपापरूपतत्तज्जीवकृततत्तत्कर्मफलभोगाय कर्मिणां तेषां जीवानां लोकान्तरगमनागमनप्रकारचिन्तनात् आत्मभेदः प्राप्त एव । आत्मभेदं विना तत्प्रकारासंभवात् । उभयलिङ्गपादे तु **शोध्यं शोधितमिति** । अत्र "हेयं वस्तु स्वतो यत् स्थितिरिह हि भवेद्दुःखकृत् स्वेच्छयापि त्याज्यत्वं नान्यथा स्यादिति न निरुपधेर्हेयभावस्य हानेः । नित्यस्वातन्त्र्यभाजो भविन इव दशाभेदतो नाप्यवद्यं श्रुत्यैवैकत्र देहे परतदितरयोः शुद्ध्यशुद्धी ह्यधीते ॥" इति अधिकरणसारावलिश्लोकः द्रष्टव्यः । **शिष्टमपि विशिष्टानुगुणमेवेति**।

तत्तद्विद्येति । तत्तद्विद्यायां व्यवस्थिताः अव्यवस्थिताश्च ये गुणाः तन्निमित्तकस्य विद्याभेदस्य तदभेदस्य च चिन्तनात् गुणोपसंहारपादः कृत्स्नोऽपि गुणविशिष्टब्रह्मपर इति पादस्वरूपतोऽपि प्रसिद्धं न पुनर्नाममात्रेण । न हि गुणोपसंहारो गुणसंहार इति भावः । अन्यत्रोक्तस्यान्यत्रोपयोगार्थं स्वीकारः उपसंहारः । **पुरुषार्थपादोऽर्प्रीति**। अङ्गपादापरनाम्नि पुरुषार्थपादे विद्यायाः वर्णाश्रमधर्माङ्गकत्वं प्रतिपाद्यते । वर्णाश्रमधर्माश्च भेदगर्भाः सविशेषार्थप्रतिपादनपराः निर्विशेषाद्वैतं वाक्यार्थ इति पक्षस्य प्रतिकूलाः । **आवृत्तिपादोऽपीति**। चतुर्थाध्यायप्रथमपादः असकृदावृत्तोपासनतत्फलप्रतिपादकः निर्विशेषज्ञानस्य मोक्षोपायत्वं नानुमन्यते। शिष्टं स्पष्टम् ।

उक्तं च भास्कराचार्यैः–"सूत्राभिप्रायसंवृत्त्या स्वाभिप्रायनिवेशनात् (प्रकाशनात्)। व्याख्यातं यैरिदं सूत्रं(शास्त्रं) व्याख्येयं तन्निवृत्तये ।।" इति । तदभिप्रायेण भाष्यकारैरप्युक्तम्– 'भगवद्बोधायनकृतां विस्तीर्णां ब्रह्मसूत्रवृत्तिं पूर्वाचार्यास्सञ्चिक्षिपुः; तन्मतानुसारेण सूत्राक्षराणि व्याख्यास्यन्ते' इति ।

यत्पुनः उक्तं प्रमाणविरुद्धत्वेन सूत्रार्थानामन्यथाकथनमयुक्तमिति-तन्नूनमश्रुतस्वसिद्धान्तेनोक्तम्; सूत्राण्यपि यथाकथञ्चिद्योजयितव्यानीति क्वचित् भवत्कूटस्थैर्व्याख्यानात् । दृश्यते च जैमिनि पतञ्जलिकणभक्षाक्षपादादिसूत्रेष्वपि तत्तद्व्याख्यातृभिरध्याहारादिकल्पना । तदाह, 'लोके येष्वर्थेषु प्रसिद्धानि यानि पदानि तानि सति संभवे तदर्थान्येव सूत्रेष्वपि' (मी. भा. 1) इति । अध्याहारादिभिः स्वाभिमतार्थपरतया निर्वाहो वेदसंवादभूयस्त्ववैदिकपरिग्रहविशेषादिभिराप्तोक्तत्वनिश्चये मन्वादिप्रणीतधर्मशास्त्रादिष्वपि क्वाचित्कवेदविरोधादेर्यथाकथञ्चिदुपशमयितव्यत्वात् । अत एवाह सति संभव इति । श्रुतिसूत्रयोरविरोधे सूत्रेष्वध्याहारादिकमन्याय्यम् । विरोधप्रसङ्गे पुनः अध्याहारादिभिस्सूत्रं श्रुत्यनुगुणतया नेतव्यम् । न चासौ विभ्रम इति शङ्कितुमपि शक्यम्, सकलवेदशाखाप्रवर्तनाधिकृतत्वात् क्वचिदपि प्रमाणविरुद्धार्थादर्शनात् परिग्रहातिशयाच्च । अतस्तदुक्तेषु सूत्रेषु यत्र क्वचित् प्रमाणविसंवादे यथाकथञ्चित् समाधातव्यम्; न चास्ति विसंवाद इति दर्शितमिति ।।

इति श्रीकवितार्किकसिंहस्य सर्वतन्त्रस्वतन्त्रस्य श्रीमद्वेंकटनाथस्य वेदान्ताचार्यस्य कृतिषु ।।

शतदूषण्यां परमते सूत्रस्वारस्यभङ्गवादः षट्षष्टितमः ।। ६६ ।।

(एतावदेवात्रोपलभ्यते ।)

सूत्राभिप्रायेति । सूत्राभिप्रायस्य प्रच्छादनेन स्वाभिप्रायस्य प्रकाशनात् हेतोः यैः शंकराचार्यैः इदं सूत्राख्यं शास्त्रं व्याख्यातं तस्य व्याख्यानस्य निराकरणाय इयं भास्करीया

व्याख्या इत्यर्थः । भास्करभाष्यस्यादावयं श्लोकः । तत्र शांकरव्याख्याने स्थिते किमर्थं भवता व्याख्या क्रियत इति शङ्कासमाधानायायं श्लोकः लिखितः । शांकरभाष्ये वास्तवस्य सूत्राभिप्रायस्य प्रच्छादनेन स्वाभिप्रायस्य प्रकाशनमेवास्ति । अतस्तदनुपादेयम् इति कृत्वा तद्व्याख्याखण्डनपूर्वकं मया व्याख्या क्रियत इति तदाशयः । **क्वचिदिति** । आनन्दमयाधिकरणादौ ।

इत्थं रामानुजार्यः शठजिदुपपदो देवनाथार्यसूरेः
प्राप्तत्रय्यन्तसंपद्रचितबुधजनप्रीणनग्रन्थजातः ।
ख्यातश्रीरङ्गरामानुजयतिनृपति प्रेरणप्राप्तधैर्यः
व्याख्यामेतां व्यतानीत् श्रुतिमकुटगुरोर्दूषणानां शतस्य ॥

इति महामहोपाध्यायेन शठकोपरामानुजदासेन विरचितायां
शतदूषणीव्याख्यायां तात्पर्यप्रकाशिकायां
परमते सूत्रस्वारस्यंभङ्गवादः षट्षष्टितमः ॥

कवितार्किकसिंहाय कल्याणगुणशालिने ।
श्रीमते वेंकटेशाय वेदान्तगुरवे नमः ॥

॥ शुभमस्तु ॥

॥ श्रीः ॥

॥ श्रीशतदूषणीवादार्थसंग्रहः ॥

(१) ब्रह्मशब्दवृत्त्यनुपपत्तिवाद:

''अथातो ब्रह्मजिज्ञासा'' इति प्रथमसूत्रघटकीभूतस्य ब्रह्मशब्दस्य निर्विशेषे वस्तुनि परैरुक्ता लक्षणाख्या वृत्ति: अस्मिन् वादे निरस्यते। तथा हि निर्विशेषं ब्रह्मेति मते ब्रह्मशब्दस्य क्वचिदर्थे शक्तत्दमस्ति न वा। न चेत् ब्रह्मशब्दस्य असाधुत्वापत्ति:। साधुत्वं हि शक्तिमूलकप्रयोगविषयत्वं वा शक्तिमत्त्वं वा वृत्तिमत्त्वं वा। ब्रह्मशब्दस्य कुत्रचिदर्थे शक्त्यभावे तन्मूलकप्रयोगाभावात् शक्तिमूलकप्रयोगविषयत्वरूपं साधुत्वं न स्यात्। शक्त्यभावादेव शक्तिमत्त्वरूपं शक्तिमूलकलक्षणादिवृत्तिमत्त्वं च नास्तीति तद्रूपं साधुत्वं न स्यात्। मुख्यार्थसंबन्धरूपत्वात् लक्षणाया:। ब्रह्मशब्दस्य क्वचित् अर्थे शक्तत्वमस्ति चेत् - तत् किं ब्रह्मणोऽन्यस्मिन्, विचारविषये ब्रह्मणि वा। नाद्य:। किं विचारविषयात् अन्यस्मिन्नर्थे प्रवृत्तिनिमित्तं कंचित् धर्मं पुरस्कृत्य ब्रह्मशब्दो मुख्यवृत्त: उत निमित्तं विना। तत्र प्रवृत्तिनिमित्तभूतं धर्मं विना मुख्यवृत्तत्वं न संभवति। असाधुत्वप्रसङ्गात्। किंचिद्धर्मावच्छिन्नार्थवाचकत्वस्यैव साधुत्वरूपत्वात्। प्रवृत्तिनिमित्तं पुरस्कृत्य वर्तते चेत्, अन्यत्र प्रकृत्यादौ यो ब्रह्मशब्दप्रयोग: स ब्रह्मगुणलेशयोगादौपचारिक इति भाष्ये उक्तत्वात् तत्र तस्य मुख्यवृत्तत्वमेव न संभवति।

न द्वितीय:। शुद्धोपहितविकल्पासहत्वात्। तथा हि ब्रह्मशब्द: किं शुद्धे निर्विशेषे मुख्यवृत्त: उत उपहिते। नाद्य:, श्रुतिस्मृतिभ्यां बृहत्त्वबृंहणत्वरूपप्रवृत्तिनिमित्तविशिष्टे एव ब्रह्मशब्दस्य वृत्त्यवगमात् निर्विशेषे तदसंभवात्। न द्वितीय:। उपहितपदेन श्रुतिसिद्धसत्यभूतसर्वज्ञत्वादिविशिष्टमिति विवक्षायां स्वमतविरोध: सर्वज्ञत्वादीनां

सत्यत्वानङ्गीकारात् । स्वाभिमताज्ञानतत्कार्यविशिष्टमिति विवक्षायां ब्रह्मणः अज्ञानतत्कार्यविशिष्टत्वे प्रत्यक्षानुमानश्रुतिसूत्ररूपप्रमाणाभावः । नापि ब्रह्मशब्दस्य निर्विशेषे लक्षणा । मुख्यार्थस्य कस्यचिदभावात् तत्संबन्धरूपलक्षणाया असंभवात् । निर्विशेषे मुख्यार्थसंबन्धाभावाच्च ।

अतः ''बृहति बृंहयति तस्मादुच्यते परं ब्रह्म'' इति श्रुत्युक्तप्रकारविशिष्ट एव ब्रह्मशब्दार्थः। निर्वक्ति च यास्कः ''ब्रह्म परिबृढं सर्वतः'' इति ।सर्वस्मात् परिबृढम् अनवधिकातिशयबृहत् । ननु यास्कनिरुक्तौ बृहत्त्वमेव ब्रह्मशब्दप्रवृत्तिनिमित्तमिति गम्यते । ''बृहति बृंहयति'' इति श्रौतनिरुक्तौ तु बृहत्त्वमिव बृंहणत्वमपि तथेत्यवगम्यते । अत उभयोर्विरोध इति चेन्न । बृंहणत्वस्यापि गुणतो बृहत्त्वेऽन्तर्भावेन विरोधाभावात् । यद्वा यास्कनिरुक्तौ सर्वत इत्यस्य सर्वप्रकारेणेत्यर्थः । स्वरूपतो गुणतो विभूतितश्चेति यावत् । अतो न विरोधः इति ।

(२) जिज्ञासानुपपत्तिवादः

पूर्वं प्रथमसूत्रघटकब्रह्मशब्दस्य निर्विशेषे मूख्यामुख्यवृत्तिद्वयमपि न संभवतीति निरूपितम् । अथ तत्रैव प्रस्तुतायाः जिज्ञासायाः परमतेऽनुपपत्तिः अस्मिन् वादे प्रतिपाद्यते । सामान्यतो ज्ञाते विशेषतो ज्ञातव्ये, अथवा केनचिदाकारेण ज्ञाते केनचिदाकारेण ज्ञातव्ये वस्तुन्येव जिज्ञासा संभवति। सामान्यविशेषरूपाभ्यां ज्ञानयोरभावे हेतुफलयोरभावेन जिज्ञासाया अयोगात् । सामान्यरूपेण ज्ञानं जिज्ञासायाः हेतुः विशेषरूपेण ज्ञानं फलम् । न हि तादृशज्ञानद्वयविषयत्वं ब्रह्मणः परैरिष्यते । तथा सति दृश्यत्वात् ब्रह्मणो मिथ्यात्वापत्तेः। जिज्ञासानुपपत्तेरेव विचारस्याप्यनुपपत्तिः । तथा हि -जिज्ञासापूर्वकं विचारोऽत्र शास्त्रे आरभ्यते। विचारश्च प्रमाणप्रदर्शनपूर्वकः । प्रमाणं च न निर्विषयं निरूपयितुं शक्यम् । तथा च ब्रह्मविषयकप्रमाणप्रदर्शनपूर्वकं ब्रह्मविचारः प्रस्तोतव्यः । एवं च ब्रह्मणः प्रमाणविषयत्वमावश्यकमिति दृश्यत्वं मिथ्यात्वं जडत्वमित्यादिकं प्रसज्येत ।

ननु ब्रह्मस्वरूपात्मकं ज्ञानमेव जिज्ञासायाः हेतुः फलं च, न तु सामान्यविशेषज्ञाने, गौरवादिति चेत् - न । यज्ञदत्तगतात् सामान्याकारज्ञानात् देवदत्तस्य जिज्ञासायाः, देवदत्तगतजिज्ञासातः यज्ञदत्तस्य विशेषाकारज्ञानरूपफलस्य च वारणाय सामान्यज्ञानजिज्ञासाविशेषज्ञानानामेकाधिकरणवृत्तित्वेन कार्यकारणभाव आवश्यक इति लोके दृश्यते । ब्रह्मस्वरूपभूतज्ञानं यदि हेतुफलरूपं तदा तस्य जिज्ञासाधिकरणवृत्तित्वाभावात् लोकदृष्टनियमविरोधः । किं च अनादेः स्वरूपप्रकाशस्य निरपेक्षहेतुत्वे जिज्ञासाया अनादित्वापत्तिः, तद्धेतोरनादित्वात् ।

ननु ब्रह्मणोऽविद्योपहितरूपेण हेतुफलरूपज्ञानद्वयविषयत्वात् जिज्ञासा संभवतीति चेत् - एवमपि निर्विशेषस्य जिज्ञास्यत्वं न सिद्धम्, उपहितस्य सविशेषत्वात् । अपि च जिज्ञासाहेतुभूतज्ञानस्योपहितविषयकत्वेऽपि फलभूतज्ञानस्योपहितविषयकत्वे भ्रमत्वप्रसङ्गः। उपहितस्य आरोपितत्वेन तद्विषयकज्ञानस्य भ्रमत्वात् । न चेष्टापत्तिः । भ्रान्तेः असंपाद्यत्वात् तदर्थं प्रेक्षावतां विचारे प्रवृत्त्ययोगात् । अतः निर्विशेषस्य जिज्ञास्यत्वं न संभवतीति ।

(३) ऐकशास्त्र्यसमर्थनवादः

अस्मिन् वादे पूर्वोत्तरमीमांसयोरेकशास्त्रत्वं समर्थ्यते । प्रतिपिपादयिषितस्य ऐकशास्त्र्यस्य उपयोगितया विचारस्य कृत्स्नस्वाध्यायार्थविषयकत्वमादौ विस्तरेण निरूप्यते। विचारस्य कृत्स्नस्वाध्यायार्थविषयकत्वे हि विचारपरयोः शास्त्रयोरपि वेदार्थरूपैकार्थप्रतिपादकतया एकशास्त्रत्वं सिध्यति ।

ततः कर्ममीमांसायाः वेदान्तविचारानुपयुक्तत्वात् तया सह ब्रह्ममीमांसाया एकशास्त्रत्वं न संभवतीत्याशङ्क्य अनेकप्रकारैः ब्रह्ममीमांसायां कर्ममीमांसायाः उपयोगः प्रदर्शितः । आदौ कर्ममीमांसास्थन्यायानामुपजीवनं प्रदर्शितम् । तथा हि - कर्ममीमांसाप्रथमाध्यायेन वेदाप्रामाण्यनिराकरणपूर्वकं तत्प्रामाण्यसमर्थनेन प्रथमाध्यायः पूर्वोत्तरभागविचारात्मके कृत्स्नशास्त्रे उपयुक्तः । कर्मभेदप्रतिपादको द्वितीयाध्यायः शारीरकस्थगुणोपसंहारपादस्य विद्याभेदनिर्णायकस्य उपजीव्यो भवति । तृतीयाध्यायप्रतिपादिताः श्रुतिलिङ्गादयः सर्वत्र शारीरके

उपजीव्याः। यथा ''श्रुत्यादिबलीयस्त्वाच्च न बाधः'' ''लिङ्गभूयस्त्वात्तद्धि बलीयस्तदपि'' इत्यादि। चतुर्थाध्यायप्रतिपाद्यः प्रयोज्यप्रयोजकभावः वर्णाश्रमादिधर्माणां विद्याप्रयुक्तत्व-आश्रमप्रयुक्तत्वादिविचारे उपयुज्यते। पञ्चमाध्यायनिरूपितः क्रमः शारीकचतुर्थाध्यायगतार्चिरादिमार्गविचारे उपयुज्यते। कर्मणः कर्ता क इति विचारपरः षष्ठोऽध्यायः फलभोक्तृत्वसमानाधिकरणकर्तृत्वरूपाधिकारनिरूपणपर्यवसितः ब्रह्मविद्ययामधिकारी क इति विचारपरे नैष्ठिकाद्यधिकरणे उपकरोति। अतिदेशनिरूपणपरौ सप्तमाष्टमाध्यायौ ''तस्यैतस्य तदेव रूपं यदमुष्य रूपम्'' इत्यादिवाक्यार्थचिन्तापरेषु अन्तरधिकरणादिषूपयुज्यते। ऊहनिरूपणपरो नवमाध्यायोऽपि सर्वापेक्षाधिकरणादिषूपयुज्यते। तथा हि ''सर्वापेक्षा च यज्ञादिश्रुतेरश्ववत्'' इत्यत्र यज्ञादीनां विद्याङ्गत्वमुक्तम्। यज्ञानां चाग्नेयसौर्यादीनां साङ्गानामेव विद्याङ्गत्वम्। अतो यज्ञाङ्गभूतस्य ''अगन्म सुवः सुवरगन्म'' इत्यादिमन्त्रस्य स्वर्गरूपफलप्रकाशकस्य विद्यार्थयज्ञाङ्गत्वं ''अगन्म विद्यां विद्यामगन्म'' इत्यूहसापेक्षम्। बाधप्रतिपादकः दशमाध्यायः हान्यधिकरणादौ, तन्त्रप्रतिपादकः एकादशाध्यायः ''विहितत्वाच्चाश्रमकर्मापि'' इत्यत्रोपयुज्यते। अनेकोद्देशेन सकृत् करणं तन्त्रम्। द्वादशाध्यायनिरूपितः अन्यार्थानुष्ठितेन अन्यस्योपकारः इत्येवंरूपः प्रसङ्गः विद्यार्थकर्मणैव प्रसङ्गान्नित्यसिद्धिरित्यत्रोपयुज्यते।

एवं पूर्वमीमांसायां कृतं विद्याङ्गभूतयज्ञादिस्वरूपशिक्षणं च ब्रह्ममीमांसोपजीव्यम्। यज्ञादिपदार्थज्ञानाभावे ''तमेतं वेदानुवचनेन ब्राह्मणा विविदिषन्ति यज्ञेन दानेन तपसानाशकेन'' इति वाक्यार्थज्ञानासंभवात्।

अपि च ''तस्यैवं विदुषो यज्ञस्यात्मा'' इत्यादिना पुरुषविद्यायां यज्ञादिकल्पनं क्रियते। तदपि यज्ञादिस्वरूपनिरूपणसापेक्षम्। न ह्यविदितरजतः पुरुषः शुक्तौ रजतं कल्पयेत्। तदुपरि कर्मब्रह्मरूपार्थभेदात् भोगमोक्षरूपप्रयोजनभेदात् तादृशप्रयोजनार्थिरूपाधिकारिभेदाच्च कर्मब्रह्ममीमांसे भिन्ने एव स्यातामित्याशङ्क्य वेदार्थत्वेन सामान्यरूपेण कर्मब्रह्मणोः प्रतिपाद्यत्वात्; वेदार्थनिर्णयत्वेन रूपेण कर्मब्रह्मनिर्णययोः प्रयोजनत्वात् वेदार्थनिर्णयार्थित्वेन कर्मब्रह्मनिर्णयार्थिनोरधिकारित्वात् शास्त्रैक्यं युज्यत इति समाहितम्। एतदुक्तं भवति-शास्त्रैक्य-

प्रयोजकमेकार्थत्वम् एकधर्मावच्छिन्नप्रतिपाद्यकत्वम्, एकप्रयोजनत्वम् एकाधिकारिकत्वम् एकधर्मावच्छिन्नाधिकारिकत्वम्। एतत्त्रितयं च पूर्वोत्तर मीमांसयोरस्त्येवेति ऐकशास्त्र्यं युज्यत इति ।अवान्तरार्थभेदस्तु न शास्त्रैक्यविरोधी।

तदुपरि भिन्नकर्तृकयोः पूर्वोत्तरमीमांसयोः कथमेकशास्त्रत्वमित्याशङ्क्य एकेन विदुषा अनेकग्रन्थकरणदर्शनात् अनेकैर्विद्वद्भिःएकग्रन्थकरणदर्शनाच्च कर्तृभेदाभेदौ न ग्रन्थभेदैक्यप्रयोजकाविति समाहितम्।

ततः द्वैताद्वैतरूपार्थविरोधात् निरीश्वरत्वसेश्वरत्वाभ्यां विरोधात् शारीरके तत्र तत्र जैमिनिमतं पूर्वपक्षीकृत्य तन्निरसनाच्च पूवोत्तरमीमांसयोर्भेदमाशङ्क्य द्वैताद्वैतयोरेकनिष्ठत्वाभावात् जैमिनिसूत्रेषु क्वापि ईश्वरनिराकरणादर्शनात् अत्यल्पतराप्रधानार्थविवादस्य प्रधानार्थभेदकत्वाभावात् विषमांशापनयनमात्रेण शास्त्रभेदाभावाच्च न दोष इति समाहितम्। एवं महाप्रयासेन ऐकशास्त्र्यसमर्थनस्य मूलं तु चतुर्दशविद्यास्थानमध्ये कर्मब्रह्ममीमांसयोः मीमांसा इति एकतया परिगणनमेवेति।

(४) अविधेयज्ञानभङ्गवादः

पूर्वोत्तरमीमांसयोः ऐकशास्त्र्यसिद्धये कर्मणां ज्ञानार्थत्वं यदुक्तं ; तदयुक्तम्। वाक्यजन्यज्ञानस्यैव मोक्षहेतुत्वात् तत्र कर्मणामनपेक्षितत्वात् इत्युत्थानात् संगतिः। समूलस्य संसारस्य संविन्मात्रस्वरूपे ब्रह्मणि कल्पितत्वात् यथा शुक्तौ कल्पितस्य रजतस्य अधिष्ठानभूतशूक्तितत्त्वज्ञानादेव निवृत्तिः तथा अधिष्ठानब्रह्मतत्त्वज्ञानादेव तत्र कल्पितस्य संसारस्य निवृत्तिः न तु विहितेन -विधिवाक्येन कर्तव्यतया उच्यमानेन कर्मणा वा उपासनेन वा अदृष्टद्वारा निवृत्तिः। प्रमाणपरतन्त्रत्वात् ज्ञानं न विधेयम्। अप्राप्ते शास्त्रमर्थवत् इति न्यायेन विध्यभावे तदप्राप्तौ हि विधिः। ज्ञानं तु तत्त्वमस्यादिवाक्यप्राप्तत्वान्न विधेयम्। तथा च विध्यविषयभूतं ज्ञानमेव मोक्षसाधनमिति पूर्वपक्षः।

सिद्धान्तस्तु-यदि विश्वस्य मिथ्यात्वं सिद्धं स्यात् तदा ज्ञानमात्रात् प्रपञ्चस्य निवृत्तिर्भवितुमर्हति। मिथ्याभूतस्य पदार्थस्य ज्ञानमात्रनिवर्त्यत्वात्। विश्वस्य मिथ्यात्वं तु न सिध्यतीति वादान्तरे (१५) वक्ष्यते।

यत्तु ज्ञानं स्वरूपेण विधातुं न शक्यं, प्रमाणपरतन्त्रत्वात् इत्युक्तम्, तत्र विकल्पयामः । (१) किं ज्ञानस्य अभाव्यतया=अकार्यतया विधानानर्हत्वम्, (२) उत धात्वर्थभिन्नतया, (३) अथ साक्षात्प्रयत्नविषयत्वाभावात्, (४) उत साक्षात् पुरुषव्यापारत्वाभावात् , (५) अथ वा सांशभावानानुप्रवेशविरहात्, (६) अन्यस्माद्वा कुतश्चित् । प्रथमकल्पे साक्षात्परंपरौदासीन्येन प्रयत्नसाध्यात्वाभावो विवक्षितः । तृतीयकल्पे साक्षात् प्रयत्नविषयत्वाभाव इति भेदः ।

तत्र न प्रथमः । अविद्यानिवर्तकत्वेनाभिमतस्य ज्ञानस्य भवत्पक्षे अन्तःकरणवृत्तिरूपस्य, तार्किकमते आत्मविशेषगुणरूपस्य अस्मन्मते ज्ञानावस्थाविशेषरूपोपासनात्मकस्य इन्द्रियादिकरणजन्यतया प्रयत्नसाध्यत्वस्य आवश्यकतया अकार्यत्वासिद्धेः । पुरुषव्यापाराधीनव्यापारवतः करणत्वात् करणाधीनत्वस्वीकारे पुरुषप्रयत्नाधीनत्वमवश्यं स्वीकरणीयमिति तात्पर्यम् ।

न द्वितीयः ''ज्ञा अवबोधने'' इति धात्वर्थतयैव ज्ञानस्य पाणिनिना निर्दिष्टत्वात् । न तृतीयः । प्रयत्नविषयत्वाभाववतः प्रत्यत्नस्य विधेयत्वदर्शनात् । लोके हि तृप्तयर्थं भोजने प्रयतेत इति प्रयत्नविषयकविधिः दृश्यते ।

न चतुर्थः । ज्ञानात् अन्येषामपि धात्वर्थानां प्रक्षेप-वचनत्यागादिरूपाणामविधेयत्वप्रसङ्गात्। तथा हि पुरुषशब्देन आत्मविवक्षायां शरीरव्यापाराणां प्रक्षेपादीनां विधेयत्वं न स्यात् । शरीरविवक्षायां त्यागस्य विधेयता न स्यात्। त्यागस्येच्छाविशेषरूपस्य शरीरव्यापारत्वाभावात् । न चेष्टापत्तिः । प्रक्षिपेत् वदेत् यजेत इति प्रक्षेपादीनां विधानदर्शनात् ।

नापि पञ्चमः । यष्टव्य इत्यादौ धात्वर्थस्य यागस्य स्वस्वत्वनिवृत्तिपूर्वकपरस्वत्वोत्पत्तिविषयकज्ञानेच्छान्यतररूपस्य यथा अंशत्रयवत्यां भावनायां केनेति करणांशेऽनुप्रवेशः यागेन भावयेत् इति, तथा द्रष्टव्य इत्यादौ धात्वर्थरूपदर्शनस्य भावनायां करणांशतया अनुप्रवेशः संभवति दर्शनेन भावयेदिति ।

नापि षष्ठः ज्ञानविधेयत्वविरोधिनः कस्यचित् पूर्वोक्तातिरिक्तस्य हेतोः कुतश्चित् प्रमाणात् असिद्धेः ।

किं च यदि ज्ञानं न विधेयं, तर्हि यागादिविधिरपि भज्येत । यागो हि देवतोद्देशेन द्रव्यत्याग: इन्द्रायेदं न ममेत्याद्याकारकबुद्धिविशेष: । श्रवणमननिदिध्यासनानामपि ज्ञानरूपत्वात् भवन्मतसिद्धं विधेयत्वं न स्यात् । तस्मात् अविधेयतया अभिमतात् तत्त्वमस्यादिवाक्यजन्यज्ञानात् न मोक्ष:, तस्यापि विधेयत्वसमर्थनात्। ज्ञानानन्तरमपि भेदप्रतिभासादिरूपसंसारस्यानुवृत्तेश्च । अपि तु तदतिरिक्तात् दर्शनसमानाकारसंततस्मृतिरूपोपासनात्मकात् विधेयात् ज्ञानादेव मोक्ष इति सविस्तरमत्र वादे निरूप्यते ।

(५) बाधितानुवृत्तिभङ्गवाद:

अविधेयात् तत्त्वमस्यादिवाक्यजन्यात् ज्ञानात् अविद्यानिवृत्तिर्न भवति ; तथा सति तत्त्वज्ञानानन्तरमविद्याकार्यस्य भेदप्रतिभासादे: अनुवृत्त्यसंभवात् इति पूर्ववादे निरूपितम् । अथ बाधितानुवृत्त्या तत्संभवमाशङ्क्य निराकरोत्यस्मिन् वादे ।

यदुच्यतेऽद्वैतिभि: तत्त्वमस्यादिवाक्यात् तत्त्वज्ञाने जातेऽपि ब्रह्मविदां तत्त्वज्ञानेन बाधितस्य = निवृत्तस्यापि भेदप्रतिभासस्य बाधितानुवृत्तिरूपैवानुवृत्ति:, न तु तत्त्वज्ञानात् प्राक्कालिकीवानुवृत्ति: । न च भेदप्रतिभासानुवृत्तौ तत्कार्यबन्धोऽपि स्यादिति वाच्यम् । भेदप्रतिभासानुवृत्तावपि तन्मूलभूताया: अविद्याया: निवृत्तत्वात् भेदप्रतिभासस्य दग्धपटवत् कार्यकरत्वाभावेन बन्धकत्वाभावादिति–

तत्र पृच्छाम: बाधितत्वे कथमनुवृत्ति:, अनुवृत्तौ वा कथं बाधितत्वं बाधितत्वानुवृत्त्योर्विरोधादिति । ननु प्रमाणबलात् एकश्चन्द्र: न द्वौ इति चन्द्रभेदमिथ्यात्वज्ञाने सत्यपि तिमिरादिदोषवशात् चन्द्रभेदप्रतिभासानुवृत्ति: दृश्यते ।ततश्च भेदमिथ्यात्वबुध्दिरूपबाधस्य भेदप्रतिभासानुवृत्तेश्च नास्ति विरोध इति चेत् –

मैवम् । वैषम्यात् । द्विचन्द्रप्रतिभासहेतो: अङ्गुल्यवष्टम्भतिमिरादिदोषस्य चन्द्रैकत्वज्ञाने वा चन्द्रद्वित्वमिथ्यात्वज्ञाने वा अविषयत्वात् न बाध: न निवृत्ति: इति तादृशदोषमूलकचन्द्रद्वित्वभ्रमपरंपरानुवृत्तिर्घटते । प्रकृते तु ब्रह्मज्ञानेन प्रपञ्चभ्रमहेतुभूताविद्याया अपि

बाधितत्वेन निवृत्ततया अहेतुकः भेदप्रतिभासः कथमनुवर्तेत । अतो बाधितानुवृत्तिर्न संभवतीति ।

(६) विविदिषासाधनत्वभङ्गवादः

पूर्वमैकशास्त्र्यसमर्थनवादे कर्मणां वेदनाङ्गत्वात् साङ्गवेदनविचारात्मकं मीमांसाशास्त्रमेकमित्युक्तम् । तदयुक्तम् । कर्मणां विविदिषार्थत्वेन वेदनानङ्गत्वात् इत्याक्षेप-परिहारार्थोऽयं वादः ।

यदुच्यते - ''तमेतं वेदानुवचनेन ब्राह्मणा विविदिषन्ति यज्ञेन दानेन तपसानाशकेन'' इति श्रुतौ सन्नन्तविदधात्वर्थज्ञानविषयकेच्छां प्रति तृतीयाविभक्तया साधनत्वेन यज्ञादिकं विधीयते; न तु सन्प्रकृतिधात्वर्थज्ञानं प्रति साधनत्वेन । वस्तुविरोधात्, श्रुत्यक्षरसन्प्रत्ययस्य पर्यालोचनाच्च । सन्प्रत्ययपर्यालोचने तदर्थेच्छायामेव तृतीयार्थस्य साधनत्वस्यान्वयो युक्तः। प्रकृत्यर्थपिक्षया प्रत्यार्थस्य प्राधान्यात्, ''प्रकृतिप्रत्ययौ प्रत्ययार्थं सह ब्रूतः तयोस्तु प्रत्ययः प्राधान्येन'' इति व्युत्पत्तेः । किं च धात्वर्थेऽन्वये विदन्तीत्येव श्रूयेत, न तु विविदिषन्तीति-इति ।

तत्र ब्रूमः कोऽसौ वस्तुनोः यज्ञादि ब्रह्मज्ञानयोः विरोधः । (१) किं ज्ञानस्य यज्ञादिभिः साधयितुमशक्यत्वम् (२) उत तेषां ज्ञानाङ्गभूतशमादिविरोधिस्वभावत्वम् (३) अथ वा तत्त्वज्ञानफलभूतमोक्षविरोधित्रिवर्गसाधनत्वम् (४) यद्वा आश्रमाङ्गतया विहितानां यज्ञादीनां विद्याङ्गत्वे नित्यानित्यसंयोगविरोधः

न प्रथमः । विकल्पासहत्वात् । तथा हि ब्रह्मज्ञानस्य यज्ञादिभिः साधयितुमशक्यत्वं किं यज्ञादिकं विनापि ज्ञानोत्पत्तिरूपव्यतिरेकव्यभिचारदर्शनात् किं वा यज्ञादिसत्त्वेऽपि ज्ञानानुत्पत्तिरूपान्वयव्यभिचारदर्शनात् । आद्ये व्यतिरेकव्यभिचारस्यासिद्धिः । प्राचीनानामिदानींतनानां वा यज्ञादिधर्मानुष्ठानरहितानां विद्योत्पत्तेरदर्शनात् । द्वितीये यज्ञादिसत्त्वेऽपि ज्ञानानुत्पत्तिदर्शनं ज्ञानस्य यज्ञाद्यसाध्यत्वेऽप्रयोजकम् । सर्वत्र कारणकलापरूपा सामग्री कार्योत्पत्तिप्रयोजिका, न तु तद्घटकं यत्किंचित् कारणमात्रम् । कर्तृकर्मसाधनवैगुण्याभावविशिष्टं यज्ञादिकमेव ज्ञानहेतुः । यत्र यज्ञादिसत्त्वेऽपि ज्ञानं नोत्पद्यते,

तत्र कर्तृवैगुण्यं वा कर्मवैगुण्यं वा साधनवैगुण्यं वा स्यात्। तथा च कर्तृकर्मसाधनवैगुण्यविरहरूपकारणांन्तरविरहात् सामग्री नास्तीति न ज्ञानोत्पत्तिः। स्वेतरयावत्कारणसत्त्वे स्वसत्त्वे यत्र कार्यं नोत्पद्यते तत्रैवान्वयव्यभिचार इति।

नापि द्वितीयः। शमादेः अविहिताप्रतिषिद्धनिषिद्धविषयत्वेन यज्ञादेश्च विहितविषये इन्द्रियव्यापाररूपत्वेन विरोधाभावात्।

नापि तृतीयः। स्वर्गादिफलसाधनतया विहितस्य यज्ञादेरेव स्वर्गादिफलेच्छां विना क्रियमाणस्य ब्रह्मज्ञानसाधनत्वेन विधानात् त्रिवर्गेऽभिसन्ध्यभावादेव त्रिवर्गसाधनत्वाभावेन तत्साधनत्वरूपवस्तुविरोधासंभवात्।

नापि चतुर्थः। विनियोगपृथक्त्वेन नित्यानित्यसंयोगरूपविरोधाभावात्।

या च श्रुत्यक्षरपर्यालोना तत्र ब्रूमः। "सोऽन्वेष्टव्यःस विजिज्ञासितव्यः" इत्यादौ सन्प्रकृत्यर्थे ज्ञाने विधिविषयत्वरूपेतरपदार्थान्वयेऽपि सना इच्छायाः अनुवाददर्शनात् तद्रीत्या प्रकृत्यर्थे वेदने यज्ञादिसाधनत्वान्वयो भवितुमर्हति। लोके च असिना जिघांसति, अश्वेन जिगमिषति इत्यादिषु प्रकृत्यर्थे करणान्वयो बहुलमुपलभ्यते।

अत्रेदमवधेयम् – अद्वैतिनां मते यज्ञादेः विविदिषासाधनत्वम्। विशिष्टाद्वैतिनां मते यज्ञादेः वेदनसाधनत्वम्। वेदनं च प्रीतिरूपापन्नप्रत्यक्षसमानाकारस्मृतिसंततिरूपम्। अद्वैतिनां मते साक्षात्काररूपम्। विविदिषोत्पत्तेः प्राक्क्षणपर्यन्तं कर्मानुष्ठानम्; विविदिषोत्पत्त्यनन्तरं तु न तदनुष्ठानम् ।शमादिवशादेव वेदनमुत्पद्यते। विशिष्टाद्वैतिमते अहरहरभ्यासाधेयातिशयोपासनात्मकवेदनस्याहरहरनुवर्तनीयतया तदङ्गतया अहरहः यज्ञानुष्ठानमिति विशेषः।

(७) शब्दजन्यप्रत्यक्षभङ्गवादः

पूर्वपक्षः

अत्राहुः अद्वैत्येकदेशिनः – गुरोः सकाशात् तत्त्वमसीत्यादिवाक्यश्रवणसमये जायमानं परोक्षं ब्रह्मात्मैक्यज्ञानं यद्यप्यविद्यां न निवर्तयति, तादृग्ज्ञाने सत्यपि अविद्यानिवृत्तेरदर्शनात्।

तथापि मननिदिध्यासनाभ्यामनुगृहीतं तदेव वाक्यम् - अविद्यानिवर्तकमपरोक्षं ज्ञानं जनयति । न च पूर्वमेव तद्वाक्यं कुतोऽपरोक्षज्ञानं नाजनयदिति वाच्यम् । असंभावनाविपरीतभावनयोः प्रतिबन्धकयोः भेदवासनामूलकयोः स्थितत्वात् । ऐक्यविषयकमनननिदिध्यासनाभ्यां तु भेदवासनायां निरस्तायां तन्मूलकयोः असंभावनाविपरीतभावनयोः निवृत्तौ तस्मात् वाक्यात् अपरोक्षज्ञानं जायते । न च परोक्षज्ञानजननस्वभावः शब्दः कथमपरोक्षज्ञानं जनयेदिति वाच्यम् । इन्द्रियस्यापि कथमपरोक्षज्ञानजनकत्वमिति प्रश्ने लोके तथा दर्शनादिति समाधाने वाक्यस्याप्यपरोक्षज्ञानजनकत्वस्य दर्शनात् कथमिति प्रश्नानवकाशात् । यथा संवित् स्वप्रकाशा, दशमस्त्तवमसि इति वाक्याभ्यां संविद्विषयकं ज्ञानं दशमत्वविशिष्टविषयकं ज्ञानं च क्रमशो जायते । तत् ज्ञानं परोक्षमिति वक्तुं न शक्यते, स्वानुभवविरोधात् । प्रत्यक्षे विषये परोक्षं ज्ञानमित्यस्य विरुद्धत्वात् । अन्यथा यदि प्रत्यक्षभूतविषयविषयकं ज्ञानं परोक्षं स्यात् तदा शुक्तितत्वबविषयकोऽपि प्रकाशः परोक्षः स्यात् । न चेष्टापत्तिः । तथा सति शुक्तितत्त्वप्रकाशे सत्यपि रजतभ्रमः स्यात् । अपरोक्षस्याधिष्ठानतत्त्वप्रकाशस्यैव भ्रमविरोधित्वात् ।

न च दशमस्त्वमसीत्यादिवाक्यजन्यं ज्ञानमिन्द्रियकरणकमिति वाच्यम् । वाक्यस्य तदानीमबोधकत्वप्रसङ्गात् । वाक्यमन्तरेणापि तत्प्रसङ्गाच्च । नापि शब्दसहकृतेन्द्रियजन्यम्। अन्यतरेण तदुत्पत्त्युपपत्तौ कल्पनागौरवप्रसङ्गात् । अन्वयव्यतिरेकाविशेषे सति इन्द्रियसहकृतशब्दजन्यमिति विपरिवर्तप्रसङ्गाच्च । अतो वाक्यजातीयस्य क्वचित् दशमस्त्वमसीत्यादौ प्रत्यक्षजनकत्वसिद्धौ तत्त्वमसीत्यादावपि मनस्सहकृतशब्दजन्यमपरोक्षज्ञानमिति शाब्दापरोक्षवादसंग्रहः । विस्तरो ग्रन्थे ।

सिद्धान्तः

यत्तावत् दशमस्त्वमसीत्यादिवाक्यदृष्टान्तेन तत्त्वमसीत्यादिवाक्यस्यापरोक्षज्ञानजनकत्वमुक्तम् ।तदसत् । दृष्टान्ते तदसिद्धेः । तथा हि - यः स्वस्य दशमत्वं पश्यति तं प्रति दशमस्त्वमसीति वाक्यमुक्तं चेत्, तदा ज्ञातार्थानुवादरूपं तद्वाक्यम् । यथा घटं पश्यन्तं प्रति उक्तम् अयं घट इति वाक्यं तद्वत् । तथा च प्रत्यक्षसिद्धार्थबोधकत्वमात्रेण वाक्यं प्रत्यक्षजनकमिति भ्रमः । यदा तु येन स्वस्य दशमत्वं न ज्ञातं तं प्रति दशमस्त्वमसीत्युच्यते,

तदा वाक्यजन्यस्य दशमत्वविशिष्टस्वात्मविषयकस्य ज्ञानस्य दशमत्वांशे परोक्षत्वमविवादम् । विशेष्यभूतस्यात्मनः प्रत्यक्षत्वात् दशमत्वविशिष्टोऽपि प्रत्यक्ष इति भ्रमः । स्वात्मविषयकप्रत्यक्षाव्यवहितोत्तरभवत्वात् दशमत्वविशिष्टस्वात्मविषयकज्ञानस्य। विशेष्यस्य प्रत्यक्षत्वेन विशिष्टस्यापि प्रत्यक्षत्वाङ्गीकारे पर्वतो वह्निमानित्यनुमितेरपि प्रत्यक्षत्वप्रसङ्गात्। गुरुत्वादेरतीन्द्रियत्वभङ्गप्रसङ्गाच्च।

नतु ज्ञाननिवर्त्यस्य प्रपञ्चस्य मिथ्यात्वं निवर्तकस्य तत्त्वमस्यादिवाक्यजन्यज्ञानस्य साक्षात्कारत्वमन्तरेण नोपपद्यते, अपरोक्षभ्रमविषयस्य अपरोक्षतत्वज्ञानेनैव निवृत्तिसंभवात्। तस्य च ज्ञास्यापरोक्षत्वं कारणान्तराभावात् वाक्याधीनमिति चेत् –मैवम्। संसारसत्यत्वस्य साधयिष्यमाणत्वात् तन्मिथ्यात्वासिद्धेः ।तस्य सत्यत्वे मिथ्यात्वे वा ईश्वरसंकल्पनिवर्त्यत्वेन साक्षात्कारमन्तरेणापि प्रपञ्चनिवृत्त्युपपत्तेश्च ।अत्र पूर्वपक्षयुक्तयः सिद्धान्तयुक्तयश्चातिविस्तृताः ग्रन्थतोऽवसेयाः ।

भामत्यामपि शाब्दापरोक्षवादः खण्डितः। तथा हि – ''तस्मात् त्वंपदार्थस्य तत्पदार्थत्वेन साक्षात्कार एषितव्यः ।एतावता हि त्वं पदार्थस्य दुःखित्वशोकित्वादिसाक्षात्कार- निवृत्तिः, नान्यथा । न चैष साक्षात्कारो मीमांसासहितस्यापि शब्दस्य प्रमाणस्य फलम् । अपि तु प्रत्यक्षस्य। तस्यैव तत्फलत्वनियमात्। अन्यथा कुटजबीजादपि वटाङ्कुरोत्पत्तिप्रसङ्गात् । तस्मान्निर्विचिकित्सवाक्यार्थभावनापरिपाकसहित-मन्तःकरणं त्वंपदार्थस्यापरोक्षस्य तत्तदुपाध्याकारनिषेधेन तत्पदार्थतामनुभावयतीति युक्तम्। इति भामतीग्रन्थः। तत्र कल्पतरु :–

''शब्दस्तु नापरोक्षप्रमाहेतुः क्लृप्तः । प्रमेयापरोक्ष्ययोग्यत्वेन प्रमायाः साक्षात्कारत्वे देहात्मभेदविषयकानुमितेरपि तदापत्तिः। दशमस्त्वमसीत्यत्रापि तत्सचिवादक्षादेव साक्षात्कारः। अन्धादेस्तु परोक्षधीरेव।'' इति।

(८) साधनचतुष्टयपूर्ववृत्तत्वभङ्गवादः

शास्त्रैक्यनिरूपणप्रसक्तानुप्रसक्तकथां परिसमाप्य अथ शब्दस्य कर्मविचारानन्तर्यार्थकत्वे सत्येव शास्त्रैक्यं सिध्येदिति तदर्थकत्वमस्मिन् वादे निरूप्यते । तस्य

कर्मविचारानन्तर्यार्थकत्वं च साधनचतुष्टस्य पूर्ववृत्तत्वे निरस्ते एव प्रतिष्ठितं भवतीति तत्पूर्ववृत्तित्वमस्मिन् वादे निरस्यते। साधनचतुष्टयपूर्ववृत्तित्वनिरसनपूर्वकं कर्मविचारपूर्ववृत्तत्वं च अथशब्दस्य आनन्तर्यार्थकत्वे निर्णीते सत्येव निर्णेतुं शक्यम्। अतः अथशब्दस्यानन्तर्यार्थकत्वं पूर्वपक्षिमुखेनैव आदौ विस्तरेण न्यरूपि।

तत्र अथशब्दस्य आनन्तर्यरूपार्थसंभवः ब्रह्मजिज्ञासां प्रति असाधारणं नियतपूर्ववृत्तं, नियतपूर्ववृत्तत्वज्ञापने प्रयोजनं च यदि किमपि स्यात् तदैव स्यात्। तदुभयं किमिति पर्यालोचने सति नित्यानित्यवस्तुविवेकः, शमदमादिसाधनसंपत् इहामुत्रफलभोगविरागः मुमुक्षुत्वं चेत्येतत् साधनचतुष्टयमेव तदिति निर्णीयते तस्यैव नियमेन ब्रह्मविचारेऽपेक्षितत्वात् तस्य पूर्ववृत्तत्वकथने एतादृशसाधनचतुष्टयसंपन्न एव ब्रह्मविचारेऽधिकारी इति अधिकारिविशेषज्ञानरूपप्रयोजनलाभाच्चेति पूर्वपक्षः।

सिद्धान्तः

प्रथमतः नित्यानित्यवस्तुविवेकः कीदृश इति भवद्भिः कथ्यताम्। किमिदं वस्तु नित्यम् इदं वस्तु अनित्यमित्येवमाकारः सः, अथवा वाचस्पत्युक्तरीत्या नित्यानित्ययोर्वसतीति नित्यानित्यवस्तु, तच्च नित्यानित्ययोः धर्मः हेयत्वोपादेयत्वे इत्यर्थः। तथा चेदं हेयम् इदमुपादेयमित्याकारकः हेयत्वोपादेयत्वविवेक इति। तत्र न प्रथमः कल्पः। इदं वस्तु नित्यम् इदं वस्तु अनित्यमित्याकारकस्य विवेकस्य ब्रह्मविचारात् प्रागसिद्धेः तस्य ब्रह्मविचारपूर्ववृत्तत्वं न संभवति। ब्रह्ममीमांसायामेव हि ''नात्मा श्रुतेर्नित्यत्वाच्च ताभ्यः''इत्यादिना आत्मादेः नित्यत्वं, ''न वियदश्रुतेः'' इत्यादिना आकाशादेरनित्यत्वं च विविच्य प्रतिपाद्यते। तथा चान्योन्याश्रयः, ब्रह्मविचारे सिद्धे सति नित्यानित्यविवेकज्ञानम् ,नित्यानित्यविवेकज्ञाने सति ब्रह्मविचार इति। यदि वैशेषिकादिशास्त्रान्तरात् तद्विवेक इति मन्यसे तदा विपरीतविवेकापत्तिः। वियदादयो हि नित्या इति काणादाः। सौगताश्च आत्मा अनित्य इति वा असन्निति वा स्वीकुर्वन्तीति। न च वेदान्तदर्शनसंनिहितसांख्ययोगदर्शनाभ्यां नित्यानित्य-विवेकः सिध्यतीति वाच्यम्। तर्हि तत एवात्मानात्मविवेकसिद्धेः किं ब्रह्ममीमांसया। अनन्यलभ्यं हि शास्त्र फलम्।

नापि द्वितीयः ।यदि नित्यानित्यौ पदार्थौ प्रमाणेन निश्चित्य तद्गते हेयत्वोपादेयत्वे विविच्येते, तदा पूर्वोक्तान्योन्याश्रयगर्भचक्रकापत्तिः, वेदान्तश्रवणेन नित्यानित्यविवेकः, तेन तद्गतहेयत्वोपादेयत्वज्ञानं ,तेन वेदान्तश्रवणमिति ।

या च शमदमादिसाधनसंपत् पूर्ववृत्तत्वेनोक्ता सा किंरूपा। श्रवणौपायिकतात्कालिकावधानरूपा वा जितेन्द्रियत्वरूपा वा ।पूर्वस्यास्तावत् ब्रह्मविचारहेतुत्वमिच्छामः। परं तु तस्याः सर्वग्रन्थश्रवणसाधारणकारणत्वात् वेदान्तश्रवणं प्रति विशेषहेतुत्वाभावात् न पूर्ववृत्तत्वं संभवति। द्वितीयायाः जितेन्द्रियत्वरूपायास्तु न श्रवणात्मकविचारं प्रति साधनत्वम्। ''शान्तो दान्त उपरतस्तितिक्षुः समाहितो भूत्वा आत्मन्येवात्मानं पश्ये''दिति तस्याः आत्मसाक्षात्कारसाधनत्वस्यैव श्रवणात् विचारं प्रति हेतुत्वाभावात् । अपि च एतेषां शमादीनां ब्रह्मविद्याङ्गत्वेनोपादेयत्वं शारीरकतृतीयाध्याये शमदमाद्यधिकरणेऽवगन्तव्यम् । अत एते शमादयः कथं शारीरकश्रवणात् पूर्वमुपात्ताः स्युः । अपि च शमादीनां साधनत्वावगतेः कर्ममीमांसापेक्षतया कर्मविचारस्य पूर्ववृत्तत्वं दुस्त्यजम् । तदुक्तं भाष्ये – ''एषां साधनत्वं विनियोगावसेयम् =अङ्गत्वबोधकप्रमाणावसेयं ।विनियोगश्च श्रुतिलिङ्गादिभ्यः । स च तार्तीयः'' इति ।

ननु साधनचतुष्टयस्य पूर्ववृत्तत्वनिरसनमयुक्तं । युष्मद्भाष्ये एव ''अधीतसाङ्गसशिरस्कवेदस्याधिगताल्पास्थिरकेवलकर्मज्ञानतया संजातमोक्षाभिलाषस्यानन्तस्थिरफलब्रह्मजिज्ञासा ह्यनन्तरभाविनी'' इत्यादिना नित्यानित्यविवेक-पूर्वकेहामुत्रफलभोगविरागस्य मोक्षेच्छायाश्च पूर्ववृत्तत्वकथनादिति चेत् - श्रूयताम् । भाष्ये पुरुषप्रवृत्तेः आदौ कर्मविचारे अनन्तरं ब्रह्मविचारे इति क्रमविशेषसूचनात् कर्मविचारस्य पूर्ववृत्तत्वमुक्तं भवति । तेन कर्मविचाराधीनवैराग्यमुमुक्षुत्वयोरप्यर्थलब्धत्वात् अनन्तरस्थिरफलतया प्रथममापातप्रतीतस्य कर्मजिज्ञासाख्यप्रतिबन्धकस्य निवृत्तेः सूचनेन निष्प्रतिबन्धब्रह्मविचारारम्भस्य द्योतनात् ''यज्ञेन दानेन'' इत्यादिवाक्यार्थपेक्षितस्य यज्ञादिपदार्थनिश्चयस्य व्यञ्जनात् कर्मविचारनिष्पत्त्युक्त्या यथावस्थितब्रह्मत-दुपासनादितत्त्वावगमहेतुभूतन्यायसमूहपरिशीलनस्वभावाविष्करणात् अनभिसंहितफलय- ज्ञादीनामपवर्गोपायभूतोपासनोपयोगितया तत्स्वरूपनिश्चयोऽपेक्षितः,

तदंशे कर्ममीमांसायाः हेतुत्वमित्यवगमाच्च कर्मविचारस्यैव पूर्ववृत्तत्वोक्तिः सफलतामेतीति तामेवाद्रियामहे । न च ब्रह्मविचाराव्यवहितस्यैव पूर्ववृत्तत्वं वक्तव्यमिति वाच्यम् । तर्हि मुमुक्षुत्वमेकमेव पूर्ववृत्ततया वक्तव्यम् । तस्यैव ब्रह्मविचाराव्यवहितत्वात् । मुमुक्षुत्वोपयोगितया नित्यानित्यविवेकादीनां कथनमिति चेत्-तुल्यं मुमुक्षुत्वोपयोगितया कर्मविचारस्यापि पूर्ववृत्तत्वकथनमिति ।

अतः ''अथातो ब्रह्मजिज्ञासा'' इत्यत्र न साधनचतुष्टयानन्तर्यं सूत्रकृदभिप्रेतम्, अपि तु कर्मविचारानन्तर्यमेवेति सिद्धम् ।

(९) कथानधिकारवादः

परेषामभिमताः ''अथातो ब्रह्मजिज्ञासा'' इति प्रथमसूत्रानुबन्धिनोऽर्था एतावता दूषिताः अतः परं तदभिमतप्रमेयदूषणानि वक्तव्यानि । तत्कथनं च न तैः सह कथायाम्। तेषां कथायामनधिकारात् । किं तु शिष्यान् प्रत्युपदेशरूपेणेति प्रथमं तेषां कथायामनधिकारं समर्थयतेऽस्मिन् वादे । विस्तरेण परमतमनूद्य ''तदिदम्'' इत्यादिना ''न्यायानुगृहीतवाक्यप्रत्यक्षादिसकलप्रमाणवृत्तयाथात्म्यविद्भिरनादरणीयम्'' इत्यन्तेन शिष्यान् प्रत्युपदिशतां भाष्यकाराणामयं भावः सौगतानामिव प्रच्छन्नसौगतानामपि कथायामनधिकार इति । वेदार्थसंग्रहे च स्पष्टमुक्तम् ''सर्वशून्यवादिनः ब्रह्मव्यतिरिक्तसर्ववस्तुमिथ्यात्ववादिनश्च स्वपक्षस्थापकप्रमाणपारमार्थ्यानभ्युपगमात् अभियुक्तैः वादानधिकार एव प्रतिपादितः -

''अधिकारोऽनुपायत्वान्न वादे शून्यवादिनः ''इति ।

तमेतमनधिकारं विस्तरेणोपपादयितुं खण्डनखण्डखाद्यकारेण ग्रन्थादौ अधिकारमुपपादितं प्रथमतोऽनुवदन्त्याचार्याः तत्संग्रह इत्थम् -

''अधिकारोऽनुपायत्वान्न वादे शून्यवादिनः''इति भट्टपादोक्तं खण्डयितुं खण्डनग्रन्थे श्रीहर्षेण प्रमाणादिसत्तामनभ्युपगच्छतामपि वादेऽधिकारोऽस्तीतिस्थापनाय ग्रन्थारम्भ एव प्रयासः कृतः । तत्र चतुर्धा तेन विकल्पः कृतः । तान् कल्पान् क्रमशोऽनुवदन्त्याचार्यचरणाः।

तथा हि – प्रमाणादीनां सत्त्वं यदभ्युपेयं कथकाभ्यां तत् कस्य हेतो: ।

(१) किं तदनभ्युपगच्छद्भ्यां वादिप्रतिवादिभ्यां तदभ्युपगमसाहित्यनियतस्य वाग्व्यवहारस्य प्रवर्तयितुमशक्यत्वात् ,

(२) उत कथकाभ्यां प्रवर्तनीयं वाग्व्यवहारं प्रति हेतुत्वात् ,

(३) उत लोकव्यवहारसिद्धत्वात्

(४) अथवा तदनभ्युपगमस्य तत्त्वनिर्णयविजयफलातिप्रसञ्जकत्वात् – इति चत्वारो विकल्पा: ।

(१) तत्र न प्रथम: । प्रमाणादिसत्ताभ्युपगममन्तरेणापि तत्तत्तीर्थकरै: चार्वाकमाध्यमिकादिभि: तदनुसारिभिश्च वाग्व्यवहारस्य प्रवर्त्यमानत्वात् । अन्यथा भवत: तन्निरासप्रयासानुपपत्ते: । (२) न द्वितीय: । प्रमाणादिनां हेतुत्वं तवापीष्टम् । हेतुत्वं च नियतप्राक्सत्त्वमिति प्रमाणादीनां सत्ताभ्युपगन्तव्येति द्वितीय: कल्प: । स न युक्त: । प्रमाणादिसत्ताभ्युपगमं विनापि प्रमाणादीनां व्यवहारहेतुत्वस्य माध्यमिकादिषु दर्शितत्वात् ।

(३) नापि तृतीय: । लोकव्यंवहार इत्यनेन प्रामाणिकव्यवहारविवक्षायां तस्य विचारप्रवृत्तिमन्तरेण दुर्निरूपता । व्यवहारस्य प्रामाणिकत्वं हि कथायामेव निरूपणीयम् । तथा च कथाया: सिद्धौ व्यवहारस्य प्रामाणिकत्वसिद्धि: । तत्सिद्धौ प्रमाणादिसत्ताभ्युपगम:, ततश्च कथारूपो विचार इति चक्रकापत्ति: । लोकव्यवहारशब्देन पामरादिव्यवहारविवक्षायां निर्मूलतादृशव्यवहारवलात् शरीरात्मत्वादिकमपि स्वीकर्तव्यं भवेत् । पश्चात्तनबाधात् तत्परित्यागश्चेत्– प्रमाणादिसत्तापि अस्मदुक्ताभिर्युक्तिभि: बाध्यमाना परित्याज्या ।

(४) नापि चतुर्थ: । यादृशो भवता प्रमाणादिसत्तामभ्युपगम्य व्यवहारनियम: कथायामाश्रीयते, तादृशस्यैव नियमस्य प्रमाणादिसत्त्वासत्त्वानुसरणोदासीनैरस्माभिरवलम्बनान्न दोष: । किं च भोजनादिव्यवहारेष्वपि यथा सत्तामनभ्युपगम्य भोजनं कुर्वतां माध्यमिकानां तत्फलं तृस्यादिकं तथा कथारूपव्यवहारेऽपि फलं भविष्यति ।

ननु व्यवहारनियमरूपसमयबन्ध एव कथाप्रवृत्तौ हेतुरिति स्वीकारेऽपि व्यवहारस्य सत्ता अवश्यमङ्गीकार्या। व्यवहारस्य क्रियारूपत्वात् क्रियायाश्च निष्पादनरूपत्वात् निष्पादनस्य च असतः सत्ताप्रापणरूपत्वात्। किं च प्रमाणादिभिः व्यवहर्तव्यमित्यत्र प्रमाणस्य करणत्वं कारणत्वविशेषरूपम्। कारणत्वं च नियतपूर्वकालसत्त्वमिति सत्ताङ्गीकरणीया। अपि च नियमबन्धे - यस्य व्यवहारे दोषाः सन्ति तस्य भङ्गो वक्तव्यः। यस्य पुनः साधनाङ्गभूत-व्याप्त्यादीनि सन्ति तस्य जयः तत्त्वरूपता चेति बन्धनमन्तर्भूतम्। (बन्धनं = नियमः) दोषसत्त्व-व्याप्त्यादिसत्त्वाभावे कथमिदं घटताम् इति चेन्न। एभिरपि सत्तानभ्युपगमबाधकैः कथायां प्रवृत्तायामेव सत्ताभ्युपगमस्य प्रसाधनीयत्वात्। ततश्च पूर्वोक्तचक्रकाद्यापत्तिरूपा बाधा दुस्तरा।

एतदनन्तरमपि कथकानां प्रमाणादिसत्ताभ्युपगमस्यानावश्यकत्वं बह्वीभिर्युक्तिभिः खण्डनग्रन्थे प्रसाधितम्। तत्सर्वमनूद्य सर्वस्यापि दूषणमाचार्यैः कृतं स्यात्। दौर्भाग्यवशात् स भागो लुप्तः। चण्डमारुतकारैः स्वरूपव्याक्रियैव पराक्रियेत्युच्यते। उत्तमूरुस्वामिभिः परमार्थभूषणेऽवशिष्टभागस्य पूरणं कृतमस्ति। तत् तत एव द्रष्टव्यम्।

(१०) निर्विशेषस्वप्रकाशभङ्गवादः

श्रीभाष्ये महासिद्धान्तारम्भे "निर्विशेषे वस्तुनि इदं प्रमाणमिति न शक्यते वक्तुम्" इत्युक्त्वा, "यस्तु स्वानुभवसिद्धमिति स्वगोष्ठीनिष्ठः समयः सोऽप्यात्मसाक्षिकसविशेषानुभवादेव निरस्तः" इत्यभाषि। तदेवात्रोपपाद्यते।

पूर्वपक्षः

ज्ञानस्य स्वयंप्रकाशत्वं सर्वेषां वेदान्तिनां संमतम्। किं तु ज्ञानं सविशेषविषयं वा निर्विशेषविषयं वेत्येव विवादः। तत्र सविशेषविषयमिति पक्षे किं ज्ञानस्य जडरूपधर्मविषयकतया सविशेषविषयकत्वम् उत अजडधर्मविषयकतयेति विमर्शे प्रकाशस्वरूपतामात्रेण स्वयंप्रकाशायां संविदि जडरूपधर्मविषयकत्वस्य नावकाशः। स्वाभिन्नप्रकाशात्मकत्वेनैव संवित् स्वात्मानं प्रकाशयति, न जडमपि प्रकाशयति। तस्य मिथ्यात्वेन दोषाधीनस्य स्वरूपनिबन्धन-

प्रकाशविषयत्वायोगात्। नापि अजडरूपधर्मविषयकत्वस्यावकाशः। अजडानां प्रकाशात्मकानां धर्माणां संविदपेक्षया भिन्नत्वेन ग्रहीतुमशक्यत्वात्। संविदपेक्षया प्रकाशात्मकधर्माणां भेदाङ्गीकारे च तेषां मिथ्यात्वेन दोषाधीनप्रकाशतया जडत्वेन प्रकाशात्मकत्वं दुर्भणम्।

ननु स्वरूपमात्रप्रकाशकतया सिद्धे संवित्स्वरूपप्रकाशे प्रकाशत्वेन हेतुना विशेषविषयकत्वं साध्यते घटप्रकाशवदिति चेत् - न। संविद्विषयत्वेनानुपलभ्यमाने विशेषे संविद्विषयत्वसाधनापेक्षया संविद्विषयत्वाभावाङ्गीकार एव तत्र युक्तः। लाघवात्। प्रतीतेरधिकविषयकत्वकल्पने गौरवात्।

ननु यदि स्वप्रकाशेनैव निर्विशेषस्वरूपं सिद्धमित्युच्यते, न त्वनुभवान्तरेण तर्हि अननुभवादेव तादृशस्वरूपं बाधितमिति चेत् - न। अनुपलब्ध्या निर्विशेषस्वरूपाभाव इति भवतां तात्पर्यम्। तत्र योग्यानुपलब्धेरेवाभावसाधकत्वात् प्रकृते योग्यतापदेन किं करणजन्यज्ञानविषयतारूपा योग्यता विवक्षिता, उत स्वयोग्यता। आद्ये निर्विशेषस्वरूपस्य करणजन्यज्ञानविषयत्वरूपयोग्यताविरहेण योग्यताविशिष्टानुपलब्धिर्नास्तीति कथं निर्विशेषस्वरूपाभावः। द्वितीये स्वयोग्यत्वे सति निर्विशेषविषयकस्वात्मकानुभवस्यैव सत्त्वेनानुपलब्धिरूपं विशेष्यं नास्तीति सुतरां तदभावासिद्धिः।

न च जाग्रत्स्वप्नयोः संविदः सविशेषविषयकतयौवानुभवात् कथं तस्याः निर्विशेषविषयकत्वमिति वाच्यम्। सुषुप्त्याद्यवस्थासु निर्विशेषसंवित्प्रकाशात्। सुप्तोत्थितपुरुषेण एतावन्तं कालं न किंचिदहमज्ञासिषम् इति तादात्विकाज्ञानसुखसाक्षितया निर्विशेषचैतन्यस्य प्रतिसन्धानात्।

सिद्धान्तः

अत्रोच्यते। निर्विशेषा संवित् स्वप्रकाशसिद्धेत्यत्र किं प्रमाणम्। किं सैव तत्र प्रमाणम् (प्रतिपादकम्) उत तामुपलभमानः अन्य इति विकल्पे न प्रथमः कल्पो युक्तः। निर्विशेषसंविदः निर्विशेषत्वात् स्वयाथात्म्यप्रतिपादकत्वरूपधर्मविरहात् प्रतिपाद्यभूतधर्मसंबन्धविरहाच्च। अन्यथा तस्याः तादृशधर्मवत्त्वे प्रतिपाद्यभूतविशेषेण प्रतिपादकेन शब्देन प्रतिपादनक्रियया

प्रतिपादनोद्देश्यभूतप्रतिवादिना च विषयतया वैशिष्ट्यं वाच्यम् । लोके यः प्रतिपादयति स स्वातिरिक्तं कंचिदर्थं केनचित् शब्देन कंचिदुद्दिश्य प्रतिपादयतीति दृश्यते । तथा च प्रतिपादकस्य स्वातिरिक्तविषय - प्रतिपादनोद्देश्य - प्रतिपादनकरण -प्रतिपादन- क्रियाभिः वैशिष्ट्यमवर्जनीयम् । एतादृशवैशिष्ट्याभावे प्रतिपादना-संभवात् । तथा च संवित्कर्तृकनिर्विशेषत्वोक्तिः अलीकवाद एव स्यात् ।

नापि द्वितीयः योऽन्यः संविदमुपलभते सं किं ततोऽन्यया संविदा तां निर्विशेषामुपलभते तयैव वा । आद्ये संविदः स्वान्योपलब्धिवेद्यत्वप्रसङ्गेन अवेद्यत्वसिद्धान्तविरोधः । अवेद्यत्वं नाम स्वभिन्नज्ञानाविषयत्वमिति भवत्सिद्धान्तात् । द्वितीयपक्षे किं सर्वलोकविदितां संविदमेव निर्विशेषविषयतयोपलभते उत ततोऽन्याम् । आद्ये तस्य उपलब्धेः भ्रान्तित्वप्रसङ्गः । लोकप्रसिद्धा हि संवित् विषयाश्रयस्वगतविशेषैर्विशेषितैव सर्वैरनुभूयते । ततश्च सविशेषायास्तस्याः निर्विशेषतया उपलम्भस्य भ्रमत्वमनिवार्यम् । द्वितीयेऽपि किमसौ महाभागः स्वस्मा एव स्वसुखादिवत् सिध्यन्तीं तां परस्मा उपदिशति उत प्रतिवादिनोऽपि तथा सिद्धाम्। नाद्यः, स्वस्मै निर्विशेषा संवित् प्रकाशत इति वचने विश्वासाभावात् । न द्वितीयः, प्रतिवादिनः स्वानुभवसिद्धविषये परोपदेशनिरपेक्षत्वात् ।

ननु निर्विशेषा संवित् न कस्मैचित् सिध्यति । नातः पूर्वोक्तविकल्पावकाश इति चेत्— न । यदि न सिध्यति, तर्हि तस्याः स्वरूपमेव न स्यात् । सिध्यति चेत् कस्मैचिदेव सिध्येत् ।

ननु लोकोत्तीर्णसंवित्स्वरूपं ब्रह्मस्वप्रकाशमिति भवद्भिरप्यङ्गीक्रियते ।तत् कथमस्मदुक्ते विराग इति चेत् – वयं हि प्रत्यक्षाद्यगोचरं ब्रह्मस्वरूपं तस्य स्वप्रकाशत्वादिधर्मवर्गं च श्रुतिबलात् स्वीकुर्मः । भवांस्तु प्रमाणश्रुतिरूपां नावं परित्यज्य क्षुद्रस्य स्वयंप्रकाशरूपस्य अलाबुनः अवलम्बेन संशयविवादरूपमपारसागरं निस्तर्तुमिच्छति ।अतः अलाब्वपेक्षया महती या नौरूपा श्रुतिः तस्याः पुरस्कारस्तदर्थमनावश्यकः ।पुरस्कृतापि श्रुतिः सविशेषमपि वस्तु प्रतिपादयतीति वक्ष्यामः ।

यत्तु सुषुप्त्याद्यवस्थायां निर्विशेषं वस्तु स्वतः प्रकाशत इत्युक्तं, तदपि न । सुषुप्त्यादिदशायामिदमर्थस्य घटादेः प्रकाशो नास्तीति सर्वसंमतम् ।अहमर्थप्रकाशस्तु अद्वैतिना नोपगम्यते ।तदानीमहमर्थविलयाभ्युपगमात् ।तदानीमहमर्थप्रकाशेऽपि न निर्विशेषतया तस्य प्रकाशः ।प्रत्यक्त्वानुकूलत्वविशिष्टतया प्रकाशात् ।प्रत्यक्त्वाद्यप्रकाशे अहमर्थप्रकाशाभावात्। यदि तु धर्मभूतं ज्ञानं तदानीं विषयाश्रयशून्यतया प्रकाशत इति मन्यसे, तदपि न। धर्मभूतज्ञानस्य विषयाश्रयनिरूपणीयस्वरूपतया विषयाश्रयरहिततया प्रकाशासंभवात् ।

यद्यपि वयं नित्यां धर्मभूतां संविदमुपगच्छामः, तथापि तस्या निर्विशेषतया प्रकाशं नेच्छामः । अतः सुषुप्तौ सा न प्रकाशते ।परं तु सुषुप्तौ सा अस्ति। परं तु आश्रयसहितैवास्तीति न सा निर्विशेषतया तदानीं तिष्ठति ।अधिकं ग्रन्थतो ज्ञातव्यम्।

(११) निर्विशेषविषयकनिर्विकल्पकभङ्गवादः।

अद्वैती वैयाकरणकौमारिलनैयायिकादिपक्षनिरासेन स्वाभिमतनिर्विकल्पकस्थापनेन प्रत्यवतिष्ठते। तत्परिहारतया प्रवृत्तस्य भाष्यस्य व्याख्यानं क्रियतेऽस्मिन् वादे ।

वैयाकरणमतम्

भर्तृहरिप्रभृतयो वैयाकरणाः निर्विकल्पकप्रत्यक्षेऽपि शब्दविशेषणकत्वं = शब्दावच्छिन्नार्थविषयकत्वमिच्छन्ति। यथाहुः -

न सोऽस्ति प्रत्ययो लोके यः शब्दानुगमादृते।
अनुविद्धमिव ज्ञानं सर्वं शब्देन गृह्यते ॥''

इति । अर्थविरोषणतया शब्दभानं विना यः प्रत्ययः स नास्ति । अतः सर्वमपि ज्ञानं शब्दविशेषणकार्थविषयकम् । तत्र हेतुमाह - अनुविद्धमिवेति। घट इति जानामि पट इति जानामि इति तावत् सर्वेषामनुभवोऽस्ति । इति शब्दप्रयोगाच्च घटादिपदं शब्दपरम् । अतः शब्दविषयकत्वं ज्ञानस्य। ननु ज्ञानस्य घटशब्दाद्यभिन्नत्वमपि स्यात्, इतिशब्दात् तत्प्रतीतेः इति शङ्कायामुक्तम् -इवेति। नात्रेतिशब्दस्य अभेदोऽर्थः। ज्ञाने घटादिशब्दाभेदस्य बाधितत्वात्।

अथ वा एवार्थक इवशब्दः । अतो ज्ञानशब्दयोः विषयविषयिभाव एव भासत इति भावः ।

तत्खण्डनम्

वैयाकरणैरपि समाधिदशायां निरस्तसमस्तकल्पनाजालस्य स्फोटाख्यस्य शब्दस्य भानाङ्गीकारात् ।किं च शब्दानुविद्धत्वं न सर्वत्र ज्ञाने प्रदर्शयितुं शक्यम् । बालमूकादिज्ञाने तदसंभवात् । तेषामस्य शब्दस्यायमर्थ इति वाच्यवाचकभावज्ञानाभावेन शब्दविशिष्टार्थविषयकज्ञानासंभवात् ।

ननु प्राथमिकचाक्षुषज्ञाने अर्थे शब्दवैशिष्ट्यभानं मा भूत् । तथापि तस्मिन् जातिगुणादिवैशिष्ट्यभानं संभवति । जातिगुणादीनां तदाश्रयघटाद्यर्थस्य च समानेन्द्रियग्रहणयोग्यत्वादिति चेत् - न । यदि प्राथमिकज्ञानमपि जात्यादिविशिष्टार्थविषयकं तदा कारणं विनापि कार्योत्पत्तिप्रसङ्गः । विशिष्टज्ञानस्य सर्वस्य विशेष्यस्वरूपविषयकज्ञानपूर्वकत्वदर्शनात् प्रथमं विशेष्यस्वरूपज्ञानरूपकारणाभावे विशिष्टज्ञानरूपकार्यस्यानुत्पत्तिप्रसङ्गात् ।

कौमारिलमतम्

अत्र कौमारिलाः - प्राथमिकज्ञानस्य जात्याद्यविषयकत्वमसहमानाः प्रकारान्तरेण निर्विकल्पकमुपपादयन्ति । तथा हि - जातिगुणादेः व्यक्त्यपेक्षया भेदाभेदाङ्गीकारेण व्यक्तिस्वरूपाभिन्नत्वात् स्वरूपविषयकमपि प्राथमिकज्ञानं जात्यादिविषयकमेव । परं तु प्राथमिकज्ञाने इदं स्वरूपम् इयं जातिः अयं गुण इति न विविच्यते । द्वितीयादिज्ञाने तु विविच्यते । येन न विविच्यते तत् निर्विकल्पकम्, येन विविच्यते तत् सविकल्पकमिति विभागः । न तु जात्याद्यविषयकं स्वरूपविषयकं ज्ञानं निर्विकल्पकम्, जात्यादिगोचरं सविकल्पकमिति विभाग इति वदन्ति ।

तत्खण्डनम्

तन्न समीचीनम् । जातिगुणादीनां परस्परम्, आश्रयाच्च भेदस्यैव सिद्धेः । अभेदसाधकप्रमाणाभावाच्च । ननु विशेष्यापेक्षया भिन्नेषु विशेषणेषु मत्वर्थीयप्रत्ययसापेक्षं

सामानाधिकरण्यं दृश्यते ''दण्डी पुरुष:, कुण्डली पुरुष:'' ''इति । जातिगुणादिषु तु मत्वर्थीयप्रत्ययनिरपेक्षमेव सामानाधिकरण्यं दृश्यते ''इयं गौ:, रक्त: पट:'' इत्यादि: । अतोऽभेदोऽपि जातिगुणादेस्तदाश्रयेण साकमङ्गीकरणीय इति चेत् - न। अभेदप्रसक्तिरहितेष्वपि शरीरात्मादिषु मत्वर्थीयप्रत्ययनिरपेक्षसामानाधिकरण्यस्य ''देवोऽहं, मनुष्योऽहम्'' इत्यादे: दर्शनात् मत्वर्थीयनिरपेक्षसामानाधिकरण्यमात्रेणाभेदासिद्धे: । न च शरीरात्मादौ देवोऽहम् इति सामानाधिकरण्यं लाक्षणिकम्, देवशब्दस्य देवशरीरविशिष्टे आत्मनि लक्षणास्वीकारादिति वाच्यम्। इयं गौ: रक्त: पट इत्यादिष्वपि जातिगुणादिवाचकपदानां जातिगुणादिविशिष्टव्यक्तौ लक्षणास्वीकारेण लक्षणयैव सामानाधिकरण्यस्य कैश्चिन्मीमांसकैकदेशिभि: स्वीकारात् अभेदासिद्धे: । यदि तु शरीरात्मादौ अपृथक्सिद्धत्वात् अपर्यवसानवृत्त्या वा सामानाधिकरण्यमित्युच्यते, तदा जातिगुणादावपि तथास्तु । न च तावता अभेदसिद्धि: । अपृथक्सिद्धत्वस्य भेदगर्भत्वात् ।

नैयायिकमतम्

अत्र नैयायिका: - परस्परमत्यन्तभिन्नानां द्रव्यजातिगुणादीनां विशेषणविशेष्यभावाविषयकं स्वरूपमात्रविषयकं ज्ञानं निर्विकल्पकम् । विशेषणविशेष्यभावविषयकत्वे सति द्रव्यजात्यादिस्वरूपविषयकं ज्ञानं सविकल्पकम्। अद्वैत्यभिमतं जात्याद्यविषयकं निर्विकल्पकं तु नास्त्येव । विशिष्टबुद्धौ विशेषणज्ञानस्य कारणत्वात् जात्यादिरूपविशेषणविषयकज्ञानं विना विशिष्टबुद्ध्यात्मकस्य सविकल्पकज्ञानस्योदयायोगात्। किं च जात्यादीनां विशेषणानामपि चक्षुरादीन्द्रियग्रहणयोग्यतया तत्तदिन्द्रियसंनिकर्षादिरूपसामग्र्यां सत्यां स्वरूपस्येव ग्रहणमावश्यकम्। अतो जात्यादिविशेषणाविषयकं स्वरूपमात्रविषयकं ज्ञानं नास्तीति प्राहु:।

तन्मतखण्डनम्

तदप्यसारम्। यदि निर्विकल्पकेऽपि जात्यादिरूपं विशेषणं तदाश्रयश्चोभयं भासते, तदा निर्विकल्पकस्य सविकल्पकात् को भेद: । न च समवायरूपवैशिष्ट्याग्रहणमेव भेद:, सविकल्पके समवायरूपं वैशिष्ट्यं भासते, निर्विकल्पके तु तन्न भासत इति वाच्यम्। अस्माभि: समवायानङ्गीकारात् तद्भानाभानप्रयुक्तविशेषस्य दुर्वचत्वात् । अस्तु वा समवाय:, स

निर्विकल्पके कुतो न भासते ।अयोग्यत्वान्न भासत इति चेत् - तर्हि सविकल्पकेऽपि स न भासेत । न चेष्टापत्तिः । तदा निर्विकल्पकस्य सविकल्पकाविशेषप्रसङ्गात् ।

ततश्चास्मदभिमतमद्वैतमेव निर्विकल्पकविषय इति पूर्वपक्षः ।

सिद्धान्तः

अयमत्र सिद्धान्तसारः - यत्तावत् वैयाकरणभाट्टादिदूषणम्, तदस्माकमपि संमतमेव। तत्र यदुक्तं विशिष्टज्ञानं प्रति स्वरूपज्ञानं कारणमिति । तन्न सार्वत्रिकम् । भिन्नसामग्रीवेद्येषु सविशेषणेषु विशेष्येष्वेव स्वरूपग्रहणपूर्वकं विशिष्टग्रहणस्य सुरभि चन्दनमित्यादौ दर्शनात्। तत्र आदौ चन्दनग्रहणम्, ततः सुरभिगन्धस्यस्मरणं, ततः सुरभिचन्दनमिति विशिष्टप्रत्यक्षमिति क्रमः। यत्र तु विशेष्यविशेषणयोरेकसामग्रीवेद्यत्वं तत्र युगपदेव विशेषणविशेष्योभयविषयकं ज्ञानं भवितुमर्हति। यदि निर्विकल्पकमपि विशिष्टविषयकं तदा निर्विकल्पकसविकल्पकविभागः कथमिति चेत्-श्रूयताम् । निर्विकल्पके जातिविशिष्टव्यक्तिग्रहणेऽपि जातेरनुवृत्ताकारता न प्रतीयते। सविकल्पके तु सा भासत इति विशेषः। एतदुक्तं भवति - सविकल्पकं पूर्वानुभूते इदानीमनुभूयमाने च अनुवृत्ततया प्रतीयमानेन धर्मेण स्वविषयं विशिनष्टि । अनुवृत्तत्वविशिष्टगोत्वादिविशिष्टविषयकं सविकल्पकमिति यावत् । तथा च अयमपि गौरिति वा स एवायं गौरिति वा ज्ञानं सविकल्पकम्। तादृशं च सविकल्पकं पूर्वमपि गोत्वविशिष्टव्यक्तिग्रहणे सत्येव भवितुमर्हति । अनुवृत्तत्वं हि तद्व्यक्तिवृत्तित्वे सति एतद्व्यक्तिवृत्तित्वम् । अयमपि गौरिति ज्ञाने गोत्वेऽनुवृत्तत्वं भासते। स एवायं गौरिति ज्ञाने देशकालवैशिष्ट्यस्य गवि भानमिति विशेषः। अनुदरा कन्येतिवत् निर्विकल्पकमिति व्यपदेशः। विस्तरो ग्रन्थे ।

(१२) सन्मात्रग्राहिप्रत्यक्षभङ्गवादः

सकलमपि घटोऽस्ति पटोऽस्तीत्यादिप्रत्यक्षं सन्मात्रब्रह्मविषयकमिति प्रपञ्चमिथ्यात्वसत्यत्वग्राहिणोः शास्त्रप्रत्यक्षयोः नास्ति विरोधः, उभयोरेकविषयकत्वादिति ब्रह्मसिद्धिकारादीनां मतमत्र निरस्यते। प्रसङ्गसंगतिः ।

पूर्वपक्ष:

यत्तु - प्रत्यक्षादिविरुद्धं जगन्मिथ्यात्वादिरूपं शास्त्रार्थमुपपाद्य पुन: सानुशयैरुक्तं प्रत्यक्षादिविरोधे सत्येव हि शास्त्रस्य बलीयस्त्वं वक्तव्यम् । विरोधमेव च न पश्याम: । उभयोरपि निर्विशेषसन्मात्रविषयकत्वात् ।

ननु यदि सन्मात्रं प्रत्यक्षेण गृह्येत तदा घटोऽस्ति पटोऽस्ति इत्याद्याकारक-नानावस्तुविषयकोपलब्धि: तन्मूलक: शब्दप्रयोगश्च न स्याताम् । सन्मात्रविषयकत्वे हि सत् सत् इत्येव प्रतीतिव्यवहारौ स्यातामिति चेत् - मैवम् । इदं रजतमित्याद्याकारकेषु शुक्तिरजतादिभ्रमेषु अबाधितस्य इदमंशस्य प्रत्यक्षेण ग्रहणम्, आरोपितरजताद्यंशस्य तु भ्रान्त्यैव ग्रहणमिति यथा विविच्यते, तथा घटोऽस्ति पटोऽस्ति इत्यादावपि अस्तिशब्दार्थसन्मात्रप्रकाशव्यवहारौ प्रत्यक्षमूलकौ, घटपटादिप्रकाशव्यवहारौ तु भ्रममूलकाविति विविञ्चाम: । तथा हि -

घटोऽस्तीत्यादौ अस्तित्वं तद्भेदश्च अस्तित्वाश्रयको घटादिरूपो भेदश्च प्रकाशते व्यवह्रियते च । अस्तित्वं नाम सद्रूपं ब्रह्म । तस्मिन् कल्पितो भेद: तद्भेद: । तत्र भावाभावरूपयो: विधिनिषेधयो: ऐक्यं न युज्यते । आश्रयप्रतियोग्युभयसापेक्षप्रतीतिको भेद: अभाव: । सत्स्वरूपं तु तदनपेक्षमिति वैलक्षण्यात् स्वरूपभेदयो: भेद: अङ्गीकार्य:। तत्र स्वरूपभेदयोरुभयोरपि सद्घटयो: प्रत्यक्षं ग्राहकम्, उतान्यतरमात्रग्राहकमिति विचारणीयम्।पूर्वत्रापि किं युगपत् ग्राहकम् उत क्रमेणेति । तत्र न प्रथम: । सन्मात्रग्रहणस्य आश्रयप्रतियोगिग्रहणनिरपेक्षतया झटित्युत्पत्ते:। भेदग्रहणस्य तु तत्सापेक्षतया पश्चाद्भावित्वात् उभयो: युगपत् ग्रहणानुपपत्ते: । न द्वितीय: । आश्रयप्रतियोगिनिरपेक्षसन्मात्रं विषयीकृत्य उपशान्तस्य क्षणिकस्य प्रत्यक्षस्य भेदग्रहणार्थं द्वित्रिक्षणपर्यन्तं स्थितेरयोगात्। अन्यतरमात्रग्रहणपक्षेऽपि न भेदमात्रग्राहकत्वम् । निराश्रयभेदग्रहणासंभवात् । अत: परिशेषात् प्रत्यक्षं सत्स्वरूपमात्रग्राहकमिति ।

सिद्धान्त:

तत्र ब्रूम: । यद्विकल्पितं प्रत्यक्षेण स्वरूपभेदयो: युगपद्वा क्रमेण वा ग्रहणमिति, तत्र प्रत्यक्षयोग्येषु भेदेषु स्वरूपभेदयो: युगपदेव ग्रहणमिति ब्रूम: । भेदो हि वस्तुसंस्थानं वा

जातिर्वा तदाश्रयव्यक्त्या सहैव संनिकर्षसाम्यात् गृह्यते। एकसामग्रीवेद्यानां युगपत् ग्रहणस्य निर्विकल्पकवादे समर्थितत्वात्। न च जात्याद्यतिरिक्तं भेदमङ्गीकुर्मः, येन युगपत् ग्रहणाभावः स्यात्। त्वमपि हि घटोऽस्तीत्यादौ अस्तित्वं तद्भेदश्च व्यवह्रियत इति वदन् घटत्वादिकमेव भेदपदार्थत्वेन उदाहरसि। घटवत् घटत्वमपि हि त्वन्मते भेदः एव। अस्तित्वान्यत्वात्। न च प्रतियोगिज्ञानसापेक्षस्य भेदस्य कथं तन्निरपेक्षव्यक्त्या सहोपलम्भ इति वाच्यम्। घटत्वादेः स्वरूपेण ज्ञानं प्रति प्रतियोगिज्ञानापेक्षाविरहात्। न च घटत्वादिस्वरूपग्रहणे प्रतियोगिज्ञानापेक्षाविरहेऽपि आश्रयज्ञानापेक्षा अस्त्येवेति वाच्यम्। स्वसमानकालवर्तित्वेन आश्रयज्ञानस्यैवापेक्षिततत्वात्। न च प्रतियोगिज्ञाननिरपेक्षस्य जात्यादेः कथं भेदत्वमिति वाच्यम्।भेदरूपजात्यादेः स्वरूपेण ग्रहणे प्रतियोगिज्ञानापेक्षा नास्ति। तेषामेव भेदत्वेन रूपेण ग्रहणे प्रतियोगिज्ञानापेक्षा। भेदोऽतिरिक्त इति वदन्तोऽपि तार्किकाः भेदत्वेन ग्रहण एव प्रतियोगिज्ञानापेक्षा न प्रमेयत्वेन तद्ग्रहण इत्यङ्गीकुर्वन्ति।

यत्तु शास्त्रप्रत्यक्षयोः विरोधपरिहाराय तयोः सन्मात्रविषयकत्वं साधितम्। तदपि न। तयोः सन्मात्रविषयकत्वे शास्त्रस्य प्रत्यक्षगृहीतार्थग्राहकतया अनुवादत्वप्रसङ्गात्। किं च सन्मात्रस्य प्रत्यक्षविषयत्वे शास्त्रयोन्यधिकरणविरोधः। तत्र हि सन्मात्रस्य ब्रह्मणः शास्त्रैकप्रमाणकत्वं साधितम्। किं च सन्मात्रस्य ब्रह्मणः प्रत्यक्षवेद्यत्वं ''न संदृशे तिष्ठति रूपमस्य न चक्षुषापश्यति कश्चनैनम्'' ''न चक्षुषा गृह्यते नापि वाचा'' ''न मांसचक्षुरभिवीक्षते तं'' ''न मांसचक्षुषा द्रष्टुं ब्रह्मभूतःस शक्यते'' इत्यादि श्रुतिस्मृतिविरुद्धम्। प्रत्यक्षाग्राह्यत्वस्यैव तत्र प्रतिपादनात्।

तस्मात् सर्वस्यापि प्रत्यक्षस्य नैकविषयकत्वं न तरां निर्विशेषविषयकत्वं न तमां ब्रह्मविषयकत्वमिति सिद्धेः प्रत्यक्षमूलकानां प्रमाणान्तराणामपि प्रत्यक्षागोचरविशिष्टवस्तुविषयकत्वे न किंचित् बाधकम्। प्रत्युत निर्विशेषविषयकत्व एव प्रत्यक्षादिबाध इति सिद्धम्।

(१३) भेददूषणनिस्तारवाद:

ननु पूर्वस्मिन् वादे सन्मात्रग्रहो न संभवति, भेदानामपि ग्रहसंभवादिति यदुक्तं, तदयुक्तम्, भेदस्य दुर्निरूपत्वात् इत्याक्षेपसंगत्या वादोऽयं प्रवर्तते । खण्डनखण्डरवाद्ये अद्वैततत्त्वप्रदीपिकायां च यत् भेददूषणं कृतं तन्निरसनपूर्वकं भेद: स्थाप्यतेऽत्र वादे । प्रायोऽन्योन्याभावरूपभेदविचार: अत्र भवति ।

पूर्वपक्ष:

यत्तु – भेद: स्वरूपं धर्मो वा । न तावत् स्वरूपम् । शुक्तिरजतादिभ्रमानुपपत्ते: । तथाहि – इदमिति अधिष्ठानतया शुक्तिस्वरूपमवभासते । अधिष्ठानप्रकाशरहितस्य भ्रमस्यानङ्गीकारात् । तथा चाधिष्ठानतया शुक्तिस्वरूपे भासमाने तस्यैव रजतात् भेदत्वेन रजतभेदोऽप्यवगत इति भेदाग्रहो नास्ति । भेदाग्रह एव च रजताध्यासस्य कारणम् । तदभावात् कथं शुक्तौ रजताध्यास:संभवति । तदभावे च कथं तन्मूलका: रजतेच्छो: करतलप्रसारणं रजतग्रहणं तस्य चेलाञ्चले बन्धनं तद्रक्षणमित्यादयो व्यापारा भवेयु: । कथं चाध्यासाभावे स्वप्रकारकधीविशेष्यनिष्ठात्यन्ताभावरूप: बाध: संभवति ।

किं च यदि पटस्य घटात् भेद: पटस्य स्वरूपं तदा कुड्ये पटस्वरूपत्वाभावेन कुड्यस्य घटात् भेदो न स्यात् । कुड्यस्य घटात् भेदाभावे च घटकुड्यतादात्म्यं प्रसज्येत। एवं घटस्वरूपस्य पटभेदत्वे कुड्ये घटस्वरूपत्वाभावेन पटभेदाभावे सति पटकुड्यतादात्म्यं स्यात् । एवं रीत्या जगदन्तर्गतसर्वपदार्थानां परस्परतादात्म्ये सति स्वरूपं भेद इति वाद: सर्वभेद एव पर्यवस्यति ।

अथ घटे पटभेद: यदि धर्म: तदा धर्मभूतस्य पटभेदस्य धर्मिण: घटस्य च भेदोऽस्ति वा न वा । नास्ति चेत्, किं धर्मधर्मिणो: ऐक्यात् धर्मधर्मिभेदो नास्तीत्युच्यते, किं वा अन्यतरपरिशेषात् । आद्ये धर्मधर्मिणोर्भेदस्याभावात् भेदो धर्मिस्वरूप इति पक्षे ये दोषा उक्ता: ते प्रसजेयु: । द्वितीये धर्मिपरिशेषाङ्गीकारे धर्मभूतस्य भेदस्याभावात् पुनरपि सर्वतादात्म्यं प्रसज्येत । धर्मपरिशेषाङ्गीकारे धर्मिण एवाभावात् कस्य भेदो वर्णनीय: ।

कथं तर्हि सार्वलौकिकोऽयं भेदग्रहः । अविद्यामाहात्म्यादिति ब्रूमः इति ।

सिद्धान्तः

अत्रोच्यते । भवद्भिः भेदप्रतीतेरपलापः कर्तुं न शक्यते । अविद्यामूलको भेदग्रह इति स्ववचनविरोधात्, प्रत्यक्षबाधात्, अपसिद्धान्ताच्च । "युष्मदस्मत्प्रत्ययगोचरयोः विषयविषयिणोः तमः प्रकाशवत् विरुद्धस्वभावयोरितरेतरभावानुपपत्तौ "इति भवद्भाष्यविरोधाच्च। ननु न भेदप्रतीतिमपलपामः, किं तु तत्कारणमपलपाम इति चेत् - न। कार्यस्य कारणारवश्यंभावात् । अन्यथा अहेतुककार्यवादिलोकायतमतप्रवेशापत्तेः । इन्द्रियादिरूपस्य कारणविशेषस्य सिद्धेश्च। भवतापि अविद्याकारणकत्वोक्तेश्च ।

यत् विकल्पितं भेदः स्वरूपं धर्मो वेति, तत्र पृच्छामः किं सामान्यतः स्वरूपधर्मयोः भेदमङ्गीकृत्य विकल्पयसि अनङ्गीकृत्य वा । नाद्यः, विकल्पस्य निष्फलत्वात् । विकल्पस्य हि भेदाभावसिद्धिः फलम् । भेदाभावरूपफलसिद्धौ भेदाभ्युपगविरोधात्, उपजीव्यविरोधाच्च। न द्वितीयः। विकल्पस्यानुत्थानात् । भिन्नभिन्नः कल्पो हि विकल्पः । कल्पभेदाभावे विकल्पस्यायोगात् । न हि पर्यायेण विकल्पो भवति अयं घटो वा घटो वेति । एवं च भेदापलापोऽशक्यः।

अथ प्रतिबन्द्या दूष्यते। अभेदः स्वरूपं धर्मो वा। स्वरूपं चेत् स्वरूपे गृहीते अभेदस्यापि गृहीतत्वात् भेदभ्रमः कदापि न स्यात् । भेदग्रहं प्रति अभेदग्रहस्य प्रतिबन्धकत्वात्। अभेदो यदि धर्मः तदा भेदः सिद्धः । ब्रह्माभेदयोः भेदं विना धर्मधर्मिभावासंभवात् । धर्मधर्मिभावस्य भेदव्याप्यत्वात् ।

इदमत्रावधेयम् - भेदः स्वरूपमेव वा धर्म एव वा, क्वचित् स्वरूपं क्वचित् धर्म इत्युभयं वेति त्रेधा विकल्पे कर्तव्ये द्वेधा विकल्प्य दूषणमुक्तं भवता । तृतीयः कल्प एवास्माकमभिमतः । स न दूषितः न वा दूषयितुं शक्यः । तथा हि - पटगतं शुक्लत्वं धर्मान्तरात् नीलत्वात् भिन्नम् । शुक्लत्वे विद्यमानः नीलत्वभेदः शुक्लत्वस्वरूपमेव । तदेव शुक्लत्वं स्वाश्रयपटधर्मभूतं सत् अशुक्लपटादिधर्म्यन्तरापेक्षया पटनिष्ठो भेदो भवति ।

अस्मिन्नुदाहरणे स्वरूपस्यापि भेदत्वं वर्तते धर्मस्यापि भेदत्वं वर्तते । इतरव्यावृत्त इति व्यवहारहेतुर्हि भेदः । स च व्यवहारः क्वचित् स्वरूपतो भवति, क्वचित्, धर्मतः । शुक्लत्वादिग्रहे सति तद्धर्मिणः धर्म्यन्तरात् तस्य च नीलत्वादिभ्यो धर्मान्तरात् व्यावृत्तिव्यवहारदर्शनात् स एव स्वधर्मिणो धर्म्यन्तरात् स्वस्य धर्मान्तराच्च भेदः, लाघवादिति।

(१४) वेदप्रामाण्यपरिग्रहानुपपत्तिवादः

अद्वितीयब्रह्मातिरिक्तमशेषं मिथ्येति वदद्भिः प्रत्यक्षानुमाने अप्यवधूय शुद्धब्रह्मण्येव पुष्कलं प्रामाण्यं परिगृहीतम् । प्रत्यक्षविरोधे शास्त्रमप्रमाणं स्यादित्याक्षेपं दुष्परिहरं मन्वानैश्च तैः प्रत्यक्षमपि शास्त्रार्थमेव दर्शयतीति सन्मात्रप्रत्यक्षवादेन प्रत्यवस्थितम् । तदापि शास्त्रं प्रत्यक्षगृहीतग्राहित्वात् पुनः अप्रमाणमेवापतेत् । अनधिगताबाधितार्थप्रतिपादकत्वस्यैव प्रामाण्यपदार्थत्वादिति पुनस्ते पराकृताः । अथ वेदे प्रत्यक्षविरोधचिन्ता तावदास्ताम् । वेदप्रामाण्यमद्वैतिभिः सौगतागमवैलक्ष्येण सर्वथा दुर्वचमिति स्थाप्यतेऽत्र वादे ।

अत्र आचार्यैः बुद्धिवैशद्यार्थं द्वादशधा विकल्प्यान्ते-

''वेदोऽनृतो बुद्धकृतागमोऽनृतः
प्रामाण्यमेतस्य च तस्य चानृतम् ।
वोद्धानृतो बुद्धिफले तथानृते
यूयं च बौद्धाश्च समानसंविदः ॥ ''

इति यादवप्रकाशश्लोकप्रदर्शनिन निगमितम् ।

''अत्र च प्रामाण्यादेरप्रयोजका एव केचित् कल्पा मन्दमतिसंमोहशमनायोपन्यस्य निराकृताः ''इत्युक्तमवधेयम् ।

(१५) दृश्यत्वानुमाननिरासवादः पञ्चदशः

निर्विशेषस्य शास्त्रवेद्यत्वं नास्तीत्युक्तम् । अपि च शास्त्रवेद्यत्वे मिथ्यात्वमपि स्यात् इत्युत्थानात् संगतिः । यत् अद्वैतिना प्रपञ्चस्य दृश्यत्वेन हेतुना मिथ्यात्वं साध्यते, तदत्रानुमानं

निरस्यते। तत्र सिषाधयिषितं मिथ्यात्वं किं तुच्छत्वम्, उतान्यथाख्यातिविषयत्वम्, उत सदसद्विलक्षणत्वम्, अथ प्रतिपन्नोपाधौ निषेधप्रतियोगित्वरूपं बाध्यत्वम्, अथवा स्वात्यन्ताभावसमानाधिकरणतया प्रतीयमानत्वं, यद्वा सत्यब्रह्मविलक्षणत्वं, यद्वा अन्यदेव किंचित् इति सप्तधा विकल्प्य आचार्यैः विस्तरेण दूषितम् । एवमीदृशं मिथ्यात्वं मिथ्या वा सत्यं वेति विकल्प्य,

''मिथ्यात्वस्य तु मिथ्यात्वे मिथ्यात्वं बाधितं भवेत् ।
सत्यत्वस्य तु सत्यत्वे सत्यत्वं साधितं भवेत् ॥ ''

इति च दूषणं प्रदर्शितम् । अत्र सदसद्विलक्षणत्वादयः चत्वारः कल्पा अद्वैतग्रन्थारूढाः सिद्धिब्रह्मानन्दीयादिषु सुदूरं परिष्कृताः । तेषां समाधानं सहस्रकिरण्यां न्यायभास्करे परमार्थभूषणे वेदान्तवैजयन्त्यां च विस्तरेणाभिहितम् ।

दृश्यत्वरूपहेतुविषये तावत् नव्याद्वैतिनः एवं वदन्ति - ज्ञानविषयत्वरूपदृश्यत्वस्य ब्रह्मण्यपि सत्त्वात् तत्र व्यभिचार इति नाशङ्कनीयम् । हेतौ दृश्यत्वे स्वाधिकरणान्यूनसत्ताकत्वरूपविशेषणदानात् । ब्रह्मणः पारमार्थिकत्वात् ब्रह्मगतदृश्यत्वस्य च व्यावहारिकत्वात् ब्रह्मन्यूनसत्ताकं दृश्यत्वमेव तत्रेति न व्यभिचारः । दृष्टान्ते शुक्तिरूप्ये च यत् दृश्यत्वं तत्सत्ता न शुक्तिरूप्यन्यूना, शुक्तिरूप्यस्य प्रातिभासिकत्वात् दृश्यत्वस्य व्यावहारिकत्वाच्चेति न दृष्टान्ते साधनवैकल्यमिति ।

तत्रोच्यते । दृश्यत्वं न वृत्तिव्याप्यत्वम् ।तस्य ब्रह्मण्यपि सत्त्वेनानैकान्त्यात् । नापि वृत्त्यवच्छिन्नचैतन्यविषयत्वरूपं फलव्याप्यत्वम् ।तस्य ब्रह्मण्यभावादेव अनैकान्त्यपरिहारात् किमर्थं स्वाधिकरणान्यूनसत्ताकत्वरूपं विशेषणम्। अथ वृत्तिव्याप्यत्वरूपदृश्यत्वपक्षेऽपि निर्दोषत्वसंरक्षणर्थमिति चेत्- अस्तु तावत् । दृश्यत्वं हि दर्शनविषयत्वम् ।तच्च दर्शनकाले वस्तुन्यस्ति नान्यदा । एवं चाधिकरणसत्तापेक्षया दृश्यत्वसत्ता प्रायो न्यूनैवेति कथं तत्र प्रपञ्चान्यूनसत्ताकत्वम् ? यदि तु पारमार्थिकत्वापारमार्थिकत्वादिरूपं वैजात्यं सत्तायां विवक्षितं, तर्हि स्वाधिकरणसत्तासजातीयसत्ताकत्वमिति परिष्करणीयम्, न तूक्तरीत्या । नन्वस्तु तथैव

परिष्कारः । दर्शनविषयत्वं च ब्रह्मगतपारमार्थिकसत्ताविजातीय-व्यावहारिकसत्ताकमिति न व्यभिचार इति चेत्- तर्हि दृष्टान्ते साधनवैकल्यम् । शुक्तिरूप्यस्य प्रातिभासिकत्वात् तद्गत-दृश्यत्वस्य व्यावहारिकत्वाच्च शुक्तिरूप्यसत्ताजातीयसत्ताकत्वाभावात्।सत्तायां व्यावहारिकत्वप्रातिभासिकत्वरूपवैलक्षण्यस्य प्रतिवाद्यसिद्धतया सर्वत्र सत्ता एकरूपैवेति ब्रह्मण्यपि हेतुसत्त्वादनेकान्तिकत्वमेव। सत्तात्रैविध्यानङ्गीकार्यद्वैतिमते हेत्वसिध्दिश्च।एवं वृत्त्यवच्छिन्नचैतन्यविषयत्वं दृश्यत्वमिति परिष्कारश्च विस्तरेण परमार्थभूषणे निरस्तः । तथाहि– चैतन्यविषयत्वमात्रहेतुकथनेनैव निर्वाहे चैतन्ये वृत्त्यवच्छिन्नत्वविशेषणं व्यर्थम् । अप्रसिद्धं च चैतन्ये वृत्त्यवच्छिन्नत्वं । न हि वृत्तिः लोकतः प्रसिद्धा, नतरां चैतन्ये तदवच्छिन्नत्वम् । पारमार्थिकस्य चैतन्यस्यापारमार्थिकस्य वृत्त्यवच्छिन्नत्वस्यायोगात् । अध्यासाधिष्ठान भावातिरिक्तः संबन्धो हि मिथ्यासत्ययोर्न भवितुमर्हति । अत एव चैतन्यविषयत्वमप्यहेतुः । विषयत्वस्य तत्संबन्धत्वायोगात् । निर्विषयकचैतन्यरूपस्य ज्ञानस्य विषयीकरणासंभवः सुतराम् इति । करूरुस्वामिविरचितायां सहस्रपृष्ठात्मिकायांसहस्रकिरण्यां पक्षतावच्छेदकविचारः पञ्चमिथ्यत्वानि दृश्यत्वादिहेतवः मिथ्यात्वमिथ्यात्वम् इत्यादयो विषयाः अद्वैतिसिद्धि-तद्व्याख्यानलघुंगुरुचन्द्रिकास्थ परिष्काराणां युक्तीनां चानुवादपूर्वकं विवेचिताः ।तस्य ग्रन्थस्य प्रकाशनमचिरात् भविष्यति ।

(१६) व्यावर्तमानत्वानुमानभङ्गवादः

दृश्यत्वेनेव व्यावर्तमानत्वेनापि हेतुना मिथ्यात्वं सिध्यति इति शंकराचार्यैः -

‘‘नासतो विद्यते भावो नाभावो विद्यते सतः ।
उभयोरपि दृष्टोऽन्तस्त्वनयोस्तत्त्वदर्शिभिः ॥ ’’

इति गीताव्याख्यानावसरे -

‘‘यद्विषया बुद्धिर्न व्यभिचरति तत्सत् । यद्विषया
बुद्धिर्व्यभिचरति तदसदिति सदसद्विभागः ’’

इत्युक्तम्। अत्रानन्दगिरिटीका -

> ''व्यावृत्तस्य कल्पितत्वे प्रमाणमाह - यद्विषयेति।
> यत् व्यावृत्तं तन्मिथ्या, यथा सर्पधारादीति ''

अनेन व्यावर्तमानत्वं मिथ्यात्वप्रयोजकमिति लभ्यते। एतदेव विकल्पपूर्वकं दूष्यते अत्र वादे।

घटादयोऽपरमर्थाः व्यावर्तमानत्वात् इत्यन्वयव्यतिरेक्यनुमानम्। रज्ज्वाद्यधिष्ठानसर्पभूदलनाम्बुधारादयः अन्वयदृष्टान्ताः। सर्पाद्यधिष्ठानभूता रज्जुः सर्वाधिष्ठानं ब्रह्म च व्यतिरेकदृष्टान्तः।-

तत्र व्यावर्तमानत्वं न यतः कुतश्चिदन्यत्वम्। युष्मदर्थादन्यस्मिन् ब्रह्मणि व्यभिचारात्। नापि यत्र कुत्रचित् देशादावसत्त्वम्। तस्य मिथ्यात्वं प्रत्यप्रयोजकत्वात्। नापि प्रध्वंसवत्त्वम्। दृष्टान्तस्य रज्ज्वाद्यधिष्ठानसर्पादेः तदभावेन साधनवैकल्यात्। न ह्यध्यस्तं सर्पादिकं बाधदशायामपि प्रध्वस्तमिति कश्चिद्वदति। नापि प्रतिपन्नोपाधौ निषेधप्रतियोगित्वम्। असिद्धेः। न हि घटादयो यत्र देशे भासन्ते तत्रैव न सन्तीति बाध्यन्ते। नापि कदाचित् क्वचिदेव प्रकाशमानत्वम्। तस्य मिथ्यात्वं प्रत्यप्रयोजकत्वात्। घटादयः कदाचित् क्वचित् प्रकाशन्त इत्येतावतैव सत्यत्वम्। कालान्तरे देशान्तरे च न प्रमीयन्त इति कृत्वा न मिथ्यात्वम्। कालान्तरे देशान्तरे चाप्रमितेः सामग्र्यभावप्रयुक्तत्वेन मिथ्यात्वप्रयुक्तत्वाभावात्। एवं च व्यावर्तमानत्वं न मिथ्यात्वप्रयोजकम्, अनुवर्तमानत्वं च न सत्यत्वप्रयोजकम्। अपि तु बाधितत्वं मिथ्यात्वप्रयोजकम्, अबाधितत्वं सत्यत्वप्रयोजकम्। घटपटादिप्रपञ्चे तु बाधितत्वं नास्ति। तद्धि न प्रत्यक्षेण। युक्त्या बाधस्तु ब्रह्मण्यपि। व्यतिरेकव्याप्तिरप्यसिद्धा। तथा हि- यत् मिथ्याभिन्नं तत् व्यावर्तमानभिन्नमिति अन्योन्याभावघटितव्यतिरेकव्याप्तिः। यत्र मिथ्यात्वाभावः तत्र व्यावर्तमानत्वाभाव इति अत्यन्ताभावघटितव्यतिरेकव्याप्तिः। उभयत्रापि ब्रह्मणि व्यभिचारात् व्यतिरेकव्याप्त्यसिद्धिः।

एवं सत् परमार्थः अनुवर्तमानत्वात् सर्पाद्यधिष्ठानरज्ज्वादिवत् इत्यनुमानेऽपि व्यतिरेकव्याप्त्यसिद्धिर्द्रष्टव्या ।यन्न सत् न तदनुवर्तते इति व्याप्तिरसिद्धा, सुश्लिष्टबहुतन्तुषु आरोपितायामेकस्यां रज्जौ व्यभिचारादिति ।

(१७) दृग्दृश्यसंबन्धानुपपत्तिपरिहारवादः

दृश्यत्वेन हेतुना प्रपञ्चमिथ्यात्वसाधने अप्रयोजकत्वशङ्कायाम् अद्वैतसिद्धावुक्तम् ''सत्यत्वेऽपि दृश्यत्वोपपत्तिर्वक्तुं न शक्यते दृग्दृश्यसंबन्धानुपपत्तेः'' इति । विवव्रे च संबन्धविषये विविधान् विकल्पान् विधाय आध्यासिकसंबन्धमात्रपरिशेषणेन । ईदृशाद्वैतिहृदयोद्घाटनपूर्वकं समाधानमुक्तमाचार्यैरत्र वादे । दृश्यमिथ्यात्वं हि दृग्दृश्यसंबन्धप्रतिक्षेपकं न तु स्थापकमिति सारांशः । दृक् - ज्ञानं (चैतन्यम्) दृश्यं - प्रपञ्चः ।

पूर्वपक्षः

दृग्दृश्ययोः न संयोगः संबन्धः । दृशेरद्रव्यत्वात् द्रव्ययोरेव संयोगात् । नापि समवायः । ज्ञानस्यात्मधर्मत्वेन अर्थे समवायासंभवात् । न चार्थनामेव ज्ञाने समवाय इति वाच्यम् । वाह्यानामर्थानामान्तरे ज्ञाने समवायायोगात् । नाप्येकार्थसमवायः दृग्दृश्योभयाश्रयस्यान्यस्य कस्यचित् अनुपलम्भात् । नापि तादात्म्यं दृशेर्दृश्यस्य च संबन्धः। जडत्वाजडत्वादिविरुद्धधर्मवत्त्वात् । नापि भेदाभेदः । स्ववचनविरोधात् नानात्वं भेदः तदभावस्त्वद्वैतमिति । नापि ज्ञानस्वरूपमेवार्थस्य ज्ञानसंबन्धः । ज्ञानस्यैव संबन्धत्वं संबन्धित्वं चेति विरुद्धधर्मद्वयसमावेशप्रसङ्गात् । नापि अर्थगतप्राकट्यजननमेव अर्थसंबन्धो ज्ञानस्येति युक्तम् ।प्राकट्यस्यानुपलम्भनिरस्तत्वात् । अपि च ज्ञानं हि अर्थेन संबन्धं विना यदि तत्र प्राकट्यं जनयेत् तदा घटज्ञानेन पटेऽपि प्राकट्यजननप्रसङ्गः । अतः अर्थसंबद्धं सदेव ज्ञानमर्थे प्राकट्यं जनयतीति वक्तव्यम् । तत्तु न संभवति । संबन्धस्यैवानिरूपणात् । नापि विषयविषयिभावोऽयमपरः संबन्धः । ज्ञानस्यायं संबन्धः अनेनैवार्थेन भवति नान्येनेत्यत्र नियामकं किंचिदस्ति न वा । न चेत् - घटज्ञानस्य पटादिनापि विषयविषयिभावसंबन्धप्रसङ्गः ।

अस्ति चेत् तस्यापि नियामकान्तरापेक्षया अनवस्था। किं च विषयविषयिभावोऽयं द्विनिष्ठो वा एकनिष्ठो वा। नाद्यः। विषयत्व विशिष्टं विषयित्वं विषयविषयिभावः। विषये विषयित्वाभावात् विषयिणि विषयत्वाभावाच्च द्विनिष्ठत्वानुपपत्तेः। न द्वितीयः। यत्र एकं विषयत्वं विषयित्वं वा वर्तते तत्र विषयत्वविषयित्वयोः द्वयोरपि प्रसङ्गात्।

सिद्धान्तसारस्तु - दृशेः ज्ञानस्य द्रव्यत्वात् तस्य दृश्येन द्रव्येण साकं संयोगः संबन्धः गुणादिना साकं संयुक्ताश्रितत्वं संबन्धः। अथवा विषयविषयिभावः संबन्धः।यत्तु तत्र पृष्टं विषयविषयिभावो द्विनिष्ठो वा एकनिष्ठो वेति, तत्रेदं समाधानम् - विषयत्वं विषयित्वं चैकैकनिष्ठम् परस्परनिरूप्यमिति निष्कर्षः। ताभ्यामेव च विषयविषयिणोः वैशिष्ट्यसिद्धिः। विषयत्वविषयित्वसमाहारत्वात् संबन्धत्वव्यपदेश इति।

किं च दृग्दृश्ययोः संबन्धानुपपत्त्या तदुपपादनार्थं दृश्यमिथ्यात्वकल्पनमित्यर्थापत्तिर्हि भवद्विवक्षिता। सात्र न संभवति। प्रत्यक्षादिप्रमाणावगतस्यार्थस्यानुपपत्तौ सत्यां तदुपपादकस्यार्थस्य कल्पनं हि अर्थापत्तिः। यथा परिदृश्यमानस्य दिवाऽभुञ्जानदेवदत्तपीनत्वस्य अनुपपत्तावाशङ्कितायां पीनत्वोपपादकस्य रात्रिभोजनस्य कल्पनम्। तद्वत् दृग्दृश्यसंबन्धस्यानुपपत्तावाशङ्कितायां कल्प्यमानं दृश्यमिथ्यात्वं न दृग्दृश्यसंबन्धस्योपपादकं भवति। प्रत्युत प्रतिक्षेपकमेव। न हि मिथ्याभूतस्य दृश्यस्य सत्यया दृशा संबन्धो भवति इति।

(१८) बाह्यप्रकाशानुपपत्तिवादः

दृग्दृश्यसंबन्धानुपपत्त्या दृश्यमिथ्यात्वं पराभिमतं निरस्तम्। एवं हि मिथ्यात्वं वदता दृश्यस्य प्रतीयमानत्वमेष्टव्यम्। प्रतीतिबाधयोः सदसद्विलक्षणत्वरूपमिथ्यात्वनिरूपकत्वात्। असच्चेन्न प्रतीयेत, सच्चेन्न बाध्येतेति हि मन्त्रपाठः। तत् प्रतीयमानत्वमेवानुपपन्नम्। बाह्यवस्तुप्रकाशासंभवात्। यद्यपि भाष्ये अज्ञानप्रकाशासंभव एव कण्ठरवेणोक्तः, तथापि अज्ञानप्रकाशायोगभाष्यस्य कार्यकारणोभयात्मकाज्ञानप्रकाशायोगपरत्वमित्याशयेन अयं वादः प्रवर्तते।

नित्यमुक्तं सर्वदा अविद्यादिदोषरहितं ब्रह्मैव आदिरहितामविद्यामनुभवतीति यदुक्तं, तन्नोपपद्येत । ब्रह्मणः अविद्याविषयकानुभवरूपस्य धर्मभूतज्ञानस्य भवतानङ्गीकारात् ब्रह्मैवाविद्याविषयकानुभवरूपा चेत् ब्रह्मणो नित्यमुक्तत्वं कथं स्यात्। अविद्यानुभवनिवृत्तिर्हि मुक्तता। ततश्च ब्रह्मणः विनाशप्रसङ्गः।

ननु भवन्मतेऽप्यज्ञानमस्त्येव । ''अज्ञानजं तमः'' ''ज्ञानेन तु तदज्ञानम्'' इत्यादिप्रमाणवचनात्। तच्चाज्ञानं सर्वज्ञेन ब्रह्मणानुभूयते। स च नित्यमुक्त इति को विशेष इति चेत् - न। अस्मन्मतेऽज्ञानं जीवगतम्। ब्रह्मणः तदिषयकानुभवोऽस्ति। स न बन्धः। पुण्यपापसंबन्धस्यैव बन्धरूपत्वादिति विशेषः।

नन्वस्मन्मते अविद्यानुभवो बन्ध इति सत्यम्। स च ब्रह्मस्वरूपमेव। तथापि ब्रह्मविषयकाज्ञानस्य जीवगतत्वात् तदाश्रयस्य जीवस्यैवायं बन्धः, न तु ब्रह्मण इति चेत्- न।अज्ञानस्य परगतत्वेऽपि ब्रह्मातिरिक्तस्य अचेतनत्वात् जडे आवरणकृत्याभावात् तस्य बन्धकत्वप्रसक्त्यभावात्।

किं च अनुभूतिस्वरूपमपि ब्रह्म स्वानुभवैकस्वरूपमिति भवद्भिरङ्गीक्रियते। तस्य स्वरूपातिरिक्ताविद्यानुभवः किं स्वतः उतान्यतः। नाद्यः, स्वानुभवैकस्वरूपत्वविरोधात्। न द्वितीयः। अविद्याब्रह्मातिरिक्तस्यान्यस्यानभ्युगमात्।

अस्मन्मते तु ब्रह्मस्वरूपं सदा स्वप्रकाशम्। तस्य धर्मभूतं ज्ञानं स्वेतरसमस्तविषयकम्। एवं मुक्तात्मानोऽपि स्वानुभवैकतानाः सर्वविषयकधर्मभूतज्ञानवन्तश्चेति न दोषः।अतो यदि भवद्भिः बाह्यविषयकोऽनुभव इष्यते तदा स्वरूपमात्रप्रकाशात् आत्मस्वरूपादतिरिक्तं तद्धर्मभूतं ज्ञानम् अङ्गीकरणीयम्। अथ वा बाह्यानुभवस्त्यक्तव्यः।

(१९) ब्रह्माश्रयाज्ञाननिरासवादः

श्रीभाष्ये तत्र तत्र ब्रह्मणोऽज्ञानाश्रयत्वं न संभवतीति यदुक्तं तत्सर्वं संकलय्यात्रोपपाद्यते।

यद्यसौ परमात्मा भवदुक्तरीत्या ज्ञानैकस्वरूपः यदि वा यथाश्रुति सर्वज्ञः उभयथापि तस्याज्ञानाश्रयत्वं न संभवति । तथाहि - न तावत् अज्ञानपदेन घटादाविव ज्ञानाश्रयत्वात्यन्ताभावो विवक्षितः। तस्य ज्ञानानाश्रये ब्रह्मणि घटादाविव यावत्स्वरूपभावितया स्वरूपे सति निवर्तयितुमशक्यत्वात् । नापि ज्ञानप्रागभावध्वंसौ । ब्रह्मणि धर्मभूतज्ञानस्यानङ्गीकारेण तत्प्रागभावध्वंसयोरसंभवात् ।प्रागभावध्वंसयोः स्वप्रतियोगिसमानाधिकरणत्वनियमात्। नापि ज्ञानान्योन्याभावः। ब्रह्मव्यतिरिक्तस्य ज्ञानस्यानङ्गीकारात् । नापि ज्ञानात्मकब्रह्मप्रतियोगिकभेदः । स्वस्मिन् स्वप्रतियोगिकभेदासंभवात् । यत एवमभावरूपमज्ञानं विवक्षानर्हम्, अतो भावरूपमज्ञानमेव ज्ञाननिवर्त्यतया विवक्षितमिति पर्यवस्यति । तच्च ज्ञातर्येव भवितुमर्हति । ज्ञानस्य स्वाश्रयगताज्ञाननिवर्तकत्वव्याप्तेः । न हि देवदत्तगतज्ञानेन यज्ञदत्तगतमज्ञानं निवर्तते ।

किं च स्वप्रकाशत्वाच्च ब्रह्मणः अज्ञानाश्रयत्वं न संभवति । ब्रह्मप्रकाशबाध्यं हि ब्रह्माज्ञानमभिमतम्। ततस्तेजसीव तिमिरं कथं तत्र तत् स्यात्। तच्चेत् स्वस्मिन् अज्ञानं सहेत कस्तस्य निवर्तकः। ब्रह्मविषयकं वृत्तिज्ञानं निवर्तकमिति चेत् - न ब्रह्मणो वृत्तिविषयत्वाङ्गीकारे घटादिवदननुभूतित्वप्रसङ्ग इति भवतैवोक्तत्वात्।

ननु भवन्मतेऽपि जीवस्वरूपं स्वप्रकाशम् । तदेव चाज्ञानाश्रयतयाभिमतमिति चेत्- सत्यम्, तथापि न विरोधः। न हि स्वप्रकाशांशप्रत्यनीकमप्रकाशं जीवस्य ब्रूमः। किं तु तस्यैव स्वप्रकाशत्वनित्यत्वादिधर्मविशिष्टविषयकमज्ञानम्। तच्च तदात्मगतेन विशिष्टज्ञानेन निवर्तते। भवतस्तु नैवम्। निर्विशेषत्वात् ब्रह्मणः।

किं च ब्रह्मणो नित्यमुक्तत्वाङ्गीकाराच्च तस्याज्ञानाश्रयत्वं न संभवति । अविद्यादिदोषरहितत्वं हि नित्यमुक्तत्वम् । किं च ब्रह्मणः सर्वज्ञत्वात् स्वात्मानं जानतः कथं स्वविषयकाज्ञानाश्रयत्वम्।

(२०) अवेद्यत्वभङ्गवादः

पूर्वस्मिन् वादे सर्वज्ञत्वश्रुत्या ब्रह्मणोऽज्ञानाश्रयत्वं न संभवतीत्युक्तम् । सर्वज्ञत्वं स्वस्वेतरसमस्तविषयकज्ञानवत्त्वम् । तेनानुभूतिस्वरूपस्य ब्रह्मणः वेद्यत्वं प्रसक्तमिति

तत्समर्थनाय अयं वादः प्रस्तूयते ।

यदाहुः – अनुभूतिः स्वयंप्रकाशा अनुभूतित्वात् । अनुभूतेः अनुभाव्यत्वे घटादिवत् अननुभूतित्वप्रसङ्गः इत्यनुमानेन अनुभूतिस्वरूपस्य ब्रह्मणः अवेद्यत्वं सिध्यति । यद्यपीदमनुमानं स्वप्रकाशत्वसाधकं नावेद्यत्वसाधकमिति कथमेतदुपन्यास इति शङ्का स्यात्, तथापि स्वप्रकाशत्वं नाम अवेद्यत्वे सति स्वगोचरज्ञाननिरपेक्षव्यवहारयोग्यत्वमिति परैः निर्वचनात् स्वप्रकाशत्वमवेद्यत्वघटितमित्याशयेनोपन्यासः इति ।

तत्रानुभूतिशब्दः अनुभूतिरूपमर्थमवगमयति न वा । आद्ये अनुभूतेः अनुभूतिपदवेद्यत्वात् सिषाधयिषितावेद्यत्वविपरीतवेद्यत्वसिद्ध्या प्रतिज्ञायाः व्याघातः । द्वितीये तेन वाक्येनानुभूतेरवेद्यत्वाबोधनात् इष्टासिद्ध्या प्रतिज्ञाव्याघातः ।

किं च स्वयंप्रकाशेत्यनेन किं स्वव्यवहारे स्वाश्रयस्य कदाचित् स्वविषयकज्ञानान्तरनैरपेक्ष्यमात्रं साध्यते उत सर्वदा सर्वस्य स्वगोचरानुभूतिविरहः । नाद्यः, सिद्धसाधनात् । वयमपि हि संविदो विषयप्रकाशनवेलायां स्वाश्रयं प्रति ज्ञानान्तरकर्मतामन्तरेण प्रकाशमङ्गीकुर्मः। नापि द्वितीयः, प्रत्यक्षविरोधात् । सर्वदा सर्वस्यानुभूतिविषयकज्ञानमेव नास्तीति वक्तुं न शक्यते, परकीयज्ञानस्य परकीयहानोपादानादिलिङ्गकानुमितिविषयत्वदर्शनात्।

किं च अन्यनिष्ठं ज्ञानं यद्यन्येन न ज्ञायते, तदा शब्दार्थसंबन्धज्ञानं न भवेत् । तथा हि – गामानयेति प्रयोजकवृद्धप्रयुक्तवाक्यश्रवणानन्तरं प्रयोज्यवृद्धस्य गवानयने प्रवृत्तिं दृष्ट्वा अयं गवानयनविषयककार्यताज्ञानवान् तद्विषयकप्रवृत्तिमत्त्वात् इति गवानयनविषयकं ज्ञानं मध्यस्थोऽनुमिनोति । तदनन्तरं तद्वाक्यं गवानयने शक्तमिति शक्तिमनुमिनोति । एवं च प्रयोज्यवृद्धगतज्ञानमनुमायैव शक्तिग्रहो भवतीति कृत्वा परकीयज्ञानस्य आनुमानिकज्ञानविषयत्वमङ्गीकरणीयम् ।

किं च यदि ब्रह्म न वेद्यं, तर्हि “ब्रह्मविदाप्नोति परम्” “वचसां वाच्यमुत्तमम्” इत्यादिभिः वेद्यत्वप्रतिपादकैः आगमैः बाधः । यदि ह्यनुभूतिरूपं ब्रह्म न वेद्यं, तर्हि तत्त्वावेदकशास्त्रस्य कः विषयः । प्रपञ्चमिथ्यात्वमात्रमिति चेत् – न । “अथातो ब्रह्मजिज्ञासा”

''आत्मा वा अरे द्रष्टव्यः'' ''ब्रह्मविदाप्नेति परम्'' ''अस्ति ब्रह्मेति चेद्वेद सन्तमेनं ततो विदुरिति'' इत्यादीनां समुद्रघोषवत् निरर्थकत्वप्रसङ्गात्। ''शास्त्रयोनित्वात्'' ''तं तु औपनिषदं पुरुषं'' इत्यादिना ब्रह्मणः प्रमाणान्तरवेद्यत्वनिषेधात् वेदान्तवेद्यत्वपरत्वमेवोदाहृतवचनानां वक्तव्यम् । तथा च वेदान्तवेद्यत्वाभावे वेदान्तानां नैरर्थक्यं स्यात् । अन्ये चावान्तरविषयाः ग्रन्थतः अवसेयाः ।

(२१) संविदनुत्पत्तिदूषणवादः

अद्वैतिनः आहुः - वृत्तिरूपाः संविदः उत्पद्यन्ते, शुद्धं तु चैतन्यमन्यदेकं नोत्पद्यत इति । तत्र तस्याः शुद्धचैतन्यरूपायाः सविदः श्रुतिसिद्धत्वे अनुत्यत्त्यनुमानप्रस्तावो वृथा । श्रुतिनिरूपणाशक्त्या अनुभूयमानानां लौकिकीनामेव संविदामनुत्पत्तिं प्रसाध्य तासां संविदां लाघवादैक्यमेवेति निरूपणे तु संविदनुत्पत्तिदूषणवादोऽयमनुमानस्य बाधितत्वादिकं प्रस्तौतीति सारांशः ।

ये तावत् सर्वसाक्षिकामपि संविदुत्पत्तिं प्रतिक्षिपन्ति, तान् प्रति ब्रूमः । भवद्भिः घटादिविषयप्रकाशात्मिकायाः अहमर्थधर्मभूतायाः संविदः उत्पत्तिर्नास्तीत्युच्यते वा, सकलविषयशून्यायाः अहमर्थधर्मत्वरहितायाः निर्धर्मकायाः निराश्रयायाः संविदः उत्पत्तिः प्रतिषिध्यते वेति विकल्पः । तत्र नाद्यः कल्पः । घटादीनामप्यनुत्पत्तिप्रसङ्गात् । तथहि - यथा भवद्भिः प्रागभावाभावात् संविदः अनुत्पत्तिः साध्यते, तथा घटस्यापि अनुत्पत्तिः साधयितुं शक्यते । घटो नोत्पद्यते प्रागभावाभावात् । प्रागभावाभावश्च प्रागभावग्राहकाभावात्। प्रागभावग्रहश्च घटकाले वा प्राग्वा । नाद्यः, तदा प्रागभावरूपविषयाभावात् । नान्त्यः, तदा घटस्याग्रहात् प्रतियोग्यग्रहे तत्प्रागभावस्य ग्रहासंभवात् । अतः प्रागभावाभावात् घटानुत्पत्तिरेव स्यादिति । नापि द्वितीयः । सकलविषयविरक्ता संवित् किमहमर्थविलक्षणा, उताहमर्थ एव। नाद्यः । अहमर्थविलक्षणायाः निर्विषयायाः संविदः अनुपलम्भनिरस्तत्वात् । ननु अन्तःकरणमेवाहमर्थः । तदतिरिक्ता संवित् मुक्तौ निर्विषया एष्टव्या । तदा कृत्स्नप्रपञ्चस्य निवृत्तत्वात् इति चेत् - न । अहमर्थातिरिक्तायां संविदि निर्विषयत्वस्य एकपञ्चाशे मुक्तसंविन्निर्विषयत्वभङ्गवादे

निरसिष्यमाणत्वात् । न च स्वापमदमूर्छासु निर्विषयसंविदुपलभ्यत इति वाच्यम् । तासु अहमर्थातिरिक्तज्ञानसामान्यनिषेधस्यैव ''न किं चिदवेदिषम्'' इति प्रतिसन्धानात् । न द्वितीयः । सत्यमस्माभिः अहमर्थभूता संवित् निर्विषया घटादिविषयकसंविद्विलक्षणा अस्तीति स्वीकृतम् । तथापि तस्य भवता संवित्त्वं नेष्टम् । अहंकारग्रन्थित्वाभ्युपगमात् । अपि च अस्माकं स्वमात्रप्रकाशरूपस्थाप्यहमर्थस्य प्रत्यक्त्वानन्दत्वादिविशेषवत्त्वात् निर्विशेषः प्रकाशो नास्ति ।

यच्चानुमानम् - अनुभूतिरनुत्पन्ना अनुभूतित्वात् इति तत् उपपादितप्रत्यक्षादिप्रमाणबाधितम् ।

(२२) संविन्निर्विकारत्वानुमानभङ्गवादः

अनुभूतिः अनुत्पन्ना अनुभूतित्वात् इत्यनुमानेन अनुभूतेः अनुत्पन्नत्वं साधयित्वा, अनुत्पन्नत्वेन हेतुना निर्विकारत्वं साधितमद्वैतिभिः । तत्र प्रथममनुमानं पूर्ववादे दूषितम् । द्वितीयानुमानमस्मिन् वादे दूष्यते ।

यदुच्यते - अनुभूतिर्निर्विकारा अनुत्पन्नत्वात् यत् उक्तसाध्यकं निर्विकारत्ववन्न भवति, तत् उक्तसाधनकम् अनुत्पन्नत्वविशिष्टं न भवति अर्थात् उत्पन्नं भवति यथा घटादिकमिति व्यतिरेक्यनुमानम् इति ।

तत्रोच्यते । अनुभूतिरूपपक्षे अनुत्पन्नत्वरूपहेत्वभावात् स्वरूपासिद्धिः । निर्विकारत्वरूपसाध्याभावात् बाधः । पूर्ववादे संविदः उत्पत्तिविनाशयोः साधनात्, ''न विज्ञातुर्विज्ञातेर्विपरिलोपो विद्यते'' ''प्रकाश्यन्ते न जन्यन्ते'' इत्यादिना नित्यत्वावगमाच्च।

किं च किमिदं निर्विकारत्वं नाम ? किम् उत्तराबधिराहित्यम् (विनाशराहित्यम्) उत घटादिवत् नामान्तरव्यपदेशार्हावस्थाविशेषराहित्यम्, किं वा अवस्थामात्रराहित्यम्। नाद्यः। अनुभूतिः उत्तरावधिरहिता अनुत्पन्नत्वादिति विवक्षायां अनुत्पन्नत्वरूपहेतुमति प्रागभावे विनाशरूपोत्तरावधिमति उत्तरावधिराहित्यरूपसाध्याभावात् व्यभिचारः । अनादित्वेन भवदभिमते भावरूपाज्ञाने चानुत्पन्नत्वरूपहेतुसत्त्वात् तत्त्वज्ञानेन निवृत्त्यङ्गीकारेण विनाशराहित्यरूप-

साध्याभावाच्च व्यभिचारः। भावत्वे सतीति विशेषणेऽपि प्रागभावे व्यभिचाराभावेऽपि भावरूपाज्ञाने व्यभिचारः।

नापि द्वितीयः। अनुभूतिःनामान्तरभजनार्हावस्थारहिता अनुत्पन्नत्वादित्यनुमानपर्यवसानात् अविद्यायां व्यभिचारः महदादिनामान्तरभजनार्ह-सकलविकाराणां भवद्भिस्तस्यां स्वीकारात् तद्राहित्यरूपसाध्याभावात् अनुत्पन्नत्वरूपहेतुसत्त्वाच्च।

अत एव न तृतीयोऽपि। अपसिद्धान्तस्त्वधिकः। मिथ्याभूतानामवस्थाविशेषाणां संविदि भवतैव स्वीकारात्।

ननु परमार्थविकारशून्यत्वं साध्यम्। परमार्थत्वविशिष्टविकारशून्यत्वमिति यावत्। विशेष्यभूतविकारवति विशिष्टाभावस्य विशेषणाभावे पर्यवसानात् मिथ्याभूतविकारवत्त्वं सिध्यतीति न दोष इति चेत् - न। अत्रापि व्यतिरेकव्याप्तिभङ्गात्। यत् परमार्थविकारवत् तदुत्पन्नं यथा घट इति हि व्यतिरेकव्याप्तिः। न हि भवता घटादौ परमार्थविकारवत्त्वमङ्गीक्रियते। तथा च घटादौ कथमीदृशव्याप्तिग्रहः संभवति।

(२३) संविन्नानात्वनिषेधकानुमानभङ्गवादः

पूर्वं अवेद्यत्वभङ्गवादे संविदः संविदन्तरवेद्यत्वमुपपादितम्। तदनुपपन्नम्। संविदो नानात्वाभावात् विषयविषयिरूपेण भेदाभावात्। न च संविदो नानात्वाभावोऽसिद्ध इति वाच्यम्। संविन्न नाना अजत्वादित्यनुमानेन तत्सिद्धेः इत्याशङ्कया एतस्य वादस्यावतारः। इष्टसिद्धिग्रन्थस्थानि अनुमानान्येतानि।

अनुभूतिः न नाना अजत्वात् यत् नाना तज्जायते यथा घटः। न चास्यानुमानस्य संविद्भेदग्राहकप्रत्यक्षविरोध इति वाच्यम्। दृश्यमानस्य संविद्भेदस्य विषयाश्रयादिभेदोपाधिकत्वेन स्वाभाविकत्वाभावात्। यथा आकाशस्य एकस्यापि घटाद्युपाधिभेदात् घटाकाशः मठाकाश इति भेदः, यथा च एकस्यैव चन्द्रस्य तरङ्गाद्युपाधिभेदात् तरङ्गचन्द्रः जलचन्द्र इति भेदः, यथा च समवायस्यैकस्यापि प्रतियोगिभेदात् रूपसमवायो रससमवाय इति भेदः, तथा एकस्यामपि संविदि विषयाश्रयभेदात् भेदः न स्वत इति।

Campus Library
P.O., Thrissur-680551
Acc.No. 39370
Acc.Date 27/02/2026

तदसारम् । उक्तानुमानेऽप्रयोजकत्वदोषे सत्येव दोषान्तरमपि साध्यविकल्पपूर्वकं प्रदर्श्यते । किमत्र (१) यतः कुतश्चिदपि भेदो निषिध्यते, (२) उत संविज्जातीयमात्रात्, (३) अथ संवित्स्वरूपात् (४) उत संविदन्तरात् (५) अथवा सजातीयराहित्यं साध्यते ।

नाद्यः अनुभूतौ घटादिभ्यो भेदस्य प्रत्यक्षसिद्धत्वात् तन्निषेधसाधने बाधात् । देहादिभ्यो भेदस्य निषेधे देहात्मविवेक एव न स्यात् । अपसिद्धान्तश्च । अस्मत्प्रत्ययगोचरायामनुभूतौ युष्मत्प्रत्ययगोचरात् भेदस्य भाष्यकारैरुक्तत्वेन तद्विरोधात् ।

न द्वितीयः । अस्माभिः संविदः संविज्जातीयत्वाभ्युपगमेन संविज्जातीयभेदनिषेधस्य सिद्धतया सिद्धसाधनात् ।

न तृतीयः । संविदि स्वस्वरूपात् भेदस्य अस्माभिरन्यैर्वा अनभ्युपगमेन तदभावस्य सिद्धत्वेन सिद्धसाधनादेव ।

न चतुर्थः । संविदन्तरं सिध्यति न वा । आद्ये संविदन्तरात् भेदोऽपि सिद्ध इति तन्निषेधे बाधः । न सिध्यति चेत् प्रतियोग्यप्रसिद्ध्या भेदोऽप्यसिद्ध इति तन्निषेधाप्रसिद्ध्या अप्रसिद्धविशेषणता साध्याप्रसिद्धिः ।

नापि सजातीयराहित्यं साध्यत इति पञ्चमः कल्पः युक्तः । संवित्त्वेन सजातीयानामाश्रयतो विषयतश्च भिन्नानामनेकासां संविदां प्रत्यक्षत उपलम्भेन संविदि स्वसजातीयराहित्यसाधने बाधात् ।

अपि चानेकाविद्यापक्षे एकस्यामविद्यायां सजातीयाविद्यान्तरसत्त्वेन तद्राहित्यरूपसाध्याभावात् अनुत्पन्नत्वरूपहेतुसत्त्वाच्च व्यभिचारः । प्रवाहाविद्यापक्षेऽपि अविद्याप्रागभावे सजातीयाविद्यान्तरप्रागभाववति सजातीयराहित्यरूपसाध्याभावात् अनुत्पन्नत्वरूपहेतुसत्त्वाच्च व्यभिचारः । अवान्तरविषयाः ग्रन्थे ।

(२४) निर्विशेषत्वानुमानभङ्गवादः

यदाहुः - अनुभूतिर्निर्विशेषा, अनुभूतित्वात्, यत् सविशेषं तत् अनुभूतित्वाभाववत् यथा घट इति व्यतिरेक्यनुमानम् । अनुभूतित्वमस्तु निर्विशेषत्वं मास्तु इति शङ्कायां

यद्यनुभूतेर्निर्विशेषत्वं न स्यात् सविशेषत्वं स्यात् तदा घटवत् अननुभूतित्वं स्यादित्यनुकूलतर्कः वक्तव्य इति ।

तत्र ब्रूमः । साध्यवाचकं निर्विशेषपदं पक्षवाचकात् अनुभूतिपदात् प्रतिपन्नो योऽर्थः तदधिकार्थबोधकं न वा ।आद्ये तेनैवानुभूतिस्वरूपादधिकेनार्थेन सविशेषतया त्वदभिमतसमस्तविशेषशून्यत्वविरोधः । द्वितीये यथा अनुभूतिः अनुभूतिरित्यत्र द्वितीयानुभूतिपदस्य पूर्वानुभूतिपदार्थाधिकार्थाबोधकतया पुनरुक्तता, तथा अनुभूतिर्निर्विशेषेत्यत्र निर्विशेषपदस्य अनुभूतिपदार्थाधिकार्थाबोधकतयापुनरुक्तता स्यात्। तथा च न्यायसूत्रम् - ''शब्दार्थयोः पुनर्वचनं पुनरुक्तम्'' (न्या .सू . ५-२-१३) इति ।

किं च अनुभूतिर्निर्विशेषा इति प्रतिज्ञा हेतुरूपं विशेषमपि पक्षे प्रतिक्षिपति अर्थात् हेत्वभावमपि साधयति न वा । आद्ये - पक्षे हेत्वभावात् साध्यमपि न सिध्येत् । साध्यसिद्धेः हेत्वधीनत्वात् । अपि च प्रतिज्ञाहेतुविरोधश्च । प्रतिज्ञाया हेतुप्रतिक्षेपकत्वे प्रतिज्ञाया हेतुवचनं विरुद्धमिति यावत् । द्वितीये - इयं प्रतिज्ञा पक्षे हेतुरूपं विशेषं न प्रतिक्षिपति चेत् पक्षे हेतुरूपविशेषवत्त्वमायातमिति न निर्विशेषत्वसिद्धिः । ततश्च पक्षे हेतुसत्त्वे निर्विशेषत्वासिद्धिः। निर्विशेषत्वसिद्धौ च हेतुरूपविशेषासिद्धिरिति प्रतिज्ञाहेतुवचनयोः परस्परव्याघातः । अतो न कथंचिदपि सर्वविशेषशून्यत्वं प्रतिज्ञातुं शक्यते ।

किं चोक्तानुमाने घटादिर्व्यतिरेकदृष्टान्तः ।यत्र साध्यं व्यावर्तते तत्र हेतुरपि व्यावर्तत इति हि व्यतिरेकव्याप्तिः । प्रकृते यत्र निर्विशेषत्वं व्यावर्तते तत्रानुभूतित्वमपि व्यावर्तते यथा घट इति व्यतिरेकव्याप्तिः प्रदर्शनीया । तत्र घटे परमार्थतः सविशेषत्वस्य भवद्भिरनभ्युपगमात् निर्विशेषत्वमेवास्ति न तु तदभाव इति घटे साध्यव्यावृत्त्यभावात् कथं तत्र हेत्त्वभावो गृहीतुं शक्यते ।यद्वा भवद्भिः परमार्थस्य विशेषस्य घटादावनङ्गीकारात् । निर्विशेषत्वरूपसाध्यसत्वेन सपक्षतया तद्व्यावृत्तत्वेन हेतोरनुभूतित्वस्य असाधारणहेत्वाभासता ये च धर्मपक्षीकारेण प्रयोगाः– भेदादयो नानुभूतिधर्माः दृश्यत्वात् धर्मत्वात् रूपादिवत् इत्यादयः, तत्र स्वाभ्युपगतनित्यत्वादीनामपि पक्षीकारेऽपसिध्दान्तः । तद्बहिष्कारे तेष्वेव व्यभिचारः। साध्याभावात् हेत्वसत्त्वाच्च ।

प्रत्यनुमानानि च भवन्ति-अनुभूति: सविशेषा भासमानत्वात् घटादिवत्; नित्यत्वादयोऽनुभूतिधर्मा: अभ्युपगतानुभूतिस्वरूपं बौद्धं प्रति तद्धर्मतया प्रमाणत: साध्यमानत्वात् यत्र यत् प्रमाणत: साध्यते स तद्धर्म: यथा संप्रतिपन्नघटत्वादिकम् इत्यादीनि।

(२५) सविदात्मत्वभङ्गवाद:

''उभयाभ्युपेता संविदेवात्मेत्युपलब्धिपराहतम्'' ''यच्चोक्तमजडत्वात् संविदेवात्मेति'' इत्यादिभाष्यस्य व्याख्यानमत्र वादे क्रियते।

यदुच्यते - संविदात्मा अजडत्वात् यत् उक्तसाध्यं न भवति तत् उक्तसाधनमपि न भवति यथा घट इति तदसत्।

तत्र हेतुभूतमजडत्वं (१) स्वस्मै भासमानत्वं वा (२) अव्यभिचरितप्रकाशसत्ताकत्वं वा (३) सजातीयनिरपेक्षप्रकाशत्वं वा (४) आत्मनिरपेक्षत्वं वा (५) संविदन्तरनिरपेक्षत्वं वा (६) ज्ञानत्वमेव वेति षोढा विकल्प:।

नाद्य:। स्वकर्तृकव्यवहारप्रयोजकभानवत्त्वरूपस्य स्वस्मै भासमानत्वस्य संविद्यसिद्धे:।

न द्वितीय: ।प्रकाशव्याप्तसत्ताकत्वरूपस्य तस्य अनात्मसु सुखादिष्वपि सत्त्वेन व्यभिचारात्।

न तृतीय:। सजातीयनिरपेक्षप्रकाशत्वमजडत्वम् इत्युक्तौ अनात्मसु दीपादिषु व्यभिचारात् ।सजातीयसापेक्षप्रकाशाभावोऽजडत्वमित्युक्तौ घटादिषु व्यभिचारात्। नापि चतुर्थ: ।असिद्धे: ।न पञ्चम:। संविदन्तरनिरपेक्षप्रकाशत्वान्तर्गगत: प्रकाश: किं स्वस्मै उत परस्मै इति विकल्पे आद्यकल्पे संविदन्तरनिरपेक्षस्वकर्तृकव्यवहारहेतुप्रकाशवत्त्वमजडत्वमिति पर्यवस्यति ।तत्तु सिद्धान्ते संविद्यसिद्धम्। संविदन्तरनिरपेक्षस्य संवित्प्रकाशस्य संविदतिरिक्तात्मकर्तृकव्यवहारप्रयोजकत्वेन स्वकर्तृकव्यवहारहेतुत्वाभावात्। द्वितीये संविदन्तरनिरपेक्षो य: परकर्तृकव्यवहारहेतु: प्रकाश: तद्वत्त्वमजडत्वमित्युक्तं भवति। तदानीं हेतो: साध्यविरुद्धता।

उक्तहेतोः अनात्मत्वरूपसाध्याभावव्याप्तत्वात्। अतो ज्ञानत्वमिति षष्ठः पक्षः परिशिष्यते। ज्ञानत्वं च प्रकाशरूपत्वम्। तच्च स्वस्मै परस्मै वेति विकल्पे आद्ये असिद्धिः, द्वितीये विरुध्दतेति पञ्चमपक्षरीत्या दूषितम्।

एतावता हेतुः विकल्प्य दूषितः। अथ साध्यं विकल्प्य दूष्यते। संविदि साध्यमानमात्मत्वं ज्ञातृत्वरूपं न भवति। प्रत्यक्षविरुद्धत्वात्।घटादिज्ञानं न ज्ञातृ इति प्रत्यक्षम्। नापि ज्ञातृत्वे सति ज्ञेयत्वम् ।पूर्वोक्तदोषादेव । घटादिज्ञाने ज्ञातृत्वविरहात् । अपि च भवद्भिः संविदः अवेद्यत्वाभ्युगमात् ज्ञातृत्वे सति ज्ञेयत्वसाधनेऽपसिद्धान्तः । नापि स्वस्मै भासमानत्वम् । प्रत्यक्षविरोधात्। ज्ञानं हि स्वाश्रयाय भासमानं दृश्यते न तु स्वस्मै भासमानम् । नापि अव्यभिचरितप्रकाशसत्ताकत्वम् । सिद्धसाधनात् । संविद्रूप आत्मा यदा यदा वर्तते तदा तदा प्रकाशत एवेति । सुखादीनामप्यात्मत्वप्रसङ्गाच्च । नापि स्वप्रकाशत्वं स्वानतिरिक्तत्वं चात्मत्वम्। संविदि तयोरुभयोरस्माभिरपि स्वीकारेण सिद्धसाधनात्। एवम् आत्मानं पक्षीकृत्य आत्मत्वादेव ज्ञानतादात्म्यसाधनमपि दूषणीयम्।

अपि च आत्मनः ज्ञातृत्वानङ्गीकारे ज्ञानमात्ररूपत्वे तस्य श्रोता दुर्लभः। ज्ञाता हि श्रोता। न हि उपदेशेन यः ज्ञानं न प्राप्नोति तस्मै उपदिश्यत इति भवतापीष्यते। आत्मा तु संविन्मात्रस्वरूपो न श्रोतुं शक्नोति। न चाहमर्थभूतमन्तः करणं शृणोतीति वाच्यम्। अन्तः करणं किं स्वार्थं शृणोति उत परार्थम्। नाद्यः, स्वनाशपर्यन्तत्वात् श्रवणस्य। मोक्षार्थं हि शृणोति। अहमर्थविनाशगर्भो हि भवन्मते मोक्षः। न हि स्वनाशाय कश्चित् मोक्षशास्त्रं शृणुयात्। स्वनाशस्यापुरुषार्थत्वात्। न द्वितीयः। स्वनाशेन परोपकारस्य केनाप्यभिमतत्वाभावात्। अस्मन्मते तु अन्तःकरणातिरिक्तस्य आत्मन एवाहमर्थत्वात् तस्य च स्थिरत्वात् मोक्षकालेऽपि सद्भावात् न स्वनाशप्रयुक्ता अपुरुषार्थतेति।

(२६) अहमर्थात्मत्वसमर्थनवादः

''नन्वहं जानामीत्यस्मत्प्रत्यये'' इत्यादिभाष्यग्रन्थविवरणाय अहमर्थविषये परोक्तं निरसितुमयं वादः प्रवर्तते। तत्राहंशब्दार्थोऽन्यः अहंकारशब्दार्थोऽन्य इति मनसि भाव्यम्।

अहंशब्दार्थः आत्मा। नाहंकाराख्यं तत्त्वमन्तः करणं वा। तत्राद्वैतिनः- अहमिति प्रतीयमानोऽर्थः नात्मा । सुषुप्तिमोक्षयोरननुवर्तमानत्वात् । आत्मा हि नित्यः । स यदि अहमर्थः स्यात् सुषुप्तिमोक्षयोरहमर्थस्य नाशात् आत्मनोऽपि नाशः स्यात्। अपि च संसारदशायामहमर्थस्य-अज्ञानव्याप्तत्वात् तस्यात्मत्वे मोक्षेऽप्यज्ञत्वं प्रसज्येत । तथा सुषुप्तावहमर्थस्यान्वये तदा तस्य प्रकाशः स्यात्। तत्र अनिदमि इदंपदार्थभिन्ने चैतन्ये तादात्म्येनाहमिति भ्रमः निरुपाधिकः। अहंकारनिष्ठस्य कर्तृत्वादेः चैतन्ये आत्मनि भ्रमस्तु जपाकुसुमलौहित्यस्य स्फटिक इव उपाध्यधीनः - इति ब्रुवन्ति।

तत्र ब्रूमः । तत्रादौ सुषुप्तावनुवृत्तौ तदानीमहमर्थस्य प्रकाशप्रसङ्ग इति चेत् - न । विद्यमानस्य प्रकाशोऽवश्यम्भावीति नियमाभावात्। तदानीं प्रकाशाभावेऽपि पूर्वोत्तरकालवर्तिनः अहमर्थस्य जाग्रत्कालीनप्रतिसन्धानबलादेव मध्यकालेऽपि तत्सत्त्वनिश्चयात् । वस्तुतस्तु सुषुप्तिकालेऽपि अहमर्थप्रकाशोऽस्तीति सिद्धान्तः । किं च मध्यकालेऽहमर्थाभावे संस्काराधारस्याभावात् जाग्रत्काले पूर्वानुभूतस्मरणं न स्यात् । अहमेव पूर्वं सुप्तः, तथाप्यहमर्थस्तदानीं नास्तीति स्ववचनविरोधश्च।

मुक्तावाप्यहमर्थानुवृत्तिः- ''ब्रह्मात्मभावापरोक्ष्यनिर्धूतनिःशेषाविद्यानामपि वामदेवादीनामहमित्येवात्मानुभवदर्शनाच्च। श्रूयते हि ''तद्धैतत् पश्यन् ऋषिर्वामदेवः प्रेतिपेदे अहं मनुरभवं सूर्यश्चेति'' ''अहमेकः प्रथममासं वर्तामि भविष्यामि च'' इत्यादिना भाष्ये-स्थापिता।

ननु संसारदशायामहमर्थस्याज्ञानव्याप्तेः मोक्षेऽप्यहर्थस्यानुवृत्तौ तस्याज्ञानाश्रयत्वप्रसपङ्ग इति चेत् - न। संविदात्मत्वपक्षेऽपि चोद्यस्य तुल्यत्वात्। संसारदशायां संविदोऽप्यज्ञानव्याप्तेः मोक्षे संविदनुवृत्तावप्यज्ञत्वप्रसङ्गात्।

ननु यथावस्थितसंवित्स्वरूपप्रकाशः नाज्ञत्वहेतुः । किं तु तद्विरुद्धस्वरूपप्रकाश एव तद्धेतुः । संसारदशायां यथावस्स्थितस्वरूपविरुद्धतया संवित्प्रकाशात् अज्ञत्वम् । मोक्षे तु यथावस्थितसंवित्स्वरूपप्रकाशान्नाज्ञत्वप्रसङ्ग इति चेत् - तुल्यमिदमहमर्थेऽपि,

अयथावस्थिताहमर्थप्रकाश एवाज्ञत्वहेतुः, न यथावस्स्थिताहमर्थप्रकाशः । अतो मोक्षे यथावस्स्थिताहमर्थप्रकाशात् नाज्ञत्वप्रसङ्ग इति ।

किं च यदि मोक्षेऽहमर्थो नानुवर्तते तर्हि मोक्षशास्त्रस्य अधिकार्यभावप्रसङ्गः । यस्तावत् अहं निरस्ताखिलदुःखः अपरिमितानन्दभाक् स्वतन्त्रः अकर्मवश्यश्च भवेयमिति मन्यते स एव हि मोक्षशास्त्रश्रवणादौ प्रवर्तते । मुक्तौ तु अहमर्थस्य स्वस्य नाशं विदुषः तदुद्देशेन प्रवृत्त्ययोगात् मोक्षशास्त्रस्याधिकारिविरहेणाप्रामाण्यं स्यात् ।

किं च यदि अहमर्थो नात्मा तदा कथमनात्मनि देहे अहमिति बुद्धिः देहात्मभ्रम इति व्यवह्रियते शास्त्रकारैः । त्वत्पक्षरीत्या देहाहंकारभ्रम इति हि वक्तव्यम् ।

किं च अहमर्थस्यानात्मत्वे आत्मनः प्रत्यक्त्वं न स्यात् । आत्मनः अहमिति बुद्धिविषयत्वेन हेतनैव परागर्थात् विविच्यमानत्वात् ।

(२७) ज्ञातृत्वाध्यासभङ्गवादः

आत्मस्वरूपविचारप्रसङ्गेन विचारान्तरं प्रस्तूयते । ''अहं जानामीति ज्ञातृता अध्यस्ता'' ''ज्ञातृत्वमप्यध्यस्तम्'' इत्यादिपूर्वपक्ष्युक्तिनिरासकभाष्यविवरणपरोऽयं बादः।

यदाहुः - अहं जानामीति आत्मनः ज्ञातृत्वप्रकाशः भ्रमः । देहात्माभिमानवत एव जायमानप्रकाशत्वात् । यथा स्थूलोऽहं कृशोऽहम् इत्यादिप्रतीतिः देहात्माभिमानवत एव जायमानत्वात् भ्रमः, तथा अहं जानामीति प्रतीतिरपि देहात्माभिमानवत एव जायमानत्वात् भ्रम इति ।

तदसत् । पक्षैकदेशे हेत्वभावेन भागासिद्धेः । तथाहि-ईश्वरस्य योगिनां मुक्तानां च अहं जानामीति ज्ञातृत्वप्रकाशोऽस्ति । तत्र हेतुर्नास्ति । तेषां देहात्माभिमानाभावात् । न च तेषां ज्ञातृत्वप्रकाशो नास्तीति वक्तुं शक्यते । ''सेयं देवतैक्षत हन्ताहमिमास्तिस्त्रो देवता अनेन जीवेनात्मनानुप्रविश्य नामरूपे व्याकरवाणि'' इति श्रुत्या ईश्वरस्य संकल्परूपज्ञानाश्रयत्वप्रतिपादनात् । न केवलमियं श्रुतिः ईश्वरस्य ज्ञातृत्वं प्रतिपादयति । अपि तु ईश्वरस्य

विद्यमानं ज्ञातृत्वप्रकाशमनुवदति। एवं योगिनां'' तद्धैतत्पश्यन् ऋषिर्वामदेवः प्रतिपेदे'' इति श्रुतिः, मुक्तानां ''सर्वं ह पश्यः पश्यति''इति श्रुतिश्च ज्ञातृत्वप्रकाशं प्रतिपादयति। किं च ज्ञातृत्वं न वास्तवम् अपि तु अध्यस्तमिति वदद्भिः ज्ञातृत्वाध्यासः निरधिष्ठान इत्युच्यते वा साधिष्ठान इत्युच्यते वा। नाद्यः अपसिद्धान्तात्। अध्यासः साधिष्ठान इति भवद्भिः स्वीकारात्। न द्वितीयः। ज्ञातृत्वाध्यासस्य अधिष्ठानं किं संवित् उतान्यत्। आद्ये अध्यस्ताधिष्ठानयोः समानाधिकरणतया प्रतीतिः इदं रजतमित्यादौ दृश्यत इति ज्ञानं ज्ञातृत्वमिति प्रतीतिप्रसङ्गः। न द्वितीयः, अधिष्ठानान्तरस्य भवद्भिरनभ्युपगमात्।

ननु अध्यस्तस्य अधिष्ठानसमानाधिकरणतया प्रतीतिरिति नास्स्ति नियमः। दर्पणादिषु मुखाध्यासे दर्पणो मुखमिति प्रतीत्यभावात्; प्रत्युत दर्पणे मुखमिति व्यधिकरणतयैव प्रतितेरिति चेत् - न। दर्पणेऽपि मुखाधारत्वमेवाध्यस्यते न तु मुखम्। मुखाधारदर्पणयोश्च सामानाधिकरण्यमस्त्येव दर्पणो मुखदेश इत्याकारकम्।

ननु यथा जपाकुसुमसमीपस्थे स्फटिकमणौ जपाकुसुमगतरक्ततायाः छायापत्त्या ''स्फटिकमणी रक्तः'' इति प्रतीतिः, यथा चाग्नितप्तेऽयःपिण्डे अग्निसंयोगवशात् अग्निगतस्योष्णत्वस्य प्रतीतिः, तथा अहंकारच्छायापत्त्या वा अहंकारसंसर्गाद्वा संविदि ज्ञातृत्वस्य प्रतीतिः। छायापत्तिः प्रतिबिम्बः अध्यासो वा - इति चेत् - मैवम्। जपाकुसुमे वास्तवस्य रक्तत्वस्य अग्नौ वास्तवस्योष्णत्वस्य च सत्त्वेन तच्छायापत्त्या तत्सर्गेण च स्फटिकमणे रक्तत्वगुणकतया अयःपिण्डस्य उष्णस्पर्शगुणकतया च प्रतीतिरुपपद्यते। दार्ष्टान्तिके तु संविदि वा अहंकारे वा वास्तवस्य ज्ञातृत्वस्याभावेन छायापत्त्या संसर्गेण वा ज्ञातृत्वप्रतीतिर्न संभवति। ननु चूर्णे हरिद्रायां चाविद्यमानमपि रक्तत्वं यथा द्वयोः संसर्गवशात् भवति, तथा अहमर्थान्तः करणे संविदि चाबिद्यमानमपि ज्ञातृत्वमुभयोः संसर्गवशात् भवतीति चेत् - तथा सति चूर्णाहरिद्रयोः संसर्गात् जायमानं रक्तत्वं यथा वास्तवम्, तथा अन्तः करणसंविदोः संसर्गाज्जायमानं ज्ञातृत्वमपि वास्तवं भवेत्। अधिकविचारो ग्रन्थे दृश्यताम्।

(२८) साक्षित्वभङ्गवाद:

आत्मन: स्वाभाविकं ज्ञातृत्वं साधितम् । तथा साक्षित्वाच्च ज्ञातृत्वं समर्थ्यतेऽस्मिन् वादे ।

यत् पुनराहु: – संसारो यावत्पर्यन्तमस्ति तावत्पर्यन्तम् अज्ञानसाक्षित्वेन ब्रह्मावतिष्ठते। तत्र प्रमाणं तु ''साक्षी चेता केवलो निर्गुणश्च'' इति श्रुति: । न च आत्मप्रकाशरूपं यत् प्रत्यक्षं यच्च इन्द्रियजन्यं घटादिविषयकं प्रत्यक्षं तदतिरिक्तमज्ञानादे: प्रकाशकं साक्षिप्रत्यक्षं नाम किं चिन्नेपलभ्यत इति वाच्यम् । ''सुखमहमस्वाप्सम्'' ''एतावन्तं कालं न किं चिदहमज्ञासिषम्'' इति सुखाज्ञानयो: साक्षित्वेन सुतोत्थितस्य स्वात्मपरामर्शात् । अयं परामर्श: स्वापकाले साक्षिणा सुखाज्ञानयो: प्रकाशादेव उपपद्यते नान्यथेति ।

तत्रोच्यते । सुखमहमस्वाप्समित्यत्र सुखशब्देन किम् आत्मस्वरूपभूतं सुखमुच्यते उत वैषयिकं सुखम् । नाद्य: । स्वरूपसुखप्रकाशस्य आत्मप्रकाशान्तर्गतत्वात् साक्षिप्रकाशान्तर्गतत्वाभावात् । आत्मस्वरूपप्रकाश एव सुखप्रकाश: । अथवा स्वरूपभूतसुखस्य स्वयंप्रकाशत्वात् न तत्प्रकाश: साक्ष्यधीन: । नापि द्वितीय: । वैषयिकसुखप्रकाशस्य सुषुप्तिकालेऽभावात् । कुत: ? कारणाभावात् ।

तथा अज्ञानस्यापि सुषुप्तौ साक्षिभास्यत्वं नास्ति । अज्ञानं हि ज्ञानाभाव: । स च स्मरणाभावेनानुमीयते । यदि सुषुप्तिकाले किं चिद्विषयकं ज्ञानमभविष्यत् तदा जाग्रता पुरुषेण स विषय: स्मर्येत । यतो न स्मर्यते ततो न ज्ञानमासीदिति सुषुप्तिकालिकं ज्ञानाभावरूपमज्ञानमनुमानगम्यम् । तत्कालादिवत् । सुषुप्तिकालोऽपि जाग्रत्कालीने परामर्शे विषय: । अस्वाप्समिति लुङा तत्कालस्योल्लेखात् एतावन्तं कालमित्युल्लेखाच्च । न च काल: साक्षिभास्य इति भवताप्यङ्गीक्रियते । कालस्य साक्षिग्राह्यत्वे कालोपाधेरपि ग्रहीतव्यतया सुषुप्तेर्जागरतुल्यता भवेत् ।

किं च ब्रह्मण: सिषाधयिषितं साक्षित्वं किं रूपमिति भवता निरूपणीयम् । (१) किं साक्षात्कर्तृत्वं(२)उत साक्षात्कारत्वम् (३)उतविद्याप्रकाशं प्रति हेतुत्वम् ।

तत्र न प्रथमः। ब्रह्मणो भवद्भिः ज्ञातृत्वानङ्गीकारात् ज्ञातृत्वविशेषरूपद्रष्टृत्वासंभवात् व्यापकधर्मं विना व्याप्यधर्मायोगात्। लोकेऽपि परमार्थद्रष्टारमेव साक्षीति व्यपदिशन्ति। द्रष्टृत्वे सति यत्कार्यानन्वयी यः स तत्र साक्षीति व्यपदिश्यते, न तु कलहायमानयोरेकतरपक्षनिविष्टः।न द्वितीयः। ''साक्षाद्द्रष्टरि संज्ञायाम्'' इत्यनुशासनविरोधात्।तदुक्तं भाष्ये-साक्षित्वं च साक्षात् ज्ञातृत्वमेव।न ह्यज्ञातुः साक्षित्वं। ज्ञातैव हि लोकवेदयोः साक्षीत्युच्यते न ज्ञानमात्रम्'' इति।

नापि तृतीयः। अविद्याप्रकाशस्यानादितया तत्र हेत्वनपेक्षणात्।किं चाविद्याप्रकाशस्य ब्रह्मस्वरूपान्तर्भावे ब्रह्मस्वरूपस्य मिथ्याभूताविद्यागोचरत्वेन मिथ्यात्वप्रसङ्गः। अनन्तर्भावे तस्य सत्यत्वे अद्वैतभङ्गः। मिथ्यात्वे तस्याविद्यारूपविषयस्वरूपत्वे घटादीनां स्वरूपस्यापि साक्षित्वप्रसङ्गेन सर्वदा घटादेः प्रकाशप्रसङ्गः इत्यादयो दोषाः।

अतो न कथंचिदपि निर्विशेषज्ञानमात्रस्य साक्षित्वं संभवतीति ''साक्षी चेता'' इति साक्षित्वोपदेशसामर्थ्यादेव ज्ञातृत्वादिकमात्मनोऽवश्याङ्गीकरणीयमिति सिद्धम्।

(२९) शास्त्रविरोधपरिहारवादः

प्रत्यक्षादिभिः आत्मनः सविशेषत्वमुक्तम्।तदसंगतम्। निर्विशेषत्वबोधकेन शास्त्रेण अधिकबलेन प्रत्यक्षस्य बाधात् इति आक्षेपं निराकर्तुमयं वादः प्रवर्तते।

यदाहुः-शास्त्रप्रत्यक्षयोर्विरोधे शास्त्रं बलीयः। अन्यथा अद्वैतशास्त्रस्य- प्रामाण्यमुच्छिद्येत। द्वैतप्रत्यक्षस्य द्वैतशास्त्रस्य वा प्रतियोगिसमर्पकतया कथंचित् प्रामाण्यं संभवति। अपि च प्रत्यक्षत्वेन प्रत्यक्षस्य प्राबल्ये स्थूलोऽहम् कृशोंऽहमित्यादिदेहात्मैक्य प्रत्यक्षवशात् देहातिरिक्तात्मासिद्धौ शास्त्रस्य सर्वस्याप्रामाण्यं प्रसज्येत। दोहतिरिक्तात्मानमधिकृत्यैव शास्त्रप्रवृत्तेः। न चात्र विरोध एव न संभवतीति वाच्यम्। भेदप्रपञ्चविषयकत्वतन्निषेधाभ्यां प्रत्यक्षशास्त्रयोर्विरुद्धविषयकत्वोपलम्भात्।

किं च ''त्रय आवसथा: त्रय: स्वप्ना:'' इति जाग्रत्स्वप्नसुषुप्तिरूपावस्थात्रयोद्देशेन स्वप्नकल्पत्वकथनात् स्वप्नस्येव जाग्रत्सुषुप्त्योरपि मिथ्यात्वमवगम्यते ।

किं च द्वयोर्विरोधेऽन्यतरबाध: आवश्यक: । बाधश्च बलवता दुर्बलस्यैव । प्रकृते प्रत्यक्षस्य प्राबल्ये तेन श्रुतेर्बाध: । श्रुते: प्राबल्ये तया प्रत्यक्षस्य बाध इति वक्तव्यम् । तत्र प्राबल्यदौर्बल्ययो: नियामके के इति चिन्तनीयम् । न च प्रत्यक्षस्य प्रत्यक्षत्वात् प्राबल्यम्, श्रुते: परोक्षत्वात् दौर्बल्यमिति वाच्यम्। उभयो: प्रत्यक्षत्वेऽन्यतरेणान्यतरस्य बाधासंभवापत्ते:। दृश्यते हि शुक्तिप्रत्यक्षेण शुक्तिरजतभ्रमात्मकप्रत्यक्षस्य बाध: । न तस्य भ्रमस्य दौर्बल्यप्रयोजकं परोक्षत्वमस्ति ।एवं सेयं दीपज्वालेति प्रत्यक्षात्मकप्रत्यभिज्ञाया: ज्वालभेदानुमानेन बाध्यत्वं दृश्यते । न हि तत्र प्रत्यभिज्ञाया: बाध्यत्वप्रयोजकं परोक्षत्वमस्ति, ज्वालभेदानुमानस्य वा बाधकत्वप्रयोजकं प्रत्यक्षत्वमस्ति । न च उपजीव्योपजीवकभावात् प्रत्यक्षशास्त्रयो: प्राबल्यदौर्बल्ये । व्याप्तिग्राहकप्रत्यक्षोपजीविना अनुमानेन ज्वालैक्यप्रत्यक्षबाधस्योक्तत्बात् । न च पूर्वत्वात् उपक्रमस्येव प्रत्यक्षस्य प्राबल्यम्। अपच्छेदस्थले परस्यैव प्राबल्यनिश्चयेन पूर्वत्वमात्रस्य प्राबल्याप्रयोजकत्वात् ।

तस्माद्द्वयो: ज्ञानयो: विरोधे सावकाशत्वात् अन्यथासिद्धं बाध्यम्, अनवकाशत्वात् अनन्यथासिद्धं बाधकम् ।प्रतीयमानेऽर्थे प्रमाण्यं विनापि संभावितोदयत्वम् अन्यथासिद्धत्वम्। तत्र हेतु: सावकाशत्वम्। अवकाशश्चाविरुद्धविषयलाभ:अप्रमाणकोटिनिवेशो वा। अप्रमाण्यशङ्कास्कन्दितत्वमिति यावत् । तत्र अविरुद्धविषयलाभाप्रमाणकोटिनिवेशयोर्मध्ये इह शास्त्रजन्यज्ञाने पूर्वस्य अविरुद्धविषयलाभस्यासंभवो दर्शित:, भेदप्रपञ्चविषयकत्वतन्निषेधाभ्यां शास्त्रप्रत्यक्षयोर्विरुद्धविषयकत्वादिति।उत्तरस्तु अप्रमाणकोटिनिवेशस्तु कारणदोषात् भवेत् । न च शास्त्रजन्यज्ञानस्य दुष्टकारणजन्यत्वमस्ति। प्रमातृदोषस्य वा प्रमाणदोषस्य वा प्रमेयदोषस्य वा अभावात् । अत: शास्त्रजन्यज्ञानस्य प्राबल्यं प्रतिष्ठितमिति प्रबलेन तेन संभावितदोषस्य प्रत्यक्षस्य बाध: दोषश्च भेदवासनेति ।

सिद्धान्त:

यदुक्तं शास्त्रस्य प्रत्यक्षात् बलीयस्त्वाभावे अद्वैतशास्त्रप्रमाण्योच्छेद इति । तन्न । प्रत्यक्षाविरोधिनि विशिष्टाद्वैते द्वैते वा अद्वैतशास्त्रप्रमाण्यस्य निर्वहणीयत्वात् ।

यत् पुनः त्रयः आवसथाः त्रयः स्वप्नाः इति जागरसुषुप्त्योरपि स्वप्नसाम्यमुच्यत इति । तन्न । स्वप्नसाम्ये विवक्षितेऽपि मिथ्यात्वाकारेण न साम्यम् । ''स हि कर्ता'' इति श्रुत्या स्वप्नस्य ईश्वरसृष्टत्वमवगम्यते । तेन स्वप्नानुभवे जीवस्य न स्वातन्त्र्यम् । तद्वत् जाग्रत्सुषुप्त्योरपि कर्मफलरूपतया ईश्वरसंकल्पिततत्वेन न तत्र जीवस्य स्वातन्त्र्यमित्यनेनाकारेण साम्यम्, न मिथ्यात्वेन ।

बाध्यबाधकभावशिक्षणं तु समीचीनमेव । परं तु प्रत्यक्षस्य भेदवासनाख्यदोषमूलकत्वात् दौर्बल्यम्, शास्त्रस्य तु दोषमूलकत्वाभावात् प्राबल्यमिति यदुक्तं तत्तु न युक्तम् । भवन्मतरीत्या उभयोरपि अविद्याख्यदोषमूलकत्वाविशेषादिति ।

अतः प्रत्यक्षादिसिद्धाबाधेनैव भेदनिषेधकश्रुतीनां तात्पर्यमुपपादनीयमिति सिद्धम् ।

(३०) असत्यात् सत्यसिद्धिभङ्गवादः

आरम्भणाधिकरणशांकरभाष्यब्रह्मसिद्ध्यादिग्रन्थोक्तामसत्यात् सत्यसिद्धिं तत्तदुदाहरणदूषणेन निरस्यन्तं ''न च वाच्यं स्वाप्नस्य हस्त्यादिविज्ञानस्य'' इत्यादिश्रीभाष्यसंदर्भं विवरीतुमयं वादः अवतरति ।

अत्राहुः – असत्यादपि शास्त्रादेः सत्यस्य ब्रह्मणः सिद्धिः संभवति । अस्ति चासत्यात् सत्योत्पत्तेः सत्यप्रतीतेश्च लोके बहुलमुपलम्भः । आरोपितैरेव शुक्तिरजतरज्जुसर्प- शङ्काविष – भावितगरुडादिभिः सत्यस्य हर्ष-भय-मरण-गरलहरणादेर्दर्शनात् । तथा स्वाप्नार्थेन शुभादिः प्रतिबिम्बेन बिम्बतत्त्वं लिप्यक्षरैरक्षराणि रेखागवयादिभिः सत्यगवयादिः चित्रपुरुषादिभिः पुराणवृत्तान्तादिः नादविशेषोपाधिकशब्दनानात्वेनार्थभेदश्चेति असत्यैरेव सत्यानि निश्चीयन्ते । तथा वाष्पारोपितधूमादिभिः यदृच्छासंनिहितवह्निज्ञप्तिः ।

न चात्र सर्वत्र तत्तद्विषयकज्ञानमेव सत्यं कारणमिति वाच्यम् । ज्ञानस्वरूपमात्रस्य कारणत्वे ज्ञानान्तरादपि गवयादिज्ञानप्रसङ्गः । विषयविशेषविशिष्टज्ञानस्य हेतुत्वे विषयस्यापि

कारणत्वावश्यभावात् । अतो वस्तुतो मिथ्याभूतादपि शास्त्रात् परमार्थसदद्वितीयब्रह्मनिश्चय उपपद्यत इति ।

तत्रोच्यते । उक्तोदाहरणेषु सर्वेष्वपि असत्यतत्तद्विषयकज्ञानैः सत्यैरेव तत्तस्सिद्धेः। यत्तत्रोक्तं ज्ञानमात्रस्य कारणत्वे ज्ञानान्तरादपि तत्सिद्धिप्रसङ्ग इति । तदपि मन्दम्। ज्ञानस्वरूपाणां परस्परविचित्रशक्तिकत्वात् ज्ञानान्तरे तादृशशक्त्यभावात् ।न च ज्ञानस्वरूपाणां विषयवैचित्र्यातिरिक्तं वैचित्र्यंदुर्वचमिति वाच्यम् ।किं ज्ञानानां विचित्राणामुत्पादकं किमिति प्रश्नः उत ज्ञापकं किमिति प्रश्नः । आद्ये तत्तज्ज्ञानजनकसामग्रीवैचित्र्यमेव विचित्राणां ज्ञानानामुत्पत्तौ प्रयोजकमित्युत्तरम् । न च सामग्रीवैचित्र्यमपि विषयविशेषादेवेति वाच्यम्। ज्ञानसामग्रीवैचित्र्यं ज्ञानसामग्र्याः या सामग्री तद्वैचित्र्यात् न विषयविशेषात् । एकविषयकत्वेऽपि इन्द्रियलिङ्गादिसामग्रीविशेषात् प्रत्यक्षत्वपरोक्षत्वस्मृतित्वादिवैचित्र्यस्य दर्शनात् । द्वितीयेऽपि ज्ञानानां किं ज्ञापकमिति प्रश्नस्य इदमुत्तरम् - प्राभाकरमते स्वयंप्रकाशं ज्ञानमेव स्वज्ञापकम्। नैयायिकमतेऽनुव्यवसायो ज्ञापकः । भाट्टमते ज्ञाततालिङ्गकानुमितिः ज्ञापिकेति ।

किं च रज्जुसर्पव्याघ्रादिभ्रमात् यत्र भयादिरूपकार्योत्पत्तिः तत्र भयादिरूपकार्यस्य सत्यत्वात् भ्रमस्य च सत्यत्वात् सत्यादेव सत्योत्पत्तिः।

यद्यपि रज्जुसर्पादिविषयविशेषितज्ञानस्यैव भयहेतुत्वं, तथापि न विषयस्य तद्धेतुत्वम्। विषयस्योपलक्षणत्वाङ्गीकारात् । उपलक्षितस्य कारणतास्थले उपलक्षणस्य कारणत्वाभावात्। यथा शाखोपलक्षितस्य चन्द्रस्य प्रकाशहेतुत्वे उपलक्षणभूतशाखायाः प्रकाशहेतुत्वाभावात्।

एतदुपर्यपि आक्षेपसमाधानपरंपरा ग्रन्थतो ज्ञेया । अतः सत्यादेव शास्त्रात् सत्यस्य ब्रह्मणः सिद्धिरिति स्थितम् ।

(३१) जीवन्मुक्तिभङ्गवादः

परमते असत्यानां वेदान्तानां तत्त्वज्ञानहेतुत्वासंभवः पूर्ववादे उक्तः । अत्र वादे ब्रह्मणि वेदान्तानां प्रामाण्याधीनात् वाक्यार्थतत्त्वाध्यवसायात् जीवन्मुक्तिरित्ययमर्थः प्रतिक्षिप्यते ।

यदाहु: - ब्रह्मणो जीवस्य चैक्योपदेशतत्परात् तत्त्वमस्यादिवाक्यात् श्रुतात् जात: य: ब्रह्मात्मैक्ययाथात्म्यनिश्चय: तस्मादेव जीवन्नपि संसरन्नपि पुरुष: मुक्तो भवति।ज्ञानस्यैव स्वाभाविकमोक्षप्रतिबन्धकाविद्यानिवर्तकत्वात् तस्य च ज्ञानस्य वाक्यश्रवणादेव जातत्वात्। श्रूयते च ''तमेवं विद्वानमृत इह भवति'' तमेव विदित्वा अति मृत्युमेति''''अत्र ब्रह्म समश्नुते'' इति । जीवन्मुक्तशब्द एव च क्वचित् पुराणेषु पठ्यते ''जीवन्मुक्ता भवन्ति'' इत्यादि । य: पुन: जीवन्मुक्तस्यापि यथापूर्वं देहाद्यनुबन्ध: सोऽपि दग्धपटवत् न बन्धक: । यथा भ्रमणस्य हेतुभूते दण्डे निवृत्तेऽपि चक्रस्य भ्रमणं कंचित्कालमनुवर्तते पश्चात् स्वयमेव लयं गमिष्यति, तद्वत् देहादिहेतावज्ञाने निवृत्तेऽपि कंचित् कालमनुवर्तमानो देहादि: स्वयमेव निवर्तिष्यते । ''न कर्म लिप्यते नरे इत्यादिभि: ब्रह्मविदां कर्मालेपोपदेशश्च जीवन्मुक्तिमन्तरेण न घटते ।

''यस्त्वात्मरतिरेव स्यादात्मतृप्तश्च मानव: ।
आत्मन्येव च संतुष्टस्तस्य कार्यं न विद्यते ॥''

इति गीतायां कथिता सर्वोपायानुष्ठाननिवृत्तिरपि तेषां तदैव मुक्तिमावेदयति - इति ।

तत्र ब्रूम: । ज्ञानस्यैव मोक्षप्रतिबन्धकाविद्यानिवर्तकत्वात् ज्ञानस्य च तत्त्वमस्यादिवाक्यश्रवणेन निष्पन्नत्वात् ज्ञानोत्पत्तिसमय एव अविद्याया निवृत्तत्वात् असौ पुरुषो मुक्त इति यदुक्तं, तन्न। असकृदावृत्तस्य आप्रयाणादनुवृत्तस्य ध्यानरूपज्ञानविशेषस्यैव मोक्षसाधनत्वमिति अविधेयज्ञानभङ्गवादे स्थापितत्वात् । तस्य च प्रक्रान्तस्यापि अन्तिमप्रत्ययपर्यन्तस्यैव मुक्तिहेतुत्वेन इदानीं निष्पन्नत्वाभावात् नासौ मुक्त: । भवतु वा मोक्षोपायभूतं ज्ञानं निष्पन्नम्, तथापि उपायनिष्पत्त्यनन्तरमेव फलसिद्धिरिति नायं नियम:,स्वर्गादिसाधनेषु यज्ञादिषु विना वैकल्यमनुष्ठितेष्वपि प्रतिबन्धकवशात् फलविलम्बस्य संभवात्। न च प्रतिबन्धकमपि ब्रह्मव्यतिरिक्तत्वेन मिथ्यात्वात् तत्त्वज्ञानेनैव निवृत्तमिति वाच्यम् । तथा सति जीवनादेरपि मिथ्यात्वेन ज्ञानान्निवृत्तिप्रसङ्गेन जीवतो मुक्तिरिति कथनस्यायुक्तत्वात्।

''तमेवं विद्वानमृत इह भवति'' इति श्रुतिरपि प्रत्यक्षत: संसारित्वदर्शनेन तद्विरोधात् ''तस्य तावदेव चिरं यावन्न विमोक्ष्ये'' इत्यादिश्रुतिविरोधात् ''बुद्धे चेत् क्षेमप्रापणमिहैव न

दु:खमुपलभेत'' इत्यादिस्मृतिविरोधात् ध्यानविधिविरोधाच्च अबुद्धिपूर्वोत्तराघाश्लेषपूर्वाघविनाशरूपा या मुक्तितुल्या अवस्था तदभिप्रायेति निर्णीयते । ''अत्र ब्रह्म समश्नुते'' इत्येतदपि समाधिदशाभाविब्रह्मानुभवपरम् । न च सैव साक्षात् ब्रह्मप्राप्ति: । अस्यानुभवस्यानुकलं विच्छेदात् । अपुनर्विच्छेदस्य निरवशेषब्रह्मानुभवस्य मुमुक्षुणा साधयितुमिष्टत्वात् । अयमेव सारांश: ।

एतदुपरि जीवन्मुक्तिशब्दार्थविकल्पपूर्वकं दूषणानि ग्रन्थतो ज्ञेयानि ।

(३२) बाधार्थसामानिकरण्यभङ्गवाद:

नैष्कर्म्यसिद्ध्यादिषु केषुचिदद्वैतग्रन्थेषु बाधार्थसामानाधिकरण्यपक्ष:उपन्यस्त: । तत्पक्षखण्डनमत्र वादे क्रियते । पूर्वम् असत्यात् सत्यसिद्धि: निरस्ता । सा सत्यसिद्धिर्न जगद्बाधिका । अतो न जीवन्मुक्ति: इत्युपपादितम् । अथेदानीं सत्यसिद्धिजनकं वाक्यं न बाधार्थकमिति निरूप्यते ।

पूर्वपक्ष:

निर्विशेषचिन्मात्रविषयिणी या अविद्या तद्विवर्तरूपाणां तया ब्रह्मण्यस्तानां तत्तदाकाशादिपदार्थानां तत्त्वोपदेशपरेषु ''इदं सर्वं यदयमात्मा'' इत्यादिवाक्येषु ब्रह्मणा सह समानाधिकरणतया योऽयं निर्देश: स तत्तत्पदार्थबाधतात्पर्यक एव । बाधातिरिक्तरूपैक्याद्यर्थासंभवात् बाधस्यैव विवक्षितत्वात् । लोके हि बाधायामपि सामानाधिकरण्यं दृश्यते । य: पुरुष: अन्धकारादिषु स्थाणुं स्थाणुत्वरूपासाधारणाकारदर्शनं विना ऊर्ध्वत्वादिरूपस्थाणुचोरसाधारणाकारेणावलोकयन् अयं चोर इति भ्राम्यति तं प्रति स्थाणुत्वदर्शी कश्चित् वदति त्वद्दृष्टश्चोर: स्थाणु: इति । तस्य चायमर्थ: तव चोरत्वाभिमानविषय: न चोर इति । न च स्थाणुत्वविशिष्टचोरत्वविशिष्टयोरैक्यं नीलो घट इत्यत्र नीलत्वविशिष्टघटत्वविशिष्टैक्यमिव तद्वाक्यार्थो भवितुमर्हति । चोरे स्थाणुत्वस्य स्थाणौ चोरत्वस्य चाभावात् विशिष्टैक्यासंभवात् । न च चोरत्वभ्रमविषये स्थाणुत्वमात्रविधानमस्तु इति वाच्यम् । चोरत्वभ्रमजन्यभयनिवृत्त्यर्थं चोरत्वाभावस्यैव तदानीमुपदेष्टव्यत्वात् । अतश्चोरत्वबाधार्थ

एवायमुपदेश: । तद्वदिहापि ''सर्वं खल्विदं ब्रह्म'' ''इदं सर्वं यदयमात्मा''इत्यादिषु सत्यासत्ययो: सामानाधिकरण्येषु सत्यासत्यस्वरूपैक्या-संभवात् असत्यस्य जडप्रपञ्चस्याभाव एव अभिप्रेत: । तस्मात् चोरत्वभ्रमजन्यभयनिवृत्त्यर्थं क्रियमाणेन स्थाणुत्वोपदेशेन चोरत्वबाधवत् ''द्वितीयाद्वै भयं भवति'' इत्यादिवाक्यप्रतिपन्नस्य द्वितीयवस्तुप्रतीतिजन्यस्य भयस्य निवृत्तये क्रियमाणेन सर्वस्यात्मत्वोपदेशेन द्वितीयस्य सर्वस्य प्रपञ्चस्य वाध एव विवक्षित: ।

सिद्धान्त:

अत्रोच्यते । किं भवता प्रपञ्चस्य मिथ्यात्वं सिद्धं कृत्वा तदविरोधाय ''इदं सर्वं यदयमात्मा'' इत्यादिसामानाधिकरण्यस्य प्रपञ्चबाधतात्पर्यकत्वं स्वीक्रियते, उत समानाधिकरणपदसमूहशक्त्यैव प्रपञ्चमिथ्यात्वे पर्यबसित: प्रपञ्चबाध: साध्यते । नाद्य: । विश्वमिथ्यात्वस्य सर्वप्रकारेण पूर्वमेव निरस्तत्वात् ।

अस्तु वा प्रपञ्चमिथ्यात्वम् । तथापि ''इदं सर्वं यदयमात्मा'' इत्यत्र सामानाधिकरण्यस्य वाधार्थकत्वमेवेति निश्चेतुं न शक्यम् । ''सर्वं खल्विदं ब्रह्म तज्जलानिति शान्त उपासीत'' इति वाक्ये शान्त्यर्थं सर्वस्य ब्रह्मात्मकत्वेनानुसन्धानं विधीयत इति भवद्भि: व्याख्याततत्वात् तस्यैव लक्षणादिदोषरहितस्य शास्त्रतात्पर्यविषयस्यार्थस्य ''इदं सर्वं यदयमात्मा'' इत्यादावपि व्याख्यातुं शक्यत्वात् ।

ननु ''सर्वं खल्विदं ब्रह्म'' इत्यत्र ''उपासीत'' इति विधिसंनिधानात् तथा व्याख्यातुं शक्यत्वेऽपि ''इदं सर्वं यदयमात्मा'' इत्यादौ विधिसंनिधानाभावात् तथा व्याख्यातुमशक्यमिति चेत् – न । सर्वत्र प्रकरणे व्यवहितस्य अव्यवहितस्य वा विधे: सत्त्वात् । ''अयमात्मा ब्रह्म'' इत्यत्र ''ब्रह्मैव सन् ब्रह्माप्येति'' इति व्यवहितेन विधिना अन्वय: । ''पुरुष एवेदं सर्वम्'' इत्यस्य ''तमेवं विद्वानमृत इह भवति'' इति विधिना अन्वय: ।

नापि द्वितीय: । अनेकप्रवृत्तिनिमित्तविशिष्टैकार्थबोधनमात्रे सामानाधिकरण्यस्य शक्तिरिति भाष्यादौ निर्णीतत्वात् । प्रवृत्तिनिमित्तयोरेकाश्रयकत्वाभावस्थलेऽपि न सर्वपद – लक्षणा । राजा राष्ट्रम् इत्यादौ राजपदस्य राजाधीने लक्षणावत् इदं सर्वं यदयमात्मा इत्यत्रापि

आत्मपदस्य आत्माधीने लक्षणयैव निर्वाहसंभवात् बाधार्थत्वस्यानावस्यकत्वात् । 'चोरः स्थाणुः' इत्यत्र हि चोरपदस्य चोरत्वभ्रमविषये लक्षणा स्थाणुपदस्य चोरत्वाभावसहचरितस्थाणुत्ववति लक्षणेति सर्वपदलक्षणा बाधार्थसामानाधिकरण्यस्थले । यद्वा शरीरशरीरिभावेन इदं सर्वं यदयमात्मेत्यादौ निर्वाहसंभवात् प्रपञ्चसत्यत्वपरप्रत्यक्षादिविरुद्धतया बाधार्थसामानाधिकरण्यं नोचितमिति सारांशः ।

(३३) संविदद्वैतभङ्गवादः

संविदनुत्पत्त्यादिकं दूषितम् । अथ संविदद्वैतं निराक्रियते । एकैव संवित् अविद्यया अनेकज्ञातृरूपेण अनेकज्ञेयरूपेण ज्ञातृज्ञेयावच्छिन्नज्ञप्तिरूपेण च प्रतीयते इति वदन्ति ।

तत्रोच्यते । यदि एकस्य देवदत्तस्य एकं घटविषयकं ज्ञानम् अनेकज्ञातृज्ञेयतदवच्छिन्नज्ञप्तिरूपेण विवर्तत इत्युच्यते, तदा तस्मिन् ज्ञाने जाते तद्विवर्तत्वात् कृत्स्नस्यापि सर्वापि ज्ञप्तिर्देवदत्तस्येति तं प्रति इदं ज्ञातम् इदमज्ञातमिति विभागो न स्यात् । तं प्रति अज्ञातस्य अर्थस्याभावात् ।तथा तदतिरिक्तानां यज्ञदत्तादीनां ज्ञानस्यैवाभावात् तान् प्रत्यपि ज्ञाताज्ञातविभागो न स्यात् । किं च यदा एकस्य अनेकज्ञातृज्ञेयतदवच्छिन्नज्ञप्तिरूपत्वं तदा तज्ज्ञानपूर्वोत्तरकालयोः ज्ञातृज्ञेयादिप्रपञ्चानुपलम्भप्रसङ्गः ।

ननु विषयाश्रयरूपोपाधिमात्रं भिद्यते, संवित्तु प्रत्यभिज्ञाबलात् एकैवेति चेत् - न । अहमर्थस्य अहम् अहम् इत्यनुगतबुद्ध्या एकत्वम्, अहमर्थभेदप्रतीतेः शरीरभेदविषयकत्वं च स्यात्, सुखादिभेदप्रतीतेश्चाश्रयविषयकत्वं स्यात् ।

ननु यथा घटपटयोः स्वरूपप्रतीतिमात्रादेव भेदः प्रतीयते न तथा संवित्स्वरूपमात्रात् संविद्भेदः प्रतीयते, किं तु विषयाश्रययोः प्रतीतौ सत्यामेव प्रतीयते । अतः संविद्भेदो विषयाश्रयोपाधिकः आकाशभेदवदिति चेत् - न । एवं सति संयोगादिष्वपि प्रतियोग्यनुयोगिप्रतीतौ सत्यामेव घटसंयोगः पटसंयोग इत्यादिरूपेण भेदस्य प्रतीयमानतया संयोगादिषु भेदोऽप्यौपाधिकः स्यात् ।

ननु संयोगादे: कारणान्वयव्यतिरेकानुविधानात् कार्यत्वं तत एव तन्नानात्वमिति चेत् संविदोऽपि इन्द्रियादिकारणान्वयव्यतिरेकानुविधायित्वात् कार्यत्वं तत एव नानात्वं चेति तुल्यम्।

न च कार्यत्वं ज्ञानस्यासिद्धम्। कारणान्वयव्यतिरेकानुविधानस्य अभिव्यक्तिहेतुत्वेनोत्पत्तिहेतुत्वाभावादिति वाच्यम्। संयोगादिष्वपि तुल्यप्रसङ्गात्।

ननु न वयं देवदत्ताश्रयकतया उत्पत्त्यादिमत्तया सविषयतया भिन्नतया च यत् ज्ञानं प्रतीयते तस्याभेदं वदाम:। अन्त: करणवृत्तेरेव तथा प्रतीते:। किं तु तदन्या काचित् निराश्रया स्वतो निर्विषया तत्तदाकारान्त: करणवृत्त्यवच्छेदेन घटादिविषया संविदस्तीति तस्या एवाभेदं ब्रूम इति चेत् - न। तादृश्यां संविदि प्रमाणाभावात्। प्रमाणसत्त्वे दृश्यत्वात् तस्या: मिथ्यात्वं स्यात्।

ननु संविदि वृत्तिव्याप्यत्वस्य सत्त्वात् प्रमाणविषयत्वसत्त्वेऽपि न मिथ्यात्वप्रसङ्ग:। तस्यां फलव्याप्यत्वास्वीकारात्। फलव्याप्यत्वस्यैव मिथ्यात्वप्रयोजकत्वादिति चेत् - मैवम्।वृत्तिव्याप्यत्वाङ्गीकारेऽपि वृत्तिकाले यथा विषयोपलम्भ: तथा सर्वदा विषयोपलम्भप्रसङ्गात्।

ननु तत्तत्सामग्रीवशात् तत्तदाकारवृत्त्युपरागे सति तत्तद्विषयोपलब्धिरिति न सर्वदा सर्वोपलम्भप्रसङ्ग इति चेत् - संविद: तत्तद्विषयोल्लेख: किं संविदभिन्न: उत ततो भिन्न:। नाद्य:। संवित्स्वरूपस्य विषयोल्लेखस्य नित्यत्वेन सामग्रीवशात् कादाचित्कत्वमिति वक्तुमशक्यत्वात्। द्वितीयेऽपि किं विषयोल्लेख: संविद: परिणाम:, उत विषयसंनिधि:, उत विषयसत्त्वमेव। नाद्य:, निर्विकारत्वेन परिणामरूपोल्लेखस्य दुर्वचत्वात्। न द्वितीय:। संविद: सर्वदा सर्वव्यापित्वेन कदाचित्तस्या: विषयसंनिधि: कदाचित्तदभाव इति नियमासंभवात्। न तृतीय:। मिथ्यात्वेनाङ्गीकृतस्य विषयस्य सत्त्वायोगात्। ननु सत्त्वं न पारमार्थिकत्वम्, अपि तु वर्तमानत्वमिति चेत् - तर्हि संविदा भूतभविष्यद्वस्तुनोरुल्लेखो न स्यात्, तयो: वर्तमानत्वाभावात्। न च यदा कदाचित् वर्तमानत्वं सत्त्वम्,। भूतभविष्यद्वस्तुनो: इदानीं वर्तमानत्वाभावेऽपि स्वस्वकाले वर्तमानत्वमस्तीति वाच्यम्। कदाचिदप्यवर्तमानस्य भ्रान्त्या

उल्लेखदर्शनात् न वर्तमानत्वं विषयोल्लेखः । तस्मात् नित्यैकसर्वसाक्षिसंवित्स्वरूपस्यैव विषयावभासरूपत्वे सर्वदा सर्वोपलम्भप्रसङ्गो दुर्वारः । न वा किंचित् कदाचिदपि भायात् । सर्वेषां चायत्नलभ्यं सार्वज्ञ्यम् । गुरुशिष्यपण्डितजडादिभेदश्च ज्ञानभेदनिबन्धनो निर्मूलः स्यात् । अतः संविद्भेदः पारमार्थिकः ।

(३४) उपदेशानुपपत्तिवादः

पूर्वस्मिन् वादे संविदैक्ये गुरुशिष्यपण्डितजडादिभेदश्च ज्ञानभेदनिबन्धनो निर्मूलः स्यादित्युक्तम् । तदत्र वादे विस्तरेण उपपाद्यते ।

सर्गमारभ्य प्रलयपर्यन्तमाचार्यशिष्यपरंपरा तावत् दृष्टादृष्टप्रयोजने उद्दिश्य आचार्यः शिष्यायोपदिशति शिष्य आचार्यात् शृणोति स पुनः शिष्यायोपदिशतीत्येवंरूपा अनुवर्तत इति सर्वैः सैद्धान्तिकैरङ्गीक्रियते । स एष क्रमोऽद्वैतिनां कथमपि न घटते । तथाहि - आत्माद्वैतमुपदिशन् हि आचार्यः शिष्यत्वेन शिक्षणीयं कंचित् न पश्यति वा पश्यति वा । न पश्यति चेत् कस्मा उपदिशेत् । न कस्मैचिदुपदिशतीति चेन्न । तर्हि नोपदिशेदेव । श्रोतृप्रतिपत्तिप्रयोजनकत्वादुपदेशस्य । स्वस्मा एवोपदिशतीति चेत् - न । स्वस्य श्रोतृत्वे हि स्वस्मा उपदेशः संभवति । श्रोतृत्वं च श्रवणात् प्राक् श्रोतव्यमर्थं यो न जानाति तस्यैव भवति। तथा चाचार्यः स्वयं श्रोतव्यमर्थं पूर्वं जानाति चेत् श्रवणेच्छाविरहेण श्रोतृत्वासंभवेन न स्वस्मा उपदेशो घटते । स्वयं न जानाति चेदपि अज्ञत्वात् उपदेष्टृत्वं न संभवति । अथाचार्यः शिष्यं कंचित् पश्यति इति पक्षे शिष्यं स्वापेक्षया अन्यं पश्यति वा अनन्यं वा । अन्यत्वेऽपि सत्यमसत्यं वा । नाद्यः । अपसिद्धान्तात् । न द्वितीयः । अन्यं शिष्यं मिथ्यात्वेन पश्यति चेत् तं प्रत्युपदेशो न संभवति । न हि मिथ्यात्वेन प्रतीयमानेभ्यः प्रतिविम्बादिभ्यः उन्मत्तोऽप्युपदिशेत्। शिष्यं सत्यत्वेन पश्यति चेत् शिष्यः स्वं प्रति उपदेशादेव स्वस्मिन् गुरोः सत्यत्वबुद्धिं जानन् तद्विपरीतमिथ्यात्वोपदेष्टरि आचार्ये भ्रान्तत्वशङ्कया तद्वाक्यं न श्रद्दधीत । यद्वा मिथ्याभूतं शिष्यं सत्यत्वेनोपलभमानो गुरुः उपदिशतीति वदतस्तव त्वद्गुरुवाक्ये भ्रान्तोक्तत्वबुद्ध्या अश्रद्धा स्यात् । किं च स्वस्मात् भिन्नत्वेन सत्यत्वेन च दृश्यमानं शिष्यं प्रति स्वात्मैक्यमुपदिशन्नाचार्यः

वञ्चकः स्यात् । किं चासावाचार्यः अद्वैतवाक्यश्रवणमहिम्ना निःशेषनिवृत्तमिथ्याज्ञानवान् मिथ्याभूतं शिष्यं कथं सत्यत्वेन पश्येत् ।

अथाचार्यः शिष्यं स्वात्मनोऽनन्यं पश्यतीति द्वितीयपक्षेऽपि वस्तुतः अनन्यं शिष्यम् अनन्यत्वेन पश्यति वा अन्यत्वेन पश्यति वा । आद्ये अननुविधेयवाक्यत्वविप्रलम्भकत्वादयो दोषाः । द्वितीये उपदेष्टव्यविषयकप्रतिपत्तौ श्रोतृत्वासिद्धिः । तदप्रतिपत्तौ वक्तृत्वासिद्धिरिति पूर्वोक्तदोषाः ।

किं च द्वैतमिथ्यात्वस्योपदेष्टा आचार्यः किं निवृत्ताविद्यः उत अनिवृत्ताविद्यः। आद्ये उपदेशं प्रति हेतुभूतस्य शब्दस्य अर्थस्य तत्प्रतिभासादेश्चाविद्यामूलकस्य अविद्यानिवृत्त्या निवृत्ततया निर्हेतुक उपदेशः स्यात् । बाधितानुवृत्त्या उपदेशस्तु न संभवति । बाधितानुवृत्तिपक्षस्य पूर्वमेव निरासात् । द्वितीये तत्त्वज्ञाने सति अविद्यानिवृत्तेः आवश्यकत्वेन, गुरोः अविद्यानिवृत्तिर्नास्ति चेत् तत्त्वज्ञानस्याभावेन अनाप्तत्वात् उपदेष्टुं न प्रभवति ।

अपि च प्रयोजनाभावादपि उपदेशानुपपत्तिः । तथा हि किंप्रयोजनकोऽयमुपदेशः। अविद्यानिवृत्तिप्रयोजनक इति चेत् - उपदेशेन कस्याविद्यानिवृत्तिर्भवति, गुरोर्वा शिष्यस्य वा उभयोर्वा। नाद्यः, गुरोः उपदेशात् पूर्वमेव तत्त्वज्ञानेन निवृत्ताविद्यत्वात् । तस्याविद्यानिवृत्त्यभावे परं प्रत्युपदेशमात्रेण स्वस्याविद्यानिवृत्त्यसंभवात् । परं प्रति उपदेशेन हि परस्य तत्त्वज्ञानं ततस्तस्यैवाविद्यानिवृत्तिर्भवेत् । न च परं प्रति उपदेष्टुः अदृष्टं जायते, तेन स्वगताविद्याभ्रमयोर्निवृत्तिरिति वाच्यम् ।अदृष्टजन्यत्वे सत्यत्वं स्यादिति भीत्या भवता तथानङ्गीकारात् । किं चानिवृत्ताविद्यत्वे तदर्थं स्वयं ज्ञानं संपादनीयम्, कुतः परं प्रत्युपदेशः ।

श्रोतुरविद्यानिवृत्त्यर्थ उपदेश इति द्वितीयः पक्षोऽपि न युक्तः । तथा हि उपदेष्टृगततत्त्वज्ञानस्याविद्यानिवर्तकत्वमस्ति न वा । अस्ति चेत् शिष्यगताविद्यापि तेनैव निवर्तत इति वक्तव्यम्, अविद्याया एकत्वात् । तथा चोपदेशस्य वैयर्थ्यम् । नास्ति चेत् - गुरुगतज्ञानस्य यथा अविद्यानिवर्तकत्वं नास्ति तथा शिष्यगतज्ञानस्यापि तन्न स्यात् अविशेषात्। तथा च उपदेशर्वैयर्थ्यं तदवस्थम् । शिष्टं ग्रन्थे ।

(३५) तिरोधानानुपपत्तिवादः

पूर्ववादे एकस्य ज्ञानमात्रात् सर्वेषां प्रकाशसंभवात् उपदेशानुपपत्तिरिति मध्ये प्रस्तुतम्। तदयुक्तम्, तिरोधानेन प्रकाशाप्रकाशयोरुपपत्तेरित्याशङ्क्य तिरोधानमेव न संभवतीति निरूप्यतेऽस्मिन् वादे ।

अत्राहुः - आत्मा स्वयंप्रकाशः अशनायापिपासादिरहितः । स च नित्यमुक्तनिरतिशयानन्दं ब्रह्मैवेति श्रुत्यादिसिद्धम् । तथापि अहमित्यनुभूयमानोऽपि स पूर्णानन्दब्रह्माहमस्मीति नानुभूयत इति सर्वसंमतम् । तथा च स्वप्रकाशात्मकचैतन्याभिन्नतया प्रशस्तप्रकाशस्यापि पूर्णानन्दस्य अप्रकाशः अविद्यया तिरोधानाधीन इति ।

तत्र ब्रूमः । अविद्यया आत्मस्वरूपस्य तिरोधानं किंरूपमित्युपक्रम्य अष्टौ कल्पाः आचार्यैः प्रदर्शिताः खण्डिताश्च । यद्यप्येते कल्पाः पूर्वपक्षिणोऽनभिमताः । नास्ति न प्रकाशत इति व्यवहारयोग्यता, अस्ति प्रकाशत इति व्यवहारायोग्यता वा तिरोधानम् अथवा आवरणम् इति तदीयग्रन्थेषु स्थितत्वात् । तथापि ज्ञानवैकल्यापादकतया शङ्कितुं योग्यता एतेषामेव पक्षाणां, न तु तदभिमतपक्षस्य । व्यवहारप्रतिबन्धकस्य आमवातादेः आवरणत्वाप्रसिद्धेः । किं च तत्त्वतः अधिष्ठाने प्रकाशमाने अध्यासासंभवात् अधिष्ठानाप्रकाशसिद्ध्यर्थमावरणं कल्पनीयम् । तादृशं च प्रयोजनमेष्वेव पक्षेषु संभवति, न तु पूर्वपक्ष्यभिमतपक्षे । येनाध्यासप्रतिबन्धो मा भूदिति आवरणं कल्प्यते प्रतिबन्धकाभावसंपादनाय तस्य तत्कल्पनेऽप्यविकलत्वादिति महाचार्याः ।

विकल्पितेषु अष्टासु पक्षेषु ''अनिरूपणीयस्वरूपमन्यदेव वा किंचित्'' इत्यनेन पूर्वोक्तः अद्वैतग्रन्थारूढः पक्ष एव विवक्षितः । तदनुसारेण च आचार्यग्रन्थो व्याख्यातः चण्डमारुते । परमार्थभूषणे च विशदमनुसंहितोऽयं विषयः ।

(३६) आत्मैकत्वभङ्गवादः

अत्राहुः - एक एवात्मा शरीराद्युपाधिभेदेन अनेकतया प्रतिभाति, यथा एक एव चन्द्रः अनेकेषु तरङ्गेषु प्रतिबिम्बमानः अनेक इव दृश्यते, यथा च सौभरिमहर्षेः आत्मा एक

एव अनेकशरीरवान् अनेक इव प्रतीयते तद्वत् । तथा आत्मनः एकत्वसाधकानि अनुमानानि च भवन्ति विगीतानि शरिराणि मयैव आत्मवन्ति शरीरत्वात् मदात्मकत्वेन संप्रतिपन्नमच्छरीरवत् । सर्वं जाग्रच्छरीरं मदविद्याकल्पितम् शरीरत्वात् कल्पितत्वाद्वा स्वप्नदृष्टमच्छरीरवत् । सर्वोऽप्यात्मा अहमेव चेतनत्वात् अहमिव इत्यादीनि । यदा आत्मा एक एवेति निश्चितं तदा सुखदुःखादीनां य आत्मभेदेन विरोधः सोऽपि नास्ति । श्रूयते च आत्मैक्यम् -'' अथातोऽहंकारादेशः ''इत्यारभ्य, ''अहमेवेदं सर्वम्'', ''आत्मैवेदं सर्वम्'' इति । आत्मभेदश्च बहुशो निषिध्यते - '' नेह नानास्ति किंचन'' ''मृत्योः स मृत्युमाप्नोति य इह नानेव पश्यति'' इत्यादिभिः । तथा च स्मृतिः-

''तस्यात्मपरदेहेषु सतोऽप्येकमयं हि यत् ।
विज्ञानं परमार्थो हि द्वैतिनोऽतथ्यदर्शिनः ॥''

आत्मन एकत्वादेव बद्धमुक्तव्यवस्थापि नास्ति । एकमेव ब्रह्म एकया अविद्यया बध्यमानं बहुतया भ्राम्यति, तदेव कदाचित् मोक्ष्यते। तस्मादविद्याकल्पितोऽयं जीवानां परस्परं भेद इति।

तत्र ब्रूमः । यदुक्तं विगीतानि शरीराणि मयैव आत्मवन्तीति, तत्र मयेति किमहमर्थो विवक्षितः, उत तदनुबन्धिनी संवित्, उत तदुभयोत्तीर्णः कश्चित् तयोरपि साक्षी । नाद्यः, एकस्मिन्नपि शरीरे भवद्भिः अहमर्थस्य आत्मत्वानङ्गीकारेण दृष्टान्तस्य साध्यविकलत्वात्। न द्वितीयः, अस्माभिः तस्याः क्वचिदप्यात्मत्वानभ्युपगमेन साध्यविकलत्वादेव । नापि तृतीयः । भवदभिमतस्य साक्षिणोऽस्माभिरनङ्गीकारात् निरस्तत्वाच्च । अस्मदभिमतेन सर्वसाक्षिणा ईश्वरेण आत्मवन्तीति साधने सिद्धसाधनात् । ईश्वरस्य सर्वशरीरकतया जीवाधिष्ठितानामपि शरीराणामीश्वरात्मना आत्मवत्त्वात् । एवमुत्तरेष्वप्यनुमानेषु अस्मच्छब्दार्थविकल्पपूर्वकं दूषणमूह्यम् । यत्तु सर्वाणि सुखदुःखानि एकेनात्मना भुज्यन्त इति तत् स्वहृदयविसंवादि । यदि सर्वाणि दुःखानि स्वेनैव भुज्यन्ते तर्हि कथं परहिंसादिप्रवृत्तिः। न हि स्वसुखोच्छेदाय स्वदुःखोत्पादनाय वा प्रेक्षावन्तः प्रवर्तेरन् । श्रुतयस्तु ''अहमेवेदं सर्वम्'' ''आत्मैवेदं सर्वम्''

इत्यपादिका: प्रह्लादस्य ''सर्वगत्वादनन्तस्य स एवाहमवस्थित: ।'' इति वचनवत् ''वामदेवस्य'' अहं मनुरभवं सूर्यश्च'' इत्यादिवचनवच्च शास्त्रदृष्ट्या निर्वोढव्या:।'' नेह नानास्ति किंचन'' इत्यादिश्रुतयोऽपि भेदनिषेधकतया प्रतीयमाना: समस्तचिदचिद्विशिष्टे ब्रह्मण्येकस्मिन् ज्ञाते विशिष्टबहिर्भूतवस्तुप्रतिक्षेपपरा: यथा शरीरजातिगुणवस्त्रभूषणादिविशिष्टे कस्मिंश्चित् पुरुषेऽवस्थिते ''तत्रैक एव तिष्ठति नान्य: कश्चित्'' इति व्यपदिशन्ति तद्वत् ।

एतेन स्मृतयोऽपि व्याख्याता: । तत्रापि ब्रह्मात्मकत्वप्रतिपादनप्रकरणे प्रागुक्तन्यायावतार: । जीवानां परस्परभेदनिषेधप्रकरणे तु ज्ञानरूपतया अत्यन्तसमस्वरूपाणां तेषां कर्मकृतदेहोपाधिकदेवत्वादिभेदस्य आत्मनिष्ठत्वप्रतिक्षेपे तात्पर्यम् । तथा च तत्रैवोच्यते-
''देहादिभेदेऽपध्वस्ते नास्त्येवावरणो हि स: ''

''पुमान्न देवो न नरो न पशुर्न च पादप:'' इत्यादिना । अत: आत्मभेद: स्वाभाविक:,
बद्धमुक्तादिव्यवस्था च सिध्यतीति ।

(३७) जीवेश्वरैक्यभङ्गवाद:

पूर्वमात्मनामैक्यं निराकृतम् । इदानीं जीवेश्वरैक्यं निराक्रियते । ये तावत् प्रत्यक्षादिविरोधमपि तिरस्कृत्य स्वात्मानमेवेश्वरं मन्यन्ते, तान् प्रति ब्रूम: । पूर्वमेव भेदसामान्यस्य आत्मनानात्वस्य च समर्थनात् ''नित्यो नित्यानां चेतनश्चेतनानामेको बहूनां यो विदधाति कामान्'' इति एकस्येश्वरस्य अनेकजीवकामविधातृत्वश्रवणेन एकानेकतादात्म्यायोगाच्च जीवेश्वरैक्यं न संभवति । विशेषतोऽपि तन्मतं परिशीलयाम: - जीवस्येश्वरत्वं किं प्रत्यक्षबलादभ्युपगम्यते, उतोपपत्तिबलात्, अथवा शास्त्रवैभवात् । नाद्य:।,अनीश्वरतयैव स्वात्मन: उपलम्भात् । न च य: ईश्वरं न जानाति, स कथं ईश्वरभिन्नोऽहमित्युपलभेतेति वाच्यम्'' शास्त्रत: प्रमितेश्वरतत्त्वानां तत्प्रतियोगिकभेदज्ञानोपपत्ते:। स्वस्मिन् अप्रत्यक्षमेर्वादिभेदोपलम्भवत्। प्रतियोगिज्ञानमेव अभावज्ञाने कारणम्, न प्रतियोगिप्रत्यक्षम् । भेदरूपाभावप्रत्यक्षं प्रति अधिकरणस्यैव प्रत्यक्षं कारणम्, न तु प्रतियोगिप्रत्यक्षम् । स्तम्भे पिशाचभेदप्रत्यक्षस्येष्टत्वात् । नापि द्वितीय: । जीवस्येश्वरत्वसाधकोपपत्तेरभावात् । कर्मवश्यानां प्रतिहतसंक-

ल्पानाम् आध्यात्मिकादिदुःखसंततिसंतप्तानां स्वदुःखोन्मूलनाय हेतुमन्विच्छताम-स्मदादीनामनीश्वरत्वस्य प्रत्यक्षतः अनुमानतश्च सिद्धेः। नापि तृतीयः। शास्त्रमपि हि जीवेश्वरयोर्भेदमेव क्वचित् कण्ठोक्त्या प्रतिपादयति ''जुष्टं यदा पश्यत्यन्यमीशम्'' ''पृथगात्मानं प्रेरितारं च मत्वा'' ''तयोरन्यः पिप्पलं स्वाद्वत्ति'' इत्यादि। क्वचित् ''यः सर्वज्ञः सर्ववित्'' ''स कारणं करणाधिपाधिपः'' ''दासभूताः स्वतः सर्वे ह्यात्मानः परमात्मनः'' ''आत्मदास्यं हरेः स्वाम्यं स्वभावं च सदा स्मर'' इत्यादि विरोधिधर्मं प्रतिपादयति।'' यस्यात्मा शरीरम्'' इत्यादिकं भेदाक्षेपकं संबन्धं प्रतिपादयति।

मुक्तिदशायामपि भेदः श्रूयते - ''सोऽश्नुते सर्वान् कामान् सह। ब्रह्मणा विपश्चिता'' ''निरञ्जनः परमंसाम्यमुपैति'' ''मम साधर्म्यमागताः'' इत्यादिभिः। यत्तु जीवस्य मुक्तावपीश्वरपारन्त्र्ये दुःखित्वं स्यात् इति। तन्न। दुःखित्वं प्रति कर्मपारतन्त्र्यं प्रयोजकं नेश्वरपारतन्त्र्यमिति। लोकेऽपि पत्नीपुत्रादीनां पतिपित्रादिपारतन्त्र्यं सुखायैव भवतीति पारतन्त्र्यस्य न दुःखव्याप्यत्वम्। अतो जीवैश्वरैक्यं कथमपि न संभवति।

(३८) अखण्डवाक्यार्थखण्डनवादः

यत्तु वदन्ति -विगीतं तत्त्वमस्यादिवाक्यमखण्डार्थपरं, समानाधिकरणवाक्यत्वात् सोऽयं देवदत्त इत्यादिवाक्यवत् इति।

तत्र पृच्छामः किमिदमखण्डार्थपरत्वं नामेति। न तावत् निरवयवार्थपरत्वम् अच्छेद्यार्थ-परत्वं वा। सिद्धसाधनात्, दृष्टान्तस्य साध्य विकलत्वाच्च। न हि देवदत्तशरीरस्य निरवयत्व-मच्छेत्वं वा भवताप्यङ्गीकृतम्। नापि सोऽयं देवदत्त इति वाक्यादपि तथा प्रतीतिः।

नापि निर्विशेषणपरत्वम्। तत्र निर्विशेषणत्वमपि किं शब्दबोध्यत्वेनाभिमतम्, उत वस्तुगत्या। आद्ये निर्विशेषणत्वरूपविशेषणविशिष्टार्थबोधकत्वात् अविशिष्टार्थ-बोधकत्वाभिमानभङ्गः। द्वितीये तु सगुणप्रतिपादकवाक्यस्य अस्य वाक्यस्य च न कश्चिद्विशेषः। तदपि हि निर्विशेषणमेव वस्तुगत्या वदतीति भवन्मतम्।

नापि विशेष्यमात्रपरत्वमखण्डार्थत्वम् । विशेष्यस्वरूपस्यैव मात्रशब्देनोपादाने सिद्धसाधनात् । अतिरिक्तोपादाने विवक्षितासिद्धेः ।

नापि निर्भेदार्थपरत्वम् । सत्यादिपदानां व्यावृत्तिपरत्वर्णनस्य निर्मूलत्वप्रसङ्गात् । व्यावृत्तीनां भेदरूपत्वात् । न च सजातीयभेदराहित्यं विवक्षितमिति वाच्यम् । तस्य सत्यादि-पदप्रतिपाद्यत्वाभावात् ।

नापि भावरूपविशेषणरहितपरत्वम् । अभावरूपविशेषणरहितपरत्वप्रतिक्षेपानुपपत्तेः। भावरूपविशेषणं यथा निर्विशेषत्वबाधकं तथा अभावरूपविशेषणमपि तद्बाधकमेव ।

नाप्येकविशेष्यपरत्वम् । तस्यास्माभिरप्यङ्गीकारेण सिद्धसाधनात् ।

किं च विगीतं वाक्यमिति किं तत्त्वमसि - सत्यज्ञानादिवाक्यमात्रं विवक्षितम्, उत सोऽयं देवदत्त इति वाक्यव्यतिरिक्तं सर्वमपि समानाधिकरणवाक्यम् । नाद्यः, ''देवदत्तः श्यामो युवा लोहिताक्षः'' इत्यादिषु सखण्डार्थपरेषु समानाधिकरणवाक्येषु व्यभिचारात् । न द्वितीयः, तेष्वेव साध्याभावेन बाधात् ।

यदपि तत्त्वमस्यादिवाक्यम् अखण्डार्थपरं लक्षणवाक्यत्वात् प्रकृष्टप्रकाशश्चन्द्र इति वाक्यवत् इति चित्सुखादिभिरुक्तम् । तदपि न । प्रतिज्ञाहेत्वोर्विरोधात् । लक्षणस्या-साधारणधर्मरूपत्वात् ।

प्रत्यनुमानानि च भवन्ति विगीतं तत्त्वमस्यादिवाक्यं विशिष्टार्थपरम् वाक्यत्वात् व्यधिकरणवाक्यवत् । इदं चानुमानं सर्वलोकप्रतीत्यनुगुणत्वात् हेतौ विशेषणा-भावाच्चाधिकबलमिति अनेन पूर्वयोरनुमानयोः बाधः सत्प्रतिपक्षत्वं च दुर्वारम् । न च व्यधिकरण वाक्यत्वमत्रोपाधिः इति वाच्यम् । लोके वेदे च देवदत्तः श्यामो युवा, यः सर्वज्ञः सर्ववित् इत्यादिविशिष्टार्थपरसमानाधिकरणवाक्यदर्शनेन साध्ये उपाधिव्याप्यत्वाभावेन उपाधौ साध्यसमव्याप्त्यभावात् ।

किं च भवदीयानुमानयोः विपक्षे बाधकाभावात् अप्रयोजकत्वं च । नन्वस्ति विपक्षे बाधकम् - यदि विगीतं वाक्यं विशिष्टपरं स्यात्, तर्हि निर्गुणवाक्यविरोधप्रसङ्ग इति चेत् - न । निर्गुणवाक्यानां दोषराहित्यपरत्वव्यवस्थापनात् । समानाधिकरणवाक्यानां विशिष्टपरत्वे विशेषणानामपि परस्परमैक्यप्रसङ्ग इत्यादयो दोषाश्च ग्रन्थे परिहृताः, युगपदनेकविशेषणविशिष्टैकार्थपरत्ववर्णनात् इति संक्षेपः ।

(३९) भावरूपाज्ञानभङ्गवादः

पूर्वपक्षः

अत्राहुः - प्रत्यक्षानुमानागमैः भावरूपमज्ञानं सिध्यति । तथाहि - प्रत्यक्षं तावत् अहमज्ञः मामन्यं च न जानामीत्याकारकं सर्वसंप्रतिपन्नम् । तत् किं भावरूपमज्ञानं विषयीकरोति उताभावरूपमिति विवेचनीयम् । न तावत् ज्ञानाभावरूपमज्ञानं विषयीकरोतीति वक्तुं शक्यते। अभावविषयकज्ञानं प्रति प्रतियोगिविषयकज्ञानस्य कारणत्वात् ज्ञानरूपप्रतियोगिविषयकज्ञानं विना ज्ञानाभावविषयकं प्रत्यक्षं नोत्पत्तुमर्हति । अपि च ''अर्थेनैव विशेषो हि निराकारतया धियाम्'' इति न्यायेन विषयविशिष्टमेव ज्ञानं ज्ञानविषयो भवेत् । तथा च ज्ञानरूपप्रतियोगिविषयकज्ञानं विना ज्ञानाभावस्य प्रत्यक्षं न भवति । ज्ञानज्ञानं च विषयेण सहैव ज्ञानं विषयीकरोति । इत्थं च यद्विषयकज्ञानस्य अभावः प्रत्यक्षविषयतया अभिमतः तद्विषयकं ज्ञानं पूर्वमस्तीति तदभावरूपविषयाभावात् कथं ज्ञानाभावविषयकं प्रत्यक्षं भवितुमर्हति। यः घटज्ञानमिति प्रतियोगिभूतज्ञानावच्छेदकतया घटं व्यवहरति तदा तस्य घटज्ञानमस्त्येव, व्यवहारं प्रति व्यवहर्तव्यज्ञानस्य हेतुत्वात् । तथा च घटं जानन्नेव घटं न जानामीति वदन् स्ववाग्विरोधमपि न जानातीति स्यात् । एवं च प्रतियोगिज्ञानेन विरोधात् न ज्ञानसामान्याभावविषयकत्वम् अहमज्ञ इति प्रत्यक्षस्य । एवम् अभावप्रत्यक्षं प्रति प्रतियोगिज्ञानवत् अनुयोगिविषयकज्ञानमपि हेतुः ''सङ्ख्यामभावो निरूप्यते'' इत्युदयनाचार्योक्तेः । तथा च अहमज्ञ इति ज्ञानाभावप्रत्यक्षं प्रति आश्रयविषयकज्ञानस्यापि कारणत्वात् तस्मिन् सति ज्ञानाभावरूपस्य विषयस्याभावात् तद्विषयकं प्रत्यक्षं न भवितुमर्हति। अतः

भावरूपमज्ञानमेव तादृशप्रत्यक्षविषय। न च भावरूपेऽप्यज्ञाने विरोधप्रसक्तिः। भावरूपत्वादेव स्वरूपेण ज्ञातुं शक्यत्वात्। अस्ति च स्वरूपेणैव प्रतीतिः, मुग्धोऽस्मि, मूढोऽस्मीत्यादिका।

एवमनुमानेनापि भावरूपमज्ञानं सिध्यति। विप्रतिपन्नं प्रमाणज्ञानं स्वप्रागभावव्यतिरिक्तस्वविषयावरणस्वनिवर्त्यस्वदेशगतवस्त्वन्तरपूर्वकम्, अप्रकाशितार्थप्रकाशकत्वात् अन्धकारे प्रथमोत्पन्नप्रदीपप्रभावत् इति। तत्र साध्ये ज्ञानप्रागभावमादाय सिद्धसाधनवारणाय स्वप्रागभावव्यतिरिक्तेति। स्वोत्पादकादृष्टमादाय सिद्धसाधनवारणाय स्वविषयावरणेति। स्वोत्पत्तिप्रतिबन्धकादृष्टमादाय सिद्धसाधनवारणाय स्वनिवर्त्येति। स्ववेद्यगतवित्त्यभिव्यक्तिप्रागभावमादाय सिद्धसाधनवारणाय स्वदेशगतेति। वित्त्यभिव्यक्तिप्रागभावो ज्ञातताया अभावः।

''अनृतेन हि प्रत्यूढाः'' ''तेषां सत्यानां सतामनृतमपिधानम्'' ''तमसा गूढमग्रे प्रकेतम्'' ''इन्द्रो मायाभिः पुरुरूप ईयते'' इत्यादिश्रुतयश्च भावरूपाज्ञाने प्रमाणमिति।

सिद्धान्तः

अत्र ब्रूमः। यदुक्तं भावरूपमज्ञानं प्रत्यक्षेण प्रतीयत इति तत्र किं तत् अज्ञानं ज्ञानविरोधित्वेन भासते उत ज्ञानाविरोधित्वेन भासते। नाद्यः। पूर्वोक्तसमस्तदोषप्रसङ्गाविशेषात्। यद्विरोधित्वेन यत् भासते तज्ज्ञानं विना तज्ज्ञानं न भवति, यथा घटत्वविरुद्धं पटत्वमित्याकारकज्ञानं प्रति घटत्वज्ञानं विरोधाश्रयस्य पटत्वस्य ज्ञानं च कारणम्। घटत्वज्ञानं पटत्वज्ञानं च विना घटत्वविरुद्धत्वेन पटत्वज्ञानानुत्पत्तेः। तद्वत् ज्ञानविरुद्धत्वेनाज्ञानं भासते चेत् विरोधप्रतियोगिनः ज्ञानस्य ज्ञानमावश्यकम्। विषयनिरूप्यत्वात् ज्ञानस्य विषयज्ञानमप्यावश्यकम्। तथा विरोधाश्रयज्ञानं चापेक्षितम्। एतेषु ज्ञानेषु सत्सु एतद्विरुद्धमज्ञानं कथं स्थातुमर्हति। अज्ञानेऽसति तद्विषयकं प्रत्यक्षं कथं भवेत्। न द्वितीयः। ज्ञानविरोधित्वं विहाय अज्ञानस्वरूपमात्रानुभवाभावात्। न च मुग्धोऽस्मि, मूढोऽस्मीति अज्ञानस्व-

रूपानुभवोऽस्तीत्युक्तमिति वाच्यम्। तस्मिन्ननुभवे अज्ञानं ज्ञानविरोधित्वेन यदि न भासते तर्हि तस्याज्ञानानुभवस्य जानामि अथ वा ज्ञोऽस्मि इत्याकारेण ज्ञानानुभवेन विरोधो न स्यात्। भावरूपस्याज्ञानस्य ज्ञानविरोधित्वे प्रमाणाभावप्रसङ्गश्च।

यच्चानुमानमुपन्यस्तम् - तत्र पक्षसाध्यहेतूनां विकल्पेन दूषणान्युक्तानि ग्रन्थे। विस्तरभिया नेह लिख्यते।

यानि च श्रुतिवाक्यानि प्रमाणतया प्रदर्शितानि तत्र अनृतशब्दस्य ज्ञानसंकोचहेतुभूतकर्मवाचकत्वात् नाज्ञानवाचकत्वम् तमश्शब्दस्य मूलप्रकृतिवाचकत्वम्, मायाशब्दस्यापि प्रकृतिवाचकत्वमिति न भावरूपाज्ञानवाचकता। अतो भवदभिमतं भावरूपमज्ञानं न केनापि प्रमाणेन सिध्यतीति।

(४०) जीवाज्ञानभङ्गवाद:

ब्रह्मण: अविद्याश्रयत्वे सदोषत्वं स्यादिति मत्वा जीवस्यैवाज्ञानसंसारादिकमिति अद्वैत्येकदेशिन: आहु:। तेषामयमाशय: - न ब्रह्मणि साक्षात् अज्ञानतत्प्रयुक्तसंसारादिकम्। अविद्यायामन्त: करणे वा यो ब्रह्मण: प्रतिबिम्ब: स एव जीव:। स एवाज्ञानाद्याश्रय:। यद्यपि बिम्बस्वरूप एव प्रतिबिम्ब: तथापि मणिकृपाणदर्पणादिगताल्पत्वमलिनत्वादय: यथा मुखादिप्रतिविम्बैकवर्तिन: तदभिन्नमपि मुखं न स्पृशन्ति तथा प्रतिबिम्बभूतजीवगता अविद्यादयो दोषा: न ब्रह्मणि संबध्यन्ते, प्रतिजीवं व्यवस्थिताश्च भवन्ति।

ननु अविद्यास्वरूपसिद्धौ तत्र जीवाख्यप्रतिबिम्बप्रकाश: तत्प्रकाशे च तदाश्रिताविद्यास्वरूपलाभ इत्यन्योन्याश्रय इति चेत् न-। जीवतदाश्रयकाविद्ययो: बीजाङ्कुरन्यायेनानादितया दोषाभावात्। अपि च प्रासादनिगिरणादिवत् अनुपपन्नैकरस्वभावायामविद्यायामन्योन्याश्रयादयो वस्तुदोषा: न क्षतिमावहन्ति। मुखप्रतिबिम्बगतश्यामत्वादेरिव जीवगताविद्याया अपि मिथ्यात्वात् तस्या ज्ञाननिवर्त्यत्वमप्युपपद्यते। प्रतिबिम्बस्थानीयानां जीवानां परमार्थत: ब्रह्माभिन्नत्वात् अनेन जीवेनात्मनेति जीवतादात्म्यानुसन्धानमपि ब्रह्मण: उपपद्यत इति।

अत्र ब्रूम: । किं जीवानामकल्पितेन स्वाभाविकरूपेण अविद्याश्रयत्व०म् ,उत तदतिरिक्तेन कल्पितेन आकारेण उत कल्पिताकारविशिष्टस्वरूपेण । न प्रथम:। ब्रह्माज्ञानवादप्रसङ्गात् । जीवस्याकल्पितं हि रूपं ब्रह्मैव ।न द्वितीय: ।जडस्याज्ञानमिति प्रसक्ते:। जडस्य नित्याज्ञत्वेन तन्निवृत्तेरशक्यत्वाच्च । न तृतीय: ।तत्र किं स्वकल्पिताकारविशिष्टे अविद्या तिष्ठेत्, अविद्यान्तरकल्पिताकारविशिष्टे वा । पूर्वत्र आत्माश्रय: अन्योन्याश्रयो वा स्वकल्पिताकारविशिष्टस्वरूपलाभे सति स्वस्वरूपलाभात् । उत्तरत्रापि अविद्यान्तरे उक्तचोद्यावतारे अविद्यान्तरापेक्षायाम् अन्योन्याश्रयानवस्थादयो: दोषा: प्रादुर्भवेयु: ।

यदप्युक्तं प्रतिबिम्बश्यामतादेरिव जीवाशुद्धेरपि मिथ्यात्वात् ज्ञाननिवर्त्यत्वमुपपद्यत इति । तदपि न । अशुद्धिनाशे तत्तदशुद्धिहेतुभूताविद्यानाशे च प्रतिबिम्बस्थानीय: जीव: तिष्ठति वा न वा । तिष्ठति चेत् अविद्याकल्पितस्य जीवस्य स्थिते: मोक्षो न स्यात् । न तिष्ठति चेत् जीवस्वरूपोच्छित्तिरेव मोक्ष इति स्यात् ।

यदपि चोक्तम् जीवानामपि वस्तुतो ब्रह्माभिन्नत्वात् ब्रह्मण: जीवतादात्म्यानुसन्धानमुपपन्नमिति । तदप्यसारम् । जीवानुसन्धानस्य कल्पितत्वे ब्रह्माज्ञानवादावतारात् । अकल्पितत्वे द्वैतापत्ते: ।

अतो यावत् ब्रह्मापेक्षया परस्परं च जीवानां भेद: पारमार्थिको नाङ्गीक्रियते न तावत् जीवेश्वरबद्धमुक्तादिव्यवस्था: सिध्यन्तीति ।

(४१) अविद्यास्वरूपानुपपत्तिवाद:

स्वप्रकाशचैतन्यमात्रस्वरूपस्य ब्रह्मण: प्रपञ्चभ्रमहेतु: योऽयमविद्याख्यो दोष: स किं परमार्थ: उतापरमार्थ:। आद्येऽपि स ब्रह्मणो भिन्न: उताभिन्न: । आद्ये परमार्थवस्तुद्वयप्रसङ्ग: ब्रह्म अविद्या चेति । द्वितीये ब्रह्मण एव विश्वभ्रमहेतुभूतदोषत्वमुक्तं स्यात् । तथा च ब्रह्मण: नित्यत्वेन नित्यं प्रपञ्चभ्रम: प्रसजति । ब्रह्मण: सहकारिवशात् कदाचित् भ्रम: तदभावात् पश्चात् भ्रमनिवृत्ति: इति चेत् तर्हि सहकार्येव दोष इति प्राप्ताप्राप्तविवेकेन पर्यवस्यति । तत्रापि सहकारी परमार्थ: अपरमार्थो वेति विकल्पे पूर्वोक्तदोषो दुर्वार: । अविद्या अपरमार्थ: ब्रह्मभिन्ना

चेति पक्षेऽपि ब्रह्मभिन्नायास्तस्या: मिथ्यात्वेन तद्दर्शनहेतुदोषत्वं ब्रह्मण एव स्यात्। ब्रह्मणश्च नित्यत्वेन अविद्याया: नित्यं प्रकाशप्रसङ्गेन तत्त्वज्ञानं नोत्पद्येत।

किं च किमविद्या प्रकाशते न वा। न प्रकाशते चेत् शशविषाणवत् तस्या: तुच्छत्वं स्यात्। प्रकाशते चेत् - स: अविद्याया: प्रकाश: किमविद्यास्वरूपम् उत ब्रह्मस्वरूपम् अथ अविद्याया: ब्रह्मणो वा धर्म:, उतान्य: कश्चित्। नाद्य:, स्वात्मकप्रकाशरूपत्वेन अविद्याया: ब्रह्मवत् सत्यत्वप्रसङ्गात्। न द्वितीय:। अविद्याप्रकाशस्य ब्रह्मरूपत्वे ब्रह्मण: नित्यत्वेन अविद्याप्रकाशोऽपि नित्य: स्यात्। तथा च मोक्ष एव न स्यात्। नापि तृतीय:। अविद्याप्रकाशस्य ब्रह्मधर्मत्वे अविद्याधर्मत्वे च ब्रह्माविद्ययो: ज्ञातृत्वप्रसङ्गात्। प्रकाशाश्रयस्यैव ज्ञातृत्वात्। न चाध्यस्तं ज्ञातृत्वमुभयो: अङ्गीक्रियत इति वाच्यम्। ज्ञातृत्वाध्यासस्याविद्याहेतुकत्वेन अन्योन्याश्रयणात्।

किं चेयमविद्या निराश्रया वा साश्रया वा। आद्ये ब्रह्म निराश्रयं यथा सत्यं तथा अविद्याया: सत्यत्वं वा, निराश्रयं शशशृङ्गं यथा तुच्छं तथा तुच्छत्वं वा प्रसज्येत। द्वितीये योऽसाव-विद्याश्रय: स किं ब्रह्मस्वरूपम्, उतोपहितं ब्रह्म, अथ वा स्वतन्त्रोऽन्य:। न प्रथम:। नित्यशुद्धस्य ब्रह्मस्वरूपस्य अविद्यारूपाशुद्ध्याश्रयत्वासंभवात्। न द्वितीय:। उपहितं ब्रह्मैवाविद्याश्रय इत्यत्र किं स उपाधि: अविद्यान्तरम् उतान्य: उभयथापि तस्य सत्यत्वाङ्गीकारे अपसिद्धान्त:। मिथ्यात्वे तु तस्योपाधे: निराश्रयत्वे ब्रह्मवत् सत्यत्वपत्त्या साश्रयत्वे वाच्ये केवलब्रह्मण: तदाश्रयत्वे शुद्धिविरोधात् उपहितस्यैव तदुपाध्याश्रयत्वे तदुपाध्याश्रयत्वमपि पूर्ववत् उपाध्यन्तरोपहितस्यैवेत्यनवस्था। अन्ये च बहवो दोषा: ग्रन्थतोऽवसेया:। रेखामात्रं प्रदर्शितम्।

(४२) मायाविद्याविभागभङ्गवाद:

अविद्याप्रसङ्गात् परसंमत: मायाविद्याविभाग: अत्र दूष्यते।

अत्राहु: - ब्रह्मण: अविद्याश्रयत्वे सदोषत्वप्रसङ्गात् ब्रह्मणो नाविद्या, किं तु मायैव। सा च ऐन्द्रजालिकादिष्विव न दोष इति।

तत्रोच्यते । मायाया: अविद्यामोहनीयपरदर्शनादिरूपव्यामोहहेतुत्वेन अविद्यात्वं पर्यवस्यति । ततश्च तत्र मायाशब्द: उपचारमात्रमिति न मायाशब्दप्रयोगमात्रात् ब्रह्मणो निर्दोषत्वसिद्धि: । तथा हि -

ब्रह्मजीवयो: निर्दोषत्वसदोषत्वनिर्वाहकत्वेनाभिमतयो: मायाविद्ययो: को विशेष:। परव्यामोहहेतु: माया, स्वाश्रयव्यामोहहेतुरविद्येति चेत् - न। किं परकर्मकदर्शनाभावेऽपि तेषां व्यामोहनम्, उत तद्दर्शने । न प्रथम: । असंभवात् । नहि मायाविन: परानदृष्ट्वा तान् व्यामोहयन्ति । न द्वितीय:। ब्रह्मण: परकर्मकं दर्शनं किं स्वभावत एव भवति, किं वा अविद्यया, अथ वा मायया । नाद्य: । निर्दोषदर्शनविषयतया व्यामोह्यानां परेषां जीवानां सत्यत्वप्रसङ्गात् । ब्रह्मण: स्वाभाविकज्ञातृत्वप्रसङ्गाच्च । न द्वितीय: । ब्रह्माज्ञानवादप्रसङ्गात्। तस्य च वादान्तरे निरासात् । किं च ब्रह्माज्ञानपक्षे तेनाज्ञानेनैव मायाकार्यनिर्वाहे अज्ञानातिरिक्तमायाङ्गीकारो न युक्त: । नापि तृतीय: । परेषु दृष्टेषु तन्मोहनमात्रोपकरणत्वान्मायाया: परदर्शनहेतुत्वासंभवात् ।

ननु विपरीतदर्शनहेतु: अविद्या । सत्यत्वेन रूपेण मिथ्यार्थप्रतीतिहेतुरविद्येति यावत्। यथा शुक्तिरजतादिभ्रमहेतुरविद्या । माया तु ब्रह्मण: न विपरीतदर्शनहेतु: । ब्रह्मव्यतिरिक्तस्य मिथ्याभूतस्य प्रपञ्चस्य मिथ्यात्वेनैव ज्ञापनादिति चेत् - न । ब्रह्म स्वव्यतिरिक्तं मिथ्याभूतं जगत् किं स्वगतो यो भ्रम: तद्विषयत्वात् इदं मिथ्येति मिथ्यात्वेन जानाति, उत परगतो यो भ्रम: तद्विषयत्वात् मिथ्येति जानाति, अथ वा भ्रमविषयत्वमजानदपि मिथ्यात्वेन जानाति । नाद्य: । ब्रह्माज्ञानस्य दुस्त्यजत्वात् । न द्वितीय: । तत्र परानदृष्ट्वा तद्गतभ्रमविषयतया मिथ्यात्वं जानाति वा, तान् दृष्ट्वा वा । आद्ये परेषामदर्शने तद्भ्रमसिद्धत्वं ज्ञातुं न शक्यते । द्वितीये परदर्शनहेतुभूता अविद्या स्वीकरणीयेति ब्रह्माज्ञानवादोऽपरिहार्य: । न तृतीय: । भ्रमविषयत्वाज्ञाने मिथ्यात्वस्य दुर्ग्रहत्वात् । न हि असत्त्वमात्रं मिथ्यात्वम् । अपि तु स्वात्यन्ताभावसमानाधिकरणतयां प्रतीयमानत्वम् । तदेव च भ्रमविषयत्वम् ।

ननु यद्यपि परदर्शनं विना परव्यामोहनं न संभवति, मिथ्याभूतस्य परस्य दर्शनं च दोषं विना न संभवति । स च दोष: मायैव नाविद्या । मायाया अविद्यायाश्च लक्षणभेदात् । तथा हि

अपुरुषार्थभूतं यत् अपरमार्थदर्शनं तद्धेतुः अविद्या। पुरुषार्थभूतं यत् अपरमार्थदर्शनं तद्धेतुर्माया। ब्रह्मणस्तु माया व्यामोहनीयान् प्रकाशयन्ती नापुरुषार्थतया प्रकाशयति, शोकाद्यजनकत्वात्। अपि तु पुरुषार्थतयैव प्रकाशयति। अतो मायाया नाविद्यात्वम्। तथापि ब्रह्मणोऽनर्थावहो दोष एवास्माकं परिजिहीर्षितः। माया तु ब्रह्मणो नानर्थावहा इति चेत् - न।

यदि ब्रह्मणो माया पुरुषार्थतया परान् दर्शयेत्, तदा तस्या दोषत्वमेव न स्यात्। दोषत्वे चापुरुषार्थत्वमवर्जनीयम्। न हि अनिष्टस्य कस्यचित् संबन्धं विना दोषत्वमुपपादयितुं शक्यते। अतो मायाविद्याविभागो न संभवति परमते।

(४३) निवर्तकानुपपत्तिवादः

अद्वैतज्ञानस्याविद्यानिवर्तकत्वं न संभवतीत्यत्र वादे निरूप्यते।

ये तावत् अद्वैतज्ञानादेव ब्रह्मविषयकाज्ञाननिवृत्तिरिति वदन्ति, तान् प्रति ब्रूमः। अद्वैतज्ञानं (१) किं ब्रह्मस्वरूपभूतज्ञानात् भिन्नम् (२) उताभिन्नम्, (३) यद्वा भिन्नाभिन्नम् (४) उतानुभयात्मकम्। न प्रथमः। तद्धि निर्विषयं सविषयं वा। आद्ये तस्य ज्ञानत्वं न स्यात्। ब्रह्मस्वरूपात् भिन्नस्य वृत्तिरूपस्य ज्ञानस्य भवद्भिः सविषयकत्वनियमस्वीकारात्। द्वितीये कस्तस्य विषयः। (१) किं ब्रह्मस्वरूपम् (२) उत तदेवाविद्योपहितम् (३) यद्वा तदतिरिक्तम् (४) तदतिरिक्तस्य मिथ्यात्वं वा। नाद्यः। ब्रह्मस्वरूपभूतात् ज्ञानात् भिन्नस्य ब्रह्मस्वरूपविषयकत्वे ब्रह्मस्वरूपभूतज्ञानस्येवाविद्यानिवर्तकत्वासंभवात्, विषयवैलक्षण्यविरहात्। नापि द्वितीयः। यथा साक्षिचैतन्यमविद्याप्रकाशकत्वात् भ्रमोपकारकं तथा अविद्याशबलब्रह्मविषयकं ज्ञानमपि भ्रमोपकारकं स्यादिति तस्य भ्रमानिवर्तकत्वप्रसङ्गात्। नापि तृतीयः। ब्रह्मातिरिक्तमात्रविषयकस्य तस्य स्वयं भ्रमरूपत्वात् तद्बाधकत्वासंभवात्। नापि चतुर्थः। ब्रह्मव्यतिरिक्तस्य मिथ्यात्वं यदि अधिष्ठानयाथात्म्यग्रहमन्तरेण सुग्रहं स्यात् तदा स पक्षः शोभेत। वस्तुतः ब्रह्मव्यतिरिक्तमिथ्यात्वज्ञानस्य अधिष्ठानयाथात्म्यविषयकत्वं न संभवति। याथात्म्यस्य स्वरूपत्वेऽध्यासानुपपत्तेः। स्वरूपातिरिक्तंत्वे च सत्यत्वमिथ्यात्वविकल्पेन पूर्वमेव दूषितत्वात्।

एतावता ब्रह्मस्वरूपभूतात् भिन्नस्य ज्ञानस्य अविद्यानिवर्तकत्वरूपः प्रथमः कल्पः सविकल्पं निरस्तः । अथ ततोऽभिन्नस्य ज्ञानस्य तन्निवर्तकत्वं न संभवतीति द्वितीयकल्पः निरस्यते । ब्रह्मस्वरूपाभिन्नस्य ज्ञानस्य अविद्यानिवर्तकत्वे ब्रह्मस्वरूपस्यानादित्वेन निवर्तके तस्मिन् विद्यमाने अविद्याद्यध्यासस्याभावप्रसङ्गेन अविद्याप्रपञ्चप्रतिभासोऽपि न स्यादिति । अत एव भिन्नाभिन्नमिति तृतीयपक्षोऽपि न युक्तः । भिन्नत्वपक्षेऽभिन्नत्वपक्षे चोक्तानां दोषाणां प्रसङ्गात् ।

नापि अनुभयात्मकमिति चतुर्थपक्षः । तथाहि निवर्तकं ज्ञानं ब्रह्मस्वरूपभूतात् ज्ञानात् भिन्नमपि न भवति अभिन्नमपि न भवतीति चतुर्थकल्पपर्यवसानम् । तत्र भिन्नं न भवति चेत् अभिन्नं भवतीत्यर्थः । अभिन्नं न भवति चेत् भिन्नं भवतीत्यर्थः ततश्च भेदाभेदोभयानतिरेकात् भेदाभेदोभयपक्षे यानि दूषणान्युक्तानि तानि प्रसजन्ति ।

किं च अविद्यानिवर्तकं ज्ञानं निवर्तिष्यते न वा । आद्ये निवर्तकज्ञाननिवृत्तेः आगन्तुकत्वेन तद्धेतुभूतायाः अविद्यायाः स्थितिः स्यादिति मोक्षानुपपत्तिः । उत्तरत्र ब्रह्मस्वरूपातिरिक्तस्य निवर्तकज्ञानस्य सद्भावेन तद्धेतुभूतायाः स्थितिरवर्जनीयेति उभयतः स्पाशा रज्जुः ।

तथा च अविद्यायाः निवर्तकत्वेन संमतं यत् ज्ञानं तत्स्थित्यर्थं वा तन्निवृत्तिस्थित्यर्थं वा अविद्यास्थितेः आवश्यकत्वात् अविद्यानिवृत्तिरूपो मोक्षो न स्यात्, तद्विपरीतो बन्ध एव स्यादिति संक्षेपः ।

(४४) निवृत्त्यनुपपत्तिवादः

परमते अविद्यानिवृत्तिर्न निरूपयितुं शक्यत इति अस्मिन् वादे निरूप्यते । श्रवणमनननिदिध्यासनक्रमेण परिपक्वात् अद्वैतवाक्यार्थज्ञानादविद्यानिवृत्तिर्भवतीति । तत्र अविद्यानिवृत्तिः किंरूपा । अध्यासरूपा = मिथ्या वा न वा । आद्ये अविद्यानिवृत्तेर्मिथ्यात्वे तदध्यासमूलभूतायाः अविद्यायाः सत्त्वात् निःशेषविद्यानिवृत्तिः कथं घटते । मिथ्याभूतं सर्वमविद्योपादानकमिति भवत्सिद्धान्तात् । द्वितीये सत्यभूतायाः अविद्यानिवृत्तेः

ब्रह्मस्वरूपान्तर्भावे ब्रह्मस्वरूपस्यानादित्वेन अविद्यानिवृत्तिरप्यनादि: स्यात् । तथा च अविद्यास्वरूपमेव कदापि न संभवेत् । तस्या: ब्रह्मस्वरूपबहिर्भावे सत्यभूतद्वितीयवस्तुमत्त्वं ब्रह्मण: स्यात् ।

ननु अविद्यानिवृत्तिर्न सती । ब्रह्मव्यतिरिक्तत्वात् । नापि सदसदात्मिका । परस्परविरुद्धयो: सत्त्वासत्त्वयो: एकत्रासंभवात् । नापि सदसद्विलक्षणा । मोक्षदशायां सकलप्रपञ्चनिवृत्ते: वक्तव्यतया सदसद्विलक्षणाया: अविद्यानिवृत्तेरपि सदसद्विलक्षणप्रपञ्चरूपतया अविद्यानिवृत्तेरपि निवृत्तेर्वक्तव्यतया व्याघातात् । अत: परिशेषात् अविद्यानिवृत्ति: असती वा स्यात् तामपि कोटिं परित्यज्य पञ्चमकोटिर्वा स्यात् इति चेत् - न । तत्र असतीत्यनेन किं भावरूपत्वं विवक्षितम् उत निरुपाख्यत्वम् । नाद्य:, भावान्तरमभाव इति न्यायेन सद्भिन्नस्य भावान्तरस्य विवक्षायां ब्रह्मण: सद्वितीयत्वप्रसङ्ग:। अतिरिक्ताभावविवक्षायां च तेनैवाभावेन तत्प्रतियोगिना च ब्रह्मण: सद्वितीयत्वप्रसङ्ग: । न द्वितीय: । अविद्यानिवृत्ते: निरुपाख्यत्वे शशशृङ्गादेरिव अकादाचित्कत्वप्रसङ्ग: ।

अतोऽविद्यानिवृत्ते: स्वरूपाद्यनुपपत्तिरिति स्थितम् ।

(४५) शब्दावेद्यत्वभङ्गवाद:

ब्रह्माश्रयमज्ञानं निराकृतम् । ब्रह्मण: शब्दावाच्यत्वमत्र वादे निराक्रियते । अत्र पूर्वपक्षे ब्रह्मण: सामान्येन वृत्तिविषयत्वं मुख्यवृत्तिविषयत्वं बोध्यसमानसत्ताकवृत्तिविषयत्वं च निराक्रियते । तथा हि - शक्यतावच्छेदकलक्ष्यतावच्छेदकसादृश्यानि निमित्तानि विना शब्दस्य वृत्तिरेव न संभवति । यथा गोत्वरूपशक्यतावच्छेदकसद्भावात् गवि गोशब्दस्य शक्ति:, लक्ष्यतावच्छेदकस्य तीरत्वस्य सत्त्वात् तीरे गङ्गाशब्दस्य लक्षणा, अग्निसादृश्यस्य माणवके सत्त्वात् अग्निशब्दस्य माणवके लक्षणा, तथा ब्रह्मणि उक्तविधानां निमित्तानाम् अभावात् तत्र शब्दस्य शक्तिर्लक्षणा वा न संभवति । किं च यत्र वेद्यत्वमेव नास्ति तत्र कथं वेदकस्य शब्दस्यावकाश: । अपि च स्वयमेव प्रकाशमाने वस्तुनि प्रकाशकशब्दापेक्षा नास्ति । किं च यद्यत् शब्दवाच्यं तत् सर्वं घटादिकं सविशेषं दृष्टम् ।ब्रह्म तु निर्विशेषम्, अतो न शब्दवाच्यम्।

तथा च ब्रह्म शब्दावाच्यम् निर्विशेषत्वात्, यन्नैवं तन्नैवं यथा घटः। किं च ब्रह्मणः शब्दवाच्यत्वे आगमबाधश्च। ''यतो वाचो निवर्तन्ते'' ''न शब्दगोचरो यस्य योगिध्येयं परं पदम्'' इत्यादि-श्रुतिस्मृतिवचनानि आगमशब्दविवक्षितानि इत्याहुः।

अत्र ब्रूमः। यदुक्तं निर्विशेषे ब्रह्मणि निमित्ताभावात् न शब्दवृत्तिरिति, तत्र ब्रह्मणः सविशेषत्वोपपादनादेव हेतुरसिद्धः। यथा च निमित्तं निमित्तान्तरं विनापि शब्दवाच्यं भवति तथा ब्रह्मस्वरूपमपीति चिन्त्यताम्। यत्तु अवेद्ये वेदकानां नावकाशः, न च स्वयंप्रकाशे प्रकाशकापेक्षेति। तन्न। स्वप्रकाशस्यापि ज्ञानान्तरवेद्यत्वं भवतीति वादान्तरे स्थापितत्वात्। ''यतो वाचो निवर्तन्ते'' इत्यादिश्रुतिरपि न ब्रह्मणः शब्दवाच्यतां बाधते। तस्याः शतगुणितोत्तरक्रमेण ब्रह्मगुणानन्त्यं प्रतिपाद्य तथाविधापरिच्छेद्यत्वनिबन्धनवाङ्निवृत्तिप्रतिपादनरूपत्वात्। ब्रह्म वाचा मनसा वा परिच्छिद्य ज्ञातुं न शक्यत इत्येव तदर्थः। एतेन स्मृतयोऽपि व्याख्याताः। ब्रह्मणः शब्दवाच्यत्वसाधकानि ''तस्मादुच्यते परं ब्रह्म'' ''तस्योदिति नाम'' ''तस्योपनिषत् अहरित्यधिदैवतम्'' उपनिषत् = रहस्यनामेत्यर्थः। ''सर्वाधारं धाम विष्णुसंज्ञम्'' ''वचसां वाच्यमुत्तमम्'' इत्यादीनि परःशतानि श्रुतिस्मृतिवचनानि सन्ति। अतः सर्वश्रुत्याद्यविरोधाय अपरिच्छेद्यमाहात्म्यनिबन्धनैव ब्रह्मणि वाचोनिवृत्त्युक्तिः। अपि च - ब्रह्म अवाच्यमिति भवद्भिरुच्यते। तत्र अवाच्यमिति शब्देन ब्रह्म वाच्यं न वा। वाच्यं चेत् ब्रह्मणः वाच्यत्वमायातम्। अवाच्यमिति शब्देन न वाच्यं चेत् तथापि ब्रह्म वाच्यमेव भवति। यत् अवाच्यशब्दवाच्यं न भवति तस्य वाच्यत्वनियमात् इति संक्षेपः।

(४६) निष्प्रपञ्चीकरणनियोगभङ्गवादः

अत्राहुरद्वैत्येकदेशिनः - सर्वशब्दानां कार्य एव प्रामाण्यात् वेदान्तानामपि नियोगाख्यकार्यपरत्वं वक्तव्यम्। नियोगो नाम कृतिसाध्यमपूर्वम्। पुरुषान् स्वस्मिन् नियुङ्क्त इति नियोग इति व्युत्पत्तेः। शब्दानां सिद्धे प्रामाण्येऽपि प्रयोजनपर्यवसानार्थं कार्यपरत्वं वक्तव्यम्। परमपुरुषार्थभूतब्रह्मप्रतिपादनेन सद्यः प्रीतिहेतुतया प्रयोजनपर्यवसानसंभवेऽपि तस्य प्रयोजनस्य काव्यनाटकादिवत् अतत्त्वप्रतिपादनेनापि उपपत्तेः ब्रह्मणि प्रामाण्यं न स्यादिति।

अपि चाविद्यासंसर्गात् अशुद्धस्य ब्रह्मणः शुद्ध्यर्थतया विधेः संस्कारकर्मत्वं निष्प्रपञ्चताकरणनियोगविषयकत्वं चेति ।

अत्रोच्यते । सिद्धेऽपि प्रामाण्यस्थापनात् ब्रह्मणश्च निरतिशयानन्दरूपतया तत्प्रतिपत्तेः स्वयंप्रयोजनत्वात् प्रामाण्यस्वतस्त्वस्थापनेन प्रामाण्यस्यापि तत्र सिद्धेः न कार्यपरत्वस्यावश्यकता । अपि च निष्प्रपञ्चताकरणविषयकविधिवाक्यासंभवात् सपरिकरनियोगासिद्धिश्च । न हि निष्प्रपञ्चं ब्रह्म कुर्यादिति विधिवाक्यमधीमहे । न वा तादृशस्मृत्यादिवचनमस्ति । नाप्याचारो दृश्यते ।

ननु ''मृत्योः स मृत्युमाप्नोति य इह नानेव पश्यति'' इत्यादिभिः नानात्वदर्शननिन्दावचनैः, ''नेह नानास्ति किंचन'' इत्यादिभिः नानात्वनिन्दावचनैः ''निर्गुणं निष्क्रियम्'' इत्यादिभिः निर्गुणत्वप्रतिपादकश्रुतिभिः मायोपादानत्वान्यथानुपपत्त्या चानुगृहीतः ''न दृष्टेर्दष्टारं पश्येः'' इत्यादिविधिरेव निष्प्रपञ्चीकरणे प्रमाणम् । यद्यप्ययं विधिः द्रष्टारमेव निषेधति न सकलप्रपञ्चम्; तथापि तस्य विधेः उपलक्षणपरतया द्रष्टृदृश्यादिसकलभेदशून्यं दृशिमात्रं ब्रह्म कुर्यादिति नियोगे तात्पर्यमिति स एव विधिः निष्प्रपञ्चीकरणनियोगरूपे प्रकृतार्थे प्रमाणम् । नित्यसिद्धस्यापि ब्रह्मणः निष्प्रपञ्चतारूपेण साध्यत्वमप्यविरुद्धमिति चेत् - मैवम् । अनुग्राहकत्वेनाभिमतानां नानात्वदर्शननिन्दादीनां सर्वेषां वादान्तरेषु दूषितत्वात् तत्रेदानीमुदास्यते । यस्तु तैरनुगृहीतो ''न दृष्टेर्द्रष्टारं पश्येः'' इति विधिः तत्स्वरूपं विचारयामः । कोऽत्र विधौ ब्रह्मवाचकः शब्दः? कश्च तस्य ब्रह्मणः निष्प्रपञ्चीकरणवाचकः शब्दः । ननु ''न दृष्टेद्रेष्टारं पश्येः'' इत्यादि विधिवाक्ये विद्यमानाः दृष्टिमतिश्रुत्यादिशब्दाः ज्ञानस्वरूपब्रह्मवाचकाः, द्रष्टृमन्तृप्रभृतिदर्शननिषेधः निष्प्रपञ्चीकरणवाचकः इति चेत् - किं मुख्यवृत्त्या सिद्धोऽयमर्थः, उत वाक्यार्थानुपपत्त्या लक्षणावशात् सिद्धः, किं वा भवत्सैद्धान्तिकसंकेतवशात् सिद्धः । नाद्यः, दृष्टिमत्यादिशब्दानां ब्रह्मशब्दपर्यायत्वाभावेन ब्रह्मवाचकत्वाभावात्।दृष्ट्यादिशब्दा हि चक्षुरादिकारणकज्ञानवाचकाः। न द्वितीयः । लक्षणाबीजभूतायाः वाक्यार्थानुपपत्तेरभावात्। नापि तृतीयः । अतिप्रसङ्गात्। परसिद्धान्तसंकेतवशादपि भवत्पक्षस्य भङ्गप्रसङ्गात् ।

अथ सपरिकरनियोगासिद्धिं ब्रूमः । तथा हि – नियोगवाक्यार्थवादिना नियोगः, नियोज्यः नियोज्यविशेषणं, विषयः, करणम्, इतिकर्तव्यता, प्रयोक्ता च वक्तव्याः । नियोगः अपूर्वम् । ममेदं कार्यमिति यो बुध्यते स नियोज्यः प्रेर्यः । तस्य विशेषणं निमित्तं फलकामना च । विषयः नियोज्यं विशिंषन् यागादिः । कृतिसाध्यापूर्वप्रतिपत्तिबेलायां कृत्यवच्छेदकत्वेन स विषयः ।करणं यागादिः । इतिकर्तव्यता करणोपकारकम् । प्रयोक्ता अनुष्ठाता ।स्वर्गकामनियोज्यकं सेतिकर्तव्यताकयागकरणकयागविषयककृतिसाध्यमपूर्वमिति स्वर्गकामो यजेतेति वाक्यार्थ इति वर्णयन्ति प्राभाकराः । तत्रापूर्वाख्यो नियोगः फलाधिकरणे निरस्तः । नियोज्यं तावन्न ब्रह्म । त्वन्मते तस्याज्ञत्वेन प्रेर्यत्वायोगात् । अस्मन्मते सर्वज्ञत्वेन सर्वप्रेरकत्वेन च तस्यानियोज्यत्वात् । अज्ञत्वादेव अविद्यापि न नियोज्या । नियोज्यविशेषणमपि प्रकृते ब्रह्मयाथात्म्यानुभव इति वक्तव्यम् । स किं निमित्ततया विशेषणं फलतया वा । नाद्यः, जीवनपुत्रजन्मादिवत् तस्य पूर्वमसिद्धत्वात् । सिद्धत्वे वा किं नियोगेन । तत एव तत्फलस्य सिद्धेः । न द्वितीयः ब्रह्मयाथात्म्यानुभवस्य पूर्वं सिद्धस्य कथं फलत्वम् । कश्चात्र नियोगविषयः। न तावत् बह्म। तस्य नित्यत्वेन अभाव्यत्वात् अधात्वर्थत्वाच्च।तथा करणमपि दुर्वचम् । प्रपञ्चनिवृत्तिः करणमिति न वाच्यम् । तस्याः फलत्वात् । एवं करणभूतायाः प्रपञ्चनिवृत्तेः इतिकर्तव्यता च दुर्लभा ।

तदेवं विधायकादर्शनात् सपरिकरनियोगानुपपत्तेश्च निष्प्रपञ्चब्रह्मविषयको विधिर्न संभवतीति सिद्धम् ।

(४७) विकल्पाप्रामाण्यभङ्गवादः

अद्वैत्येकदेशिनः सविशेषविषयकस्य सविकल्पकस्य प्रामाण्याङ्गीकारे ब्रह्मणः सविशेषत्वं सिध्येदिति भीत्या सर्वमपि सविकल्पकमप्रमाणमित्यास्थिषत । तन्निरसनार्थोऽयं वादः ।विप्रतिपन्नं सविकल्पकज्ञानम् मिथ्याविषयकम् सविकल्पकत्वात् शुक्तिरजतादिभ्रमात्मकसविकल्पकवत् इत्यनुमानेन विकल्पे भासमानानां जात्यादिविशिष्टानां मिथ्यात्वे सति अर्थात् जात्यादिविशिष्टस्य प्रपञ्चस्य मिथ्यात्वेन ब्रह्मैव परमार्थ इति अद्वैतसिद्धिरिति तेषामाशयः ।

तत्रोच्यते। पक्ष-साध्य-हेतु- अनुमितिपरामर्शादयः कथं सिध्यन्ति ।निर्विकल्पकेन वा सविकल्पकेन वा। नाद्यः निर्विकल्पकविषयाणां तेषां शब्देनाभिलपितुमशक्यत्वात् ।न द्वितीयः ।सविकल्पकविषयतया पक्षादीनां सिद्धौ य एते पक्षादिविषयकाः विकल्पाः तेऽपि किं पक्षीक्रियन्ते, उत तदतिरिक्ताः। नाद्यः,व्याघातात् । तथा हि- पक्षादिविषयकसविकल्पकानां मिथ्याविषयकत्वग्राहकानुमितेः मिथ्याविषयकत्वे पक्षादिविकल्पानामबाधितविषयकत्वे पर्यवसानात् व्याघातः । अपि च आश्रयग्राहिविकल्पस्य मिथ्याविषयकत्वे आश्रयासिद्धिः । हेतुग्राहिविकल्पस्य मिथ्याविषयकत्वे हेत्वसिद्धिः । नापि द्वितीयः। मिथ्याविषयकत्वरूपसाध्याभाववत्सु पक्षादिविषयकसविकल्पकेषु विकल्पत्वरूपहेतुसत्त्वेन व्यभिचारात्।

किं च निर्विकल्पकस्य परमबाधितविषयकत्वं (प्रामाण्यं) केनगृहीतम्, सविकल्पकेन वा निर्विकल्पकेन वा। नाद्यः, निर्विकल्पकप्रामाण्यग्राहकसविकल्पकस्यापि विकल्पत्वेन मिथ्याविषयकतया तद्विषयस्य प्रमाण्यस्य मिथ्यात्वात् निर्विकल्पकप्रामाण्यासिद्धिः । न द्वितीयः । स्वगतप्रमाण्यग्रहणे स्वस्य असामर्थ्यात्।स्वगतप्रामाण्यं स्वेन यदि गृह्येत तदा प्रामाण्यविशिष्टस्वग्राहकतया निर्विकल्पकस्य सविकल्पकत्वप्रसङ्गः ।

अपि च विकल्पः विसंवादी- मिल्थ्याविषयकः विकल्पत्वादित्यनुमाने साध्यभूतं विसंवादित्वं सप्तधा विकल्प्य दूषणमुक्तं ग्रन्थे । तत् तत एवावसेयम् । तथा विकल्पत्वरूपहेतुदूषणमपि विकल्पपूर्वकं ग्रन्थे विस्तृतम् । किं च -

विकल्पाविषयत्वं चेत् ब्रह्मणः प्रतिपाद्यते ।
श्रोतव्यादिविधीनां स्यादश्रोतव्यत्वमेव ते ॥

श्रवणादीनां विशिष्टप्रत्ययत्वेन विकल्पाविषये ब्रह्मणि असंभवात् श्रवणादिविधीनामप्रमाण्येनानुपादेयत्वं स्यात् । तथा च ब्रह्मण; श्रोतव्यत्वाङ्गीकारे ब्रह्मविषयकं सविकल्पकमङ्गीकरणीयम् । ततश्च विकल्पो मिथ्याविषयकः विकल्पत्वात् इत्यनुमानेन ब्रह्मविषयकविकल्पस्य मिथ्याविषयकत्वे ब्रह्मणः मिथ्यात्वं स्यादिति संक्षेपः ।

(४८) उपबृह्मणवैघटत्ववादः

स्मृतिपुराणादीनामपि विशिष्टविषयकत्वेन निर्विशेषविषकत्वाभावात् विकल्पस्याप्रामाण्ये तेषामुपबृंहकत्वं न स्यादिति निरूप्यतेऽत्र वादे।

पूर्वेषु वादेषु अशेषापि श्रुतिपरिषत् विशिष्टविषयेति निरणैष्म। तदा श्रुतिपरिषदुपबृह्मणानि श्रुतिविरुद्धतया निर्विशेषप्रतिपादकानीति कथं विश्वसिमः। यदा पुनः भवन्तः सा श्रुतिपरिषत् निर्विशेषपरेति आलोचयन्ति, तदा श्रुतिपरिषदः स्मृत्यादिभिः उपबृह्मणं नाम किंरूपम्? श्रुत्युक्तानुवादमात्रं वा श्रुतिप्रतिपादितार्थस्पष्टीकरणं वा श्रुतिपरिषदनुक्तार्थवर्णनं वा इति विकल्पयामः।

तत्र न प्रथमः। श्रुत्युक्तानुवादमात्रे उपबृह्मणत्वप्रसिद्ध्यभावात् उक्तार्थकथने प्रयोजनाभावाच्च। न द्वितीयः। निर्विशेषं ब्रह्मेति पक्षे स्पष्टीकरणायोगात्। तथा हि-किं निश्चयमात्रं स्पष्टीकरणम्, उत सामान्यतः प्रतिपन्नस्य अतिरिक्तविशेषाकारनिश्चयः। नाद्यः। यत् निर्विशेषं तत् श्रुत्यैव निश्चितमिति न निश्चयार्थमुपब्रह्मणावश्यकतेति। द्वितीये अतिरिक्ताकारःकिं सत्त्यः उत मिथ्या। नाद्यः, सत्यस्यातिरिक्ताकारस्य उपबृंहणेन बोधने उपबृंहणीयश्रुतेः उपबृंहणस्मृत्यादीनां च परस्परं विरोधप्रसङ्गात्। न द्वितीयः। मिथ्याभूतस्यातिरिक्ताकारस्य बोधनेऽपि तत्त्वावेदकश्रुतेः अतत्त्वावेदकस्मृत्यादिकं कथमुपबृंहणं स्यादिति।

नापि श्रुत्यनुक्तार्थवर्णनमुपबृंहणमिति तृतीयः कल्पो युक्तः। अनुपबृंहणत्वादेव। अनुक्तार्थान्तरप्रतिपादकस्याप्युपबृंहणत्वे परस्परभिन्नार्थप्रतिपादकेषु वेदभागेष्वेव परस्परोपबृंहणत्वप्रसङ्गात्।

ननु भवन्मतेऽपि स्मृतिपुराणादिभिः न श्रुतिप्रतिपन्नांशस्योपबृंहणमावश्यकम्। तदंशे भवदुक्तन्यायेन उपबृंहणस्य वैयर्थ्यात्। न च श्रुत्यप्रतिपन्नांशे। तद्विषयकत्वे श्रुतिमूलकत्वाभावेनाप्रामाण्यप्रसङ्गात्। तस्मात् भवन्मतेऽप्युपबृंहणानुपपत्तिस्तुल्येति चेत्नैवम्। अस्मन्मते ब्रह्मणोऽनन्तगुणविभूतिविशिष्टतया कतिपयगुणविभूतीनामस्मदधीतवेदभागेषूपलम्भेऽपि

अनधीतवेदभागेषु अधिकगुणविभूतीनामुपलम्भात् तद्बोधनाय, अनन्तशाखायुक्ते महति वेदवृक्षे यत्र क्वचित् कोटरे लीनानामस्माभिरज्ञातानां गुणविभूतीनां बोधनाय च योगिनां महर्षीणां स्मृत्यादिप्रणयनस्य उपपत्तेः।

(४९) ऐक्योपदेशान्यथानुपपत्तिवादः

पूर्ववादे परमते उपबृंहणवैघट्यमुक्तम्। अत्र तूपबृंहणीयोपदेश एव न संभवतीत्युच्यते। यदाहुः - ''तत्त्वमसि'' ''क्षेत्रज्ञं चापि मां विद्धि'' इत्यादेः जीवब्रह्मैक्योपदेशस्य तत्त्वज्ञानद्वारा मोक्षार्थत्वात् श्रुतिसिद्धस्यैक्यस्य पारमार्थिकत्वात् तदन्यथानुपपत्त्या जीवब्रह्मभेदज्ञानस्य भ्रमत्वं परिशुद्धेऽपि ब्रह्मणि भ्रमोपपादकमज्ञानं च कल्पनीयम्। न चात्र ऐक्यं न प्रतीयते, न वा अविवक्षितम्। सामानाधिकरण्यस्यैक्यपरत्वात्। न च स्तुत्यर्थं जीवे ब्रह्मारोपोऽस्तु, आदित्यो यूप इतिवदिति वाच्यम्। विधिशेषत्वाभावात् तत्त्वोपदेशप्रकरणविरोधाच्च। न च जीवे ब्रह्मशब्दप्रयोगः ब्रह्मसंबन्धप्रयुक्तः लाक्षणिकोऽस्तु इति वाच्यम्। मुख्यार्थे ऐक्येऽनुपपत्त्यभावात्। यद्यप्यस्मन्मतेऽपि लक्षणा। तथापि समानाधिकरणवाक्यप्रतिपाद्यस्य मुख्यस्यैक्यस्यापरित्यागात् न लक्षणा दोषः। न च तत्त्वमसीत्यादिवाक्यं मनो ब्रह्मेत्यादिवत् दृष्टिविधिरिति वाच्यम्। ''मनो ब्रह्मेत्युपासीत'' इत्युपासनेन एकवाक्यत्वात् मनसि दृष्टिविधिराश्रीयते। तथा तत्त्वमसीत्यत्र उपासनैकवाक्यत्वाभावात् न दृष्टिविधित्वम्। ततश्च सामानाधिकरण्येन जीवपरयोरैक्ये सिद्धे सति तयोर्भेदे च प्रतीयमाने सति द्विचन्द्रदर्शनमूलभूतदोषवत् आत्मभेददर्शनहेतुरविद्या अङ्गीकरणीया। तन्मूलकभेदभ्रमोन्मूलनेन सप्रयोजनः ऐक्योपदेशः यथा चन्द्रभ्रमनिवर्तकः एकश्चन्द्र इत्युपदेशः तद्वत् इति।

अत्र ब्रूमः। यदि ऐक्योपदेशः स्वरूपैक्यं विना अनुपपन्नः स्यात् तदेव अर्थापत्त्या परिशुद्धे ब्रह्मणि अज्ञानं भेदभ्रमः तदुन्मूलनं च कल्प्येरन्। स तु ऐक्योपदेशः अन्यथापि स्वरूपैक्यं विनापि उपपन्नः, वस्तुतस्तु अन्यथैवोपपन्नः। तथा हि - सामानाधिकरण्यं शरीरात्मभावनिबन्धनमिति अखण्डार्थसामानाधिकरण्यवादे उपपादितत्वात् तथैव निर्वाहे संभवति अत्यन्तविरुद्धस्वभावयोः जीवब्रह्मणोः ऐक्यं न विवक्षितुं योग्यम्। अन्यथा अविरुद्धगति-

सद्भावेऽप्यैक्यकल्पने आदित्यो यूप इत्यत्रापि स्वरूपैक्यमेव यूपादित्ययोः, तयोर्भेदभ्रमस्तु अज्ञानमूलक इति कल्पनीयं स्यात्।

न च भेदमिथ्यात्वादेरकल्पने ऐक्योपदेशस्याप्रामाण्यं स्यादिति वाच्यम्। यदि ऐक्योपदेशस्य प्रामाण्यार्थमुपपादकापेक्षा तर्हि अस्मदभिमतेन सुघटेन शरीरात्मभावेनैव तदुपपाद्यताम्, किं दुर्घटाविद्यादिना।

किं च श्रुतौ यथा जीवब्रह्मैक्योपदेशो वर्तते तथा तद्भेदोपदेशोऽपि। तस्य भेदोपदेशस्य ऐक्यभ्रमं विना अनुपपत्त्या ऐक्यस्य भ्रमः तन्मूलभूतमज्ञानं च कुतो न कल्प्यते। तस्मात् ऐक्योपदेशस्यान्यथैवोपपत्तेः न तदन्यथानुपपत्त्या अज्ञानकल्पनमिति न युज्यत इति सिद्धम्।

(५०) परमते शास्त्राधिकारिभङ्गवादः

पूर्वमुपदेशासंभव उक्तः। तादृशोपदेशेऽधिकार्यसंभवमत्रोपपादयति।

साधनचतुष्टयं ब्रह्मविचारात् पूर्वमपेक्षितमिति वदद्भिः मुमुक्षुत्वं तावत् शास्त्राधिकारिविशेषणमिति स्वीकृतम्। सा च मुमुक्षा मोक्षो मे स्यात् इत्येवमाकारा। तथाविधा सा मुमुक्षा कस्याधिकारिणो विशेषणमिति कथयन्तु अद्वैतिनः।

(१)किं नित्यमुक्तस्वरूपस्य संविदात्मनः मुमुक्षा विशेषणम् (२) अविद्यासाक्षितामापन्नस्य तस्यैव संविदात्मनः (३) अन्तः करणप्रतिबिम्बितचिदाभासस्य (४) अन्तः करणवृत्तिसमारोपितक्रियात्वस्य चैतन्यस्य (६) यस्य कस्यचिदनभिलप्यस्य (७) न वा कस्यचिदिति।

तत्र न प्रथमः। नित्यमुक्तसंविदात्मनः नित्यमुक्तत्वादेव मोक्षेच्छाविरहात्। यो ह्यमुक्तः तस्य खलु मोक्षे इच्छा स्यात्। ननु मुक्तमप्यात्मानं बद्धमिव मन्यमानः मोक्षमिच्छतीति चेत् - नित्यमुक्तस्य बद्धत्वाभिमानोऽपि कथं स्यात्। अभिमानस्यैव संसारत्वात् तत्सत्त्वे मुक्तत्वविरोधात्।

न द्वितीय: । भवत्पक्षे साक्षित्वानुपपत्ते: अविद्यानुपपत्तेश्च वादान्तरे (२८ वा) (४१ वा) निरूपितत्वात् ।

न तृतीय: । चिदाभासस्यापि मिथ्यात्वादेव विनाशावश्यंभावात् मोक्षेच्छा न स्यात्। मयि नष्टेऽपीत्युक्तयुक्ते: । नापि चतुर्थ: । क्रियात्वेन प्रकाशमानस्य चैतन्यस्य अन्त:करणात् भेद एव गृहीत इति मोक्षेच्छाद्यसंभवात् । नापि पञ्चम: । अन्त: करणस्यापि मोक्षे नाशाभ्युपगमात् तस्य मयि नष्टेऽपीति न्यायेन मोक्षेच्छाया: असंभवात् । नापि षष्ठ: । यस्य कस्यचिदनभिलप्यस्येनेनैव तस्य मिथ्यात्वाविष्करणात् नाशस्यावश्यकतया मयि नष्टेऽपीति न्यायेन मोक्षेच्छाया: असंभवात् ।

नापि सप्तम: । मोक्षशास्त्रे मोक्षे वा कस्याप्यधिकारो नास्ति चेत् भवद्ग्रन्थे अमुक: अधिकारी अमुकमधिकारिविशेषणमिति वर्णनप्रयासनैष्फल्यं स्यात् । किं चाधिकारज्ञानपूर्वकं श्रवणादौ प्रवृत्तिर्या दृश्यते सा न स्यात् । कस्याप्यधिकाराभावे शास्त्रारम्भवैयर्थ्यं च ।

ननु भवन्मतेऽपि दोष: समान: । तथाहि - भवन्मते किमीश्वरस्य मुमुक्षा, उत जीवस्य। नाद्य:, ईश्वरस्य कारणावस्थस्य कार्यावस्थस्य अवताराद्यवस्थस्य च नित्यमुक्तत्वादेव तस्य मुमुक्षाद्यसंभवात् । नापि द्वितीय: । जीवस्यापि स्वतोऽपहतपाप्मत्वादिस्वभावत्वस्य भवता अङ्गीकारेण मुमुक्षाद्यसंभवादिति चेत् -

मैवम् । स्वत उष्णस्याप्यग्ने: मणिमन्त्रादिना औष्ण्यप्रतिबन्धवत् स्वत: शुद्धस्यापि जीवस्य कर्मवशात् शुद्धिप्रतिबन्धात् तन्निवृत्त्यर्थं इच्छाया: संभवो मम मते । न वयमशुद्धिनिवृत्तिर्वा शुद्धिप्रतिबन्धनिवृत्तिर्वा मिथ्येति वदाम:; येन नित्यमुक्तत्वादिविरोधचोद्यावकाश: । नापि वयं जीवात्मानं ज्ञप्तिमात्रस्वरूपं वदाम:, येन तस्येच्छाप्रयत्नाद्यनुपपत्ति:स्यात् । न च सर्वदा सर्वज्ञ इति वदाम:, येन क्षुद्रपुरुषार्थाभिलाषासंभवे कर्मशास्त्रस्य निर्मूलता भवेत् ।

अतो नित्यमुक्तब्रह्मात्मैक्यवादे मोक्षशास्त्राधिकारी दुर्लभ इति सिद्धम् ।

(५१) मुक्तसंविन्निर्विषयत्वभङ्गवादः

मुक्ता संवित् निर्धूतसकलविशेषविषयकत्वेनावतिष्ठत इति वदन्ति। तन्मतं निराक्रियतेऽत्र वादे। आदौ स्वमतेन मुक्तात्मसमवेतज्ञानस्य विभूतिगुणविशिष्टविषयकत्वं सप्रमाणं प्रतिपाद्यते। तथा हि - ''ब्रह्मविदाप्नोति परम्'' इत्युपक्रम्य ''परमेव्योमन्'' ''सोऽश्नुते सर्वान् कामान् सह। ब्रह्मणा विपश्चिता'' इति ब्रह्मवेदनफलत्वेन विभूतिगुणविशिष्टब्रह्मानुभव एव विस्तरेणोच्यते। ''निरञ्जनः परमं साम्यमुपैति'' इतीश्वरसाम्यप्राप्तिश्रवणाच्च मुक्तस्य सार्वज्ञादिकं सिद्धम्। ''मम साधर्म्यमागताः'' इति च भगवान् स्वयमेवाह। ''सर्वं ह पश्यः पश्यति'' इत्यादिश्रुतयश्च मुक्तस्य साक्षात् सर्वज्ञतामभिदधति। सूत्रकारोऽपि ''भोगमात्रसाम्यलिङ्गाच्च'' इत्याह। एवं स्थिते स्वप्रकाशैकस्वरूपस्य ब्रह्मणः कदाचित् स्वेतरविषयकत्वं कदाचिन्निर्विषयकत्वमिति वदन्त्यद्वैतिनः। तत्र पृच्छामः -ब्रह्मणः बन्धदशायां स्वेतरविषयकत्वं मुक्तिदशायां निर्विषयकत्वमित्यत्र किमुभयमपि सत्यम्, अथ उभयमप्यसत्यम्। उत अन्यतरत् सत्यम् अन्यतरदसत्यमिति। तत्र न प्रथमः। सविषयकत्वं निर्विषयकत्वं चेत्युभयं सत्यमिति स्वीकारे विषयः विषयी तयोः संबन्धः इत्यादिभेदस्य सत्यत्वप्रसङ्गात्।

न द्वितीयः। कदाचित् सविषयकत्वं कदाचिन्निर्विषयकत्वम् इत्येतदुभयमसत्यमिति स्वीकारे कादाचित्कत्वविशिष्टसविषयकत्वं कादाचित्कत्वविशिष्टनिर्विषयकत्वं चेत्युभयमसत्यमिति फलति। तत्र किं विशेष्ययोः सविषयकत्वनिर्विषयकत्वयोरसत्यत्वात् विशिष्टासत्यत्वमुच्यते, उत विशेषणयोः कादाचित्कत्वयोः असत्यत्वात्। तत्राद्ये विशेष्ययोः निर्विषयकत्वसविषयकत्वयोरसत्यत्वे ब्रह्मस्वरूपे निर्विषयकत्वमपि नास्ति सविषयकत्वमपि नास्तीत्यायाति। तत्र व्याघातः। भावाभावयोरन्यतरस्य निषेधेऽन्यतरस्यावर्जनीयत्वात् सविषयकत्वाभावे निर्विषयकत्वस्य, निर्विषयकत्वाभावे सविषयकत्वस्यावर्जनीयतया उभयनिषेधरूपोभयासत्यत्वासंभवात्। द्वितीये कादाचित्कत्वरूपकालसंबन्धात्मकविशेषणमात्रासत्यत्वे विशेष्ययोः निर्विषयकत्वसविषयकत्वयोः सत्यत्वे पर्यवसानात् पुनरपि व्याघात एव। एकत्र ब्रह्मणि तदुभयासंभवात्।

नापि तृतीय: । सविषयकत्वस्य सत्यत्वे तस्य नित्यत्वात् सद्वितीयत्वादयो दोषा: प्रसजेयु: । निर्विषयकत्वस्य सत्यत्वे संसाररूपविषयाभावप्रसङ्गात् संसारोपलम्भविरोध: उपदेश-वैयर्थ्यम् शास्त्रानुत्थानं संसाराभ्युपगमविरोध: वादानधिकार इत्यादयो दोषा: प्रादुर्भवेयु: ।

ननु विशिष्टाद्वैतिनां भवतां मतेऽपि जीवात्मस्वरूपं ज्ञानरूपं निर्विषयकं चेष्यते, तथा अस्मन्मतेऽपि ज्ञानस्वरूपस्य ब्रह्मण: निर्विषयत्वं कुतो न स्यादिति चेत् - उच्यते । अस्मन्मते प्रत्यगात्मस्वरूपस्य कदाचिदपि संसारदशायां वा मुक्तिदशायां वा बाह्यार्थविषयकत्वं नाङ्गीक्रियते। भवन्मते तु ब्रह्मस्वरूपस्य ज्ञानस्य संसारदशायां बाह्यार्थविषयकत्वं, मुक्तिदशायां बाह्यार्थविषयकत्वनिवृत्तिरङ्गीकृता । सा च दुर्वचेति विशेषात्।

ननु भवतां धर्मभूतज्ञानस्येव ब्रह्मस्वरूपभूतज्ञानस्य कदाचिन्निर्विषयकत्वं कदाचित् सविषयकत्वं च भवतु इति चेत् - न । अस्माभि: धर्मभूतज्ञानस्य पारमार्थिकं विषयीकरणरूपमाकारान्तरं जागरादौ, सुषुप्त्यादौ तदभावश्चाङ्गीक्रियते । भवद्भिस्तु स्वरूपातिरिक्तस्य सत्यस्य विषयीकरणरूपाकारस्यानङ्गीकारात् ब्रह्मस्वरूपमेव विषयीकरणमिति वक्तव्यम् । तस्य च मुक्तौ निवृत्तिर्दुर्वचा । स्वरूपनिवृत्तिप्रसङ्गात् ।

अत: सिद्धं न कथंचिदपि मुक्तिदशायां संविद: सर्वविषयवैमुख्यं शङ्कनीयमिति।

(५२) सगुणनिर्गुणश्रुतिव्यवस्थावाद:

निर्गुणश्रुत्यन्यथानुपपत्त्या गुणविभूतिश्रुतीनां मिथ्याविषयकत्वमिति शङ्कापरिहारार्थोऽयं वाद: प्रवर्तते । उपनिषत्सु कानिचित् ''य: सर्वज्ञ:'' इत्यादिनि वाक्यानि ब्रह्मण: सगुणत्वं वदन्ति ।कानिचित्, ''निर्गुणं निरञ्जनम्'' इत्यादीनि वाक्यानि ब्रह्मण: निर्गुणत्वं वदन्ति । आसां श्रुतीनां परस्परविरोध: आपातत: प्रतीयते । सिद्धे वस्तुनि सगुणत्वं निर्गुणत्वं वेति विकल्पस्तु न संभवति । अतो विरोधमङ्गीकृत्य निर्गुणश्रुत्या सगुणश्रुते: बाध इति परे वदन्ति । साधवस्तु विषयव्यवस्थया विरोधपरिहाररूपं सन्धिं तयो: श्रुत्यो: वदन्ति ।

अत्र पूर्वपक्षे विषयव्यवस्थया विरोधः शमयितुं न शक्यत इत्येतदर्थम् नव विकल्पान् कृत्वा निरूप्य सिद्धान्ते विषयव्यवस्था कृता। नवकल्पानामुपन्यासो बुद्धिवैशद्यार्थः।

अयमत्र सारांशः - सगुणश्रुतयः कल्याणगुणवत्त्वप्रतिपादकाः, निर्गुणश्रुतयो हेयगुणाभावविषयाः। तदुक्तं तत्त्वसारे -

यद् ब्रह्मणो गुणशरीरविकारजन्म -
कर्मादिगोचरविधिप्रतिषेधवाचः।
अन्योन्यभिन्नविषया न विरोधगन्ध-
मर्हन्ति तन्न विधयः प्रतिषेधबाध्याः॥

इति। अत्र उत्सर्गापवादन्यायः सामान्यविशेषन्यायः अपच्छेदन्यायः इत्यादीनां शिक्षणं विस्तरेण कृतम्। निर्गुणमित्युत्सर्गः सर्वज्ञ इत्यादिरपवादः। सामान्यशास्त्रस्य विहितव्यतिरिक्तविषयकत्वमुत्सर्गापवादन्यायः। ''न हिंस्यात्'' इति सामान्यशास्त्रस्य ''अग्नीषोमीयं पशुमालभेत'' इति विहितपशुहिंसातिरिक्तहिंसाविषयकत्वं, तद्वत् निर्गुणम् इति सामान्यनिषेधस्य विहितसर्वज्ञत्वादिकल्याणव्यतिरिक्तहेयगुणविषयकतया संकोचः। सामान्यशात्रस्य संनिहितविशेषे पर्यवसानं सामान्यविशेषन्यायः। यथा ''पशुना यजेत'' इत्यत्र चतुष्पाज्जातिसामान्यवाचिनः पशुशब्दस्य ''छागस्य वपायाः'' इति वाक्यशेषस्थछागरूपविशेषे पर्यवसानं तद्वत् निर्गुणमित्यत्र गुणशब्दस्य अपहतपाप्मेत्यादिवाक्यस्थापहतपाप्मत्वाद्यनुसारेण पापादिहेयगुणपर्यवसायितया निर्गुणशब्दस्य तदभावपरत्वम्। विस्तरः ग्रन्थे।

(५३) ब्रह्मोपादानत्वान्यथानुपपत्तिभङ्गः

निर्गुणत्वान्यथानुपपत्त्या गुणादिप्रपञ्चमिथ्यात्वासिद्धावपि ब्रह्मणः श्रूयमाणोपादानत्वान्यथानुपपत्त्या विश्वमिथ्यात्वं सिध्यति। ईश्वरः निमित्तकारणमात्रम्, न तूपादानकारणमपीति वादस्य निराकरणद्वारा उपादानकारणत्वमपि ब्रह्मण इति सूत्रकारेण प्रकृत्यधिकरणे समर्थितम्। तदिदमुपादानत्वं किं ब्रह्मणः मृदादेः घटादिकं प्रतीव स्वरूपतः, उत बालत्वविशिष्टशरीरकस्य-

जीवस्य युवत्वविशिष्टशरीरकं स्वं प्रतीव सूक्ष्मचिदचिद्विशिष्टत्वेन, अथ रज्जुसर्पादिवत् अविद्यावैचित्र्यनिबन्धनभ्रान्त्येति विचारणीयम्।

तत्र न प्रथमः कल्पः। मृदः घटादिरिव ब्रह्मणः प्रपञ्चः परिणाम इति स्वीकारे परिणामवत्त्वमुपादानत्वमिति स्यात् ।तथा सति ब्रह्मणो निर्विकारत्वनिर्दोषत्वप्रतिपादकश्रुतिविरोधः प्रसजति।

नापि द्वितीयः। स्वरूपत उपादानत्वाभावाद्धि विशिष्टवेषेणोपादानत्वानुधावनम्। तत्र च प्राप्ताप्राप्तविवेकेन विशेषणस्यैव उपादानत्वं भवेत् न विशेष्यस्य ब्रह्मणः। किं च सूक्ष्मचिदचिद्विशिष्टस्योपादानत्वे चित् अचित् ब्रह्मेति त्रिभिर्मिलित्वा जगदाख्यं कार्यमुत्पाद्यत इति पर्यवस्यति। तथा सति सर्वेषां कार्याणां त्रिस्वभावत्वं पर्यवस्यति, यथा शुक्लकृष्णरक्ततन्तुभिरारब्धस्य पटस्य शुक्लकृष्णरक्तस्वभावत्वं दृश्यते तद्वत्। तथा च केषांचित् चित्स्वभावत्वमेव केषांचिदचित्स्वभावत्वमेवेति व्यवस्था न स्यात्।

किं च सूक्ष्मचिदचिद्विशिष्टस्य ब्रह्मण उपादानत्वं किं श्रुतिप्रतिपन्नम्, उत कल्पितम्। नाद्यः। जगत्कारणप्रतिपादकेषु श्रुतिवाक्येषु विद्यमानानां सत् ब्रह्म आत्मा इत्यादिशब्दानां ब्रह्मस्वरूपमात्रे रूढत्वात् चिदचिद्विशिष्टवाचकत्वाभावात्। नाप्युत्तरः। तथा कल्पने प्रमाणाभावात्।

अतः तृतीयपक्ष एव स्वीकरणीयः। स पक्ष एवम् - यथा एकैव रज्जुः सर्पभूदलनाम्वुधारादिरूपेण भ्रमात् प्रतीयते, यथा चैकस्मिन्नेव गगनेऽनेकभेदभिन्नगन्धर्वनगरारम्भः, तथा निर्विशेषे स्वप्रकाशे निरंशे स्वतः शुद्धे निर्विकारे च ब्रह्मणि अविद्याख्यदोषमूलकः विचित्रचिदचिदात्मकजगदध्यास इति तत्त्वावेदकनिर्विकारजगदुपादानकारणप्रतिपादकश्रुतितात्पर्यमिति स्वीकरणीयमिति पूर्वपक्षः।

अत्रोच्यते।स्वरूपपरिणामवादः अस्माभिरपि नाङ्गीक्रियते। तथापि विरोधशतदूषितात् भवन्मतात् कतिपयविरोधदूषितभास्करादिमतमेव ज्यायः।

यत्तु सूक्ष्मचिदचिद्विशिष्टस्योपादानत्वे प्राप्ताप्राप्तविवेकेन विशेषणस्यैवोपादानत्वं पर्यवस्यतीति कथितम् ।तत्र विशेषणस्य साक्षाद्विकाराश्रयत्वमिष्टमेव। विशेष्यस्य ब्रह्मणोऽपि स्वाश्रयाश्रयत्वरूपपरंपरासंबन्धेन विकाराश्रयत्वेऽपि उपादानत्वं न प्रतिक्षेप्तुं शक्यम्। अवस्थाश्रयत्वमेव उपादानत्वम् । न तु साक्षादवस्थाश्रयत्वं गौरवात् । भवन्मतेऽ पि साक्षात् अविद्याया एव विकाराश्रयत्वम् । विकाराश्रयाविद्याश्रयत्वेन ब्रह्मण उपादानत्वम् । तथा परिणामस्य साक्षात्संबन्धेन ब्रह्मशरीरभूतद्रव्यगतत्वेऽपि तदाश्रयतया ब्रह्मण उपादानत्वं न विरुद्धम् । न चावस्थाश्रयघटाधारस्य भूतलस्यापि घटगतावस्थाश्रयत्वं स्यादिति वाच्यम् । अवस्थाश्रयवस्तुनिष्ठापृथक्सिध्दिसंबन्धावच्छिन्नाधेयतानिरूपकस्यैवावस्थाश्रयत्वात् । तादृशावस्थाश्रयत्वस्यैव ब्रह्मण उपादानताप्रयोजकत्वात् ।

यत्तु चिदचिदीश्वरैः संभूय जगदारम्भे कार्यजगदन्तर्गतानां सर्वेषां त्रिस्वभावत्वप्रसङ्ग इत्युक्तम् । तत्रोच्यते । विभक्तास्तन्तवो यदा संयुक्ता भवन्ति तदा पट इत्युच्यन्ते । तन्तुभ्योऽतिरिक्तः पटो नास्ति । संयोगविशेषविशिष्टास्तन्तव एव पटः । शुक्लष्णरक्ततन्त्वारब्धः पटोऽपि संयुक्ताः शुक्लकृष्णरक्ततन्तव एव । एवं स्थिते वियुक्तावस्थायां येषु तन्तुषु शुक्लत्वमासीत् येषु कृष्णत्वमासीत् येषु रक्तत्वमासीत् ; तेषां संयुक्तदशायामपि तेषु तेष्वेव तन्तुषु शुक्लत्व कृष्णत्वं सक्तत्वं वा व्यवस्थितम् । अतो न परस्परं संकरः इति यथादर्शनमङ्गीकार्यम् । एवं चिदचिद्विशिष्टे त्रितयसमुदायरूपे कार्येऽपि तत्तद्वस्तुगताः स्वभावाः तत्तद्वस्तुष्वेव व्यतिष्ठन्ते नान्यत्र संकीर्यन्त इति नास्माकमनिष्टं किंचित् ।

यदपि चिदचिद्विशिष्टस्य ब्रह्मण उपादानकारणत्वं किं श्रुतिप्रमाणकम्, उत युक्त्या कल्पितमिति पृष्टम् । तत्र ब्रूमः । क्वचित् श्रुतौ विशिष्टस्योपादानत्वमुक्तम्, क्वचित् श्रूयमाणस्योपादानत्वस्यान्यथानुपपत्तिरूपया अर्थापत्त्या कल्पितम्, क्वचित् वाक्यशेषेण वा शाखान्तरन्यायेन वा सिद्धम् ।

तथा हि - ''तध्देदं तर्हि अव्याकृतमासीत् तन्नामरूपाभ्यां व्याक्रियत'' इति बृहदारण्यकवाक्यम् । अत्र अव्याकृतशब्दवाच्यस्य कारणत्वमवगम्यते । अत्रत्यः अव्याकृतशब्दः न ब्रह्मस्वरूपपरः । ब्रह्मादिशब्दस्येव अव्याकृतशब्दस्य ब्रह्मस्वरूपे

रूढ्यभावात्। अव्याकृतशब्दः योगेन नामरूपव्याकरणकर्मभिन्नार्थकः। ततश्च इदं परिदृश्यमानं जगत् प्रलयकाले नामरूपविभागरहितमासीत् इत्यर्थः । अनेन प्रलयकालेऽपि सूक्ष्मयोः नामरूपविभागरहितयोः चिदचितोः सद्भाव उक्तो भवति। तथापि तत्र ब्रह्मणः का प्रसक्तिरिति चेत् - श्रूयताम्। ''तमः परे देव एकीभवति'' इति श्रुत्यन्तरे सूक्ष्मप्रकृतेस्तदा परमात्मनि लय उच्यते। लयो नाम अपृथग्भावेनेनावस्थानम्। अपि च तस्य तमसः ''यस्य तमः शरीरम्'' इति वाक्येन परमात्मशरीरत्वावगमात् ''ब्रह्म वा इदमेक एवाग्र आसीत्'' इत्यादिकारणवाक्यान्तरेषु तदानीं ब्रह्मावस्थानप्रतीतेश्च अव्याकृतचिदचिच्छरीरकब्रह्मपरः अव्याकृतशब्द इति निर्णीयते। न तु अव्याकृतशब्दः अव्यक्तप्रधानपरः। उपरि अव्याकृतमनूद्य ''स एष इह प्रविष्ट आनखाग्रेभ्यः'' इति इहशब्दनिर्दिष्टे चेतनाचेतनात्मकप्रपञ्चे अनुप्रवेशरूपव्याप्तेः उच्यमानायाः अव्यक्तेऽसंभवात्। तथा ''प्राणन्नेव प्राणो भवति वदन् वाक् पश्यंश्चक्षुः शृण्वन् श्रोत्रं मन्वानो मनः'' इत्याद्युक्तचेतनधर्माणां परमात्मन्येव संभवाच्च । अतोऽव्याकृतचिदचिच्छरीरकं ब्रह्मैवाव्याकृतशब्देनोच्यते । तदेव जगत्कारणम् । अतो विशिष्टस्य ब्रह्मण उपादानत्वे ''तद्धेदं तर्ह्यव्याकृतमासीत्'' इति श्रुतिः प्रमाणम्।

पूर्वोक्तरीत्या विशिष्टस्योपादानत्वे सिद्धे सति ब्रह्मस्वरूपंवाचिसद्ब्रह्मात्मादिशब्दैः कारणनिर्देशस्थलेऽपि श्रूयमाणस्य निर्विकारत्वस्य विशिष्टोपादानत्वं विना अनुपपत्त्या चिदचिद्विशिष्टस्यैव ब्रह्मण उपादानत्वं कल्प्यते।

अथेदानीं भवन्तं पृच्छामः अविद्योपहितस्य ब्रह्मणः उपादानत्वं किं श्रुतिप्रतिपन्नम्, उत कल्पितमिति। न प्रथमः। कारणवाक्यस्थसद्ब्रह्मात्मादिशब्देषु अविद्यागन्धस्याप्यनाघ्राणात्। न द्वितीयः। कल्पकाभावात्। न च निर्विकारत्वश्रुतिरेव कल्पिकेति वाच्यम्। अविद्यारूपविशेषणस्य कल्पने तत्कार्यस्य जगतः मिथ्यात्वं स्यात्। तच्च सर्वप्रमाणविरुद्धम्। अपि च अविद्यायां बहुविधानुपपत्तिपरिहारं कर्तुमशक्नुवद्भिर्भवद्भिः अविद्यायाः दुर्घटत्वं भूषणमित्युक्तम्। एतादृशप्रमाणविरुद्धदुर्घटाविद्याकल्पनापेक्षया अस्मदभिमतसहृदयसंवादिसमीचीनप्रक्रियाकल्पनमेव ज्याय इति संक्षेपः।

(५४) मायोपादानत्वान्यथानुपपत्तिभङ्गः

''मास्तु ब्रह्मोपादानत्वान्यथानुपपत्त्या जगतो मिथ्यात्वम्, मायोपादानत्वान्यथानुपपत्त्या तु तत्स्यादिति शङ्कापरिहारोऽत्र वादे क्रियते ।

''मायां तु प्रकृतिं विद्यात्'' इति जगदुपादानभूतायाः प्रकृतेः मायात्वकथनात् मायाशब्दस्य मिथ्यार्थकत्वात् मिथ्योपादानकस्य जगतः सत्यत्वायोगात् मिथ्यात्वं सिध्यतीत्याहुः ।

तत्र ब्रूमः - भवद्भिः प्रकृतिशब्देन जगदुपादानं निर्दिश्य तदुद्देशेन मायात्वं विधीयत इत्यभिमानेन तथोक्तम् । तत्रैव भवतां विपर्यासो जात; यतस्तस्मिन् वाक्ये मायामुद्दिश्य प्रकृतित्वं विधीयते,न प्रकृतिमुद्दिश्य मायात्वम् । ''उद्देश्यवचनं पूर्वं विधेयस्य ततः परम्'' इति न्यायात् प्रथमनिर्देशः, तथा तुशब्दश्च मायायाः उद्देश्यत्वसाधकः । न च मायामुद्दिश्य प्रकृतित्वं किमर्थं विधीयत इति वाच्यम् । ''मायां तु प्रकृतिं विद्यात्'' इत्यतः पूर्वस्मिन् वाक्ये-

''अस्मान्मायी सृजते विश्वमेतत्
तस्मिंश्चान्यो मायया संनिरुद्धः ''

इति प्रस्तुतयोः मायामायिशब्दयोः अर्थं यो न जानाति तस्य तदर्थज्ञापनाय हि

''मायां तु प्रकृतिं विद्यान्मायिनं तु महेश्वरम् ''

इति वाक्यं प्रवृत्तम् । अतो मायेति शब्देन या निर्दिष्टा सा जगदुपादानकारणतया उपनिषत्प्रसिध्दा प्रकृतिरेव । यश्च मायीति निर्दिष्टः स प्रकृत्यधिष्ठाता चिदचिच्छरीरको महेश्वरःइति वचनानुपूर्वीलभ्योऽर्थः ।

ननु मायामुद्दिश्य प्रकृतित्वविधानेऽपि मायाशब्दस्य मिथ्यार्थकत्वात् प्रकृतेर्मिथ्यात्वमेव सिध्यतीति प्रकृत्युपादानकस्य जगतोऽपि मिथ्यात्वमेवेति चेत् - न । मायाशब्दस्य मिथ्यार्थवाचकत्वाभावात् । किं तु विचित्रसृष्ट्युपकरणवाचकत्वात् । मायाशब्दस्य अनेकेष्वर्थेषु

प्रयोगदर्शनात् सर्वानुगतं प्रवृत्तिनिमित्तं वाच्यम् । मिथ्यात्वं तु न सर्वप्रयोगानुगतम्, अपि तु विचित्रार्थकरत्वम् । तथा हि - ''यज्ञो हि तस्य मायासीत्'' इति वेदे मायाशब्दो यज्ञे प्रयुक्त:। स न मिथ्यार्थक: । यज्ञस्य मिथ्यात्वासिद्धे: । तस्य माया इति सप्रतिसंबन्धिकतया मायाशब्द: प्रयुक्त: । मिथ्यात्वं च न सप्रतिसंबन्धिकम्। अत: ''तस्य मायासीत्'' इति वाक्ये विचित्रसृष्ट्युपकरणत्वेन यज्ञस्यावस्थानमेव मायाशब्दविवक्षितम् । तथा -

''यावन्त: पांसवो भूमे: संख्याता देवमायया ।''

इति काठके पठ्यते । अस्य वाक्यस्य भूमे: पांसव: देवमायया संख्याता भवन्तीत्यर्थ: । अत्र मायाशब्दस्य मिथ्यार्थकत्वे तस्य संख्यानकरणत्वं न संभवति । कुत्रापि मिथ्यार्थस्य गणनसाधनत्वादर्शनात् । अतस्तत्र ''माया वयुनं ज्ञानम्'' इति निखण्डुवशात् देवानां मायया ज्ञानेन भूमिपांसव: इयन्त इति संख्याता भवन्तीत्यर्थ: । एवं -

''मायया सततं वेत्ति प्राणिनां तु शुभाशुभम् ''
''तेन मायासहस्रं तच्छम्बरस्याशुगामिना ।
बालस्य रक्षता देहमैकैकश्येन सूदितम् ।।''
''देवमायेव निर्मिता ''

इत्यादिवचनान्यपि मिथ्यार्थकत्वे मायाशब्दस्य नोपपद्यन्ते ।किं च शुक्तिरजतादिषु मिथ्यात्वे सत्यपि मायाशब्दप्रयोगाभावात् अन्यत्र मायाशब्दप्रयोगे न मिथ्यात्वं निबन्धनम्, अपि तु विचित्रार्थकरत्वमेव ।

किं च भवद्रीत्या मिथ्यारूपा या माया तदुपादानकत्वेऽपि प्रपञ्चस्य मिथ्यात्वं न सिध्यति । ''न विलक्षणत्वात्'' इत्यधिकरणन्यायेन मिथ्याभूतादपि तद्विलक्षणस्य सत्यस्य जगत: उत्पत्तिसंभवात् । भवन्मते असत्यात् सत्योत्पत्ते: स्वीकाराच्च । अधिकं ग्रन्थे द्रष्टव्यम् ।

(५५) कार्यानुपपत्तिभङ्गवाद:

पूर्वं मायोपादानत्वान्यथानुपपत्त्या प्रपञ्चमिथ्यात्वमाशङ्क्य परिहृतम् । अथ कार्यान्यथानुपपत्त्या प्रपञ्चस्य मिथ्यात्वमाशङ्क्य परिह्रियत इति संगति: । अत्रत्या विषया:

सर्वेऽपि प्रायः आरम्भणाधिकरणश्रीभाष्ये बौद्धाधिकरणश्रीभाष्ये च स्थिताः । आचार्यपादैःविस्तृताः । ते यथाशक्ति संगृह्यन्ते ।

पूर्वपक्षः

अत्राहुः - प्रत्यक्षसिद्धं श्रुत्यादिसिद्धं च सर्वं कार्यं मिथ्यैव । विकल्पासहत्वात् ।

(१) तथा हि - किं कारणेन संबद्धं सत् कार्यमुत्पाद्यते, उतासंबद्धम् । आद्ये संबन्धाश्रयतया कार्यकारणयोः द्वयोरपि एककाले सत्त्वेन किं कस्य कारणं स्यात् । द्वितीये असंबद्धत्वाविशेषात् सर्वं सर्वस्य कारणं भवेत् ; न वा किंचित् कस्यचित् कारणं भवेत् ।

(२) कार्यं किं कारणात् भिन्नमभिन्नं वा । आद्ये भिन्नत्वाविशेषात् सर्वं सर्वतः स्यात्, न वा कुतश्चित् किंचित् स्यात् । द्वितीये कार्यस्य कारणाभिन्नत्वे आत्माश्रयः स्यात्, स्वस्य स्वाधीनोत्पत्तिकत्वात् ।

(३) कार्यं किं विकृतात् कारणादुत्पद्यते उताविकृतात् । आद्ये विकृतिरपि विकृताच्चेत् अनवस्था । द्वितीये अविकृतात् कारणात् विकृतेः कार्यस्य वा उत्पत्तौ अविकृतत्वाविशेषात् उपादानकारणं यावत्पर्यन्तमस्ति तावत्पर्यन्तं कार्योत्पत्तिप्रसङ्गः ।

(४) किं च कार्यं पूर्वमसद्वा सद्वा । आद्ये कथं कार्यं कारणेन जनयितुं शक्यम् । शिलाखण्डेषु प्रलयजलसिक्तेष्वपि अङ्कुराः न हि प्ररोहन्ति । असत उत्पत्तौ तत्रापि जलावसेकेनाङ्कुरस्य उत्पत्तिः स्यात् । द्वितीये कारकव्यापारवैयर्थ्यम् ।

(५) किं च घटादीनां कार्याणां किं भावादुत्पत्तिः, उताभावात् । नाद्यः अनुपमृदितात् मृत्पिण्डात् घटस्योत्पत्त्यदर्शनात् । मृत्पिण्डनाशादेव घटोत्पत्तेर्दर्शनात् । न द्वितीयः । अभावात् उत्पद्यमानस्य घटादेः अभावात्मकत्वप्रसङ्गात् ।

(६) एवमसंभावितोत्पत्तिविनाशवत्त्वात् उत्पत्तिविनाशवत्त्वेन भासमानं कार्यं मिथ्या इति ।

सिद्धान्त:

(१) तत्र ब्रूम: । यदुक्तं कार्यं कारणेन संबद्धं सत् आरभ्यते उतासंबद्धमिति । तत्रासंबद्धमित्येव पक्ष: । कार्योत्पत्तौ कारणानां परस्परसंबन्ध एवापेक्षित: । दण्डचक्रादीना-मेकत्र मेलने सति घटाद्युत्पत्तेर्दर्शनात् ; न तु कार्येणापि संबन्ध: कार्योत्पत्तिहेतुतया दृष्टचर:, येन तदङ्गीकुर्म: । यत्तु असंबद्धत्वाविशेषात् सर्वं सर्वत: स्यादिति, तत् तदा स्यात् यदि असंबद्धत्वमेव कार्योत्पत्तिप्रयोजकं स्यात् । न च तदस्ति । दण्डचक्रादीनां घटोत्पादन एव शक्ति:, तुरीतन्तुवेमादीनां पटोत्पादन एव शक्तिरिति व्यवस्थितकार्यारम्भकत्वस्य व्यवस्थितशक्तिमत्सु वस्तुषु अन्वयव्यतिरेकदर्शनाभ्यां निर्णयात् ।

(२) यत्तु कार्यं कारणात् भिन्नमभिन्नं वेति विकल्पितं, तत्र भिन्नमित्येव स्वीकुर्म: । दण्डचक्रादिभ्यो मृत्पिण्डाच्च भिन्नस्यैव घटस्य तत: उत्पत्तिदर्शनात् । यथादर्शनमङ्गीकार्यत्वात्। अन्यथा तर्काभासेन दृश्यमानस्य कार्यस्य निरासे मिथ्याभूतमपि कार्यं निरसितुं शक्येत । तत्रापि भिन्नमभिन्नं वेति विकल्पसंभवात् । मिथ्यात्वात् सर्वमुपपद्यत इति चेन्न । तथा राजशासनाभावात् । दर्शनादिति चेत् - तर्हि तत एवास्मत्पक्षेऽपि कारणासंबद्धं ततो भिन्नं च कार्यमिति कुतो न सेत्स्यति ।

(३) यत्तु विकृतादविकृताद्वा उपादानात् कार्यारम्भ इति विकल्पितं - तत्र विकारशब्देन यत्किंचिदागन्तुकधर्मविवक्षायां विकृतादिति ब्रूम: । सहकारिसंबन्धरूपागन्तुकधर्मयुक्तात् उपादानात् कार्योत्पत्ते: दर्शनात् । कार्यरूपेण विकृतत्वविवक्षायाम् अविकृतादिति ब्रूम:। तादृशविकारस्य पूर्वमभावात् । अविकृतात् कार्योत्पत्तौ अविकृतत्वाविशेषात् सर्वदा कार्योत्पत्तिप्रसङ्ग इति यदुक्तं, तन्न । अविकृतस्यैव सहकारिकारणसमवधानकाल एव कार्यारम्भकत्वदर्शनेन सदोत्पादकत्वाप्रसङ्गात् ।

(४) कारणे कार्यं पूर्वं सद्वा असद्वा इति यत् पृष्टं तस्य कोऽर्थ: । कार्यद्रव्यं कारणावस्थायां द्रव्यरूपेण वर्तते न वेत्यर्थश्चेत् द्रव्यरूपेण वर्तत इत्यङ्गीकुर्म: । तथापि कार्यस्य न साध्यत्वानुपपत्ति: । द्रव्यरूपेण स्थितस्यापि अवस्थारूपेण जन्यत्वोपपत्ते: । अत एव

कारकव्यापारसार्थक्यमपि । द्रव्यरूपेण सत: अवस्थारूपेण कार्यत्वमित्येतावानेवास्मदभिमत: सत्कार्यवाद: । कार्यत्वेताभिमता अवस्था पूर्वमस्ति वा न वेति पृच्छ्यते चेत्, पूर्वं सा नास्तीत्येव ब्रूम: । ननु कथमसती अवस्था जनयितुं शक्यते। न हि प्रलयोदकावसिक्तेन्वपि प्रस्तरेष्वङ्कुरा: प्रोहन्तीति चेत् - मैवम् । पूर्वमविद्यमानाया एवावस्थाया: उत्पद्यमानतया प्रत्यक्षेणोपलम्भात् यथादर्शनमङ्गीकार्यत्वात् ।

(५) यदपि भावादभावाद्वा घटाद्युत्पत्तिरिति पृष्टम् - तत्रेदं समाधानम् । सत एव मृद्द्रव्यात् घटो जायते । उपमर्दितेऽपि मृत्पिण्डे पिण्डत्वमेव निवर्तते, न तु मृद्द्रव्यम् । अपि च तन्तुभ्य: पटोत्पत्तिस्थले अनुपमृदितेभ्य एव तन्तुभ्य: पटाद्युत्पत्तेर्दर्शनात् उपमर्दितादेव कारणात् कार्योत्पत्तिरिति नास्ति नियम: ।

(६) एतेन षष्ठोऽपि प्रश्न: समाहित: उत्पत्तिविनाशसंभवस्य एतावता उपपादितत्वात्। अत: उत्पत्तौ विनाशे च सत्यपि कार्यं स्वकाले सदेव न तु मिथ्येति सिद्धम् ।

(५६) आनन्त्यनिरूपणवाद:

कार्यान्यथानुपपत्त्या प्रपञ्चमिथ्यात्वासिद्धावपि ''सत्यं ज्ञानमनन्तं ब्रह्म'' इति श्रूयमाणानन्त्यान्यथानुपपत्त्या प्रपञ्चमिथ्यात्वं भवतु इत्याक्षेपात् संगति: ।

पूर्वपक्ष:

अनन्तपदसामर्थ्यादेव ब्रह्मव्यतिरिक्तानन्तवस्तुमिथ्यात्वं सिध्यति । तथा हि - अनन्तशब्देन असंकोचात् ब्रह्मण: सर्वविधपरिच्छेदाभाव: उच्यते । परिच्छेदश्चतुर्विध: देशपरिच्छेद: कालपरिच्छेद: वस्तुपरिच्छेद: स्वरूपपरिच्छेद इति । तत्र स्वरूपपरिच्छेदो नाम गगनकुसुमादिवत् असत्त्वम् । तदभावो ब्रह्मण: सद्रूपत्वादेव ज्ञायते । सोऽपि सत्यपदेनैव लभ्यत इति अनन्तपदेन तद्विवक्षा अनावश्यकी । आवश्यकत्वेऽपि त्रिविधपरिच्छेदराहित्यमप्यवश्यमनन्तपदेन विवक्षितम् । तत्र ब्रह्मण: सर्वदेशकालवृत्तित्वात् अत्र देशे नास्ति, अत्र काले नास्तीत्येवंरूपयो: देशकालपरिच्छेदयोरभाव: सिद्ध: ।

वस्तुपरिच्छेदस्तु इदमिदं न भवतीत्येवं प्रतीयमानो भेदः । स चाश्रयप्रतियोगिविशिष्टः । तादृशभेदस्याभावः ब्रह्मणि तादृशप्रतीतिविषयाणां भेदतत्प्रतियोगितदाश्रयाणां सर्वेषामभावाद्वा, तदन्यतमाभावाद्वेति पर्यालोचनीयम् । आद्ये शून्यवादप्रसङ्गः । द्वितीये ब्रह्मणः सर्ववस्तुतादात्म्यात् सर्ववस्तुभेदाभाव इत्युच्यते वा स्वव्यतिरिक्तस्य सर्वस्य मिथ्यात्वाद्वा स्वस्य तुच्छत्वाद्वा भवितुमर्हतीत्युच्यते वा । तत्राद्यः पक्षः भास्करादीनामेव मते युज्यते । तादात्म्यं हि भेदसहिष्णुरभेदः । स च भेदाभेदयोः विरोधं बहुमन्यमानानामेव युज्यते । ब्रह्मणः तुच्छत्वादिति तृतीयपक्षोऽपि ईश्वरानङ्गीकर्तृणां चार्वाकाणां निरीश्वरमीमांसकानां च मते युज्यते । अतः स्वव्यतिरिक्तसमस्तमिथ्यात्वादिति द्वितीयः पक्षः परिशिष्यते । अतस्तदेव वस्तुपरिच्छेदराहित्यम् ।

सिद्धान्तः

शास्त्रप्रत्यक्षयोर्विरोधे प्रत्यक्षप्राबल्यं तावत् एकोनविंशे वादे निरूपितम् । तथा च प्रत्यक्षेण जगत्सत्यत्वावगमात् तद्विरुद्धतया प्रपञ्चमिथ्यात्वपरतया वस्त्वपरिच्छेदवर्णनमयुक्तम् । किं तु सर्ववस्तुसामानाधिकरण्ययोग्यत्वं वस्त्वपरिच्छेदः। ब्रह्म स्वव्यतिरिक्तसमस्तद्रव्य-शरीरकम् । शरीरवाचकशब्दानां च शरीरिपर्यन्तत्वं व्युत्पत्तिसिद्धम् । अतः स्वेतरसमस्तवस्तुशरीरकाभेदाभिप्रायेण ब्रह्मणः जगद्वाचकैः शब्दैः समानाधिकरणतया निर्देश उपपन्नः । निष्कर्षकातिरिक्तानामेव शब्दानां ब्रह्मपर्यन्तत्वव्युत्पत्तिः। अतः शरीरं ब्रह्मेति प्रयोगस्य नापत्तिः । सामानाधिकरण्यार्हत्वं च स्वतन्त्रवस्तुभेदाभावः । स्वपृथक्सिद्धवस्तुनः अभावात् स्वपृथक्सिद्धवस्तुप्रतियोगिकभेदरूपः वस्तुपरिच्छेदः ब्रह्मणो न संभवति । अवान्तरविषयाः ग्रन्थे द्रष्टव्याः ।

(५७) निर्विशेषब्रह्मणः आनन्दत्वभङ्गवादः

अथ ब्रह्मस्वरूपातिरिक्तसर्वमिथ्यात्वे ब्रह्मणः आनन्दत्वादिभङ्गः स्यादिति प्रतितर्कविवक्षया वादत्रयं प्रवर्तते ।

''विज्ञानमानन्दं ब्रह्म'' ''आनन्दो ब्रह्मेति व्यजानात्'' ''कं ब्रह्म खं ब्रह्म'' इत्यादिश्रुतिभिः ब्रह्मणः आनन्दत्वं प्रतिपाद्यते । तत् निर्विशेषब्रह्मवादिनां न घटते । तथा हि - किमिदं ब्रह्मण आनन्दत्वं नाम । सुखत्वमिति चेत् - तदपि विचारयामः । तत् किम् (१) अनुकूलवेदनीयत्वम् (२)उतानुकूलवेदनत्वम् (३)अथानुकूलत्वमात्रम् (४) यद्वा दुःखनिवृत्तिरूपतामात्रम् (५) उत ज्ञानात्मकत्वम् (६) किंचिद्धर्मान्तरं वेति।

न प्रथमः । भवद्भिः ब्रह्मणो वेदनीयत्वानभ्युपगमात्।अनुकूलवेदनीयत्वं हि अनुकूलत्वप्रकारकज्ञानविषयत्वम् । ननु व्यावहारिकमनुकूलवेदनीयत्वं ब्रह्मणोऽस्ति । न च निर्धर्मकत्वविरोधः । धर्मिसमसत्ताकधर्माभावः निर्धर्मकत्वम् । वेदनीयत्वस्य ब्रह्मसमसत्ताकत्वाभावेन निर्धर्मकत्वोपपत्तेः इति चेत् - तर्हि ब्रह्मणः आनन्दत्वस्य व्यावहारिकत्वेन वास्तवत्वाभावात् अनानन्दत्वमेव परमार्थः स्यात् ।

न द्वितीयः । अनुकूलं च तद्वेदनं चानुकूलवेदनं तत्त्वमिति विवक्षणे ब्रह्मणः ज्ञानस्वरूपत्वातिरिक्तस्यानुकूलत्वस्याङ्गीकारे निर्विशेषवादभङ्गप्रसङ्गात् । तदनङ्गीकारे अनुकूलेति विशेषणस्य व्यर्थत्वात् ।

न तृतीयः । कस्यचिद्वस्तुनः कंचित् प्रति अनुकूलत्वमिति दर्शनात् अनुकूलत्वमापेक्षिकम् । पुरुषविशेषनिरूपितमिति यावत् । भवन्मते पुरुषविशेषानङ्गीकारत् तत्सापेक्षमनुकूलत्वं ब्रह्मणो न संभवतीति ।

नापि चतुर्थः । सुखत्वं दुःखनिवृत्तिरूपतेत्युक्तौ औपनिषदमर्यादाबहिष्कारप्रसङ्गात्। उपनिषत्प्रमाणकैः दुःखनिवृत्तिमात्रस्य पुरुषार्थत्वानङ्गीकारात् ।

नापि पञ्चमः । यदि ज्ञानात्मकत्वं सुखत्वं तर्हि ज्ञानानन्दशब्दयोः पर्यायतया ''विज्ञानमानदं ब्रह्म'' इति तयोः सहप्रयोगो न स्यात् । न हि पर्यायशब्दानां सहप्रयोगो भवति।

नापि षष्ठः । आनन्दत्वं नाम ज्ञानत्वातिरिक्तं धर्मान्तरमिति स्वीकारे आनन्दत्वेनाभिमतस्यानुकूलत्वमस्ति वा न वा । नास्ति चेत् तस्यानन्दशब्दवाच्यत्वं न स्यात् । अस्ति चेत् - तृतीयपक्षोक्तदूषणानि स्युः । किं च अनुकूलत्वं ज्ञानात्मकत्वमेव वा

अतिरिक्तं वा। आद्ये सहप्रयोगानुपपत्त्यादिः पञ्चमपक्षोक्तो दोषः। द्वितीये निर्विशेषवादभङ्गप्रसङ्गादिःद्वितीयपक्षोक्तो दोषः। अतो न कथंचिदपि निर्विशेषचिन्मात्रस्यानन्दत्वं सिध्यतीति।

(५८) निर्विशेषनित्यत्वभङ्गवादः

नित्यानित्यविवेकान्तर्गतं नित्यत्वं निर्विशेषवस्तुनः न संभवतीति अत्र वादे निरूप्यते। ब्रह्मैकमेव नित्यम् अन्यत् सर्वमनित्यमिति परेषां मतम्। तदिदं ब्रह्मणोऽसाधारणं नित्यत्वं किंरूपम् इति विचारयामः। (१)किं सर्वकालसत्तारूपम् (२) उत कालावच्छेदनिवृत्तिरूपम् (३) अथ वा प्रध्वंसरहितत्वम् (४) उत अबाधितत्वम् (५)उत निर्विकारत्वम् (६) उत पूर्वोत्तरावधिराहित्यम् (७) किंचिद्धर्मान्तरं वा।

(१) नाद्यः। सर्वकालसत्तारूपस्य नित्यत्वस्याविद्यायामपि सत्त्वेन तत्रातिव्याप्तेः। तथा हि - अविद्यायाः सर्वेण कालेन संबन्ध एष्टव्यः। तस्याः सर्वोपादानत्वेन कालं प्रत्यप्युपादानत्वात् उपादानस्य उपादेयेन संबन्धस्यावश्यकत्वात् सर्वकालसंबन्धोऽविद्यायामस्तीति।

(२) न द्वितीयः। यथा ब्रह्मणः कालावच्छेदो नास्ति तथा कालस्यापि कालावच्छेदो नास्तीति कालावच्छेदाभावरूपनित्यत्वस्य कालेऽपि सत्त्वेन तत्रातिव्याप्तेः।

(३) नापि तृतीयः। प्रध्वंसरहितत्वं नित्यत्वमिति वक्तुं न शक्यते। प्रध्वंसस्य प्रध्वंसाभावेन नित्यत्वप्रसङ्गात्। ततः का हानिरिति चेत् - अनन्तानां घटपटादिध्वंसानां ध्वंसाभावेन नित्यत्वे सति ब्रह्मैकमेव नित्यमिति निर्बन्धानुपपत्तिः।

(४) नापि चतुर्थः। अबाधितत्वेन लोकप्रसिद्धेषु सत्यरजतादिषु नित्यशब्दप्रयोगादर्शनात्।
(५)नापि पन्चमः। निर्विकारत्वं नित्यत्वमित्यत्र विकारशब्देन परिणामविवक्षायां विकाराणां परिणामाभावेन निष्परिणामत्वमस्तीति नित्यत्वप्रसङ्गात्। तेषामपि परिणामाङ्गीकारेऽनवस्थाप्रसङ्गः। विकारशब्देन आगन्तुकापृथक्सिद्धधर्मविवक्षायां

ब्रह्मणोऽपि स्थूलचिदचिद्वैशिष्ट्यं मूर्तद्रव्यसंयोग इत्यादयो धर्माः सन्तीति निर्विकारत्वाभावात् तस्य नित्यत्वं न स्यादिति।

(६) नापि षष्ठः। किं व्यावहारिकोभयावधिराहित्यं विवक्षितम् उत पारमार्थिकोभयावधिराहित्यम्। आद्ये तत्तद्वृत्त्यवच्छिन्नस्य व्यावहारिकभेदवत् कादाचित्कतया उत्पत्तिरप्यस्तीति ब्रह्मणोऽनित्यत्वं स्यात्। द्वितीये पारमार्थिकोभयावधिमत्त्वस्य प्रपञ्चेऽप्यभावेन प्रपञ्चस्यापि नित्यत्वप्रसङ्गः।

(७) नापि सप्तमः। तत् धर्मान्तरं किमपि भवतु नाम। तत् किं नित्यशब्दप्रवृत्तिनिमित्ततया लोकव्युत्पत्तिसिद्धम्, उत न। आद्ये लोक एव भवतां प्रतिपक्षः। लोके सर्वकालसंबन्ध एव नित्यत्वमिति ग्रहणात्। तस्य चाविद्यायामापि सत्त्वेन तत्रातिव्याप्तिः प्रथमकल्पवत्। द्वितीये लोकाप्रसिद्धं नित्यत्वमनित्यत्व एव पर्यवसन्नमिति कुतो नित्यानित्यविवेकः। इतोऽधिकविस्तरः ग्रन्थे।

किं च अनन्तत्वानन्दत्वनित्यत्वानां संविदपेक्षया भेदे सति संविदः सविशेषत्वप्रसङ्गः। अभेदे सति तु तस्याः असत्यता स्यात्। भवन्मते धर्माणां मिथ्यात्वात् तदभिन्नसंविद्रूपब्रह्मणोऽपि मिथ्यात्वादिति।

किं च सौगतान् प्रति संविदः नित्यत्वसाधनं निरर्थकम्। नित्यत्वस्य स्वरूपाभेदे स्वरूपस्य तन्मतसिद्धतया सिद्धसाधनादिति।

(५९) अद्वितीयश्रुतिविसंवादः

पूर्वस्मिन् वादे अनन्तपदेन ब्रह्मणः सविशेषता साधिता। अस्मिन् वादे अद्वितीयपदेनापि सविशेषता सिध्यतीति निरूप्यते।

''सदेव सोम्येदमग्र आसीदेकमेवाद्वितीयम्'' इत्यत्र आद्वितीयपदेन निर्विशेषमिति विवक्षितमिति वदन्ति। तत्रेदं विचारणीयम् - किम् अद्वितीयपदे न द्वितीयम् अद्वितीयमिति तत्पुरुषः,उत न द्वितीयं यस्य तत् इति बहुव्रीहिः। तत्पुरुषपक्षेऽपि तदन्यतद्विरुद्धतद-

भाववाचकतया द्वितीयादन्यत् द्वितीयविरुद्धं द्वितीयाभाव इत्यर्थ इति विकल्पः द्वितीयादन्यदित्यनेनापि किं द्वितीयभिन्नत्वमात्रं विवक्षितम्, उत द्वितीयभिन्नत्वे सति द्वितीयसदृशत्वं नञिवयुक्तन्यायाद्विवक्षितम् इति विकल्पः। द्वितीयभिन्नं द्वितीयसदृशमित्यर्थद्वयेऽपि भेदप्रतियोगितया सादृश्यप्रतियोगितया च द्वितीयसत्त्वं वाच्यमिति द्वितीयाभावो न सिध्यति। किं च ब्रह्म द्वितीयभिन्नमित्युक्ते प्रथममिति वा तृतीयादीति वा स्यात् न निर्विशेषत्वम्। द्वितीयविरुद्धमित्यर्थेऽपि द्वितीयसत्त्वमावश्यकम्। द्वितीयाभाव इत्यर्थेऽपि द्वितीयाभावरूपे ब्रह्मणि द्वितीयं जगत् कथमध्यस्येत। प्रपञ्चाभावे सति प्रपञ्चाध्यासासंभवात्। प्रपञ्चाभावस्य प्रपञ्चविरोधित्वात्।

बहुव्रीहिपक्षेऽपि द्वितीयं यस्य नास्तीत्यनेन प्रथमतृतीयादिकमस्तीत्यर्थविवक्षायां ब्रह्मभिन्नसर्वनिषेधो न सिध्यति। तेषु किंचिदपेक्षया द्वितीयस्य निषेधेऽपि प्रथमतृतीयादेरनिषेधात्। सर्वनिषेधविवक्षायां बहुव्रीहिसमास एव न स्यात्। अन्यपदार्थस्य अभावात्। किं च बहुव्रीहिसमासेन द्वितीयाभाववत्त्वं ब्रह्मणो बोध्यते। तथा च कथं निर्विशेषत्वं ब्रह्मणः सिध्येत्। द्वितीयाभाववत्त्वरूपविशेषबोधनात्।

अस्मन्मते तु तत्पुरुषबहुव्रीह्यात्मकसमासद्वयेऽपि सम्यक्त्वम्। तत्पुरुषे ब्रह्मणः द्वितीयभिन्नत्वोक्त्या सकलेतरविलक्षणतया अग्रगण्यता सिध्यति। बहुव्रीहौ द्वितीयशून्यतोक्त्या ब्रह्मसमानस्यं निषेधः फलतीति उभयमपि सम्यक्। तदाह -

द्वितीयव्यतिरेकोक्त्या सतः स्यादग्रगण्यता।
द्वितीयशून्यतोक्त्या च तत्समाननिषेधनम्॥

इति। तथा च बहुव्रीहिपक्षे सदृशद्वितीयरहितमित्यर्थः। यथाहुः यामुनार्यपादाः -

यथा चोलनृपः सम्राडद्वितीयोऽस्ति भूतले।
इति तत्तुल्यनृपतिनिवारणपरं वचः॥
न तु तत्पुत्रतद्भृत्यकलत्रादिनिवारणम्।

इति । एवं स्वगतभेदनिषेधपरत्वमद्वितीयपदस्य न भवतीत्यपि -

यथैक एव सविता न द्वितीयो नभः स्थले ।
इत्युक्ते न हि सावित्रा निषिध्यन्तेऽत्र रश्मयः ॥

इति कारिकया निदर्शितम् । भाष्ये तु संदर्भानुसारेण निमित्तकारणरहितपरतया अद्वितीयपदं व्याख्यातम् । सर्वथा निर्विशेषपरत्वं द्वितीयमिथ्यात्वपरत्वं च अद्वितीयपदस्य नास्तीति सिद्धम् ।

(६०) सत्त्वासत्त्वविवेकवादः

पूर्वेषु वादेषु मिथ्यात्वसाधकतयाभिमतानामनेकासामाभासयुक्तीनां भङ्गः कृतः । अथ मिथ्यात्वासंभवविवक्षया सत्त्वासत्त्वविवेकः क्रियतेऽत्र वादे ।

प्रामाणिकत्वेन हेतुना सदिति यद्वस्तु प्रतीयते तदेव अवस्थान्तरेण नास्तीत्यपि प्रतीयते। इयं वस्तुस्थितिः । प्रामाणिकत्वमेव सत्त्वम् । तत्र बौद्धाः असत्त्वमेव तत्त्वमिति वदन्ति । सांख्याः सदा सत्त्वमेव तत्त्वमित्याचक्षते । सर्वेष्वपि वस्तुषु सत्त्वासत्त्वसमुच्चय इति जैनाः। सत्त्वासत्त्वोभयाभाव इत्यद्वैतिनः । उपाधिभेदात् सत्त्वासत्त्वोभयव्यवस्थेत्यपरे नैयायिकादयः। उपाधिभेदो नाम देशकालभेदः ।एकस्यैव वस्तुनः अस्मिन् देशे काले च सत्त्वम्, अन्यस्मिन् देशे काले चासत्त्वमिति व्यवस्थेति यावत् । उपाधिभेदात् इति पक्षे एव भावान्तरनिमित्तः नास्तीति व्यपदेश इति वयम् ।

तत्र सर्वेषु वस्तुषु असत्त्वमेव । असतोऽपि शुक्तिरजतादेः भ्रान्तिहेतुवैचित्र्यात् अस्तीति धीविषयत्वदर्शनादिति मतमयुक्तम् । शुक्तिरजतादेः प्रतीत्यनन्तरं नेदं रजतमिति बाधदर्शनादसत्त्वम् । प्रतीयमानस्य घटपटादिप्रपञ्चस्य तु बाधाभावान्नासत्त्वम् । एतदुक्तं भवति - यस्मिन् देशे यस्मिन् काले यत् प्रतीयते तस्मिन्नेव देशे काले च तस्य नास्तीति धीरेव बाधः । शुक्तिरजतादेस्तु तादृशधीरस्ति । घटादेस्तु नास्ति । न हि घटादिः यत्र काले देशे च अस्तीति प्रतीयते तत्रैव नास्तीति प्रतीयते । अतो न बाध्यत्वम् । अत एव नासत्त्वं घटादेरिति ।

सर्वस्य सर्वदा सत्त्वमिति मतमप्ययुक्तम् । सर्वं सर्वदा वर्तते । कारकव्यापारेणाभिव्यक्तिरिति हि तन्मतम् । तन्न समीचीनम् । अभिव्यक्तिरपि पूर्वं सती चेत् कारकव्यापारवैयर्थ्यम्। असती चेत् सर्वं सदास्तीति गतम् ।

सत्त्वासत्त्वसमुच्चयपक्षोऽपि न युक्तः । कस्मिंश्चिद्देशे काले च वस्तुनः सत्त्वं, देशान्तरे कालान्तरे च तस्यासत्त्वमित्येवं सत्त्वासत्त्वसमुच्चय उच्यते चेत् अस्माकं तत् संमतमेव। अन्यथा चेत् एककाल एव एकत्र सत्त्वासत्त्वसमुच्चयश्चेत् विरोधात् तन्नाद्रियामहे। अन्यथा दूषणस्य स्वपक्षेऽसत्त्वं परपक्षे सत्वम्, भूषणस्य स्वपक्षे सत्त्वं परपक्षेऽसत्त्वं चेति व्यवस्था न स्यात् ।

सत्त्वाभावासत्त्वाभावोभयं तत्त्वमिति मतमपि न युक्तम् । यथा सत्त्वमसत्त्वं चोभयमेकत्र विरोधान्न संभवति तथा सत्त्वाभावासत्त्वाभावयोरपि एकत्रासंभवः । विरोधात् । सत्त्वाभावेऽसत्त्वस्य असत्त्वाभावे सत्त्वस्य च नियमात् । यथा घटत्वघटभिन्नत्वयोरेकत्र समावेशो न संभसति विरोधात्, तथा घटभिन्नत्वाघटभिन्नत्वयोरपि समुच्चयो न संभवति ; घटभिन्नत्वे अघटत्वस्य अघटभिन्नत्वे घटत्वस्य च नियमात् ।

तर्हि किं नाम सत्त्वमसत्त्वं चेति चेत् - घटस्य सत्त्वं नाम तादात्म्यं देशकालसंबन्धो वा। असत्त्वं नाम स्वभिन्नत्वाभावः स्वानधिकरणदेशकालसंबन्धाभावो वा ।

तत्रैव नास्तीति व्यपदेशः भावान्तरनिमित्तक इति सिद्धान्ते घटः पटात्मना असन् इति व्यवहारस्य पटत्वविरोधि घटत्वं निमित्तम् ! स्वदेशकालयोः सतः घटस्य स्वविरोधिदेशकालयोः असन्नितिव्यवहारस्य स्वानधिकरणदेशकालावेव निमित्तम् । अत्र पक्षेऽतिरिक्ताभावाकल्पनाल्लाघवम्, उपलम्भानुकूलत्वं चेति ।

(६१) जीवैक्यभङ्गः

अत्र जीवैक्यसाधकान्यनुमानान्याशङ्क्य निराक्रियन्ते । यद्यपि पूर्वं षट्त्रिंशे आत्माद्वैतभङ्गवादे एतादृशान्यनुमानानि अनूद्य दूषितानि, तथापि तत्र आत्मा एक एवेति मतं खण्डितम् । अत्र तु जीव एक एवेति मतनिरासः ।

विगीतं मदविद्याकल्पितम्, विवादाध्यासितं चेतनजातम् अहमेव इत्यादिभिरनुमानैः किं सर्वत्र अहमर्थ एक एवेति साधयितुमिष्टम्, उत अहमर्थधर्मस्य ज्ञानस्यैक्यम्, उताहमर्थोपलक्षितसन्मात्रस्यैक्यम्।

तत्र न प्रथमः। भवन्मते अहमर्थस्यानात्मत्वात् अनेकत्वाच्च तस्यैकत्वात्मत्वयोः साधने स्वसिद्धान्तविरोधः प्रत्यक्षादिविरोधश्च। किं चाहमर्थस्यात्मत्वे एकत्वे च परदुःखादिकमपि स्वदुःखादित्वेनानुभूयेत ; न चैवमनुभूयते। किं च ''एको बहूनां यो विदधाति कामान्'' इति श्रुतिविरोधः। तया जीवात्मबहुत्वस्य तदतिरिक्तस्य ईश्वरस्य च प्रतिपादनात्। न द्वितीयः। प्रत्यक्षादिविरोधादेव। किं च अहमर्थधर्मभूतसंविदामैक्यं न भवति। तथा सति कस्यचिदहमर्थस्य सर्वज्ञत्वे सर्वेषां सर्वज्ञत्वम्, कस्यचिदसर्वज्ञत्वे सर्वेषामसर्वज्ञत्वं वा स्यात्।

न तृतीयः। सर्वेषु अहमर्थेषु अनुयायिनः सतः ऐक्येऽपि आत्मैक्यासिद्धेः। सच्छब्दार्थः आत्मैवेत्यत्र प्रमाणाभावात्। न हि कोऽपि सदिति बुद्धिविषयः आत्मेति मन्यते। तथा सति देहात्मभ्रमादेः निवर्तकाभावप्रसङ्गात्। आत्मनो देहातिरिक्तत्वज्ञाने हि देहात्मभ्रमो निवर्तेत। आत्मनः सद्रूपत्वे देहादिष्वपि सन्निति बुद्धेः सत्त्वेन सद्बुद्धेः देहातिरिक्तात्मविषयकत्वाभावात् सद्बुद्धेः देहात्मभ्रमनिवर्तकत्वं न स्यादिति।

अपि च भवतां सिषाधयिषितं जीवानामैक्यं किं सत्यमुत मिथ्या। पूर्वत्र अपसिद्धान्तः। अविद्यातदाश्रयजीवतदैक्यानां भवद्भिः मिथ्यात्वाङ्गीकारेण सत्यत्वाभावात्। उत्तरत्र जीवैक्यवत् जीवबहुत्वमपि मिथ्यैवेति अन्यतरस्मिन् जीवैक्ये पक्षपातो वा तत्साधबं वा कुतः? जीवबहुत्वमेव कुतो न साध्यते। तत्साधनं हि लोकानुभवानुगुणं भवति।

''जननमरणकरणानां प्रतिनियमादयुगपत्प्रवृत्तेश्च।
पुरुषबहुत्वं सिद्धं त्रैगुण्यविपर्ययाच्चैव ॥''

इति सांख्याकारिकात्र स्मर्तव्या।

(६२) अपशूद्राधिकरणविरोधवादः

सूत्रकारोक्तं ब्रह्मविद्यायां शूद्रस्यानधिकारं भवन्तः कथं निर्वहन्ति । किं शूद्रेण निर्विशेषब्रह्मज्ञानस्य संपादयितुमशक्यत्वात्, निर्विशेषज्ञानसंपत्तावपि तादृशज्ञानात् अविद्यानिवृत्तेरसंभवात् ।

न प्रथमः। निर्विशेषज्ञानस्य शूद्रेण संपादयितुमशक्यत्वं किं तादृशज्ञानस्य वेदैकसंपाद्यत्वेन शूद्रस्य वेदेऽनधिकारात्, उत वेदातिरिक्तजन्यत्वेऽपि वेदसापेक्षत्वात्, अथवा वेदाबेदयोः शूद्रादिषु ज्ञानजनकत्वशक्त्यभावाद्वा । आद्यपक्षः भवता नाङ्गीकर्तुं शक्यः। तर्कानुगृहीतानुमानादिनापि निर्विशेषत्वस्य प्रपञ्चमिथ्यात्वस्य च भवद्भिः साध्यमानत्वात् अनुमानादिनापि निर्विशेषविषयकज्ञानस्य संपादयितुं शक्यत्वेन तस्य वेदैकजन्यत्वाभावात्। अपि च निर्विशेषं तत्त्वमित्यादिलौकिकवाक्येन तेषां तत्त्वज्ञानं सुलभमेव। द्वितीये अनुमानादेः वेदसापेक्षतायाःकैरप्यनङ्गीकारात् ।वेदस्यैव शक्तिग्रहादावनुमानसापेक्षत्वात्। अत एव न तृतीयः । वेदस्यावेदस्य च शक्तिग्रहादिसहकृतस्य यथा त्रैवर्णिकेषु ज्ञानजनकत्वमस्ति तथा शूद्रादिष्वपि भविष्यति । न हि प्रमाणानां त्रैवर्णिकेषु पक्षपातः ।न च शूद्रादीनां यतः कुतश्चित् ज्ञानं भवतु, त्रैवर्णिकानां तु वेदादेव ज्ञानमिति नियमार्थमपशूद्राधिकरणमिति वाच्यम्। नियामकाभावात्।

नापि निर्विशेषज्ञानसंपत्तावपि तादृशज्ञानात् शूद्रादीनामविद्यानिवृत्तेरसंभव इति द्वितीयकल्यः। तथा नियमे हेत्वभावात् । ननु यथा भवन्मते शूद्राद्यनुष्ठितमुपासनं त्रैवर्णिकानुष्ठितोपासनसमानविषयकमपि न बन्धनिवर्तकं तथास्माकमपि मते भविष्यतीति वाच्यम् । अस्माभिरदृष्टद्वारा उपासनस्य बन्धनिवर्तकत्वमुच्यते भवद्भिस्तु न तथेति वैषम्यात्। शुक्तितत्त्वज्ञानस्य रजतभ्रमनिवर्तकत्वे यथा अदृष्टापेक्षा नास्ति तथा आत्मतत्त्वज्ञानस्य प्रपञ्चभ्रमनिवर्तकत्वेऽदृष्टापेक्षा नास्तीति भवद्भिरेव स्थलान्तरे उक्तत्वात् । अतः शूद्रादेः ब्रह्मविद्यायामनधिकारो भवद्भिः निरूपयितुं न शक्यत इति अपशूद्राधिकरणविरोधः स्थितः ।

(६३) अधिकारिविवेक:

यस्य तत्त्वज्ञानमुत्पन्नं तस्य शास्त्रविहितकर्मसु नाधिकार इति वादस्य अत्र निरास: क्रियते ।

उत्पन्नतत्त्वज्ञानस्य कर्मयोगेऽनधिकार: (१) किं तस्य कर्मयोगज्ञानाभावात् (२) तज्ज्ञानसत्त्वेऽपि तदनुष्ठानसामग्र्यसंभवात् (३) तत्सामग्रीसंभवेऽपि कर्मयोगस्य निष्फलत्वात् (४) उत तस्य सफलत्वेऽपि तत्फलेच्छाविरहात् (५) अथ तत्फलेच्छायां सत्यामपि कर्मयोगादन्यत: तत्फलसिद्धे: ।

(१) न प्रथम: । कर्मयोगादेव लब्धतत्त्वज्ञानस्य प्रबलकारणं विना कर्मयोगविस्मरणासंभवात् ।

(२) न द्वितीय: । सामग्रीपदेन दृष्टसामग्री विवक्ष्यते अदृष्टं वा । नाद्य:। शरीरेन्द्रियादिस्वास्थ्यरूपाया: दृष्टसामग्र्या: अविकलत्वात् । न द्वितीय: । अदृष्टस्य दृष्टसामग्रीघटनमात्रार्थत्वात् दृष्टसामग्रीसत्त्वेऽदृष्टमप्यविकलमेवेति ।

(३) नापि तृतीय: निष्फलत्वादिति पक्ष:। ज्ञानयोगिना स्वर्गादिफलस्य त्यक्तत्वेऽपि विरोधिपापक्षयाद्यर्थं कर्मानुष्ठानस्योचितत्वात् ।

(४) नापि चतुर्थ: । ज्ञानयोगनिष्ठस्यापि प्रतिबन्धकपापनिवृत्तिरूपफलेच्छाया: सत्त्वात् तत्फलार्थं कर्मानुष्ठानस्यावश्यकत्वात् ।

ननु कर्मयोगफलभूताया: स्थितप्रज्ञताया: निष्पत्तौ सत्यां कर्मयोगान्निवृत्तिस्त्वयापीष्यत इति चेत् - सत्यमिष्यते । तथापि तदा कर्मयोगानधिकारं न वयं ब्रूम:।कर्मयोगधिकारस्य निवृत्त्यभावादेव य: ज्ञानयोगयोग्य: यस्य चानुष्ठानमितरैनुसरणीयं भवति, लोके च शिष्टतया प्रसिद्ध: तस्य ज्ञानयोगापेक्षया सुकरत्वात् निष्प्रमादत्वात् अन्तर्गतात्मज्ञानत्वाच्च कर्मनिष्ठैव श्रेयस्त्वेनोपदिश्यते भगवता गीताचार्येण ''कर्म ज्यायो ह्यकर्मणा'' इत्यादिना ।

(५) नापि पञ्चमः। कर्मयोगादन्यतस्तत्फलासिद्धेः। तथा हि – नित्यनैमित्तिककर्माणि ज्ञानयोगेतिकर्तव्यताभूतानि। तेषामकरणे प्रत्यवायः स्यात्। तत्परिहारार्थं चावश्यं तानि कर्तव्यानि। तादृशं फलं कर्मयोगानुष्ठानादन्येनोपायेन न सिध्यतीति। तदाह–

आशरीरं प्रवृत्तत्वात् स्वभावप्राप्तकर्मणाम्।
किमर्थं क्रियते द्वेषः शास्त्रप्राप्तेषु कर्मसु॥

इति।

(६४) यतिलिङ्गभेदभङ्गवादः

अर्वाचीनपरमहंसानां शिखायज्ञोपवीतत्यागैकदण्डधारणादिरूपं बाह्यवेषमधिकृत्यात्र विचारः क्रियते। तदर्थमुपनिषदादिश्रुतिवाक्यानि अत्रिवसिष्ठाङ्गिरः प्रभृतीनां स्मृतिवचनानि धर्मशास्त्रग्रन्थांश्च प्रमाणतया प्रदर्श्य शिखायज्ञोपवीतत्रिदण्डधारणं परमहंससंन्यासिनामप्यावश्यकमिति निर्णीयतेऽत्र वादे। शिखादित्यागपरतया एकदण्डधारणपरतया च आपाततः प्रतीयमानानां कतिपयवचनानां च शिखायज्ञोपवीतादिधारणाविरोधेन तात्पर्यं चोपवर्ण्यते।

(६५) अलेपकमतभङ्गवादः

केचनावधूतसंन्यासिनः विधिनिषेधयन्त्रणामतन्त्रयन्तः निषिद्धाचरणेऽपि तल्लेपो न भवतीति मन्यमानाः विश्वमाविलयन्ति। तादृशमतविशेषस्य बहुप्रमाणविरोधप्रदर्शनपूर्वकमत्र खण्डनं क्रियते। आदिभरतादयोऽपि न स्वैराचारा इति निरूप्यते। भगवतः श्रीकृष्णस्यापि शास्त्रमर्यादोल्लङ्घनेन स्वैराचारता नास्तीति प्रतिपाद्यते। भगवद्भक्तानां पराङ्कुशादीनामपि शास्त्रमर्यादोल्लङ्घनाभावः तेषां विग्रहाणामालयेषु प्रतिष्ठार्चनादीनां शास्त्रीयत्वं च निरूप्यते। स्मृतिपुराणादिप्रमाणशतान्यत्र आचार्यैरुद्धृतानि।

(६६) परमते सूत्रस्वारस्यभङ्गवादः

भगवता व्यासेन विरचितानि सर्वाण्यपि ब्रह्मसूत्राणि विशिष्टाद्वैत एव स्वरसानि। अद्वैतमते न स्वरसानीति अत्र वादे निरूप्यते।

तत्रादौ अद्वैतपरत्वेन आपाततः प्रतीयमानानां पञ्चषाणां सूत्राणां प्रदर्शनेन ब्रह्मसूत्राणमद्वैतपरत्वम्, भेदप्रतिपादकानां व्यावहारिकभेदपरत्वमिति पूर्वपक्षं कृत्वा तदुद्धृतानि सूत्राणि नाद्वैतपराणीति निरूपितम्। ततः प्रत्यध्यायं प्रतिपादं प्रत्यधिकरणं च सविशेषब्रह्मपरत्वमेव न निर्विशेषब्रह्मपरत्वमिति निरूपितम्। अन्ते च ''न बादरायणस्य क्वचिदपि त्वदभिमतानुपपन्नार्थविवक्षां प्रत्यक्षयामहे'' इति निगमितम्।

आचार्यपादैः संकल्पितायां शतदूषण्यां शतं वादाः अवश्यं निर्मिताः स्युः। इदानीं षट्षष्टिर्वादा एव उपलभ्यन्ते। अवशिष्टाः चतुस्त्रिंशद्वादाः अस्मद्दौर्भाग्यवशात् लुप्ताः आदितः पञ्चषष्टिः वादाः जिज्ञासाधिकरणश्रीभाष्यस्थप्रधानांशविवरणरूपाः। तदनन्तरमितरेष्वधिकरणेष्वपि अद्वैतमतखण्डनं संकल्प्य षट्षष्टितमे वादे सामान्यतः सूत्राणामद्वैतमते स्वारस्याभावं निरूपितवन्तः। तदुपरि एकैकमधिकरणं गृहीत्वा श्रुतप्रकाशिकायां प्रत्यधिकरणमन्ते इव शतदूषण्यामपि विशिष्याद्वैतमतेऽस्वारस्यं वादरूपेण सप्तषष्टितमवादमारभ्य आचार्यैः निरूपितं स्यात्। दौर्भाग्यात् स भागो लुप्त इति आचार्याणाम् अय्यास्वामिनां मुखात् कदाचिदश्रौषम्। ऊत्तमूरुस्वामिनोऽपि अत्र बादे टिप्पण्यां ''अत्रापीत्यनेन शतदूषणीवादाः एतदन्ताः जिज्ञासाधिकरणे स्थित्वैवेति ज्ञायते'' इति वाक्येन पूर्वोक्तमभिप्रायं समसूचयन्। येन केनापि पूरणीयः अवशिष्टभागः।

''न क्वाप्यतः परमदृश्यत कोशशेषः
तच्छेषपूरणकृतिः परिहासहेतुः।''

इति श्रीमदुपनिषद्भाष्यकारैः न्यायसिद्धाञ्जनव्याख्यानान्ते यल्लिखितं तदेव स्मर्यते ।

॥ इति नावल्पाक्कं शठकोपरामानुजदासस्य कृतिषु शतदूषणीवादार्थसंग्रहः समाप्तः ॥

॥ शुभमस्तु ॥

INDEX - I

द्वितीयभागे शतदूषण्युपात्तग्रन्थसूची

वादसंख्या

अजगरोपाख्यानम 65
अन्तर्यामिब्राह्मणादि 66
अर्हन्मतम् 56
आथर्वणश्रुतिः 62
आदिभरतोपाख्यानम् 65
आश्वमेधिकम् 65
उपदेशसाहस्रिका 65
कापिलस्मृतिः 65
कापिलादिस्मृतिः 48
कौषीतकिश्रुतिः 65
क्रतुस्मृतिः 65
जाबालिश्रुतिः 65
जीवाज्ञानवादः 36
तत्त्वसारः 52
तैत्तिरीयकम् 65
दत्तात्रेयादिस्मृति 65
धर्मशास्त्रादि 66
निघण्टु 54,57

वादसंख्या

नैरुक्तम् 64
परमहंसोपनिषत् 65
पराशरस्मृतिः 64
पाराशर्यस्मृतिः 65
बाष्कलश्रुतिः 65
बोधायनस्मृतिः 65
ब्रह्माज्ञानवादः 36
ब्राह्मपुराणम् 65
भक्तप्रतिष्ठाशास्त्रम् 65
भगवद्गीता 26,63,65
भागवतम् 65
भास्करादिपक्षः 36,53,56
भाष्यम् 37,41,45,47,48,49,51,53,56,59,63
मन्वादिस्मृतिः 48,65
महर्षिवचनम् 48
महाभारतम् 37,65
मात्स्यम् 48
माध्यमिकमतम् 41

	वादसंख्या
मैत्रायणीयब्राह्मणम्	65
मोक्षधर्मः	37,65
यतिधर्मसमुच्चयः	64
यतिलिङ्गसमर्थनम्	64
यादवप्रकाशीयग्रन्थः	65
लोकाक्षिगृह्यम्	65
लोकायतादिग्रन्थः	65
वाजसनेयकश्रुतिः	65
वाररुचस्वरूपग्रन्थः	65
विखनस्सूत्रम्	65
विदुरवृत्तान्तः	65
विश्वामित्रस्मृतिः	65
वैखानससूत्रम्	65
वैभाषिकाद्यागमाः	?
शाट्यायनकोपानिषत्	64,65
शौनकस्मृतिः	65
श्रीभागवतम्	65
श्रीमद्गीताभाष्यम्	49
श्रीविष्णुपुराणम्	65
श्वेताश्वतरोपनिषत्	65
सात्त्वतादि	64
सौगतसमयः	43

* * *

INDEX - II

द्वितीयभागे शतदूषण्युपात्तग्रन्थकारसूची

वादसंख्या

अक्षपाद: 66
अङ्गिरा: 64
अत्रि: 64
अन्ये 64
अपक्षपातिन: 38
अपरे 60
अभावापलापवादिन: 44
अभियुक्ता: 39
अभिव्यक्तिवादिन: 55
आक्षपादा: 35,51
आचार्या:(शंकराचार्या:) 45
उशना: 64
ऋष्यन्तरम् 65
एकजीववादिन: 50
औपनिषदा: 50
कणभक्ष: 66
केचित् 38,46,52,65
कैश्चित् 66
कैश्चित् पूर्वै: 37
क्षपणक: 38
गालव: 64
गौडपादा: 65
चार्वाक: 64,65
जिन: 34
जैननयनिष्ठा: 59
तन्त्राचार्या: 38
तार्किक: 37

वादसंख्या

त्वदासन्ना: 53
दक्ष: 64
दत्तात्रेय: 64
द्रमिडभाष्यकार: 37
धर्मकीर्ति: 65
ध्याननियोगवादिन: 62
नानाजीववादिन: 50
निपुणा: 58
निरीश्वरमीमांसका: 56
निष्कर्षका: 60
नीतिविद: 59,66
नैघण्टुका: 51,54
न्यायविद: 35
न्यायाचार्या: 34
पतञ्जलि: 66
परमाचार्या: 64
पराशरादि: 42
प्रमाणपरतन्त्रा: 43
प्राचीना: 64
बादरायण: 65,66
बृहस्पति: 64,65
बोधायनादि: 64
बौद्धगन्धिवैयाकरणा: 38
भगवच्छङ्कराचार्या: 65
भगवद्यामुनाचार्या: 56
भगवन्नाथमुनिमिश्रा: 64,65
भगवत्पराशरादय: 65

वादसंख्या

भगवद्बोधायनः 66
भगवान् जैमिनिः 39
भगवान् पराशरः 45,51,64
भगवान् बादरायणः 62,64
भवत्कूटस्थाः 66
भाष्यकाराः 36,47,48,65,66
भास्करः 34,37,40,52,65
भास्कराचार्याः 64,66
भास्करादयः 56
भास्करपक्षीयादयः 64
मध्यस्थाः 66
मनुः 65
मन्वादिः 66
मस्करिप्रभृतयः 64
महर्षिः 45
महर्षयः 65
महान्तः 66
महापाशुपताः 64
माध्यमिकः 44,47,50,66
माध्यमिकसमानः 41
मीमांसकाः 60
मीमांसकाचार्यादयः 38
मेधातिथिः 64
यतिवराश्रयाः 52
यादवः 34
यादवप्रकाशः 37,40,52,64
यादवप्रकाशादयः 65
यादवाचार्यः 65
युष्मत्सयूथ्याः 62

वादसंख्या

लक्षणविदः 38
लिखितः 64
लोकायतिकाः 56
वररुचिः 65
वसिष्ठः 64
वाक्यविदः 38
विज्ञानेश्वरः 64,65
विष्णुः 65
वृत्तिकारः 37
वृद्धजाबालिः 64
वृद्धदक्षः 64
वृद्धाः 60
शंकरादयः 64,65
शाण्डिल्यः 64
शौनकः 64
श्रीवरदगुरुः 64
सनत्सुजातः 65
समाधिशास्त्रविदः 45
सयूथ्यः 40
साम्बः 45
सांख्यः 36,43,55,60,62
सुगतादिः 34
सौगताः 38,51,58
सौगतादयः 58,62
सौगतोपदेशिनः 60
हरिः 65
हारीतः 64

INDEX - III

द्वितीयभागे शतदूषण्युपात्तप्रमाणाकरसूची

वादसंख्या

अकर्मवश्य:, श्रीभाष्यम् १-३-७ सू. 37
अकुरुत तै.उ. 53
अग्नने: शिवस्य, मात्स्ये 48
अचेतना परार्था च, परमसंहिता २-१८ 54
अचेतनेषु 43
अजो नित्य: गीता २-२० 66
अत एव ब्र.सू.४-४-९ 37
अत्राप्युदाहरन्ति 65
अथ नामधेयम् बृह ४-३-६ 55
अथ युवा सुवासा: शौनक: 64
अथ ह यत्, शाट्यायनकोपनिषत् 64
अथात: परमहंस - लोकाक्षिगृह्य 65
अथातो ब्रह्मजिज्ञासा ब्र.सू.१-१-१ 66
अथातोऽहंकारादेश: छा.७-२५-१ 36
अथाश्रमम्, शाट्यायनकोपनिषत् 65
अद्रेश्यमग्राह्यम् मु .१-१-६ 35
अधिकं तु ब्र.सू. २-१-२२ 66
अनन्याधिपति: ब्र.सू. ४-४-९ 37
अनाविष्कुर्वन् ब्र.सू. ३-४-४९ 65
अनाशी वि.पु. २-१४-२४ 42,55
अनाश्रमी 65
अनिष्टमिष्टं मिश्रं च, गीता १८-१२ 65
अनृतेन हि छा. ८-३-१२ 39
अनेकमन्यपदार्थे पा.सू.२-२-२४ 59

वादसंख्या

अनेन जीवेन छा. ६-३-२ 40
अन्तस्तद्धर्मोपदेशात् ब्र.सू. १-१-१२ 66
अन्नार्थे - विष्णुस्मृति: 65
अन्यराजान: छा. 37
अन्यश्च राजन् - मोक्षधर्मे 37
अपरिमितधा 37
अपहतपाप्मा छा. ८-७-१ 52
अपि चेत् सुदुराचार: गीता ९-३० 65
अपि चेदसि, गीता ४-३६ 65
अपुरुषार्थ - श्रीभाष्य 42
अभावत्वादेव - श्रीभाष्य 42
अभावरूपत्वे - श्रीभाष्य १-१-४ 46
अभिव्यक्तेरभि - 60
अरूपवदेव ब्र.सू. ३-२-१४ 66
अर्थैकत्वात् पू.मी.सू. २-१-४६ 38
अवधूतं, भागवते ११-७-२५, ३० 65
अवस्थिते: ब्र.सू. १-४-२२ 37
अविधिगोचर: 65
अविभागेन.ब्र.सू.४-४-४ 37,66
अव्यक्तलिङ्ग: 66
अविभागो वचनात् ब्र.सू. ४-२-१५ 66
अशरीरं वा छा. ८-२५ 37
अश्मादिवच्च ब्र.सू. २-१-२३ 66
अश्रान्तस्य, सनत्सुजात: 65

वादसंख्या

असत्त्वात् - सांख्यवृद्धकारिका 55,60
असदेवेदं 53
असद्वा इदम् तै. आ. ७-१ 53
असद्व्यपदेशात् ब्र.सू. २-१-१८ 53
असंभवस्तु ब्र.सू. २-३-९ 66
अस्थूलमनणु बृह . ५-८-८ 52,58
अस्मान्मायी श्वेताश्व. ४-९ 37,39,54
अहमज्ञ: श्रीभाष्य 39
अहमेवेदम् छा. ७-२५-१ 36
अहं कक्षीवान् 36
अहं ब्रह्मास्मि बृह ३-४-१० 66
आकाशमेकं 36
आकाशोऽर्थान्तर - ब्र.सू. १-३-४२ 66
आत्मदास्यं हरे: स्वाम्यं - विष्णुतत्त्वं 37
आत्मानमव - अभियुक्ता: 53
आत्मा वा इदम् ऐतरेय १-१-१ 53
आत्मेति तूपगच्छन्ति ब.सू. ४-१-३ 37,66
आत्मेत्येव तु - वाक्यकार: 66
आत्मेत्येवोपासीत बृ. ३-४-७ 36,66
आत्मैवेदं - छा. ३-४-७ 66
आदावन्ते च 60
आदित्यचन्द्रौ - विष्णुधर्म ५७-२५
आदिपर्वणि शाकुन्तलोपाख्याने च 65
आनन्दं ब्रह्मण:- तै. आनन्द ९-१ 45
आनन्दो ब्रह्मेति तै.भृगु ६-१ 57
आपो वा 56

वादसंख्या

आर्षं धर्मोपदेशं च मनु १२-१०६ 48
आसीदिदं मनु. १-५ 39
आह च तन्मात्रम् ब्र.सू. ३-२-१६ 66
इतिहास - आदिपर्व १-२९३ 48
इदमेव - श्रीभाष्य 66
इदं ज्ञानं गीता १४-२ 37
इन्द्रस्य वज्रोऽसि तै.सं. 65
इन्द्रो मायाभि: बृ. ४-५-१९ 39
इमान् लोकान् तै.भृगु. 65
इववद्वैवमेव च - वैजयन्तीकोश: 37,51
ईश्वरोऽहं गीता १६-१४ 37
उत्तम: पुरुष: गीता १५-१७ 37
उत्पत्तिनिधनज्ञस्य - अजगरोपाख्याने 65
उपबृहणम् - श्रीभाष्य 48
उभयेऽपि हि ब्र.सू. १-२-२१ 66
उल्लङ्घितत्रिविध - स्तोत्ररत्नम् १६ 56
ऋतं पिबन्तौ, कठ १-३१ 39
ऋषयो वातरशना: तै. आ. 65
एक एव हि - ब्रह्मबिन्दूपनिषत् 36
एकदण्डी - बोधायन: ३-१०-४० 64
एको बहूनां श्वेताश्व. ६-१३ 37,61
एतान्यपि तु कर्माणि गीता १८-६७ 65
एतावन्तं कालं - श्रीभाष्य 39
एते मे गुरव: - भागवते ११ स्कन्धे 65
एवकार: - न्यायसुदर्शने 37
एवमयं 37

वादसंख्या
एष म आत्मा - छा ३-१४-४ 37
एष हि द्रष्टा 27
ओदनपाकं पचति - महाभाष्यम् 46
ओमिति ब्रह्म तै.शिक्षा. ८ 45
कक्षोपस्थ- 64
कथमसत: सज्जायेत - छा. ६-२-२ 53,61
कन्थां वहसि - भास्करीयादय: 64
कपिलाक्षीर - स्मृति: 65
करणाधिपाधिप: - श्वेताश्वतर 37
कर्ता शास्त्रार्थ - ब्र.सू. २-३-३३ 63,66
कर्मकर्तृ - ब्र.सू. १-२-४ 66
कस्त्वं - भारावतम् 65
कं ब्रह्म खं ब्रह्म - छा. ४-१०-५ 57
काणादशाक्य - अत्रि: दत्तात्रेयश्च 64
काममेकं - मैत्रायणीयब्राह्मणम् 65
कामात् गोप्य: - भागवत ७-१-३० 65
कारण - अस्मद्ग्रन्थेषु 37
कात्स्न्येनानभिव्यक्त - ब्र.सू. ३-२-३ 66
कालस्य हि - उद्योगपर्व ६२,२३ 37
किमर्था वयम् 65
कुतस्तु खलु - छान्दोग्य 53
कुर्यात् 63
कुर्वन्नेवेह - ईशावास्य 64,65
कृतोदक: 65
केन वृत्तेन - अजगरोपाख्यानम् 65

वादसंख्या
केशमात्रान्, वृद्धदक्ष: 64
क्रियागुणै: - श्वेताश्व ५-१२ 37
क्रीडत: - विष्णुपु. १-२-१८ 42
क्षिप्रं भवति - गी. ९-३१ 65
क्षेत्रज्ञं - गीता १३-२ 40,49
गरुडमात्मानं 66
गुणैर्गुणान् - भागवत ११-८ 65
गुहां प्रविष्टौ ब्र.सू. १-२-११ 66
गृहीतमौनव्रत: 65
गृहीतं यत् - मेधातिथि: 64
गोमृग - अजगरोपाख्यान 65
गौरनाद्यन्तवती 54
गौरित्यत्र क: शब्द: - शाबरे उपवर्ष: 47
गौर्वाहीक: - महाभाष्यम् 54
घटादि - न्यायसूत्रम् ५-१-७ 60
चतुर्विधा: - अत्रिप्रभृतय: 60
चरेत् 65
जगद्व्यापारवर्जम् - ब.सू.४-४-१७ 37,51
जगद्व्यापारवर्जम् - वृत्तिकार: 37
जन्मजरा - सांख्यकारिका 36
जन्माद्यस्य - ब्र.सू. १-१-२ 66
जपस्तप: 65
जरठवत् - अद्वैतिन: 65
जरद्गवं - शाबरभाष्ये प्रथमाध्याये 38
जानन्नपि - स्मृति: 65
जीवमुख्यप्राण - ब्र.सू. १-४-१७ 66

वादसंख्या

उपासा - ब्र.सू.१-१-३२ 66
जीवेनात्मना छा. ६-३-२ 40
जुष्टं यदा - मुण्डक ३-१-२ श्वेताश्व. ४-७37
ज्ञानदण्ड: 65
ज्ञाननिष्ठ: - भागवत ११-१८-२८,२९ 65
ज्ञोऽत एव ब्र.सू.२-३-१९ 66
तच्छंयो: तै.उप. 65
तत् केन कं - बृ.उ. 51
तत्र चोत्सृष्ट - वि.पु. 65
तत्र परिव्राजका: - पराशरस्मृति 64
तत्रागमत् - भागवतम् 65
तत्त्वमसि - छा.उ. 34,38,41,44,49,65,66
तत्त्वविद: 65
तथा हेयगुण - विष्णुधर्म 51
तदत्र श्लोकौ - शाट्यायनकोप 64
तदनुप्रविश्य - तै.उप. 61,62
तदसदेव 56
तदात्मानं तै.आ. 56
तदा विद्वान् - मुण्ड. ३-१-३ 67
तदुत्तरत्र - अद्वैतिन: 65
तदेव प्रीतये 57
तदैक्षत छा. ६-२-३ 56
तद्धेदं तर्हि बृ.उ. ३-४-७ 56
तद्धैके छा. ६-२-१ 56
तद्धैतत् बृ.उ. ३-४-१० 36

घादसंख्या

तद्यथा पुष्करपलाशो 65
तन्नामरूपाभ्याम् बृ.उ.३-४-७ 45,56
तम एकीभवति सुबालोप- 39,53
तस्मादेवं - तैत्तिरीयकम् 65
तस्मात् ब्राह्मण: बृ.उ.५-५-१ 65
तस्माद्यज्ञोपवीत्येव तै. आ. 65
तस्माद्वा एतस्मात्. तै.उप. 67
तस्मान्न्यासमेषां तै.उप. 65
तस्य भुक्तवत: 65
तस्य सम्यक् - सनत्सुजात 65
तस्यात्मपरदेहेषु- वि.पु. २-१४-३१ 36
तस्योदिति नाम छा. ३ 45
तस्योपनिषदह: बृ.उ. ४-१-२० 45
तातैष वह्नि: वि.पु 52
तीर्णस्तदुभयं 65
तेजस्वी - भागवते ११-८-४५ 65
तेन मायासहस्रं वि. पु. ११-९-२० 54
तेषां सत्यानां 39
त्यक्त्वा यज्ञोपवीतं - अत्रिस्मृति: 64
त्यज धर्ममधर्मं च - शान्तिपर्व 62
त्यज धर्ममसंकल्पात् 65
त्रयो धर्मस्कन्धा: 65
त्रिकोणसास्ना - श्रीभाष्य 65
त्रिदण्डधारणम् - व्यासस्मृति: 64
त्रिदण्डं - हारीतस्मृति: - नारसिंहपुराणं च 64

वादसंख्या

त्रिदण्डिरूपधृक् - दत्तात्रेय 64
त्रिस्थान - गालवः 64
दग्धाखिलाधिकारत्वात् - अद्वैतिनः 62,65
दण्डानि त्रीणि - शाण्डिल्यः 64
दण्डो देवदत्तात् - मध्यस्थाः 66
दासभूताः स्वतः सर्वे - मन्त्रराजपदस्तोत्रम् 37
दासोऽहं कोसलेन्द्रस्य रा. सुन्दर - 37
दुः खमित्येव - गीता १८-८ 65
दुर्घटत्वमविद्यायाः - अद्वैतिनः 41
दृष्टेर्द्रष्टा बृ.उ. ५-४-२ 46
दृष्टो धर्मव्यतिक्रमः आप. धर्म २-१३-७
गौतमधर्म- १-१-३ 65
देवतासायुज्यात् - द्रमिडभाष्यकारः. 37
देवमायेव निर्मिता - रामायण 39,54
देवादिभेदेऽपध्वस्ते - वि.पु. २-१६-३३ 56
देवोऽहमिति - तन्त्रम् 66
देहजात्यादि - वाररुचे स्वरूपग्रन्थे 65
द्वा सुपर्णा - श्वेताश्व ४-६,
मुण्डक ३-१-१,कठ. 37
द्वितीयाद्वै बृ.उ. ३-४-२ 36
धर्ममुपशिक्षमाणाः - अजगरोपाख्यानम् 65
धर्मार्थकाम - अजगरोपाख्यानम् 65
धीसन्ततिः - प्रबोधचन्द्रोदय ३-८ 51
न कर्म लिप्यते - ईशोपनिषत् 64,65
न कर्मणा न प्रजया - तै.. नारा. १२-८ 65
नखानि निकृत्य 64

वादसंख्या

नखानि यज्ञोपवीतं 64
न च स्मार्तम् ब्र.सू. १-२-२० 66
न चात ऊर्ध्वं - बोधायन ३-१०-४० 64
न चेदुत्पत्ति - परमतभङ्गे चार्वाक 55
न तत्र रथाः - बृ.उ. ९-३-१० 36
न तत्समश्च - श्वतोश्व ६-८ 59
नताः स्म - अहिर्बुध्न्यसंहिता 45
न तेषां - विखनस्सूत्रम् 65
न दण्डं 65
न दृष्टेर्द्रष्टारं पश्ये: बृ.उ. 5-4-4 46,51
न दैवचरितं चरेत् 65
न पपाठ - वि.पु. 65
न मे पार्थास्ति गीता. 3-22 65
नवान् - श्रुतिः 64
न शब्द - स्मृतिः 45
न शूद्राय मतिं 62
नष्टे जल - हारीतस्मृतिः 64
न सन्नासन्न 44.
न सुकृतं छा 8-4-1 39
न स्थानतोऽपि ब्र.सू. 3-2-1 66
न हि तत्करणं लोके - कुमारिल 46
न हि निन्दान्यायः 65
न हिंस्यात् 64
नागुः क्षीरेण 65
नागु:संपन्नं 65

वादसंख्या

नात्मा श्रुते: ब्रू. 2-3-18 66
नात्मा श्रुतेरित्यत्रापि - श्रीभाष्यम् 66
नानात्मान: - कणानसूत्रम् 3-2-19 36
नानुमानम् ब्र.सू. 1-3-3 66
नाप्यैक्योपदेश श्रीभाष्य 49
नाविरत: कठोप. 1-2-24 63,65
नाविशेषात् ब्र.सू. 3-4-13 65
नासदासीत् - यजुर्ब्राह्मण 2-8-9 39
नास्त्येव - अद्वैतिश्लोक: 50
नाहमत्र भोग्यं पश्यामि छा .3 57
निगूढश्चरसि - भागवत 65
नित्यनिवृत्ताविघ्नं - शंकरभाष्य 34
नित्यं विभुं - मुण्डक 1-1-6 58
निरञ्जनम् - श्वेताश्व . 6-19 45,52
निरञ्जन: परमं - मुण्डक 3-1-3 51
निरस्ताखिल - श्रीभाष्य 50
निर्गुणं - गीता . 13-14 45,52
निर्मातारं चैके ब्र.सू. 3-2-2 66
निर्विशेषं - श्लोकवार्तिकम् 35
निर्विषया - श्रीभाष्य 41
निष्कलं - श्वेताश्व . 6-19 52
निस्तुति: - शान्तिपर्व 251-7-13 श्लोका: 65
नेदं मुखं - काव्यादर्श: 2-9-4 51
नेह नानास्ति बृ.उ. 6-1-9 36,37
नैति तद्द्रव्यताम् वि.पु. 2-14-27 51

वादसंख्या

न्यास एव 65
न्यासे कुटीचक: - भागवत 65
पञ्चरात्रादिमूल: - अद्वैतिन: 64
पतिं पतीनाम् - श्वेताश्व 6-7 37
परमहंसा नाम - पराशरस्मृति: 64
परमहंसा नाम वृक्षैकमूले - वैखानससूत्र 65
परमं साम्यम् - मुण्डकं 3-1-3 37
परमात्मात्मनोर्योग: वि.पु. 2-14-27 51
परस्मिन् - शंकराचार्यग्रन्थ: 45
परात्तु तत् - ब्र . सू. 2-3-40 66
परास्य शक्ति: - श्वेताश्व 6-8 37,52
परिव्राट् - मैत्रायणीयब्राह्मणम् 65
पुमान्न देव वि.पु. 2-13-98 36
पुर: पञ्चशतम् - भागवतम् 65
पुरुषो - तै.उप. 37
पुंसां जटाभरण - भागवत 65
पूर्वबाधेन नोत्पत्ति: - मीमांसका: 52,60
पृथगात्मानं - श्वेताश्व 1-6 37
पौर्णमास्यां - लिखित: 64
प्रक्षालनाद्धि - वनपर्व 2-4-8 38
प्रकृतिश्च ब्र.सू. 1-4-23 53
प्रकृतैतावत्त्वं - ब्र.सू. 3-2-21 66
प्रत्यस्तमितभेदं - वि.पु. 6-7-53 45
प्रमाणान्तर - अद्वैतिन: 64
प्रयोजनमनुद्दिश्य - न्याय: 34

	वादसंख्या
प्राणस्तथानुगमात् ब्र.सू. 1-1-29	66
प्राणा वै सत्यं बृ.उ. 4-1-6	55
बहिस्स्सूत्रं -	64
बहु स्यां - तै.उ, छा . उ	45,53,59
बाल: क्रीडनकैरिव - सभापर्व 40-78	42
बृहति बृंहयति - अथर्वशिरसि	45
ब्रह्मचर्यदिव	64
ब्रह्मणा तै.उ.	52
ब्रह्मण्याधाय गीता 5-10	52
ब्रह्म भवति	37
ब्रह्म वनं	53
ब्रह्मविदाप्नोति - तै.उ	51
ब्रह्म वेद मुण्डक 3-2-9	37,51
ब्रह्मसंस्थ: छा. 2-23-1	65
ब्रह्मसूत्र - उशना:	64
ब्रह्मसूत्रं - अत्रि:	64
बह्माहमिति - स्मृति:	66
ब्रह्मैवेदं - अद्वैतिन:	50
भक्तिज्ञान - अजगरोपाख्यानम्	65
भगद्बोधायनकृतां - श्रीभाष्य	66
भगवान् श्वेत:	53
भिन्नप्रवृत्ति - कैयट	38
भूयसां - पू.मि.सू. 12-5-23	37
भेदवादिनस्तु - श्रीभाष्यम्	56
भेदव्यपदेशाच्च - ब्र.सू.1-1-22	66

	वादसंख्या
भेदव्यपदेशात् - ब्र.सू.1-3-4	66
भेदादिति - ब्र.सू. 3-2-12	66
भोगमात्रसाम्य - ब्र.सू. 4-4-21	37,51,66
मद्भक्तान् - भगवदुक्क्ति:	65
मनो ब्रह्म छा. 3-18-1	66
मन्वर्थविपरीता तु - भृगुस्मृति	6-71
मम साधर्म्यम् - गीता.14-2	51
मायया सततं वेत्ति गीताभाष्य 4-6	54
मायामात्रं - ब्र.सू. 3-2-3	66
मायावत्समयादय: - न्यायकुसुमाञ्जलि: 2-234	
माया वयुनं - निरुक्तम्	54
मायां तु प्रकृतिं - श्वेताश्व 4-10	39,54
मुण्ड: शिखी वा - गौतमधर्मसूत्रम्	64
मृत्तिकेत्येव सत्यम् छा.6-1-4	54,55
मेखलाजिन - दक्ष:;ब्रहस्पतिश्च	64
मेघोदय: सागर-गी.भाष्ये 9-6 वि.पु.?	54,66
मोक्षाश्रमे - दत्तात्रेय:	64
मौनी जातरूप- लोकाक्षिगृह्य	65
य आत्मनि तिष्ठन् बृ.5-7-22	37
य इमं सर्वदा - सनत्सुजात:	65
यक्षानुरूपो बलि: - महाभाष्यम्	44
यच्चान्यथात्वं - वि.पु	55
यज्ञोपवीत - मिताक्षरा 3-58	64
यज्ञोपवीतं विसृजेत् - काठकमिताक्षरा 3-58	64

वादसंख्या

यज्ञोपवीती - वसिष्ठ: 64
यतीनां त्रीणि - अङ्गिरा: 64
यतेर्लिङ्गं - अङ्गिरा: 64
यते: सत्यपि - मोक्षधर्म 65
यतो वा इमानि - तैत्ति. भृगु - 1 37
यतो वाचो - तैत्ति.आ़न - 9 38
यत्तदद्रेश्यम् - मुण्डक 1-1-6 52
यत्र त्वस्य सर्वम् बृ.4-4-14 36-37
यत् सांख्यै: प्राप्यते स्थानं गीता.5-5 63
यथा चोलनृप:-संवित्सिद्धि: 59
यथा न क्रियते ज्योत्स्ना -विष्णुधर्म 51
यथैक एव सविता - सिद्धित्रयं 59
यदाग्नेय: -तै.सं. 2.6.5 38
यदा पश्य: मुण्डक 3-3 51
यदि मे - भारत 65
यदीच्छेत्- लोकाक्षिगृह्य 65
यदृच्छयोप- भागवत 11-18-35 65
यद् ब्रह्मणो गुणविभूति-तत्त्वसार 52
यद् भूतयोनिं मुण्डक 1-1-6 53
यद्यन्योऽस्ति- वि.पु.2-13-90 36
यद्वा कल्पित -अद्वैतिन: 38
यद्वृत्तयोग:- मीमांसावार्तिक 38,54
यद्वै किं च मनु: - यजुस्संहिता 64
यन्न सन्तं- स्मृत्यन्तरम् 65
यर्हि वाव - अजगरोपाख्यान 65

वादसंख्या

यर्ह्येवं - सनत्सुजात 65
यस्त्वात्मरतिरेव गीता-3-17 65
यस्य तम: शरीरं बृ.उ.5-7-17 39,53
यस्यात्मा शरीरं बृ.उ 5-7-22 37
य: सर्वज्ञ: मुण्डक.1-1-9 34,37,52
यं कामं - छा. 37
यावन्न स्यु : - मेधातिथि: 64
युक्तस्वप्नावबोधस्य गीता. 6-17 63
युवा सुवासा: तै.आ 64
ये तु निर्विशेषं - श्रीभाष्यं 1-1-2 66
ये पुनरस्यैव - श्रीभाष्य 2-1-23 66
योगिनां विविधै: वि.पु. 65
योऽन्यथा सन्तमात्मानं - उद्योगपर्व 65
यो वा एतत् बृ.5-8-10 65
रसं ह्येवायं तै.उप. 37,50
राजन् - आश्वमेधिकपर्व 65
लब्धरूपे क्वचित् - ब्रह्मसिद्धि 39
लिङ्गं तु - अत्रि: 64
लोकवेदविरुद्धयो: - न्यायकुसुमाञ्जलि 65
लोके येष्वर्थेषु - शा.भा 66
वचसां वाच्यमुत्तमम् - जितं ते स्तोत्रम् 45
वर्णाश्रमोचित - श्रीभाष्य 65
वस्त्वेकमेव वि.पु. 57
वाचारम्भणं विकारो छा.उ.6-1-4 55
वातरशना: - तै.आ. 65

वादसंख्या

वाररुचे - अद्वैतिन: 65
वाशब्दश्चार्थ:-
यतिलिङ्गसमर्थने वात्स्यवरद- 64
विगीतं मदविद्या - अद्वैतिन: 61
विज्ञानमानन्दं बृ.उ.5-9-28 57
विज्ञाते तु 65
विना यज्ञोपवीतेन - हारीत: 64
विभेदजनकेऽज्ञाने - वि.पु.6-7-96 37
विवादाध्यासितं - श्रीभाष्य 61
विशेषणभेद - ब्र.सू.1-2-2 66
विषयेषु - भागवते 11-8-40 65
विषं भुङ्क्ष्व - चित्सुखी 38
विष्णुरूपं - हारीत: 64
विष्णोर्विचित्रा: 54,66
विसृजेत् - काठकश्रुतिरिति मिताक्षरा 64
वृक्षमूले - विखनस्सूत्र 65
वृद्धिह्रास - ब्र.सू.3-2-20 36
वेणुरन्ध्रविभेदेन वि.पु.2-14-32 36
वेदैश्च सर्वै: गीता 15-15 45
वैधर्म्याच्च ब्र.सू.2-2-28 61
वैष्णवं - श्रुति: 37,51
व्यपगतनिद्रा - श्रुति: 37
शक्तौ हस्तिकपाटयो: - पा.सू.3-2-54 37
शब्दब्रह्मणि - स्मृति: 45
शब्दश्चातोऽकामकारे - ब्र.सू.3-4-31 65

वादसंख्या

शब्दार्थत्वविवर्तमान - साम्बपञ्चाशिका 45
शमलं भक्षय 44
शरीरिभूत - श्रीभाष्य 53
शारीरं केवलं - गीता 4-21 63,65
शीतो भव हनूमत: - रामा. सुन्दर 52
शुद्धे महाविभूत्याख्ये वि.पु.6-5-72 45
श्रेष्ठश्च ब्र.सू.2-4-7 66
स एकधा-छा.7-26-2 37
स कारणं - श्वेताश्व 6-9 37
स खल्वेवं - छा.उ.8-15-10 65
सखा मे गोपाय -श्रुति: 64-65
सतां वर्त्म - वि.पु. 65
सति संपद्य - छा.उ.6-9-2 53
सति संभवे - श्रीभाष्य 66
सत्त्वासत्त्वसमुच्चय:-जैन: 60
सत्यकाम: छा.उ.8-1-5,8-7-1 37,52
सत्यं ज्ञानं - तै.आ.1 38
सत्संप्रयोगे पू.मी.सू.1-1 39
सदेव सोम्य छा. 6-2-1 37,53
सन्ति मे गुरव: - भागवत 11-7-12 65
सन्ध्ये सृष्टि: ब्र.सू.3-2-1 36,66
सन्मूला: - छा.6-8-6 53,54
समुद्रं गच्छ तै.सं. 64
संपद्याविर्भाव: ब्र.सू.4-4-1 66
सर्वगत्वादनन्तस्य-वि.पु.1-9-78 36

वादसंख्या

सर्वज्ञ: - वि.पु. 37

सर्वत्र गीता. 6-29 36

सर्वधर्मान् गीता.18-66 65

सर्वभूतस्थं गी.6-29 36

सर्वस्यापि 38

सर्वस्येशान: बृ.उ. 6-1-22 37

सर्वं पर - मनु.4-160 37

सर्वं ह पश्य: छा.7-26-2 51

सर्वाधारं - मैत्रायण्युप- 45

सर्वान्नानुमति: - ब्र.सू.3-4-28 65

सर्वारम्भ - गीता 12-16,14-25 65

सर्वे वेदा: -कठ. 1-2-15 45

सर्वेषु लोकेषु छा.7-25-2 37

सविशेषं - श्रीभाष्य 66

सविष्टरमन्त्रं- 64

सशिखं वपनं 64

सशिखान् - लोकाक्षिगृह्य 65

स स्वराट् छा.7-25-2 37

संकल्पादेव ब्र.सू.4-4-8 37

संकल्पादेवास्य छा:7-25-2 37

संख्याता देवमायया - काठक 54

वादसंख्या

संन्यासस्य - गीता -18-1 66

संमानात् - मनुस्मृति: 65

संमानपरिहारार्थं - सनत्कुमार: 65

संविन्नित्या - श्रीभाष्य 58

सात्त्विकेष्वथ - मत्स्यपुराण 48

साम्बरा: - विखनस्सूत्रम् 65

सायंतनम् - भागवत- 11-8-9 65

सार्वज्ञ्यसर्वशक्त्यादि - 52

सुरक्षितं - स्मृति: 63

सुषुप्त्युत्क्रान्त्यो: 66

सूत्राण्यपि - शांकरसूत्रभाष्य 66

सूत्राभिप्राय - भास्करभाष्यारम्भे 66

सेवा श्ववृत्ति: - मनु: 4-6 37

सो ऽ कामयत - तै.उ 37,59

सोऽश्नुते - तै.उप.आनन्द - 1 37,51

स्तुतयेऽनुमतिर्वा ब्र.सू.3-4-14 64,65

स्वापमदमूर्छादिषु च - श्रीभाष्य 51

स्वेन रूपेण छा.8-12-2 44

स्वे महिम्नि 37

स्वै: स्वैर्य्यवस्थितै: - संवित्सिद्धि: 61

हरिदासस्य - भागवते 10-75-27 37

हीनो यज्ञोपवीतेन - वृद्धजाबालि 64

* * *

द्वितीयभागे आचार्यकृतकारिकासूची

कारिका	वादसंख्या
अयोग्यपारतन्त्र्यं हि	37
अर्थवत्त्वेऽपि सूत्राणां	66
अवस्थान्तरयोगित्वं	53
अवाच्यमिति वाच्यं चेत्	45
अस्मच्छब्दानुबन्धेन	36
आगन्तुरपृयक्सिद्धो	53
आनन्त्यानन्दनित्यत्व	58
आशरीरं प्रवृत्तात्वात्	63
इत्थमध्यस्तविश्वस्य	53
इश्वरोऽहमहं भोगी	37
जीवाज्ञानविभागात्	40
द्वितीयव्यतिरेकोक्त्या	59
धर्मं जिज्ञासमानस्य	66
परतन्त्रान्वयाभावे	37
भावान्तरमभावो वा	38
भावो यथा तथाभाव:	38
मायामृगोऽपि मारीच	39
मायोत्थज्ञानवेद्येऽर्थे	54
मिथ्यात्वस्य च मिथ्यात्वे	43
मीमांसाशास्त्रसंदर्भ:	36
वाक्यार्थस्य सखण्डत्वं	38
विकल्पाविषयत्वं चेत्	47
विरोधोद्घाटनं मुक्त्वा	36
विशेष्यविषया शक्ति:	38
श्रुतिस्मृतीतिहासेषु	37
सगुणे निर्गुणे वापि	38
सर्पभूरन्ध्रमालादि	53
सामान्यस्य निषेधस्य	66
सौगतोक्तेऽपि विज्ञाने	58
स्यिरीकृत्तो विरोध: स्यात्	36
स्वदु:खं यदि जानाति	37
स्वातन्त्र्यं सुखहेतु: स्यात्	37
स्वातन्त्र्यपारतन्त्र्याभ्यां	37
स्वातन्त्र्यमपि दु:खाय	37
हरिदासस्य राजर्षे:	37
हिरण्यासुरसिद्धान्त	37

* * *

प्रथमभागस्य शोधनिका

पृष्ठम्	-पङ्क्ति:	अशुद्धम्	शुद्धम्
5	20	अध्येतृणाम्	अध्येतॄणाम्
6	3	निविशेष	निर्विशेष
7	1	ब्रह्माब्द	ब्रह्मशब्द
9	1	ब्रह्माब्द	ब्रह्मशब्द
13	1	ब्रह्माब्द	ब्रह्मशब्द
15	1	ब्रह्माब्द	ब्रह्मशब्द
”	5	मूलवं	मूलत्वम्
16	16	उपास्थापितं	उपस्थापितम्
19	4	लक्षकलशब्दात्	लक्षकब्रह्मशब्दात्
27	1	जिज्ञासापपत्ति	जिज्ञासानुपपत्ति
29	23	तद्विषयकस्य भ्रम	तद्विषयकज्ञानस्य भ्रम
33	23	विश	विश इत्येतन्निष्कासनयम्
54	14	विनियोगा:	विनियोग:
55	11	ननुभयार्हं	ननूभयार्हं
60	2	प्रयुक्तिश्रु	प्रयुक्तिस्तु
61	7	यज्ञाङ्गत्वम्	विद्याङ्गत्वम्
62	3	न ह्यविवित	न ह्यविदित
64	14	ध्ययनन्निष्पत्ते:	ध्ययननिष्पत्ते:
70	13	प्राशास्त्य	प्राशस्त्य
75	9	सामाधत्ते	समाधत्ते
79	20	विचाररास्त्र	विचारशास्त्र
86	19	प्रसङ्गदित्यर्थ:	प्रसङ्गादित्यर्थ:
11	20	श्रुतिपन्नं	श्रुतिप्रतिपन्नं
88	16	त्वेताभिमतस्य	त्वेनाभिमतस्य
89	21	मविधेत्व-	मविधेयत्व-

90	14	भावदित्यर्थः	भावादित्यर्थः
90	19	ज्ञानास्य	ज्ञानस्य
90	22	ममेत्याद्याकरक-	ममेत्याद्याकारक-
94	8	विधेभत्वं	विधेयत्वम्
95	20	विर्भाविवक्षा	विर्भावविवक्षा
95	23	समाधत्त	समाधत्ते
114	7	विक्षित	विवक्षित
114	20	न्यायानाभिज्ञाातायाः	न्यायानभिज्ञतायाः
119	6	पश्चत्तनं	पश्चात्तनं
124	18	ज्ञानविषयत्वात्	ज्ञानाविषयत्वात्
127	8	चन्दैक-	चन्द्रैक
132	3	प्यस्मर्तव्य-	प्यविस्मर्तव्य-
138	15	सन्प्रत्ययेच्छायां	सन्प्रत्ययार्थेच्छायां
140	18	निविदिषा-	विविदिषा-
148	17	शुक्तल-	शुक्ल-
150	14	तत्त्वमसीति	दशमस्त्वमसीति
155	19	लाद्यवात्	लाघवात्
167	18	रूपेणत्यर्थः	रूपेणेत्यर्थः
173	20	परभीष्टः	पराभीष्टः
179	1	वरोधादि-	विरोधादि-
189	18	मुक्तवादित्यर्थः	मुक्तत्वादित्यर्थः
211	11	इत्येत्	इत्येतत्
217	8	ज्ञानव्य-	ज्ञातव्य-
218	15	विरोधभाव-	विरोधाभाव
220	18	अपेक्षमाण इत्यतःप्राक् ''रागोऽपीति। क्रमेण पुरूषं प्रवर्तयतीत्यनेनान्वयः'' इत्यधिकं संयोजनीयम्।	
224	23	समृद्ध्यर्थनया	समृद्ध्यर्थतया
225	16	पृथकत्व-	पृथत्तव-

240	22	माध्यामिक:	माध्यमिक:
241	12	यत्तवत्	यत्तावत्
245	13	तिठाम:	तिष्ठाम:
250	8	समयबन्धहेतु:	समयबन्धे हेतु:
253	18	करणत्वं च इत्यनन्तरं	''कारणत्वविशेष:कारणत्वं च'' इत्यधिकं संयोजनीयम् ।
259	19	व्याक्यायां	व्याख्यायां
271	23	वाद्यप्यसिद्धे:	वाद्याप्यसिद्धे:
277	11	निषया-	विषया-
289	11	समाधत्ते इत्यत: पूर्वं	''संनिकर्षमात्रं न कारणमित्याशयेन '' इत्यधिकं संयोजनीयम् ।
291	10	आहश्च	आहुश्च
,,	16	सज्ज्ञानस्य	सति ज्ञानस्य
303	8	खभावता	स्वभावता
303	16	निराश्रयणं	निराश्रयाणां
305	13	पुरुषशोभय-	पुरुषोभय
306	21	समाधत्त	समाधत्ते
311	17	पिण्ह	पिण्ड
,,	18	ग्रणे	ग्रहणे
313	18	इत्थामिति	इत्थमिति
314	17	मित्यात्राह	मित्यत्राह
317	11	रुपयो:	रूपयो:
320	22	आश्रज्ञाना-	आश्रयज्ञाना-
321	3	स्वपतीति-	स्वप्रतीति-
321	22	किंचिद्ग्राहक-	किंचिद्ग्राहक-
327	19	शृण्वतोऽप्पन्ध	शृण्वतोऽप्यन्ध
330	1	संकीर्ण	संकीर्णं
330	9	विषयत्वेन	विषयत्वे न

337	12	सामाधत्ते	समाधत्ते
353	9	विषयायित्वम्	विषयित्वम्
354	15	विचारत्वम्	विचारसहत्वम्
354	18	-1-निष्कासनीयम्	
355	13	सन्यात्रम्	सन्मात्रम्
358	15	भूतविरोधात्	भूतवेदविरोधात्
363	2	उदोपाधि	उतोपाधि
364	22	आविद्या	अविद्या
365	13	चोपदेश:	य उपदेश:
365	18	तन्मतेवोच्यते	तन्मतेनोच्यते
366	21	भिन्त	भिन्न
366	22	विषयाभावाधीनाया	विषयाभावाधीनतया
366	23	निसंवादेन	विसंवादेन
366	24	नाश्चिततया	नाश्रिततया
366	25	चमकां	चमसं
367	13	वक्तु	वक्तुं
370	12	नश्चिन्नम्	नश्छिन्नम्
371	19	नुमानदपि	नुमानादपि
373	19	लुण्टाकममथनै:	लुण्टाकमथनै:
374	8	दृश्यत्वाबाध्यत्व	दृश्यत्वबाध्यत्व
374	14	दूषिततमित्याह	दूषितमित्याह
379	4	च्छिन्नतस्य	च्छिन्नस्य
379	9	पक्षाधर्म	पक्षधर्म
379	20	स च	सा च
380	10	विशेषत्यत्व	विशेष्यत्व
380	16	तस्साधनस्य	तत्साधनस्य
380	17	ग्राहाणां	ग्राहकाणां
381	19	प्रयञ्चस्य	प्रपञ्चस्य

383	11	समाधत्त	समाधत्ते
383	13	सत्खत्व	सत्यत्व
387	14	वियषय	विषय
387	15	मानस्यापि उष्णत्व	मानस्यापि बाध: उष्णत्व
387	15	प्रत्यक्षेणेव	प्रत्यक्षस्येव
387	16	नानुमानेन	नानुमानमात्रेण
390	1	किंचित्	कंचित्
394	16	सामाधत्ते	समाधत्ते
399	21	प्रत्यक्षगात	प्रत्यक्षगत
403	16	प्रमीयत	प्रमीयन्त
403	19	देन्तर	देशान्तर
403	21	कालाधिकरण	कालान्तराधिकरण
403	22	कालाधिकरण	कालान्तराधिकरण
404	9	........इति रिक्तस्थाने	''ज्ञानविषयत्वं प्रकाशमानत्वम् , ज्ञानविशेषप्रमाविषयत्वं प्रमितत्वम् '' इति पूरणीयम् ।
407	5	व्यावृवि	व्यावृत्ति
407	11	प्रमात्वासंभवात् इत्यत:	प्राक् ज्ञानस्य सदोषत्वे नित्यत्वमात्रेण '' इति पूरणीयम् ।
408	12	इत्यपाठ:	इत्यपपाठ:
412	9	तमो:	तयो:
414	23	तदाभिन्ना	तदभिन्ना
417	6	निरान्नरोति	निराकरोति
417	6	लक्षारस	लाक्षारस
420	12	अनेनैववार्थेन	अनेनैवार्थेन
422	12	संबद्धत्वभावा	संबद्धत्वाभावा
426	7	नुपपति	नुपपत्ति
428	11	पर्यायां	पर्यायायां

434	13	वैलक्यं	वैकल्यं
436	9	इदानं ज्ञानीं	इदानीं ज्ञानं
437	21	अव्यवधानात् इत्यनन्तरं	"नैरन्तर्यात् एककालिकत्वात्" इति अधिकं संयोजनीयम् ।
441	15	कुचान्तर्भाव:	कुत्रान्तर्भाव:
444	7	संबन्धार्भात	संबन्धान्तर
445	13	कारच्च	काराच्च
450	19	सति भाव:	इति भाव:
453	9	अविद्यनुभव:	अविद्यानुभव:
453	17	व्यघात:	व्याघात:
455	21	अविधानुंभव	अविद्यानुभव
458	8	तथा तत्प्रकाश	तथा च तत्प्रकाश
458	13	बाह्योनुभव	बाह्यानुभव
460	10	" । " इयं रेखा निष्कासनीया	
461	9	रूपत्वानङ्गीकारा	रूपत्वाङ्गीकारा
461	12	वच्छिन्नै	वच्छिन्ने
462	19	अज्ञानस्य	न च अज्ञानस्य
462	23	यादिति	स्यादिति
469	16	विस्तरस्विति	विस्तरस्त्विति
469	23	"निरुपाधिकयोरिति"	इत्यत:प्राक् "आद्ये इष्टापत्ति: द्वितीये आह" इति संयोज्यम् ।
470	12	अभवादिति	अभावादिति
472	15	स्थित्वश्रुते:	स्थिरत्वश्रुते:
473	21	अनेद्यत्व	अवेद्यत्व
483	15	अवेद्यत्वमेव	वेद्यत्वमेव
483	15	अवेद्यत्वस्वरूप	वेद्यत्वस्वरूप
487	18	दुर्वामिति	दुर्वारमिति
488	22	वस्तुतस्ययो:	वस्तुतस्तयो:

492	2	प्राकाट्य	प्राकट्य
494	23	विरोध:	विरोधश्च
505	3	सामगी	सामग्री
514	19	व्यतिरिक्तत्वे	व्यतिरिक्तत्वे
522	22	कोत्तरवध्यभावात्	कोत्तरावध्यभावात्
524	9	प्रयोगि	प्रतियोगि
"	11	त्प्रतियोगि	प्रतियोगि
525	7	शाविषाण	शशविषाण
"	13	"	"
526	8	व्यपदेशशहविस्था	व्यपदेशार्हावस्था
"	23	स्मृत्येदि...न्तर	स्मृत्यादिनामान्तर
529	3	ब्रहोति	ब्रह्मेति
"	10	इश्वरेऽपि	ईश्वरेऽपि
530	11	ईन्वर	ईश्वर
532	21	तदङ्ग	तरङ्ग
533	22	अस्यिन्ननु	अस्मिन्ननु
536	19	भिन्नत्वे	भिन्नत्वेन
537	16	हेता:	हेतो:
538	8	निषध्यन्त	निषिध्यन्त
540	15	अनुसान्धेय:	अनुसन्धेय:
541	10	मत्युपगम्य	मभ्युपगम्य
546	1	'पूर्वत्र''इत्यनन्तरं ''तेनैव'' इत्यत: प्राक्''तेनैवानुभूतिस्वरूपादधिकार्थेन सविशेषतया त्वदभिमतसमस्तविशेषशून्यत्वविरोध: । उत्तरत्र '' इत्यधिकभाग: संयोजनीय: ।	
548	7	व्याख्यानेऽपि मूले इव अधिकं संयोजनीयम्	
556	9	चटादे:	घटादे:
558	20	निरपेक्षत्वम्	निरपेक्षप्रकाशत्वम्
562	9	त्परिहाराय	तत्परिहाराय

568	4	शास्रं	शास्त्रं
569	2	अहंत्वेदत्वाभ्यां	अहंत्वेदंत्वाभ्यां
571	9	विद्यामानस्य	विद्यमानस्य
573	12	मत्युपेत्य	मभ्युपेत्य
574	17	''परामर्श:''इत्यनन्तरं	''स्वापस्याज्ञानरूपत्वात्''इति संयोजनीयम्।
576	13	विरस्यति	निरस्यति
584	8	भवतां	भवता
589	1	हेयत्वापते:	हेयत्वापत्ते:
591	13	योगिगानां	योगिनां
595	20	देशत्तवादि	देशवत्त्वादि
597	23	छायापात्त्या	छायापत्त्या
601	21	पुर्व	पूर्व
,,	23	निधर्मक	निर्धर्मक
607	20	निष्फलं	निष्कलं
,,	23	विशेषाशश्रयत्व	विशेषाश्रयत्व
609	16	धात्वर्य	धात्वर्थ
623	2	भातीति	भामीति
629	21	भेदनिषेधकशास्त्र	भेदशास्त्र
,,	22	कियायामेव	क्रियायामेव
665	1	पौर्गार्य	पौर्वापर्य
668	1	मित्यशाङ्कते	मित्याशाङ्कते
677	7	ज्ञास्त्रस्य	शास्त्रस्य
679	8	बाष्पारेपित	बाष्पारोपित
681	17	कलो	काले
684	8	स्थिमन्यत्र	स्थितमन्यत्र
686	22	न नु तन्नाश:	न तु तन्नाश:
687	15	चक्रे	दण्डे

691	11	भासान्तरोत्पाया	भासान्तरोत्पत्त्या
692	4	न सुषुप्त	न च सुषुप्त
694	19	विशेषात्	विशेषान्
697	11	निदुषो	विदुषो
701	18	ब्रह्मोत्पत्र	ब्रह्मेत्यत्र
704	9	लक्षणो	लक्षणा
706	17	विश्वावाचक	विश्ववाचक
710	11	एवं स्यात्	एव स्यात्
711	23	कल्पनातितिक्त	कल्पनातिरिक्त
712	12	यया	यथा
714	2	सवत्र	सर्वत्र
716	16	हेतुत्वनो	हेतुत्वेनो
,,	18	इत्यार्थ:	इत्यर्थ:
719	9	विषयकसत्वं	विषयकत्वं
722	3	वर्णस्य	वर्णनस्य
,,	11	नज्ञ:	नञ:
,,	12	निकल्पयति	विकल्पयति
723	10	ब्रह्मतिरिक्त	ब्रह्मातिरिक्त
724	7	भासिकवतिति	भासिकवदिति
726	1	ग्रन्थसूची	ग्रन्थकारसूची
728	1	,,	प्रमाणाकरसूची

* * *

Central Sanskrit University
Ministry of Education, Govt. of India
Guruvayoor Campus Library
Puranattukara.P.O., Thrissur-680551
Acc.No. 39370
Acc.Date 27/02/2026

CENTRAL SANSKRIT UNIVERSITY
(Under Ministry at Education, Govt. of India)

GURUVAYOOR CAMPUS LIBRARY

Due Date Slip

Title : ॥ आ न द्र ग गी ॥

Author : इठक्क|परामानन्दजनानार्थदास :

Acc. No. 39370

This book should be returned to the library on or before the date last stamped. Otherwise over-due charges of ₹1/- per book per day will be collected.

Due date of Return	Due date of Return	Due date of Return

CSUGCKL
R65(DDC:181.48) 3
39370
Acc.No: 39370